॥ श्रीः ॥

भिषग्वर श्री गोविन्ददाससेनकृता—

भैषज्य रत्नावली ।

भाषाटीकासहिता ।

अनेक ग्रंथोंके टीकाकार व रचयिता स्वर्गीय वैद्य शंकरलालजी द्वारा परिवर्धित, संशोधित और हिन्दी भाषानुवाद वि[illegible]

खेमराज श्रीकृष्णदास

अध्यक्ष—'श्रीवेङ्कटेश्वर' स्टीम्-प्रेस, बम्बई.

★

संवत् २००९, सन् १९५२.

भूमिका।

भैषज्यरत्नावली आयुर्वेदीय चिकित्सा ग्रन्थोंमें एक उत्कृष्ट और प्रामाणिक चिकित्सा ग्रन्थ समझा जाता है। वैद्य समाजमें आज कल इसका बड़ा आदर है। कारण इसके रचयिता श्रीगोविन्ददाससेनने इसमें अनेक अनुभूत योगोंका संग्रह बड़ी सुन्दर और सरल रीतिसे किया है। इसमें क्वाथ, चूर्ण, अवलेह, आसव, अरिष्ट आदि वनस्पति प्रयोग और रसधातु आदिके द्वारा सिद्ध किये रसायन प्रयोग, इस प्रकार दोनों प्रकारके योगोंका समावेश होनेके कारण इसके द्वारा सभी श्रेणीके वैद्य उत्तमरीतिसे लाभ उठा सकते हैं। इसका प्रत्येक प्रयोग अत्यन्त गुणकारक और आशुफलप्रद होनेसे यह ग्रन्थ वैद्योंको अल्प समयमें ही अत्यन्त आदरणीय हो गया है। अब तक इसके कलकत्ता, लखनऊ, लाहौर आदिमें कई संस्करण हो चुके हैं। पर हमने इसको और भी अधिक उपयोगी बनानेके लिये इसमें दूसरे कई प्राचीन और नवीन ग्रन्थोंके अनेक उत्तम योगोंका संग्रह कर इसको अधिक परिवर्द्धित कर दिया है किन्तु इसमें अन्य ग्रन्थोंके प्रयोगोंके संकलनसे पूज्यपाद वैद्य श्रीगोविन्ददाससेनजीकी धवल कीर्तिमें किसी प्रकारकी बाधा नहीं होगी। बल्कि इससे उनकी उज्ज्वल कीर्ति और भी प्रसारित होगी, ऐसी आशा है। महामान्य कविराज श्रीगोविन्ददाससेनने इसग्रन्थकी अबसे कोई डेढ़ सौ वर्ष पहले रचना की थी। सेन उपाधिसे जान पड़ता है कि वे बंगदेश निवासी थे। पर किस स्थानमें उनका जन्म हुआ था, इसका कुछ ठीक पता नहीं लग सका। पहले इस ग्रन्थका बङ्गालमें अधिक प्रचार हुआ। फिर धीरे धीरे सारे भारतवर्षमें इसका समादर होने लगा। केवल हिन्दी भाषा जाननेवाले वैद्योंके लिये हमने इसके प्रत्येक श्लोकका सरल हिन्दी अनुवाद किया है। हमें इस ग्रन्थके अनुवाद तथा सम्पादन और परिवर्द्धन करनेमें चरक, अष्टांगहृदय, भावप्रकाश, वङ्गसेन, शार्ङ्गधर, चक्रदत्त, योगरत्नाकर आदि कितने ही ग्रन्थोंके सिवाय कविराज श्रीहरलाल गुप्त कविभूषणकी भैषज्यरत्नावलीसे अधिक सहायता मिली है, इसलिये हम उनके प्रति अत्यन्त कृतज्ञता प्रगट करते हैं। तथा कविराज विनोदलालसेनके ग्रन्थद्वारा भी हमें उस कार्यमें थोड़ी बहुत सहायता लेनी पड़ी है, इसलिये हम उनके भी कृतज्ञ हैं, हमने यथा शक्ति इस ग्रन्थको भली प्रकार देख भाल कर पाठकोंके सम्मुख उपस्थित किया है, यदि कोई त्रुटि दृष्टिदोष आदिसे रह गई हो तो कृपया उसको पाठकगण सुधार तथा सूचित कर अनुगृहीत करें। आगामी संस्करणमें वे सब ठीक कर दी जायँगी।

भवदीय-

१६-४-२६ वैद्य-शङ्करलाल हरिशङ्कर-
आयुर्वेदोद्धारक-कार्यालय, मुरादाबाद.

॥ श्रीः ॥

भैषज्यरत्नावली–विषयानुक्रमणिका ।

चूर्णप्रकरणम् ।

रसप्रकरणम् ।

सान्निपातादिज्वरोंमें—

कृमिरोग–चिकित्सा।

पाण्डु–कामला हलीमककी चिकित्सा।

रक्तपित्त–चिकित्सा ४४३

पित्तरोगकी चिकित्सा ६८८

कफरोगकी चिकित्सा ६९२

विषय. पृष्ठ.

हृद्रोगकी चिकित्सा।

मूत्रकृच्छ्रकी चिकित्सा।

मूत्राघातकी चिकित्सा।

अश्मरीकी चिकित्सा।

प्रमेहकी चिकित्सा।

शीतपित्त उदर्द और कोठ-रोगकी चिकित्सा १०८९

अम्लपित्तकी चिकित्सा।

विसर्पकी चिकित्सा।

विस्फोट-चिकित्सा १११६

मसूरिकाकी चिकित्सा।

क्षुद्ररोगोंकी चिकित्सा।

मुखरोगकी चिकित्सा।

कर्णरोगकी चिकित्सा।

नासारोगकी चिकित्सा।

नेत्ररोगकी चिकित्सा ११७६

शिरोरोगकी चिकित्सा ।

प्रदररोगकी चिकित्सा ।

योनिव्यापदकी चिकित्सा ।

इति विषयानुक्रमणिका समाप्ता ।

॥ श्रीः ॥

भैषज्यरत्नावली

भाषाटीकासहिता ।

मंगलाचरणम् ।

भक्त्या नतत्रिदशराजकिरीटकोटि-
रत्नावलीकिरणराजिविराजमानम् ।
श्रीमत्करीन्द्रवदनस्य पदारविन्द-
द्वन्द्वं सदा जयति सिद्धिकरं क्रियाणाम् ॥ १ ॥

टीकाकारोक्त-मंगलाचरण ।

नमः श्रीपूर्ववैद्याय भवरोगनिवृत्तये ।
भैषज्यरत्नावल्याश्च भाषाटीका विरच्यते ॥

भक्तिके साथ नम्र हुए देवराज इन्द्रके किरीटमें सुशोभित रत्नावलीकी किरणोंसे शोभायमान, सम्पूर्ण कार्य्योंके सिद्धिदाता ऐसे श्रीगणेशजीके चरणकमल निर्विघ्नतापूर्वक इस ग्रन्थकी समाप्ति करें ॥ १ ॥

वन्देऽम्बिकाचन्द्रचूडौ जननीजनकावुभौ ।
निपत्य धरणौ भक्त्या प्रत्यूहव्यूहशान्तये ॥ २ ॥

सकल विघ्नोंकी शान्तिके लिये भक्तिसहित जगत्के माता और पिता जो पार्वती शिव उनको मैं (ग्रन्थकार) साष्टाङ्ग प्रणाम करता हूं ॥ २ ॥

श्रीगोविन्दपदारविन्दयुगलं वन्दारुवृन्दारक-
श्रेणीनम्रशिरःकिरीटवलिभिर्नीलोत्पलेन्दिन्दिरम् ।
नत्वा सद्भिषजां मुदे वितनुते गोविन्ददासोऽधुना
नानाग्रन्थमहाब्धिलब्धसगुणां भैषज्यरत्नावलीम् ॥ ३ ॥

स्तुति करतेहुए देवताओंके नम्रहुए शिरोंके किरीटसे शोभायमान और नीलकमलकी कान्तिको लज्जित करनेवाले श्रीकृष्णचन्द्रके चरणकमलको प्रणामकर मैं गोविन्ददास (ग्रन्थकार) वैद्योंकी प्रसन्नताके लिये अनेक ग्रन्थरूपी समुद्रोंको मथकर निकालेहुए नानाप्रकारके गुणोंसे युक्त इस " भैषज्यरत्नावली " नामक ग्रन्थको प्रकाशित करता हूँ॥ ३ ॥

यदि प्रियतमा न स्याद् वृद्धानां भिषजामियम्।
तथाऽपि नव्या नव्यानामानुकूल्यं विधास्यति ॥ ४ ॥

यद्यपि मेरा संग्रह कियाहुआ यह नवीन ग्रन्थ वृद्धवैद्योंको अतिप्रिय न होगा तथापि यह नवीन वैद्योंका विशेष उपकार करेगा, इसमें सन्देह नहीं ॥ ४ ॥

आयुर्वेदके लक्षण।

आयुर्हिताहितं व्याधेर्निदानं शमनं तथा।
विद्यते यत्र विद्वद्भिः स आयुर्वेद उच्यते ॥ ५ ॥

जिस शास्त्रके द्वारा आयुका हित व अहित एवं रोगोंका निदान और रोग नाश करनेके उपाय मालूम हों, उसको आयुर्वेद कहते हैं ॥ ५ ॥

आयुर्वेदकी निरुक्ति।

अनेन पुरुषो यस्मादायुर्विन्दति वेत्ति च।
तस्मान्मुनिवरैरेष आयुर्वेद इति स्मृतः ॥ ६ ॥

इस शास्त्रके द्वारा दीर्घायु प्राप्त होती है और आयुर्विषयक ज्ञान उत्पन्न होता है, इसलिये महर्षियोंने इसको आयुर्वेद कहा है ॥ ६ ॥

आयुर्वेदकी उत्पत्ति।

ब्रह्मा स्मृत्वाऽऽयुषो वेदं प्रजापतिमजिग्रहत्।
सोऽश्विनौ तौ सहस्राक्षं सोऽत्रिपुत्रादिकान्मुनीन् ॥
तेऽग्निवेशादिकाँस्ते तु पृथक् तन्त्राणि तेनिरे ॥ ७ ॥

सबसे प्रथम ब्रह्माने दक्ष प्रजापतिको आयुर्वेदकी शिक्षा दी; फिर दक्षने दोनो अश्विनीकुमारोंको, अश्विनीकुमारोंने इन्द्रको, इन्द्रने आत्रेय आदि मुनियोंको और इन्होंने अग्निवेशादि मुनियोंको आयुर्वेदकी शिक्षा दी। फिर उन अग्निवेशादि मुनियोंने संसारके हितके लिये अपने अपने नामोंसे पृथक पृथक् तन्त्रोंकी रचना की ॥ ७ ॥

चिकित्सा-प्रकरणम् ।

धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम् ।
रोगास्तस्यापहर्तारः श्रेयसो जीवितस्य च ॥ ८ ॥

आरोग्यता ही धर्म, अर्थ, काम और मोक्ष इस चतुर्वर्ग प्राप्तिका प्रधान कारण है और रोग उस आरोग्यता, सुख और जीवनको नष्ट करनेवाले हैं ॥ ८ ॥

व्याधयो द्विविधाः प्रोक्ताः शारीरा मानसास्तथा ।
शारीरा ज्वरकुष्ठाद्या उन्मादाद्या मनोभवाः ॥ ९ ॥

व्याधियाँ दो प्रकारकी होती हैं-एक शारीरिक और दूसरी मानसिक; ज्वर, कुष्ठ आदिको शारीरिक और उन्माद आदिको मानसिक रोग कहते हैं ॥ ९ ॥

दोषाणां साम्यमारोग्यं वैषम्यं व्याधिरुच्यते ।
सुखसंज्ञकमारोग्यं विकारो दुःखमेव च ॥ १० ॥

वात, पित्त और कफ इन तीनों दोषोंकी साम्य अवस्था (अर्थात् तीनों दोषोंका समानरूपसे रहना) को आरोग्य कहते हैं । और विषम अवस्था (तीनों दोषोंमेंसे किसीएक दोषका कुपित होकर न्यूनाधिक होना) को रोग कहते हैं । अतः आरोग्यका नाम सुख और रोगका नाम दुःख है ॥ १० ॥

साध्योऽसाध्य इति व्याधिर्द्विधाऽतोऽपि पुनर्द्विधा ।
सुखसाध्यः कृच्छ्रसाध्यो याप्यो यश्चाप्रतिक्रियः ॥ ११ ॥
याप्यत्वं याति साध्यस्तु याप्यो गच्छत्यसाध्यताम् ।
जीवितं हन्त्यसाध्यस्तु नरस्याप्रतिकारिणः ॥ १२ ॥
याप्याः केचित् प्रकृत्यैव केचिद्याप्या उपेक्षया ।
प्रकृत्या व्याधयोऽसाध्याः केचित्केचिदुपेक्षया ॥ १३ ॥

रोग दो प्रकारके होते हैं, जैसे-साध्य और असाध्य । साध्यरोग भी दो प्रकारके होते हैं-सुखसाध्य और कष्टसाध्य । असाध्य रोग भी दो ही प्रकारके होते हैं, जैसे-याप्य और अचिकित्स्य (अर्थात् त्याज्य-औषधादिके द्वारा जिनका प्रतीकार न हो सके) । जो रोग सहजमें आरोग्य होजाते हैं, उनको सुखसाध्य कहते हैं । एवं जो रोग कठिनतासे आराम होते हैं, उनको कष्टसाध्य कहते हैं । ये दो प्रकारके रोग साध्य हैं । जो रोग औषधादिके द्वारा कुछ शान्त हो जाते हैं, उनको याप्य

कहते हैं और जो रोग औषधके द्वारा शान्त नहीं होते, उनको असाध्य कहते हैं। याप्य और असाध्य ये दोनों प्रकारके रोग असाध्य हैं। उपर्युक्त समयमें चिकित्सा न करनेसे साध्यरोगभी याप्य हो जाते हैं और याप्यरोग असाध्य हो जाते हैं और असाध्य रोग जीवनको शीघ्र नष्ट करदेते हैं। याप्यरोग दो प्रकारसे उत्पन्न होते हैं। कितनेएक रोग स्वभावसे ही याप्य और कितनेएक चिकित्साके अभावसे याप्य हो जाते हैं। किन्तु स्वभावसे जो रोग याप्य होते हैं वे असाध्य और चिकित्साके अभावसे जो रोग याप्य होते हैं, उनमेंसे कोई चिकित्साद्वारा साध्य होजाते हैं॥११-१३॥

तत्रैकः पापजो व्याधिरपरः कर्मजो मतः।
पापजः प्रशमं याति भैषज्यसेवनादिना॥ १४॥
यथाशास्त्रविनिर्णीतो यथा व्याधिश्चिकित्सितः।
न शमं याति यो व्याधिः स ज्ञेयः कर्म्मजो बुधैः॥ १५॥
न जन्तुः कश्चिदमरः पृथिव्यामेव जायते।
अतो मृत्युरवार्यः स्यात्किन्तु रोगो निवार्यते॥ १६॥

पापज और कर्मज--इन भेदोंसे रोग दो प्रकारके होते हैं। पापजरोग औषधादिके सेवनसे शान्त होजाते हैं। एवं शास्त्रोक्त औषधादिके सेवनसे भी जो रोग दूर नहीं होते, उनको कर्मज व्याधि कहते हैं। इस पृथ्वीपर कोई भी जीव अमर होकर नहीं जन्मा, एक न एक दिन निश्चयही मृत्यु होगी। इसलिये मृत्युको कोई भी नहीं रोक सकता, किन्तु औषधादिके द्वारा रोग दूर किया जा सकता है॥ १४-१६॥

एकोत्तरं मृत्युशतमस्मिन्देहे प्रतिष्ठितम्।
तत्रैकः कालसंयुक्तः शेषास्त्वागन्तवः स्मृताः॥१७॥
ये त्विहागन्तवः प्रोक्तास्ते प्रशाम्यन्ति भेषजैः।
जपहोमप्रदानैश्च कालमृत्युर्न शाम्यति॥ १८॥
पीडितं रोगसर्पौघैरपि धन्वन्तरिः स्वयम्।
सुस्थीकर्तुं न शक्नोति कालप्राप्तं हि देहिनम्॥ १९॥

मनुष्यकी एकसौ एक प्रकारसे मृत्यु हो सकती हैं। उनमें एक कालमृत्यु और सौ आगन्तुक मृत्युयें हैं। आगन्तुक मृत्यु--औषध और जप, होमादिके द्वारा शमन

होती है; किन्तु कालमृत्यु किसी प्रकार भी दूर नहीं हो सकती । कालमृत्युके मुखमें पतितहुए व्यक्तिको किसीभी रोगसे ग्रसित होनेपर या सर्पादिके द्वारा काटनेपर स्वयं धन्वन्तरि भी आरोग्य नहीं कर सकते ॥ १७-१९ ॥

आयुषे कर्मणि क्षीणे लोकोऽयं द्रूयते मया ।
नौषधानि न मंत्राश्च न होमा न पुनर्जपाः ॥ २० ॥
त्रायन्ते मृत्युनोपेतं जरया चापि मानवम् ।
वर्त्याधारस्नेहयोगाद् यथा दीपस्य संस्थितिः ॥
विक्रियाऽपि च दृष्टैवमकाले प्राणसंक्षयः ॥ २१ ॥

आयुकर्मके क्षय होनेपर मृत्यु मनुष्योंको पीड़ित करती है । उस समय औषध, मंत्र, होम और जप ये मनुष्यको जरा और मृत्युसे नहीं बचा सकते । जिस प्रकार तेल और बत्तीके होनेपर भी दीपक बुझ जाता है, उसीप्रकार आयुके होनेपर भी किसी विशेष कारणसे कभी कभी मनुष्यका प्राण नाश हो जाता है ॥ २० ॥ २१ ॥

व्याधेस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः ।
एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः ॥२२॥

रोगके तत्त्वको समझना और पीड़ाको दूर करना—यह ही वैद्यकी वैद्यता है । किन्तु वैद्य आयुका स्वामी नहीं है ॥ २२ ॥

याहच्छिको मुमूर्षुश्च विहीनः करणैश्च यः ।
वैरी च वैद्यविद्वेषी श्रद्धाहीनः सशंकितः ॥ २३ ॥
भिषजामनियम्यश्च नोपक्रम्यो भिषग्विदा ।
एतानुपाचरन् वैद्यो बहून् दोषानवाप्नुयात् ॥ २४ ॥

स्वेच्छाचारी, मरनेकी इच्छा करनेवाला, इन्द्रियशक्तिहीन (काना, लूला, लंगडा इत्यादि), वैरी, वैद्यसे द्वेष रखनेवाला, श्रद्धाहीन, संदिग्धचित्त और चिकित्सासम्बन्धी नियमोंको न पालनेवाला ऐसे मनुष्योंकी चिकित्सा नहीं करनी चाहिये । यदि वैद्य लोभवश ऐसे रोगियोंकी चिकित्सा करता है तो वह अपयशको प्राप्त होता है ॥ २३ ॥ २४ ॥

यावत्कण्ठगताः प्राणा यावन्नास्ति निरिन्द्रियः ।
तावच्चिकित्सा कर्तव्या कालस्य कुटिला गतिः ॥२५॥

जातमात्रश्चिकित्स्यस्तु नोपेक्ष्योऽल्पतया गदः।
वह्निशस्त्रविषैस्तुल्यः स्वल्पोऽपि विकरोत्यसौ ॥ २६ ॥
यथा स्वल्पेन यत्नेन च्छिद्यते तरुणस्तरुः।
स एवातिप्रवृद्धस्तु च्छिद्यतेऽतिप्रयत्नतः ॥ २७ ॥

जबतक प्राण कण्ठमें रहें और इन्द्रियोंकी शक्तिका लोप न हो तबतक चिकित्सा करनी चाहिये। कारण–कालकी गति कुटिल है। रोगके उत्पन्न होते ही चिकित्सा आरम्भ करदेनी चाहिये। रोगको सामान्य समझकर उसकी उपेक्षा नहीं करनी चाहिये। कारण–सामान्यरोग अल्प होनेपर भी अग्नि, शस्त्र और विषकी तरह अत्यन्त प्रबल होजाते हैं। जिस प्रकार तरुणवृक्ष सहजमें ही काटा जासकता है और बड़ा हो जानेपर उसका काटना कठिन हो जाता है ॥ २५-२७ ॥

ग्रहेषु प्रतिकूलेषु नानुकूलं हि भेषजम्।
ते भेषजानां वीर्य्याणि हरन्ति बलवन्त्यपि ॥
प्रतिकूल्य ग्रहानादौ पश्चात्कुर्य्याच्चिकित्सितम् ॥ २८ ॥

सूर्य्यादि ग्रहोंके प्रतिकूल होनेपर किसी भी औषधिका ठीक २ फल नहीं मालूम होता। कारण ग्रह अतिवीर्य्यवान् औषधिके भी प्रभावको नष्ट करदेते हैं इसलिये प्रथम ग्रहशान्ति करके फिर चिकित्सा करनी चाहिये ॥ २८ ॥

याभिः क्रियाभिर्जायन्ते शरीरे धातवः समाः।
सा चिकित्सा विकाराणां कर्म्म तद्भिषजां मतम् ॥ २९ ॥

जिस क्रियाके द्वारा शरीरकी धातुयें समान अवस्थामें रहती हैं, उसको चिकित्सा कहते हैं और वह ही वैद्योंका कर्म्म है ॥ २९ ॥

आसुरी मानुषी दैवी चिकित्सा त्रिविधा मता।
शस्त्रैः कषायैर्होमाद्यैः क्रमेणान्त्या सुपूजिता ॥ ३० ॥

चिकित्सा तीन प्रकारकी है. जैसे–आसुरी, मानुषी और दैवी। शस्त्रादिद्वारा जो चिकित्सा की जाती है, वह आसुरी चिकित्सा है; औषधियोंके काथादिके द्वारा जो चिकित्सा की जाती है वह मानुषी और जप, होमादिके द्वारा जो चिकित्सा की जाती है वह दैवी चिकित्सा कहलाती है ॥ ३० ॥

क्वचिद्धर्म्मः क्वचिन्मैत्री क्वचिदर्थः क्वचिद्यशः ।
कर्म्माभ्यासः क्वचिच्चापि चिकित्सा नास्ति निष्फला ॥२१॥

चिकित्साद्वारा कहीं धर्म्म, कहीं मित्रता, कहीं धन, कहीं यशोलाभ और कहीं चिकित्साकर्ममें अभ्यास ही होता है, इसलिये चिकित्सा कहीं भी निष्फल नहीं होती ॥ २१ ॥

भिषग् द्रव्यमुपस्थाता रोगी पादचतुष्टयम् ।
गुणवत्कारणं ज्ञेयं विकारस्योपशान्तये ॥ २२ ॥

वैद्य, औषध, परिचारक (अर्थात् जो आदमी रोगीकी सेवा शुश्रूषा करता है) और रोगी ये चिकित्साके चारों पाद गुणवान् होनेपर रोग आरोग्य होनेके लिये प्रधान कारण हैं ॥ २२ ॥

श्रुतेः पर्य्यवदातत्वं बहुशो दृष्टकर्म्मता ।
दाक्ष्यं शौचमिति ज्ञेयं वैद्ये गुणचतुष्टयम् ॥ २३ ॥

आयुर्वेदशास्त्रमें कहा है कि—पारदर्शिता, बहुदर्शिता, निपुणता और पवित्रता ये चार गुण वैद्यमें होने आवश्यक हैं ॥ २३ ॥

प्रशस्तदेशसम्भूतं प्रशस्तेऽहनि चोद्धृतम् ।
अल्पमात्रं महावीर्य्यं गन्धवर्णरसान्वितम् ॥
वृद्धिमदपरिक्षुण्णं शुद्धं धात्वादिकं तथा ।
समीक्ष्य काले दत्तं च भेषजं परमं मतम् ॥ २४ ॥

प्रशस्त देश (अच्छे स्थान) में उत्पन्न हुई, शुभ दिनमें उखाडी हुई, थोडी मात्रावाली, अत्यन्त वीर्यसम्पन्न एवं गन्ध, वर्ण और रसविशिष्ट तथा कीडे आदिके द्वारा खराब न की हुई, वृक्ष—लतादिसे उत्पन्न हुई, शोधित धातु आदि जो यथासमयमें प्रयोग की गयी हों, उनको उत्कृष्ट औषधि कहते हैं ॥ २४ ॥

उपचारज्ञता दाक्ष्यमनुरागं च भर्तरि ।
शौचं चेति चतुर्थोऽयं गुणः परिचरे जने ॥ २५ ॥

जो मनुष्य रोगीकी सेवा—शुश्रूषा अच्छे प्रकार करनी जानता हो सब कामोंमें निपुण स्वामीभक्त और शुद्धाचारी हो, ऐसा मनुष्य परिचारक होना चाहिए ॥२५॥

स्मृतिर्निर्देशकारित्वमभीरुत्वमथापि च ।
ज्ञापकत्वं च रोगाणामातुरस्य गुणा मताः ॥ ३६ ॥

जो रोगी वैद्यके सामने रोगका पूर्ववृत्तान्त स्मरण करके अच्छे प्रकार कह सकता है और डरता नहीं है तथा रोगकी वर्त्तमान अवस्थाको भी विशेष रूपसे कह सकता है ऐसा रोगीही चिकित्साका उपयुक्त पात्र है। ये रोगीके लक्षण हैं ॥ ३६ ॥

मृद्दण्डचक्रसूत्राद्याः कुम्भकाराद्दते यथा ।
नावहन्ति गुणं वैद्यादृते पादत्रयं तथा ॥ ३७ ॥

जिस प्रकार कुम्हारके विना मृत्तिका, दण्ड, चक्र और सूत्रादि उपकरणोंके होनेपरभी घट आदि कोई पात्र नहीं बन सकता, उसी प्रकार औषध, परिचारक और रोगी इन तीनों पदोंके होनेपर भी एक सुचिकित्सकके विना रोग शमन नहीं होसकता। अत एव उक्त चारों पादोंमें वैद्यही मुख्य है ॥ ३७ ॥

यस्तु रोगमविज्ञाय कर्माण्यारभते भिषक् ।
अप्यौषधविधानज्ञस्तस्य सिद्धिर्यदृच्छया ॥ ३८ ॥
यस्तु रोगविशेषज्ञः सर्वभैषज्यकोविदः ।
साध्यासाध्यविधानज्ञस्तस्य सिद्धिः करे स्थिता ॥३९॥
दृष्टकर्म्मा च शास्त्रज्ञो वैद्यः स्यात्सिद्धिभागसौ ।
एकाङ्गहीनो न श्लाघ्य एकपक्ष इव द्विजः ॥ ४० ॥

जो वैद्य, रोगको अच्छे प्रकार न जानकर चिकित्सा आरंभ करदेता है वह औषधि विधानको अच्छे प्रकारसे जानता भी है तो भी उसको चिकित्सा कार्यमें सिद्धि प्राप्त होना अनिश्चित या दैवाधीन है। और जो वैद्य सर्व प्रकारके रोगोंके तत्त्वको जानता है, सब प्रकारकी ओषधियोंको जानता है, एवं ओषधिप्रयोगमें चतुर और रोगके साध्यासाध्य लक्षणोंको जानता है, उसके आगे सिद्धि सदैव हाथ जोडे खडी रहती है। दृष्टकर्मा और आयुर्वेद शास्त्रका ज्ञाता वैद्यही चिकित्साकार्यमें सिद्धि प्राप्त करनेका भागी हो सकता है। जिसमें उपर्युक्त गुण होते हैं वह ही वैद्य श्रेष्ठ होता है। इन गुणोंमेंसे एक गुणके न होनेपरभी वैद्यको एक पंखवाले पक्षीकी समान अकर्म्मण्य कहा है ॥ ३८–४० ॥

शास्त्रं गुरुमुखोद्गीर्णमादायोपास्य चासकृत् ।
यः कर्म्म कुरुते वैद्यः स वैद्योऽन्ये तु तस्कराः ॥ ४१ ॥

नाभिज्ञाय तु शास्त्राणि भेषजं कुरुते भिषक् ।
यम एव स विज्ञेयो मर्त्यानां मर्त्यरूपधृक् ॥ ४२ ॥
कुचैलः कर्कशः स्तब्धः कुग्रामी स्वयमागतः ।
पञ्च वैद्या न पूज्यन्ते धन्वन्तरि समा यदि ॥ ४३ ॥
नाडीजिह्वास्यमूत्राणां कोष्ठादीनां च सर्वथा ।
परीक्षां यो न जानाति स वैद्यो यम एव हि ॥ ४४ ॥

जो वैद्य गुरुके पास आयुर्वेद शास्त्रको पढकर और उसको बारम्बार विचारकर चिकित्साकार्यमें प्रवृत्त होता है, वह ही प्रकृष्ट वैद्य है। और दूसरे तो केवल धनको हरण करनेवाले तस्कर हैं और जो वैद्य आयुर्वेद शास्त्रको बिना अध्ययन किये चिकित्सा करना आरम्भ करता है, वह मनुष्योंके लिये मानवरूपधारी यमके समान है। मलिन वस्त्रधारी, कठोर बोलनेवाला, जड़ (रोगके सम्बन्धमें किसीप्रकारका विवेचन न कर सकनेवाला), बुरे ग्राममें रहनेवाला और बिना बुलाये अपने आप आनेवाला ऐसे पाँच प्रकारके वैद्य धन्वन्तरिके समान भी हों तो सम्मानको प्राप्त नहीं हो सकते। जिस वैद्यको नाड़ी, जिह्वा, मुख, मूत्र और कोष्ठादिकी परीक्षा मालूम नहीं है, वह वैद्य भी यमके समान है ॥ ४१-४४ ॥

अप्येकं नीरुजं कृत्वा जन्तुं यादृशतादृशम् ।
आयुर्वेदप्रसादेन किं न दत्तं भवेद्भुवि ॥ ४५ ॥
कपिलाकोटिदानाद्धि यत्फलं परिकीर्तितम् ।
फलं तत्कोटिगुणितमेकातुरचिकित्सया ॥ ४६ ॥
धर्मार्थकाममोक्षाणामारोग्यं कारणं यतः ।
तस्मादारोग्यदानेन नरो भवति सर्वदः ॥ ४७ ॥
अप्येकं नीरुजीकृत्य व्याधितं भेषजैर्नरः ।
प्रयाति ब्रह्मसदनं कुलसप्तकसंयुतः ॥ ४८ ॥

आयुर्वेदके प्रसादसे यदि किसी मनुष्यको आरोग्य कियाजाय तो पृथ्वीमें उस (जीवनदाता) ने कौनसा दान नहीं किया। करोडों गौओंको दान करनेसे जो फल प्राप्त होता है, उससे करोड गुना अधिक फल रोगीको रोगसे मुक्त करनेमें होता है। इसकारण आरोग्यताही धर्म, अर्थ, काम और मोक्ष इस चतुर्वर्ग प्राप्तिका

एकमात्र कारण है। इसलिये आरोग्य दान करनेपर सभी दान हो जाते हैं। एक रोगीको आरोग्य करनेसे, उस पुण्यके प्रभावसे वैद्य अपने सात कुलोंके साथ ब्रह्मलोकको प्राप्त होता है ॥ ४५-४८ ॥

चिकित्सितशरीरं यो न निष्क्रीणाति दुर्मतिः ।
स यत्करोति सुकृतं तत्सर्वं भिषगश्नुते ॥ ४९ ॥

जो दुर्बुद्धि मनुष्य आरोग्य होकर वैद्यसे उऋण नहीं होता, वह मनुष्य जो कुछ सत्कर्म करता है वे सब वैद्यको प्राप्त हो जाते हैं ॥ ४९ ॥

दर्शनस्पर्शनप्रश्नैर्व्याधेर्ज्ञानं त्रिधा मतम् ।
दर्शनान्मूत्रजिह्वाद्यैः स्पर्शनान्नाडिकादिभिः ॥
प्रश्नैर्दूतादिवचनादिति त्रेधा समुच्यते ॥ ५० ॥

दर्शन, स्पर्शन और प्रश्न इन तीन प्रकारसे रोगकी परीक्षा करनी चाहिये। अर्थात् मूत्र और जिह्वादिका दर्शन, नाडी आदिका स्पर्शन एवं रोगी और दूत आदिसे रोगसम्बन्धी विषयको पूछना—इस प्रकार रोगपरीक्षाके ये तीन प्रकार कहेगये हैं॥५०॥

रोगमादौ परीक्षेत ततोऽनन्तरमौषधम् ।
ततः कर्म भिषक् पश्चात् ज्ञानपूर्वं समाचरेत् ॥ ५१ ॥

सबसे प्रथम वैद्य रोगकी परीक्षा (अर्थात् कौनसा रोग है ?) उसका निदान पूर्वरूप और रूपादिके द्वारा निर्द्धारित करना और वह निर्दिष्ट रोग साध्य वा असाध्य इत्यादिका निर्धारित करना और इसके पश्चात् औषधि-परीक्षा करे, फिर विधिपूर्वक चिकित्सामें प्रवृत्त होवे ॥ ५१ ॥

यथा विषं यथा शस्त्रं यथाऽग्निरशनिर्यथा ।
तथौषधमविज्ञातं विज्ञातममृतं यथा ॥ ५२ ॥

बिना जानी हुई औषधि प्रयोग करनेपर-विष, अस्त्र, अग्नि और वज्रकी समान अनिष्टकारी होती है, किन्तु औषधिके गुणोंको जानलेनेपर उसका प्रयोग करनेसे वह अमृतके समान हितकारी होती है ॥ ५२ ॥

मानकी परिभाषा।

न मानेन विना युक्तिर्द्रव्याणां जायते क्वचित् ।
अतः प्रयोगकार्य्यार्थं मानमत्रोच्यतेऽधुना ॥ ५३ ॥

मान (तोल) के विना द्रव्यों (औषधियों) की युक्ति ठीक नहीं होती; इस कारण प्रयोगोंके कार्यके लिये यहाँ मानपरिभाषा कही जाती है ॥ ५३ ॥

षड्सर्षपैर्यवस्त्वेको गुञ्जैका तु यवैस्त्रिभिः ॥
माषस्तु पञ्चभिः षड्भिस्तथा सप्तभिरष्टभिः ॥ ५४ ॥
दशभिर्द्वादशभिश्च रक्तिभिः षड्विधो मतः ।
चरकस्य तु माषस्तु दशगुञ्जाभिरेव च ॥ ५५ ॥
चरकस्य तु चार्द्धेन सुश्रुतस्य तु माषकः ।
माषैश्चतुर्भिः शाणः स्याद्धरणः स निगद्यते ॥ ५६ ॥
टंकः स एव कथितस्तद्द्वयं कोल उच्यते ।
क्षुद्रको वटकश्चैव द्रङ्क्षणः स निगद्यते ॥ ५७ ॥

छः सरसोंका एक जौ होता है । तीन जौकी एक गुंजा होती है । पांच रत्तीका, छः रत्तीका, सात रत्तीका, आठ रत्तीका, दश रत्तीका अथवा बारह रत्तीका एक मासा होता है । इस प्रकार देशभेदोंसे मासा छः प्रकारका होता है, चरकके मतसे मासा दश रत्तीका होता है और सुश्रुतके मतसे पांच रत्तीका मासा होता है । चार मासेका एक शाण होता है । उस शाणको धरण तथा टक भी कहते हैं । दो शाणका एक कोल होता है । क्षुद्रक, वटक और द्रंक्षण ये कोलके ही नाम हैं ॥ ५४-५७ ॥

कोलद्वयं तु कर्षः स्यात्स प्रोक्तः पाणिमानिका ।
अक्षः पिचुः पाणितलं किञ्चित्पाणिश्च तिन्दुकम् ॥ ५८ ॥
विडालपदकं चैव तथा षोडशिका मता ।
करमध्यो हंसपदं सुवर्णं कवलग्रहः ॥ ५९ ॥
उदुम्बरं च पर्य्यायैः कर्षमेव निगद्यते ।
स्यात्कर्षाभ्यामर्द्धपलं शुक्तिरष्टमिका तथा ॥ ६० ॥
शुक्तिभ्यां च पलं ज्ञेयं मुष्टिराम्रं चतुर्थिका ।
प्रकुञ्चः षोडशी बिल्वं पलमेवात्र कीर्त्यते ॥ ६१ ॥

दो कोलका एक कर्ष होता है । पाणिमानिका, अक्ष, पिचु, पाणितल, किञ्चित्पाणि, तिन्दुक, बिडालपदक, षोडशिका, करमध्य, हंसपद, सुवर्ण, कवलग्रह और

उडुम्बर ये सब कर्षके नाम हैं। दो कर्षका अर्द्धपल होता है। शुक्ति और अष्टमिका ये अर्द्धपलके पर्याय हैं। दो शुक्तियोंका एक पल होता है। मुष्टि, आम्र, चतुर्थिका, प्रकुञ्च, षोडशी और बिल्व ये पलके नाम हैं ॥ ५८-६१ ॥

पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतं च निगद्यते।
प्रसृतिभ्यामञ्जलिः स्यात्कुडवोऽर्द्धशरावकः ॥ ६२ ॥
अष्टमानं च स ज्ञेयः कुडवाभ्यां च मानिका।
शरावोऽष्टपलं तद्वज्ज्ञेयमत्र विचक्षणैः ॥ ६३ ॥
शरावाभ्यां भवेत्प्रस्थश्चतुःप्रस्थैस्तथाऽऽढकः।
भाजनं कांस्यपात्रं च चतुष्षष्टिपलश्च सः ॥ ६४ ॥

दो पलकी एक प्रसृति होती है, प्रसृतिको प्रसृतभी कहते हैं। दो प्रसृतिकी एक अञ्जलि होती है। कुडव, अर्द्धशराव और अष्टमान ये अञ्जलिके नाम हैं। दो अंजलिकी एक मानिका होती है। शराव और अष्टपल ये मानिकाके नाम हैं। दो शरावका एक प्रस्थ होता है। चार प्रस्थका एक आढक होता है। भाजन, कांस्यपात्र और चतुःषष्टिपल ये आढकके नाम हैं ॥ ६२-६४ ॥

चतुर्भिराढकैर्द्रोणः कलशो नल्वणोऽर्मणः।
उन्मानं च घटो राशिर्द्रोणपर्य्यायसंज्ञितः ॥ ६५ ॥
द्रोणाभ्यां शूर्पकुम्भौ च चतुःषष्टिशरावकः।
शूर्पाभ्यां च भवेद्द्रोणी वाहो गोणी च सा स्मृता ॥ ६६ ॥
द्रोणीचतुष्टयं खारी कथिता सूक्ष्मबुद्धिभिः।
चतुःसहस्रपलिका षण्णवत्यधिका च सा ॥ ६७ ॥
पलानां द्विसहस्रं च भार एकः प्रकीर्त्तितः।
तुला पलशतं ज्ञेयं सर्वत्रैवैष निश्चयः ॥ ६८ ॥

चार आढकका एक द्रोण होता है। कलश, नल्वण, अर्मण, उन्मान, घट और राशि ये द्रोणके नाम हैं। दो द्रोणका एक शूर्प होता है। कुम्भ और चतुःषष्टि शरावक ये शूर्पके नाम हैं। दो शूर्पकी एक द्रोणी होती है। वाह और गोणी ये द्रोणीके नाम हैं। चार द्रोणोंकी खारी होती है। यह खारी ४०९६ पलकी होती है। २००० पलका एक भार होता है। और १०० पलकी एक तुला होती है। ऐसा सब ग्रन्थोंका निश्चय है ॥ ६५-६८ ॥

६ सरसोंका	१ जौ	२ प्रसृतिका	१ कुडव
२ जौ या		२ कुडवका	१ शराव
४ धानकी	१ गुंजा, रत्ती	२ शरावका	१ प्रस्थ
१० रत्तीका	१ मासा	४ प्रस्थका	१ आढक
४ माशेका	१ शाण	४ आढकका	१ द्रोण
२ शाणका	१ कोल	२ द्रोणका	१ कुंभ
२ कोलका	१ कर्ष	२ कुंभकी	१ गोणी
२ कर्षकी	१ शुक्ति	४ गोणीका	१ खारी
२ शुक्तिका	१ पल	१०० पलकी	१ तुला
२ पलकी	१ प्रसृति	२०० पलका	१ भार

गुञ्जादिमानमारभ्य यावत्स्यात्कुडवस्थितिः ।
द्रवार्द्रशुष्कद्रव्याणां तावन्मानं समं मतम् ॥ ६९ ॥
प्रस्थादिमानमारभ्य द्विगुणं तद्द्रवार्द्रयोः ।
मानं तथा तुलायास्तु द्विगुणं न क्वचित्स्मृतम् ॥ ७० ॥
मृद्वृक्षवेणुलोहादेर्भाण्डं यच्चतुरङ्गुलम् ।
विस्तीर्णं च तथोच्चं च तन्मानं कुडवं वदेत् ७१ (मा०मा०)

गुंजासे लेकर कुडवतक पतले पदार्थोंको, गीले पदार्थोंको और सूखे पदार्थोंको समान भाग लेवे । किन्तु, द्रव (पतले) पदार्थ और गीले पदार्थोंको प्रस्थसे लेकर दूने लेने चाहिये । किंतु तुलाका मान दूना न करे ॥ ६९-७१ ॥

ज्वरकी चिकित्सा ।

पूर्वरूपे प्रयुञ्जीत ज्वरस्य लघुभोजनम् ।
लंघनं च यथादोषं विरेकं वातिके पुनः ॥ ७२ ॥
पाययेत् सर्पिरेवाच्छं पैत्तिके तु विरेचनम् ।
मृदुप्रच्छर्दनं तद्वत् कफजे तु विधीयते ॥
द्वन्द्वजेषु द्वयं कुर्यात् बुद्ध्वा सर्वं तु सर्वजे ॥ ७३ ॥

ज्वरके पूर्वरूपमें यथा दोषानुसार (अर्थात्–दोषोंकी अल्पता व प्रबलताके अनुसार) लघु आहार, लंघन (उपवास) और विरेचन करावे । वातज्वरके पूर्वरूपमें स्वच्छ घृत पान करावे । पित्तज्वरके पूर्वरूपमें केवल विरेचन (दस्त) ही कराना चाहिये

और कफज्वरके पूर्वरूपमें मृदु वमनकारक औषध सेवन करानी चाहिये एवं द्वन्द्वज (अर्थात् वात-पित्तज्वर, पित्त-कफज्वर और वात-कफज) ज्वरोंके पूर्वरूपमें दोनों दोषोंकी मिश्रित और सन्निपातज्वरमें त्रिदोषनाशक चिकित्सा करनी चाहिये ॥ ७२ ॥ ७३ ॥

नवज्वरे दिवास्वप्नस्नानाभ्यङ्गान्नमैथुनम् ।
क्रोधप्रवातव्यायामकषायाँश्च विवर्जयेत् ॥ ७४ ॥

नवीन ज्वरमें दिनमें सोना, स्नान, तैल आदिका मलना, अन्नका आहार, स्त्रीप्रसंग, क्रोध, प्रबल व पूर्वकी तीव्र वायुका सेवन, परिश्रम और काथ इनको त्यागदेना चाहिये ॥ ७४ ॥

कषायं यः प्रयुञ्जीत नराणां तरुणज्वरे ।
स सुप्तं कृष्णसर्पं तु कराग्रेण परामृशेत् ॥ ७५ ॥
न कषायं प्रयुञ्जीत नराणां तरुणज्वरे ।
कषायेणाकुलीभूता दोषा जेतुं सुदुष्कराः ॥ ७६ ॥
चतुर्भागावशिष्टस्तु यः षोडशगुणाम्भसा ।
स कषायः कषायः स्यात्स वर्ज्यस्तरुणज्वरे ॥ ७७ ॥

जो वैद्य नवीन ज्वरमें काथ (काढ़े) को प्रयोग करता है, वह सोतेहुए काले साँपको हाथसे छूकर जगाता है । इसलिये नवीन ज्वरमें कषाय (काथ) कभी नहीं प्रयोग करना चाहिये । कारण, काथके प्रयोगसे दोष आकुलित होकर इतने प्रबल हो जाते हैं कि, उनको जीतना अत्यन्त कठिन हो जाता है । काथकी एक छटाँक औषधियोंको एक सेर जलमें पकाकर चौथाई भाग जल शेष रहनेपर नीचें उतारकर छानलेवे । इसको कषाय(काथ-पाचन)कहते हैं । यह नवीन ज्वरमें वर्जित है ॥७५-७७॥

न द्विरद्यान्न पूर्वाह्णे नाभिष्यन्दि कदाचन ।
न नक्तं न गुरुप्रायं भुञ्जीत तरुणज्वरी ॥ ७८ ॥
परिषेकान् प्रदेहाँश्च स्नानं संशोधनानि च ।
दिवास्वप्नं व्यवायं च व्यायामं शिशिरं जलम् ॥ ७९ ॥

क्रोधप्रवातभोज्यानि वर्जयेत्तरुणज्वरी।
शोषच्छर्दिमदं मूर्च्छा-भ्रमतृष्णारोचकान्॥
प्राप्नोत्युपद्रवानेतान् परिषेकादिसेवनात्॥ ८०॥

नवीन ज्वरवाला रोगी दो बार भोजन न करे। अर्थात् प्रातःकाल और रात्रिको भोजन न करे। एवं कफकारक और गुरुपाकी पदार्थोंका भोजन भी नहीं करे। शरीरपर जलका सेचन, चन्दनादिका प्रलेप, तैलादिकी मालिश, स्नान, संशोधन (वमन, विरेचनादि), दिनमें सोना, स्त्रीसंसर्ग, परिश्रम, शीतल जलपान, क्रोध, वायुका सेवन और अन्नादिका भोजन नवीन ज्वरमें त्यागदेवे। इनका परित्याग न करनेसे मुखशोष, वमन, मद, मूर्च्छा, भ्रम, तृष्णा और अरुचि आदि अनेक उपद्रव उत्पन्न हो जाते हैं॥ ७८-८०॥

ज्वरे लंघनमेवादावुपदिष्टमृते ज्वरात्।
क्षयानिलभयक्रोधकामशोकश्रमोद्भवात्॥ ८१॥

धातुक्षय, यक्ष्मारोग, निरामवायु, भय, क्रोध, काम, शोक और परिश्रम इन कारणोंको छोडकर और किसी भी कारणसे ज्वर होनेपर पहले उपवास करना चाहिये॥ ८१॥

आमाशयस्थो हत्वाऽग्निं सामो मार्गान् पिधापयेत्।
विदधाति ज्वरं दोषस्तस्माल्लंघनमाचरेत्॥ ८२॥
अनवस्थितदोषाग्नेर्लंघनं दोषपाचनम्।
ज्वरघ्नं दीपनं कांक्षारुचिलाघवकारकम्॥ ८३॥
प्राणाविरोधिना चैनं लंघनेनोपपादयेत्।
बलाधिष्ठानमारोग्यं यदर्थोऽयं क्रियाक्रमः॥ ८४॥
तत्तु मारुतक्षुत्तृष्णामुखशोषभ्रमान्विते।
कार्य्यं न बाले नो वृद्धे न गर्भिण्यां न दुर्बले॥ ८५॥

सामदोष (अपक्व रसयुक्त वात, पित्त, कफ) आमाशयमें स्थित होकर पहले अग्निको मन्द करते हैं। फिर पसीनेको बहानेवाले और रस बहानेवाले और स्रोतोंको बन्द करके ज्वर उत्पन्न करते हैं। इसलिये ज्वरकी प्रथम अवस्थामें लंघन कराने चाहिये। सामदोषोंसे अग्नि मन्द होकर ज्वर होनेपर लंघन करानेसे सामदोषोंका परिपाक, ज्वरका नाश, अग्निकी वृद्धि, भोजनकी इच्छा, भोजनमें रुचि और शरीरमें

हल्कापन माल्म होता है। लंघन अत्यंत हितकर होनेपर भी इस प्रकार कराने चाहिये, जिससे रोगीका शरीर अधिक दुर्बल न होजाय। कारण—आरोग्यताके लिये ही यह सारा क्रियाक्रम है और बल ही उस आरोग्यताका एकमात्र प्रधान कारण है। अर्थात् बलके विना आरोग्य होना असम्भव है। इसलिये—वातप्रकृतिवाले, क्षुधा तृषासे पीडित, मुखशोष और भ्रमयुक्त मनुष्योंको एवं बालक, वृद्ध, गर्भिणी स्त्री और दुर्बल मनुष्यको लंघन नहीं कराने चाहिये॥ ८२॥

वातमूत्रपुरीषाणां विसर्गे गात्रलाघवे।
हृदयोद्गारकण्ठास्यशुद्धौ तन्द्राक्लमे गते॥ ८६॥
स्वेदे जाते रुचौ चापि क्षुत्पिपासासहोदये।
कृतं लंघनमादेश्यं निर्व्यथे चान्तरात्मनि॥ ८७॥
पर्वभेदोऽङ्गमर्दश्च कासः शोषो मुखस्य च।
क्षुत्प्रणाशोऽरुचिस्तृष्णा दौर्बल्यं श्रोत्रनेत्रयोः॥८८॥
मनसः सम्भ्रमोऽभीक्ष्णमूर्द्ध्ववातस्तमो हृदि।
देहाग्निबलहानिश्च लंघनेऽतिकृते भवेत्॥ ८९॥

उत्तम प्रकार (जबतक लंघन करानेकी आवश्यकता हो) से लंघन करानेसे मल—मूत्र और अपान वायुका निकलना, शरीरमें लघुता और हृदयका भारीपन दूर होता है। एवं उद्गार (डकार) शुद्ध आती है, कण्ठ और मुख शुद्ध होता है। विशेषकर तन्द्रा और ग्लानि दूर होती है। पसीना आता है, भोजनमें रुचि उत्पन्न होती है। क्षुधा और तृषा उत्पन्न होती हैं, एवं चित्त प्रसन्न होता है। इन सब लक्षणोंके प्रगट होनेपर फिर ज्वरमें लंघन नहीं कराने चाहिये। कारण—अधिक लंघन करानेसे पर्वभेद, सन्धियोंमें तोड़ने सरीखी पीड़ा, अङ्गोंमें पीड़ा, खाँसी, मुखशोष, भूँखका न लगना, अरुचि, तृषा, नेत्र और कर्णशक्तिका ह्रास, चित्तमें भ्रम, ऊर्ध्ववात, हृदयमें अन्धकार, शरीर, अग्नि और बलकी हानि होती है॥ ८६-८९॥

सद्यो भुक्तस्य वा जाते ज्वरे सन्तर्पणोत्थिते।
वमनं वमनार्हस्य शस्तमित्याह वाग्भटः॥ ९०॥
कफप्रधानानुत्क्लिष्टान् दोषानामाशये स्थितान्।
बुद्ध्वा ज्वरकरान् काले वम्यानां वमनैर्हरेत्॥ ९१॥

अनुपस्थितदोषाणां वमनं तरुणज्वरे ।
हृद्रोगं श्वासमानाहं मोहं च कुरुते भृशम् ॥ ९२ ॥
तृष्यते सलिलं चोष्णं दद्याद्वातकफज्वरे ।
मद्योत्थे पैत्तिके वाथ शीतलं तिक्तकैः शृतम् ॥ ९३ ॥
दीपनं पाचनं चैव ज्वरघ्नमुभयं च तत् ।
स्रोतसां शोधनं बल्यं रुचिस्वेदप्रदं शिवम् ॥ ९४ ॥

वाग्भटमें लिखा है कि–यदि भोजनके पश्चात् तत्काल ज्वर होजाय वा सन्तर्पण (रसादि धातुओंकी वृद्धि करनेवाले पदार्थोंके) द्वारा ज्वर होजाय तब वमनके योग्य व्यक्तिको वमन करानी चाहिये । किन्तु, रोगी वमनके योग्य है वा नहीं यह बात पहले ही देखलेनी चाहिये । यदि आमाशयमें स्थित दोषोंमें कफकी अधिकता हो और वमनकी इच्छा होनेसे यह दोष मानो अपने आप ही निकल जायँगे–ऐसा माल्म हो तो क्या नवीन ज्वरवाले, क्या जीर्ण ज्वरवाले वमनयोग्य मनुष्यको वमन करानी चाहिये. किन्तु, नवीन ज्वरमें इन सब लक्षणोंके प्रगट न होनेपर वमन करानेसे हृदयरोग, श्वास, आनाह (मल–मूत्रका अवरोध) और अत्यन्त मोह उत्पन्न होता है । वातज्वर कफज्वर और वातकफज्वरमें–गरम जल पान, कराना चाहिये । मद्यपानजन्य ज्वरमें और पित्तज्वरमें–तिक्त ओषधियोंके द्वारा सिद्ध कियेहुए जलको शीतल करके पान करावे । इस प्रकारका जलपान करनेसे अग्निकी वृद्धि, अपक रसका परिपाक, ज्वरका नाश, मल–मूत्र और पसीने आदिके द्वारा स्रोतोंकी शुद्धि, बलकी वृद्धि और भोजनमें रुचि होती है एवं पसीना आने लगता है ॥ ९०–९४ ॥

षडङ्गपानीय ।

मुस्तपर्पटकोशीरचन्दनोदीच्यनागरैः ।
शृतशीतं जलं देयं पिपासाज्वरशान्तये ॥ ९५ ॥

तृषा और ज्वरको शान्त करनेके लिये–नागरमोथा, पित्तपापडा, खस, लालचन्दन, सुगन्धवाला और सोंठ सब ओषधियोंको समानभाग मिलीहुई दो तोले लेकर एकत्र कूटकर ४ सेर जलमें पकावे । जब पककर दो सेर जल शेष रहजाय तब उतारकर छान लेवे । फिर शीतल होजानेपर यह जल रोगीको थोड़ा थोड़ा पान करावे ॥ ९५ ॥

मुख्यभेषजसम्बन्धो निषिद्धस्तरुणज्वरे।
तोयपेयादिसंस्कारैर्निर्दोषं तेन भेषजम् ॥ ९६ ॥

तरुण ज्वरमें-एक सप्ताहतक प्रधान ओषधि नहीं देनी चाहिये। किन्तु पूर्वोक्त नागरमोथादि छः द्रव्योंके द्वारा सिद्ध कियेहुए अप्रधानौषधरूप षडंग जलको सेवन करानेमें कोई हानि नहीं है। जल और मण्डादिके संस्कारके लिये जो ओषधियाँ व्यवहार की जाती हैं, उनको अप्रधान ओषधि कहते हैं। यह अप्रधान ओषधिही प्रथम सप्ताहमें सेवन करायी जासकती हैं। किंतु ज्वरनाशक मुख्य ओषधियाँ सप्ताहके भीतर नहीं सेवन करानी चाहिये ॥ ९६ ॥

षडङ्गादि साधन।

यदप्सु शृतशीतासु षडङ्गादि प्रयुज्यते।
कर्षमात्रं ततो द्रव्यं साधयेत्प्रास्थिकेऽम्भसि ॥ ९७ ॥
अर्द्धं शृतं प्रयोक्तव्यं पाने पेयादिसंविधौ।
लाजपेयां सुखजरां पिप्पलीनागरैः शृताम् ॥ ९८ ॥
पिबेज्ज्वरी ज्वरहरां क्षुद्वानल्पाग्निरादितः।
पेयां वा रक्तशालीनां पार्श्ववस्तिशिरोरुजि ॥ ९९ ॥
श्वदंष्ट्राकण्टकारीभ्यां सिद्धां ज्वरहरीं पिबेत्।
षडङ्गपरिभाषैव प्रायः पेयादिसम्मता ॥ १०० ॥

षडंग जल बनाना हो या यूष, यवागू, मंड, पेया आदि बनाना हो तो षडंगादि ओषधियोंको एक कर्ष (दो तोले) लेकर एक प्रस्थ जलमें पकावे। जब पककर आधा जल शेष रहजाय तब उतारकर छानलेवे। फिर शीतल होनेपर पान और पेयादिमें प्रयोग करे। पीपल और सोंठके क्वाथके द्वारा सिद्ध की हुई खीलोंकी पेया ज्वरनाशक है और सहजमें परिपक्व होनेके कारण मन्दाग्निवाला पुरुष अल्प क्षुधामें भी सेवन कर सकता है। ज्वर रोगीके पसली मूत्राशय और शिरमें पीडा होनेपर गोखरू और कटेरीके द्वारा बनाई हुई लाल शालि धानोंकी पेया सेवन करानी चाहिये। यह पेया ज्वरको दूर करती है। षडंगजलकी परिभाषाके अनुसारही प्रायः पेयादि सिद्ध की जाती है ॥ ९५-१०० ॥

यवागूमुचिताद्भक्ताच्चतुर्भागकृतां वदेत् ॥ १०१ ॥

यवागूकी मात्रा स्वभावसे जितने परिमाणमें चावल खानेका अभ्यास हो, उसके चौथाई भाग कुटे हुए चावलोंके द्वारा मांड, पेया और विलेपी प्रस्तुत करानी चाहिये ॥ १०१ ॥

मॉंड आदिके लक्षण ।

सिक्थकै रहितो मण्डः पेया सिक्थसमन्विता ।
यवागूर्बहुसिक्था स्याद्विलेपी विरलद्रवा ॥ २ ॥

जिसमें एक भी सीत न रहे (अर्थात् सब कण गल जावैं) उसे मण्ड कहते हैं। जिसमें कुछ सीत रहजावैं उसको पेया कहते हैं। और जिसमें बहुतसे सीत हों उसको यवागू और जिसमें पतलापन हो, उसको विलेपी कहते हैं ॥ २ ॥

अन्नादिसाधन ।

अन्नं पञ्चगुणे साध्यं विलेपी च चतुर्गुणे ।
मण्डश्चतुर्दशगुणे यवागूः षड्गुणेऽम्भसि ॥
अष्टादशगुणे तोये यूषः शार्ङ्गधरेरितः ॥ ३ ॥

भात सिद्ध करना हो तो चावलोंको पचगुने जलमें पकावे। विलेपीको चौगुने जलमें, मांडको चौदह गुने जलमें, यवागूको ६ गुने जलमें और यूषको १८ गुने जलमें पकावे. ऐसा शार्ङ्गधरने कहा है ॥ ३ ॥

ज्वरमें पथ्य ।

श्रमोपवासानिलजे हितो नित्यं रसौदनः ।
मुद्गयूषौदनश्चापि देयः कफसमन्विते ॥ ४ ॥
स एव सितया युक्तः शीतपित्तज्वरे हितः ।
रक्तशाल्यादयः शस्ताः पुराणाः षष्टिकैः सह ॥ ५ ॥
यवाग्वोदनलाजार्थं ज्वरितानां ज्वरापहाः ।
मुद्गान्मसूरांश्चणकान् कुलित्थान् समकुष्ठकान् ॥ ६ ॥
आहारकाले यूषार्थं ज्वरिताय प्रदापयेत् ।
पटोलपत्रं वार्ताकुं कुलकं कारवेल्लकम् ॥ ७ ॥
कर्कोटकं पर्पटकं गोजिह्वां बालमूलकम् ।
पत्रं गुडूच्याः शाकार्थं ज्वरिताय प्रदापयेत् ॥ ८ ॥

परिश्रम, लंघन और वायुके प्रकोपसे उत्पन्नहुए ज्वरमें मांसरसके साथ भात खाना हितकारी है। कफज्वरमें-मूँगके यूषके साथ और पित्तज्वरमें-भातमें मिश्री मिलाकर ठंडे मूँगके यूषके साथ सेवन करे. ज्वररोगीको पुराने लाल शालिधान और सॉंठी

आदि धानोंके द्वारा प्रस्तुत की हुई यवागू, भात और खीलें हितकर और ज्वरनाशक हैं। मूँग, मसूर, चना, कुलथी और मोठ आदिका यूष और परवल, बैंगन, मरसा, करेला, ककोडा, पित्तपापडा, गोजिया, कच्चीमूली और गिलोयके पत्ते आदिका शाक ज्वररोगीको देवे ॥ ४-८ ॥

ज्वरितो हितमश्नीयाद् यद्यप्यस्यारुचिर्भवेत्।
अन्नकाले ह्यभुञ्जानः क्षीयते म्रियतेऽपिवा ॥ ९ ॥
सातत्यात् स्वाद्वभावाद्वा पथ्यं द्वेष्यत्वमागतम्।
कल्पनाविधिभिस्तैस्तैः प्रियत्वं गमयेत्पुनः ॥ १० ॥

ज्वररोगीको, भोजनमें अरुचि होनेपर भी हितकर पदार्थोंका भोजन करावे, कारण-जो रोगी नियमित समयमें हितकर भोजन नहीं करता, उसका शरीर क्रमशः क्षीण होजाता है अथवा मृत्यु होजाती है। यदि निरन्तर एक ही प्रकारके पदार्थोंके आहारसे वा पदार्थोंके स्वादु न होनेसे रोगीको भोजनमें अरुचि हो तो उसकी रुचि के अनुसार नानाप्रकारके पथ्योंकी कल्पना करके दे ॥ ९ ॥ १० ॥

ज्वरितं ज्वरमुक्तं वा दिनान्ते भोजयेल्लघु।
श्लेष्मक्षये विवृद्धोष्मा बलवाननलस्तदा ॥ ११ ॥

ज्वर होनेपर अथवा ज्वरके उतरजानेपर सायंकालमें रोगीको हल्का भोजन देना चाहिये क्योंकि उस समय कफके क्षीण होनेसे अग्नि-दीपन और बलवती होती है ॥ ११ ॥

गुर्वभिष्यन्द्यकाले च ज्वरी नाद्यात्कथंचन।
नहि तस्याहितं भुक्तमायुषे वा सुखाय वा ॥ १२ ॥

ज्वररोगी-भारी और अभिष्यन्दि (शरीरके स्रोतोंको बन्द करनेवाले) पदार्थों का अथवा असमयमें कदापि भोजन न करे। क्योंकि अहितकर पदार्थोंका भोजन करनेसे आयु और सुखका नाश होताहै ॥ १२ ॥

लंघनं स्वेदनं कालो यवागूस्तिक्तको रसः।
पाचनान्यविपक्वानां दोषाणां तरुणज्वरे ॥ १३ ॥

नवीन ज्वरमें-लंघन, स्वेदन (शरीरको बफारा देकर पसीना निकालना), काल (आठ दिन), यवागू (मांड, पेया और विलेपी) और तिक्त पदार्थोंका विरस ये सब अपक्वादि दोषोंको पचानेवाले हैं ॥ १३ ॥

ज्वरकी तीन अवस्था।

आसप्तरात्रं तरुणं ज्वरमाहुर्मनीषिणः।
मध्यं द्वादशरात्रं तु पुराणमत उत्तरम् ॥ १४ ॥

ज्वर तीन प्रकारका होता है। जैसे—तरुणज्वर, मध्यमज्वर और पुरातनज्वर। ज्वरोत्पत्तिसे लेकर सात दिनतक तरुणज्वर, आठवें दिनसे लेकर बारह दिनतक मध्यम ज्वर और १२ वें दिनसे लेकर आगेको जो ज्वर स्थायी रूपसे रहता है, उसको पुरातन ज्वर कहते हैं ॥ १४ ॥

जीर्णज्वरके लक्षण।

त्रिसप्ताहव्यतीतस्तु ज्वरो यस्तनुतां गतः।
प्लीहाग्निसादं कुरुते स जीर्णज्वर उच्यते ॥ १५ ॥

तीन सप्ताह (२१ दिन) बीतनेपर जब ज्वरका वेग कम होकर प्लीहा (तिल्ली) की वृद्धि और मन्दाग्नि होजाता है तब उसे जीर्णज्वर कहते हैं ॥ १५ ॥

ज्वररोगीको कषाय पिलानेका नियम।

ज्वरितं षडहेऽतीते लघ्वन्नंप्रतिभोजितम्।
पाचनं शमनीयं वा कषायं पाययेत्तु तम् ॥ १६ ॥
सप्ताहात्परतोऽस्तब्धे सामे स्यात्पाचनं ज्वरे।
निरामे शमनं स्तब्धे सामे नौषधमाचरेत् ॥ १७ ॥

ज्वरके ६ दिन बीत जानेपर सातवें दिन रोगीको हलका भोजन (यवागू आदि) कराकर आठवें दिन पाचन व शमनरूप कषाय पान करावे। किन्तु सात दिनके पश्चात् यदि ' लाला प्रसेकादि ' आमज्वरके लक्षण हों और मलमूत्रादिका विबन्ध न हो तो शरीरशुद्धिके लिये पाचन औषधि सेवन करावे। और निराम अवस्थामें शमनकारक औषधि प्रयोग करे। यदि रस आमावस्थामें हो और मलमूत्रका विबन्ध हो सप्ताहके पश्चात् तो पाचन या शमन औषधियोंका प्रयोग न करे ॥ १६ ॥ १७ ॥

आमज्वरके लक्षण।

लालाप्रसेको हृल्लासहृदयाशुद्ध्यरोचकाः।
तन्द्रालस्यविपाकास्यवैरूप्यं गुरुगात्रता ॥ १८ ॥

क्षुन्नाशो बहुमूत्रत्वं स्तब्धता बलवान् ज्वरः।
आमज्वरस्य लिङ्गानि न दद्यात्तत्र भेषजम् ॥ १९ ॥
भेषजं ह्यामदोषस्य भूयो ज्वलयति ज्वरम्।
मृदौ ज्वरे लघौ देहे प्रचलेषु मलेषु च।
पक्वं दोषं विजानीयाज्ज्वरे देयं तदौषधम् ॥ १२० ॥

मुखसे लारका गिरना, उबकाई आना, हृदयपर बोझसा मालूम होना, अरुचि, तंद्रा, आलस्य, भोजनका न पचना, मुखमें विरसता, शरीरमें भारीपन मालूम होना, भूँख न लगना, मूत्रकी अधिकता, शरीरमें जडता और ज्वरकी प्रबलता ये सब आमज्वरके लक्षण हैं। इन लक्षणोंसे युक्त आमज्वरमें औषधिका प्रयोग नहीं करना चाहिये। कारण, आमज्वरमें आमरसका परिपाक न होनेपर औषधि प्रयोग करनेसे ज्वरका वेग और भी बढ़जाता है और आमदोषके पच जानेपर ज्वरकी कमी, शरीरमें लघुता, वात-पित्त और कफकी समता और मल-मूत्रादिकी प्रवृत्ति इन सब लक्षणोंके प्रकट होनेपर औषध देनी चाहिये ॥ १८-१२० ॥

कषायादि औषधियोंके सेवनका निषेध।

पीताम्बुर्लङ्घितः क्षीणोऽजीर्णी भुक्तः पिपासितः।
न पिबेदौषधं जन्तुः संशोधनमथेतरत् ॥ २१ ॥

जलपान करनेके पश्चात्, उपवासके अन्तमें, क्षीणावस्थामें, अजीर्ण रोगमें भोजन करनेके पश्चात् और प्यासके समय मनुष्यको संशोधन (वमन, विरेचन आदि) अथवा किसी प्रकारकी औषधि सेवन नहीं करनी चाहिये ॥ २१ ॥

अभुक्त अवस्थामें औषधसेवनके गुण।

वीर्य्याधिकं भवति भेषजमन्नहीनं
हन्यात्तदामयमसंशयमाशु चैव।
तद्बालवृद्धयुवतीमृदुभिश्च पीतं
ग्लानिं परां नयति चाशु बलक्षयं च ॥ २२ ॥
शीघ्रं विपाकमुपयाति बलं न हिंस्या-
दन्नावृतं न च मुहुर्वदनान्निरेति।

प्राग्भुक्तसेवितमथौषधमेतदेव
द्याद्वृद्धशिशुभीरुवराङ्गनाभ्यः ॥ २४ ॥
औषधशेषे भुक्तं तथौषधं सशेषेऽन्ने ।
न करोति गदोपशमं प्रकोपयत्यन्यरोगांश्च ॥२५॥

अन्नहीन (अर्थात् खालीपेट सेवन की हुई) औषध अधिक वीर्यवाली होती है वह रोगको शीघ्रही नष्ट करती है । किन्तु बालक, वृद्ध, स्त्री और कोमल प्रकृति-वाले मनुष्योंको बिना भोजन (अर्थात् खाली पेट) सेवन करनेसे उनके शरीरमें ग्लानि होती है और बलका क्षय होता है । इसलिये इन सबको भोजनसे कुछ समय पहले औषध सेवन करानी चाहिये । कारण, वह औषध आहारसे ढकजानेके कारण मुखसे बारबार नहीं निकलती, बलकी हानि भी नहीं करती और शीघ्र पचजाती है । औषधके न पचनेपर आहार करनेसे अथवा भोजनके बिना पचे औषध सेवन करनेसे औषध रोगको नष्ट नहीं करती, किन्तु अन्यान्य रोगोंको उत्पन्न करदेती है ॥ २२-२५ ॥

जीर्णाजीर्ण-औषधिके लक्षण ।

अनुलोमोऽनिलः स्वास्थ्यं क्षुत्तृष्णा सुमनस्कता ।
लघुत्वमिन्द्रियोद्गारशुद्धिर्जीर्णौषधाकृतिः ॥ २५ ॥
क्लमो दाहोऽङ्गसदनं भ्रमो मूर्च्छा शिरोरुजा ।
अरतिर्बलहानिश्च सावशेषौषधाकृतिः ॥ २६ ॥

औषधके उत्तमप्रकारसे परिपक्व होजानेपर ये लक्षण होते हैं-वायुकी अनुलो-मता (अर्थात् वायुका अपने मार्गमें स्वाभाविक रूपसे गमन करना) शरीरका स्वस्थ होना, क्षुधा और तृषाका लगना, मनमें प्रसन्नता इन्द्रियोंमें हलकापन और डकारका शुद्ध आना । और औषधिके न पचनेपर शरीरमें ग्लानि, दाह, शिथि-लता, भ्रम, मूर्च्छा शिरमें पीडा, मनमें खेद, अस्वस्थता और बलका क्षय होता है ॥ २५ ॥ २६ ॥

मात्राका निरूपण ।

मात्राया नास्त्यवस्थानं दोषमग्निं बलं वयः ।
व्याधिं द्रव्यं च कोष्ठं च वीक्ष्य मात्रां प्रयोजयेत् ॥ २७ ॥

औषधिकी मात्राका कोई नियम स्थिर नहीं है। अतएव दोष (वात-पित्तकफ) जठराग्नि, बल, अवस्था, रोग, औषध (उष्णवीर्य, मध्यवीर्य, और मृदुवीर्य आदि) और कोष्ठ इन सब बातोंको उत्तमप्रकारसे विचारकर औषधिकी मात्रा निर्द्धारित करनी चाहिये। मात्राकी न्यूनाधिकता होनेसे रोगके दूर होनेमें व्याघात होता है ॥ २७ ॥

सामान्य ज्वरकी चिकित्सा।

धान्य-पटोलक्वाथ।

दीपनं कफविच्छेदि वातपित्तानुलोमनम्।
ज्वरघ्नं पाचनं भेदि शृतं धान्यपटोलयोः ॥ २८ ॥

धनियाँ और परवलका क्वाथ-ज्वरनाशक, आमादि दोषोंको पचानेवाला, भेदक (दस्तावर) अग्निप्रदीपक, कफनाशक और वात-पित्तका अनुलोमन करनेवाला है। इसलिये यह क्वाथ सम्पूर्ण सामान्य ज्वरोंमें दिया जा सकता है ॥ २८ ॥

वृश्चीरादि-क्षीरपान।

वृश्चीरबिल्ववर्षाभूपयः सोदकमेव च।
पचेत् क्षीरावशेषं तु पेयं सर्वज्वरापहम् ॥ २९ ॥

सफेद पुनर्नवा, बेलकी छाल और लाल पुनर्नवा-सबको समान भाग और सब मिलाकर २ तोले लेकर आधपाव दूध और आधसेर जलमें मिलाकर पकावे। जब पककर दूधमात्र शेष रहजाय तब उसे उतारकर रोगीको पान करावे। इससे सर्व प्रकारका ज्वर दूर होता है ॥ २९ ॥

गुडूच्यादि।

गुडूचीधान्यकारिष्टः पद्मकं रक्तचन्दनम्।
एष सर्वान् ज्वरान् हन्ति गुडूच्यादिस्तु दीपनः।
हृल्लासारोचकच्छर्दिपिपासादाहनाशनः ॥ १३० ॥

गिलोय, धनियाँ, नीमकी छाल, पद्माख और लालचन्दन इन सब औषधियोंको समान भाग लेकर यथाविधिसे बनाया हुआ क्वाथ-सर्व प्रकारके ज्वर, उबकाई, अरुचि, वमन, प्यास और दाहको नष्ट करता है। गुडूच्यादि क्वाथ अग्निप्रदीपक है ॥ १३० ॥

आरग्वधादि ।

आरग्वधग्रन्थिकमुस्ततिक्ताहरीतकीभिः कथितः कषायः ।
सामे सशूले कफवातपित्ते ज्वरे हितो दीपनपाचनश्च ॥ २१ ॥

अमलतास, पीपलामूल, नागरमोथा, कुटकी और हरड इनका यथाविधि बनाया हुआ काथ–आमदोष शूल और सर्वाङ्ग–पीडासे युक्त त्रिदोषज ज्वरमें पान करना चाहिये । यह अग्निप्रदीपक और पाचक है ॥ २१ ॥

पथ्यादि ।

पथ्यारग्वधतिक्तात्रिवृदामलकैः शृतं तोयम् ।
पाचनसारकमुक्तं मुनिभिर्जीर्णज्वरे सामे ॥ २२ ॥

हरड, अमलतास, कुटकी, निसोथ और आमले इनका बनाया हुआ काथ आम-युक्त जीर्णज्वरमें पाचक और सारक कहागया है ॥ २२ ॥

मुस्तपर्पटकादि ।

पक्त्वा ज्वरे कषायं वा मुस्तपर्पटकं पिबेत् ।
सनागरं पर्पटकं पिबेद्वा सदुरालभम् ॥ २३ ॥

नागरमोथा, पित्तपापडा अथवा सोंठ, पित्तपापडा अथवा धमासा और पित्तपापडा इन तीनोंमेंसे किसी एक काथको बनाकर पीनेसे ज्वर नष्ट होता है ॥ २३ ॥

नागरादि ।

नागरं देवकाष्ठं च धन्याकं बृहतीद्वयम् ।
देयं पाचनकं पूर्वं ज्वरिताय ज्वरापहम् ॥ २४ ॥

सोंठ, देवदारु, धनियाँ, बडी कटेरी और छोटी कटेरी इनका काथ सर्वप्रकारके नवीन ज्वरवाले रोगीको पानकरानेसे ज्वर दूर होता है ॥ २४ ॥

मुस्तादि ।

मुस्तपर्पटकोदीच्यच्छत्राख्याशीरचन्दनैः ।
शृतं शीतं जलं दद्यात्तृड्दाहज्वरशान्तये ॥ २५ ॥

तृषा, दाह और ज्वरको शान्त करनेके लिये: नागरमोथा, पित्तपापडा, सुगन्ध-वाला, धनियाँ, खस और लालचन्दन इनका काथ बनाकर शीतल करके रोगीको पान करावे ॥ २५ ॥

नागरादि।

नागरं देवकाष्ठं च ध्यामकं बृहतीद्वयम्।
दद्यात्पाचनकं पूर्वं ज्वरितेभ्यो ज्वरापहम्॥ ३६॥

ज्वररोगीको सोंठ, देवदारु, लामज्जक तृण (अभावमें खस), बड़ी कटेरी और छोटी कटेरी इनका क्वाथ सेवन करानेसे ज्वर नष्ट होता है॥ ३६॥

किराततिक्तकादि।

किराततिक्तकं मुस्तं गुडूचीं विश्वभेषजम्।
पाठामुशीरं सोदीच्यं पिबेद्वा ज्वरशान्तये॥ ३७॥

चिरायता, नागरमोथा, गिलोय, सोंठ, पाढ, खस और सुगन्धवाला इनका क्वाथ पान करनेसे सम्पूर्ण ज्वर शान्त होते हैं॥ ३७॥

वातज्वरकी चिकित्सा।

बिल्वादि।

बिल्वादिपञ्चमूलस्य क्वाथः स्याद्वातिके ज्वरे।
पाचनः पिप्पलीमूलगुडूचीविश्वजोऽथवा॥ ३८॥

वातज्वरमें-बेल, शोनापाठा, अरलू, कुम्भेर, पाढल और अरणी इनकी छालका क्वाथ अथवा पीपलामूल, गिलोय और सोंठ इनका यथाविधि क्वाथ बनाकर देना चाहिये॥ ३८॥

भूनिम्बादि।

भूनिम्बमुस्ताजलकण्टकारीद्वयामृतागोक्षुरनागराणाम्।
सशालपर्णीद्वयपौष्कराणां क्वाथं पिबेद्वातभवज्वरार्त्तः॥ ३९॥

वातज्वरसे पीडित रोगी चिरायता, नागरमोथा, सुगन्धवाला, कटेरी, बड़ी कटेरी, गिलोय, गोखरू, सोंठ, शालपर्णी, पृश्नपर्णी और पोहकरमूल इन औषधियोंका क्वाथ बनाकर पान करे तो वातसम्बन्धी ज्वर शमन होते हैं॥ ३९॥

विश्वादि।

विश्वामृताग्रंथिकसिद्धतोयं मरुज्ज्वरः स्यात्पिबतः कुतोऽयम्।
क्वाथोऽथकुस्तुम्बुरुदेवदारुक्षुद्रौषधैः पाचनमत्र चारु॥ १४०॥

सोंठ, गिलोय और पीपलामूल इनका क्वाथ पान करनेसे अथवा धनियाँ देवदारु, कटेरी और पाठ इनका क्वाथ पान करनेसे वातज्वर नष्ट होता है॥ १४०॥

पञ्चमूल्यादि।

पञ्चमूलीबलारास्नाकुलत्थैः सहपौष्करैः।
क्वाथो हन्याच्छिरःकम्पं पर्वभेदं मरुज्ज्वरम् ॥ ४१ ॥

बृहत् पञ्चमूल (बेल, अरलू, कुम्भेर, पाढल और अरणी), खिरेंटी, रायसन कुलथी और पोहकरमूल-इन औषधियोंका यथाविधि सिद्ध किया हुआ क्वाथ पान करनेसे शिरःकम्प, सन्धिस्थानोंकी पीडा और वातज्वर नाश होता है ॥४१॥

कणादि।

कणारसोनामृतवल्लिविश्वानिदिग्धिकाकिन्दुकभूनिम्बैः।
समुस्तकैराचरितःकषायो हिताशिनां हन्ति गदानिमांस्तु॥
ज्वरं मरुद्धातुसमुद्भवं च बलासजं चानलमन्दतां च।
कण्ठावरोधं हृदयावरोधं स्वेदं च हिक्कां च हिमत्वमोहान्४३

पीपल, लहसन, गिलोय, सोंठ, कटेरी, सिम्हालू, चिरायता और नागरमोथा-इनका विधिपूर्वक सिद्ध कियाहुआ क्वाथ-पथ्य पदार्थोंका भोजन करनेवाले मनुष्योंके वातज्वर, कफज्वर, अग्निकी मन्दता, कण्ठ और हृदयका अवरोध, अधिक पसीना आना, हिचकी, शरीरकी शीतलता और मूर्च्छा आदि रोगोंको दूर करता है ॥ ४२ ॥ ४३ ॥

शालपर्णी-आदि।

शालपर्णी बला द्राक्षा गुडूची सारिवा तथा।
आसां क्वाथं पिबेत्कोष्णं तीव्रवातज्वरच्छिदम् ॥ ४४ ॥

शालपर्णी, खिरेंटी, गिलोय और सारिवा (अनन्तमूल) इनके मन्दोष्ण क्वाथको पान करनेसे तीव्र वातज्वर नष्ट होता है ॥ ४४ ॥

शतपुष्पादि।

शतपुष्पा वचा कुष्ठं देवदारु हरेणुका।
कुस्तुम्बुरूणि नलदं मुस्तं चैवाशु साधयेत् ॥
क्षौद्रेण सितया चापि युक्तः क्वाथोऽनिलात्मके ॥ ४५ ॥

सौंफ, वच, कूठ, देवदारु, रेणुका, धनियाँ, खस और नागरमोथा इनके क्वाथको शहद और मिश्रीके साथ मिलाकर सेवन करनेसे वातज्वरमें शीघ्र लाभ होता है ॥ ४५ ॥

किरातादि ।

किराताब्दामृतोदीच्यबृहतीद्वयगोक्षुरैः ।
सस्थिराकलसीविश्वैः क्वाथो वातज्वरापहः ॥ ४६ ॥

चिरायता, नागरमोथा, गिलोय, सुगन्धवाला, कटेरी, बड़ी कटेरी, गोखुरू, शालपर्णी, पृष्ठपर्णी और सोंठ इनका क्वाथ वातज्वरनाशक है ॥ ४६ ॥

पिप्पल्यादि ।

पिप्पलीसारिवाद्राक्षाशतपुष्पाहरेणुभिः ।
कृतः कषायः सगुडो हन्यात् श्वसनजं ज्वरम् ॥ ४७ ॥

पीपल, अनन्तमूल, दाख, सोंफ और रेणुका इनके क्वाथमें पुराना गुड डालकर पान करनेसे वातज्वर दूर होता है ॥ ४७ ॥

बृहद्गुडूच्यादि ।

गुडूची चन्दनं पद्मानागरेन्द्रयवासकम् ।
अभयारग्वधोदीच्यपाठाधान्याब्दरोहिणी ॥ ४८ ॥
कषायं पाययेदेतत् पिप्पलीचूर्णसंयुतम् ।
कासश्वासज्वरान् हन्ति पिपासादाहनाशनम् ।
विण्मूत्रानिलविष्टम्भे त्रिदोषप्रभवेऽपि च ॥ ४९ ॥

गिलोय, लालचन्दन, पद्माख, सोंठ, इन्द्रजौ, जवास, हरड, अमलतास, सुगन्धवाला, पाठ, धनियाँ, नागरमोथा, और कुटकी, इनका क्वाथ उत्तम प्रकारसे बनाकर उसमें जरासा पीपलका चूर्ण डालकर पान करनेसे खाँसी, श्वास, ज्वर, प्यास, दाह और मल-मूत्र तथा वायुका अवरोध आदि विकार नष्ट होते हैं । यह क्वाथ सन्निपात ज्वरमें भी प्रयोग कियाजाता है ॥ ४८ ॥ ४९ ॥

गुडूच्यादि ।

गुडूची सारिवा द्राक्षा शतपुष्पा पुनर्नवा ।
सगुडोऽयं कषायः स्याद्वातज्वरविनाशनः ॥ १५० ॥

गिलोय, अनन्तमूल, दाख, सोंफ और पुनर्नवा इनके क्वाथमें पुराना गुड डालकर पान करनेसे वातज्वर दूर होता है ॥ १५० ॥

द्राक्षादि ।

द्राक्षागुडूचीकाश्मर्य्यत्रायमाणाः सशारिवाः ।
निष्क्वाथ्य सगुडं क्वाथं पिबेद्वातज्वरापहम् ॥ ५१ ॥

दाख, गिलोय, कुम्भेर, त्रायमाण और सारिवा इनका क्वाथ बनाकर उसमें गुड डालकर सेवन करनेसे वातज्वर नष्ट होता है ॥ ५१ ॥

रास्नादि ।

रास्ना वृक्षादनी दारु सरलं सैलवालुकम् ।
कोष्णं सगुडसर्पिष्कं पिबेद्वातज्वरापहम् ॥ ५२ ॥

रायसन, बँदा, देवदारु, धूपसरल और एलवालुक इनके मन्दोष्ण क्वाथमें गुड और घृत मिलाकर पान करनेसे वातज्वर दूर होता है ॥ ५२ ॥

गुडूच्यादि ।

गुडूची शतपुष्पा च प्लुक्षी रास्ना पुनर्नवा ।
त्रायमाणा कषायश्च गुडैर्वातज्वरापहः ॥ ५३ ॥

गिलोय, सौंफ, पाखर, रास्ना, पुनर्नवा और त्रायमाण इनके क्वाथमें गुड डालकर पान करनेसे वातज्वर नष्ट होता है ॥ ५३ ॥

दशमूलादि ।

श्रीफलः सर्वतोभद्रः कामदूती च श्योनकः ।
तर्कारी गोक्षुरः क्षुद्रा बृहती कलसी स्थिरा ॥ ५४ ॥
रास्ना कणा कणामूलं कुष्ठं शुण्ठी किरातकः ।
मुस्ता बलाऽमृता बाला द्राक्षा यासः शताह्विका ॥ ५५ ॥
एषां क्वाथो निहन्त्येव प्रभञ्जनकृतं ज्वरम् ।
सोपद्रवं च योगोऽयं सर्वयोगवरः स्मृतः ॥ ५६ ॥

बेलकी छाल, कुम्भेर, पाढल, अरलू, अरणी, गोखुरू, कटेरी, बडी कटेरी, पृष्ठपर्णी, शालपर्णी, रास्ना, पीपल, पीपलामूल, कूठ, सोंठ, चिरायता, नागरमोथा, खिरैंटी, गिलोय, सुगन्धवाला, दाख, जवासा और सोया इन औषधियोंका क्वाथ बनाकर पान करनेसे सम्पूर्ण उपद्रवोंसहित वातज्वर नाश होता है। यह योग समस्त योगोंमें श्रेष्ठ है ॥ ५४–५६ ॥

पित्तज्वरकी चिकित्सा ।

तिक्तादि ।

तिक्तामुस्तायवैः पाठाकट्फलाभ्यां सहोदकम् ।
पक्वं सशर्करं पीतं पाचनं पैत्तिके ज्वरे ॥ ५७ ॥

पित्तज्वरमें-कुटकी, नागरमोथा, इन्द्रजौ, पाढ, कायफल, और सुगन्धवाला इनके क्वाथमें मिश्री मिलाकर पान करे यह क्वाथ दोष पचानेवाला है ॥ ५७ ॥

कट्फलादि ।

कट्फलेन्द्रयवाम्बष्ठातिक्तामुस्तैः शृतं जलम् ।
पाचनं दशमेऽह्नि स्यात्तीव्रपित्तज्वरे नृणाम् ॥ ५८ ॥

तीव्र पित्तज्वरमें-दोषोंके परिपाकके लिये दशवें दिन कायफल, इन्द्रजौ, पाढ, कुटकी और नागरमोथा इनके द्वारा बनायाहुआ क्वाथ रोगीको पान करानेसे विशेष लाभ होता है ॥ ५८ ॥

पर्पटादि ।

एकः पर्पटकः श्रेष्ठः पित्तज्वरविनाशनः ।
किं पुनर्यदि युज्येत चन्दनोदीच्यनागरैः ॥ ५९ ॥

केवल इकके पित्तपापडेका क्वाथ ही पित्तज्वरको नष्ट करनेके लिये उत्कृष्ट औषध है । यदि इसके साथ लालचन्दन, सुगन्धवाला और सोंठ-इनका क्वाथ बनाकर पान करायाजाय तो क्या ही कहना है ? ॥ ५९ ॥

द्राक्षादि ।

द्राक्षा हरीतकी मुस्ता कटुका कृतमालकः ।
पर्पटश्च कृतः क्वाथ एषां पित्तज्वरापहः ॥ १६० ॥
मुखशोषप्रलापान्तर्दाहमूर्च्छाभ्रमप्रणुत् ।
पिपासारक्तपित्तानां शमनो भेदनो मतः ॥ ६१ ॥

दाख, हरड, नागरमोथा, कुटकी, अमलतास और पित्तपापडा-इनका बनाया हुआ क्वाथ-पित्तज्वर, मुखशोष, प्रलाप, दाह, मूर्च्छा, भ्रम और तृषाको दूर करता है । यह रक्तपित्तको शान्त करनेवाला और भेदक है ॥ १६० ॥ ६१ ॥

पटोलादि ।

पटोलयवधन्याकमधुकं मधुसंयुतम् ।
हन्ति पित्तज्वरं दाहं तृष्णां चातिप्रमाथिनीम् ॥६२॥

परवल, इन्द्रजौ, धनियाँ और मुलहठी इनके क्वाथमें शहद डालकर पान करनेसे पित्तज्वर, दाह और अतिप्रबल तृषा नष्ट होती है ॥ ६२ ॥

ह्रीवेरादि।

ह्रीवेरचन्दनोशीरघनपर्पटसाधितम्।
दद्यात्तु शीतलं वारि तृड्वृद्धिज्वरदाहनुत् ॥ ६३ ॥

सुगन्धवाला, लालचन्दन, खस, नागरमोथा और पित्तपापडा इनका काथ बनाकर शीतल करके पीनेसे पित्तज्वर, दाह और अधिक तृषा शान्त होती है ॥ ६३ ॥

कलिंगादि।

कलिङ्गं कट्फलं मुस्तं पाठा कटुकरोहिणी।
पक्वं सशर्करं पीतं पाचनं पैत्तिके ज्वरे ॥ ६४ ॥

पैत्तिकज्वरमें-इन्द्रजौ, कायफल, नागरमोथा, पाढ और कुटकी इनके क्काथमें मिश्री मिलाकर पान करनेसे दोषोंका परिपाक होता है ॥ ६४ ॥

विश्वादि।

विश्वाम्बुपर्पटोशीरघनचन्दनसाधितम्।
दद्यात्सुशीतलं वारि तृट्छर्दिज्वरदाहनुत् ॥ ६५ ॥

सोंठ, सुगन्धवाला, पित्तपापडा, खस, नागरमोथा और लालचन्दन-इनका शीतल क्वाथ पान करनेसे तृषा, वमन, पित्तज्वर और दाह दूर होते हैं ॥ ६५ ॥

गुडूच्यादि।

गुडूचीभूमिनिम्बश्च बालं वीरणमूलकम्।
लघुमुस्तं त्रिवृद्धात्री द्राक्षा वासा च पर्पटः ॥ ६६ ॥
एषां क्काथो हरत्येव ज्वरं पित्तकृतं द्रुतम्।
सोपद्रवमपि प्रातर्निपीतो मधुना सह ॥ ६७ ॥

गिलोय, चिरायता, सुगन्धवाला, खस, अगर, नागरमोथा, निसोथ, आमले, दाख, अडूसा और पित्तपापडा इनके क्काथमें शहदको मिलाकर प्रातःकाल पान करनेसे सम्पूर्ण उपद्रवोंसहित पित्तज्वर शीघ्र नष्ट होता है ॥ ६६ ॥ ६७ ॥

किरातादि।

किराताम्मृतधन्याकचन्दनोशीरपर्पटैः।
सपद्मकैः कृतः क्काथो हन्ति पित्तभवं ज्वरम् ॥ ६८ ॥

चिरायता, गिलोय, धनियाँ, लालचन्दन, खस, पित्तपापडा और पद्माख इनके द्वारा बनायाहुआ क्वाथ पान करनेसे पित्तज्वर नाश होता है ॥ ६८ ॥

महाद्राक्षादि ।

द्राक्षाचन्दनपद्मानि मुस्ता तिक्ताऽमृताऽपि च ।
धात्री बालमुशीरं च लोध्रेन्द्रयवपर्पटाः ॥ ६९ ॥
परूषकं प्रियङ्गुश्च यवासो वासकस्तथा ।
मधुकं कुलकं चापि किरातो धान्यकं तथा ॥ ७० ॥
एषां क्काथो निहन्त्येव ज्वरं पित्तसमुत्थितम् ।
तृष्णां दाहं प्रलापं च रक्तपित्तं भ्रमं क्लमम् ॥ ७१ ॥
मूर्च्छां छर्दिं तथा शूलं मुखशोषमरोचकम् ।
कासं श्वासं च हृल्लासं नाशयेन्नात्र संशयः ॥ ७२ ॥

दाख, लालचन्दन, पद्माख, नागरमोथा, कुटकी, गिलोय, आमले, सुगन्धवाला, खस, लोध, इन्द्रजौ, पित्तपापडा, फालसे, फूलप्रियंगु, जवासा, अडूसा, मुलहठी, पटोलपत्र, चिरायता और धनियाँ इनका विधिपूर्वक क्वाथ बनाकर पान करनेसे पित्तज्वर, तृषा, दाह, प्रलाप, रक्तपित्त, भ्रम, क्लम, मूर्च्छा, वमन, शूल, मुखशोष अरुचि, खाँसी, श्वास, उबकाई इत्यादि उपद्रव निश्चय दूर होते हैं ॥ ६९-७२ ॥

यवपटोल ।

पटोलयवनिष्क्वाथो मधुना मधुरीकृतः ॥ ।
तीव्रपित्तज्वरामर्दी पानात्तृड्दाहनाशकः ॥ ७३ ॥

परवल और जौ दोनोंको २ तोले लेकर आधसेर जलमें पकावे । जब पकते २ आधपाव जल शेष रहजाय तब उतारकर छानलेवे । फिर उसमें ६ मासे शहद डालकर पान करनेसे दारुण पित्तज्वर, तृषा और दाह नाश होते हैं ॥ ७३ ॥

नागरादि ।

नागरोशीरमुस्ता च चन्दनं कटुरोहिणी ।
धान्यकानां क्वाथ एष पित्तज्वरविनाशनः ॥ ७४ ॥

सोंठ, खस, नागरमोथा, लालचन्दन, कुटकी और धनियाँ इनका क्वाथ सेवन करनेसे पित्तज्वर नष्ट होता है ॥ ७४ ॥

अमृतादि ।

अमृतापर्पटाधात्रीक्वाथः पित्तज्वरं हरेत् ।
सितारग्वधयोर्वापि काश्मर्य्यस्याथवा पुनः ॥ ७५ ॥

द्राक्षा पर्पटकं तिक्ता पथ्यारग्वधमुस्तकैः ।
क्वाथस्तृष्णाभ्रान्तिदाहयुक्तपित्तज्वरापहः ॥ ७६ ॥

(१) गिलोय, पित्तपापडा और आमले, (२) अमलतास, कुम्भेर, मिश्री (३) अथवा दाख, पित्तपापडा, कुटकी, हरड, अमलतास और नागरमोथा । इन तीनों प्रयोगोंमेंसे किसी एकका काथ बनाकर सेवन करनेसे तृषा, भ्रम, दाह आदि उपद्रवोंसहित पित्तज्वर दूर होता है ॥ ७५-७६ ॥

विदारिकादि ।

विदारिकालोध्रकपित्थकानां
स्यान्मातुलुंगस्य च दाडिमानाम् ।
यथानुभावेन च मूलपत्रं
निहन्ति तृड्दाहसमूर्च्छनं च ॥ ७७ ॥

विदारीकन्द, लोध, कैथ, बिजौरानींबू और अनार इनकी जड और पत्तोंका यथाविधि काथ बनाकर सेवन करनेसे पित्तज्वर, तृषा, दाह और मूर्च्छा नष्ट होती है ॥ ७७ ॥

धान्यशर्करा ।

व्युषितं धन्याकजलं प्रातः पीतं सशर्करम् ।
पुंसामन्तर्दाहं शमयत्यचिराद् दूरमरूढमपि ॥ ७८ ॥

एक तोले धनियेको कूटकर रात्रिमें ९ तोले जलमें भिगोदेवे फिर प्रातःकाल छानकर उसमें दो तोले मिश्री डालकर पान करनेसे मनुष्योंका पित्तज्वर और अत्यन्त प्रबल आभ्यन्तरिक दाह तत्काल शमन होती है ॥ ७८ ॥

श्रीपर्ण्यादि ।

श्रीपर्णीचन्दनोशीरपरूषकमधूकजः ।
शर्करामधुरो हन्ति कषायः पैत्तिकं ज्वरम् ॥ ७९ ॥

कुम्भेर, लालचन्दन, खस, फालसे और महुआ इनके काथमें मिश्री डालकर पान करनेसे पैत्तिक ज्वर दूर होता है ॥ ७९ ॥

पर्पटादि ।

पर्पटो वासकस्तिक्ता कैराती धन्वयासकः ।
प्रियंगुश्च कृतः क्वाथ एषां शर्करया युतः ॥
पिपासादाहपित्तास्रयुतं पित्तज्वरं हरेत ॥ १८० ॥

पित्तपापडा, अडूसा, कुटकी, चिरायता, जवासा और फूलप्रियंगु इनके काथमें मिश्री मिलाकर पान करनेसे पिपासा, दाह और रक्तपित्तयुक्त पित्तज्वर दूर होता है ॥ १८० ॥

गुडूच्यादि ।

गुडूच्यामलकैर्युक्तः केवलो वापि पर्पटः ।
पित्तज्वरं हरेच्चूर्ण दाहशोथभ्रमान्वितम् ॥ ८१ ॥

गिलोय, आमले और पित्तपापडा इनका काथ अथवा केवल पित्तपापडेका काथ दाह, शोथ और भ्रमयुक्त पित्तज्वरको शीघ्र हरता है ॥ ८१ ॥

भूनिम्बादि ।

भूनिम्बातिविषालोध्रमुस्तकेन्द्रयवामृताः ।
बालकं धान्यकं बिल्वं कषायो माक्षिकान्वितः ॥
विड्भेदश्वासकासांश्च रक्तपित्तज्वरं हरेत् ॥ ८२ ॥

चिरायता, अतीस, लोध, नागरमोथा, इन्द्रजौ, गिलोय, सुगन्धवाला, धनियाँ, बेलकी छाल इनके काथमें शहद मिलाकर सेवन करनेसे मलभेद, श्वास, खाँसी, रक्तपित्त और ज्वर दूर होता है ॥ ८२ ॥

धन्याकक्काथ ।

ससितो निशि पर्य्युषितः प्रातर्धन्याकक्काथः ।
पीतः शमयत्यचिरादन्तर्दाहं ज्वरं पैत्तम् ॥ ८३ ॥

पारा, लोहा, पीपल और गन्धक ये प्रत्येक एक एक भाग और जमालगोटा ३ भाग लेकर सबको जम्बीरीनींबूके रसमें अच्छे प्रकारसे खरल करके नेत्रोंमें आँजनेसे सर्वप्रकारके उपद्रवोंसहित सन्निपातज्वर शीघ्र निवृत्त होता है ॥ १०८ ॥

सौभाग्यवटी ।

सौभाग्यामृतजीरपञ्चलवणव्योषाभयाक्षामला-
निश्चन्द्राभ्रकशुद्धगन्धकरसानेकीकृतान् भावयेत् ।
निर्गुण्डीयुगभृंगराजकवृषापामार्गपत्रोल्लसत्-
प्रत्येकस्वरसेन सिद्धवटिका हन्ति त्रिदोषोदयम् ॥ ९ ॥

सुहागा, शुद्ध वत्सनाभ, जीरा, सैंधानमक, कालानमक, समुद्रनमक, साँभरनमक, विडनमक, सोंठ, मिरच, पीपल, हरड, बहेडा, आमला और चन्द्रिकारहित अभ्रककी भस्म ये प्रत्येक औषधि एक एक भाग और पारे, गन्धककी कज्जली दो भाग लेकर सबको एकत्र खरल करके निर्गुण्डी, भाँगरा, कुकुरभाँगरा, अडूसा और चिरचिटा इन प्रत्येकके पत्तोंके स्वरसमें क्रमसे भावना देकर दो दो रत्तीकी गोलियाँ बनालेवे ॥ १०९ ॥

येषां शीतमतीव देहमखिलं स्वेदद्रवार्द्रीकृतं
निद्रा घोरतरा समस्तकरणव्यामोहमूढं मनः ।
शूलश्वासबलासकाससहितं मूर्च्छारुचिस्तृड्ज्वरं
तेषां वै परिहृत्य जीवितमसौ गृह्णाति मृत्योर्मुखात् ॥१०॥

जिन मनुष्योंका समस्त शरीर अत्यन्त शीतल हो और जिसको अधिक पसीना आनेसे देह अत्यन्त आर्द्र होजाताहो और निद्रा हो और सम्पूर्ण इन्द्रियोंसहित मन विक्षुब्ध होगया हो, ऐसे मनुष्योंको इस औषधिकी एक एक गोली उपयुक्त अनुपानके साथ सेवन करावे। यह सौभाग्यवटी शूल, श्वास, कफ, खाँसी, मूर्च्छा, अरुचि, तृषा आदि उपद्रवोंसहित सन्निपात ज्वरको दूर करके रोगीको मृत्युके मुखसे बचाकर नवजीवन प्रदान करती है॥ ११० ॥

श्रीवेतालरस।

रसं गन्धं विषं चैव मरिचालं समांशकम्।
मर्दयेच्छिलया तावद्यावज्जायेत कज्जलम् ॥ ११ ॥
गुञ्जामात्रप्रमाणेन हरेद् द्वादशसंज्ञकम्।
साध्यासाध्यं निहन्त्याशु सन्निपातं सुदारुणम् ॥ १२ ॥
ग्लानेषु लिप्तदेहेषु मोहग्रस्तेषु देहिषु।
दातुमर्हति वेतालो यमदूतनिवारकः ॥ १३ ॥

शुद्ध पारा, शुद्ध गन्धक, शुद्ध मीठा तेलिया, मिरच और हरताल ये सब औषधियाँ समान भाग लेकर प्रथम पारे और गन्धककी कज्जली करले, फिर सबको एकत्र मिलाकर पत्थरके खरलमें जलके साथ इतना घोटे कि, घुटते २ औषधि काजलके समान काली और चिकनी होजाय। फिर उसकी एकएक रत्तीकी गोलियाँ बनालेवे। इन गोलियोंके सेवन करनेसे साध्य व असाध्य बारह प्रकारका दारुण सन्निपात शीघ्र नष्ट होता है। रोगीके शरीरमें अधिक ग्लानि होनेपर तथा पसीनेके आनेसे आर्द्रता होनेपर और अत्यन्त मोह बेहोशीके होनेपर भी यह रस देना चाहिये यह वेतालरस यमदूतको भी निवारण करनेवाला है॥ ११-१३ ॥

चक्री।

रसं गन्ध विषं चैव धत्तूरं मरिचं तथा।
शोधितं च तथा तालं माक्षिकं च समांशकम् ॥ १४ ॥
दन्तीक्काथेन सम्भाव्य गुञ्जामात्रा तु चक्रिका।
साध्यासाध्यान्निहन्त्याशु सन्निपातांस्त्रयोदश ॥ १५ ॥

पारे और गन्धककी कज्जली, शुद्ध वत्सनाभ, धतूरेके बीज, मिरच, शुद्ध हरताल और सोनामाखी सबको समान भाग ले दन्तीके काढेमें खरल करके एकएक रत्तीकी

गोलियाँ बनालेवे। ये गोलियाँ साध्य और असाध्य तेरहों प्रकारके सन्निपातज्वरोंको शीघ्र नष्ट करती हैं ॥ १४ ॥ १५ ॥

द्वितीय चक्री।

शम्भोः कण्ठविभूषणं समरिचं तालं तथा पारदं
देवीबीजयुतं सुशोधितमितं जैपालबीजोत्तमम्।
दन्तीमूलयुतं समागधिफलं सर्वं समांशं नयेत्
तत्सर्वं परिमर्द्य चार्द्रकरसैर्गुञ्जाप्रमाणं रसम् ॥ १६ ॥
दद्याद् घोरतरे त्रयोदशविधे दोषे च चक्र्याह्वयं
तन्द्रादाहसमन्विते च तृषया सम्पीडिते मानवे ॥१७॥

शुद्ध वत्सनाभ विष, मिरच, हरताल, पारा और गन्धककी कज्जली, शुद्ध जमालगोटे, दन्तीकी जड और पीपल इन सब औषधियोंको समान भाग लेकर अदरखके रसमें खरलकरके एक एक रत्तीकी गोलियाँ बनालेवे। अत्यन्त उग्र तेरहोंप्रकारके सन्निपातज्वर, दोषोंकी उल्बणता, तन्द्रा, दाह और तृषायुक्त ज्वरमें भी यह रस रोगीको सेवन कराना चाहिये। इसके सेवनसे उक्त सब विकार शान्त होतेहैं ॥ १६ ॥ १७ ॥

ब्रह्मरन्ध्ररस।

रसाभ्रगन्धकं तालं हिङ्गुलं मरिचं तथा।
टङ्कणं सैन्धवोपेतं सर्वांशममृतं तथा ॥ १८ ॥
सर्वपादसमोपेतं महिषीपित्तमर्दितम्।
ब्रह्मरन्ध्रे प्रयोक्तव्यं संन्यासज्ञानसंगमे ॥ १९ ॥
सहस्रकलशैः स्नानं लेपनं चन्दनादिभिः।
इक्षुमुद्गरसं भोज्यं तक्रभक्तं यथेप्सितम् ॥ १२० ॥

पारा और गन्धककी कज्जली दो भाग, अभ्रक, हरताल, सिंगरफ, मिरच, सुहागा और सैंधानमक ये प्रत्येक औषधि एक एक भाग और शुद्ध वत्सनाभ सबके बराबर भाग लेवे। इन समस्त औषधियोंसे चौथाई भाग भैंसका पित्त लेकर उसमें इन सबको खूब अच्छेप्रकारसे खरल करके सन्निपातज्वरकी अज्ञानावस्थामें रोगीके ठीक ब्रह्मरन्ध्रकी जगह मस्तकमें अस्त्रद्वारा बडी सावधानीसे किंचित् क्षत करके उसमें इस रसको भरदेवे। इसके पश्चात् रोगीको शीतल जलसे हजार कलशोंसे स्नान करावे और उसके शरीरपर चन्दन आदिका लेप करे और इसपर ईखका रस, मूँगका

यूष, तक्र और भातका यथेच्छरूपसे पथ्य देवे ॥ १८-१२० ॥

आनन्दभैरवीवटी।

विषं त्रिकटुकं गन्धं टङ्कणं मृतशुल्बकम्।
धत्तूरस्य च बीजानि हिङ्गुलं नवमं स्मृतम् ॥ २१ ॥
एतानि समभागानि दिनैकं विजयारसैः।
मर्दयेच्चणकाभा तु वटिकाऽऽनन्दभैरवी ॥ २२ ॥
भक्षयित्वा पिबेच्चानु रविमूलकषायकम्।
सव्योषं हन्ति नो चित्रं सन्निपातं सुदारुणम् ॥ २३ ॥

शुद्ध वत्सनाभ, सोंठ, मिरच, पीपल, गन्धक, सुहागा, तांबेकी भस्म, धतूरेके बीज और सिंगरफ इन सबको समान भाग लेकर एक दिनतक भांगके रसमें घोटकर चनेकी बराबर गोलियाँ बनालेवे। इनको आनन्दभैरवीवटी कहतेहैं। इनमेंसे एक गोली खाकर ऊपरसे त्रिकुटेका चूर्ण मिलाकर आककी जडका काढा पीवे तो दारुण सन्निपातज्वर दूर होताहै ॥ २१-२३ ॥

त्रैलोक्यसुन्दररस

रसगन्धकयोर्माषौ प्रत्येकं कज्जलीकृतौ।
शक्रं च मुसली चैव धत्तूरः केशराजकम् ॥ २४ ॥
देवदाली जयन्ती च तथा मण्डूकपर्णिका।
एषां पत्ररसैः शाणैः शिलायां खल्लयेत्पुनः ॥ २५ ॥
शोषयित्वा वटी कार्या त्वनेका राजिकोपमा।
त्रिदोषजं ज्वरं हन्ति तथा प्रबलकोष्ठकम् ॥ २६ ॥
तत्र तु नारिकेलस्य जलं देयं प्रयत्नतः।
त्रैलोक्यसुन्दरो नाम सन्निपातहरो रसः ॥ २७ ॥

पारा और गंधक प्रत्येक दो दो माशे लेकर कज्जली करलेवे। फिर उसको कुडेकी छाल, मुसली धतूरा, कुकुरभांगरा, बंदाल, अरणी और मण्डूकपर्णी इन औषधियोंके पत्तोंके चार चार माशे रसके साथ पत्थरके खरलमें खूब खरल करके सरसोंके बराबर गोलियाँ बनाकर सुखालेवे. यह त्रैलोक्यसुन्दररस सेवन करनेसे कोष्ठगत त्रिदोषज्वर और सब प्रकारके सन्निपातज्वर दूर होते हैं। इसके सेवन करनेसे यदि रोगीको गरमी मालूम होवे तो नारियलका जल पीनेको देना चाहिये ॥ २४-२७ ॥

मृतोत्थापनरस।

शुद्धसूतं द्विधा गन्धं शिला च विषहिङ्गुलम्।
मृतकान्ताभ्रताम्रायस्तालकं माक्षिकं समम् ॥ २८ ॥
अम्लवेतसजम्बीरचाङ्गेरीणां रसेन च।
निर्गुण्डीहस्तिशुण्डयोश्च द्रवैर्मर्द्यं दिनत्रयम् ॥ २९ ॥
रुद्ध्वा तु भूधरे पाच्यं दिनान्ते तत्समुद्धरेत्।
चित्रकस्य कषायेण मर्दयेत्प्रहरद्वयम् ॥ १२० ॥
माषमात्रं प्रदातव्यं हिङ्गुव्योषार्द्रकद्रवैः।
सकर्पूरानुपानं स्यान्मृतस्योत्थापने रसे ॥ ३१ ॥
पीडितं सन्निपातेन गतं वापि यमालयम्।
तत्क्षणाज्जीवयत्येष पथ्यं क्षीरैः प्रयोजयेत् ॥ ३२ ॥

शुद्ध पारा एकभाग, शुद्ध गन्धक दो भाग एवं मैनसिल, शोधित वत्सनाभ, सिंगरफ, अभ्रकभस्म, ताम्रभस्म, लोहभस्म, हरताल और स्वर्णमाक्षिककी भस्म इन सब औषधियोंको एकएक भाग लेकर सबको एकत्र मिश्रित करके अम्लवेत जम्बीरीनिंबु, चूका, निर्गुण्डी और हाथीशुण्डी इन प्रत्येकके रसमें क्रमसे तीन तीन दिनतक खरल करके घडियामें रखकर फिर एकदिनतक भूधरयन्त्रमें पकावे, उत्तम प्रकारसे पकजानेपर औषधिको निकालकर चीतेकी जडके काढेमें दो प्रहरतक खरल करे इसकी मात्रा एकएक उडदके बराबर देनी चाहिये और इस तरह ऊपरसे हींग सोंठ, मिरच, पीपल, अदरखका रस और कपूरका जल इनका अनुपान करना चाहिये। यह रस सन्निपातज्वरसे पीडित और मृतप्राय व्यक्तिको भी तत्काल जीवित करता है। इसपर दूधका पथ्य देवे ॥ २८-३२ ॥

मृतसंजीवनरस।

शुद्धसूतं द्विधा गन्धं खल्वे तत्कज्जलीकृतम्।
अभ्रलोहकयोर्भस्म ताम्रभस्म समं समम् ॥ ३३ ॥
विषतालवराटी च शिलाहिङ्गुलचित्रकम्।
हस्तिशुण्डी चातिविषा त्र्यूषणं हेममाक्षिकम् ॥ ३४ ॥
चूर्णं विमर्दयेद्द्रावैरार्द्रकस्य दिनत्रयम्।
निर्गुण्डीविजयाद्रावैस्त्रिदिनं मर्दयेत्पुनः ॥ ३५ ॥

काचकुप्यां निवेश्याथ वालुकायन्त्रके पचेत् ।
द्वियामान्ते समुद्धृत्य मर्दयेदार्द्रकद्रवैः ॥ २६ ॥
मृतसंजीवनो नाम रसोऽयं शंकरोदितः ।
मृतोऽपि सन्निपातार्त्तो जीवत्येव न संशयः ॥ २७ ॥
नातः परतरः कश्चित् सन्निपातहरो रसः ।
अघोरंमन्त्रमुच्चार्य पूजां रक्षां च कारयेत् ॥ २८ ॥

पारा एकभाग और गन्धक दोभाग दोनोंको एकत्र खरल करके कज्जली करलेवे एवं अभ्रकभस्म, लोहभस्म, ताम्रभस्म, वत्सनाभ, हरताल, कौडीकी भस्म, मैनसिल, सिंगरफ, सोनामाखी चीतेकी जड़, हाथीशुण्डीकी जड, अतीस, सोंठ, मिरच और पीपल ये प्रत्येक औषधि एक एक भाग लेकर सबको एकत्र बारीक खरलकर अदरखके रसमें तीन दिनतक और निर्गुण्डी और भाँगके रसमें क्रमसे तीन तीन दिनतक खरल करके काँचकी आतसी शीशीमें भरकर वालुकायन्त्रमें पकावे । दो प्रहरके पश्चात् स्वांगशीतल होनेपर औषधिको निकालकरके अदरखके रसमें खरल करके सुखालेवे । यह श्रीशंकरमहाराजका कहा हुआ मृतसंजीवननामक रस है । इसके सेवन करनेसे मृतप्राय सन्निपातरोगी भी जीवित होजाताहै । सन्निपातको नष्ट करनेवाला इससे उत्तम और कोई रस नहीं है । इस रसको सेवन करानेसे प्रथम अघोर मंत्रके द्वारा शिवजीका पूजन और रसको अभिमंत्रित करके सुरक्षित करलेना चाहिये ॥ २२–२८ ॥

सन्निपातभैरव रस ।

हिङ्गुलस्य विशुद्धस्य सार्द्धतोलचतुष्टयम् ।
गन्धकस्य विषस्यापि प्रत्येकं तोलकद्वयम् ॥ २९ ॥
समाषकद्वयं चैव कनकात्तोलकत्रयम् ।
माषैकाधिकतोलैकं टङ्कणस्य तथैव च ॥ १४० ॥
सम्मर्द्य जम्बीररसैर्वटीं छायाविशोषिताम् ।
गुञ्जैकापरिमाणां तु कारयेत्कुशलो भिषक् ॥ ४१ ॥
एकां तु भक्षयेत्तासां गोलयित्वाऽऽर्द्रकद्रवैः ।
घोरे त्रिदोषे दातव्यः सन्निपातकभैरवः ॥ ४२ ॥

" ॐ अघोरेभ्यश्च घोरेभ्यश्च घोरघोरतरेभ्यश्च सर्वतः । सर्वेभ्यो नमोस्तु रुद्ररूपेभ्यः । " इति मन्त्रेण रक्षणं पूजनं च । अघोरमन्त्रेण अन्यत्रापि रसकार्यमन्यथा दोषोऽस्ति ॥

शुद्ध सिंगरफ साढेचार तोले, शुद्ध गन्धक दो तोले दो मासे, शुद्ध वत्सनाभ २ तोले २ मासे, धतूरेके बीज ३ तोले और सुहागा एक तोला एक माशा इन सबको जम्बीरीनींबूके रसमें खरलकरके एक एक रत्तीकी गोलियाँ बनाकर छायामें सुखालेवे । इनमेंसे घोर सन्निपातज्वरमें एक एक गोली अदरखके रसमें मिलाकर रोगीको सेवन कराना चाहिये । यह रस सन्निपातज्वरको नष्ट करनेके लिये विशेष उपयोगी है ॥ ३९-१४२ ॥

सूचिकाभरणरस ।

रसगन्धकनागं च विषं स्थावरजङ्गमम् ।
मात्स्यवाराहमायूरच्छागपित्तैश्च भावयेत् ॥ ४३ ॥
सूचिकाभरणो नाम भैरवेण प्रकीर्त्तितः ।
सूचिकाग्रेण दातव्यः सन्निपातकुलान्तकः ।
"सर्षपमात्रया आर्द्रकस्वरसेन खादेत्" ॥ ४४ ॥

पारे गन्धककी कज्जली २ भाग, एवं सीसेकी भस्म, शुद्ध मीठा तेलिया और काले साँपका विष ये प्रत्येक एकएक भाग लेकर सबको रोहू मछली, सूअर, मोर और बकरे इनके पित्तमें क्रमसे एकएक दिनतक खरल करे तो सूचिकाभरणरस तैयार होता है । इसको सुईके अग्रभागसे लेकर १ सरसोंतककी मात्राको अदरखके रस और मधुके अनुपानसे सेवन करावे । यह रस सब प्रकारके सन्निपातज्वरोंको नष्ट करदेता है ॥ ४३ ॥ ४४ ॥

पुनः सूचिकाभरणरस ।

अमृतं गरलं दारु सर्वतुल्यं च हिङ्गुलम् ।
पञ्चपित्तेन संमर्द्य सर्षपाभां वटीं चरेत् ॥ ४५ ॥
वटिका सूचिकाग्रेण सन्निपातकुलान्तकृत् ।
शैत्यार्थे तिलतैलं च भोजनं दधिभक्तकम् ॥ ४६ ॥

शुद्ध मीठा तेलिया, काले साँपका विष और सोमल विष ये प्रत्येक एक एक भाग और सिंगरफ तीन भाग लेकर सबको एकत्र पञ्चपित्तों (रोहू मछली, सूअर भैंसा, बकरा, और मोर इन पाँचोंके पित्तों) में क्रमसे एकएक दिनतक खरल करके सरसोंकी बराबर गोलियाँ बनालेवे । उनमेंसे एक एक गोली सुईके अग्रभागसे उठाकर नारियलके जलके साथ सेवन करावे । सेवनके पश्चात् रोगीके शरीरपर तिलके तेलकी मालिश करावे और दही, भातका पथ्य देवे । यह रस भी सम्पूर्ण सन्निपातज्वरको नष्ट करता है ॥ ४५ ॥ ४६ ॥

बृहत्सूचिकाभरणरस ।

रसगन्धकनागाभ्रं विषं स्थावरजङ्गमम् ।
मात्स्यमाहिषमायूरच्छागपित्तैर्विभावयेत् ॥ ४७ ॥
सूचिकाभरणो नाम भैरवेण प्रकीर्त्तितः ।
दातव्यः सूचिकाग्रेण पयःपेटीरसेन च ॥ ४८ ॥
त्रयोदशसन्निपाते विषूच्यामतिसारके ।
त्रिदोषजे तथा कासे दापयेत्कुशलो भिषक् ॥ ४९ ॥
पयःपेटीशतं दद्यात् भोजनं दधिभक्तकम् ।
तथा सुभर्जितं मांसं लेपनं तिलचन्दनैः ॥
रोगिणो यत्प्रियं द्रव्यं तस्मै तच्च प्रदापयेत् ॥ १५० ॥

पारा और गन्धककी कज्जली, सीसा, अभ्रक, स्थावरविष और जंगम (कृष्ण सर्पका) विष प्रत्येक समान भाग लेकर रोहूमछली, भैंसा, मोर और बकरेके पित्तमें क्रमसे एक एक दिनतक भावना देक सरसोंकी समान गोलियां बनाकर सुईकी नोकसे उठाकर इसको नारियलके जलके साथ सेवन करावे । इस रसको तेरह प्रकारके सन्निपातज्वर, विषूचिका, अतिसार और त्रिदोषजनित कासरोग आदिमें सेवन कराना चाहिये. इसपर १०० नारियलोंका जल, दहीभात और घृतमें भुना हुआ मांस तथा जो वस्तु रोगीको प्रिय लगे वह उसको सेवन करनेके लिये दे और रोगीके शरीरपर तिलके तेल और चन्दनादिका प्रलेप करना चाहिये ॥१४७–१५०॥

पानीयवटिका ।

रसमाषकचत्वारि इष्टकागुण्डके मर्दः ।
शोषयित्वा ततः शोध्य तीक्ष्णपर्णे तथाऽऽर्द्रके ॥ ५१ ॥
स्वर्णधुस्तूरसत्त्वे च वृद्धदारद्रवे तथा ।
कन्यकानिजसत्त्वे च रसशोधनमुत्तमम् ॥ ५२ ॥
गन्धकं रसतुल्यं तु प्रक्षाल्य तण्डुलाम्बुना ।
कृत्वा तैलसमं दार्व्यां निर्वाप्य चित्रकद्रवे ॥ ५३ ॥
द्वाभ्यां कज्जलिकां कृत्वा लौहचूर्णस्य माषकम् ।
सुवर्णमाक्षिकं चापि तत्र लौहसमं ददेत् ॥ ५४ ॥

कृत्वा कण्टकवेध्यं तु ताम्रं कज्जललेपितम् ।
मुहूर्तमध्यतस्ताम्रं द्रुतं चूर्णत्वमाप्नुयात् ॥ ९५ ॥
एकीकृत्य तु तत्सर्वं ततः प्रस्तरभाजने ।
मर्दयेत्ताम्रदण्डेन दत्त्वा चैषां निजद्रवम् ॥ ९६ ॥

पारा ४ माशे लेकर ईंटके चूर्णके साथ मिलाकर खूब घोटे, फिर उस समस्त चूर्णको निकालकर और उसमेंसे पारेको अलग करके कमरख, अदरख, काले धतूरेके पत्ते, बिधारेकी जड और घीग्वार इन प्रत्येकके स्वरसमें क्रमसे मर्दन करके सुखाताजाय; पारेको शुद्ध करनेकी यह क्रिया सर्वोत्तम है। इसके पश्चात् ४ माशा गन्धक लेकर प्रथम चावलोंके जलमें धोवे, फिर उसको लोहेकी करछीमें रखकर अग्निपर तपावे, जब वह पिघलकर तेलकी समान पतली हो जाय तब उसे चीतेके काढेमें छोडदेवे। इस प्रकार शुद्ध कियेहुए पारे और गन्धकको लेकर दोनोंकी एकत्र कज्जली करलेवे। फिर शुद्ध ताँबेके कण्टकवेधी सूक्ष्मपत्रोंपर उस कज्जलीका लेप करके उन पत्रोंको हाँडीमें बन्दकर चूल्हेपर रखकर अग्नि देवे। इस प्रकारसे मुहूर्त्त-भरमें ही ताँबेकी उत्तम भस्म हो जाती है। उक्त विधिसे तैयार की हुई ताम्रभस्म १ माशा, लोहभस्म १ माशा और स्वर्णमाक्षिकभस्म १ माशा लेकर तीनोंको पत्थरके खरलमें डालकर निम्नलिखित ओषधियोंके रसके साथ ताँबेकी मुसलीसे खरल करे ॥ १५१-१५६ ॥

प्रथमे केशराजश्च द्वितीये ग्रीष्मसुन्दरः ।
तृतीये भृङ्गराजश्च चतुर्थे भेकपार्णिका ॥ ९७ ॥
पञ्चमे च निसुन्दारःषष्ठे च रसपूर्त्तिका ।
सप्तमे पारिभद्रश्च अष्टमे रक्तचित्रकः ॥ ९८ ॥
शक्रासनं च नवमे दशमे काकमाचिका ।
एकादशे तथा नीला द्वादशे हस्तिशुण्डिका ॥ ९९ ॥
अमीषामोषधीनां तु प्रत्येकं तु पलद्रवम् ।
मर्दयेत्तु प्रयत्नेन द्वादशाहेन साधकः ॥ १६० ॥

पहले दिन कुकुरभाँगरेके रसमें, दूसरे दिन ग्रीष्मसुन्दर (शालिशाक), तीसरे दिन भाँगरा, चौथे दिन मण्डूकपर्णी, पाँचवें दिन सिंहाल्ह, छठे दिन मालकाँगनी, सातवें दिन फरहद, आठवें दिन लालचीता, नववें दिन भाँग, दसवें दिन मकोय, ग्यारहवें दिन नीलीवृक्ष और बारहवें दिन हाथीशुण्डी इन ओषधियोंका चार चार

तोले रस डालकर इस प्रकार बारह दिनतक उत्तम प्रकारसे खरल करे॥५७-६०॥

ततः पारदमाने तु दत्त्वा त्रिकटुगुण्डकम् ।
वटिकां राजिकातुल्यां छायाशुष्कां समाचरेत् ॥ ६१ ॥
ततः शम्बुकजे पात्रे कर्त्तव्यावटिका त्वियम् ।
शरावे शङ्खपात्रे वा कृत्वा सलिलगोलितम् ॥ ६२ ॥
अत्यन्तदोषदुष्टाय ज्ञानशून्याय रोगिणे ।
ऊर्ध्वयोनिं समभ्यर्च्य प्रदद्याद्वटिकाद्वयम् ॥ ६३ ॥
ढक्कयेत्तं ततः पश्चान्नरं स्थूलपटादिभिः ।
मलमूत्रागमात्सद्यः स साध्यो भवति द्रुतम् ॥ ६४ ॥

फिर उसमें चार माशे त्रिकुटेका चूर्ण मिलाकर राईकी बराबर गोलियाँ बनाकर छायामें सुखालेवे। इन गोलियोंमेंसे दो दो गोली लेकर घोंघा, शंख, सीप या शराव (सकोरा) में रखकर, जलमें घोलकर और ब्रह्माका यथाविधि पूजन करके रोगीको सेवन करावे। जिस सन्निपातज्वरमें रोगीके वातादि दोष अत्यन्त दुष्ट होगये हों और जो बिलकुल ज्ञानशून्य हो ऐसे रोगीको यह औषध सेवन कराकर तत्काल मोटा और गरम कपडा उढाकर ढकदेवे। इसके पश्चात् यदि रोगी शीघ्रही मलमूत्रका त्याग करे तो उसको साध्य समझना चाहिये ॥ ६१-६४ ॥

दध्यन्नं तु ततो दद्यात्पिबेद्वारि यथेच्छया ।
दद्याद्वातहरं तैलमभ्यङ्गाय सदैव हि ॥
चिरज्वरे पिबेद्वारि पञ्चमूलीप्रसाधितम् ॥ ६५ ॥
ग्रहण्यां रक्तपाते च पिबेदतिविषां गदी ।
पिबेत् पर्पटजं वारि घोरे कम्पज्वरे तथा ॥
तथा ज्वरातिसारे च जीरकस्य जलं पिबेत् ॥ ६६ ॥
मन्दाग्नौ कामलायां च संग्रहग्रहणीगदे ।
कासे श्वासे सदा कार्या पानीयवटिका त्वियम् ॥ ६७ ॥

तदनन्तर रोगीको दहीभातका भोजन और यथेच्छ जलपान करावे। तथा वातनाशक महानारायणादि तेलोंकी शरीरपर मालिश करावे। इसपर पुराने

ज्वरमें पंचमूलके काढेका, संग्रहणी और रक्तातिसाररोगमें अतीसके क्वाथ, घोर कम्पज्वरमें पित्तपापडेके क्वाथ और ज्वरातिसार, मन्दाग्नि, कामला, संग्रहणी, खाँसी, श्वास आदि रोगोंमें जीरेके क्वाथका अनुपान करना चाहिये। इस रसको पानीयवटिका कहते हैं ॥ ६५-१६७ ॥

सिद्धफलापानीयवटिका।

अनाथनाथो जगदेकनाथस्त्रिलोकनाथः प्रथमं प्रसन्नः।
जगाद पानीयवटीं सुपट्वीं तामेव वक्ष्यामि गुरुप्रसादात्॥६८

जयार्कस्वरसं चैव निर्गुण्डीवासकं तथा।
वाट्यालकं करञ्जं च सूर्यावर्त्तकचित्रकौ ॥ ६९ ॥
ब्राह्मीं वनं सर्षपं च भृङ्गराजं विनिक्षिपेत्।
दन्ती च त्रिवृता चैव तथाऽऽरग्वधपत्रकम् ॥ १७० ॥
सहदेवामरं भण्डी तथा त्रिपुरभण्डिका।
मण्डूकपर्णी पिप्पल्यौ द्रोणपुष्पकरायसी ॥ ७१ ॥
गुञ्जाकिनी केशराजस्तथा योजनमल्लिका।
आसारणेति विख्यातो धुस्तूरः कनकस्तथा ॥ ७२ ॥
त्रैलोक्यविजया चैव तथा श्वेताऽपराजिता।
प्रत्येकं कार्षिकं चैव रसमाकृष्य भाजने ॥ ७३ ॥
एकैकं च रसं दत्त्वा मर्दयेल्लौहदण्डतः।
चण्डातपे च संशोष्य क्षीरं तत्र पुनः क्षिपेत् ॥ ७४ ॥
स्नुहीक्षीरं चार्कदुग्धं वटदुग्धं तथैव च।
प्रत्येकं कार्षिकं दत्त्वा मर्दयेच्च पुनः पुनः ॥ ७५ ॥
सुमर्दितं च तं ज्ञात्वा यदा पिण्डत्वमागतम्।
द्रव्याण्येतानि संचूर्ण्य वस्त्रपूतानि कारयेत् ॥ ७६ ॥

अनाथोंके नाथ, जगत्पति, त्रिलोकीनाथ भगवान्ने प्रसन्न होकर पूर्वकालमें जिस सर्वरोगापहारिणी और सर्वसिद्धिप्रदायिनी पानीयवटीको वर्णन किया है, उसीको मैं श्रीगुरुमहाराजके चरणोंकी कृपासे वर्णन करताहूँ—अरणी, आक, सिंहालू, अडूसा, खिरैंटी, छोटीकरंज, हुलहुल, चीता, ब्राह्मी, वनसरसों, भाँगरा, दन्ती, निसोत, अमलतासके पत्ते, सहदेई, अमरकन्द, मजीठ, त्रिपुर-

भाण्डिका (वङ्गदेशप्रसिद्ध बडभाँट), मण्डूकपर्णी, पीपल, गजपीपल, गूमा, मकोय, घुँघुची, कुकुरभाँगरा, मदनमाली (एक प्रकारका सुगन्धितपुष्प), आसारण, स्वर्ण धतूरा, भाँग और श्वेत अपराजिता इन समस्त औषधियोंके रसको एक एक कर्ष परिमाण लेकर प्रत्येकके रसको क्रमसे पत्थरके खरलमें डालकर लोहेकी मूसलीसे खरल करे । फिर सबको प्रचण्ड धूपमें सुखाकर उसमें थूहरका दूध, आकका दूध, और बडका दूध प्रत्येक एक एक कर्ष डालकर अच्छेप्रकारसे मर्दन करके गोलासा बनालेवे । इसके पश्चात् उसमें निम्नलिखित औषधियोंको खूब बारीक पीसकर कपडछान करके डाले ॥ ६८-१७६ ॥

दग्धहीरं चातिविषां कोचिलामभ्रकं तथा ।
पारदं शोधितं चैव गन्धकं विषमाधुरम् ॥ ७७ ॥
हरितालं विषं चैव माक्षिकं च मनःशिला ।
प्रत्येकं च चतुर्मांषं सर्वं चूर्णीकृतं च तत् ॥ ७८ ॥
प्रक्षिप्य मर्दयेत्सर्वं शोषयित्वा पुनः पुनः ।
सुमर्दितं च तद् दृष्ट्वा चाङ्गेरीस्वरसेन च ॥ ७९ ॥
उत्थाप्य भेषजं दृष्ट्वा यदा पिण्डत्वमागतम् ।
तिलप्रमाणा गुटिकाः कारयेन्मतिमान् भिषक् ॥ १८० ॥

हीरेकी भस्म, अतीस, कुचला, अभ्रकभस्म, शुद्ध पारे और शुद्ध गन्धककी कज्जली, शुद्ध मीठातेलिया, हरताल, सर्पविष, सोनामाखी और मैनसिल, इन सबको चार चार माशे परिमाण मिलाकर बारम्बार खरलकरे और धूपमें सुखावे । जब औषधि उत्तमप्रकारसे घुटकर तैयार होजाय तब उसको चूका शाकके रसमें घोटे । घुटले २ जब उसका गोलासा बनजाय तब उसकी तिलकी बराबर गोलियाँ बनालेवे ॥ ७७-१८० ॥

त्रिदोषजनितो वैद्यमुक्तोऽपि बहुसम्मतः ।
लंघनैर्वालुकास्वेदैः प्रक्रान्तो दीनदर्शनः ॥ ८१ ॥
सम्पूज्य करुणाधारं प्रणम्य च खसर्पणम् ।
शरावे वारिणा घृष्ट्वाऽऽविंशतिं वटिकां पिबेत् ॥ ८२ ॥
पीतं तद्भेषजं पश्चाद्वस्त्रैराच्छादयेन्नरम ॥
रसलग्नं वपुर्ज्ञात्वा दद्याद्वारि सुशीतलम् ॥ ८३ ॥

शरावप्रमितं वारि पातव्यं च पुनः पुनः ।
सन्निपातज्वरं चैव दाहं चैव सुदारुणम् ॥ ८४ ॥
कासं श्वासं च हिक्कां च विड्ग्रहं चाश्मरीं जयेत् ।
मूत्ररोगविबन्धे तु दातव्यं क्षीरसंयुतम् ॥ ८५ ॥
पञ्चतृणकृतं क्वाथं दातव्यं च पुनः पुनः ।
पानीयवटिका ह्येषा लोकनाथेन निर्मिता ॥
लोकानामुपकाराय सर्वसिद्धिप्रदायिनी ॥ ८६ ॥

जो रोगी घोर सन्निपातज्वरमें बेहोश पडा हो, जिसको वैद्योंने असाध्य जानकर त्याग दिया हो, जिसको लंघन वालुकास्वेद आदि उपचारोंके द्वारा भी कुछ लाभ न हुआ हो और जो अत्यन्त दीन दशामें हो ऐसे रोगीको प्रथम करुणानिधान शंकर भगवान्‌का पूजन और सूर्यदेवको प्रणाम करके फिर इस रसकी दो या तीन गोलियाँ सकोरेमें पानीके साथ घिसकर सेवन करावे। यदि रोगकी अधिक प्रबलता प्रतीत हो तो २० गोलीतक इसी विधिसे सेवन करानी चाहिये और रोगीको औषध सेवन कराकर तत्काल गरम व मोटे वस्त्रसे ढकदेना चाहिये। जब औषधि रोगीके शरीरमें व्याप्त होजाय तब उसको थोडी २ देर पीछे एक एक सकोरा शीतलजल पान करावे। यह रस इस प्रकार सेवन करनेपर घोर सन्निपातज्वर, अत्यन्त प्रबलदाह खाँसी, श्वास, हिचकी, मलका, अवरोध और अश्मरी (पथरी) इन सब रोगोंको नष्ट करता है। मूत्रकृच्छ्ररोगमें इस रसको दूधके साथ सेवन कराकर पञ्चतृणमूल (कुश, काँस, रामसर, कालीईख और शालिधान इन औषधियों) का क्वाथ बारम्बार पान कराना चाहिये। सम्पूर्ण सिद्धियोंको प्रदान करानेवाली इस पानीयवटीको जगत्‌का उपकार करनेके निमित्त श्रीशंकरभगवान्‌ने निर्माण किया है॥ १८१-१८६॥

चिन्तामणिरस।

सूतं गन्धकमभ्रकं सुविमलं सूताद्र्धभागं विषं
तत्त्र्यंशं जयपालमम्लमृदितं तद्गोलकं वेष्टितम्।
पत्रैर्मञ्जुभुजङ्गवल्लिजनितैर्निक्षिप्य खाते पुटं
दत्त्वा कुक्कुटसंज्ञकं सह दलैः संचूर्ण्य तत्र क्षिपेत्॥८७॥
भागार्धं जयपालबीजममृतं तत्तुल्यमेकीकृतं
गुञ्जा त्र्यूषणसिन्धुचित्रकयुता सर्वाञ्ज्वराान्नाशयेत्।

शूलं संग्रहणीगदं सजठरं दध्यन्नसंसेविनां
तापे सेचनकारिणां गदवतां सूतस्य चिन्तामणेः ॥
"अयमेव रसो देयो मृतकल्पे गदातुरे" ॥ ८८ ॥

पारा, गन्धक दोनोंकी कज्जली और अभ्रकभस्म प्रत्येक एक एक तोला, शुद्धमीठा तेलिया ६ माशे और जमालगोटा डेढ तोला सबको जम्बीरी नींबूके रसमें उत्तम प्रकारसे खरल करके गोलासा बनालेवे। उस गोलेको नागरवेलके तीन पानोंमें लपेटकर और मिट्टीकी मूषामें रखकर कपरौटी कर देवे। पश्चात् भूमिमें गड्ढा खोदकर उसमें संपुटको रखकर कुक्कुटपुट देवे। स्वाँगशीतल होनेपर औषधिको निकालकर पानोंसहित चूर्ण करलेवे। फिर उसमें जमालगोटे ६ माशे और शुद्ध वत्सनाभ ६ माशे डालकर अदरखके रसके साथ खरल करके एक एक रत्तीकी गोलियाँ बनालेवे। इस रसकी एक एक गोली सोंठ, मिरच, पीपल, सैंधानमक और चीतेके समानभाग चूर्णके साथ अदरखके रसमें मिलाकर सेवन करे। यह रस सर्वप्रकारके ज्वर, शूल, संग्रहणी और समस्त उदररोगोंको नष्ट करताहै। इस रसपर दही और भातका पथ्य सेवन करे और शरीरमें अधिक ताप होनेपर जलसेचन आदि शीतल उपचार करे। यह रस मृतप्राय रोगीको भी दिया जा सकताहै ॥ ८७ ॥ ८८ ॥

द्वितीय चिन्तामणिरस।

रसविषगन्धकटङ्कणताम्रयवक्षारं व्योषम् ।
जयपालस्य बीजं च क्षौद्रं दत्त्वा शतं वारान् ॥ ८९ ॥
सम्मर्द्य रक्तिकमिता वटिकाः कुर्याद्भिषक् प्राज्ञः ।
शुण्ठीपिष्टेन सममेका द्वे वाऽथवा तिस्रः ॥ १९० ॥
संप्राश्य नारिकेलीजलमनुपेयं प्रयुञ्जीत ।
भेदानन्तरमेव प्रक्षालितभक्तं तक्रमुपयोज्यम् ॥ ९१ ॥
शेषात्सैन्धवजीरं तक्रं भक्तं प्रयोक्तव्यम् ।
प्रशमयति सन्निपातज्वरं तथाऽजीर्णं विषमं च ॥ ९२ ॥
प्लीहानं चाध्मानं कासं श्वासं च वह्निमान्द्यं च ।
चिन्तामणी रसोऽयं किल नियतं भैरवेण निर्दिष्टः ॥ ९३ ॥

शुद्ध वत्सनाभ, सुहागा, ताम्रभस्म, जवाखार, पारे और गन्धककी कज्जली दो भाग, सोंठ, मिरच, पीपल और जमालगोटा प्रत्येक औषधि एक एक भाग

इन सबको एकत्र मधुके साथ सौवार खरल करके एकएक रत्तीकी गोलियाँ बनालेवे। इनमेंसे एक या दो अथवा तीन गोली सोंठके चूर्ण और मधुके साथ रोगीको सेवन कराकर नारियलके जलका अनुपान करावे। औषध सेवनके पश्चात् विरेचन होजानेपर रोगीको तक्रके साथ भातका मॉंड सेवन करावे। फिर सेंधानमक और जीरेका चूर्ण डालकर तक्रके साथ भातका भोजन करावे। इस प्रकार इस रसको सेवन करनेसे सन्निपातज्वर, अजीर्ण, विषमज्वर, प्लीहा, अफारा, खाँसी, श्वास, मन्दाग्नि आदि समस्त व्याधियाँ शीघ्र शमन होती हैं। इस चिन्तामणिरसको श्रीभैरवजीने निर्दिष्ट किया है ॥ ८९–१९३ ॥

रसराजेन्द्र।

पलं शुद्धस्य सूतस्य पलं ताम्रमयोरजः।
अभ्रं नागं पलं वङ्गं पलं गन्धकतालकम् ॥ ९४ ॥
पलं शुद्धविषं चूर्णं सर्वमेकत्र कारयेत्।
मर्दयेत काकमाच्याश्च तत्र साररसेन च ॥ ९५ ॥
मात्स्यवाराहमायूरच्छागमाहिषपित्तकैः।
मर्दयेद्भिन्नभिन्नैश्च त्रिकटोरम्बुभिस्तथा ॥ ९६ ॥
आर्द्रकस्वरसैः पश्चात् शतवारान्मुहुर्मुहुः।
सिद्धोऽयं रसराजेन्द्रो धन्वन्तरिप्रकाशितः ॥ ९७ ॥
गुञ्जामात्रं रसं दद्यात् सुरसारससंयुतम्।
मेघधाराप्रवाहेण धारितं वारि मस्तके ॥ ९८ ॥
अनिवार्यो यदा दाहस्तदा देया च शर्करा।
भोजनं दधिसंयुक्तं वारमेकं तु दापयेत् ॥ ९९ ॥
ईश्वरेण हतः कामः केशवेन च दानवाः।
पावकेन हतं शीतं सन्निपातं रसस्तथा ॥ २०० ॥

शुद्ध पारा एक पल, ताम्रभस्म, लोहभस्म, अभ्रक, सीसा, वङ्ग, हरताल, शुद्धगन्धक और शुद्ध वत्सनाभ ये प्रत्येक ओषधि एकएक पल लेकर प्रथम पारे और गन्धककी कज्जली करले, फिर सबको कज्जलीसहित एकत्र खरल करके मकोयके स्वरसमें घोटे, पश्चात् रोहूमछली, सूकर, मोर, बकरा और भैंसा इन पाँचोंके पित्तमें पृथक् पृथक् क्रमसे मर्दन करके त्रिकुटेके क्वाथमें खरल करे। फिर अदरखके स्वरसमें सौवार घोटे तो यह रस सिद्ध होता है। इसको

श्रीधन्वन्तरिभगवान्ने प्रकाशित किया है । यह रस एक एक रत्ती परिमाण तुलसीके रसके साथ सेवन करावे । इसके सेवन करनेके पश्चात् सिरपर मूसलधार वर्षाके समान शीतल जलकी धारा छोड़े । जब इस प्रकारसे भी शरीरकी ज्वाला शान्त न हो तब कभी कभी खाँडका शर्बत देवे और एकवार दही भातका भोजन करावे । जैसे शिवजीने कामदेवको और विष्णुने दानव समूहको नष्ट करदिया था और जैसे अग्निके द्वारा शीत तत्काल नष्ट हो जाता है उसी प्रकार यह रस सन्निपातज्वरको नष्ट करदेता है ॥ १९४–२०० ॥

पंचपित्तयुक्त रसका बलवत्त्व ।

ये रसाः पित्तसंयुक्ताः प्रोक्ताः सर्वत्र शम्भुना ।
जलसेकावगाहाद्यैर्बलिनस्ते तु नान्यथा ॥ १ ॥
रसजनितविदाहे शीततोयाभिषेको
मलयजघनसारालेपनं मन्दवातः ।
तरुणदधि सिताढ्यं नारिकेलीफलाम्भो
मधुरशिशिरपानं शीतमन्यच्च शस्तम् ॥ २ ॥

जो रसादि ओषधियाँ शिवजीने पित्तयुक्त कही हैं अर्थात् जिनमें पित्तकी भावना दी जाती है उन ओषधियोंको सेवन करानेके पश्चात् रोगीके शरीरपर तैलका मर्दन, जलसेचन आदि शीतोपचार करनेसे वे अधिक बलवती होकर विशेष गुण करती हैं । अन्यथा कुछ फलप्रद नहीं होती । रसादि ओषधियोंके सेवनसे शरीरमें दाह होनेपर देहपर शीतल जलका सेचन, चन्दन, कपूर आदिका लेपन, शीतल मन्द सुगन्ध वायुका सेवन, दही और मिश्री मिलाकर भातका भोजन, नारियलका जलपान करना मधुर और शीतल द्रव्योंका भक्षण और इसी प्रकार औरभी तरह तरहके शीतल उपचार करना चाहिये ॥ १ ॥ २ ॥

पञ्चवक्त्ररस ।

गन्धेशटङ्कमरिचं विषं धुस्तूरजैर्द्रवैः ।
दिनं विमर्दितं शुष्कं पञ्चवक्त्रो भवेद्रसः ॥
द्विगुञ्जमार्द्रनीरेण त्रिदोषज्वरहृत्परः ॥ ३ ॥

पारे, गन्धककी कज्जली २ भाग, सुहागा, मिरच और शुद्ध वत्सनाभ ये प्रत्येक एक एक भाग लेकर सबको धतूरेके पत्तोंके रसमें एक दिनतक खरल करके सुखा-

लेवे । इसको पञ्चवक्त्र रस कहते हैं । इसकी मात्रा दो रत्ती परिमाण, अनुपान अदरखका रस । यह रस सन्निपातज्वरको हरनेके लिये अत्युत्तम है ॥ ३ ॥

त्रिदोषनीहारसूर्यरस ।

रसेन गन्धं द्विगुणं कृशानुरसैर्विमर्द्याष्टदिनानि घर्मे ।
रसाष्टभागं त्वमृतं च दद्याद् विमर्दयेद्वह्निरसेन किंचित् ॥
पित्तैस्तु सम्भावित एष देयस्त्रिदोषनीहारविनाशसूर्य्यः ॥४॥

शुद्धपारा १ भाग और शुद्धगन्धक २ भाग लेकर दोनोंकी एकत्र कज्जली करके चीतेके रसमें ८ दिनतक घोटे, फिर धूपमें सुखावे । इसके पश्चात् उसमें पारेसे अष्टमांश शुद्ध मीठा तेलिया मिलाकर चीतेके थोड़े रसमें खरलकरके उक्त पाँचों पित्तोंकी भावना देवे तो यह रस सिद्ध होता है । यह रस सन्निपातरूप कुहरेको विनाश करनेके लिये सूर्यके समान है ॥ ४ ॥

सन्निपातसूर्यरस ।

हिङ्गुलं गन्धकं ताम्रं मरिचं पिप्पली विषम् ।
शुण्ठी कनकबीजं च श्लक्ष्णचूर्णानि कारयेत् ॥ ५ ॥
विजयापत्रतोयेन त्रिदिनं भावयेत्सुधीः ।
द्विगुञ्जं पर्णखण्डेन चार्कक्वाथं पिबेदनु ॥ ६ ॥
निहन्ति सन्निपातोत्थान् गदान्घोरान्सुदारुणान् ।
वातिकं पैत्तिकं चैव श्लैष्मिकं च विशेषतः ॥ ७ ॥

सिंगरफ, गन्धक, ताँबा, मिरच, पीपल, बत्सनाभ, सोंठ और धतूरेके बीज इन ओषधियोंको समानभाग लेकर बारीक चूर्ण करलेवे । फिर उस चूर्णको भाँगके पत्तोंके रसमें तीन दिनतक भावना देवे । इस रसको दो दो रत्ती परिमाण पानमें रखकर भक्षण करे और ऊपरसे आकके क्वाथका अनुपान करे । यह रस अत्यन्त दारुण और घोर सन्निपातज्वर, विशेषकर वातज, पित्तज और श्लैष्मिक ज्वरोंको शीघ्र नष्ट करता है ॥ ५-७ ॥

अघोरनृसिंहरस ।

भागैकं मृतताम्रस्य द्विभागं मृतलौहकम् ।
त्रिभागं मृतवङ्गं च चतुर्भागं मृताभ्रकम् ॥ ८ ॥

माक्षिकं रसगन्धौ च तथा शुद्धा मनःशिला ।
चत्वार्येतानि ताम्रस्य प्रत्येकं तुल्यमेव च ॥ ९ ॥
गरलं चाभ्रतुल्यं स्यात् त्रिकटुश्चाभ्रतुल्यकः ।
एतत्सर्वं समं देयं विषमाख्यं तथैव च ॥ २१० ॥
एतत्सर्वस्य द्रव्यस्य द्विगुणं कालकूटकम् ।
मात्स्यमाहिषमायूरघृष्टिपित्तैर्विभावयेत् ॥ ११ ॥
चित्रकस्य द्रवेणैवं प्रत्येकं याममात्रकम् ।
सर्षपाभा वटी कार्या शोषयेद्वातपे ततः ॥ १२ ॥

ताँबेकी भस्म १ तोला, लोहभस्म २ तोले, वङ्गभस्म ३ तोले, अभ्रकभस्म ४ तोले तथा स्वर्णमाक्षिकभस्म १ तोला, एकतोला पारद और एक तोला गन्धककी कज्जली, शुद्ध मैनसिल एक तोला काले साँपका विष ४ तोले, त्रिकुटा ४ तोले इन सबकी बराबर अर्थात् २२ तोले कुचला और इन समस्त औषधियोंसे दुगुना अर्थात् ८८ तोले शुद्ध मीठा तेलिया लेवे सम्पूर्ण औषधियोंको एकत्र पीसकर रोहू मछली, भैंसा, मोर और सूकर इन चारोंके पित्तमें पश्चात् चीतेके रसमें क्रम २ से एक एक प्रहरतक भावना देवे, फिर सरसोंके बराबर गोलियाँ बनाकर धूपमें सुखालेवे ॥ ८-२१२ ॥

दापयेद्वटिकामेकां पयःपेटीरसेन च ।
त्रयोदशे सन्निपाते विषूच्यामतिसारके ॥ १३ ॥
त्रिदोषजे तथा कासे दापयेत्कुशलो भिषक् ।
पयःपेटीशतं दद्याद्भोजनं दधिभक्तकम् ॥ १४ ॥
तथा भर्जितमत्स्यं च लेपनं तिलचन्दनैः ।
रोगी वाञ्छति यद्द्रव्यं तत्सर्वं परिदापयेत् ॥
अघोरनृसिंहो नाम रसानामुत्तमो रसः ॥ १५ ॥

इनमेंसे वैद्यको एक एक गोली नारियलके जलके साथ सेवन करानी चाहिये । ये गोलियाँ तेरह प्रकारके सन्निपातज्वर, विषूचिका, अतिसार और त्रिदोषजनित खाँसी आदि रोगोंमें विशेष उपकार करती हैं । इस रसको सेवन कराकर रोगीको सौ नारियलोंका जल वारंवार पान करावे । दही और भात एवं भुनी मछलीका भोजन करावे और उसके शरीरपर तिल और चन्दन आदिका लेप करावे । रोगीकी

जिस २ वस्तुको खानेकी इच्छा हो वही वस्तु उसको देवे। यह अघोरनृसिंहनामक रस सम्पूर्ण रसोंमें उत्तम है॥ १३-१५॥

प्रतापतपनरस।

गन्धकं हिङ्गुल तालं सूतकं लौहटङ्कणम्।
खर्परं सर्जिकाक्षारं माञ्जिष्ठं हिंगुलं समम्॥ १६॥
रसेन मर्दितं पिण्डं निर्गुण्डीहस्तिशुण्डयोः।
अष्टयामं पचेत्कुप्यां निरुध्य सिकताह्वये॥ १७॥
ततः सिद्धं समादाय रक्तिकामार्द्रकेण च।
सन्निपातविनाशाय प्रतापतपनो रसः॥
दधिभक्तं तथा दुग्धं छागमांसं च भोजयेत॥ १८॥

समानभाग पारे और गन्धककी कज्जली २ भाग, सिंगरफ, हरताल, लोह, सुहागा, खपरिया, सज्जीखार और मंजीठका चूर्ण ये प्रत्येक एक एक भाग ले कर सबको निर्गुण्डी और हाथीशुण्डीके रसमें क्रमसे मर्दन करके गोलासा बनालेवे। उस गोलेको आतसीशीशीमें भरकर कपरौटीकरके आठ प्रहरतक वालुकायन्त्रमें पकावे। जब वह उत्तमप्रकारसे पककर तैयार होजाय तब उसको निकालकर बारीक चूर्ण करले। इस रसको एक एक रत्ती परिमाण अदरखके रसके साथ सेवन करावे और दही भात, दूध तथा बकरीके मांसका पथ्य देवे। यह प्रतापतपनरस सन्निपातज्वरको विनाश करनेके लिये परमोपयोगी है॥ १६-१८॥

प्राणेश्वररस।

शुद्धसूतं तथा गन्धं मृताभ्रं विषसंयुतम्।
समं सम्मर्दतं तालमूलीपीरैव्यहं बुधः॥ १९॥
पूरयेत्कूपिकान्ते च मुद्रयित्वा च शोषयेत्।
सप्तभिर्मृत्तिकावस्त्रैर्वेष्टयित्वा च शोषयेत्॥ २०॥
पुटेत्कुण्डप्रमाणेन स्वाङ्गशीतं समुद्धरेत्।
गृहीत्वा कूपिकामध्यान्मर्दयेच्च दिनं ततः॥ २१॥
अजाजीजीरकं हिंगुसर्जिकाटणङ्कं जगत्।
गुग्गुलुः पञ्चलवणं यवक्षारो यमानिका॥ २२॥
मरिचं पिप्पली चैव प्रत्येकं रसमानतः।
एषां कषायेण पुनर्भावयेत्सप्तधाऽऽतपे॥ २३॥

शुद्ध पारा, शुद्धगन्धक, अभ्रकभस्म और शुद्ध मीठातेलिया चारों ओषधियोंको समान भाग लेकर मुसलीके रसमें तीन दिनतक खरल करे। फिर उसको आतसी शीशीमें भरकर उसके ऊपर मुद्रा करके धूपमें सुखावे। तदनन्तर सातवार कपरमिट्टी करे और प्रत्येक बार धूपमें सुखावे। फिर पुटपाक करे और स्वांगशीतल होनेपर ओषधिको शीशीमेंसे निकालकर एक दिनतक खरल करे। इसके पश्चात् कालाजीरा, जीरा, हींग, सज्जी, सुहागा, गोपीचन्दन (सौराष्ट्रदेशकी मिट्टी), गूगल, पाँचोंनमक, जवाखार, अजवायन, मिरच और पीपल ये प्रत्येक ओषधि पारेकी बराबर लेकर इनके क्वाथमें पृथक् पृथक् सात सात बार भावना देदेकर धूपमें सुखावे ॥१९-२२३॥

नागवल्लीदलयुतं पंचगुञ्जं रसेश्वरम् ।
दद्यान्नवज्वरे तीव्रे सोष्णं वारि पिबेदनु ॥ २४ ॥
प्राणेश्वरो रसो नाम सन्निपातप्रकोपनुत् ।
शीतज्वरे दाहपूर्वे गुल्मशूले त्रिदोषजे ॥ २५ ॥
वाञ्छितं भोजनं दद्यात्कुर्याच्चन्दनलेपनम् ।
तापोद्रेकस्य शमनं बलाधिष्ठानकारकम् ॥
भवेन्नैवात्र सन्देहः स्वास्थ्यं च लभते नरः ॥ २६ ॥

इस रसको अत्यन्त उग्र नवीनज्वरमें पाँच रत्ती परिमाण पानमें रखकर सेवन करावे और ऊपरसे मन्दोष्ण जल पान करावे। यह प्राणेश्वर नामक रस सन्निपातके प्रकोपको शीघ्र नष्ट करता है। जिस ज्वरमें पहले दाह होकर फिर शीतका प्रकोप हो उस ज्वरमें तथा गुल्म, शूल और अन्यान्य त्रिदोषजनित रोगोंमें यह प्राणेश्वर रसही सेवन कराना चाहिये। इसको सेवन करानेके पश्चात् रोगीको यथेच्छ भोजन देवे और उसके शरीरपर चन्दनादिका प्रलेप करावे। इससे तापका उद्रेक शान्त होता है और बलकी वृद्धि होती है। इसके द्वारा मनुष्य निस्सन्देह आरोग्यलाभ करता है ॥ २२४-२२६ ॥

सन्निपातभैरव ।

पारदं गन्धकं तालं वत्सनाभं त्रिभिः समम् ।
दारुमूषं च गरलं सर्वस्य समहिङ्गुलम् ॥ २७ ॥
मुद्गप्रमाणां वटिकां कारयेत्कुशलो भिषक् ।
सन्निपाते वटीमेकामार्द्रद्रावैः प्रदापयेत् ॥
रसो महाप्रभावोऽयं सन्निपातस्य भैरवः ॥ २८ ॥

पारा, गन्धक, और हरताल प्रत्येक एक एक तोला, वत्सनाभ विष ३ तोले, काष्ठविष १ तोला, सर्पविष १ तोला और सबकी बराबर अर्थात् ८ तोले सिंगरफ लेकर सबको जलके साथ एकत्र खरल करके मूँगकी बराबर गोलियाँ बनालेवे । उनमेंसे एक गोली अदरखके रसके साथ सन्निपातज्वरमें देवे । यह रस सन्निपातज्वरको विनाश करनेके लिये अत्यन्त प्रभावशाली है ॥ २७ ॥ २८ ॥

द्वितीय सन्निपातभैरवरस ।

रसं विषं गन्धकं च हरतालं पलत्रयम् ।
जयपालं त्रिवृत्स्वर्णं ताम्रसीसाभ्रलौहकम् ॥ २९ ॥
अर्कक्षीरं लाङ्गली च स्वर्णमाक्षिकमेव च ।
समं कृत्वा रसेनैषां त्रिंशद्वारं च मर्दयेत् ॥ ३० ॥
अर्कश्वेतोऽलम्बुषा च सूर्यावर्त्तश्च कारवी ।
काकजङ्घा श्योणकश्च कुष्ठं व्योषविकङ्कतम् ॥ ३१ ॥
रवेर्मणिश्चन्द्रकान्तो निर्गुण्डी च महाजटा ।
धुस्तूरदन्तीपिप्पल्यो दशाष्टाङ्गमिदं शुभम् ॥ ३२
रसतुल्यं प्रदातव्यं दत्त्वा तोयं चतुर्गुणम् ।
शिष्टैकगुणतोयेन भावनाविधिरिष्यते ॥ ३३ ॥
भावनायां भावनायां शोषणं मुहुरिष्यते ।
ततश्च वटिकां कृत्वा भैरवाय बलिं ददेत् ॥ ३४ ॥

" सर्वचूर्णसमं कृत्वा अर्कमूलादिपिप्पलीमूलान्तानामष्टदशानां मिलित्वा रसादिसामग्रीतुल्यानां चतुर्गुणजलैकगुणावशिष्टक्वाथेन त्रिंशद्वारमातपे भावनीयम्,प्रतिवारं यत्नेन शोषयित्वा कलायप्रमाणां वटिकां कृत्वा व्याध्यनुरूपमार्द्रकस्वरसेन ज्वरिणे दद्यात् ॥ "

शोधितपारा, वत्सनाभ, गन्धक, हरताल, त्रिफला, जमालगोटे, निसोत, धतूरेके बीज, ताँबा, सीसा, अभ्रक, लोह, आकका दूध, कलिहारीकी जड़ और सोनामाखी इन सब ओषधियोंको समानभाग लेकर एकत्र खरल कर लेवे । फिर सफेद आक, लज्जावन्ती, हुलहुल, कालाजीरा, काकजंघा, सोनापाठा, कूठ, सोंठ, मिरच, पीपल, कंटाई, सूर्यमणि और चन्द्रकान्तमणिके पुष्प, सिम्हालू, रुद्रजटा, धतूरा, दन्तीकी जड़ और पीपल इन अठारहों ओषधियोंको अष्टादशाङ्ग कहते हैं । इनको पारद आदि रसोंके बराबर भाग लेकर चौगुने जलमें डालकर पकावे, चतुर्थांश जल शेष

रहनेपर उतारकर छान लेवे । इस काथमें उक्त औषधिको ३० बार भावना देवे और प्रत्येक भावनाके पश्चात् सुखाता जाय । फिर एक एक रत्तीकी गोलियाँ बनालेवे । प्रथम श्रीभैरवजीको बलि प्रदान करके फिर इस रसकी एक एक गोली रोगके बलाबलके अनुसार रोगीको अदरखके रसके साथ सेवन करावे ॥ २९-२३४ ॥

रसोऽयं श्रीसन्निपातभैरवो ज्वरनाशनः ।
सर्वोपद्रवसंयुक्तं ज्वरं हन्ति न संशयः ॥ ३५ ॥
सन्निपातज्वरं हन्ति जीर्णं च विषमं तथा ।
ऐकाहिकं द्व्याहिकं च चातुर्थकमपि ध्रुवम् ॥ ३६ ॥
ज्वरं च जलदोषोत्थं सर्वदोषसमाकुलम् ।
भैरवस्य प्रसादेन जगदानन्दकन्दकः ॥ ३७ ॥
"विरेकानन्तरं शुण्ठीजीरकतोयप्रक्षालितान्नं दद्यात् ।
अजाते विरेके पुनरपि रसं दद्यात् । व्याधिनिवृत्तौ
कदाचित् वातपीडायां वातचिकित्सा कार्या ॥ ३८ ॥"

यह सन्निपातभैरवरस सम्पूर्ण उपद्रवोंसहित, सन्निपातज्वरको तथा जीर्णज्वर, विषमज्वर, ऐकाहिकज्वर, द्व्याहिकज्वर, चौथियाज्वर, जलदोषसे उत्पन्न हुआ ज्वर और समस्त दोषोंसे युक्त ज्वरको निस्सन्देह नष्ट करता है । इस रसको सेवन करनेके पश्चात् विरेचन होनेपर रोगीको सोंठ और जीरेके जलसे सिद्धकिये हुए भातका भोजन देवे । यदि विरेचन न हो तो फिर यह रस सेवन करावे । इसके सेवनसे रोगके दूर हो जानेपर यदि वातकी पीडा होजाय तो वातव्याधिकी समान चिकित्सा करनी चाहिये ॥ ३५-३८ ॥

मृत्युञ्जयरस ।

सूतं गन्धकटङ्कणं शुभविषं धुस्तूरबीजं कटु
नीत्वा भागमथोत्तरद्विगुणितं चोन्मत्तमूलाम्बुना ।
कुर्यान्माषवटीं सुखातिसुखदां सर्वाञ्ज्वरान्नाशये-
देष श्रीशिवशासनात्प्रजनितः सूतश्च मृत्युञ्जयः ॥ ३९ ॥
नारिकेलसितायुक्तं वातपित्तज्वरं जयेत् ।
मधुना श्लेष्मपित्तोत्थं ज्वरं संनाशयेद् ध्रुवम् ॥
सन्निपातज्वरं घोरं नाशयेदार्द्रनीरतः ॥ ४० ॥

पारा १ भाग, गन्धक २ भाग, सुहागा ४ भाग, शुद्ध वत्सनाभ ८ भाग, धतूरेके बीज १६ भाग और त्रिकुटा ३२ भाग लेकर सबको एकत्र चूर्ण करके धतूरेकी जडके काथमें घोटकर उडदकी बराबर गोलियाँ बनालेवे। ये गोलियाँ सब प्रकारके ज्वरोंको नष्ट करती हैं। यह मृत्युञ्जयरस श्रीशिवजी महाराजने वर्णन किया है। इस रसको नारियलके जल और मिश्रीके साथ मिलाकर सेवन करनेसे वात-पित्तज्वर, मधुके साथ खानेसे कफ-पित्तज्वर और अदरखके रसके साथ सेवन करनेसे घोर सन्निपातज्वर अवश्य नष्ट होता है॥ ३९-४० ॥

श्रीसन्निपातमृत्युञ्जय रस।

विष सूतकगन्धौ च पित्तं मत्स्यवराहयोः।
आजमायूरपित्त च माहिषं चापि योजयेत्॥ ४१ ॥
हरतालं च सव्योषं वानरीबीजसंयुतम्।
अपामार्गं चित्रमूलं जयपालं च कल्कयेत॥ ४२ ॥
एतत्सर्वं समांशेन अजामूत्रेण मर्दयेत्।
माषेण सदृशी कार्या वटिका सद्भिषग्वरैः॥ ४३ ॥

शुद्ध मीठा तेलिया, पारा, गन्धक, मछली, सूकर, बकरा, मोर और भैंसा इन पाँचोंका पृथक् २ पित्त, हरताल, सोंठ, मिरच, पीपल, कौंचके बीज, चिरचिटा, चीतेकी जड और जमालगोटे सबको समान भाग लेकर एकत्र पीसकर बकरीके मूत्रमें खरल करके उडदकी बराबर गोलियाँ बनालेवे॥ ४१-४३ ॥

महाज्वरे महाशीते महाशीतज्वरेऽपि च।
मज्जागते सन्निपाते विषूच्यां विषमज्वरे॥ ४४ ॥
असाध्ये मानवे युञ्ज्यादेकाहज्वरनाशिनी।
जलोदरे शैथिलाङ्गे नासास्रावे च पीनसे॥ ४५ ॥
अजीर्णे मूर्च्छनाभावे श्लेष्मभावेऽतिदुर्जये।
शोथकामलपाण्डूवादिसर्वरोगापहारकः॥ ४६ ॥

यह रस-अत्यन्त भयंकर ज्वर, अत्यन्त शी शीतज्वर, मज्जागतज्वर सन्निपातज्वर, विषूचिका, असाध्य विषमज्वर, ऐकाहिकज्वर, जलोदर, अङ्गोंकी शिथिलता, नासास्राव, पीनस, अजीर्ण, मूर्च्छा, कफकी अधिकता, शोथ, कामला, पाण्डु आदि रोगोंमें प्रयोग करना चाहिये॥ ४४-४६ ॥

सन्निपातमृत्युञ्जयो ज्ञानज्योतिःप्रकाशितः ।
भृङ्गराजरसेनायं रसराजः प्रदीयते ॥ ४७ ॥
निर्वाते निर्जनस्थाने बहुवस्त्रसमावृते ।
प्रस्वेदः क्षणमात्रेण जायते चिह्नमीदृशम् ॥ ४८ ॥
मूर्च्छितः पतितो भूमौ दह्यमानः पुनः पुनः ।
एवं चिह्नं समालोक्य वदेदारोग्यमातुरे ॥ ४९ ॥
पथ्यं यद् याचते रोगी तत्तद्देयं प्रयत्नतः ।
दध्योदनं शीतजलं दातव्यं तद्विचक्षणैः ॥ २५० ॥
एवं महारसः श्रेष्ठः शम्भुना प्रेरितो भुवि ।
कृपया सर्वभूतानां ज्ञानज्योतिःप्रकाशितः ॥ ५१ ॥

यह श्रीसन्निपातमृत्युञ्जयरस सम्पूर्ण व्याधियोंका नाश करनेवाला है और ज्ञानकी ज्योतिके समान प्रकाश करनेवाला है । इस रसकी एक एक गोली भँगरेके रसके साथ सेवन करावे । रोगीको वात रहित एकान्तस्थानमें बहुत गरम और मोटे कपडे उढाकर रक्खे । इससे तत्काल रोगीको पसीना आता है । जब रोगी मूर्च्छित होकर भूमिपर गिरपडे और बारबार शरीरमें दाह हो तो रोगीको आरोग्य हुआ समझना चाहिये । ऐसी अवस्थामें रोगीकी जिस वस्तुकी अभिलाषा हो वही वस्तु पथ्यरूपसे सेवन करानी चाहिये । विशेषकर दही भात और शीतल जल सेवन कराना सर्वोत्तम है । ज्ञानज्योतिके समान प्रकाशित इस परमोत्कृष्ट रसको श्रीशंकर भगवान्ने सम्पूर्ण प्राणियोंपर दया करके पृथ्वीपर विस्तृत किया है ॥ ४७–२५१ ॥

प्रभाकर ।

रसेन गन्ध द्विगुणं कृशानुरसैर्विमर्द्याष्टदिनं सुघर्मे ।
रसाष्टभागं ह्यमृतं च दद्याद्विपाचयेद्वह्निरसेन किंचित् ॥ ५२॥
पित्तैश्च सम्भावित एष देयस्त्रिदोषनीहारविनाशसूर्यः ।
"अत्र भैरवं रुधिरवर्णं ध्यायेत्" ॥ ५२ ॥

पारा १ भाग और गन्धक २ भाग लेकर दोनोंकी कज्जली करके उसको आठ दिनतक चीतेके रसमें खरल करकरके धूपमें सुखावे । फिर उसमें पारेसे अठगुना शुद्ध वत्सनाभ डालकर थोडेसे चीतेके रसमें कुछ देरतक पकावे, पश्चात्

रोहूमछलीके पित्तमें एकवार भावना देकर एकएक रत्तीकी गोलियाँ बनालेवे । यह रस पित्तप्रधान सन्निपातज्वरमें प्रयोग करना चाहिये । यह सन्निपातरूपी कोहरेको विनाश करनेके लिये सूर्यके समान है । इसको सेवन करनेके पहले रक्तवर्ण भैरव-जीका ध्यान करना चाहिये ॥ ५२ ॥ ५३ ॥

कालाग्निभैरवरस ।

शुद्धसूतं द्विधा गन्धं मर्दयेद्गोक्षुरद्रवैः ।
भावितं च विशोष्याथ चूर्णयेदतिचिक्कणम् ॥ ५४ ॥
चूर्णतुल्यं मृतं ताम्रं ताम्रादष्टांशकं विषम् ।
हिङ्गुलं रसभागं च द्वौ भागौ कनकस्य च ॥ ५५ ॥
बाणभागोऽत्र गोदन्तो बाणभागा मनःशिला ।
टङ्कणं नेत्रभागं च ऋतुभागं च खर्परम् ॥ ५६ ॥
ब्रह्मभागं च जैपालं नेत्रभागं हलाहलम् ।
माक्षिकं चाग्निभागं च लौहं वङ्गं च भागकम् ॥ ५७ ॥
सर्वान् खल्लोदरे क्षिप्त्वा क्षीरेणार्कस्य मर्दयेत् ।
दशमूलकषायेण मर्दयेद् याममात्रकम् ॥ ५८ ॥
पञ्चमूलकषायेण तथैव च विमर्दयेत् ।
चणमात्रां वटीं कृत्वा बलं ज्ञात्वा प्रयोजयेत् ॥ ५९ ॥
ज्वरं त्रिदोषजं हन्ति सन्निपातं सुदारुणम् ।
पूर्ववद्दापयेत्पथ्यं जलयोगं च कारयेत् ॥ २६० ॥
पथ्यं शाल्योदनं ज्ञेयं दधिभक्तसमन्वितम् ।
कालाग्निभैरवो नाम रसोऽयं भुवि पूजितः ॥ ६१ ॥

शुद्ध पारा १ भाग और शुद्ध गन्धक २ भाग लेकर दोनोंकी एकत्र कज्जली करके गोखरूके काथमें भावना दे और धूपमें सुखाकर खुब बारीक और चिकना चूर्ण करलेवे । उस चूर्णकी बराबर ताम्रभस्म, ताम्रभस्मसे अठगुना शुद्ध वत्सनाभ तथा सिंगरफ १ भाग, धतूरेके बीज २ भाग, गोदन्ती हरताल ५ भाग, मैनसिल ५ भाग, सुहागा २ भाग, खपरिया ६ भाग, जमालगोटा १ भाग, काले साँपका विष २ भाग, सोनामाखी ३ भाग, लोहभस्म १ भाग और वङ्ग १ भाग लेवे कज्जलीसहित इन सबको खरलमें डालकर आकके दूधके साथ घोटे फिर दशमूलके काढेमें और पञ्चमूलके काढेमें क्रमसे एक एक प्रहरतक खरल

करके चनेकी बराबर गोलियाँ बनालेवे । इन गोलियोंको रोगीकी अवस्था और बलाबलका विचार करके उपयुक्त मात्रासे सेवन कराना चाहिये । यह रस अत्यन्त दारुण सन्निपातज्वरको भी नष्ट कर देता है । इसपर शालिधानोंके चावलोंका भात और दहीका पथ्य देना चाहिये और पूर्ववत् शीतलोपचार करना चाहिये । यह रस पृथ्वीपर अत्यन्त श्रेष्ठ है ॥ २५४-२६१ ॥

त्रैलोक्यचिन्तामणिरस ।

रसभस्म त्रयो भागा द्विभागं च भुजङ्गमम् ।
कालकूटं च षड्भागं भागैकं तालकं तथा ॥ ६२ ॥
गोदन्तं गगनं तुत्थं शिलागन्धकटङ्कणम् ।
जयपालोन्मत्तदन्ती करबीजं च लाङ्गली ॥ ६३ ॥
पलाशमूलजैर्नीरैः सप्तधा भावितं दृढम् ।
चित्रमूलकषायेण चार्द्रकस्य च वारिणा ॥ ६४ ॥
मात्स्यमाहिषमायूरच्छागवाराहडौण्डुभम् ।
प्रत्येकं दशधा मर्द्यं शिलाखण्डे च संक्षयात् ॥
धान्यद्वयीं वटीं कृत्वा शुद्धवस्त्रेण धारयेत् ॥ ६५ ॥

रससिन्दूर ३ तोले, काले साँपका विष २ तोले, वत्सनाभ विष ६ तोले, हरताल १ तोला, गोदन्ती हरताल, अभ्रकभस्म, तूतिया, मैनसिल, गन्धक, सुहागा, जमालगोटा, धतूरेके बीज, दन्तीकी जड, कनेरकी जड और कलिहारीकी जड ये प्रत्येक ओषधि एक एक तोला लेवे । सबको एकत्र कूटपीस कर ढाककी जडके काथमें सातबार भावना दे और खरल करे । फिर चीतेकी जडके काढेमें और अदरखके रसमें तथा रोहूमछली, भैंसा, मोर, बकरा, सूअर और जलसर्प इन प्रत्येकके पित्तमें क्रमसे दस दस बार भावना देवे । पश्चात् पत्थरके खरलमें उत्तमप्रकारसे खरल करके दो दो धानकी बराबर गोलियाँ बनाकर और सुखाकर स्वच्छवस्त्रमें बाँधकर रखदेवे ॥ ६२-६५ ॥

दातव्यं चानुपानेन नारिकेलोदकेन च ।
ताम्बूलं च ततो दद्याद् भक्ष्यं शीतोपचारकम् ॥ ६६ ॥
तिलतैले सदा स्नानं घृतमत्स्यादिभोजनम् ।
शीताम्लदधिसंयुक्तं पुराणान्नं च भक्षयेत् ॥ ६७ ॥

इनमेंसे एक गोली नारियलके जलके साथ रोगीको सेवन कराकर ऊपरसे ताम्बूल भक्षण करावे। औषध सेवन करानेके पश्चात् रोगीके शरीरपर तिलके तेलकी मालिश कराकर शीतल जलसे स्नान करावे। इसके अतिरिक्त अन्यान्य शीतल उपचार करे। एवं घृत, मत्स्य, अम्ल, शीतल और दहीसहित पुराने चावलोंका भात इत्यादि पदार्थोंका भोजन करावे। इस प्रकार इस रसके सेवनसे सन्निपातज्वर दूर होता है ॥ ६६ ॥ ६७ ॥

रसेश्वर[1]।

रसेन गन्धं द्विगुणं गृहीत्वा तत्पादतुल्यं रविहेमतालम्।
भस्मीकृतं योजय मर्दयेत्तु दिनत्रयं वह्निरसेन घर्मे ॥ ६८ ॥
विषं च दत्त्वाऽत्र कलाप्रमाणमजादिपित्तैः परिभावयेच्च।
रक्तिद्वयं चास्य ददीत वह्निकटुत्रयेणार्द्ररसप्रयुक्तम् ॥ ६९ ॥

पारा ४ तोले, गन्धक ८ तोले, ताम्रभस्म १ तोला, स्वर्णभस्म १ तोला और हरतालभस्म १ तोला इन सबको चीतेके रसमें तीन दिनतक खरलकरके धूपमें सुखालेवे। फिर उसमें समस्त औषधिसे १६ वां भाग शुद्ध वत्सनाभ मिलाकर बकरा, मछली, भैंसा, मोर और सुअर इन पांचोंके पित्तमें क्रमसे भावना देकर दो दो रत्तीकी गोलियाँ बनालेवे। इस रसकी एकएक गोली चीतेकी जडके क्काथ, त्रिकुटेके क्काथ और अदरखके रसमें मिलाकर रोगीको सेवन करावे ॥ ६८ ॥ ६९ ॥

तैलेन चाभ्यक्तवपुश्च कुर्यात्स्नानं जलेनैव सुशीतलेन।
यावद्भवेदुःसहमस्य शीतं मूत्रं पुरीषं च शरीरकम्पः ॥ ७० ॥
पथ्यं यदीच्छा परिजायतेऽस्य मरीचखण्डं दधिभक्तकं च।
अल्पं ददीतार्द्रकमत्र शाकं दिनाष्टकं स्नानमिदं च पथ्यम् ७१

औषधसेवनके पश्चात् रोगीके शरीरपर तेलकी मालिश कराकर इस प्रकार शीतल जलसे स्नान करावे, जिससे रोगीको असह्य शीत, शरीरमें कम्प और मूत्र व पुरीषके त्यागनेकी स्वाभाविक प्रवाह हो। फिर रोगीकी इच्छानुसार

---

१ रसेश्वरादयः कालमेघान्ता रसा वातोल्बणे संनिपाते प्रयोज्या इति रत्नकौमुद्यां माधवः ॥

रसेश्वररससे लेकर त्रिदोषदावानल कालमेघ रसतक जितने रस वर्णन किये गये हैं वे वैद्योंको वातोल्बण-संनिपातज्वरमें प्रयोग करने चाहियें। ऐसा श्रीमाधवाचार्यने अपनी "रत्नकौमुदी" में कहा है ॥

पथ्य देवे; किन्तु दही और कालीमिरचोंका चूर्ण मिलाकर भातका भोजन कराना चाहिये । इसपर थोडासा अदरखका शाक सेवन कराना चाहिये । उक्त स्नान, पथ्य आदिकी क्रियाओंको आठ दिनपर्यन्त करना चाहिये ॥ २७० ॥ ७१ ॥

वडवानल ।

कान्तं च सूतं हरितालगन्धं समुद्रफेनं लवणानि पञ्च ।
नीलाञ्जनं तुत्थकमेव रूप्य भस्म प्रवालानि वराटिकाश्च ७२ ॥
वैक्रान्तशम्बूकसमुद्रशुक्तिः सर्वाणि चैतानि समानि कुर्यात् ।
सूतं भवेद्द्वादशभागकं च स्नुह्यर्कदुग्धेन विमर्दयेच्च ॥ ७३ ॥
दिनत्रयं वह्निरसैस्ततश्च निवेशयेत्ताम्रजसम्पुटे तत् ।
मृदा च संलिप्य रसं पुटेत्तद्रसस्ततः स्याद्वडवानलाख्यः ॥
तत्पादभागेन विषं नियोज्य कृशानुतोयेन पचेत् पुनस्तत् ७४
वातप्रधाने च कफप्रधाने नियोजयेत् त्र्यूषणचित्रयुक्तम् ॥
दोषत्रयोत्थेऽपि च सन्निपाते वाताधिकत्वादिह सूतकोक्तः ॥७५

कान्तलोह, पारा, हरताल, गन्धक, समुद्रफेन, पाँचों नमक, कालासुरमा, नीला थोथा, रौप्यभस्म प्रवालभस्म, कौडीकी भस्म, वैक्रान्तमणिकी भस्म, शंख और सीपीकी भस्म इन सबको एक एक भाग लेकर एकत्र मर्दन करके उसमें १२ भाग पारा मिलावे और थूहरके दूध तथा आकके दूधमें क्रमसे तीन तीन दिनतक खरल करे । फिर चीतेके रसमें तीन दिनतक खरल करके गोलासा बनाकर उसको ताँबेकी मूषामें बन्द करके ऊपरसे उसके अच्छेप्रकार कपरौटी करके पुट देवे । स्वांगशीतल होनेपर उसमेंसे औषधिको निकाल ले, इसको वडवानल रस कहते हैं । फिर इसमें समस्त औषधियोंको चतुर्थांश शुद्ध वत्सनाभ मिलाकर चीतेके रसके द्वारा फिर थोडी देर पकावे । बारीक चूर्ण करके इस रसको वाताधिक्य, कफाधिक्यज्वरमें अथवा त्रिदोषजनित सन्निपातज्वरमें दो दो रत्तीकी मात्रासे सोंठ मिरच पीपलके चूर्ण और चीतेके क्वाथके साथ सेवन कराना चाहिये । यह वडवानलरस वाताधिक्य सन्निपातज्वरके लिये विशेषोपयोगी कहागया है ॥ ७२-७५ ॥

बृहद्वडवानलरस ।

सूतकं गन्धकं चैव हरितालं मनःशिला ।
अभ्रकं वत्सनाभं च दारुजङ्गमजं विषम् ॥ ७६ ॥

जैपालात्सार्द्धशतकं सर्वं संचूर्ण्य मर्दयेत् ।
मात्स्यमाहिषमायूरच्छागपित्तैर्विभावयेत् ॥ ७७ ॥
वटिकां शीततोयेन कुर्याद्‌ गुञ्जाप्रमाणतः ।
वडवानलनामाऽयं नारिकेलजलेन वै ।
भक्षयेत्सन्निपातार्त्तो मृत्युस्तस्यासुखी भवेत् ॥ ७८ ॥

पारा, गन्धक, हरताल, मैनसिल, अभ्रक, वत्सनाभ, सोमल विष, कृष्णसर्पका विष ये प्रत्येक एक एक तोला और जमालगोटे १५० तोले लेकर सबका एकत्र चूर्ण करलेवे। फिर रोहूमछली, भैंसा, मोर और बकरा इनके पित्तमें क्रमसे भावना देकर शीतल जलके साथ खरलकरके एकएक रत्तीकी गोलियां बनालेवे। इसकी एक एक गोली नारियलके जलके साथ सन्निपातरोगीको सेवन करानेसे उसकी मृत्युतक दूर हो जाती है ॥ ७६–७८ ॥

सन्निपातवडवानलरस

रसोऽष्टावमृतं सप्त स्यात्षष्ठो गन्धतालयोः ।
दन्तीबीजानि षड्‌ भागाः पञ्चभागं तु टङ्कणम् ॥ ७९ ॥
चत्वारि धूर्त्तबीजस्य व्योषस्य त्रितयो भवेत् ।
एतानि वह्निमूलस्य क्वाथेन परिमर्दयेत् ॥ २८० ॥
आर्द्रकस्य रसेनाथ देयं गुञ्जाद्वयं हितम् ।
वडवानलसंज्ञोऽयं सन्निपातहरः परः ॥ २८१ ॥

पारा ८ भाग, वत्सनाभ विष ७ भाग, गन्धक ६ भाग, हरताल ६ भाग, जमालगोटे ६ भाग सुहागा ५ भाग, धतूरेके बीज ४ भाग और त्रिकुटा ३ भाग इन सबको चीतेकी जड़के काढेमें अच्छे प्रकारसे खरल करके दो दो रत्तीकी गोलियां बनालेवे। इनमेंसे एक एक गोली अदरखके रसके साथ सेवन करावे। यह वडवानलरस सन्निपातज्वरको हरनेके लिये परमोपयोगी है ॥ ७९–२८१ ॥

स्वच्छन्दनायकरस।

सूतगन्धकलौहानि रौप्यं सम्मर्दयेत् त्र्यहम् ।
सूर्यावर्त्तश्च निर्गुण्डी तुलसी गिरिकर्णिका ॥ ८२ ॥
अग्निवल्ल्यार्द्रकं वह्निर्विजया जयया सह ।
काकमाचीरसैरेषां पञ्चपित्तैश्च भावयेत् ॥ ८३ ॥

अन्धमूषागतं पश्चाद्वालुकायन्त्रगं दिनम् ।
विपचेच्चूर्णितं खादेन्माषैकं चार्द्रकद्रवैः ॥ ८४ ॥
निर्गुण्डीदलमूलानां कषायं सोषणं पिबेत् ।
अभिन्यासं निहन्त्याशु रसः स्वच्छन्दनायकः ॥
छागीदुग्धेन मुद्गं च पथ्यमत्र प्रयोजयेत् ॥ ८५ ॥

पारा, गन्धक, लोहा और चाँदीकी भस्म इनको समानभाग लेकर तीन दिनतक खरल करे. फिर हुलहुल, सिम्हालू, तुलसी, अपराजिता (विष्णुकान्ता), श्वेतचीतेकी जड, अदरख, लालचीतेकी जड, भांग, अरणी, मकोय इन औषधियोंके रसोंकी और पाँचों पित्तोंकी क्रमसे एक एक दिनतक भावना देवे । पश्चात् उसको अन्धमूषामें बन्दकरके एक दिनतक वालुकायन्त्रमें पकावे । स्वांगशीतल होनेपर औषधिको निकालकर बारीक चूर्ण करलेवे । इस चूर्णको एकएक माशे परिमाण अदरखके रसके साथ सेवन कर ऊपरसे सिम्हालूके पत्तों और जडके क्वाथमें कालीमिर्चोंका चूर्ण डालकर पान करे । यह रस अभिन्यासज्वरको शीघ्र नष्ट करता है । इसपर बकरीका दूध और मूँगकी दालके यूषका पथ्य देना चाहिये ॥ ८२-८५ ॥

सिंहनाद रस ।

लोहपात्रगते गन्धे द्राविते तत्र निक्षिपेत् ।
शुद्धसूतं समं चाभ्रं भार्ङ्गीद्रावं तयोः समम् ॥ ८६ ॥
निर्गुण्ड्याः पल्लवोत्थं च तुल्यं तुल्यं प्रदापयेत् ।
पचेन्मृद्वग्निना तावद्यावच्छुष्कं द्रवं द्वयम् ॥ ८७ ॥
विषपादयुतः सोऽयं सिंहनादरसोत्तमः ।
गुञ्जामात्रः प्रदातव्यः सन्निपातज्वरान्तकः ॥
अनुपानं पिबेद् व्याघ्रीक्वाथं पुष्करचूर्णितम् ॥ ८८ ॥

दो तोले गन्धकको लोहेके पात्रमें अग्निपर पिघलाकर उसमें शुद्ध पारा २ तोले, अभ्रक २ तोले, भारंगीका रस ४ तोले और निर्गुण्डीके पत्तोंका रस ४ तोले डालकर मन्दमन्द अग्निसे पकावे । पकते २ जब सब रस शुष्क होजाय तब नीचे उतारकर उसमें २ माशे शुद्ध मीठा तेलिया मिलाकर खूब बारीक चूर्ण करलेवे । इस रसको एकएक रत्ती परिमाण देना चाहिये और इसपर पुहकरमूलका चूर्ण डालकर कटेरीका क्वाथ पान कराना चाहिये । यह सिंहनाद रस सन्निपातज्वरको नष्ट करनेके लिये अत्युत्तम है ॥ ८६-८८ ॥

स्वल्पकस्तूरीभैरव रस।

हिङ्गुलं च विषं टङ्कं जातीकोषफलं तथा।
मरिचं पिप्पली चैव कस्तूरी च समांशिका॥
रक्तिद्वयं ततः खादेत् सन्निपाते सुदारुणे॥ ८९॥

सिंगरफ, वत्सनाभ विष, सुहागा, जावित्री, जायफल, मिरच, पीपल और कस्तूरी इन सबको समान भाग लेकर जलके साथ खरल करके दो दो रत्तीकी गोलियाँ बनालेवे। दारुण सन्निपातज्वरमें इसकी एकएक गोली सेवन करनेसे शीघ्र लाभ होता है॥ ८९॥

मध्यमकस्तूरीभैरव रस।

मृगमदशशिसूर्या धातकी शूकशिम्बी
कनकरजतमुक्ता विद्रुमं लोहपाठाः।
कृमिरिपुघनविश्वावारितालाभ्रधात्री-
रविदलरसपिष्टः कस्तूरीभैरवोऽयम्॥ ९०॥
कस्तूरीभैरवः ख्यातः सर्वज्वरविनाशनः।
आर्द्रकस्य रसैः पेयो विषमज्वरनाशनः॥ ९१॥
द्वन्द्वजान्भौतिकान्वापि ज्वरान्कामादिसम्भवान्।
अभिचारकृतांश्चैव तथा शत्रुकृताञ्ज्वरान्॥
निहन्याद्भक्षणादेव डाकिन्यादियुतांस्तथा॥ ९२॥

कस्तूरी, कपूर, ताँबा, धायके फूल, कौंचके बीज, सोना, चाँदी, मोती, मूँगा, लोहा, पाढ, वायविडंग, नागरमोथा, सोंठ, सुगन्धवाला, हरताल, अभ्रक और आमले इन सबको समान भाग लेकर एकत्र चूर्ण करके आकके पत्तोंके रसमें खरल करलेवे। इस प्रकार यह कस्तूरीभैरवरस सिद्ध होता है। यह सर्वप्रकारके ज्वरोंको नष्ट करनेवाला है। इसको एक एक रत्ती परिमाण अदरखके रस और मधुमें मिलाकर सेवन करनेसे विषमज्वर दूर होता है। एवं द्वन्द्वज, त्रिदोषज, कामक्रोधादिजनित, अभिचारकृत, शत्रुकृत और डाकिनी शाकिनी आदिकी बाधासे उत्पन्नहुए ज्वरोंको यह रस भक्षण करतेही नष्ट करदेता है॥ ९०-९२॥

बृहत्कस्तूरीभैरवरस।

मृतं वङ्गं खर्परं च स्वर्णं कस्तूरितारकम्।
एतेषां समभागेन कर्षमेकं पृथक् पृथक्॥ ९३॥

मृतं कान्तं पलं देयं हेमसारं द्विकार्षिकम्।
रसभस्म लवङ्गं च जातिकाफलमेव च ॥ ९४ ॥
वक्ष्यमाणौषधैर्भाव्यं प्रत्येकं दिनसप्तकम्।
द्रोणपुष्परसैर्वापि नागवल्ल्या रसेन च ॥
द्विचन्द्रस्त्रिकटुर्देयो यत्नतो वटिकां चरेत् ॥ ९५ ॥

वंगभस्म, खपरिया भस्म, स्वर्णभस्म, कस्तूरी और रौप्यभस्म ये प्रत्येक एक एक तोला, कान्तलोहभस्म ४ तोले एवं सोनामाखीकी भस्म, रससिन्दूर, लौंग और जायफल ये प्रत्येक दो दो तोले लेवे। सबको एकत्र खरल करके द्रोणपुष्पी (गूमा) के पत्तोंके रसमें और पानोंके रसमें क्रमसे सात सात दिनतक भावना देवे। फिर उसमें कपूर और त्रिकुटा (सोंठ, मिरच, पीपल) ये प्रत्येक ओषधि चार-चार तोले मिलाकर उत्तमप्रकारसे खरल करके दो दो रत्तीकी गोलियाँ बना लेवे॥९३-९५

वातात्मके सन्निपाते महाश्लेष्मगदेषु च।
त्रिदोषजनिते घोरे सन्निपाते सुदारुणे ॥ ९६ ॥
नष्टगर्भे नष्टशुक्रे प्रमेहे विषमज्वरे।
कासे श्वासे क्षये गुल्मे महाशोथे महागदे ॥ ९७ ॥
युवतीनां शतं गच्छेन्न च शुक्रक्षयो भवेत्।
रोगान्सर्वान्निहन्त्याशु भास्करस्तिमिरं यथा ॥ ९८ ॥

इस रसको वातोल्बण सन्निपात, अत्यन्तप्रबल कफके विकार, त्रिदोषजनित भयंकर सन्निपात, नष्टगर्भ, शुक्रक्षय, प्रमेह, विषमज्वर, खाँसी, श्वास, क्षय, गुल्म-रोग, अत्यन्त शोष और अन्यान्य भयंकर रोगोंमें प्रयोग करना चाहिये। इसके सेवन करनेपर सैकडों स्त्रियोंके साथ रमण करनेपर भी वीर्य क्षीण नहीं होता। यह रस जैसे सूर्योदयके होनेपर अन्धकार नष्ट होजाता है, उसी प्रकार उक्त समस्त रोगोंको शीघ्र नष्ट कर देता है ॥ ९६-९८ ॥

कस्तूरीभूषणरस।

रसाभ्र टङ्कण शुण्ठी कस्तूरी पिप्पली तथा।
दन्तीमूलं जयाबीजं कपूरं मरिचं समम् ॥ ९९ ॥
आर्द्रकस्वरसेनैव मर्दयेत् सप्तवारकम्।
आर्द्रकस्वरसैर्युक्तं योजयेद्रक्तिकाद्वयम् ॥ १०० ॥

वातश्लेष्मणि मन्देऽग्नौ पित्तश्लेष्माधिकेऽपि च ।
त्रिदोषजनिते घोरे कासे श्वासे क्षये तथा ॥ १ ॥

रससिन्दूर, अभ्रक, सुहागा, सोंठ, कस्तूरी, पीपल, दन्तीकी जड, भाँगके बीज कपूर और मिरच इन सबको समान भाग लेकर अदरखके रसमें सात बार मर्दन करके दो दो रत्तीकी गोलियाँ बनालेवे । इनमेंसे एक एक गोली अदरखके स्वरसके साथ सेवन करनेसे वात और कफके विकार, मन्दाग्नि, पित्त और कफकी अधिकता और त्रिदोषजनित भयंकर ज्वर तथा खाँसी, श्वास और क्षयादिरोग दूर होते हैं ॥ ९९-२०१ ॥

अर्कमूर्त्ति, त्रिदोषदावानलरस ।

लौहांष्टकं मारितमर्कभागं सूतं द्विभागं द्विगुणं च गन्धम् ।
विमर्दयेद्वह्निरसेन तापे दिनत्रयं चात्र विषं कलांशम् ॥ २ ॥
निक्षिप्य पित्तैः परिभावितोऽयं रसोऽर्कमूर्तिर्भवति त्रिदोषे ।
ताम्रस्य पात्रे तु दिनैकमात्रं निम्बूरसेनापि च पित्तवर्गैः ॥ ३ ॥
क्षुद्रार्द्रकोत्थेन रसेन सूतस्त्रिदोषदावानल एष सिद्धः ।
गुञ्जाद्वयं त्र्यूषणयुक्तमस्य ददीत चित्रार्द्ररसेन वापि ॥
नासापुटे चापि नियोजनीया गुञ्जाऽस्य शुण्ठीमरिचेनः युक्ता ४

लोहभस्म १ तोला, लोहेका आठवां भाग-तथा ताम्रभस्म और पारा दो तोले तथा गन्धक ४ तोले लेकर सबको एकत्र चीतेके रसमें तीनदिनतक खरल करे और प्रतिदिन धूपमें सुखाताजाय; फिर उसमें समस्त औषधिसे १६ वाँ भाग शुद्ध मीठातेलिया मिलाकर पाँचों पित्तोंकी पृथक् पृथक् भावना देवे । इसको अर्कमूर्त्तिरस कहते हैं । इसी औषधको यदि ताँबेके पात्रमें डालकर नींबूके रसमें, पाँचों पित्तोंमें, कटेरीके क्राथ और अदरखके रसमें क्रमसे एक एक दिनतक भावना दीजाय तो यही त्रिदोषदावानलरस सिद्ध होजाता है । इस रसको दो दो रत्ती परिमाण लेकर त्रिकुटेके चूर्ण और अदरखके तथा चीतेके रसमें मिलाकर सेवन करावे अथवा इस रसको एक रत्ती परिमाण लेकर सोंठ और मिर्चोंके चूर्णमें मिलाकर नस्य देवे तो सन्निपातज्वर नष्ट होता है । उक्त दोनों रसोंकी मात्रा और सेवनविधि एकही प्रकार की है ॥ २-४ ॥

त्रिदोषदावानलकालमेघ ।

तालेन वङ्गं शिलया च नागं रसैः सुवर्णं रवितारपत्रम् ।
गन्धेन लौहं दरदेन सव पुटे मृतं योजय तुल्यभागम् ॥ ५ ॥

तत्तुल्यसूतं द्विगुणं च गन्धं तुत्थं च गन्धेन समानभागम्।
निम्बूरसोत्थतोयेन विमर्द्य सर्वं गोलं प्रकृत्याथ मृदा विलिप्य॥६
पुटं च दत्त्वाथ विमर्द्य चैनं गन्धेन तुल्येन कृशानुनीरैः।
विषं च दत्त्वाथ कलाप्रमाणमीषत्कृशानूत्थरसैः पचेत्तत्॥७॥
पित्तैस्तथा भावित एष सूतस्त्रिदोषदावानलकालमेघः।
वल्लं ददीतास्य च पूर्वयुक्त्या दाहोत्तरे तं मधुपिप्पलीभिः॥
मुद्गश्च शाल्यन्नमिह प्रशस्तं पथ्यं भवेत्कोष्णमिदं दिनान्ते॥८

पेठेका खार, चूनेका पानी और तिलोंका खार इन तीनों चीजोंके साथ पृथक् पृथक् हरतालको पकाकर शुद्ध करे। फिर हरतालके बराबर भाग पारेको उसमें मिलाकर करेलेके रसमें तीन दिनतक खरल करके एक सकोरेमें रक्खे। उस सकोरेके ऊपर ताँबेका कटोरा ढककर उसके सन्धिस्थानोंको हरडके चूर्ण, गुड, नमक, खडिया-मिट्टी और चिकनी मिट्टी इन सब चीजोंके कल्कद्वारा बन्दकर देवे और उसके ऊपर कुछ धानोंके दाने रखदेवे। फिर उस सम्पुटको वालुकायन्त्रमें रखकर शनैः शनैः अग्नि देवे। जब धान खिलने लगे तब उत्तम प्रकारसे पाक हुआ जानकर स्वांगशीतल होनेपर ओषधिको निकालकर बारीक चूर्ण करलेवे। इस रसको दो दो रत्तीकी मात्रासे तुलसीपत्रके रस, मधु, पीपलका चूर्ण, मिश्री, घृत और दूध इन अनुपानोंके साथ सेवन करावे। इसपर दूध, भात, मूँगका यूष और घृत आदि पदार्थोंका भोजन हितकर है। यह शीतारिरस चिरकालसे संचित ज्वरको अत्यन्त शीघ्र नष्ट करता है॥ ८-५१०॥

ज्वरशूलहररस।

रसगन्धकयोः कृत्वा कज्जलीं भाण्डमध्यगाम्।
तत्राधोवदनां ताम्रपात्रीं संरुध्य शोषयेत्॥ ११॥

पादाङ्गुष्ठप्रमाणेन चुल्ल्यां ज्वालेन तां दहेत् ।
यामद्वयं ततस्तत्स्थं रसपात्रं समाहरेत् ॥ १२ ॥
चूर्णयेद्रक्तियुगलं त्रितयं वा विचक्षणः ।
ताम्बूलीदलयोगेन दद्यात्सर्वज्वरेष्वमुम् ॥ १३ ॥
जीरसैन्धवसँल्लिप्तवक्त्राय ज्वरिणे हितम् ।
स्वेदोद्गमो भवत्येव देवि सर्वेषु पाप्मसु ॥ १४ ॥
चातुर्थिकादीन्विषमान् नवमागामिनं ज्वरम् ।
साधारणं सन्निपातं जयत्येव न संशयः ॥ १५ ॥

पारे और गन्धकको समान भाग लेकर उनकी कज्जली करके उसको एक मिट्टीके बरतनमें रखे और उसके ऊपर एक तांबेका कटोरा ढककर कपरौटी करके सुखालेवे । फिर उसको चुल्हेपर चढाकर पैरके अँगूठेके समान पतली २ लकडियोंकी अग्निसे दो प्रहरतक पकावे । पश्चात् स्वांगशीतल होनेपर औषधिको निकाल कर बारीक चूर्ण करके रखलेवे । प्रथम रोगीको जीरा और सेन्धानमक चबाकर फिर इस रसको दो या तीन रत्ती परिमाण पानमें रखकर सेवन करावे इससे पसीना आकर ज्वर शीघ्र दूर हो जाता है । यह चातुर्थिक आदि समस्त विषमज्वर, नवीनज्वर और साधारण सन्निपात ज्वरको निस्सन्देह नष्ट करता है ॥ ११–१५ ॥

षडाननरस ।

आरं कांस्यं मृतं ताम्रं दरदं पिप्पलीविषम् ।
तुल्यांशं मर्दयेत्खल्ले यामं च गुडुचीरसैः ॥ १६ ॥
गुञ्जामात्रं रसं देयं गुञ्जामात्रां लिहेत्सदा ।
ज्वरे मन्दानले चैव वातपित्तज्वरेषु च ॥ १७ ॥
ज्वरे वैषम्यतरुणे ज्वरे जीर्णे विशेषतः ।
मुद्गान्नं मुद्गयूषं वा तक्रभक्तं च केवलम् ॥ १८ ॥
नारिकेलोदकं देयं मुद्गपथ्यं विशेषतः ।
षडाननो रसो नाम सर्वज्वरकुलान्तकृत् ॥ १९ ॥

पीपल, काँसा, ताँबा इनकी भस्म, शुद्ध सिंगरफ, पीपल और शुद्ध मीठा तेलिया इन सबको समान भाग लेकर गिलोयके स्वरसमें एक प्रहरतक खरल करे

फिर एकएक रत्तीकी गोलियाँ बनालेवे। उनमेंसे एकएक गोली गिलोयके रस और मधुमें मिलाकर सेवन करे। यह रस-ज्वर, मन्दाग्नि, वातपित्तज्वर, विषमज्वर, तरुणज्वर और जीर्णज्वरमें विशेष हितकारी है। इसपर मूँगभात अथवा मूँगका यूष या केवल छाछ (मट्ठा) और भातका भोजन करे। विशेष कर इसपर मूँगका यूष और नारियलके जलका पथ्य देना अधिक हितकारी है। यह षडानन (रस) सब प्रकारके ज्वरोंको समस्त उपद्रवोंसहित दूर करता है॥ १६-१९॥

कल्पतरुरस।

रसं गन्धं विषं ताम्रं समभागं विचूर्णयेत्।
भावयेत्पंचभिः पित्तैः क्रमशः पंचवासरम्॥ ५२०॥
निर्गुण्डीस्वरसेनैव मर्दयेत्सप्तवासरम्।
आर्द्रकस्य रसेनैव भावयेच्च त्रिधा पुनः॥ २१॥
सर्षपाभा वटी कार्या च्छायया परिशोषिता।
ततः सप्तवटी योज्या यावन्न त्रिगुणा भवेत्॥ २२॥
वयोऽग्निदोषकं बुद्ध्वा प्रयोज्या भिषजां वरैः।
अनुपानं चोष्णजलं कज्जलीपिप्पलीयुतम्॥ २३॥

पारा, गन्धक, वत्सनाभ और ताम्रभस्म- इनको समान भाग लेकर एकत्र खरल करके पूर्वोक्त पाँचों पित्तोंमें क्रमसे एकएक दिनतक भावना देवे। फिर निर्गुण्डीके पत्तोंके रसमें सात दिन और अदरखके रसमें ३ दिन खरल करके सरसोंकी बराबर गोलियाँ बनाकर छायामें सुखालेवे वैद्यको रोगीकी अवस्था, जठराग्नि और दोषोंके बलाबलको विचारकर प्रतिदिन एकएक गोली क्रमसे बढाकर २१ दिनतक २१ गोलियाँ सेवन करानी चाहिये। इसपर कज्जली पीपलका चूर्ण और मन्दोष्ण जलका अनुपान करना चाहिये॥ ५२०-२३॥

पानावशेषे प्रस्वाप्य वस्त्रैराच्छादयेन्नरम्।
घर्माभ्यागमनं यावत्ततो रोगात्प्रमुच्यते॥ २४॥
रोगिणं स्नापयित्वा तु भोजयेत्ससितं दधि।
एष कल्पतरुर्नाम रसः परमदुर्लभः॥ २५॥
असाध्यं चिरकालोत्थं जीर्णं च विषमज्वरम्।
हन्ति ज्वरातिसारौ च ग्रहणीं पाण्डुकामलाम्॥ २६॥

न देयः श्वासकासे च शूलयुक्तनरे तथा ।
गोपनीयः प्रयत्नेन न देयो यस्य कस्यचित् ॥ २७ ॥

इस औषधिको सेवन कराकर रोगीको आरामसे सुलाकर उसके देहको गरम कपडेसे अच्छीतरह ढक देवे । इससे पसीना आतेही रोगी रोगमुक्त होजाता है । जागनेके पश्चात् रोगीको स्नान कराकर मिश्री मिलाहुआ दही भोजन करावे । यह कल्पतरु रस अत्यन्त दुर्लभ है । इसके सेवनसे असाध्य और चिरकालसे उत्पन्न-हुआ जीर्णज्वर, विषमज्वर, ज्वरातिसार, संग्रहणी, पाण्डु और कामलारोग नष्ट होते हैं । इस रसको श्वास, कास और शूलरोगमें कदापि नहीं देना चाहिये । यह अत्यन्त गोपनीय है, इसलिये जिस तिसको नहीं देना चाहिये ॥ २५–२७ ॥

तालाङ्करस ।

तालकस्य च भागौ द्वौ भागं तुत्थस्य शुक्तिका ।
चूर्णकानां चतुर्भागं मर्दयेत्कन्यकाद्रवैः ॥ २८ ॥
यामैकेन ततः पश्चाद्रुद्ध्वा गजपुटे पचेत् ।
अस्य गुञ्जाद्वयं हन्ति वातिकं पैत्तिकं तथा ।
शीतज्वरं विशेषेण तृतीयकचतुर्थकौ ॥ २९ ॥

हरताल २ भाग, तूतिया १ भाग और सीपीकी भस्म ४ भाग लेकर सबको घीग्वारके रसमें एक प्रहरतक खरल करके गोलासा बनाकर उसको शरावसम्पुटमें बन्द करके गजपुटमें पकावे । इस रसको दो दो रत्ती परिमाण सेवन करनेसे वातज, पित्तजज्वर, शीतज्वर और विशेषकर तृतीयक (तिजारी), चातुर्थिक (चौथिया) ज्वर दूर होता है ॥ २८–२९ ॥

पर्पटीरस ।

शुद्धसूतं द्विधा गन्धं मर्द्यं भृङ्गरसेन च ।
मृत ताम्रं लौहभस्म पादांशेन तयोः क्षिपेत् ॥ ९२० ॥
लौहपात्रे च विपचेच्चालयेल्लौहचाटुना ।
तत्क्षिपेत्कदलीपत्रे गोमयोपरि संस्थिते ॥ २१ ॥
पश्चाच्च चूर्णयेत्खल्ले निर्गुण्ड्या भावयेद्दिनम् ।
जयन्तीत्रिफलाकन्यावासाभार्ङ्गीकटुत्रिकैः ॥ २२ ॥

भृङ्गाग्निमूलमुण्डीभिर्भावयेद्दिनसप्तकम्।
अङ्गारैः स्वेदयेत्किंचित् पर्पटाख्यो महारसः॥ ३३॥
चतुर्गुञ्जामितो भक्ष्यः सम्यक् श्लेष्मज्वरं जयेत्।
पथ्याशुण्ठ्यमृताक्काथमनुपानं प्रयोजयेत्॥ ३४॥

शोधित पारा १ भाग और शुद्ध गन्धक २ भाग लेकर दोनोंकी एकत्र कज्जली करके भाँगरेके रसमें खरल करे। फिर उसमें ताम्रभस्म और लोहभस्म कज्जलीसे चौथाई भाग मिलाकर लोहेके पात्रमें पकावे और लोहेकी करछीसे चलाताजावे। जब वह पिघलकर पतली होजाय तब गोबरके ऊपर एक केलेका पत्ता रखकर उसके ऊपर कज्जलीको ढाल देवे। जब वह पपडीकी समान जमजाय तब उसको खरलमें डालकर निर्गुण्डीके रसमें एक दिनतक भावना देवे। पश्चात् अरणी, त्रिफला, घीग्वार, अडूसा, भारंगी, त्रिकुटा, भाँगरा, चीतेकी जड और मुण्डी इन प्रत्येकके रस अथवा काथमें सातदिनतक भावना देवे। फिर अँगारोंकी अग्निसे कुछ सेककर शीशीमें भरकर रखलेवे। इसको चार चार रत्ती परिमाण सेवन करना चाहिये और ऊपरसे हरड, सोंठ, गिलोय इनके क्वाथका अनुपान करना चाहिये। यह पर्पटीरस श्लैष्मिकज्वरको नष्ट करनेके लिये अत्यन्त श्रेष्ठ है॥ ९३०—३४॥

त्रैलोक्यचिन्तामणिरस।

भागत्रयं स्वर्णभस्म द्विभागं तारमभ्रकम्।
लौहात्पंच प्रवालं च मौक्तिकं त्रयसम्मितम्॥ ३५॥
भस्मसूतं सप्तकं च सर्वं मर्द्यं तु कन्यया।
छायाशुष्का वटी कार्या च्छागीदुग्धानुपानतः॥ ३६॥
क्षयं हन्ति तथा कासं गुल्मं चापि प्रमेहनुत्।
जीर्णज्वरहरश्चायमुन्मादस्य निकृन्तनः॥
सर्वरोगहरश्चापि वारिदोषनिवारणः॥ ३७॥

सुवर्णभस्म ३ तोले, चाँदीकी भस्म २ तोले, अभ्रकभस्म २ तोले, लोहभस्म ५ तोले, प्रवालभस्म ३ तोले, मोतीका भस्म ३ तोले और रससिंदूर ७ तोले लेकर सबको एकत्र खरल करले फिर घीग्वारके रसमें एकदिनतक घोटकर छायामें सुखा करके एकएक रत्तीकी गोलियाँ बनालेवे। फिर एकएक वटी नित्य बकरीके दूधके साथ सेवन करे। यह रस क्षयरोग, खाँसी, वातगुल्म, प्रमेह, जीर्णज्वर, उन्मादरोग

और जलदोषजनितरोग आदि सम्पूर्ण व्याधियोंको दूर करताहै ॥ ३५-३७ ॥

महाराजवटी ।

रसगन्धकमभ्रं च प्रत्येकं कर्षसम्मितम् ।
वृद्धदारकबङ्गं च लौहं कर्षार्द्धक क्षिपेत् ॥ ३८ ॥
स्वर्णं ताम्रं च कर्पूरं प्रत्येकं कर्षपादिकम् ।
शक्राशनं वरी चैव श्वेतसर्जलवङ्गकम् ॥ ३९ ॥
कोकिलाक्षं विदारी च मुसली शूकशिम्बिकम् ।
जातीफलं तथा कोषं बला नागबला तथा ॥ ५४० ॥
माषद्वयमितं भागं तालमूल्या रसेन च ।
पिष्ट्वा च वटिका कार्य्या चतुर्गुञ्जाप्रमाणतः ॥ ४१ ॥

शुद्ध पारा, शुद्ध गन्धक और अभ्रक ये प्रत्येक एकएक कर्ष एवं शोधित विधारेके बीज, वङ्ग और लोहभस्म ये प्रत्येक आधा २ कर्ष, सोना, ताँबा और कपूर चौथाई कर्ष, भाँग, शतावर, सफेदराल, लौंग, तालमखाना, विदारीकन्द, मुसली, कौंचके बीज, जायफल, जावित्री, खिरैंटी और गंगेरन इन औषधियोंको दो दो माशे परिमाण लेवे। सबको एकत्र मुसलीके क्वाथके साथ खरल करके चार चार रत्तीकी गोलियाँ बनालेवे ॥ ३८-५४१ ॥

मधुना भक्षयेत्प्रातर्विषमज्वरशान्तये ।
धातुस्थाँश्च ज्वरान्सर्वान् हन्यादेव न संशयः ॥ ४२ ॥
वातिकं पैत्तिकं चैव श्लैष्मिकं सान्निपातिकम् ।
ज्वरं नानाविधं हन्ति कासं श्वासं क्षयं तथा ॥ ४३ ॥
बलपुष्टिकरं नित्यं कामिनीं रमयेत्सदा ।
न च शुक्रक्षयं याति न बलं ह्रासतां व्रजेत् ॥ ४४ ॥
ऊर्ध्वगं श्लेष्मजं हन्ति सन्निपातं सुदारुणम् ।
कामलां पाण्डुरोगं च प्रमेहं रक्तपित्तकम् ॥
महाराजवटी ख्याता राजयोग्या च सर्वदा ॥ ४५ ॥

इनमेंसे प्रतिदिन प्रातःकाल एकएक गोली शहदके साथ सेवन करनेसे विषमज्वर शान्त होता है। ये गोलियाँ धातुगतज्वर सब प्रकारके वातज, पित्तज, श्लैष्मिक

सान्निपातिक ज्वर एवं अन्यान्य अनेक प्रकारके ज्वर खाँसी, श्वास और क्षय प्रभृति रोगोंको शीघ्र नष्ट करती हैं, बल तथा पुष्टि उत्पन्न करती हैं। इनको सेवन करनेवाला मनुष्य यदि प्रतिदिन सुन्दरस्त्रियोंके साथ रमण करे तो भी वीर्य क्षय नहीं होता और न बल नष्ट होता है। इससे ऊर्ध्वगत कफके विकार, दारुण सन्निपात, कामला, पाण्डु, प्रमेह, रक्तपित्तादि दुस्तर व्याधियाँ दूर होती हैं। इसको महाराजवटी कहते हैं। ये गोलियाँ राजाओंके सदैव सेवन करने योग्य हैं ॥ ४२–४५ –

सर्वतोभद्ररस ।

विशुद्धं गगनं ग्राह्यं द्विकर्षं शुद्धगन्धकम् ।
तोलकं तोलकार्द्धं च हिङ्गुलोत्थरसं तथा ॥ ४६ ॥
कर्पूरं केशरं मांसी तेजपत्रं लवङ्गकम् ।
जातीकोषफलं चैव सूक्ष्मैला करिपिप्पली ॥ ४७ ॥
कुष्ठं तालीशपत्रं च धातकी चोचमुस्तकम् ।
हरीतकी च मरिचं शृङ्गवेरविभीतकम् ॥ ४८ ॥
पिप्पल्यामलकं चैव शाणभागं विचूर्णितम् ।
सर्वमेकीकृतं पिष्ट्वा वटीं कुर्याद् द्विगुञ्जिकाम् ॥ ४९ ॥

शुद्ध अभ्रक २ कर्ष, शुद्ध गन्धक १ तोला, सिंगरफसे निकाला हुआ पारा ६ मासे, एवं कपूर, केशर, जटामांसी, तेजपात, लौंग, जावित्री, जायफल, छोटी इलायची, गजपीपल, कूठ, तालीशपत्र, धायके फूल, दारचीनी, नागरमोथा, हरड, मिरच, सोंठ, बहेडा, पीपल और आमले ये प्रत्येक चार चार माशे लेवे। सबको जलके साथ एकत्र खरल करके दो दो रत्तीकी गोलियाँ बनालेवे ॥ ४२–४९ ॥

भक्षयेत्पर्णखण्डेन मधुना सितयाऽपि वा ।
रोगं ज्ञात्वाऽनुपानं च प्रातः कुर्याद्विचक्षणः ॥ ५० ॥
हन्ति मन्दानलान्सर्वानामदोषं विषूचिकाम् ।
पित्तश्लेष्मभवं रोगं वातश्लेष्मभवं तथा ॥ ५१ ॥
आनाहं मूत्रकृच्छ्रं च संग्रहग्रहणीं वमिम् ।
अम्लपित्तं शीतपित्तं रक्तपित्तं विशेषतः ॥ ५२ ॥

चिरज्वरं पित्तभवं धातुस्थं विषमज्वरम् ।
कासं पञ्चविधं हन्ति कामलां पाण्डुमेव च ॥ ५३ ॥
सर्वलोकहितार्थाय शिवेन कथितः पुरा ।
सर्वतोभद्रनामाऽयं रसः साक्षान्महेश्वरः ॥ ५४ ॥

वैद्य इसकी एकएक गोली प्रतिदिन प्रातःकाल पानके रस, शहद अथवा मिश्रीके साथ सेवन करावे और रोगके अनुसार अनुपान देवे । यह रस मन्दाग्नि, सर्वप्रकारके आमदोष, विषूचिका, पित्त-कफजन्य तथा वात-कफजनित रोग, अफारा, मूत्रकृच्छ्र, संग्रहणी, वमन, अम्लपित्त, शीतपित्त, विशेषकर रक्तपित्त, जीर्णज्वर, पित्तज्वर, धातुस्थ विषमज्वर, पाँचोंप्रकारकी खाँसी, कामला और पाण्डुरोग इन समस्त व्याधियोंको नष्ट करता है । पूर्वकालमें संसारके कल्याणके लिये इस सर्वतोभद्रनामक रसको शिवजीने कहा है । यह साक्षात् महेश्वर है ॥ ५०—५५४ ॥

ज्वरारि-अभ्रक ।

अभ्रं ताम्रं रसं गन्धं विषं चेति समं समम् ।
द्विगुणं धूर्तबीजं च व्योषं पञ्चगुणं मतम् ॥ ५५ ॥
जलेन वटिकां कुर्याद्यथादोषानुपानतः ।
अभ्रं ज्वरारिनामेदं सर्वज्वरविनाशनम् ॥ ५६ ॥
वातिकं पैत्तिकं चैव श्लैष्मिकं सान्निपातिकम् ।
विषमाख्यान्द्वन्द्वजांश्च धातुस्थान्विषमज्वरान् ॥ ५७ ॥
प्लीहानं यकृतं गुल्ममग्रमांसं सशोथकम् ।
हिक्कां श्वासं च कासं च मन्दानलमरोचकम् ॥
नाशयेन्नात्र सन्देहो वृक्षमिन्द्राशनिर्यथा ॥ ५८ ॥

अभ्रक, ताँबा, पारा, गन्धक और शुद्धवत्सनाभ ये प्रत्येक एक एक भाग धतूरेके बीज २ भाग और त्रिकुटा ५ भाग इन सब ओषधियोंको एकत्र जलके साथ उत्तमप्रकारसे खरलकरके एकएक रत्तीकी गोलियाँ बनालेवे । नित्यप्रति एकएक गोली यथादोषानुसार अनुपानके साथ सेवन करे । यह ज्वरारि अभ्रक सम्पूर्ण ज्वरोंको दूर करता है । जैसे—वातज, पित्तज, श्लेष्मज, सान्निपातिक, विषम, द्वन्द्वज और धातुगत विषमज्वर एवं तिल्ली और जिगरके विकार, गुल्म, अग्रमांस, शोथ

हिचकी, श्वास, खाँसी, मन्दाग्नि, अरुचि आदि रोगोंको इस प्रकार शीघ्र नष्ट करता है जैसे-वज्र वृक्षोंको ॥ ५५-५८ ॥

जीवनानन्दाभ्र ।

वज्राभ्रं मारितं कृत्वा कर्षयुग्मं विचूर्णितम् ।
जीरं कनकबीजं च कर्षं वासारसेन च ॥ ५९ ॥
कण्टकारीरसेनैव धात्रीमुस्तरसेन च ।
गुडूच्याः स्वरसेनैव पलांशेन पृथक् पृथक् ॥ ५६० ॥
मर्दयित्वा वटी कार्या गुञ्जामात्रा प्रयोजिता ।
विषमाख्याञ्ज्वरान्सर्वान्प्लीहानं यकृतं वमिम् ॥ ६१ ॥
रक्तपित्तं वातरक्तं ग्रहणीं श्वासकासकौ ।
अरुचिं शूलहृल्लासावर्शांसि च विनाशयेत् ॥ ६२ ॥
जीवनानन्दनामेदमभ्रं वृष्यं बलप्रदम् ।
रसायनमिदं श्रेष्ठमग्निसन्दीपनं परम् ॥ ६३ ॥

अभ्रककी भस्म २ कर्ष, जीरा और धतूरेके बीज एक एक कर्ष लेकर सबको एकत्र चूर्ण करके अडूसा, कटेरी, आमले, नागरमोथा और गिलोय इन प्रत्येकके चार चार तोले स्वरसमें क्रमसे अलग २ खरल करे। फिर एकएक रत्तीकी गोलियाँ बनाकर एकएक गोली यथादोषानुसार उचित अनुपानके साथ प्रयोग करे। यह रस सम्पूर्ण विषमज्वर, प्लीहा, यकृत्, वमन, रक्तपित्त, वातरक्त, संग्रहणी, श्वास, खाँसी, अरुचि, शूल, हल्लास (उबकाई) और अर्शरोगको नष्ट करता है। यह जीवनानन्द नामक अभ्रक-अत्यन्त वृष्य, बलदायक, उत्तम रसायन और अग्निको अत्यन्त दीपन करनेवाला है ॥ ५९-५६३ ॥

चन्दनादिलोह ।

रक्तचन्दनह्रीबेरपाठोशीरकणाशिवाः ।
नागरोत्पलधात्रीभिस्त्रिमदेन समन्वितम् ॥
लौहं निहन्ति विविधान् समस्तान्विषमज्वरान् ॥ ६४ ॥

लालचन्दन, सुगन्धवाला, पाढ, खस, पीपल, हरड, सोंठ, कमोदिनीकी जड, बबूल, आमले, नागरमोथा, चीता और वायविडङ्ग ये सब औषधियाँ

१ त्रिमदं चात्र—मुस्तकचित्रकविडङ्गम् । द्वादशद्रव्यसमं लौहं रक्तिद्वयं मधुना लिहेत् ॥

समान भाग और लोहभस्म सबके बराबर भाग लेकर एकत्र करके जलके द्वारा उत्तमप्रकारसे खरलकरके दो दो रत्तीकी गोलियाँ बनालेवे। इस लोहको शहदके साथ खानेसे सब प्रकारक विषमज्वर और अन्य नानाप्रकारके ज्वर दूर होते हैं ॥ ६४ ॥

विषमज्वरान्तकलोह।

पारदं गन्धकं तुल्यं सूताईं जीर्णताम्रकम् ।
ताम्रतुल्यं माक्षिकं च लौहं सर्वसमं नयेत् ॥ ६५ ॥
जयन्त्याः स्वरसेनैव कोकिलाक्षरसेन च ।
वासकार्द्रपर्णरसैः पंचधा च विमर्दयेत् ॥ ६६ ॥
पृथक् कलायमानां तु वटिकां कारयेद्भिषक् ।
विषमज्वरान्तनामाऽयं विषमज्वरनाशनः ॥ ६७ ॥
वह्निदीप्तिकरो हृद्यः प्लीहगुल्मविनाशनः ।
चक्षुष्यो बृंहणो वृष्यः श्रेष्ठः सर्वरुजापहः ॥ ६८ ॥

शुद्ध पारा और शुद्ध गन्धक दोनोंको समानभाग लेकर एकत्र खरल करके कजली बनाले। फिर उसमें ताम्रभस्म १ तोला, सोनामाखीकी भस्म १ तोला और लोहभस्म सबके बराबर भाग लेवे। इन सबको एकत्र खरल करके अरणी, तालमखाना, अडूसा, अदरख और पान इन पाँचोंके रसमें पृथक् पृथक् पाँच बार खरल करके मटरकी समान गोलियाँ बनालेवे। यह विषमज्वरान्तकलोह सर्वप्रकारके विषमज्वर, प्लीहा, गुल्म आदिरोगोंको नष्ट करता है एवं अग्निको दीपन करनेवाला हृदयके और नेत्रोंके लिये हितकारी, कामोत्तेजक एवं वीर्यवर्द्धक है और समस्त व्याधियोंकी उत्तम औषध है ॥ ६५-६८ ॥

बृहद्विषमज्वरान्तकलोह।

शुद्धसूतं तथा गन्धं कारयेत्कज्जलीं शुभाम् ।
मृतसूतं हेम तारं लौहमभ्रं च ताम्रकम् ॥ ६९ ॥
तालसत्त्वं वङ्गभस्म मौक्तिकं सप्रवालकम् ।
सुवर्णमाक्षिकं चापि चूर्णयित्वा विभावयेत् ॥ ७० ॥
निर्गुण्डी नागवल्ली च काकमाची सपर्पटी ।
त्रिफला कारवेल्लं च दशमूली पुनर्नवा ॥ ७१ ॥

गुडूची वृषकश्चापि सभृङ्गं केशराजकः ।
एतेषां च रसेनैव भावयेत्त्रिदिनं पृथक् ॥ ७२ ॥
गुञ्जामानां वटीं कुर्य्याच्छास्त्रवित्कुशलो भिषक् ।
पिप्पलीगुडकेनैव लिहेच्च वटिकां शुभाम् ॥ ७३ ॥

शुद्धपारा, शुद्धगन्धक दोनोंकी बनायीहुई उत्तम कज्जली, रससिन्दूर, सोना, चाँदी लोहा, अभ्रक, ताँवा, हरतालभस्म, वङ्गभस्म, मोती, मूँगा और सोनामाखी इन सबको समानभाग लेकर एकत्र चूर्ण करलेवे। फिर उसको निर्गुण्डी, पान, मकोय, पित्तपापडा, त्रिफला, करेला, दशमूल, पुनर्नवा, गिलोय, अडूसा, भाँगरा और कुकुरभाँगरा इन प्रत्येक ओषधियोंके रसमें अलग २ तीनतीन दिनतक भावना देकर एक एक रत्तीकी गोलियाँ तैयार करलेवे। इनमेंसे एकएक गोली पीपलके चूर्ण और पुराने गुडके साथ सेवन करे ॥ ६९-७३ ॥

ज्वरमष्टविधं हन्ति निरामं साममेव च ।
सप्तधातुगतं चापि नानादोषोद्भवं तथा ॥ ७४ ॥
सततादिज्वरं हन्ति साध्यासाध्यमथापि वा ।
अभिघाताभिचारोत्थं जीर्णज्वरं विशेषतः ॥ ७५ ॥

इससे आठों प्रकारके ज्वर आमरहित और आमसहित ज्वर, सातों धातुओंमें स्थित तथा अनेक दोषोंसे उत्पन्न हुए ज्वर सततादिज्वर साध्य अथवा असाध्य अभिघातज्वर, अभिचारजन्यज्वर और विशेष कर जीर्णज्वर तत्काल नष्ट होते हैं ॥ ७४ ॥ ७५ ॥

पुटपक-विषमज्वरान्तकलोह ।

हिंगूलसम्भव सूतं गन्धकेन सुकज्जलम् ।
पर्पटीरसवत्पाच्यं सूताङ्घ्रिहेमभस्मकम् ॥ ७६ ॥
लोहं ताम्रमभ्रकं च रसस्य द्विगुणं तथा ।
वङ्गकं गैरिकं चैव प्रवालं च रसार्द्धकम् ॥ ७७ ॥
मुक्ताशंखशुक्तिभस्म प्रदेयं रसपादिकम् ।
मुक्तागृहे च संस्थाप्य पुटपाकेन साधयेत् ॥ ७८ ॥
भक्षयेत्प्रातरुत्थाय द्विगुञ्जाफलमानतः ।
अनुपानं प्रयोक्तव्यं कणा हिङ्गु ससैन्धवम् ॥ ७९ ॥

सिंगरफसे निकालाहुआ पारा और शुद्धगन्धक दोनोंको समान भाग लेकर कज्जली करलेवे फिर पर्पटी रसके समान उसका पाक करके चूर्ण करलेवे । चूर्णमें स्वर्णभस्म पारेसे चौथाई भाग एवं लोहा, अभ्रक और ताँबा ये प्रत्येक पारेसे दुगुने वङ्गभस्म, गेरू, मूँगा ये प्रत्येक पारेसे आधा २ भाग तथा मोतीकी भस्म, शंखभस्म और सीपीकी भस्म ये प्रत्येक पारेसे चौथाई २ भाग लेवे । सबको एकत्र जलके साथ खरल करके सीपीमें भरकर पुटपाकविधिके द्वारा सिद्ध करै । इस रसको प्रतिदिन प्रातःकाल दो दो रत्ती प्रमाण लेकर पीपल, हींग और सेंधानमक इनके चूर्णके साथ मिलाकर सेवन करे ॥ ७६-७९ ॥

ज्वरमष्टविधं हन्ति वातपित्तकफोद्भवम् ।
प्लीहानं यकृतं गुल्मं साध्यासाध्यमथापि वा ॥ ५८० ॥
सन्ततं सतताख्यं च विषमज्वरनाशनः ।
कामलां पाण्डुरोगं च शोथं मेहमरोचकम् ॥ ८१ ॥
ग्रहणीमामदोषं च कासं श्वासं तथैव च ।
मूत्रकृच्छ्रातिसारं च नाशयेदविकल्पतः ॥ ८२ ॥
अग्निं च कुरुते दीप्तं बलवर्णप्रसादनः ।
विषमज्वरान्तको नाम्ना धन्वन्तरिप्रकाशितः ॥ ८३ ॥

यह रस-वातज, पित्तज, कफज आदि आठों प्रकारके ज्वर, तिल्ली, यकृत, वायगोला, साध्य या असाध्य सन्तत, सतत और विषमज्वर इन सबको नष्ट करताहै । इसके सेवनसे कामला, पाण्डुरोग, सूजन, प्रमेह, अरुचि, संग्रहणी, आमदोष, खाँसी, श्वास, मूत्रकृच्छ्र, अतिसार आदि रोग अवश्य नष्ट होते हैं । यह लोह अग्निको दीपन करता तथा बल और वर्णको प्रसन्न करता है । इस प्रयोगको धन्वन्तरिजीने विषमज्वरान्तकनामसे प्रकाशित कियाहै ५८०-८३

सर्वज्वरहरलोह ।

चित्रकं त्रिफला व्योषं विडङ्गं मुस्तकं तथा ।
श्रेयसी पिप्पलीमूलमुशीरं देवदारु च ॥ ८४ ॥
किराततिक्तकं बालं कटुकी कण्टकारिका ।
शोभाञ्जनस्य बीजं च मधुकं वत्सकं समम् ॥ ८५ ॥
लोहतुल्यं गृहीत्वा तु वटिकां कारयेद्भिषक् ।
सर्वज्वरहरं लोहं सर्वज्वरकुलान्तकृत् ॥ ८६ ॥

वातिकं पैत्तिकं श्लैष्मं द्वन्द्वजं सान्निपातिकम्।
जीर्णज्वरं च विषमं रोगसङ्करमेव च॥
प्लीहानमग्रमांसं च यकृतं च विनाशयेत्॥ ८७॥

चीतेकी जड, त्रिफला, त्रिकुटा, वायविडङ्ग, नागरमोथा, गजपीपल, पीपलामूल, खस, देवदारु, चिरायता, नेत्रवाला, कुटकी, कटेरी, सहिंजनेके बीज, मुलहठी और इन्द्रजौ ये सब ओषधियाँ समान भाग और सबकी बराबर लोहभस्म लेवे। सबको एकत्र जलके साथ खरल करके दो दो रत्तीकी गोलियाँ बनालेवे। यह सर्वज्वरहर-लोह उपद्रवोंसहित समस्त ज्वरोंको नष्ट करता है। इससे वातज, पित्तज, कफज, द्वन्द्वज, सन्निपातज, जीर्णज्वर, विषमज्वर तथा अन्य भयंकर, रोग एवं तिल्ली, अग्र-मांस, यकृत्विकार आदि समस्त रोग दूर होते हैं॥ ८४-८७॥

बृहत्सर्वज्वरहरलोह।

द्विपलं जारितं लौह रसं गन्धं द्वितोलकम्।
तोलकं त्रिफला व्योषं विडङ्गं मुस्तकं तथा॥
श्रेयसी पिप्पलीमूलं हरिद्रे द्वे च चित्रकम्॥ ८८॥
आर्द्रकस्य रसेनैव वटिकां कारयेद्भिषक्।
गुञ्जाद्वयां वटीं कृत्वा भक्षयेदार्द्रकद्रवैः॥ ८९॥

लोहेकी भस्म ८ तोले, शुद्ध पारा २ तोले और शुद्ध गन्धक २ तोले, दोनोंकी कज्जली एवं त्रिफला, त्रिकुटा, वायविडङ्ग, नागरमोथा, गजपीपल, पीपलामूल, हल्दी दारुहल्दी और चीता ये प्रत्येक एकएक तोला सबको एकत्र कूट पीसकर अदरखके रसमें खरल करके दोदो रत्तीकी गोलियाँ तैयार करलेवे। फिर एकएक गोली अदरखके रसके साथ सेवन करे॥ ८८-८९॥

सर्वज्वरहरं लोहं सर्वज्वरविनाशनम्॥ ९०॥
वातिकं पैत्तिकं चैव श्लैष्मिकं सान्निपातिकम्।
विषमज्वरभूतोत्थज्वरं प्लीहानमेव च॥ ९१॥
मासजं पक्षजं चैव तथा संवत्सरोत्थितम्।
सर्वान्ज्वरान्निहन्त्याशु भास्करस्तिमिरं यथा॥ ९२॥

यह लोह-वातिक, पैत्तिक, श्लैष्मिक, सान्निपातिक, विषमज्वर और भूत-बाधादिजनित सम्पूर्ण ज्वर, तिल्ली. महीनेमें आनेवाला, पक्षमें होनेवाला अथवा

वर्षदिनमें आनेवाला ज्वर इत्यादि सर्वप्रकारके ज्वरोंको इस भाँति शीघ्र नष्ट करता है, जैसे-सूर्यका प्रकाश अन्धकारको तत्काल नष्ट कर देता है ॥५९०-९२॥

द्वितीय बृहत्सर्वज्वरहरलोह।

पारदं गन्धकं शुद्धं ताम्रमभ्रं च माक्षिकम्।
हिरण्यं तारतालं च कर्षमेकं पृथक् पृथक् ॥ ९३ ॥
मृतकान्तं पलं देयं सर्वमेकीकृतं शुभम्।
वक्ष्यमाणौषधैर्भाव्यं प्रत्येकं दिनसप्तकम् ॥ ९४ ॥
कारवेल्लरसेनापि दशमूलरसेन च।
पर्पटस्य कषायेण क्वाथेन त्रैफलेन च ॥ ९५ ॥
गुडूच्याः स्वरसेनापि नागवल्लीरसेन च।
काकमाचीरसेनैव निर्गुण्ड्याः स्वरसेन च ॥ ९६ ॥
पुनर्नवार्द्रकाम्भोभिर्भावनां परिकल्प्य च।
द्विरक्तिकाक्रमेणैव वटिकां कारयेद्भिषक् ॥ ९७ ॥

शुद्ध पारा, शुद्ध गन्धक, ताँबा, अभ्रक, सोनामाखी, सोना, चाँदी और हरताल ये प्रत्येक एकएक तोला और कान्तलोहभस्म ४ तोले लेवे। सबको एकत्र खरल करके आगे कही हुई प्रत्येक ओषधिके रस या काथमें क्रमसे सात सात दिनतक भावना देवे। करेलेके पत्तोंका रस, दशमूलका क्वाथ, पित्तपापडेका और त्रिफलेका क्वाथ, गिलोयका स्वरस पानोंका रस, मकोयका रस, निर्गुण्डीके पत्तोंका रस, पुनर्नवाका रस और अदरखका रस इनमें क्रमसे अलग अलग सात सात दिनतक भावना देकर दो दो रत्तीकी गोलियाँ बनालेवे। फिर एक एक गोली पीपलके चूर्ण और पुराने गुडके साथ रोगियोंको सेवन करावे ॥ ९३-९७ ॥

पिप्पलीगुडसंयुक्ता वटिका वीर्य्यवर्द्धिनी।
ज्वरमष्टविधं हन्ति साध्यासाध्यमथापि वा ॥ ९८ ॥
विविधं वारिदोषोत्थं चिरकालसमुद्भवम्।
सततादिज्वरं हन्ति नानादोषोद्भवं तथा ॥ ९९ ॥
क्षयोद्भवं च धातुस्थं कामशोकभवं तथा।
भूतावेशज्वरं चैव ऋक्षदोषभवं तथा ॥ ६०० ॥
अभिघातज्वरं चैवमभिचारसमुद्भवम्।

अभिन्यासं महाघोरं विषमं च त्रिदोषजम् ॥ १ ॥
शीतपूर्वं दाहपूर्वं त्रिदोषं विषमं ज्वरम् ।
प्रलेपकज्वरं घोरमर्द्धनारीश्वरं तथा ॥ २ ॥
प्लीहज्वरं तथा कासं चातुर्थिकविपर्य्ययम् ।
पाण्डुरोगगणान्सर्वानग्निमान्द्यं महागदम् ॥
एतान्सर्वान्निहन्त्याशु पक्षार्द्धेन न संशयः ॥ ३ ॥

ये गोलियाँ अत्यन्त वीर्यकी वृद्धि करती हैं एवं साध्य वा असाध्य आठों प्रकारके ज्वर, विविध प्रकारके जलदोषजनित विकार, चिरकालसे उत्पन्न हुए सततादिज्वर, अनेकप्रकारके दोषोंसे उत्पन्न हुआ क्षयरोग, धातुगतज्वर, काम और शोकसे उत्पन्न हुए ज्वर तथा भूत, पिशाच, ग्रह आदिकी बाधासे उत्पन्न हुए ज्वर, अभिघातज्वर, अभिचारज्वर, महाभयंकर अभिन्यासज्वर, त्रिदोषजनित विषमज्वर, शीताधिक्य अथवा दाहाधिक्य त्रिदोषजविषमज्वर तथा प्रलेपक और अर्द्धनारीश्वर ज्वर, प्लीहा युक्तज्वर, खाँसी, चातुर्थिक विपरीतज्वर, पाण्डुरोग और मन्दाग्नि आदि सम्पूर्ण भयंकर रोगोंको एक सप्ताहमें ही निस्सन्देह दूर करती हैं ॥ ९८–६०३ ॥

शाल्यन्नं तक्रसहितं भोजयेद् द्विजसंयुतम् ।
ककारपूर्वकं सर्वं वर्जनीयं विशेषतः ॥ ४ ॥
मैथुनं वर्जयेत्तावद्यावन्न बलवान्भवेत् ॥
सर्वज्वरहरं श्रेष्ठमनुपानं प्रकल्पयेत् ॥ ५ ॥

इसपर रोगीको तक्रसहित शालिचावलोंका भात भोजन करावे और करेला ककडी आदि समस्त ककारवाचक पदार्थ विशेषरूपसे त्याग देवे और जबतक रोगी अच्छेप्रकारसे बलवान् न होजाय तबतक मैथुन नहीं करना चाहिये। यह रस सर्वप्रकारके ज्वरोंको हरनेके लिये परमश्रेष्ठ औषध है इसपर यथादोषानुसार अनुपानकी कल्पना करनी चाहिये ॥ ६०४ ॥ ६०५ ॥

बृहज्ज्वरान्तकलोह ।

रसं गन्धं तोलकं च जातीकोषफले तथा ।
हेमभस्म तु पादैकं तोलार्द्धं रूप्यलोहकम् ॥ ६ ॥

१ बृहज्ज्वरान्तके लोहे तोलकमिति रसादिफलान्तं प्रत्येकं तोलकभागम्, हेमभस्म तु पादैकमिति एकभागापेक्षया पादैकम् ।

अभ्रं शिलाजतु चैव भृङ्गराजं च मुस्तकम् ।
केशराजमपामार्गं लवङ्गं च फलत्रिकम् ॥ ७ ॥
वराङ्गवल्कलं चैव पिप्पलीमूलमेव च ।
सैन्धवं च विडं चैव गुडूचीचूर्णमेव च ॥ ८ ॥
कण्टकारी रसोनं च धान्यकं जीरकद्वयम् ।
चन्दनं देवकाष्ठं च दार्वीन्द्रयवमेव च ॥ ९ ॥
किराततिक्तकं बालं तोलकं च समाहरेत् ।
द्वितोलं मरिचं देयं भावयेदार्द्रकद्रवैः ।
माषार्द्धं भक्षयेत्प्रातर्मधुना मधुरीकृतम् ॥ ६१० ॥

शुद्धपारे और शुद्ध गन्धककी कज्जली २ तोले, जावित्री १ तोला, जायफल १ तोला, सुवर्णभस्म ३ माशे, चाँदीकी भस्म ६ माशे, लौहभस्म ६ माशे एवं अभ्रक, शिलाजीत, भाँगरा, नागरमोथा, कुकुरभाँगरा, चिरचिटा, लौंग, त्रिफला, दारचीनी, पीपलामूल, सैंधानमक, विडनमक, गिलोयका सत्त कटेरी, दूधसे शुद्ध कियाहुआ लहसुनका कन्द, धनियाँ, जीरा, कालाजीरा, चन्दन, देवदारु, दारुहल्दी, इन्द्रजौ, चिरायता और सुगन्धवाला ये प्रत्येक एकएक तोला और कालीमिरच दो तोले लेवे । सबको एकत्र कूटपीसकर अदरखके रसमें सातवार भावना देवे । इसको प्रतिदिन प्रातःकाल चार चार रत्तीकी मात्रासे मधुके साथ मिलाकर सेवन करे ॥ ६०६–६१० ॥

ज्वरं नानाविधं हन्ति शुक्रस्थं चिरकालजम् ।
साध्यासाध्यविचारोऽत्र नैव कार्य्यो भिषग्वरैः ॥ ११ ॥
अन्तर्धातुगतं चापि नाशयेन्नात्र संशयः ।
भूतोत्थं श्रमजं चापि सन्निपातज्वरं तथा ॥ १२ ॥
असाध्यं च ज्वरं हन्ति यथा सूर्य्योदयस्तमः ।
गरुडं च समालोक्य यथा सर्पः पलायते ॥ १३ ॥
तथैवास्य प्रसादेन ज्वरः शीघ्रं पलायते ।
बलदं पुष्टिदं चैव मन्दाग्निनाशनं परम् ॥ १४ ॥

---

१ वराङ्गवल्कलं गुडत्वक् । २ गुडूचीचूर्णमित्यत्र गुडूचीसत्त्वमिति व्यवहरन्ति वृद्धाः । ३ रसोनं रसोनकम्, तच्च दुग्धेन परिशोधितं ग्राह्यम् । ४ भावयेदार्द्रकद्रवैरिति–आर्द्रकस्य रसैः सप्तवारं भावयेत् ॥

वीर्य्यस्तम्भकरं चैव कामलापाण्डुरोगनुत्।
सदा तु रमते नारीं न वीर्य्यं क्षयतां व्रजेत्॥ १५॥
प्रमेहं विविधं चैव विविधां ग्रहणीं तथा।
अनुपानविशेषेण सर्वव्याधिं विनाशयेत्॥ १६॥

इसके सेवनसे अनेक प्रकारके ज्वर, शुक्रगतज्वर और बहुत पुराना ज्वर शीघ्र नष्ट होता है। इसको व्यवहार करनेपर वैद्यको रोगके साध्यासाध्यका विचार नहीं करना चाहिये। यह लोह धातुगत ज्वर, भूतबाधाजनित व अधिक परिश्रमसे उत्पन्नहुए ज्वर और सन्निपातजनित असाध्यज्वरको इस प्रकार शीघ्र नष्ट करता है, जैसे सूर्यका उदय अन्धकारको तत्काल दूर करदेता है। जैसे गरुडको देखकर सर्प तत्क्षण भाग जाता है, उसी प्रकार इस लोहके प्रभावसे ज्वर शीघ्र भाग जाते हैं। यह अत्यंत बलदायक, पुष्टिकारक, प्रबल मन्दाग्नि, कामला और पाण्डुरोगको दूर करता है एवं वीर्यको स्तम्भन करता है। इसका सेवन करनेवाला पुरुष यदि सर्वदा स्त्रियोंके साथ रमण करे तो भी उसका वीर्यक्षय नहीं होता। इसको अनुपान विशेषके साथ सेवन करनेसे विविधप्रकारके प्रमेह तथा अनेक प्रकारकी संग्रहणी और अन्यान्य सर्व प्रकारकी व्याधियाँ नष्ट होती हैं॥ ११-१६॥

लोहासव।

लोहचूर्णं त्रिकटुकं त्रिफलं च यमानिका।
विडङ्गं मुस्तकं चित्रं चतुःसंख्यपलं क्षिपेत्॥ १७॥
चूर्णीकृत्य ततः क्षौद्रं चतुःषष्टिपलं पृथक्।
दद्याद्गुडतुलां तत्र जलद्रोणद्वयं तथा॥ १८॥
घृतभाण्डे विनिक्षिप्य निदध्यान्मासमात्रकम्।
लोहासवममुं मर्त्यः पिबेद्वह्निकरं परम्॥ १९॥
पाण्डुश्वयथुगुल्मानि जठराण्यर्शसां रुजम्।
ज्वरं जीर्णं च प्लीहानं कासं श्वासं भगन्दरम्॥
अरोचकं च ग्रहणीं हृद्रोगं च विनाशयेत्॥ ६२०॥

लोहेकी भस्म, सोंठ, मिरच, पीपल, हरड, बहेडा, आमला, अजवायन, बायविडङ्ग, नागरमोथा और चीता ये प्रत्येक औषधि सोलह २ तोले लेकर

सबको एकत्र चूर्ण करलेवे फिर शहद ६४ पल, गुड १०० पल और जल २ द्रोण परिमाण लेवे । सबको मिलाकर घीके चिकने बासनमें भरकर उसके मुँहको अच्छे प्रकार बन्दकरके एक महीने तक रक्खा रहने देवे । एक महीनेके बाद निकालकर इस आसवको छानकर उचितमात्रासे सेवन करे । यह लोहासव अग्निको अत्यन्त दीपन करता है एवं पाण्डु, सूजन गुल्म, उदरविकार, अर्श, जीर्णज्वर, तिल्ली, खाँसी, श्वास, भगन्दर, अरुचि, संग्रहणी, हृदयरोग, इत्यादि सम्पूर्ण उपद्रवोंको नष्ट करता है ॥ ६१८–६२० ॥

इति भैषज्यरत्नावल्यां रसप्रकरणम् ।

अथ घृतप्रकरणम् ।

ज्वराः कषायैर्वमनैर्लङ्घनैर्लघुभोजनैः ।
रूक्षस्य ये न शाम्यन्ति सर्पिस्तेषां भिषग्जितम् ॥ १ ॥

कषाय (क्वाथ आदि), वमन, लंघन और लघुभोजन आदिके द्वारा जिन रोगियोंका शरीर रूक्ष होगया है और ज्वर शान्त नहीं हुआ है उनके लिये घृतको सेवन कराना अत्यन्त लाभकर है ॥ १ ॥

निर्दशाहमपि ज्ञात्वा कफोत्तरमलङ्घितम् ।
न सर्पिः पाययेत् प्राज्ञः शमनैस्तमुपाचरेत् ॥ २ ॥
यावल्लघुत्वमशनं दद्यान्मांसरसेन तु ।
बलं ह्यलं निग्रहाय दोषाणां बलकृच्च तत् ॥ ३ ॥

यदि कफकी प्रधानता हो और दोषोंकी अधिकताके कारण लंघनका फल अच्छे प्रकारसे प्रकट न हुआ हो तो ज्वरके दश दिन बीत जानेपर भी बुद्धिमान् वैद्य रोगीको घृत पान नहीं करावे । किन्तु रोगीको शमन करनेवाली औषधियोंके द्वारा चिकित्सा करे और जबतक दोषोंमें लघुता न हो तबतक रोगीको मांसरसके साथ भोजन करावे । कारण मांसरस अत्यंत बलकारक और दोषोंका निग्रह करनेवाला है ॥ २ ॥ ३ ॥

मांसार्थमेणलावादीन् युक्त्या दद्याद् विचक्षणः ।
कुक्कुटांश्च मयूरांश्च तित्तिरिक्रौञ्चवर्तकान् ॥ ४ ॥
गुरूष्णत्वान्न शंसन्ति ज्वरे केचिच्चिकित्सकाः ।
लंघनेनानिलबलं ज्वरे यद्यधिकं भवेत् ॥

भिषङ् मात्राविकल्पज्ञो दद्यात्तानपि कालवित् ॥ ५ ॥

ज्वरसे पीडित रोगीको मांसरस देनेके लिये काले हिरन, लवापक्षीके मांसका यूष या मांसरस विधिपूर्वक बनाकर सेवन कराना चाहिये। कोई २ वैद्य मुर्गा, मोर, तीतर, क्रौंच (कुरर) और वत्तक इनका मांस गुरुपाकी और उष्णवीर्य्य होनेसे ज्वरमें पथ्यरूपसे देनेकी व्यवस्था नहीं करते हैं। ज्वरमें लंघनोंके द्वारा यदि वायुकी प्रसन्नता अधिक होगयी हो तो अनेक प्रकारकी कल्पनाओंके द्वारा मांसरसके अनेक संस्कार (जैसे मांसका अर्क, मांस यूष और मांसरसादि बनाकरके रोगीको सेवन करावे ॥ ४ ॥ ५ ॥

पिप्पल्यादिघृत ।

पिप्पली चन्दनं मुस्तमुशीरं कटुरोहिणी ।
कलिङ्गकास्तामलकी सारिवाऽतिविषा स्थिरा ॥ ६ ॥
द्राक्षामलकबिल्वानि त्रायमाणा निदिग्धिका ।
सिद्धमेतद् घृतं सद्यो ज्वरं जीर्णमपोहति ॥ ७ ॥
क्षयं श्वासं च हिक्कां च शिरःशूलमरोचकम् ।
अङ्गाभितापमग्निं च विषमं सन्नियच्छति ॥
पिप्पल्याद्यमिदं क्वापि तन्त्रे क्षीरेण पच्यते ॥ ८ ॥

पीपल, लालचन्दन, नागरमोथा, खस कुटकी, इन्द्रजौ, भुंईआमला, अनन्तमूल, अतीस, शालपर्णी, दाख, आमले, बेलकी छाल, त्रायमाण और कटेरी इन प्रत्येक औषधिके कल्क और क्वाथके द्वारा घृतको सिद्ध करे। यह घृत जीर्णज्वरको शीघ्र नष्ट करताहै एवं क्षय, श्वास, हिचकी, शिरकी पीडा, अरुचि, शरीरका सन्ताप और विषमाग्निको दूर करताहै। किसी किसी ग्रन्थमें इस पिप्पल्यादिघृतको दूधके द्वारा पकानेका विधान किया गया है ॥ ६–८ ॥

यत्राधिकरणे नोक्तिर्गणे स्यात् स्नेहसंविधौ ।
तत्रैव कल्कनिर्यूहाविष्येते स्नेहवेदिना ॥ ९ ॥
एतद्वाक्यबलेनैव कल्कसाध्यपरं घृतम् ॥ १० ॥
जलस्नेहौषधानां च प्रमाणं यत्र नेरितम् ।
तत्र स्यादौषधात् स्नेहः स्नेहात्तोयं चतुर्गुणम् ॥
द्रवकार्येऽप्यनुक्ते च सर्वत्र सलिलं मतम् ॥ ११ ॥

जिस स्नेहपाकमें कल्क और क्वाथका विधान नहीं किया गया हो, वहां स्नेह-विधिको जाननेवाले वैद्यको कल्क और क्वाथ दोनों लेने चाहिये । इस वाक्यके अनुसार घृतको कल्कके द्वारा सिद्ध करे । जहाँ जल, स्नेह और औषधियोंका प्रमाण नहीं कहा हो, वहाँ औषधियोंसे स्नेहपदार्थ चौगुना और स्नेहपदार्थसे चौगुना जल लेना चाहिये और जहाँपर किसी द्रवपदार्थ (दूध, दही, काँजी और क्वाथ) का उल्लेख नहीं किया हो, वहाँ सब जगह जल लेना चाहिये ॥ ९-११ ॥

क्षीरषट्पलकघृत ।

पञ्चकोलैः ससिन्धूत्थैः पलिकैः पयसा समम् ।
सर्पिःप्रस्थं शृतं प्लीहविषमज्वरगुल्मनुत् ॥ १२ ॥

पीपल, पीपलामूल, चव्य, चीता, सोंठ और सैंधानमक ये प्रत्येक औषधि चार चार तोले लेकर इनका कल्क और क्वाथ बनाकर उस क्वाथ और कल्कके-साथ १ प्रस्थ घी और उसके समान दूध लेकर सबको एकत्र मिला उत्तम प्रकारसे घृतको सिद्ध करे । यह घृत प्लीहा, विषमज्वर और गुल्मरोगको नष्ट करता है ॥ १२ ॥

यत्र द्रवान्तरेऽनुक्ते क्षीरमेव चतुर्गुणम् ।
द्रवान्तरेण योगे हि क्षीरं स्नेहसमं भवेत् ॥ १३ ॥

स्नेहशब्दमें जहाँ किसी द्रवपदार्थका विधान नहीं किया हो, वहाँ चौगुना दूध लेना चाहिये । यदि स्नेहपाकमें किसी द्रव्यपदार्थका विधान हो तो स्नेहके समान भाग दूध डालकर पाक करना चाहिये ॥ १३ ॥

दशमूलषट्पलकघृत ।

दशमूलीरसे सर्पिः सक्षीरे पंचकोलकैः ।
सक्षारैर्हन्ति तत् सिद्धं ज्वरकासाग्निमन्दताम् ॥
वातपित्तकफव्याधीन् प्लीहानं चापि पाण्डुताम् ॥ १४ ॥

चार प्रस्थ दशमूलके क्वाथ और १ प्रस्थ दूधके साथ पीपलामूल, चव्य, चीता, सोंठ और जवाखार प्रत्येकका कल्क चार चार तोले डालकर यथाविधि एक प्रस्थ घृतको सिद्ध करे । यह घृत ज्वर, खाँसी, मन्दाग्नि, त्रिदोषजनित रोग, प्लीहा और पाण्डुरोगको नष्ट करता है ॥ १४ ॥

वासाद्यघृत ।

वासां गुडूचीं त्रिफलां त्रायमाणां यवासकम् ।
पक्त्वा तेन कषायेण पयसा द्विगुणेन च ॥ १५ ॥
पिप्पलीमूलमृद्वीकाचन्दनोत्पलनागरैः ।
कल्कीकृतैश्च विपचेद् घृतं जीर्णज्वरापहम् ॥ १६ ॥

अडूसा, गिलोय, हरड, आमला, बहेडा, त्रायमाण और जवासा यह सब औषधि समान भाग और सब मिलीहुई १ प्रस्थ लेकर ८ प्रस्थ जलमें क्काथ बनावे और २ प्रस्थ जल शेष रहनेपर उसमें ४ प्रस्थ दूध तथा पीपलामूल, दाख, लाल-चन्दन, नीलकमल और सोंठ इन सबका दो दो तोले कल्क डालकर उत्तम प्रकारसे घृतको सिद्ध करे । इस घृतको सेवन करनेसे जीर्णज्वर शीघ्र दूर होता है ॥ १५ ॥ १६ ॥

गुडूच्यादिघृत ।

गुडूच्याः क्काथकल्काभ्यां त्रिफलाया वृषस्य च ।
मृद्वीकाया बलायाश्च सिद्धाः स्नेहा ज्वरच्छिदः ॥ १७ ॥

गिलोय, त्रिफला, अडूसा, दाख और खिरैंटी इन पाँचों औषधियोंके क्काथ और कल्कके द्वारा पृथक् २ सिद्ध किये हुए पाँच प्रकारके घृत ज्वरनाशक हैं ॥ १७ ॥

इति भैषज्यरत्नावल्यां घृतप्रकरणम् ।

अथ तैलप्रकरणम् ।

अभ्यङ्गांश्च प्रदेहांश्च सस्नेहान् सावगाहनान् ।
विभज्य शीतोष्णकृतान् दद्याज्जीर्णज्वरे भिषक् ॥ १ ॥
तैराशु प्रशमं याति बहिर्मार्गगतो ज्वरः ।
लभन्ते सुखमङ्गानि बलं-वर्णश्च जायते ॥ २ ॥

वैद्य जीर्णज्वरमें तैलादिकी मालिश, प्रलेप, स्नेहपान और स्नेहादि पदार्थोंमें अवगाहन आदि क्रियाओंको शीत और उष्णताका विभाग करके अर्थात् उष्ण प्रधानज्वरमें शीत तैलादिका और शीतप्रधानज्वरमें उष्ण तैलादिका प्रयोग करे । इन सब क्रियाओंके द्वारा शरीरके बाहिरीभागमें स्थित ज्वर नष्ट होता है और शरीरमें स्वस्थता एवं बल, वर्णकी वृद्धि होती है ॥ १ ॥ २ ॥

अंगारकतैल ।

मूर्वा लाक्षा हरिद्रे द्वे मञ्जिष्ठा सेन्द्रवारुणी ।
बृहती सैन्धवं कुष्ठं रास्ना मांसी शतावरी ॥ ३ ॥
आरनालाढकेनैव तैलप्रस्थं विपाचयेत् ।
तैलमङ्गारकं नाम सर्वज्वरविनाशनम् ॥ ४ ॥

मूर्वा, लाख, हल्दी, दारुहल्दी, मंजीठ, इन्द्रायन, बड़ी कटेरी, सेंधानमक, कूठ, रायसन, बालछड़ और शतावर इनके समान भाग मिश्रित ६४ तोले कल्क और एक आढक कांजीके साथ एक प्रस्थ तैलको पकावे । यह अङ्गारकनामक तैल सब प्रकारके ज्वरोंको दूर करता है ॥ ३ ॥ ४ ॥

बृहदङ्गारकतैल ।

शुष्कमूलादिकस्याङ्गैरङ्गारकस्य च ।
पक्वं तैलं ज्वरहरं शोथपाण्ड्वामयापहम् ॥
बृहदङ्गारकं तैलं जलमत्र चतुर्गुणम् ॥ ५ ॥

शुष्क मूलादि गण (सूखीमूली, पुनर्नवा, देवदारु, रायसन, सोंठ) और पूर्वोक्त अंगारक तैलकी औषधियोंका समान कल्क १ प्रस्थ, तिलका तैल २ प्रस्थ और पाकके लिये जल ८ प्रस्थ इन सबको मिलाकर उत्तम विधिसे तैलको पकावे । यह बृहदंगारक तैल-ज्वर, सूजन, पाण्डु आदि रोगोंको दूर करता है ॥ ५

लाक्षादितैल ।

लाक्षाहरिद्रामंजिष्ठाकल्कैस्तैलं विपाचितम् ।
षड्गुणेनारनालेन दाहशीतज्वरापहम् ॥ ६ ॥

लाख, हल्दी और मंजीठ इन तीनोंका कल्क १ प्रस्थ, कांजी १२ प्रस्थ, तिलका तेल २ प्रस्थ इन सबको मिलाकर उत्तम विधिसे तैलको पकावे । इस तैलकी मालिश करनेसे दाह और शीतयुक्त ज्वर नष्ट होता है ॥ ६ ॥

महालाक्षादितैल ।

लाक्षारसाढके प्रस्थं तैलस्य विपचेद् भिषक् ।
मस्त्वाढकसमायुक्तं पिष्ट्वा चात्र समावपेत् ॥ ७ ॥
शतपुष्पां हरिद्रां च मूर्वां कुष्ठं हरेणुकम् ।
कटुकां मधुकं रास्नामश्वगन्धां च दारु च ॥ ८ ॥

मुस्तकं चन्दनं चैव पृथगक्षसमानकैः ।
द्रव्यैरेतैस्तु तत् सिद्धम्-

लाखका रस एक आढक, तिलका तैल १ प्रस्थ, दहीका तोड़ १ आढक तथा सोया, हल्दी, मूर्वा, कूठ, रेणुका, कुटकी मुलहठी, रायसन, असगन्ध, देवदारु, नागरमोथा और लालचन्दन इन प्रत्येकका कल्क दो दो तोले सबको एकत्र मिलाकर यथाविधि तैलको पकावे ॥ ७ ॥ ८ ॥-

-अभ्यङ्गान्मारुतापहम् ॥ ९ ॥
विषमाख्यान् ज्वरान् सर्वानाश्वेव प्रशमं नयेत् ।
कासं श्वासं प्रतिश्यायं कण्डूदौर्गन्ध्यगौरवम् ॥ १० ॥
त्रिकपृष्ठकटीशूलं गात्राणां कुट्टनं तथा ।
पापालक्ष्मीप्रशमनं सर्वग्रहविनाशनम् ॥
अश्विभ्यां निर्म्मितं श्रेष्ठं तैलं लाक्षादिकं महत् ॥ ११ ॥

इस तैलकी मालिश करनेसे वातविकार, सब प्रकारके विषमज्वर, खाँसी, श्वास, प्रतिश्याय, खुजली, दुर्गन्ध, गुरुता, त्रिकशूल, पृष्ठशूल, कटिशूल, शरीरका टूटना, पाप, अलक्ष्मी और सर्वप्रकारकी ग्रहबाधादि उपद्रव दूर होते हैं । इस महालाक्षादिक श्रेष्ठ तैलको अश्विनीकुमारोंने निर्माण किया है ॥ ९-११ ॥

लाक्षायाः षड्गुणं तोयं दत्त्वैकविंशवारकम् ।
परिस्राव्य जलं ग्राह्यं किंवा क्वाथंयथोदितम् ॥ १२ ॥
शुष्कद्रव्यमुपादाय स्वरसानामसंभवे ।
वारिण्यष्टगुणे साध्यं ग्राह्यं पादावशेषितम् ॥ १३ ॥

इसमें लाख १ भाग और जल ६ भाग लेने चाहिये तथा लाखको २१ बार जलमें भिगोकर बारबार उसके रंगको निचोड़कर लाखके जलको ग्रहण करे अथवा, लाखका क्वाथ बनाकर तैलको सिद्ध करे । सूखी औषधियोंमेंसे स्वरस नहीं मिल सकता । इसलिये उनको अठगुने जलमें पकाकर उनका चतुर्भागावशिष्ट क्वाथ ग्रहण करना चाहिये ॥ १२ ॥ १३ ॥

षड्कट्वरतैल ।

सुवर्च्चिकानागरकुष्ठमूर्वालाक्षानिशालोहितयष्टिकाभिः ।
तैलं ज्वरे षड्गुणतक्रसिद्धमभ्यञ्जनाच्छीतविदाहनुत्स्यात् ॥

१ दध्नः ससारकस्यात्र तक्रं कट्वरमिष्यते ।दहीकी मलाईसहित तक्रको कट्वर कहते हैं ।

सज्जी, सोंठ, कूठ, मूर्वा, लाख, हल्दी, मंजीठ और मुलहठी इन सबको मिला हुआ कल्क १ प्रस्थ, तिलका तेल २ प्रस्थ, कट्वरतक १२ प्रस्थ इन सबको एकत्र मिलाकर विधिपूर्वक तेलको सिद्ध करे। इस तेलकी मालिश करनेसे शीत और दाह सहित ज्वर नष्ट होता है ॥ १४ ॥

महाषट्कट्वरतैल ।

शुक्तारनालैर्दधिमस्तुतक्रैः फलाम्बुभागेन समं हि तैलम् ।
कृष्णादिकल्कैर्मृदुवह्निसिद्धमभ्यञ्जनं वातकफज्वराणाम् ॥ १५ ॥
ऐकाहिकद्वित्रिचतुर्थकानां मासार्द्धमासद्वयमासिकानाम् ।
निवारणं तद्विषमज्वराणां तैलं तु षट्कट्वरकं महत्स्यात् ॥

सिरका, काँजी, दहीका तोड़, तक्र और जम्बीरीनींबुका रस ये प्रत्येक चार २ प्रस्थ और तिलका तैल भी चार प्रस्थलेवे। एवं कल्कके लिये निम्नलिखित कृष्णादि-गणकी औषधियाँ लेवे। सबको एकत्र मिलाकर मन्दमन्द अग्निसे तैलको सिद्ध करे। यह महाषट्कट्वरतैल शरीरपर मालिश करनेसे वात-कफ-जन्यज्वर, ऐकाहिक, द्व्याहिक, तृतीयक, चातुर्थिक, पाक्षिक, मासिक, द्विमासिक और सब प्रकारके विषमज्वरोंको शीघ्र निवारण करताहै ॥ १५ ॥ १६ ॥

बृहत् पिप्पल्यादितैल ।

पिप्पली मुस्तकं धान्यं सैन्धवं त्रिफला वचा ।
यमानी चाजमोदा च चन्दनं पुष्कराह्वयम् ॥ १७ ॥
शठी द्राक्षा गवाक्षी च शालपर्णी त्रिकण्टकम् ।
भूनिम्बारिष्टपत्राणि महानिम्बं निदिग्धिका ॥ १८ ॥

---

१ कृष्णा चित्रकमद्ग्रन्था वासकं विकसा घनम् ।
ग्रन्थिकैले चातिविषा रेणुकं च कटुत्रयम् ॥
यमानी गोस्तनी व्याघ्री भूनिम्बं बिल्वचन्दनम् ।
भार्ङ्गी श्यामा शिवा धात्री स्थिरा मूर्वा सजीरका ॥
सर्षपं हिंगु कटुकी विडंगं च समांशकम् ।
एष कृष्णादिको नाम गणो ज्वरविनाशनः ॥

पीपल, चीतेकी जड़, वच, अडूसा, मजीठ, नागरमोथा, पीपलामूल, इलायची, अतीस, रेणुका, सोंठ, पीपल, मिरच, अजवायन, दाख, कटेरी, चिरायता, बेलकी छाल लालचन्दन, भारंगी, अनन्तमूल, हरड़, आमला शालपर्णी, मूर्वा, जीरा, सरसों, हींग, कुटकी और बायबिडंग इन सब औषधियोंके समानभाग मिश्रित समुदायको कृष्णादिगण कहते हैं। यह गण सर्व प्रकारके ज्वरोंको नष्ट करनेवालाहै ॥

गुडूची पृश्निपर्णी च बृहती दन्तिचित्रकौ ।
दार्वी हरिद्रा वृक्षाम्ल पर्पटं गजपिप्पली ॥ १९ ॥
एतेषां कार्षिकैः कल्कैस्तैलप्रस्थं विपाचयेत् ।
दधिकाञ्जिकतक्रैश्च मातुलुंगरसैस्तथा ॥ २० ॥
स्नेहमात्रासमैरेभिः शनैर्मृद्वग्निना पचेत् ।
सिद्धमेतत् प्रयोक्तव्यं जीर्णज्वरमपोहति ॥ २१ ॥
एकजं द्वन्द्वजं चैव दोषत्रयसमुद्भवम् ।
सन्ततं सततान्येद्युस्तृतीयकचतुर्थकान् ॥ २२ ॥
मासजं पक्षजं चैव चिरकालानुबन्धिनम्
सर्वांस्तान्नाशयत्याशु पिप्पल्याद्यमिदं शुभम् ॥ २३ ॥

पीपल, नागरमोथा, धनियां, सैंधानमक, हरड, आमला, बहेडा, बच, अजवायन, अजमोद, लालचन्दन, पुहकरमूल, कचूर, दाख, इन्द्रायनकी जड़, शालपर्णी, गोखरू, चिरायता, नीमके पत्ते, बकायनकी छाल, कटेरी, गिलोय, पृश्निपर्णी, बड़ीकटेरी दन्तीकी जड़, चीतेकी जड़, दारुहल्दी, हल्दी, अम्लवेत, पित्तपापडा और गजपीपल इन प्रत्येक औषधिका कल्क एक एक कर्ष, तिलका तैल एक प्रस्थ एवं दहीका तोड़, कांजी, मट्ठा और बिजौरेनींबूका रस ये प्रत्येक एक एक प्रस्थ लेवे । सबको एकत्र मिलाकर मन्दमन्द अग्निसे शनैः शनैः तेलको सिद्ध करे । इस तेलकी मालिश करनेसे जीर्णज्वर दूर होता है । यह पिप्पल्यादि तैल एकदोषज, द्विदोषज, त्रिदोषजज्वर, द्व्याहिक, तृतीयक (तिजारी), चातुर्थिक (चौथिया), मासिक, पाक्षिक, सन्तत-ज्वर, सततज्वर और बहुत पुरानेज्वर इन सबको तत्काल नष्ट करता है ॥१७-२३॥

किराताद्यितैल ।

मूर्वा लाक्षा हरिद्रे द्वे मञ्जिष्ठा सेन्द्रवारुणी ।
ह्रीबेरं पुष्करं रास्ना कपिवल्ली वटुत्रयम् ॥ २४ ॥
पाठा चेन्द्रयवैश्चैव लवणत्रयसंयुतम् ।
वासकार्क श्यामदारु महाकालफलं तथा ॥ २५ ॥
दधिमस्त्वारनालेन कैरातेन च संपचेत् ।
प्रस्थंप्रस्थं समादाय तैलप्रस्थे विपाचयेत् ॥ २६ ॥

मूर्वा, लाख, हल्दी, दारुहल्दी, मंजीठ, इन्द्रायनकी जड, सुगंधवाला, पुहकरमूल, रायसन, गजपीपल, सोंठ, पीपल, मिरच, पाड, इन्द्रजौ, सैंधानमक, कालानमक, विडनमक, अडूसाकी छाल, सफेद आककी जड, अनन्तमूल, देवदारु और बडी इन्द्रायनके फल इन सब ओषधियोंका कल्क दो दो तोले एवं दहीका पानी, कौंजी, चिरायतेका क्वाथ और सरसोंका तेल ये प्रत्येक एक एक प्रस्थ लेवे. सबको एकत्र मिलाकर यथाविधि तेलको सिद्ध करे ॥ २५-२६ ॥

लिप्तं शुक्तं ज्वरं चैव सन्ततं सततं तथा ।
धातुस्थमस्थिमज्जास्थं ज्वरं सर्वं व्यपोहति ॥ २७ ॥
कामलां ग्रहणीं घोरामतिसारं हलीमकम् ।
प्लीहं पाण्डुं च श्वयथुं नाशयेन्नात्र संशयः ॥
नास्ति तैलं वरं चास्माज्ज्वरदर्पकुलान्तकृत् ॥ २८ ॥

इस तैलको मर्दन और पान प्रयोग करनेसे सन्तत, सतत, धातुगत, अस्थिमज्ज, मज्जागत ज्वर एवं अन्य सर्वप्रकारके ज्वर, कामला, संग्रहणी, अतिसार, हलीमक, प्लीहा, पाण्डुरोग और सूजन ये समस्तरोग नष्ट होते हैं । ज्वररूपी हाथीके दर्पको दलन करनेवाला इससे बढकर और कोई उत्तम तैल नहीं है ॥२७-२८॥

बृहत्किरातादितैल ।

कैरातस्य तुलामानं जलद्रोणे विपाचयेत् ।
कटुतैलस्य (पा) मात्रार्द्धं तेनैव साधयेद्भिषक् ॥ २९ ॥
मूर्वालाक्षाद्वयक्वाथः कांजिकं दधिमस्तु च ।
एतानि तैलतुल्यानि कल्कानेतांश्च संपचेत् ॥ ३० ॥
भूनिम्बः श्रेयसी रास्ना कुष्ठं लाक्षेन्द्रवारुणी ।
मञ्जिष्ठा च हरिद्रे द्वे मूर्वा मधुकमुस्तकम् ॥ ३१ ॥
वर्षाभूः सैन्धवं मांसी बृहती च तथा विडम् ।
ह्रीबेरं शतमूली च चन्दनं कटुरोहिणी ॥ ३२ ॥
हयगन्धा शताह्वा च रेणुका सुरदारु च ।
उशीरं पद्मकं धान्यं पिप्पली च वचा शठी ॥ ३३ ॥
फलत्रिकं यमान्यौ द्वे शृङ्गी गोक्षुर एव च ।
पर्ण्यौ द्वे तरुणीमूलं विडङ्गं जीरकद्वयम् ॥ ३४ ॥

महानिम्बश्च हबुषा यवक्षारो महौषधम् ।
एषां कर्षद्वयं क्षिप्त्वा साधयेन्मृदुवह्निना ॥ ३५ ॥

चिरायतेको सौ पल प्रमाण लेकर एक द्रोण जलमें पकावे । चतुर्थांश शेष रहनेपर उतारकर छान लेवे । फिर उस क्वाथमें सरसोंका तेल चार सेर एवं मूर्वा और लाखका क्वाथ, कांजी और दहीका तोड ये प्रत्येक चार चार सेर तथा चिरायता, गजपीपल, रायसन, कूठ, लाख, इन्द्रायनकी जड, मंजीठ, हल्दी, दारुहल्दी, मूर्वा, मुलहठी, नागरमोथा, पुनर्नवा, सैंधानमक, बालछड, बडीकटेरी, चिरिया नमक, सैंचरनमक, सुगन्धवाला, सतावर, लालचन्दन, कुटकी, असगंध, सोया, रेणुका, देवदारु, खस, पद्माख, धनियाँ, पीपल, वच, कचूर, हरड, आमला, बहेडा, अजवायन, अजमोद, काकडासिंगी, गोखरू, शालपर्णी, पृश्निपर्णी, दन्तीकी जड, वायविडंग, जीरा, कालाजीरा, बकायनकी छाल, हाऊबेर, जवाखार और सोंठ इन सब औषधियोंका कल्क दो दो कर्ष प्रमाण लेवे । सबको एकत्र मिलाकर विधिसे मन्द मन्द अग्निद्वारा पकावे ॥ २९–३५ ॥

यथाऽहिवर्गं विनिहन्ति तार्क्ष्यो
यथा च भास्वांस्तिमिरस्य संघम् ।
तथैव सर्वं ज्वरवर्गमेत-
दभ्यङ्गमात्रेण निहन्ति तैलम् ॥ ३६ ॥

सन्ततं सततादींश्च सशोथान् विषमज्वरान् ।
प्लीहाश्रितान् सशोथान् वा प्रमेहं ज्वरमेव च ॥ ३७ ॥
अग्निं च कुरुते दीप्तं बलवर्णकरं परम् ।
पाण्ड्वादीन् हन्ति रोगांश्च किराताद्यमिदं बृहत् ॥३८॥

जिस प्रकार गरुड सर्पोंके समूहको और सूर्यका प्रकाश जैसे अन्धकारपुञ्जको नष्ट करदेताहै उसी प्रकार यह तेल मालिश करते ही सर्वप्रकारके ज्वरोंको नष्ट करता है. एवं सन्तत, सतत, शोथसहित विषमज्वर, प्लीहायुक्त ज्वर, प्रमेह, ज्वर, पाण्डुआदिरोगोंको यह बृहत्किरादितैल नष्ट करताहै तथा अग्निको दीपन करताहै और बल वर्णकी वृद्धि करता है ॥३६–३८ ॥

ज्वरभैरवतैल ।

गुडूची वासको निम्बो मूर्वामूलं सचन्दनम् ।
कैरातो यवतिक्ता च सिन्दुवारदलानि च ॥ ३९ ॥

एषां पलशतं ग्राह्यं जलद्रोणे विपाचयेत्।
क्वाथैः पादावशिष्टैश्च तैलप्रस्थद्वयं पचेत् ॥ ४० ॥
गुडूच्यतिविषा दारु हरिद्रे द्वे सुपर्णिका।
पिप्पली पिप्पलीमूलं शिग्रुबीजं स्थिरा जतु ॥ ४१ ॥
पटोलं धान्यकं कुष्ठं किरातो हेमपुष्पकः।
मूर्वामूलमश्वगन्धा सरलं कण्टकारिका ॥ ४२ ॥
एतैः सार्द्धपलोन्मानैः कल्कैस्तैलं विपाचयेत्।
पाकार्थं दीयते तत्र पयः प्रस्थचतुष्टयम् ॥ ४३ ॥
सिद्धमेतत् प्रयोक्तव्यं जीर्णज्वरमपोहति।
विषमाख्यान् ज्वरान्सर्वान्प्लीहानं यकृतं तथा ॥ ४४ ॥
कामलां पाण्डुरोगं च शोथं हन्ति न संशयः।
ज्वरभैरवनामेदं तैलं शिवकृतं महत् ॥ ४५ ॥

गिलोय, अडूसा, नीमकी छाल, मूर्वाकी जड, लालचन्दन, चिरायता, कल्पनाथ और सम्हालूके पत्ते इन सबको सौ सौ पल लेकर एक द्रोण जलमें पकावे। जब पककर चौथाई भाग जल शेष रहजावे तब उतारकर छानलेवे। फिर उस काथमें तिलका तैल दो प्रस्थ एवं गिलोय, अतीस, देवदारु, हल्दी, दारुहल्दी, बावची, पीपल, पीपलामूल, सहिंजनेके बीज, शालपर्णी, लाख, परवल, धनियाँ, कूठ, चिरायता, चम्पा, मूर्वाकी जड, असगन्ध, धूपसरल और कटेरी इन सब ओषधियोंका कल्क दो दो तोले और पाकके लिये जल चार प्रस्थ डालकर उत्तमप्रकारसे तैलको सिद्ध करे। इस तैलका प्रयोग करनेसे जीर्णज्वर दूर होता है। यह (बृहत्) ज्वरभैरवनामक तैल सर्वप्रकारके विषमज्वर, तिल्ली, यकृत, कामला, पाण्डुरोग और सूजनको अवश्य नष्ट करता है ॥ ३९-४५ ॥

घीको मूर्च्छित करनेकी विधि।

पथ्याधात्रीविभीतैर्जलधररजनीमातुलुंगद्रवैस्तु
सर्वैरेतैः सुपिष्टैश्च पलपरिमितैर्मन्दमन्दानलेन।
आज्यं प्रस्थं विफेनं परिचपलगतं मूर्च्छयेद्वैद्यराज-
स्तस्मादामोपदोषं हरति च सहसा वीर्यवत्सौख्यदायि ४६

हरड, आमला, बहेडा, नागरमोथा, हल्दी और बिजौरेनींबूका रस ये छहों

पदार्थ घृतको मूर्च्छित करनेवाले हैं। यह प्रत्येक एकएक पल परिमाण लेवे। प्रथम एकप्रस्थ गोघृतको मन्दमन्द अग्निसे पकावे। जब पकते पकते घृत झागरहित और शब्दरहित होजाय तब नीचे उतारकर उसमें पहिले हल्दी फिर बिजौरे नींबूका रस पश्चात् अन्य औषधियाँ शीतलजलमें पीसकर डालदेवे। फिर चार प्रस्थ जल डालकर मन्द २ अग्निसे पकाकर एक सप्ताहपर्यन्त रखारहनेदेवे। इस प्रकार मूर्च्छित किया हुआ घृत आमदोषको नष्ट करता है और वीर्यवान् एवं सुखदायक होता है॥ ४६॥

तैलकी साधारणमूर्च्छाविधि।

कृत्वा तैलं कटाहे दृढतरविमले मन्दमन्दानलैस्त-
त्तैलं निष्फेनभावं गतमिह च यदा शैत्ययुक्तं तदैतत् ॥ ४७॥

पहले एक उत्तम कढावमें मीठी २ अग्निसे तैलको पकावे। जब वह तैल झागरहित होजाय, तब उसको चूल्हेपरसे उतारकर कुछ शीतल होनेपर उसमें जलसे पिसी हुई हल्दी क्रम २ से थोडी २ डाले। फिर मँजीठको जलमें पीसकर क्रमसे थोडा २ तैलमें डाले। फिर इसी प्रकार अन्यान्य मूर्च्छाद्रव्योंको क्रमसे तैलमें डालताजाय फिर एक सप्ताहतक उसको रखारहनेदे। इस प्रकार साधारणरूपसे तैल मूर्च्छित होता है॥ ४७॥

कटुतैलमूर्च्छाविधि।

वयःस्थारजनीमुस्तबिल्वदाडिमकेशरैः।
कृष्णजीरकह्रीवेरनलिकैः सविभीतकैः॥ ४८॥
एतैः समांशैः प्रस्थे च कर्षमात्रं प्रयोजयेत्।
अरुणाद् द्विपलं तत्र तोयं चाढकसंमितम्॥
कटुतैलं पचेत्तेन ह्यामदोषहरं परम्॥ ४९॥

आमला, हल्दी, नागरमोथा, बेलकी छाल, दाडिमकी छाल, नागकेशर, कालाजीरा, सुगन्धवाला, नली (सुगन्धद्रव्य), बहेडा और मंजीठ ये कटुतैल (सरसोंके तैल) के मूर्च्छाद्रव्य हैं। इन सब औषधियोंको एकएक कर्ष प्रमाण और मंजीठ दो पल लेवे। एवं सरसोंका तैल एक प्रस्थ और जल एक आढक लेवे। प्रथम तैलको मन्दमन्द अग्निसे पकावे। जब तैल पककर झागरहित होजाय तब उसमें पहिले हल्दी, फिर मंजीठ, तत्पश्चात् आमले आदि औषधियोंके चूर्णको शीतल जलमें पीसकर डालदेवे। यह तैल आमदोषको नष्ट करता है॥ ४८॥ ४९॥

एरण्डतैलकी मूर्च्छाविधि ।

त्रिकसा मुस्तकं धान्यं त्रिफला वैजयन्तिका ।
ह्रीबेरवनखर्ज्जूरं वटशुंगा निशायुगम् ॥ ९० ॥
नलिका भेषजं देयं केतकी च समं समम ।
प्रस्थे देयं शाणमितं मूर्च्छने दधि कांजिकम् ॥ ९१ ॥

मंजीठ, नागरमोथा, धनियाँ, हरड, आमला, बहेडा, अरणीके पत्ते, सुगन्धवाला, बनखजूर, बडके अंकुर, हल्दी, दारुहल्दी, नली (सुगन्धद्रव्य), सोंठ, केवडेकी जड, दही और काँजी ये सब औषधियाँ मूर्च्छाके लिये दो माशे लेवे और अण्डीका तैल एक प्रस्थ लेवे। सबको एकत्र मिलाकर पूर्वोक्त विधिसे पकाकर मूर्छित करे ॥ ९० ॥ ९१ ॥

तिलके तैलकी मूर्च्छाविधि ।

कृत्वा तैलं कटाहे दृढतरविमले मन्दमन्दानलैस्त-
त्तैलं निष्फेनभावं गतमिह च यदा शैत्ययुक्तं तदैव ।
मञ्जिष्ठारात्रिलोध्रैर्जलधरनलिकैः सामलैः साक्षपथ्यैः
सूचीपुष्पाग्निनीरैरुपहितमथितैर्गन्धयोगं जहाति ॥ ९२ ॥
तैलस्येन्दुकलांशकैकविकसाभागोऽपि मूर्च्छाविधौ
ये चान्ये त्रिफलापयोदरजनीह्रीबेरलोध्रान्विताः ।
सूचीपुष्पवटावरोहनलिकास्तस्याश्च पादांशका
दुर्गन्धं विनिहन्ति तैलमरुणं सौरभ्यमाकुर्वते ॥ ९२ ॥

अत्यन्त दृढ और साफ कडावमें तैलको डालकर मन्द २ अग्निसे पकावे। जब पककर तैल झागरहित होजाय तब चुल्हेपरसे उतार लेवे। फिर शीतल हो जानेपर उसमें हल्दीको शीतल जलमें पीसकर छोडे फिर मंजीठको जलमें पीसकर डाले तत्पश्चात् लोध, नागरमोथा, नली (सुगन्धद्रव्य), आमले, बहेडे, हरड, केवडेकी जड और सुगंधवाला इन सब औषधियोंके चूर्णको जलमें पीसकर तैलमें डालदेवे। फिर मूर्च्छाद्रव्योंसे चौगुने तैलमें उससे चौगुना पानी डालकर उसको पकावे। जब पककर कुछेक जल बाकी रहजाय तब उतारकर एक सप्ताहतक उसीप्रकार रक्खा रहनेदेवे। इन हल्दी और मंजीठ आदि पदार्थोंको मूर्च्छाद्रव्य कहते हैं। इनका परिमाण इस प्रकार है–तैलका परिमाण जितना हो मंजीठका परिमाण उसका

सोलहवाँ अंश लेवे और अन्यान्य द्रव्य मंजीठसे चौथाई भाग लेवे अर्थात् तैल सोलह सेर हो तो मंजीठ एक सेर लेवे और त्रिफलेसे लेकर नलिकातक प्रत्येक पदार्थ एकएक पाव लेवे। मूर्च्छापाकके द्वारा तैलकी दुर्गंध दूर होकर वह तैल उत्तमगन्ध और लालवर्णवाला होजाता है ॥ ९२ ॥ ९३ ॥

तैलादिके पकानेका समय।

घृततैलगुडादींश्च नैकाहादवतारयेत्।
व्युषितास्तु प्रकुर्वन्ति विशेषेण गुणान् यतः ॥ ९४ ॥

घी, तैल और गुडादिका पाक एकदिनमें ही समाप्त न करे। कारण ये द्रव्य बासी होकर ही विशेष गुण करते हैं ॥ ९४ ॥

पाकसिद्धिलक्षण।

स्नेहकल्को यदाऽङ्गुल्या वर्त्तितो वर्त्तिवद्भवेत्।
वह्नौ क्षिप्ते च नो शब्दस्तदा सिद्धिं विनिर्दिशेत् ॥९५॥
शब्दव्युपरमे प्राप्ते फेनस्योपरमे तथा।
गन्धवर्णरसादीनां सम्पत्तौ सिद्धिमादिशेत् ॥ ९६ ॥

घी और तैलादिके पकानेका कल्क जब अंगुलियोंसे मलनेपर उसकी बत्तीसी होजाय और घृत वा तैलको अग्निमें डालनेसे उसमें चरचरशब्द न हो तब स्नेहादिका पाकहुआ जानना चाहिये। और स्नेहपाकके समय जो तैल घृतादिमें एक प्रकारका शब्द और फेनोद्गम (झागोंका आना) होता है, उसके शान्त होनेपर एवं स्नेहमें डालेहुए पदार्थोंके गन्ध, वर्ण और रस स्नेहपदार्थमें उत्तमप्रकारसे मिलजानेपर घृत तैलादिक सिद्ध हुआ जानना चाहिये ॥ ९५ ॥ ९६ ॥

जीर्णज्वरमें पेयादि देनेकी अवधि।

ज्वरे पेयाः कषायाश्च सर्पिः क्षीरं विरेचनम्।
षडहे षडहे देयं कालं वीक्ष्यामयस्य च ॥ ९७ ॥

ज्वरमें काल (ऋतु) और रोगकी अवस्थाका विचारकर ज्वरके आरंभक दिनसे लेकर छः दिनके बाद रोगीको पेया, कषाय (क्वाथ), घी, दूध और मृदुविरेचनकी औषधि देवे ॥ ९७ ॥

ज्वरमें संशोधन।

ज्वरिभ्यो बहुदोषेभ्य ऊर्ध्वं चाधश्च बुद्धिमान्।
दद्यात्संशोधनं काले कल्पे यदुपदेक्ष्यते ॥ ९८ ॥

बुद्धिमान् वैद्य अत्यन्त बढेहुए वात, पित्त और कफादिदोषोंसे युक्त ज्वररोगीको वमन और विरेचनके योग्य अवस्था होजानेपर चरकके कल्पस्थानमें वमन और विरेचन औषधियोंकी जो विधि कही है तदनुसार रोगीको वमन और विरेचन देकर शुद्ध करे । किन्तु दोषोंकी अल्पावस्थामें वमन और विरेचन नहीं देवे ॥ ५८ ॥

ज्वरमें वमन ।

मदनं पिप्पलीभिर्वा कलिङ्गैर्मधुकेन वा ।
युक्तमुष्णाम्बुना पेयं वमनं ज्वरशान्तये ॥ ५९ ॥

कफप्रधान ज्वरमें पीपल और मैनफलके चूर्णको, दाहयुक्त ज्वरमें इन्द्रजौके चूर्णके साथ मैनफलके चूर्णको और पित्तज्वरमें मुलहठीके चूर्णके साथ मैनफलके चूर्णको गरम जलके साथ ज्वरकी शान्तिके लिये वमन करानी चाहिये ॥ ५९ ॥

ज्वरमें विरेचन ।

आरग्वधं वा पयसा मृद्वीकानां रसेन वा ।
त्रिवृतां त्रायमाणां वा पयसा ज्वरितः पिबेत् ॥ ६० ॥

अमलतासके गूदेको दूधके साथ अथवा दाखोंके क्वाथके साथ अथवा निसोतके चूर्ण या त्रायमाणके चूर्णको दूधके साथ पान कराकर ज्वररोगीको विरेचन करावे ॥ ६० ॥

ज्वरसे क्षीणहुए मनुष्यको वमन विरेचनकी विधि ।

ज्वरक्षीणस्य न हितं वमनं न विरेचनम् ।
कामं तु पयसा तस्य निरूहैर्वा हरेन्मलान् ॥ ६१ ॥
प्रयोजयेज्ज्वरहरान् निरूहान् सानुवासनान् ।
पक्वाशयगते दोषे वक्ष्यन्ते येन सिद्धिषु ॥ ६२ ॥

ज्वरसे क्षीण हुए मनुष्यको वमन और विरेचन नहीं कराने चाहिये । यदि दस्त करानेकी विशेष आवश्यकता हो तो रोगीको गरम दूध अधिक परिमाणमें पान कराकर अथवा निरूहणवस्ति देकर दस्त करावे । पक्वाशयमें दोषोंके प्राप्त होनेपर चरकके सिद्धिस्थानमें कहीहुई ज्वरनाशक निरूहणवस्ति अथवा अनुवासनवस्तिके द्वारा दोषोंको शमन करे ॥ ६१ ॥ ६२ ॥

ज्वरमें शिरोविरेचन ।

गौरवे शिरसः शूले विबद्धेष्विन्द्रियेषु च ।
जीर्णज्वरे रुचिकरं दद्याच्छीर्षविरेचनम् ॥ ६३ ॥

जीर्णज्वरमें रोगीके शिरमें भारीपन और पीडा हो एवं समस्त इन्द्रियोंमें शिथिलता हो तो कोई उत्तम नस्य प्रयोग करना चाहिये। इससे कफके निकल जानेपर शिरकी पीडा दूर होजाती है ॥ ६३ ॥

ज्वरमें शिरपीडानिवारक लप।

रक्तकरवीरपुष्पं धात्रीफलं सधान्याम्लम्।
कल्कः सुखोष्णलेपाज्ज्वरेषु शिरसो रुजं जयति ॥ ६४ ॥

लालकनेरके फूल और आमले इन दोनोंको समान भाग लेकर काँजीके साथ पीसकर और कुछ गरम करके सुहाता २ शिरपर लेप करनेसे ज्वरमें उत्पन्न हुई शिरकी पीडा नष्ट होती है ॥ ६४ ॥

इति भैषज्यरत्नावल्यां तैलप्रकरणम् ॥

अथ दुग्धप्रकरणम्।

जीर्णज्वरे कफे क्षीणे क्षीरं स्यादमृतोपमम्।
तदेव तरुणे पीतं विषवद्धन्ति मानवम् ॥ १ ॥
चतुर्गुणेनाम्भसा च शृतं ज्वरहरं पयः।
धारोष्णं वा पयः शीतं पीतं सद्यो ज्वरं जयेत् ॥ २ ॥

जीर्णज्वरमें कफके क्षीण होजानेपर दुग्ध पान करनेसे वह अमृतके समान गुण करता है। किन्तु नवीनज्वरमें पान कियाहुआ दुग्ध मनुष्यको विषके समान नष्ट कर देताहै। चौगुने जलके साथ दूधको पकाकर जब केवल दूधमात्र शेष रहजाय तब उतारकर उसको पान करनेसे अथवा धारोष्ण (तत्कालका दुहा हुआ) या पकाकर शीतल कियाहुआ पीनेसे ज्वर शान्त होता है। इस प्रकार पिया हुआ दूध ज्वरमें हितकारी है ॥ १ ॥ २ ॥

जीर्णज्वराणां सर्वेषां पयः प्रशमनं परम्।
पेयं तदुष्णं शीतं वा यथास्वमौषधैः शृतम् ॥ ३ ॥

सब प्रकारके जीर्णज्वरोंमें ज्वरनाशक औषधियोंके साथ पकायाहुआ दूध गरम अथवा शीतल करके रोगीको इच्छानुसार पान कराना चाहिये। इससे ज्वर शमन होता है ॥ ३ ॥

कासाच्छ्वासाच्छिरःशूलात्पार्श्वशूलाच्चिरज्वरात्।
मुच्यते ज्वरितः पीत्वा पञ्चमूलीशृतं पयः॥ ४॥

लघुपंचमूलकी औषधियोंके द्वारा दूधको सिद्ध करके पीनेसे खाँसी, श्वास, शिरःशूल, पार्श्वशूल और बहुत पुराने दिनोंका ज्वर नष्ट होता है॥ ४॥

क्षीरपाकविधि।

द्रव्यादष्टगुणं क्षीरं क्षीरात्तोयं चतुर्गुणम्।
क्षीरावशेषः कर्तव्यः क्षीरपाके त्वयं विधिः॥ ५॥

क्षीरपाककी विधि यह है कि, जिस औषधिके साथ दुग्धपाक करना हो तो उस औषधिसे अठगुना दूध और दूधसे चौगुना जल लेकर सबको एकत्र कर पकावे। जब पककर दूधमात्र शेष रहजाय तब उतारकर छान लेवे॥ ५॥

त्रिकण्टकबलाव्याघ्रीगुडनागरसाधितम्।
वर्चोमूत्रविबन्धघ्नं शोथज्वरहरं पयः॥ ६॥

गोखरू, खिरैंटी, कटेरी और सोंठ इन औषधियोंके द्वारा यथाविधि सिद्ध किये हुए दूधमें गुड डालकर पान करनेसे मल-मूत्रका अवरोध और सूजनसहित ज्वर दूर होता है॥ ६॥

वृश्चीरबिल्ववर्षाभूः पयश्चोदकमेव च।
पचेत्क्षीरावशिष्टं तु तद्धि सर्वज्वरापहम्॥ ७॥

सफेद पुनर्नवा, बेलकी छाल और लालपुनर्नवा ये सब औषधि समान भाग और सब मिलाकर दो तोले, दूध १६ तोले और जल ६४ तोले लेकर सबको एकत्रकर पकावे। जब पककर दूधमात्र शेष रहजाय तब उतारकर छानलेवे। इस दूधको पान करनेसे सर्वप्रकारके ज्वर शमन होते हैं॥ ७॥

शीतं चोष्णं ज्वरे क्षीरं यथास्वमौषधैः शृतम्।
एरण्डमूलसिद्धं वा ज्वरे सपरिकर्तिके॥ ८॥

पित्तज्वरमें और वातपित्तज्वरमें शीतल दुग्ध तथा वातज्वर और वातकफज्वरमें उष्ण दुग्ध वातनाशक औषधियोंके साथ पकाकर सेवन कराना चाहिये। एवं ज्वररोगके गुदामें कतरनेकी समान पीडा होनेपर अण्डकी जडके साथ सिद्ध कियाहुआ दुग्ध पान कराना चाहिये॥ ८॥

नासाज्वरमें आहवारि रस

क्षुद्रैला साभया कृष्णा लौहाभ्रखर्पराणि च।
समभागं प्रकर्तव्यं द्विभागः पारदो मतः॥ ९॥

सर्वमेकत्र सम्मर्द्य द्रोणपुष्परसेन च ।
वल्लमात्रं प्रदातव्यं पुनर्नवरसैर्युतम् ॥ १० ॥

छोटी इलायची, हरड, पीपल, लोहा, अभ्रक और खपरिया ये प्रत्येक एक एक तोला और पारा दो तोले लेवे । सबको एकत्र द्रोणपुष्पीके रसमें खरल करके दो रत्तीकी गोलियाँ बनालेवे इनमेंसे एक एक गोली पुनर्नवेके रसके साथ सेवन करावे ॥ ९ ॥ १० ॥

प्लीहानं यकृतं शोथमग्निमान्द्यमरोचकम् ।
नासाज्वरं विशेषेण सर्वं च विषमज्वरम् ॥
आहवारिरसो ह्येष नाशयेदविकल्पतः ॥ ११ ॥

यह आहवारिनामक रस—प्लीहा, यकृत्, शोथ, अग्निकी मंदता, अरुचि, नासाज्वर और विशेषकर सब प्रकारके विषमज्वरोंको निस्सन्देह नष्ट करता है ॥ ११ ॥

गन्धककज्जलीविधि ।

कण्टकारी सिन्धुवारस्तथा पूतिकरञ्जकम् ।
एतेषां रसमादाय कृत्वा खर्परखण्डके ॥ १२ ॥
प्रक्षेप्यं गन्धकं तत्र ज्वालां मृद्वग्निना दहेत् ।
गन्धके स्नेहमापन्ने तत्समं पारदं क्षिपेत् ॥ १३ ॥
मिश्रीकृत्य ततो द्राभ्यां द्रुतं तमवतारयेत् ।
आमर्दयेत्तथा तत्र यथा स्यात्कज्जलप्रभम् ॥ १४ ॥

कटेरी, सिम्हालू और दुर्गन्धकरञ्ज इनके स्वरसको समान भाग लेकर एक मिट्टीके नवीन पात्र (खीपडे) में रखकर उसमें गन्धकको डाल मन्द मन्द अग्निसे पकावे । जब गन्धक अच्छे प्रकारसे पिघलजाय तब उसमें गन्धकके समान भाग पारा डालदेवे फिर जब दोनों मिलकर एकमएक होजायं तब चूल्हेपरसे शीघ्र उतारकर लोहेके दण्डेसे खुब खरल करके कज्जलीसमान बनालेवे ॥ १२–१४ ॥

ततस्तु रक्तिकामस्य माषैकं जीरकस्य च ।
माषैकं लवणस्यापि पर्णं कृत्वा निधापयेत् ॥ १५ ॥
ज्वरे त्रिदोषजे घोरे जलमुष्णं पिबेदनु ।
छर्द्यां शर्करया दद्यात् सामे दद्यात्तथा गुडम् ॥ १६ ॥

क्षये छागीभवं क्षीरं प्रदद्यादनुपानकम् ।
रक्तातिसारे कुटजमूलवल्कलजं रसम् ॥ १७ ॥
रक्तवान्तौ तथा दद्यादुदुम्बरभवं जलम् ।
सर्वव्याधिहरश्चायं गन्धकः कज्जलीकृतः ।
आयुर्वृद्धिकरश्चैव मृतं चापि प्रबोधयेत् ॥ १८ ॥

पश्चात् इस कज्जलीका एकएक रत्तीकी मात्रासे एकएक माशा जीरे और सैंधानमकके चूर्णके साथ एक पानमें रखकर रोगीको सेवन करावे । भयंकर सन्निपातज्वरमें इसपर गरम जलका अनुपान करे । इस कज्जलीको वमन रोगमें खाँडके शर्बतके साथ और आमदोषमें पुराने गुडके साथ देवे । एवं क्षयमें बकरीका दूध, रक्तातिसारमें कुडेकी छालका रस या काढा और रक्तकी वमन होनेपर गूलरके क्वाथका अनुपान करे । यह कज्जली सर्वप्रकारकी दुस्तर व्याधियोंको हरती है एवं आयुकी वृद्धिकर मृतपुरुषकोभी जीवित करती:है ॥ १५–१८ ॥

ज्वरबलि ।

ज्वरामयगृहीतस्य मुष्टिभिर्नवभिः कृतम् ।
तण्डुलैरोदनं तेन कुर्यात् पुत्तलकं शुभम् ॥ १९ ॥
तं हरिद्रावलिप्ताङ्गं चतुःपीतध्वजान्वितम् ।
हरिद्रारसपूर्णाभिः पुटिकाभिश्चतसृभिः ॥ २० ॥
मण्डितं गन्धपुष्पाद्यैरवकीर्य्य विसर्ज्जयेत् ।
एवं दिनत्रयं कुर्यात् ज्वररोगोपशान्तये ॥ २१ ॥

" ओदनेन पुत्तलिकां निर्माय वीरणचाचिकायां संस्थाप्य हरिद्राभिरवलिप्य चतुःपीतपताकाभिरलंकृत्य गन्धपुष्पाद्यैरवकीर्य्य हरिद्रारसपूर्णाश्चतस्रः पुटिकाश्चतुष्कोणेषु संस्थाप्य विष्णुर्नमोऽद्येत्यादिना संकल्प्य ज्वरं ध्यात्वा समावाह्य नवकपर्दकाक्रीडगन्धपुष्पधूपदीपादिभिः सम्पूज्य सन्ध्यासमये ज्वरितं निर्मञ्छ्य मन्त्रमिमं पठित्वा दिनत्रयबलिं दद्यात् । मन्त्रो यथा–" ॐ नमो भगवते गरुडासनाय त्र्यम्बका । स्वस्त्यस्तु वस्तुतः स्वाहा । ॐ कँ टँ पँ शँ वैनतेयाय नमः । ॐ ह्रीं क्षः

क्षेत्रपालाय नमः। ॐ ह्रीं ठँ ठ भो भो ज्वर शृणु शृणु हल हल गर्ज गर्ज ऐकाहिकं द्व्याहिकं त्र्याहिकं चातुर्थिकम् अर्द्धमासिकं मासिक नैमेषिक मौहूर्त्तिकं फट्फट् ह्रीं फट् फट् हल हल मुञ्च मुञ्च भूम्यां गच्छ स्वाहा।" इति पठित्वा एकवृक्षे श्मशाने चतुष्पथे वा विसर्जयेत्। एतत् कर्म्म वास्तु-शुचिदक्षिणप्रदेशे कुर्य्यात् ॥ २२ ॥"

ज्वररोगीके हाथकी नौ मुट्ठी परिमाण चावल लेकर और भात बनाकर उसका सुन्दर पुतला बनावे। उसको खसके आसनपर स्थापन करके उसपर हल्दीका लेपकर दे और उसके चारों ओर पीले वस्त्रकी चार झंडियें लगावे। फिर उस पुतलेके सर्वांगमें गन्ध पुष्पादि चढाकर हल्दीके रससे भरेहुए चार घडे उसके चारों कोनोंमें रखदेवे। फिर " ॐ विष्णुः ३ नमः परमात्मनेऽद्य " इत्यादि संकल्प कर और ज्वरकी मूर्त्तिका ध्यान तथा आवाहन करके उसमें नौ कौडियें लगाकर गन्ध, अक्षत, पुष्प, धूप, दीपादिके द्वारा उसकी यथाविधि पूजा करे और सायं-कालके समय उस पुतलेको रोगीके ऊपर उतारकर उपर्युक्त 'ॐ नमो भगवते' इत्यादि मन्त्रको पढकर बलि देवे। इस प्रकार यह कर्म रोगीके रहनेके घरके दक्षिण ओर पवित्र स्थानमें सन्ध्याके समय क्रमशः ३ दिनतक करे। पश्चात् उस मूर्त्तिको किसी एक वृक्षके नीचे या श्मशानमें अथवा चौराहेमें विसर्जन कर देवे ॥ १९-२२ ॥

नक्षत्रजनितरोगफल।

कृत्तिकायां यदा व्याधिरुत्पन्नो भवति स्वयम्।
नवरात्रं भवेत् पीडा त्रिरात्रं रोहिणीषु च ॥ २३ ॥
मृगशीर्षे पञ्चरात्रमार्द्रायां मुच्यतेऽसुभिः।
पुनर्वसौ तथा पुष्ये सप्तरात्रेण मोचनम् ॥ २४ ॥
नवरात्रं तथाऽऽश्लेषे श्मशानान्तं मघासु च।
द्वौ मासौ पूर्वफाल्गुन्यामुत्तरासु त्रिपञ्चकम् ॥ २५ ॥
हस्ते च सप्तमे मोक्षश्चित्रायामर्द्धमासकम्।
मासद्वयं तथा स्वात्यां विशाखे दिनविंशतिः ॥ २६ ॥
मित्रे चैव दशाहानि ज्येष्ठायामर्द्धमासकम्।
मूले न जायते मोक्षः पूर्वाषाढे त्रिपञ्चकम् ॥ २७ ॥

उत्तरे दिनविंशत्या द्वौ मासौ श्रवणे तथा ।
धनिष्ठायामर्द्धमासो वारुणे च दशाहकम् ॥ २८ ॥
भाद्रपदे देव्येकोनविंशतिवासरम् ।
त्रिपक्षं चाहिर्बुध्न्ये च रेवत्यां दशरात्रकम् ॥ २९ ॥
अहोरात्रं तथाऽश्विन्यां भरण्यां तु गतायुषम् ।
एवं क्रमेण जानीयान्नक्षत्रेषु यथोचितम् ॥ ३० ॥

कृत्तिका नक्षत्रमें उत्पन्न हुआ रोग ९ दिन, रोहिणी नक्षत्रमें उत्पन्न हुआ रोग ३ दिन और मृगशिरा नक्षत्रमें उत्पन्न हुआ रोग ५ दिनतक रहता है एवं आर्द्रा नक्षत्रमें रोगके उत्पन्न होनेपर रोगी मृत्युको प्राप्त होता है। पुनर्वसु और पुष्यनक्षत्रमें उत्पन्नहुआ रोग सात दिनमें एवं आश्लेषानक्षत्रमें उत्पन्न हुआ रोग ९ दिनमें दूर होता है । मघानक्षत्रमें रोगके उत्पन्न होनेपर रोगी मरजाता है । पूर्वाफाल्गुनी-नक्षत्रमें उत्पन्न हुआ रोग २ महीनेतक, उत्तराफाल्गुनीमें १५ दिनतक, हस्तनक्षत्रमें ७ दिनतक, चित्रामें १५ दिनतक स्वातीमें २ मासतक, विशाखामें २० दिनतक, अनुराधामें १० दिनतक और ज्येष्ठानक्षत्रमें १५ दिनतक रहता है। मूलनक्षत्रमें रोग होनेपर रोगी रोगसे मुक्त नहीं होता और पूर्वाषाढा नक्षत्रमें रोग होनेपर १५ दिनमें, उत्तराषाढा नक्षत्रमें २० दिनमें, श्रवण नक्षत्रमें दो महीने, धनिष्ठा नक्षत्रमें १५ दिन, शतभिषा नक्षत्रमें १० दिन, पूर्वाभाद्रपदा नक्षत्रमें १९ दिन, उत्तराभाद्रपदा नक्षत्रमें ४५ दिन, रेवती नक्षत्रमें १० दिन, अश्विनी और भरणी नक्षत्रमें रोग उत्पन्न हो तो रोगीको एक दिनरातमें मृत्यु हो जाती है । इस क्रमसे नक्षत्रोंमें उत्पन्न हुए रोगके यथोचित फलाफलको जानना चाहिये ॥ २३-३० ॥

ज्वरमुक्तके लक्षण ।

स्वेदो लघुत्वं शिरसः कण्डूपाकौ मुखस्य च ।
क्षवथुश्चान्नलिप्सा च ज्वरमुक्तस्य लक्षणम् ॥ ३१ ॥

पसीनेका आना, शरीरमें हल्कापन, शिरमें खुजली, मुखपर फुंसियोंका निकलना, छींकोंका आना और भोजनमें इच्छा होना ये सब लक्षण ज्वरके दूर होनेके हैं ॥ ३१ ॥

ज्वरमुक्त रोगीको वर्जनीय पदार्थ ।

व्यायामं च व्यवायं च स्नानं चंक्रमणानि च ।
ज्वरमुक्तो न सेवेत यावन्न बलवान् भवेत् ॥ ३२ ॥

ज्वर दूर होनेके पश्चात् रोगी जबतक अच्छे प्रकारसे बलवान् न होजाय तबतक परिश्रम, स्त्रीसहवास, स्नान और अधिक भ्रमण ये सब त्यागने चाहिये ॥ २२ ॥

इति भैषज्यरत्नावल्यां दुग्धप्रकरणम् ।

अथ पथ्यापथ्यविधिः ।

नवीनज्वरमें अपथ्य ।

स्नानं विरेकं सुरतं कषायं व्यायाममभ्यञ्जनमह्नि निद्राम् ।
दुग्धं घृतं वैदलमामिषं च तक्रं सुरां स्वादु गुरु द्रवं च ॥
अन्नं प्रवातं भ्रमणं च क्रोधं त्यजेत्प्रयत्नात्तरुणज्वरार्त्तः ॥१॥

स्नान, विरेचन, मैथुन, कषायरसवाले पदार्थ, व्यायाम (कसरत आदि परिश्रम), तैलकी मालिश, दिनमें सोना, दूध, घी, दाल, मांस, मट्ठा, मदिरा, मधुररसवाले पदार्थ, भारी और पतले पदार्थ, अन्न, पूर्वदिशाकी वायु अथवा प्रबलवायु इनका सेवन,भ्रमण और क्रोध इन सबको नवीनज्वरवाला रोगी अवश्य त्याग देवे १

मध्यज्वरमें पथ्य ।

पुरातनाः षष्टिकशालयश्च वार्ताकुशोभाञ्जनकारवेल्लम् ।
वेत्राग्रमोचाऽथ फलं पटोलं कर्कोटकं मूलकपूतिके च ॥ २ ॥
मुद्गैर्मसूरैश्चणकैः कुलत्थैर्मकुष्ठकैर्षां विहितश्च यूषः ।
पाठामृतावास्तुकतण्डुलीयजीवन्तिशाकानि च काकमाची ३
द्राक्षाकपित्थानि च दाडिमानि वैकंकतान्येव पचेलिमानि ।
लघूनि सात्म्यानि च भेषजानि पथ्यानि मध्यज्वरिणाममूनि४

पुराने साठीके चावल और शालिधानोंके चावल, बैंगन, सहिंजना करेला, बेंतके अंकुर, केलेका मोचा अथवा फल, परवल, ककोडा, मूली, पोईका साग, मूंग, मसूर, चने, कुलथी और मोठ इनका यूष, एवं पाढ, गिलोय, बथुएका शाक, चौलाई, जीवन्तीका शाक, मकोय, दाख, कैथ, अनार और कण्टाई आदि पके- हुए फल एवं हलकी और सात्म्य (स्वभावानुकूल) औषधियों मध्यज्वरमें हितकर हैं ॥ २–४ ॥

पुराने ज्वरमें पथ्य ।

विरेचनं छर्दनमञ्जनं च नस्यं च धूमोऽप्यनुवासनं च ।
शिराव्यधः संशमनं प्रदेहोऽभ्यङ्गावगाहः शिशिरोपचारः ॥६॥

एणः कुलिङ्गो हरिणो मयूरो लावः शशस्तित्तिरिकुक्कुटो च।
क्रौञ्चः कुरङ्गः पृषतश्चकोरः कपिञ्जलो वर्तककालपुच्छौ ॥ ६ ॥
गवामजायाश्च पयो घृतं च हरीतकी पर्वतनिर्झराम्भः।
एरण्डतैलं सितचन्दनं च द्रव्याणि सर्वाणि पुरेरितानि।
ज्योत्स्नाप्रियालिंगनमप्यथं स्याद्गणः पुराणज्वरिणां सुखाय ७

विरेचन (जुल्लाब), वमन, अंजन, नस्य, धूम्रपान, अनुवासनवस्ती, शिराका बेधना. संशमन औषधियोंका सेवन, प्रलेप, तैलादिकी मालिश, जलमें घुसकर स्नान करना, सर्व प्रकारके शीतल उपचार, कालाहिरन, चिडा, हरिण, मोर, लवा, खरगोश, तीतर, मुर्गा, (एक प्रकारका बगुला), एक विशेष प्रकारका हिरन-चितकबराहिरन, चकोर, चातक, बत्तक और कालपुच्छ इन सब पशुपक्षियोंका मांस या मांसरस एवं गौ और बकरीका दूध, घी, हरड, पहाडी झरनोंका जल, अण्डीका तैल, सफेद चंदन और पहिले कहेहुए सब पदार्थ तथा निर्मल चन्द्रमाकी चांदनी, सुन्दरस्त्रीका आलिंगन आदि पुराने ज्वरमें हितकर हैं ॥१-७॥

ज्वरमें अपथ्य।

वमिवेगं दन्तकाष्ठमसात्म्यमतिभोजनम्।
विरुद्धान्यन्नपानानि विदाहीनि गुरूणि च ॥ ८ ॥
दुष्टाम्बु क्षारमम्लानि पत्रशाकं विरूढकम्।
नक्ताम्बु च ताम्बूलं कालिन्दं लैकुचं फलम् ॥ ९ ॥
ओडीमत्स्यं च पिण्याकं छत्रकं पिष्टवैकृतम्।
अभिष्यन्दीनि चैतानि ज्वरितः परिवर्जयेत ॥ १० ॥
व्यायामं च व्यवायं च स्नानं चंक्रमणानि च।
ज्वरमुक्तो न सेवेत यावन्नो बलवान् भवेत ॥ ११ ॥

वमनके वेगको रोकना, दतौन करना, अपने स्वभावके विरुद्ध भोजन अथवा अत्यन्त भोजन, विरुद्ध (प्रकृति, देश और कालके प्रतिकूल) दाहकारक और गुरुपाकी अन्नपान, दूषितजल, खारी और खट्टेरसवाले पदार्थ, पत्तोंवाले और अंकुरोंवाले शाक, नीम, पान, तरबूज, निंबुके फल, ओडीनामक मछली, तिलकुट, छत्रक (साँपकी छतरी) का शाक. पिट्टीके बने (पक्वान्न, मिष्टान्नादि) पदार्थ, विकृत और अभिष्यन्दकारक (शरीरके स्रोतोंको बन्द करनेवाले) पदार्थोंको ज्वररोगी

त्यागदेवे । एवं परिश्रम, स्त्रीप्रसंग, स्नान और भ्रमणादिकर्मोंको ज्वररोगी जबतक अच्छे प्रकारसे बलवान् न होजाय तबतक कदापि न करे ॥ ८–११ ॥

आरोग्यस्नानकाल ।

धनिष्ठा श्रवणा स्वाती ज्येष्ठा शतभिषा तथा ।
रविमन्दभौमवाराश्चन्द्रोऽशुभविवर्जितः ॥ १२ ॥
केन्द्रस्थाश्चाशुभाः शस्ता व्यतीपातादिवासराः ।
तिथिर्न शस्ता प्रतिपत्तृतीया नवमी तथा ॥ १३ ॥
स्नानाय रोगमुक्तानां दशमी च त्रयोदशी ।
बुधेन्दुगुरुशुक्राणां वाराः स्नाने न शोभनाः ॥
रोगान्मुक्तस्य नाश्लेषा रोहिणी भद्रदायिनी ॥ १४ ॥

धनिष्ठा, श्रवण, स्वाती, ज्येष्ठा और शतभिषा इन नक्षत्रों एवं रविवार, शनिवार और मंगलवारोंमें यदि चन्द्रमा शुभ हो और केन्द्रस्थानमें न गया हो तो रोगीको रोगमुक्त होनेपर आरोग्यस्नान कराना चाहिये । इसमें व्यतीपातादिके दिनभी श्रेष्ठ मानेगये हैं । प्रतिपदा, तृतीया, नवमी, दशमी और त्रयोदशी इन तिथियों तथा बुध, सोम, बृहस्पति और शुक्र इन वारोंको रोगसे मुक्त हुए रोगीको स्नान करानेके लिये त्यागदेवे । एवं आश्लेषा रोहिणी और भद्रायुक्त तिथि भी आरोग्यस्नान करनेवाले रोगीके लिये वर्जित हैं ॥ १२–१४ ॥

इति भैषज्यरत्नावल्यां ज्वरचिकित्सा ।

अथ ज्वरातिसार-चिकित्सा ।

पित्तज्वरे पित्तभवोऽतिसार-
स्तथाऽतिसारे यदि वा ज्वरः स्यात् ।
दोषस्य दूष्यस्य समानभावाद्
ज्वरातिसारः कथितो भिषग्भिः ॥ १ ॥

यदि पैत्तिकज्वरमें पित्तकी गरमीके कारण अतिसार (दस्त) हो अथवा अतिसाररोगमें ज्वर होजाय तो दोष और दूष्यकी समानता होनेके कारण इससे मिलित रोगको वैद्यलोग ज्वरातिसार कहते हैं ॥ १ ॥

ज्वरातिसारयोरुक्तं भेषजं यत् पृथक् पृथक् ।
न तन्मिलितयोः कुर्य्यादन्योन्यं वर्द्धयेद्यतः ॥ २ ॥
प्रायो ज्वरहरं भेदि स्तम्भनं त्वतिसारनुत् ।
अतोऽन्योन्यविरुद्धत्वाद्वर्द्धनं तत्परस्परम् ॥
ततस्तौ प्रतिकुर्वीत विशेषोक्तैश्चिकित्सितैः ॥ ३ ॥

ज्वर और अतिसार रोगमें जो जो पृथक् पृथक् औषधियाँ कही हैं, ज्वरातिसार-रोगमें वे औषधियाँ मिलाकर नहीं देना चाहिये। कारण-वे आपसमें विरोधी हैं अर्थात् ज्वरनाशक औषधियाँ प्रायः भेदक होती हैं और अतिसारनाशक औषधियाँ प्रायः मलस्तम्भक होती हैं। इसलिये दोनों प्रकारकी औषधियाँ परस्पर विरुद्ध गुणोंवाली होनेसे एक दूसरे रोगोंको बढाती हैं। अतएव ज्वरातिसाररोगमें उक्त दोनों प्रकारकी औषधियोंका प्रतिकार कर जो विशेष चिकित्सा कही है, उसीके अनुसार वैद्योंको चिकित्सा करनी चाहिये ॥ २ ॥ ३ ॥

ज्वरातिसारिणामादौ कुर्य्याल्लङ्घनपाचने ।
प्रायस्तावामसम्बन्धं विना न भवतो यतः ॥ ४ ॥
ज्वरातिसारे पेयादिक्रमः स्याल्लंघिते हितः ।
ज्वरातिसारी पेयां वा पिबेत्साम्लां शृतां नरः ॥ ५ ॥

ज्वरातिसारके रोगीको पहिले लंघन करावे फिर पाचक औषधि देवे। कारण दोनों रोग प्रायः आम रसके बिना उत्पन्न नहीं होते हैं। ज्वरातिसारमें लंघन करानेके बाद पेयादि देना हितकर है। इसमें रोगीको अनार आदि खट्टेरसवाले पदार्थोंके रसके द्वारा पेया बनाकर पान कराना चाहिये ॥ ४ ॥ ५ ॥

ह्रीबेरादि।

ह्रीबेरातिविषामुस्तबिल्वनागरधान्यकैः ।
पिबेत् पिच्छाविबन्धघ्नं शूलदोषामपाचनम् ॥
सरक्तं हन्त्यतीसारं सज्वरं वाथ विज्वरम् ॥ ६ ॥

सुगन्धवाला, अतीस, नागरमोथा, बेलकी जड, सोंठ और धनियाँ इनका क्वाथ सेवन करनेसे मलकी पिच्छिलता, विबन्ध और शूल नष्ट होते हैं तथा आमदोषका परिपाक होकर रक्तातिसार, ज्वरातिसार अथवा केवल अतिसार रोग दूर होवाहै ॥ ६ ॥

पाठादि।

पाठामृतापर्पटमुस्तविश्वाकिराततिक्तेन्द्रयवान् विपच्य।
पिबन् हरत्येव हरेत सर्वान् ज्वरातिसारानपि दुर्निवारान् ॥७॥

पाढ, गिलोय, पित्तपापडा, नागरमोथा, सोंठ, चिरायता और इन्द्रजौ इनका यथा विधि क्वाथ बनाकर पान करनेसे तत्काल ही दुस्तर ज्वरातिसार नष्ट होते हैं ॥७॥

नागरादि।

नागरातिविषामुस्तभूनिम्बामृतवत्सकैः।
सर्वज्वरहरः क्वाथः सर्वातीसारनाशनः ॥ ८ ॥

सोंठ, अतीस, नागरमोथा, चिरायता, गिलोय और कुडेकी छाल इनका क्वाथ सर्वप्रकारके अतिसारको नष्ट करताहै ॥ ८ ॥

उशीरादि।

उशीरं बालकं मुस्तं धन्याकं विश्वभेषजम्।
समङ्गा धातकी लोध्रं बिल्वं दीपनपाचनम् ॥ ९ ॥
हन्त्यरोचकपिच्छामविबन्धं सातिवेदनम्।
सशोणितमतीसारं सज्वरं वाऽथ विज्वरम् ॥ १० ॥

खस, सुगन्धवाला, नागरमोथा, धनियाँ, सोंठ, वाराहक्रान्ता, (लज्जाव धायके फूल, लोध और बेलकी गिरी इनका क्वाथ दीपन और पाचन है। इस क्वाथको पान करनेसे अरुचि, पिच्छिलता, मलबद्धता, पीडासहित रक्तातिसार, ज्वररहित या ज्वरसहित अतिसार दूर होता है ॥ ९ ॥ १० ॥

शुण्ठीदशमूल।

दशमूलीकषायेण विश्वमक्षसमं पिबेत्।
ज्वरे चैवातिसारे च सशोथे ग्रहणीगदे ॥ ११ ॥

अतिसार और शोथयुक्त संग्रहणीरोगमें दशमूलके क्वाथमें थोडा सोंठका चूर्ण डालकर पान करनेसे शीघ्र लाभ होता है ॥ ११ ॥

गुडूच्यादि।

गुडूच्यतिविषाधान्यशुण्ठीबिल्वाब्दबालकैः।
पाठाभूनिम्बकुटजचन्दनोशीरपद्मकैः ॥ १२ ॥
कषायः शीतलः पेयो ज्वरातीसारशान्तये।
हृल्लासारोचकच्छर्दिपिपासादाहशान्तिकृत् ॥ १३ ॥

गिलोय, अतीस, धनियाँ, सोंठ, बेलकी गिरी, नागरमोथा, सुगन्धवाला, पाढ, चिरायता, कुडेकी छाल, लालचन्दन, खस और पद्माख इनका शीतल क्वाथ पान करनेसे ज्वरातिसार, उबकाई, अरुचि, वमन, प्यास और दाह शान्त होती है॥१२॥१३॥

कलिङ्गादि।

कलिङ्गाऽतिविषा शुण्ठी किराताम्बु यवासकम्।
ज्वरातीसारसन्तापं नाशयेदविकल्पतः॥ १४॥

इन्द्रजौ, अतीस, सोंठ, चिरायता, सुगन्धवाला और धमासा इनका क्वाथ पान करनेसे ज्वर और अतिसार निस्सन्देह दूर होता है॥ १४॥

घनजलादि।

घनजलपाठातिविषापथ्योत्पलधान्यरोहिणीविश्वैः।
सेन्द्रयवैः कृतमम्भः सातीसारं ज्वरं जयति॥ १५॥

नागरमोथा, सुगन्धवाला, पाढ, अतीस, हरड, नीलकमल, धनियाँ, कुटकी, सोंठ, इन्द्रजौ इनका क्वाथ बनाकर पानकरनेसे अतिसारसहित ज्वर दूर होता है॥ १५॥

धान्यनागरादि।

धान्यनागरबिल्वाब्दबालकैः साधितं जलम्।
आमशूलहरं ग्राह्यं दीपनं पाचनं परम्॥ १६॥

धनियाँ, सोंठ, बेलकी गिरी, नागरमोथा और सुगन्धवाला इनका बनाया हुआ क्वाथ आम और शूलको हरनेवाला, संग्राही एवं दीपन और पाचक है॥ १६॥

बिल्वादि।

बिल्वबालकभूनिम्बगुडूचीमुस्तवत्सकैः।
कषायः पाचनः शोथज्वरातीसारनाशनः॥ १७॥

बेलगिरी, सुगन्धवाला, चिरायता, गिलोय, नागरमोथा और इन्द्रजौ इनका क्वाथ आमपाचक एवं सूजन और ज्वरातिसारको हरनेवाला है॥ १७॥

कुटजादि।

कुटजो नागरं मुस्तममृताऽतिविषा तथा।
एभिः कृतं पिबेत्क्वाथं ज्वरातीसारनाशनम्॥ १८॥

कुडेकी छाल, सोंठ, नागरमोथा, गिलोय और अतीस इनके द्वारा बनाया हुआ क्वाथ पान करनेसे ज्वरातीसार शमन होता है॥ १८॥

पाठादि ।

पाठेन्द्रभूनिम्बघनामृतानां सपर्पटैः क्वाथ इहैव शस्तः ।
आमातिसारं च जयेद् द्रुतं वा ज्वरेण युक्तं सहजं च तीव्रम् ॥१९

पाढ, इन्द्रजौ, चिरायता, नागरमोथा, गिलोय और पित्तपापड़ा इनका क्वाथ सेवन करनेसे ज्वरयुक्त तीव्र और सहज आमातिसाररोग तत्काल नष्ट होता है ॥ १९ ॥

किरातादि ।

किराताब्दामृताविश्वचन्दनोदीच्यवत्सकैः ।
शोथातिसारशमनं विशेषाज्ज्वरनाशनम् ॥ २० ॥

चिरायता, नागरमोथा, गिलोय, सोंठ, लालचन्दन, सुगन्धवाला और इन्द्रजौ इनका क्वाथ सूजन, अतिसार और विशेषकर ज्वरको नष्ट करता है ॥ २० ॥

विडङ्गादि ।

विडङ्गातिविषामुस्तं पाठा दारु कलिङ्गकम् ।
मरिचेन समायुक्तं शोथातीसारनाशनम् ॥२१॥

वायविडङ्ग, अतीस, नागरमोथा, पाढ, देवदारु और इन्द्रजौ इनके क्वाथमें कालीमिर्चोंका चूर्ण मिलाकर पान करनेसे सूजन और अतिसार दूर होता है ॥ २१ ॥

शुण्ठ्यादि ।

शुण्ठीवालकमुस्तं बिल्वं पाठा विषा च धान्यानि ।
पानकमरुचिच्छर्दिज्वरातिसारं विनाशयति ॥ २२ ॥

सोंठ, सुगन्धवाला, नागरमोथा, बेलगिरी, पाढ, अतीस और धनियाँ इनका क्वाथ पानकरनेसे अरुचि, वमन, ज्वर और अतिसार नष्ट होते हैं ॥ २२ ॥

वत्सकादि ।

वत्सकश्च सुरदारु रोहिणी धान्यबिल्वमगधात्रिकण्टकम् ।
निम्बबीजगजपिप्पलीवृकीक्वाथ एष ज्वर-सारयोर्हितः ॥ २३ ॥

इन्द्रजौ, देवदारु, कुटकी, धनियाँ, बेलकी गिरी, पीपल, गोखुरु, नीमके बीज, गजपीपल और पाढ इनका क्वाथ ज्वर और अतिसारको नष्ट करनेकी उत्तम औषधि है ॥ २३ ॥

भूनिम्बादि ।

भूनिम्बबिल्वबालकगुडूचीमुस्तवत्सकैः ।
कषायः पाचनः शोथज्वरातीसार नाशनः ॥ २४ ॥

चिरायता, बेलकी गिरी, सुगन्धवाला, गिलोय, नागरमोथा और इन्द्रजौ इनका काथ पाचक और शोथ तथा ज्वरातिसारको दूर करनेवाला है ॥ २४ ॥

कणादि।

कणाकरिकणालाजकाथो मधुसितायुतः।
पीतो ज्वरातिसारस्य तृष्णामाशु विनाशयेत् ॥ २५ ॥

पीपल, गजपीपल और खीलें इनका काथ बनाकर शीतल करके उसमें शहद और मिश्री डालकर पीनेसे ज्वरातिसाररोगीकी तृषा शमन होती है ॥ २५ ॥

पञ्चमूल्यादि।

पञ्चमूलीबलाबिल्वगुडूचीमुस्तनागरैः।
पाठाभूनिम्बह्रीबेरकुटजत्वक्फलैः शृतम् ॥ २६ ॥
हन्ति सर्वानतीसारान् ज्वरदोषं वमिं तथा।
सशूलोपद्रवं कासं श्वासं हन्यात्सुदारुणम् ॥ २७ ॥
पञ्चमूली तु सामान्या योज्या पैत्ते कनीयसी।
महती पञ्चमूली तु वातश्लेष्मातुरे हिता ॥ २८ ॥

शालपर्णी, पृश्निपर्णी, बडी कटेरी, कटेरी, गोखरू, खिरैंटी, बेलकी गिरी, गिलोय, नागरमोथा, सोंठ, पाढ, चिरायता, सुगन्धवाला, कुडेकी छाल और इन्द्रजौ इन औषधियोंका यथाविधि काथ बनाकर पान करनेसे समस्त अतिसार, ज्वर, वमन, शूल आदि उपद्रवसहित खाँसी और दारुण श्वासरोग शमन होता है। पित्तकी अधिकता होनेपर इसमें लघुपंचमूल और वाताधिक्यमें बृहत्पञ्चमूलका काथ हितकर है ॥ २६-२८ ॥

बृहत्पञ्चमूल्यादि।

पञ्चमूली शृङ्गवेरशृङ्गाटकश्वटं घनम्।
जम्बुदाडिमपत्रं च बला बालं गुडूचिका ॥ २९ ॥
पाठा बिल्वं समंगा च कुटजत्वक्फलं तथा।
धान्यकं धातकीक्राथं विषाजीरकसंयुतम ॥ ३० ॥
पिबेद् ज्वरातिसारे च सरक्ते वाप्यरक्तके।
अपि योगशतैस्त्यक्ते चासाध्ये सर्वरूपके ॥ ३१ ॥

बेलकी गिरी, स्योनापाठा, कुंभेर, पाढल, अरणी, सोंठ, सिंघाडेके पत्ते, जलचौलाई, नागरमोथा, जामुनके पत्ते, खिरैंटी, सुगन्धवाला, गिलोय, पाढ, बेल, वारा-

हस्कान्ता (लज्जावन्ती), कुडेकी छाल, इन्द्रजौ, धनियाँ और धायके फूल इनके क्वाथमें अतीस और जीरेका थोडा चूर्ण डालकर पान करनेसे ज्वरातिसार, रक्तातिसार और केवल आतिसाररोगमें आरोग्य लाभ होता है। जिसमें सैकडों औषधियोंसे भी कुछ लाभ नहीं होता ऐसा असाध्य अतिसार रोग भी इससे दूर होता है॥ २९-३१॥

धान्यशुण्ठी।

धान्यकं विश्वसंयुक्तमामघ्नं वह्निदीपनम्।
वातश्लेष्मज्वरहरं शूलातीसारनाशनम्॥ ३२॥

धनियाँ और सोंठका क्वाथ आमनाशक, अग्निप्रदीपक, वातश्लेष्मज्वर, शूल और अतिसारको नष्ट करनेवाला है॥ ३२॥

बिल्वपञ्चक।

शालपर्णी पृश्निपर्णी बला बिल्वं सदाडिमम्।
बिल्वपञ्चकमित्येतत्क्वाथं कृत्वा प्रदापयेत्॥
अतीसारे ज्वरे छर्द्यां शस्यते बिल्वपञ्चकम्॥ ३३॥

शालपर्णी, पृश्निपर्णी, खिरैंटी, बेलगिरी और अनारके छिलके इन औषधियोंके समूहको बिल्वपंचक कहते हैं। इस बिल्वपंचकका क्वाथ बनाकर अतिसार, ज्वर और वमनरोगमें पान कराना चाहिये॥ ३३॥

उत्पलषट्क।

पृश्निपर्णीबलाबिल्वधनिकानागरोत्पलैः।
ज्वरातिसारयोर्वापि पिबेत्साम्लं शृतं नरः॥ ३४॥

पृश्निपर्णी, खिरैंटी, बेलकी गिरी, धनियाँ, सोंठ और कमोदिनी (नीलोफर) इनके क्वाथमें अनारका रस डालकर पान करनेसे ज्वर और अतिसार रोग नष्ट होता है॥ ३४॥

उत्पलाद्यचूर्ण।

उत्पलं दाडिमत्वक् च पद्मकेशरमेव च।
पिबेत्तण्डुलतोयेन ज्वरातीसारशान्तये॥ ३५॥

ज्वर और अतिसारको शमन करनेके लिये नीलोत्पल (नीलोफर), अनारके वक्कल और कमलकेशर इनका चूर्ण बनाकर चावलोंके जलके साथ पान करना चाहिये॥ ३५॥

व्योषाद्यचूर्ण ।

व्योषं वत्सकबीजं च निम्बभूनिम्बमार्कवम् ।
चित्रकं रोहिणीं पाठां दार्वीमतिविषां समम् ॥
श्लक्ष्णचूर्णीकृतं सर्व तत्तुल्या वत्सकत्वचः ॥ ३६ ॥
सर्वमेकत्र संयोज्य पिबेत्तण्डुलवारिणा ।
सक्षौद्रं वा लिहेदेतत्पाचनं ग्राहि भेषजम् ॥
तृष्णाऽरुचिप्रशमनं ज्वरातीसारनाशनम् ॥ ३७ ॥
प्रमेहं ग्रहणीदोषं गुल्मं प्लीहानमेव च ।
कामलां पाण्डुरोगं च श्वयथुं च विनाशयेत् ॥ ३८ ॥

सोंठ, पीपल, मिरच, इन्द्रजौ, नीमकी छाल, चिरायता, भाँगरा, चीतेकी जड़, कुटकी, पाढ, दारुहल्दी और अतीस इनको समान भाग लेकर बारीक चूर्ण करलेवे और सब चूर्णकी बराबर भाग कुड़ेकी छालका चूर्ण लेकर सबको एकत्र मिलालेवे । इस चूर्णको तीन चार माशेकी मात्रासे चावलोंके जलके साथ पीनेसे या शहदके साथ चाटनेसे तृष्णा, अरुचि, ज्वरातिसार, प्रमेह, ग्रहणी, गुल्म, प्लीहा, कामला, पाण्डुरोग और सूजन आदिरोग नष्ट होते हैं । यह चूर्ण पाचक और ग्राह्य है ३६-३८

कलिंगादिगुटिका ।

कलिंगबिल्वनिम्बाम्रं कपित्थं सरसाञ्जनम् ।
लाक्षा हरिद्रे ह्रीबेरं कट्फलं शुकनासिकाम् ॥ ३९ ॥
लोध्रं मोचरसं शङ्खं धातकीं वटशुंगकम् ।
पिष्ट्वा तण्डुलतोयेन वटकानक्षसम्मितान् ॥ ४० ॥
छायाशुष्कान् पिबेत् क्षिप्रं ज्वरातीसारशान्तये ।
रक्तप्रसाधना ह्येते शूलातीसारनाशनाः ॥ ४१ ॥

इन्द्रजौ, बेलगिरी, नीमकी छाल, आमकी गुठलीकी मींग, कैथके पत्ते, रसौत, लाख, हल्दी, दारुहल्दी, सुगन्धवाला, कायफल, अरलूकी छाल, लोध, मोचरस, शंखभस्म, धायके फूल, बड़के अंकुर इन सबको समान भाग लेकर चावलोंके जलके साथ पीसकर दो तोलेकी गोलियाँ बनाकर छायामें सुखालेवे । इनके सेवनसे ज्वरातिसार, रक्तातिसार, शूलसंयुक्त अतीसार नष्ट होजाता है ॥ ३९-४१ ॥

कुटजावलेह ।

कुटजत्वक् पलशतं जलद्रोणे विपाचयेत् ।
तेन पादावशेषेण शर्कराप्रस्थकं पचेत् ॥ ४२ ॥
ततो लेहे घनीभुते चूर्णानीमानि दापयेत् ।
लवंगं जीरकं मुस्तं धातकी बिल्ववालकम् ॥ ४३ ॥
एला पाठा त्वचं शृंगी जातीफलमधूरिका ।
शक्रकाऽतिविषा क्षारं काकोली च रसाञ्जनम् ॥ ४४ ॥
शाल्मली वेष्टकं यष्टी समंगा रक्तचन्दनम् ।
वटशुंगं खादिरं च जम्ब्वाम्रपल्लवं तथा ॥ ४५ ॥
एषामक्षसमं चूर्णं प्रक्षिपेत् पाकविद् भिषक् ।
सिद्धेऽवतारिते शीते मधुनः कुडवं न्यसेत् ॥ ४६ ॥

कुडेकी जडकी छाल सौ पल लेकर एक द्रोण जलमें पकावे । जब पककर वह चौथाई भाग शेष रहजाय तब उतारकर छानलेवे । फिर इस क्वाथमें ६४ तोले मिश्री या शुद्धचीनी मिलाकर पकावे । पककर जब पाक अवलेहकी समान गाढा होजाय तब उसमें लौंग, जीरा, नागरमोथा, धायके फूल, बेलकी गिरी, सुगन्धवाला छोटी इलायची, पाढ, दालचीनी, काकडासिंगी, जायफल, सौंफ, इन्द्रजौ, अतीस, जवाखार, काकोली, रसौत, मोचरस, मुलहठी, मंजीठ, लालचन्दन, बडके अंकुर, खैर, जामुन और आमके पत्ते इन औषधियोंके दो दो तोले परिमाण बारीक चूर्णको डालदेवे । जब उत्तम प्रकारसे पाक सिद्ध होजाय तब नीचे उतारकर शीतल होजानेपर उसमें ६४ तोले शहद मिलादेवे ॥ ४२–४६ ॥

खादयेत्कर्षमात्रं तु चानुपानविधिं शृणु ।
अनुपानं प्रदातव्यं दधिमस्तु त्वजापयः ॥ ४७ ॥
चांपेयकदलीमूलस्वरसं कर्षमानतः ।
भक्षयेत्प्रातरुत्थाय संग्रहग्रहणीं जयेत् ॥ ४८ ॥
रोगं रक्तातिसारं च चिरकालसमुद्भवम् ।
पक्वापक्वमतीसारं नानावर्णं सवेदनम् ॥
शोथातीसारसहितं ज्वरमाशु व्यपोहति ॥ ४९ ॥

इस अवलेहको प्रतिदिन प्रातःकाल उठकर एक एक तोला प्रमाण खाय और ऊपरसे दहीका तोड, बकरीका दूध, चम्पेकी जडका रस अथवा केलेकी जडका रस इनमेंसे किसी एक पदार्थको एक तोला पान करे। यह अवलेह प्रबल संग्रहणी बहुत पुराना रक्तातिसार, पक्क अथवा अपक्क अनेक वर्णका और पीडायुक्त अतिसार एवं सूजन और अतिसारयुक्त ज्वरको शीघ्र दूर करता है। अतिसार और संग्रहणीमें यह अवलेह तत्काल प्रत्यक्ष फलदायक है ॥ ४७-४९ ॥

द्वितीय कुटजावलेह।

कुटजत्वक् पलशतं जलद्रोणे विपाचयेत्।
तेन पादावशेषेण शर्करापलविंशतिम् ॥ ५० ॥
दत्त्वा पक्त्वा लेहपाके चूर्णानीमानि निक्षिपेत्।
पाठा समङ्गा बिल्वं च धातकी मुस्तकं तथा ॥ ५१ ॥
दाडिमाऽतिविषा लोध्रं शाल्मली वेष्टसर्ज्जकम्।
रसाञ्जनं धान्यकं च उशीरं बालकं तथा ॥ ५२ ॥
प्रत्येकमेषां कर्षांशं निक्षिपेत्पाकविद्भिषक्।
शीते च मधुनस्तत्र कुडवार्द्धं विनिक्षिपेत् ॥ ५३ ॥
सर्वरूपमतीसारं ग्रहणीं सर्वरूपिणीम्।
रक्तस्रुतिं ज्वरं शोथं वमिमर्शोगदं तृषाम् ॥
अम्लपित्तं तथा शूलमग्निमान्द्यं नियच्छति ॥ ५४ ॥

कुडेकी जडकी छाल १०० पल लेकर एक द्रोण जलमें पकावे। जब पककर चौथाई भाग जल शेष रहजाय तब उतारकर छानलेवे। फिर उसमें एक सेर मिश्री डालकर पाक करे। जब पककर वह अवलेहके समान होजाय तब नीचे उतारकर उसमें पाढ, मंजीठ, बेलकी गिरी, धायके फूल, नागरमोथा, अनारका बक्कल, अतीस, लोध, मोचरस, राल, रसौत, धनियाँ, खस और सुगन्धवाला इन प्रत्येक औषधिका चूर्ण एकएक तोला डालदेवे और शीतल होनेपर आठ तोले शहद डालकर मिलादेवे। उसको पूर्ववत् एक एक तोलेकी मात्रासे सेवन करे और बकरीके दूध अथवा दहीके पानीका अनुपान करे तो यह अवलेह सब प्रकारके अतिसार, समस्त ग्रहणी, रक्तातिसार, ज्वर, सूजन, वमन, बवासीर, तृषा, अम्लपित्त, शूल, मन्दाग्नि आदि रोगोंको शीघ्र शमन करताहै। यह अतिसार और ग्रहणीकी प्रत्यक्ष फलदायिनी है ॥ ५०-५४ ॥

सिद्धप्राणेश्वर रस।

गन्धेशाभ्रं पृथग्वेदभागमन्यच्च भागिकम्।
सर्जिटङ्कयवक्षाराः पञ्चैव लवणानि च ॥ ५५ ॥
वराव्योषेन्द्रबीजानि द्विजीराग्नियमानिकाः।
सहिंगु बीजसारं च शतपुष्पा सुचूर्णिता ॥ ५६ ॥
सिद्धप्राणेश्वरः सूतः प्राणिनां प्राणदायकः।
माषैकं भक्षयेदस्य नागवल्लीदलैर्युतम् ॥ ५७ ॥
उष्णोदकानुपानं च दद्यात्तत्र पलत्रयम्।
ज्वरातिसारेऽतिसृतौ केवले वा ज्वरेऽपि च ॥ ५८ ॥
घोरे त्रिदोषजे रोगे ग्रहण्यामसृगामये।
वातरोगे च शूले च शूले च परिणामजे ॥ ५९ ॥

शुद्धगन्धक, शुद्धपारा और अभ्रकभस्म ये प्रत्येक चार चार तोले, एवं सज्जी, सुहागा, जवाखार, सैंधानक, साँभरनमक, विरियासंचरनमक, कचियानमक, कालानमक, हरड, आमला, बहेडा, सोंठ, पीपल, मिरच, इन्द्रजौ, जीरा, कालाजीरा, चीतेकी जड, अजवायन, हींग, वायविडंग और सोया ये प्रत्येक औषधि एकएक तोला लेवे। सबको एकत्र जलके द्वारा उत्तमप्रकारसे खरल करके एक एक माशेकी गोलियाँ बनालेवे। यह सिद्धप्राणेश्वर नामवाला रस प्राणियोंके लिये जीवनदाताहै। इसकी एकएक गोली पानके साथ भक्षण करे और इसपर तीन पल प्रमाण गरम जलका अनुपान करे। इस रसको ज्वरातिसार, केवल अतिसार अथवा ज्वरमें तथा भयंकर त्रिदोषजनित रोग, ग्रहणी, रक्तविकार, वातरोग, शूल और परिणामजन्य-शूलमें प्रयोग करना चाहिये ॥ ५५-५९ ॥

कनकसुन्दररस।

हिङ्गुलं मरिचं गन्धं पिप्पली टङ्कणं विषम्।
कनकस्य च बीजानि समांशं विजयाद्रवैः ॥ ६० ॥
मर्दयेद्याममात्रं तु चणमात्रा वटी कृता।
भक्षणाद्ग्रहणीं हन्ति रसः कनकसुन्दरः ॥ ६१ ॥
अग्निमान्द्यं ज्वरं तीव्रमतीसारं च नाशयेत्।
पथ्यं दध्योदनं दद्याद्वा तक्रौदनं चरेत् ॥ ६२ ॥

सिंगरफ, मिरच, शुद्ध गन्धक, पीपल, सुहागा, शुद्ध मीठा तेलिया और धतूरेके बीज इन सबको समान भाग लेकर भाँगके रसमें एक प्रहरतक खरल कर चनेकी बराबर गोलियाँ बनालेवे ! यह कनकसुन्दररस सेवन करतेही संग्रहणी, मन्दाग्नि, ज्वर और प्रबल अतीसारको नष्ट करता है । इसपर दही भात अथवा मट्ठे और भातका पथ्य देना चाहिये ॥ ६०–६२ ॥

बृहत्कनकसुन्दररस ।

शुद्धं सूतं समं गन्धं मरिचं टङ्कणं तथा ।
स्वर्णबीजं समं मर्द्यं भार्ङ्गीद्रावैर्दिनार्द्धकम् ॥ ६३ ॥
सूततुल्यं मृतं चाभ्रं रसः कनकसुन्दरः ।
अस्य गुञ्जाद्वयं हन्ति पित्तातीसारमुग्रकम् ॥ ६४ ॥

शुद्धपारा, शुद्धगन्धक, मिरच, सुहागेकी खील और धतूरेके बीज सबको समान भाग लेकर भारंगीके रसमें दो प्रहरतक खरल करे फिर उसमें पारेके बराबरभाग अभ्रकभस्म मिलादेवे तो बृहत्कनकसुन्दररस सिद्ध होता है । इसको दो दो रत्तीकी मात्रासे सेवन करनेसे अत्युग्र पित्तातिसार दूर होता है ॥ ६३॥६४ ॥

गगनसुन्दररस ।

टङ्कणं दरदं गन्धमभ्रकं च समं समम् ।
दुग्धिकायाः रसेनैव भावयेच्च दिनत्रयम् ॥ ६५ ॥
द्विगुञ्जं मधुना देयं श्वेतसर्जस्य वल्कम् ।
विविधं नाशयेद्रक्तं ज्वरातीसारमुल्बणम् ॥ ६६ ॥
पथ्यं तक्रं पयश्छागमामशूलं विनाशयेत् ।
अग्निवृद्धिकरो ह्येष रसो गगनसुन्दरः ॥ ६७ ॥

सुहागा, सिंगरफ, गन्धक और अभ्रक इन प्रत्येकको समान भाग लेकर दुद्धीके रसमें ३ दिनतक भावना देकर दो दो रत्तीकी गोलियाँ बनालेवे । इनमेंसे एक एक गोली सफेद रालके दो रत्ती प्रमाण चूर्ण और शहदके साथ सेवन करनेसे विविधप्रकारका रक्तविकार, ज्वर, अत्युग्र अतिसार और आमशूल नष्ट होता है और यह गगनसुन्दर रस विशेषकर जठराग्निकी वृद्धि करता है । इसपर मठा और बकरीका दूध पथ्य है ॥ ६५–६७ ॥

कनकप्रभावटी ।

सुवर्णबीजं मरिचं मरालपादं कणा टङ्कणकं विषं च ।
गन्धं जयाद्रिर्दिवसं विमर्द्य गुञ्जाप्रमाणां वटिकां विदध्यात् ॥

घोरातिसारग्रहणीज्वराग्निमान्द्यं निहन्यात्कनकप्रभेयम्।
दध्योदनं पथ्यमनुष्णवारि मांसं भजेत्तित्तिरिलावकानाम्॥

धतूरेके बीज, मिरच, हंसपदी (हंसराज), पीपल, सुहागा, शुद्ध मीठा तेलिया और शुद्ध गन्धक इन सबको समान भाग लेकर भाँगके रस वा क्वाथमें एक दिन तक खरल करके एक एक रत्तीकी गोलियाँ बनालेवे। यह कनकप्रभा वटी सेवन करतेही प्रबल अतिसार, ग्रहणी, ज्वर और अग्निमान्द्य आदि रोगोंको नष्ट करती है। इसपर दही भातका पथ्य, शीतलजल एवं तीतर और लवा पक्षीका मांसरस सेवन करना चाहिये॥ ६८॥ ६९॥

मृतसंजीवनी वटी।

मागधी वत्सनाभं च तयोस्तुल्यं च हिङ्गुलम्।
मृतसंजीवनी ख्याता जम्बीररसमर्दिता॥ ७०॥
मूलकस्य च बीजानां वटिका तुल्यरूपिणी।
पानीया शीततोयेन ज्वरातीसारनाशिनी॥
विषूच्यां सन्निपाते च ज्वरे चैवातिदुस्तरे॥ ७१॥

पीपल १ भाग, शुद्ध वत्सनाभ १ भाग और सिंगरफ २ भाग इनको एकत्र जम्बीरीनींबूके रसमें उत्तम प्रकारसे खरलकर मूलीके बीजकी बराबर गोलियाँ बनालेवे। एकएक गोली शीतजलके साथ सेवन करनेसे ज्वर और अतिसार (दस्त) शीघ्र दूर होते हैं। विषूचिका और अतिदारुण सन्निपातज्वरमें यह मृतसंजीवनी नामक वटी अतीव हितकारी है॥ ७०॥ ७१॥

आनन्दभैरव रस।

हिङ्गुलं च विषं व्योषं टङ्कणं गन्धकं समम्।
जम्बीररससंयुक्तं मर्दयेद्यामकद्वयम्॥ ७२॥
कासश्वासातिसारेषु ग्रहण्यां सान्निपातिके।
अपस्मारेऽनिले मेहेऽप्यजीर्णे वह्निमान्द्यके॥
गुञ्जामात्रः प्रदातव्यो रस आनन्दभैरवः॥ ७३॥

सिंगरफ, शुद्ध मीठातेलिया, त्रिकुटा, सुहागा और शुद्धगन्धक सबको सम भाग लेकर एकत्र कूटपीसकर जम्बीरीनींबूके रसमें दो प्रहरतक खरल करे फिर एकएक रत्तीकी गोलियाँ बनालेवे। यह आनन्दभैरवरस सेवन करतेही खाँसी, श्वास, अतिसार, संग्रहणी, सन्निपातज्वर, अपस्मार, वातविकार, प्रमेह, अजीर्ण और मन्दाग्नि इन रोगोंको दूर करताहै॥ ७२॥ ७३॥

अमृतार्णवरस।

हिङ्गुलोत्थो रसो लौहं टङ्कणं गन्धकं शठी ।
धान्यकं बालकं मुस्तं पाठा जीरं घुणप्रिया ॥ ७४ ॥
प्रत्येकं तोलकं चूर्णं छागीदुग्धेन पेषयेत् ।
माषिका वटिका कार्य्या रसोऽयममृतार्णवः ॥ ७५ ॥
वटिकां भक्षयेत्प्रातर्गहनानन्दभाषिताम् ।
धान्यजीरकयूषेण विजयाशणबीजतः ॥ ७६ ॥
मधुना छागदुग्धेन मण्डेन शीतवारिणा ।
कदलीमोचकरसैः कश्चटद्रवकेण च ॥ ७७ ॥

सिंगरफसे निकालाहुआ पारा, लोहा, सुहागा, शुद्धगन्धक, कचूर, धनियाँ, सुगन्धबाला, नागरमोथा, पाढ, जीरा और अतीस इन प्रत्येकके चूर्णको एक एक तोला लेवे। फिर सबको एकत्र बकरीके दूधमें खरल करके एकएक माशेकी गोलियाँ बनालेवे । इनमेंसे एकएक गोली नित्यप्रति प्रातःकाल भक्षण करे और ऊपरसे धनियाँ, जीरा और मूँगका यूष, भाँगका चूर्ण, सनके बीजोंका चूर्ण, शहद, बकरीका दूध, भातका माँड, शीतलजल, केलेकी जडका रस, मोचरस और जलचौलाईका रस इनमेंसे किसी एकका अनुपान करे ॥ ७४–७७ ॥

अतीसारं जयेदुग्रमेकजं द्वन्द्वजं तथा ।
दोषत्रयसमुद्भूतमुपसर्गसमन्वितम् ॥ ७८ ॥
शूलघ्नो वह्निजननो ग्रहण्यर्शोविकारनुत् ।
अम्लपित्तप्रशमनः कासघ्नो गुल्मनाशनः ॥ ७९ ॥

इस रसको सेवन करनेसे अतिप्रबल अतीसार, एकदोषज द्विदोषज अथवा त्रिदोषज विकार, शूल, संग्रहणी, बवासीर, अम्लपित्त, खाँसी और गुल्मप्रभृति दुस्तर व्याधियाँ शमन होती हैं और अग्नि अत्यन्त दीपन होती है ॥ ७८॥७९ ॥

कारुण्यसागररस ।

भस्म सूताद् द्विधा गन्धं तथा द्वित्वं मृताभ्रकम् ।
दिनं सार्षपतैलेन पिष्ट्वा यामं विपाचयेत् ॥ ८० ॥
रसैर्मार्कवमूलोत्थैः पिष्ट्वा यामं विपाचयेत् ।
त्रिक्षारपञ्चलवणविषव्योषाग्निजीरकैः ॥
सविडङ्गैस्तुल्यभागैरयं कारुण्यसागरः ॥ ८१ ॥

पारेकी भस्म १ तोला, शुद्ध गन्धक २ तोले और अभ्रकभस्म ४ तोले लेवे। इन सबको सरसोंके तेलमें एकदिनतक खरल करके शरावसंपुटमें रख वालुकायंत्रमें एक प्रहरतक पकावे । जब पककरस्वांगशीतल होजाय तब निकाल कर भाँगरेकी जड़के रसमें एक प्रहरतक खरल कर और पूर्वोक्तविधिसे संपुटमें रखकर पकावे। पीछे स्वांगशीतल होनेपर निकालकर उसका चूर्ण कर लेवे। फिर उसमें जवाखार, सज्जी, सुहागा, कालानमक, सेंधानमक, विरियासंचरनमक, कचियानमक, साँभरनमक, शुद्ध मीठातेलिया. सोंठ, मिरच, पीपल, चीता, जीरा और वायविडङ्ग इन औषधियोंके समानभाग मिश्रित चूर्णको मिलाकर खरल करे तो यह कारुण्यसागर रस सिद्ध होता है ॥ ८० ॥ ८१ ॥

माषमात्रं ददीतास्य भिषक् सर्वातिसारके ।
सज्वरे विज्वरे वापि सशूले शोणितोद्भवे ॥ ८२ ॥
निरामे शोथयुक्ते वा ग्रहण्यां सान्निपातिके ।
अनुपानं विनाप्येष कार्यसिद्धिं करिष्यति ॥ ८३ ॥

सर्वप्रकारके अतीसार, ज्वरसहित व ज्वररहित एवं शूलयुक्त रक्तातिसार, आमरहित सूजनवाली ग्रहणी और सन्निपात आदि रोगोंमें एक एक मासे परिमाण सेवन करना चाहिये. यह रस अनुपानके विना भी आरोग्य प्रदान करता है ॥८२॥८३॥

मृतसञ्जीवनरस ।

रसगन्धौ समौ ग्राह्यौ सूतपादं विषं क्षिपेत् ।
सर्वतुल्यं मृतं चाभ्रं मर्द्यं धुस्तूरजद्रवैः ॥ ८४ ॥
सार्पाक्ष्याश्च द्रवैर्यामं कषायेणाथ भावयेत् ।
धातक्यतिविषामुस्तं शुण्ठीजीरकवालकम् ॥ ८५ ॥
यमानीधान्यकं बिल्वं पाठा पथ्या कणान्वितम् ।
कुटजस्य त्वचं बीजं कपित्थं बालदाडिमम् ॥ ८६ ॥
प्रत्येकं कर्षमात्रं स्यात्कुट्टितं क्वाथयेज्जलैः ।
चतुर्गुणं जलं दत्त्वा यावत्पादावशेषितम् ॥ ८७ ॥
अनेन त्रिदिनं भाव्यं पूर्वोक्तं मर्दितं रसम् ।
रुद्ध्वा तद्वालुकायन्त्रे क्षणं मृद्वग्निना पचेत् ॥ ८८ ॥
मृतसञ्जीवनो नाम-

शुद्ध किया हुआ पारा और गन्धक प्रत्येक एक एक तोला, शुद्ध मीठा तेलिया तीन माशे और सबकी बराबर भाग अभ्रकभस्म लेवे। इनको एकत्र कर धतूरेके पत्तोंके रसमें और सर्पाक्षीके रस अथवा क्वाथमें एक एक प्रहरतक खरल करे। फिर धायके फूल, अतीस, नागरमोथा, सोंठ, जीरा, सुगन्धवाला, अजवायन, धनियाँ, बेलगिरी, पाढ, हरड, पीपल, कुडेकी छाल, इन्द्रजौ, कैथ और कच्चाअनार इन प्रत्येक औषधियोंको एक एक तोला लेकर अच्छेप्रकारसे कूटकर सबको चौगुने जलमें पकावे। जब पकते २ चौथाई भाग जल शेष रहजाय तब उतारकर छानलेवे। फिर इस क्वाथमें पूर्वोक्त रसको तीन दिनतक भावना देवे। फिर उसको वालुकायन्त्रमें उत्तमप्रकारसे बन्दकरके मन्दमन्द अग्निसे दो घडीतक पकावे। जब पककर स्वयं शीतल होजाय तब औषधिको निकालकर चूर्ण कर लेवे। यह रस मृतसंजीवन नामसे प्रसिद्ध है॥ ८४-८८॥

–अस्य गुञ्जाचतुष्टयम्।
दातव्यमनुपानेन चासाध्यमपि साधयेत्॥ ८९॥
षट्प्रकारमतीसारं साध्यासाध्यं जयेद् ध्रुवम्।
नागरातिविषा मुस्तं देवदारु कणा वचा॥ ९०॥
यमानी वालकं धान्यं कुटजत्वक् हरीतकी।
धातकीन्द्रयवौ बिल्वं पाठा मोचरसं समम्।
चूर्णितं मधुना लेह्यमनुपानं सुखावहम्॥ ९१॥

इस रसकी चारचार रत्ती प्रमाण मात्राको यथादोषानुसार अनुपानके साथ देनेसे साध्य हो अथवा असाध्य छहों प्रकारके अतिसार निश्चय नष्ट होते हैं। इस रसको सेवन करनेसे पश्चात् सोंठ, अतीस, नागरमोथा, देवदारु, पीपल, वच, अजवायन, सुगन्धवाला, धनियाँ, कुडेकी छाल, हरड, धायके फूल, इन्द्रजौ, बेलगिरी, पाढ और मोचरस इन सब औषधियोंके चूर्णको समान भाग लेकर शहदमें मिलाकर चाटे तो बडा अच्छा अनुपान होता है। इस चूर्णको शहदके साथ चाटनेसे भी अतिसार रोग दूर होता है॥ ८९-९१॥

प्राणेश्वररस।

रसान्धकमभ्रं च टङ्कणं शतपुष्पकम्।
यमानी जीरकाख्यं च प्रत्येकं कर्षयुग्मकम्॥ ९२॥

कर्षमेकं यवक्षारं हिङ्गु कटुकपञ्चकम् ।
विडङ्गेन्द्रयवं सर्ज्जरसकं चाग्निसंज्ञितम् ॥
घृष्ट्वा च वटिका कार्या नाम्ना प्राणेश्वरो रसः ॥ ९३ ॥

शुद्धपारा, शुद्धगन्धक, अभ्रक, सुहागा, सोया, अजवायन और जीरा ये प्रत्येक दो दो कर्ष एवं जवाखार, हींग, पाँचों नमक, वायविडङ्ग, इन्द्रजौ, राल और चीता ये पृथक् पृथक् एकएक कर्ष लेवे। सबको जलके द्वारा एकत्र खरल करके चार चार रत्तीकी गोलियाँ बनालेवे। इसको प्राणेश्वररस कहते हैं। यह रस ज्वरातिसाररोगनाशक है ॥ ९२ ॥ ९३ ॥

अभ्रवटिका ।

अथ शुद्धस्य सूतस्य गन्धकस्याभ्रकस्य च ।
प्रत्येकं कर्षमानं तु ग्राह्यं रसगुणैषिणा ॥ ९४ ॥
ततः कज्जलिकां कृत्वा व्योषचूर्णं प्रदापयेत् ।
केशराजस्य भृङ्गस्य निर्गुण्ड्याश्चित्रकस्य च ॥ ९५ ॥
ग्रीष्मसुन्दरकस्याथ जयन्त्याः स्वरसं तथा ।
मण्डूकपर्ण्याः स्वरसं तथा शक्राशनस्य च ॥ ९६ ॥
श्वेतापराजितायाश्च स्वरसं पर्णसम्भवम् ।
दापयेद्रसतुल्यं च विधिज्ञः कुशलो भिषक् ॥ ९७ ॥
रसतुल्यं प्रदातव्यं चूर्णं मरिचसम्भवम् ।
देयं रसार्द्धभागेन चूर्णं टङ्कणसम्भवम् ॥ ९८ ॥
शुभे शिलामये पात्रे घर्षणीयं प्रयत्नतः ।
शुष्कमातपसंयोगाद्वटिकां कारयेद्भिषक् ॥ ९९ ॥

शुद्ध पारा १ तोला, शुद्ध गन्धक १ तोला दोनोंकी एकत्र कज्जली बनालेवे। फिर इसमें अभ्रक, सोंठ, मिरच और पीपल प्रत्येकका चूर्ण एक एक तोला मिलाकर कुकुरभाँगरा, भाँगरा, सिम्हालू, चीता, ग्रीष्मसुन्दर (सिरयारीका साग), अरणी, मण्डूकपर्णी, भाँग, सफेद कोइल और पान इन प्रत्येकके एक एक तोले स्वरसमें क्रमसे अलग अलग भावना देवे। पश्चात् इसमें काली मिरचोंका चूर्ण एक तोला और सुहागेकी खील छः माशे डालकर उत्तम पत्थरके खरलमें अच्छे प्रकारसे घोटे और धूपमें सुखाकर मटरकी समान गोलियाँ बनालेवे॥९४-९९॥

कलायपरिमाणां तु खादेत्तां तु प्रयत्नतः ।
दृष्ट्वा वयश्चाग्निबलं यथाव्याध्यनुपानतः ॥ १०० ॥
हन्ति कासं क्षयं श्वासं वातश्लेष्मभवं ज्वरम् ।
परं वाजीकरः श्रेष्ठो बलवर्णाग्निवर्द्धकः ॥ १०१ ॥
ज्वरे चैवातिसारे च सिद्ध एष प्रयोगराट् ।
नातः परतरः श्रेष्ठो विद्यतेऽभ्ररसायनात् ॥ १०२ ॥
भोजने शयने पाने नास्त्यत्र नियमः क्वचित् ।
दधि चावश्यकं भक्ष्यं प्राह नागार्जुनो मुनिः ॥ १०३ ॥

यह रस रोगीकी अवस्था और अग्निके बलाबलको विचारकर यथादोषानुसार अनुपानके साथ सेवन कराना चाहिये। इससे खाँसी, क्षय श्वास और वात-कफजन्य ज्वर शीघ्र नष्ट होते हैं। यह अत्यन्त वाजीकरण एवं बल, वर्ण और जठराग्निकी विशेषरूपसे वृद्धि करता है। ज्वर और अतिसाररोगमें तो यह सिद्धफलप्रद औषधि है। अभ्ररसायनोंमें इससे बढकर अन्य उत्तम औषध नहीं है। भोजन, पान और शयनादिमें कुछ परहेज नहीं है। किन्तु इसपर दही अवश्य खाना चाहिये ऐसा नागार्जुनमुनिने कहा है ॥ १००–१०३ ॥

इति भैषज्यरत्नावल्यां ज्वरातिसारचिकित्सा ।

अथ अतिसार-चिकित्सा ।

आमपक्वक्रमं हित्वा नातिसारे क्रिया यतः ।
अतः सर्वातिसारेषु ज्ञेयं पक्वामलक्षणम् ॥ १ ॥

आम और पक्वके क्रमको त्यागकर अतिसारमें अन्य क्रिया ही नहीं है। इस कारण सम्पूर्ण अतिसारोंमें प्रथम आम और पक्वका निश्चय करना चाहिये ॥ १ ॥

आम और पक्वके लक्षण ।

मज्जत्यामा गुरुत्वाद्विट् पक्वा तूत्प्लवते जले ।
विनाऽतिद्रवसंघातशैत्यश्लेष्मप्रदूषणात् ॥ २ ॥

अपक्व मल भारी होनेके कारण जलमें डूब जाता है और पक्व मल जलमें तैरता रहता है। किन्तु अतिद्रव (बहुत पतला) अपक्व मल भी जलके ऊपर तैरता है एवं कठिन, श्वेतवर्ण, शीतल और दुष्ट कफसे दूषित पक्व मल जलमें डूब जाता है ॥२॥

आम और पक्वके अन्य लक्षण।

शकृद् दुर्गन्धि साटोपविष्टम्भार्तिप्रसेकिनः।
विपरीतं निरामं तु कफात् पक्वं च मज्जति ॥ ३ ॥

आमातिसारमें मल दुर्गन्धियुक्त उदरमें अफारेसहित गुड़गुड़शब्द होना' पीड़ाके साथ थोड़ा थोड़ा मलका उतरना और मुखमेंसे पानीका निकलना इत्यादि लक्षण होतेहैं। एवं आमरहित पक्वातिसारमें इन सब लक्षणोंके विपरीत लक्षण होतेहैं और कफके कारण भारी होनेसे पक्व मल जलमें डूब जाताहै ॥ ३ ॥

आम और पक्वातिसारकी चिकित्सा।

न तु संग्रहणं दद्यात् पूर्वमामातिसारिणे।
दोषा ह्यादौ रुद्ध्यमाना जनयन्त्यामयान् बहून् ॥ ४ ॥
शोथपाण्ड्वामयप्लीहकुष्ठगुल्मोदरज्वरान्।
दण्डकालसकाध्मानग्रहण्यर्शोगदांस्तथा ॥ ५ ॥
क्षीणधातुबलार्तस्य बहुदोषोऽतिनिःसृतः।
आमोऽपि स्तम्भनीयः स्यात्पाचनान्मरण भवेत् ॥ ६ ॥

आमातिसारवाले रोगीको पहिले एकदम मलको रोकनेवाली औषधि कभी नहीं देनी चाहिये। कारण,प्रथमही अर्थात् अपक्व अवस्थामें मलको रोक देनेसे सब दोष एकत्रित होकर बँधजाते हैं और वे शोथ, पाण्डु, प्लीहा, कोढ, गुल्म, उदर, ज्वर, दण्डक, अलसक, अफारा, संग्रहणी और बवासीर आदि रोगोंको उत्पन्न करदेते हैं। किन्तु जो रोगी अधिक मलस्राव होनेसे धातुक्षीण और बलहीन हो और अनेक दोषोंसे युक्त हो ऐसे रोगीको आमकी अवस्थामें भी मलावरोधक औषधियाँ देनी चाहिये। कारण-ऐसे रोगीको पाचक औषधि देनेसे रोगीकी मृत्यु हो सकती है ॥ ४-६ ॥

आमातिसार--चिकित्सा

आमे विलङ्घनं शस्तमादौ पचनमेव वा।
कार्यं चानशनस्यान्ते प्रद्रवं लघु भोजनम् ॥ ७ ॥

आमावस्थामें प्रथम लंघन कराने चाहिये। फिर पाचक औषधियाँ देनी चाहिये। एवं लंघन होचुकनेपर पेयादि पतले और हल्के पदार्थ पथ्यरूपसे भोजनके लिये देने चाहिये ॥ ७ ॥

लंघनमेकं त्यक्त्वा नान्यदस्तीह भेषजं बलिनः।
समुदीर्णं दोषचयं शमयति तत्पाचयत्यपि च ॥ ८ ॥

अतिसारमें बलवान् रोगीके लिये लंघनके सिवाय अन्य कोई औषधि हितकर नहीं है। कारण; लंघन–उत्पन्नहुए दोषोंके समूहको शमन करते हैं और उनको पचा देते हैं ॥ ८ ॥

पक्कोऽपक्कद्दतीसारो ग्रहणीमार्दवाद्यदा।
प्रवर्तते तदा कार्यः क्षिप्रं सांग्राहिको विधिः ॥ ९ ॥

जब पक्वातिसारमें ग्रहणीनाड़ीके अतिमन्द होजानेसे निरन्तर मल निकलता है तब तत्काल मलावरोधक औषधि देकर दस्त बन्द करदेने चाहिये ॥ ९ ॥

ह्रीबेरशृङ्गबेराभ्यां मुस्तपर्पटकेन वा।
मुस्तोदीच्यशृतं तोयं देयं वापि पिपासवे।
मुक्तेऽन्नकाले क्षुत्क्षामं लघून्यन्नानि भोजयेत् ॥ १० ॥

अतिसारके रोगीको प्यास लगनेपर सुगन्धवाला और सोंठ अथवा नागरमोथा और पित्तपापड़ा या नागरमोथा और सुगन्धवाला इनमेंसे किसी एक प्रयोगके द्वारा सिद्ध कियाहुआ जल पीनेको देना चाहिये और लंघनके बाद अत्यन्त भूँख लगनेपर हलके अन्नादिकोंका भोजन कराना चाहिये ॥ १० ॥

औषधसिद्धाः पेया लाजानां सक्तवोऽतिसारहिताः।
वस्त्रप्रस्रुतमण्डः पेया च मसूरयूषश्च ॥ ११ ॥

शालपर्णी आदि या धान्यपंचकादि अथवा औषधियोंके द्वारा सिद्ध कीहुई पेया, खीलोंके सत्तू, कपडेमें छानाहुआ माँड, पेया और मसूरका यूष अतिसाररोगमें हित-कारी है ॥ ११ ॥

गुर्वी पिण्डी खराऽत्यर्थं लघ्वी सैव विपर्य्ययात्।
सक्तूनामाशु जीर्येत मृदुत्वादवलेहिका ॥ १२ ॥

खीलोंके सत्तुओंमें थोडा जल डालकर उसका पिण्डा या गोलासा बनाकर खानेसे वह अत्यन्त कठिन और गुरुपाकी (देरमें पचनेवाला) होजाता है। किन्तु खीलोंके सत्तुओंको अधिक जलमें घोलकर अवलेहकी समान खानेसे वे शीघ्रही पच जाते हैं ॥ १२ ॥

धान्योदीच्यशृतं तोयं तृष्णादाहातिसारनुत्।
आभ्यामेव सपाठाभ्यां सिद्धमाहारमाचरेत् ॥ १३ ॥

अतिसारके रोगीको धनियाँ और सुगन्धवाला इन औषधियोंके द्वारा पकायाहुआ जल पान करानेसे एवं धनियाँ, सुगन्धवाला और पाढ इनके द्वारा सिद्ध कीहुई पेया सेवन करानेसे तृषा, दाह और अतिसार नष्ट होता है ॥ १३ ॥

स्तोकं स्तोकं विबद्धं वा सशूलं योऽतिसार्य्यते ।
अभयापिप्पलीकल्कैः सुखोष्णैस्तं विरेचयेत् ॥ १४ ॥

जिस अतिसारके रोगीके वारंवार थोडा २ अथवा अत्यन्त बँधाहुआ और पीडासहित मल निकलता हो तो उसको हरड और पीपलका बारीक चूर्ण मन्दोष्ण जलके साथ पान कराना चाहिये ॥ १४ ॥

नागरातिविषामुस्तैरथवा धान्यनागरैः ।
तृष्णाशूलातिसारघ्नं पाचनं दीपनं लघु ॥ १५ ॥

सोंठ, अतीस और नागरमोथा अथवा धनियाँ और सोंठ यह दोनों क्वाथ तृषा, शूल और अतिसारको नष्ट करनेवाले, पाचक, अग्निदीपक और हल्के हैं ॥ १५ ॥

पाठावत्सकबीजानि हरीतक्यो महौषधम् ।
एतदामसमुत्थानमतीसारं सवेदनम् ॥
कफात्मकं सपित्तं च वर्चो बध्नाति च ध्रुवम् ॥ १६ ॥

पाढ, इन्द्रजौ, हरड और सोंठ इनका बनायाहुआ क्वाथ पीडासहित आमजन्य अतिसार और कफ तथा पित्तसंयुक्त मलको निस्सन्देह बाँध देता है ॥ १६ ॥

पयस्युत्क्वाथ्य मुस्ता वा विंशतिभेडकाह्वया ।
क्षीरावशिष्टं तत्पीतं हन्यादामं सवेदनम् ॥ १७ ॥

नागरमोथेकी बीस जडोंको आठगुने बकरीके दूध और दूधसे चौगुने जलमें पकावे । जब पककर दूधमात्र शेष रहजाय तब उसको उतारकर छानलेवे । उस दूधको शीतल करके पान करनेसे वेदनासहित आमातिसार दूर होता है ॥ १७ ॥

धान्यपञ्चकसंसिद्धो धान्यविश्वकृतोऽथवा ।
आहारो भिषजा योज्यो वातश्लेष्मातिसारिणाम् ॥
वातपित्ते पञ्चमूल्या कफे वा पञ्चकोलकैः ॥ १८ ॥

वातकफातिसारवाले रोगियोंको धान्यपञ्चकके साथ अथवा केवल धनियें और सोंठके साथ पेया बनाकर भोजनके लिये देनी चाहिये । एवं वातपित्तातिसारमें स्वल्पपंचमूलकी औषधियोंके साथ और कफके अतिसारमें पञ्चकोलकी औषधियोंके साथ पेया प्रस्तुत कर भोजनके लिये देनी चाहिये ॥ १८ ॥

धान्यपञ्चक और धान्यचतुष्क ।

धान्यकं नागरं मुस्तं बालकं बिल्वमेव च ।
आमशूलविबन्धघ्नं पाचनं वह्निदीपनम् ॥
इदं धान्यचतुष्कं स्यात् पैत्ते शुण्ठीं विना पुनः ॥ १९ ॥

धनियाँ, सोंठ, नागरमोथा, सुगन्धवाला और बेलगिरी इनका क्काथ पान करनेसे आमशूल और विबन्ध नष्ट होता है । यह क्काथ पाचक और अग्निको दीपन करनेवाला है, इसको धान्यपंचक क्काथ कहते हैं । किन्तु पित्तातिसारमें इस धान्यपंचकमेंसे सोंठको निकालकर शेष चारों औषधियोंका क्काथ बनाकर देना चाहिये । इसको धान्यचतुष्क कहते हैं ॥ १९ ॥

स्वल्प शालपर्ण्यादि ।

शालपर्णीबलाबिल्वैः पृश्निपर्ण्या च साधिता ।
दाडिमाम्ला हिता पेया पित्तश्लेष्मातिसारिणाम् ॥ २० ॥

शालपर्णी, खिरेंटी, बेलगिरी और पृश्निपर्णी इनके द्वारा सिद्ध की हुई पेया दाडिमीका रस मिलाकर पित्तकफातिसारवाले रोगीको पिलानी चाहिये ॥ २० ॥

बृहच्छालपर्ण्यादि ।

शालपर्णी पृश्निपर्णी बृहती कण्टकारिका ।
बलाश्वदंष्ट्राबिल्वानि पाठानागरधान्यकम् ॥
एतदाहारसंयोगे हितं सर्वातिसारिणाम् ॥ २१ ॥

शालपर्णी, पृश्निपर्णी, बडीकटेरी, कटेरी, खिरेंटी, गोखरू, बेलगिरी, पाढ, सोंठ और धनियाँ इन सब औषधियोंके द्वारा बनायी हुई पेया सब प्रकारके अतिसाररोगमें हितकारी है ॥ २१ ॥

वत्सकादि ।

वत्सकातिविषाशुण्ठीबिल्वहिङ्गुयवाम्बुदैः ।
चित्रकेण युतैः क्काथ आमातीसारनाशनः ॥ २२ ॥

इन्द्रजौ, अतीस, सोंठ, बेलगिरी, हींग, जौ, नागरमोथा और लाल चीता इनका क्काथ आमातिसारको नष्ट करता है ॥ २२ ॥

पथ्यादि ।

पथ्यादारुवचामुस्तनागरातिविषायुतैः ।
आमातीसारनाशार्थं क्काथमेतत् पिबेन्नरः ॥ २३ ॥

आमातिसारको शमन करनेके लिये रोगी हरड, देवदारु, वच, नागरमोथा सोंठ और अतीस इनका बनाया हुआ क्वाथ पान करे ॥ २३ ॥

यमान्यादि ।

यमानीनागरोशीरधनिकातिविषाघनैः ।
बालबिल्वद्विपर्णीभिर्दीपनं पाचनं भवेत् ॥ २४ ॥

अजवायन, सोंठ, खस, धनियाँ, अतीस, नागरमोथा, कच्चे बेलकी गिरी, शाल-पर्णी और पृश्निपर्णी इनका क्वाय सेवन करनेसे अग्निदीपन और आम परिपक्व होती है ॥ २४ ॥

कलिङ्गादि ।

कलिङ्गाऽतिविषा हिङ्गु पथ्या सौवर्चलं वचा ।
शूलस्तम्भविबन्धघ्नं पेयं दीपनपाचनम् ॥ २५ ॥

इन्द्रजौ, अतीस, हींग, हरड, कालानमक और वच इनका बनाया हुआ क्वाथ शूल, स्तम्भ और विबन्धको नष्ट करता है । तथा दीपन और पाचन है ॥ २५ ॥

कञ्चटादि ।

कञ्चटदाडिमजम्बूशृङ्गाटकपत्रह्रीबेरम् ।
जलधरनागरसहितं गङ्गामपिवेगिनीं रुन्ध्यात् ॥ २६ ॥

जल चौलाइके पत्ते, अनारके पत्ते, जामुनके पत्ते, सिंघाडेके पत्ते, सुगन्धवाला, नागरमोथा और सोंठ इनका क्वाथ गंगाके समान वेगवाले अतिसारको भी रोक देता है ॥ २६ ॥

कुटजादि ।

कुटजं दाडिमं मुस्तं धातकी बिल्वबालकम् ।
लोध्रचन्दनपाठाश्च कषायं मधुना पिबेत् ॥ २७ ॥
सामे शूले च रक्ते च पिच्छास्रावे च शस्यते ।
कुटजादिरिति ख्यातः सर्वातीसारनाशनः ॥ २८ ॥

कुडेकी छाल, अनारका बक्काल, नागरमोथा, धायके फूल, बेलगिरी, सुगन्ध-बाला, लोध, लालचन्दन और पाड इनके मन्दोष्ण क्वाथको शहद मिलाकर पान कर-नेसे आम, शूल, रक्तस्राव और मलकी पिच्छिलता दूर होती है । यह कुटजादिना-मसे प्रसिद्ध प्रयोग सर्वप्रकारके अतिसाररोगको नष्ट करता है ॥ २७ ॥ २८ ॥

त्र्यूषणादिचूर्ण ।

त्र्यूषणातिविषाहिङ्गुवलासौवर्च्चलाभयाः ।
पीत्वोष्णेनाम्भसा हन्यादामातीसारमुद्धतम् ॥ २९ ॥
अथवा पिप्पलीमूलं पिप्पलीद्वयचित्रकात् ।
सौवर्च्चलवचाव्योषहिङ्गुप्रतिविषाभयाः ॥
पिबेच्छ्लेष्मातिसारार्त्तश्चूर्णिताश्चोष्णवारिणा ॥ ३० ॥

सोंठ, पीपल, मिरच, अतीस, हींग, खिरेंटी, कालानमक और हरड इन सबके समान भाग मिश्रित चूर्णको गरमजलके साथ पान करनेसे प्रबल आमातिसाररोग नष्ट होता है अथवा पीपलामूल, पीपल, गजपीपल और चीता एवं कालानमक, बच, त्रिकुटा, हींग, अतीस और हरड इनको समान भाग लेकर चूर्ण बनाकर उष्णजलके साथ पान करनेसे कफातिसार दूर होता है ॥ २९ ॥ ३० ॥

शुण्ठ्यादिचूर्ण ।

शुण्ठीप्रतिविषाहिङ्गुमुस्ताकुटजचित्रकैः ।
चूर्णमुष्णाम्बुना पीतमामातीसारनाशनम् ॥ ३१ ॥

सोंठ, अतीस, हींग, नागरमोथा, इन्द्रजौ और चीता इनका चूर्ण उष्ण जलके साथ सेवन करनेसेही आमातिसार नष्ट होता है ॥ ३१ ॥

वातातीसार–चिकित्सा ।

पञ्चमूलीबलाविश्वधान्यकोत्पलबिल्वजाः ।
वातातिसारिणे देयास्तक्रेणान्यतमेन वा ॥ ३२ ॥

वातज अतिसारवाले रोगीको पञ्चमूल एवं खिरेंटी, सोंठ, धनियाँ, कुमोदिनी (नीलोफर) और बेलगिरी इन सब औषधियोंको समान भाग लेकर जल मिलेहुए छाछमें पकाकर देना चाहिये ॥ ३२ ॥

पूतिकादि ।

पूतिको मागधी शुण्ठी बला धान्यं हरीतकी ।
पक्त्वाऽम्बुना पिबेत् सायं वातातीसारशान्तये ॥ ३३ ॥

दुर्गंध करञ्ज, पीपल, सोंठ, खिरेंटी, धनियाँ और हरड इनका क्वाथ बनाकर सायंकालमें सेवन करनेसे वातजन्य अतीसार शान्त होताहै ॥ ३३ ॥

पथ्यादि ।

पथ्या दारु वचा शुण्ठी मुस्ता चातिविषा लता ।
क्काथ एषां हरेत् पीतो वातातीसारमुल्बणम् ॥ ३४ ॥

हरड, देवदारु, वच, सोंठ, नागरमोथा, अतीस और गिलोय इनके क्वाथको पान करनेसे प्रबल वातातीसार नष्ट होता है ॥ ३४ ॥

वचादि ।

वचा चातिविषा मुस्तं बीजानि कुटजस्य च ।
श्रेष्ठः कषाय एतेषां वातातीसारशान्तये ॥ ३५ ॥

वच, अतीस, नागरमोथा और इन्द्रजौ इनका क्वाथ वातातिसारको शमन करनेके लिये देना चाहिये ॥ ३५ ॥

पित्तातीसार-चिकित्सा ।

मधुकादि ।

मधुकं कट्फलं लोध्रं दाडिमस्य फलत्वचौ ।
पित्तातिसारे मध्वक्तं पाययेत् तण्डुलाम्बुना ॥ ३६ ॥

पित्तज अतिसारमें मुलहठी, कायफल, लोध, अनारका कच्चा फल और बक्कल इनके समान भाग चूर्णको चावलोंके पानी और मधुके साथ मिलाकर सेवन कराना चाहिये ॥ ३६ ॥

बिल्वादि ।

बिल्वशक्रयवाम्भोदबालकातिविषाकृतः ।
कषायो हन्त्यतीसारं सामं पित्तसमुद्भवम् ॥ ३७ ॥

बेलकी गिरी, इन्द्रजौ, नागरमोथा, सुगन्धवाला और अतीस इनका बना हुआ क्वाथ पान करनेसे पित्तसे उत्पन्न हुआ आमातिसार नष्ट होता है ॥ ३७ ॥

कट्फलादि ।

कट्फलातिविषाम्भोदवत्सकं नागरान्वितम् ।
शृतं पित्तातिसारघ्नं दातव्यं मधुसंयुतम् ॥ ३८ ॥

कायफल, अतीस, नागरमोथा, इन्द्रजौ और सोंठ इनका क्वाथ बनाकर मधुके साथ पान करनेसे पित्तातीसार दूर होता है ॥ ३८ ॥

किराततिक्तकादि ।

किराततिक्तकं मुस्तं वत्सकं सरसाञ्जनम् ।
पित्तातीसाररोगघ्नं सक्षौद्रं वेदनापहम् ॥ ३९ ॥

चिरायता, नागरमोथा, इन्द्रजौ और रसौंत इनके क्वाथमें शहद मिलाकर सेवन करनेसे पीडासहित पित्तातिसार शमन होता है ॥ ३९ ॥

अतिविषादि।

सक्षौद्राऽतिविषां पिष्ट्वा वत्सकस्य फलं त्वचम्।
तण्डुलोदकसंयुक्तं पेयं पित्तातिसारनुत् ॥ ४० ॥

अतीस, कुडेकी छाल और इन्द्रजौ इनके समान भाग मिश्रित चूर्णको चावलोंके जल और शहदके साथ मिलाकर सेवन करनेसे पित्तातिसार नष्ट होताहै ॥ ४० ॥

श्लेष्मातीसार-चिकित्सा।

पथ्यादि।

पथ्यात्रिकटुकापाठावचामुस्तकवत्सकैः।
सनागरैर्जयेत्क्वाथः कल्को वा श्लेष्मिकीं स्रुतिम् ॥ ४१ ॥

हरड, चीता, कुटकी, पाढ, वच, नागरमोथा, इन्द्रजौ, और सोंठ इनका क्वाथ अथवा कल्क कफके अतीसारको जीतता है ॥ ४१ ॥

चव्यादि।

चव्यं सातिविषं मुस्तं बालबिल्वं सनागरम्।
वत्सकत्वक्फलं पथ्या छर्दिश्लेष्मातिसारनुत् ॥ ४२ ॥

चव्य, अतीस, नागरमोथा, कच्चे बेलकी गिरी, सोंठ, कुडेकी छाल, इन्द्रजौ और हरड, इनका क्वाथ पान करनेसे वमन और कफजनित अतिसार दूर होताहै ॥ ४२ ॥

पाठादिचूर्ण।

पाठा वचा त्रिकटुकं कुष्ठं कटुकरोहिणी।
उष्णाम्बुना विनिघ्नन्ति श्लेष्मातीसारमुल्बणम् ॥ ४३ ॥

पाढ, वच, सोंठ, पीपल, कालीमिरच, कूठ और कुटकी इनका चूर्ण उष्ण जलके साथ पान करनेसे भयंकर कफातिसार दूर होताहै ॥ ४३ ॥

हिंग्वादिचूर्ण।

हिङ्गु सौवर्चलं व्योषमभयाऽतिविषा वचा।
पीतमुष्णाम्बुना चूर्णं श्लेष्मातीसारनाशनम् ॥ ४४ ॥

हींग, कालानमक, सोंठ, पीपल, मिरच, हरड, अतीस और वच इनके चूर्णको गरम जलके साथ पान करनेसे कफातिसार नष्ट होताहै ॥ ४४ ॥

पथ्यादिचूर्ण।

पथ्या पाठा वचा कुष्ठं चित्रकं कटुरोहिणी।
चूर्णमुष्णाम्बुना पीतं श्लेष्मातीसारनाशनम् ॥ ४५ ॥

हरड, पाढ, वच, कूठ, चीता और कुटकी इन प्रत्येकके समान भाग चूर्णको गरम जलके साथ पान करनेसे कफज अतिसार नष्ट होताहै ॥ ४५ ॥

द्वन्द्वजातीसार-चिकित्सा।

द्विदोषलक्षणैर्विद्यादतीसारं द्विदोषजम्।
तेषां चिकित्सा प्रोक्तैव विशिष्टा च निगद्यते ॥ ४६ ॥

जिस अतिसारमें दो दोषोंके मिलेहुए लक्षण होते हैं उसको द्विदोषज अतिसार कहते हैं। उनकी स्वतन्त्ररूपसे चिकित्सा पहिले लिखी जाचुकी है। अब यहाँ द्विदोषज अतिसारकी विशेषरूपसे चिकित्सा लिखीजाती है ॥ ४६ ॥

वातपित्तातिसार-चिकित्सा।

कलिङ्गादि।

कलिङ्गकवचामुस्तं दारु सातिविषं समम्।
कल्कं तण्डुलतोयेन पिबेत पित्तानिलामयी ॥ ४७ ॥

वात और पित्तके अतिसारवाले रोगीको इन्द्रजौ, वच, नागरमोथा, देवदारु और अतीस इन सबको समान भाग लेकर चावलोंके जलके साथ पीस कर कल्क बनाकर पान करना चाहिये ॥ ४७ ॥

पित्तश्लेष्मातिसार-चिकित्सा।

मुस्तादि।

मुस्ता सातिविषामूर्वा वचा च कुटजः समः।
एषां कषायः सक्षौद्रः पित्तश्लेष्मातिसारहृत् ॥ ४८ ॥

नागरमोथा, अतीस, मूर्वा, वच और कुडेकी छाल इनको समान भाग लेकर और यथाविधिसे क्वाथ बनाकर उसमें शहद डालकर पान करनेसे पित्त और कफातिसार दूर होताहै ॥ ४८ ॥

समङ्गादि।

समङ्गा धातकी बिल्वमाम्रास्थ्यम्भोजकेशरम्।
बिल्वं मोचरसं लोध्रं कुटजस्य फलत्वचौ ॥ ४९ ॥
पिबेत्तण्डुलतोयेन कषायं कल्कमेव वा।
श्लेष्मपित्तातिसारघ्नं रक्तं वाथ नियच्छति ॥ ५० ॥

लज्जावन्ती, धायके फूल, बेलगिरी, आमकी गुठलीकी गिरी और कमलकेशर अथवा बेलगिरी, मोचरस, लोध, कुडेकी छाल और इन्द्रजौ इनके क्वाथ या कल्कको चावलोंके जलके साथ पान करनेसे पित्त-कफातिसार और रक्तज अतिसार शीघ्र दूर होता है ॥ ४९ ॥ ५० ॥

कुटजादि ।

कुटजातिविषामुस्तं हरिद्रापर्णिनीद्वयम् ।
सक्षौद्रशर्करं शस्तं पित्तश्लेष्मातिसारिणाम् ॥ ५१ ॥

पित्त कफातिसारवाले रोगियोंको कुडेकी छाल, अतीस, नागरमोथा, हल्दी, दारुहल्दी, शालपर्णी और पृश्निपर्णी इनके क्वाथमें शहद और मिश्री डालकर पान करनेसे शीघ्र लाभ होता है ॥ ५१ ॥

वातश्लेष्मातिसार-चिकित्सा ।

चित्रकादि ।

चित्रकातिविषामुस्तं बला बिल्वं सनागरम् ।
वत्सकत्वक्फलं पथ्या वातश्लेष्मातिसारनुत् ॥ ५२ ॥

चीता, अतीस, नागरमोथा, खिरटी, बेलगिरी, सोंठ, कुडेकी छाल, इन्द्रजौ और हरड इनका क्वाथ वात और कफके अतिसारको नष्ट करता है ॥ ५२ ॥

त्रिदोषातिसार-चिकित्सा ।

वराहस्नेहमांसाम्बुसदृशं सर्वरूपिणम् ।
कृच्छ्रसाध्यमतीसारं विद्याद् दोषत्रयोद्भवम् ॥ ५३ ॥

त्रिदोषातिसारमें वातादि तीनों दोषोंके लक्षण प्रकट होते हैं। इसमें मल सूअरकी चर्बी और मांस मिश्रित जलकी समान होता है। यह त्रिदोषज अतीसार अत्यन्त कष्टसाध्य होता है ॥ ५३ ॥

समङ्गादि-कषाय ।

समङ्गाऽतिविषा मुस्ता विश्वं ह्रीबेरधातकी ।
कुटजत्वक्फलं बिल्वं क्वाथः सर्वातिसारनुत् ॥ ५४ ॥

लज्जावन्ती, अतीस, नागरमोथा, सोंठ, सुगन्धवाला, धायके फूल, कुडेकी छाल, इन्द्रजौ और बेलगिरी इनका क्वाथ पान करनेसे सर्व प्रकारका अतीसार दूर होता है ॥ ५४ ॥

पञ्चमूली-बलादि ।

पञ्चमूलीबलाबिल्वगुडूचीमुस्तनागरैः ।
पाठाभूनिम्बबर्हिष्ठकुटजत्वक्फलैः शृतम् ॥ ९५ ॥
सर्वजं हन्त्यतीसारं ज्वरं चापि तथा वमिम् ।
सशूलोपद्रवं श्वासं कासं चापि सुदुस्तरम् ॥ ९६ ॥

पञ्चमूल (पित्ताधिक्यमें स्वल्प पंचमूल और वात-कफाधिक्यमें बृहत्पंचमूल लेना चाहिये), खिरैंटी, बेलगिरी, गिलोय, नागरमोथा, सोंठ, पाढ, चिरायता, सुगन्धबाला, कुडेकी छाल और इन्द्रजौ इनका क्वाथ शीतल करके पान करनेसे त्रिदोषज अतिसार, ज्वर, वमन, शूल आदि उपद्रवोंसहित दुस्तर श्वास और कास-विकार दूर होते हैं ॥ ९६ ॥

पुटपक्वौषधप्रयोगविधि ।

अवेदनं सुसंपक्वं दीप्ताग्नेः सुचिरोत्थितम् ।
नानावर्णमतीसारं पुटपाकैरुपाचरेत् ॥ ९७ ॥

यदि प्रदीप्तअग्निवाले रोगीके बहुत दिनोंका पुराना, पीडारहित, परिपक्व और अनेक वर्णका अतिसार (रोग) हो तो उसकी अतिसाररोगमें कहीहुई पुटपाककी औषधियोंसे चिकित्सा करनी चाहिये ॥ ९७ ॥

कुटज-पुटपाक ।

स्निग्धं घनं कुटजवल्कलजन्तुजग्ध-
मादाय तत्क्षणमतीव च कुट्टयित्वा ।
जम्बूपलाशपुटतण्डुलतोयसिक्तं
बद्धं कुशेन च बहिर्घनपङ्कलिप्तम् ॥ ९८ ॥
सुस्विन्नमेतदवपीड्य रस गृहीत्वा
क्षौद्रेण युक्तमतिसारवते प्रदद्यात् ।
कृष्णात्रिपुत्रमतिपूजित एष योगः
सर्वातिसारहरणे स्वयमेव राजा ॥ ९९ ॥

१ "स्वरसस्य गुरुत्वेन पुटपाके पलं पिबेत् । पुटपाकस्य पाकोऽयं बहिरारक्तवर्णता ॥"

पुटपाककी विधि यह है कि-जब पुटपाकका बाहरसे लालरंग होजाय, तब उसको पका हुआ जानकर निकाल लेवे । फिर उसमेसे रसको निकालकर एकएक पलकी मात्रासे पानकरे ।

चिकनी मोटी और जिसको कीड़ोंने न खाया हो, ऐसी कुड़ेकी जड़की छालको लेकर तत्क्षण खूब बारीक कूटकर चावलोंके जलमें पीसलेवे । फिर उसको जामुनके पत्तोंमें लपेटकर और कुशासे बाँधकर उसके ऊपर गाढी मिट्टीका लेप करके सुखालेवे । पश्चात् जब पककर शीतल होजाय तब उसमेंसे रसको निकाल लेवे । इस रसमें शहद मिलाकर अतिसारवाले रोगीको सेवन कराना चाहिये । यह प्रयोग सर्वप्रकारके अतिसाररोगको नष्ट करनेके लिये सम्पूर्ण योगोंका राजा है । यह योग कृष्णात्रेयमुनिका कहा हुआहै । ॥ ५८ ॥ ५९ ॥

श्योनाकपुटपाक ।

त्वक्पिण्डं दीर्घवृत्तस्य काश्मरीपत्रवेष्टितम् ।
मृदाऽवलिप्तं सुकृतमङ्गारेष्ववकूलयेत् ॥ ६० ॥
स्विन्नमुद्धृत्य निष्पीड्य रसमादाय यत्नतः ।
शीतीकृतं मधुयुत पाययेदुदरामये ॥ ६१ ॥

अरलूकी जड़की छालको कूट पीसकर गोलासा बनालेवे । फिर उसको कुम्मेरके पत्तोंमें लपेटकर और ऊपरसे मिट्टीका लेप कर मन्द मन्द अग्निसे पुटपाक करना चाहिये । जब पककर शीतल होजाय तब औषधिको निकालकर उसमेंसे रसको निचोड़ लेवे । उस रसको उचित मात्रासे शहदमें मिलाकर उदररोगोंमें सेवन करानेसे शीघ्र लाभ होता है ॥ ६० ॥ ६१ ॥

दाडिम-पुटपाक ।

दाडिमस्य फलं पिष्ट्वा पचेत् पुटविधानतः ।
तद्रसं मधुसंमिश्रं पिबेत् सर्वातिसारनुत् ॥ ६२ ॥

कच्चे अनारके फलको पीसकर पूर्वोक्त विधिसे पुटपाक करे । फिर उसके रसको निकालकर दो तोले परिमाण लकर मधुके साथ मिश्रितकर सेवन करनेसे सब प्रकारका अतीसार नष्ट होता है ॥ ६२ ॥

कुटज-लेह ।

शतं कुटजमूलस्य क्षुण्णं तोयार्मणे पचेत् ।
क्वाथे पादावशेषेऽस्मिन् लेहं पूते पुनः पचेत् ॥ ६३ ॥
सौवर्चलयवक्षारविडसैन्धवपिप्पली ।
धातकीन्द्रयवाजाजीचूर्णं दत्त्वा पलद्वयम् ॥ ६४ ॥

लिह्याद्बदरमात्रं तु पीतं क्षौद्रेण संयुतम् ।
पक्वापक्वमतीसारं नानावर्णं सवेदनम् ॥
दुर्वारं ग्रहणीरोगं चयेच्चैव प्रवाहिकाम् ॥ ६५ ॥

कुडेकी जड़की छाल १०० पल लेकर और उसको अच्छीतरह कूटकर एक द्रोण जलमें पकावे । जब पककर चौथाईभाग जल शेष रहजावे, तब उतारकर छान लेवे । फिर उस क्वाथको दुबारा मन्द मन्द अग्निसे पकावे । पककर जब वह अवलेहके समान होजाय, तब उसमें कालानमक, जवाखार, बिरिया संचरनमक, सैंधानमक, पीपल, धायके फूल, इन्द्रजौ और जीरा इन प्रत्येक औषधिका चूर्ण दो दो पल मिलादेवे । प्रतिदिन एक एक तोले परिमाण लेकर शहदके साथ सेवन करे तो यह अवलेह पक्व, अपक्व, अनेक वर्णवाले और वेदनायुक्त अतिसार दुःसाध्य संग्रहणी और प्रवाहिकारोगको शीघ्र नष्ट करताहै ॥

कुटजाष्टकावलेह ।

तुलामथार्द्रां[1] गिरिमल्लिकायाः संक्षुद्य पक्त्वा रसमाददीत । तस्मिन् सुपूते पलसम्मितानि श्लक्ष्णानि पिष्ट्वा सह शाल्मलेन ॥६६॥ पाठां समङ्गातिविषां समुस्तां बिल्वं च पुष्पाणि च धातकीनाम् । प्रक्षिप्य भूयो विपचेत्तु तावद् दर्वीप्रलेपः स्वरसं तु यावत् ॥ ६७ ॥ पीतस्त्वसौ कालविदा जनेन मण्डेन वाऽजापयसाथवापि । निहन्ति सर्वं त्वतिसारमुग्रं दोषं ग्रहण्या विविधं च रक्तम् ॥ ६८ ॥ कृष्णं सितं लोहितपीतकं वा पित्तं तथाऽर्शांसि सशोणितानि । असृग्दरं चैवमसाध्यरूपं निहन्त्यवश्यं कुटजाष्टकोऽयम् ॥ ६९ ॥

कुडेकी जडकी गीली छालको सौ पल लेकर ओखलीमें कूटलेवे । फिर उसको एक द्रोण जलमें पकावे । जब पकते २ चौथाई भाग जल शेष रहजाय तब उतारकर छानलेवे । फिर उस क्वाथमें मोचरस, पाढ, लज्जावन्ती, अतीस, नागरमोथा, बेलगिरी और धायके फूल इन औषधियोंको खूब बारीक पीसेहुए चार चार तोले प्रमाण चूर्णको डालकर तबतक मन्दमन्द अग्निसे पकावे जबतक कि वह स्वरस करछीसे चिपकने न लगे । फिर देश, काल और दोषोंका विचार-

१-तुलाद्रव्ये जलद्रोणो द्रोणे द्रव्यं तुला मता ।

कर इस अवलेहको उचित मात्रासे मॉड अथवा बकरीके दूधके साथ सेवन करे। यह कुटजाष्टक अवलेह सर्वप्रकारके भयंकर अतिसार, संग्रहणी, नानाप्रकारके रक्त-विकार, काला, सफेद, लाल, पीले और पित्तज अतिसार, बवासीर, रुधिरकी बवासीर और असाध्य रक्तप्रदररोगको भी अवश्य नष्ट करता है ॥ ६६–६९ ॥

दुग्ध-पानविधि ।

जीर्णेऽमृतोपमं क्षीरमतीसारे विशेषतः ।
छागं तद्भेषजैः सिद्धं पेयं वा वारिसाधितम् ॥ ७० ॥

विशेषकर पुराने अतिसारमें बकरीके दूधको अतिसारनाशक औषधियोंके साथ पकाकर अथवा केवल जलके साथ पकाकर देनेसे विशेष लाभ होता है ॥ ७० ॥

शोथातीसार–चिकित्सा ।

शोथघ्नीन्द्रयवाः पाठाश्रीफलातिविषाघनाः ।
क्वथिताः सोषणाः पीता शोथातीसारनाशनाः ॥ ७१ ॥

पुनर्नवा, इन्द्रजौ, पाढ, बेलगिरी, अतीस और नागरमोथा इनका काथ, काली मिर्चोंका चूर्ण बनाकर उसमें डालकर पान करनेसे शोथातीसार नष्ट होता है ७१

विडङ्गातिविषामुस्तं दारु पाठा कलिङ्गकम् ।
मरिचेन समायुक्तं शोथातीसारनाशनम् ॥ ७२ ॥

वायविडङ्ग, अतीस, नागरमोथा, देवदारु, पाढ और इन्द्रजौ इनके काथमें काली-मिर्चोंका चूर्ण डालकर पान करनेसे शोथयुक्त अतीसार नष्ट होता है ॥ ७२ ॥

भय–शोकज अतीसार–चिकित्सा ।

भयशोकसमुद्भूतौ ज्ञेयो वातातिसारवत् ।
तयोर्वातहरी कार्या हर्षणाश्वासनैः क्रिया ॥ ७३ ॥

भय और शोकसे उत्पन्नहुए अतिसारोंको वातज अतिसारकी समान जानना चाहिये। अतः उक्त दोनों प्रकारके अतीसारोंमें वातनाशक चिकित्सा एवं हर्षजनक धैर्यप्रदान आदि कार्य करे ॥ ७३ ॥

पृश्निपर्ण्यादि ।

पृश्निपर्णीबलाबिल्वधान्यकोत्पलनागरैः ।
विडङ्गातिविषामुस्तदारुपाठाकलिङ्गकैः ॥
मरिचेन समायुक्तः शोकातीसारनाशनः ॥ ७४ ॥

पृश्निपर्णी, खिरेंटी, बेलगिरी, धनियाँ, कुमोदिनी (नीलोफर), सोंठ, वायविडंग, अतीस, नागरमोथा, देवदारु, पाढ और इन्द्रजौ इनके क्वाथमें कालीमिर्चोंका चूर्ण मिलाकर सेवन करनेसे शोकजनित अतिसार दूर होता है ॥ ७४ ॥

रक्तातिसार–चिकित्सा।

गुडेन खादितं बिल्वं रक्तातीसारनाशनम्।
आमशूलविबन्धघ्नं कुक्षिरोगविनाशनम् ॥ ७५ ॥

बेलकी गिरीको गुडके साथ खानेसे रक्तातीसार तथा आम, शूल, मलकी बद्धता और कुक्षिरोग ये सब नष्ट होते हैं ॥ ७५ ॥

शल्लकीबदरीजम्बूपियालाम्राऽर्जुनत्वचः।
पीताः क्षीरेण मध्वाढ्याः पृथक् शोणितनाशनाः ॥ ७६ ॥

सालईकी जडकी छाल, बेरीकी छाल, जामुनकी छाल, चिरोंजीकी छाल, आमकी छाल या अर्जुनकी छाल इनमेंसे किसी एककी छालको पीसकर दूध और शहदके साथ मिलाकर पान करनेसे रक्तातिसार दूर होता है। ये प्रत्येक छाल रक्तस्रावको बन्द करनेवाली हैं ॥ ७६ ॥

पीतं मधुसितायुक्तं चन्दनं तण्डुलाम्बुना।
रक्तातीसारजिद्रक्तपित्ततृड्दाहमेहनुत् ॥ ७७ ॥

शहद, मिश्री और लालचन्दन इनको समानभाग लेकर चावलोंके जलके साथ पान करनेसे रक्तातीसार, रक्तपित्त, तृषा, दाह और प्रमेहरोग नष्ट होता है ॥ ७७ ॥

कषायो मधुना पीतस्त्वचा दाडिमवत्सकात्।
सद्यो जयेदतीसारं सरक्तं दुर्निवारकम् ॥ ७८ ॥

अनारकी छाल और कुडेकी छालके क्वाथको शहदके साथ पान करनेसे दुर्जय रक्तातीसार तत्काल दूर होता है ॥ ७८ ॥

जम्ब्वाम्रामलकानां तु पल्लवानथ कुट्टयेत्।
संगृह्य स्वरसं तेषामजाक्षीरेण योजयेत् ॥
तं पिबेन्मधुना युक्तं रक्तातीसारनाशनम् ॥ ७९ ॥

जामुन, आम और आमलेके पत्तोंको कूटकर उनका स्वरस निकालकर बकरीके दूध और शहदके साथ मिलाकर सेवन करनेसे रक्तातीसार निवारण होता है ॥ ७९ ॥

बिल्वं छागपयःसिद्धं सितामोचरसान्वितम्।
कलिङ्गचूर्णसंयुक्तं रक्तातीसारनाशनम् ॥ ८० ॥

बकरीके दूधमें बेलगिरीको पकाकर उसमें मिश्री, मोचरस और इन्द्रजौका चूर्ण डालकर पान करनेसे रक्तातीसार नष्ट होता है ॥ ८० ॥

ज्येष्ठाम्बुना तण्डुलीयं पीतं चससितामधु।
पीत्वा शतावरीकल्कं पयसा क्षीरभुग् जयेत् ॥
रक्तातिसारं पीत्वा वा तया सिद्धं घृतं नरः ॥ ८१ ॥

चौलाईकी जडको चावलोंके पानीके साथ पीसकर उसमें मिश्री और शहद मिलाकर पान करनेसे रक्तातीसार नष्ट होता है। शतावरके कल्कको बकरीके दूधके साथ पान करनेसे और उसपर दूधके साथ भोजन करनेसे अथवा शतावरके क्वाथ और कल्कके द्वारा सिद्ध किये हुए घृतको पान करनेसे रक्तातीसार दूर होता है ॥ ८१ ॥

कुटजत्वककृतः क्वाथो घनीभूतः सुशीतलः।
लेहितोऽतिविषायुक्तः सर्वातीसारनुद् भवेत् ॥ ८२ ॥

कुडेकी छालके क्वाथको पकाकर अवलेहकी समान गाढा बनालेवे। जब पक-कर शीतल होजाय तब उसमें अतीसका चूर्ण मिलाकर चाटनेसे सब प्रकारका अतीसार नष्ट होता है ॥ ८२ ॥

कुटजस्य पलं ग्राह्यमष्टभागजले शृतम्।
तथैव विपचेद् भूयो दाडिमोदकसंयुतम् ॥ ८३
यावच्चैव लसीकाभं शृतं तमुपकल्पयेत्।
तस्यार्द्धकर्षं तक्रेण पिबेद्रक्तातिसारवान् ॥
अवश्यमरणीयोऽपि मृत्योर्याति न गोचरम् ॥ ८४ ॥

कुडेकी छालको ४ तोले लेकर आठगुने जलमें पकावे और चतुर्थांश जल शेष रक्खे। फिर उस क्वाथको छानकर और उसमें अनारका रस डालकर फिर पूर्वोक्त विधिसे पकावे। जब वह पाक अवलेहके समान गाढा होजाय तब उतारलेवे। पश्चात् उसको एक तोला परिमाण मट्ठेके साथ मिलाकर सेवन करनेसे मृत्युके मुखमें पतित हुआ भी रक्तातिसारवाला रोगी अवश्य आरोग्य लाभ करता है ॥ ८३ ॥ ८४ ॥

कल्कस्तिलानां कृष्णानां शर्कराभागसंयुतः ।
आजेन पयसा पीतः सद्यो रक्तं नियच्छति ॥ ८५ ॥

कालेतिलोंको पीसकर उसमें चौथाई भाग खाँड मिलाकर बकरीके दूधके साथ सेवन करनेसे रक्तातिसार तत्काल दूर होता है ॥ ८५ ॥

निष्क्वाथ्य मूलममलं गिरिमल्लिकायाः
सम्यक् पलद्वितयमम्बु चतुःशरावे ।
तत्पादशेषसलिलं खलु शोषणीय
क्षीरे पलद्वयमिते कुशलैरजायाः ॥ ८६ ॥
प्रक्षिप्य माषकानष्टौ मधुनस्तत्र शीतले ।
रक्तातिसारी तं लीढ्वा नैरुज्यमधिगच्छति ॥ ८७ ॥

कुडेकी शुद्ध छालको ८ तोले लेकर ४ शराव (६४ तोले) जलमें पकावे । जब चौथाई जल शेष रहजाय तब उतारकर छानलेवे । फिर शीतल होजानेपर उसको ८ तोले प्रमाण बकरीके दूधमें मिलाकर और ८ माशे शहद डालकर पान करनेसे रक्तातिसारवाला रोगी शीघ्रही आरोग्य लाभ करता है ॥ ८६ ॥ ८७ ॥

वटरोह तु संपिष्य श्लक्ष्णं तण्डुलवारिणा ।
तत्पिबेत् तक्रसंयुक्तमतीसाररुजापहम् ॥ ८८ ॥

बडके अंकुरोंको चावलोंके पानीके साथ खूब बारीक पीसकर मट्ठेके साथ पान करनेसे अतीसाररोग दूर होता है ॥ ८८ ॥

तण्डुलजलपिष्टाङ्कोटमूलकर्षार्द्धपानमपहरति ।
सर्वातिसारग्रहणीरोगसमूहं महाघोरम् ॥ ८९ ॥

अङ्कोट (ढेरा) वृक्षकी जडको आठ माशे लेकर चावलोंके जलमें पीसकर पीनेसे सब प्रकारके भयङ्कर अतीसार, संग्रहणी आदि रोग नष्ट होते हैं ॥ ८९ ॥

विशल्यकरणीक्काथश्चाथवा कुक्कुटद्रुजः ।
वारयेच्छोणितस्रावं रक्तातीसारमुल्बणम् ॥ ९० ॥

विशल्यकरणी (रकपतिया घास) का क्वाथ अथवा कुकुरौंदीका रस पान करनेहीसे रक्तस्राव और प्रबल रक्तातिसार नष्ट होता है ॥ ९० ॥

पीत्वा सशर्करं क्षौद्रं चन्दनं तण्डुलाम्बुना ।
दाहं तृष्णां प्रमेहं च सद्यो रक्तं नियच्छति ॥ ९१ ॥

मिश्री, शहद और चन्दनका चूर्ण इनको समान भाग लेकर चावलोंके जलके साथ पान करनेसे दाह, तृषा, प्रमेह और रक्तातिसार शीघ्र दूर होता है ॥ ९१ ॥

नवनीतं मधुयुतं लिह्याद्वा सितया सह ।
नागकेशरसंयुक्तं रक्तसंग्रहणं परम् ॥
मधुपादं सितार्द्धांशं नवनीतं चतुर्गुणम् ॥ ९२ ॥

नैनीघीको शहदके साथ या मिश्रीके साथ किंवा नागकेशरके साथ सेवन करनेसे अथवा शहद १ भाग, मिश्री २ भाग और नैनीघी ४ भाग सबको एकत्र मिलाकर खानेसे रक्तस्राव बन्द होता है ॥ ९२ ॥

रसाञ्जनादिचूर्ण।

रसाञ्जनं चातिविषां कुटजस्य फलत्वचम् ।
धातकीं शृङ्गबेरं च पिबेत्तण्डुलवारिणा ॥
क्षौद्रयुक्तं प्रणुदति रक्तातीसारमुल्बणम् ॥ ९३ ॥

रसौंत, अतीस, इन्द्रजौ, कुडकी छाल, धायके फूल और सोंठ इनके चूर्णको समान भाग लेकर चावलोंके जलमें पीसकर शहदके साथ सेवन करनेसे प्रबल रक्तातिसार नष्ट होता है ॥ ९३ ॥

नारायणचूर्ण।

गुडूची वृद्धदारं च कुटजस्य फलं तथा ।
बिल्वं चातिविषा चैव भृङ्गराजं च नागरम् ॥ ९४ ॥
शक्राशनस्य चूर्णं च सर्वमेकत्र मेलयेत् ।
चूर्णमेतत्समं ग्राह्यं कुटजस्य त्वचोऽपि च ॥ ९५ ॥
गुडेन मधुना वापि लेहयेद्भिषजां वरः ।
शोथं रक्तमतीसारं चिरजं दुर्जयं तथा ॥ ९६ ॥
ज्वरं तृष्णां च कासं च पाण्डुरोगं हलीमकम् ।
मन्दानलं प्रमेहं च गुदजं च विनाशयेत् ॥
एतन्नारायणं चूर्णं श्रीनारायणभाषितम् ॥ ९७ ॥

गिलोय, विधारा, इन्द्रजौ, बेलगिरी, अतीस, भाँगरा, सोंठ और भाँग इन सबके चूर्णको समान भाग लेवे और सम्पूर्ण चूर्णकी बराबर भाग कुडेकी छालका चूर्ण लेकर सबको एकत्र मिलालेवे। इस चूर्णको पुराने गुड अथवा शहदके साथ

सेवन करनेसे सूजन तथा बहुत पुराना और दुस्साध्य रक्तातिसार, ज्वर, तृषा, खाँसी, पाण्डुरोग, हलीमक, मन्दाग्नि, प्रमेह और गुदाके समस्त रोग शीघ्र नष्ट होतेहैं । इस नारायणचूर्णको श्रीनारायणने कहा है ॥ ९५-९७ ॥

गुदापाकमें विधि ।

गुददाहे प्रपाके वा पटोलमधुकाम्बुना ।
सेकादिकं प्रशंसन्ति छागेन पयसाऽपि वा ॥
गुदभ्रंशे प्रकर्तव्या चिकित्सा तत्प्रकीर्त्तिता ॥ ९८ ॥

अतिसारके कारण गुदामें दाह अथवा पाक होनेपर पटोलपात और मुलहठीके काय अथवा बकरीके दूधसे गुदाद्वारको सिंचन करना चाहिये और गुदभ्रंशरोगमें कहीहुई चिकित्सा करनी चाहिये ॥ ९८ ॥

साधारणातिसार-चिकित्सा ।

बिल्वादि ।

बिल्वचूतास्थिनिर्यूहः पीतः सक्षौद्रशर्करः ।
निहन्याच्छर्द्यतीसारं वैश्वानर इवाहुतिम् ॥ ९९ ॥

बेल और आमकी गुठलीके काथमें खांड और शहद डालकर पान करनेसे वमनयुक्त अतीसार निवारण होताहै ॥ ९९ ॥

पटोलादि ।

पटोलयवधन्याककाथः पीतः सुशीतलः ।
शर्करामधुसंयुक्तश्छर्द्यतीसारनाशनः ॥ १०० ॥

परवल, जौ और धनियाँ इनके शीतल क्वाथमें मधु और खांड मिलाकर पान करनेसे वमन और अतीसाररोग नष्ट होताहै ॥ १०० ॥

प्रियंग्वादि ।

प्रियंग्वञ्जनमुस्ताख्यं पाययेत्तु यथाबलम् ।
तृष्णातीसारछर्दिघ्नं सक्षौद्रं तण्डुलाम्बुना ॥ १ ॥

फूलप्रियंगु, रसौंत और नागरमोथा इनके चूर्णको शहद और चावलोंके पानीके साथ मिलाकर जठराग्निके बलानुसार पान करानेसे तृषा, अतिसार, वमन आदि उपद्रव दूर होते हैं ॥ १०१ ॥

जम्ब्वादि ।

जम्ब्वाम्रपल्लवोशीरवटशुङ्गावरोहकम् ।
रसः क्राथोऽथवा चूर्णं क्षौद्रेण सह योजितम् ॥ २ ॥

छर्दिं ज्वरमतीसारं मूर्च्छां तृष्णां च दुर्जयाम् ।
नाशयत्यचिराद्धन्ति स्रुतिं वाऽनेकहेतुकाम् ॥ ३ ॥

जामुन और आमके कोमल पत्ते, खस, बडके, अंकुर और बडकी डाढी इन सबका स्वरस, क्वाथ अथवा चूर्ण मधुके साथ मिलाकर सेवन करनेसे वमन, ज्वर, अतीसार, मूर्च्छा और दुस्तर तृषा दूर होती है। यह योग अनेक कारणोंसे उत्पन्न-हुए रक्तस्रावको शीघ्र नष्ट करता है ॥ १०२ ॥ १०३ ॥

वत्सकादि ।

सवत्सकः सातिविषः सबिल्वः सोदीच्यमुस्तश्च कृतः कषायः ।
सामे सशूले सहशोणिते च चिरप्रवृत्तेऽपि हितोऽतिसारे ॥ ४ ॥

इन्द्रजौ, अतीस, बेलगिरी, सुगन्धवाला और नागरमोथा इनका क्वाथ आम और शूलयुक्त पुराने रक्तातिसारमें विशेष हितकारी है ॥ १०४ ॥

नाभिप्रलेप ।

कृत्वाऽऽलवालं सुदृढं पिष्टैरामलकैर्भिषक् ।
आर्द्रकस्य रसेनाथ पूरयेन्नाभिमण्डलम् ॥
नदीवेगोपमं घोरमतीसारं विनाशयेत् ॥ ५ ॥

वैद्य, आमलोंको पीसकर उनके द्वारा रोगीकी नाभिके चारों ओर गोलगोल थाँवलासा बनाकर उसमें अदरखके रसको भरदेवे। इससे नदीके वेगके समान भयंकर अतीसार शीघ्र दूर होता है ॥ १०५ ॥

तथा जातीफलं पिष्ट्वा नाभौ दद्यात् प्रलेपनम् ।
दुर्निवारमतीसारं वारयत्यनिवारितम् ॥ ६ ॥

जायफलको पीसकर नाभिपर प्रलेप करनेसे असाध्य अथवा कष्टसाध्य अतिसार भी दूर होता है ॥ १०६ ॥

आम्रस्य वल्कलं पिष्टं काञ्जिकेन प्रयत्नतः ।
नाभिं संलेपयेत्तेन कल्केन मतिमान् भिषक् ॥
नदीवेगोपमं घोरमतीसारं निवारयेत् ॥ ७ ॥

आमकी छालको काँजीमें पीसकर नाभिके चारों ओर प्रलेप करनेसे नदीके समान वेगवाला अतीसार भी नष्ट होता है ॥ १०७ ॥

प्रवाहिका-चिकित्सा ।

बालं बिल्वं गुडं तैलं पिप्पली विश्वभेषजम् ।
लिह्याद्वाते प्रतिहते सशूले सप्रवाहिके ॥ ८ ॥

वातज और शूलयुक्त प्रवाहिकारोगमें कच्चे बेलका सूखा गूदा, गुड, तिलका तैल, पीपल और सोंठ इन सबको एकत्र मिलाकर सेवन करना हितकारी है ॥ १०८ ॥

पयसा पिप्पलीकल्कः पीतो वा मरिचोद्भवः ।
त्र्यहात् प्रवाहिकां हन्ति चिरकालानुबन्धिनीम् ॥ ९ ॥

पीपलके कल्क या काली मिरचाके कल्कको दूधके साथ सेवन करनेसे बहुत दिनोंकी पुरानी प्रवाहिका तीन दिनमें शमन होती है ॥ १०९ ॥

कल्कः स्याद्बालबिल्वानां तिलकल्कश्च तत्समः ।
दध्नः साराम्लस्नेहाढ्यः सद्यो हन्यात् प्रवाहिकाम् ॥ ११० ॥

कच्चे बेलकी गिरीका कल्क और उसके समान तिलोंका कल्क लेकर दहीकी मलाई, खट्टा और स्नेहयुक्त करके पान करनेसे प्रवाहिकारोग शीघ्र नष्ट होता है १०

बिल्वोषणं गुडं लोध्रं तैलं लिह्यात प्रवाहणे ॥ ११ ॥

प्रवाहिका रोगके लिये बेलगिरी कालीमिरच, गुड, लोध और तिलका तेल इन सबको समान भाग लेकर और मिलाकर सेवन करना चाहिये ॥ ११ ॥

दध्ना ससारेण समाक्षिकेण भुञ्जीत निस्सारकपीडितस्तु ।
सुतप्तरूप्यक्वथितेन वापि क्षीरेण शीतेन मधुप्लुतेन ॥ १२ ॥

मलाईसहित दहीके साथ शहद मिलाकर भक्षण करनेसे अथवा तपाई हुई चाँदीको बुझाकर उस दूधको शीतल करके और उसमें शहद मिलाकर पान करनेसे प्रवाहिका-रोग दूर होता है ॥ १२ ॥

तासामतीसारवदादिशेच्च लिङ्गं क्रमं चामविपक्वतां च ॥ १३ ॥

प्रवाहिका रोगके लक्षण, चिकित्सा एवं आम और पक्वलक्षण अतीसारकी समान जानने चाहिये ॥ १३ ॥

अहिफेनयोग ।

अहिफेनं सुसंभृष्टं खर्परे मृदुवह्निना ।
हिक्कातीसारशमनं भेषजं नास्त्यतः परम् ॥ १४ ॥

अफीमको मिट्टीके पात्रमें मन्दअग्निसे अच्छे प्रकार भूनकर उचित मात्रासे प्रयोग करनेसे हिचकी और अतिसाररोग शमन होता है ॥ १४ ॥

अहिफेनवटिका ।

अहिफेनं सखर्जूरं घृष्ट्वा गुञ्जैकमात्रकम् ।
रक्तस्रावमतीसारमतिवृद्धं विनाशयेत् ॥ १५ ॥

अफीम और खजूर (छुहारा) इन दोनोंको बराबर भाग लेकर एकत्र खरल करके एकएक रत्तीकी गोलियाँ बनालेवे । इन गोलियोंको सेवन करनेसे अत्यन्त वृद्धिको प्राप्त हुआ अतीसार और रक्तस्राव दूर होता है ॥ १५ ॥

जातीफलादिवटी ।

जातीफलं च खर्ज्जूरमहिफेनं तथैव च ।
समभागानि सर्वाणि नागवल्लीरसेन च ॥ १६ ॥
वल्लमात्रा वटी कार्या देया तक्रानुपानतः ।
अतीसारं जयेद् घोरं वैश्वानर इवाहुतिम् ॥ १७ ॥

जायफल, खजूर (छुहारा) और अफीम इनको समानभाग लेकर पानके रसमें खरल करके दो दो रत्तीकी गोलियाँ बनालेवे । एक एक गोली मठेके साथ देनेसे भयंकर अतिसार इस प्रकार नष्ट होजाता है, जिस प्रकार अग्नि आहुतिको तत्काल भस्म कर देती है ॥ १६ ॥ १७ ॥

पुर्णचन्द्रोदयरस ।

शुद्धं च तालकं लौहं गगनं च पलं पलम् ।
कर्पूरं पारदं गन्धं प्रत्येकं बटकोन्मितम् ॥ १८ ॥
जातीकोषं सुरापत्रं शठी तालीशकेशरम् ।
व्योषं चोचं कणामूलं लवङ्गं पिचुसम्मितम् ॥ १९ ॥

शुद्धहरिताल, लोहा और अभ्रक ये प्रत्येक चार चार तोले, कपूर, पारा और शुद्धगन्धक ये प्रत्येक एकएक तोला एवं जावित्री, कपूरकचरी, तेजपात, कचूर, तालीसपत्र, केशर, सोंठ, पीपल, मिरच, दारचीनी, पीपलामूल और लौंग ये प्रत्येक दो-दो तोले लेवे । सबको एकत्र खरल करके एक शीशीमें भरकर रख देवे॥१८॥१९॥

भक्षयेत् प्रातरुत्थाय गुरुदेवद्विजार्चकः ।
नानारूपमतीसारं ग्रहणीं सर्वरूपिणीम् ॥ १२० ॥
अम्लपित्तं तथा शूलं शूलं च परिणामजम् ।
रसायनवरश्चायं वाजीकरण उत्तमः ॥ २१ ॥

इस चूर्णको प्रतिदिन प्रातःकाल गुरु और इष्टदेवका पुजन कर दो दो रत्तीकी मात्रासे सेवन करे तो यह अनेक प्रकारके अतिसार, सब प्रकारकी संग्रहणी, अम्ल-पित्त, शूल और परिणामशूलको नष्ट करता है । यह चूर्ण अतिश्रेष्ठ रसायन और उत्तम वाजीकरण औषधि है ॥ १२० ॥ १२१ ॥

बृहद्गगनसुन्दररस ।

पारदं गन्धकं चाभ्रं लौहं चापि वराटकम् ।
रूप्यं चातिविषां कर्षं समभागं प्रकल्पयेत् ॥ २२ ॥
धान्यशुण्ठीकृतक्काथैर्भावयेच्च पृथक् पृथक् ।
गुञ्जाप्रमाणां वटिकां कारयेत् कुशलो भिषक् ॥ २३ ॥

शुद्धपारा, शुद्धगन्धक, अभ्रक, लोहा, कौडी और चाँदी इन सबकी भस्म और अतीस इन प्रत्येक औषधिको दो दो तोले लेकर धनियें और सोंठके क्काथमें अलग-अलग भावना देवे । फिर एकएक रत्तीकी गोलियाँ बनालेवे ॥ २२ ॥ २३ ॥

भक्षयेत् प्रातरुत्थाय गुरुदेवद्विजार्चकः ।
दग्धबिल्वं गुडेनैव कुर्यात्तदनुपानकम् ॥ २४ ॥
अजादुग्धेन वा पेयं जम्बूत्वक्साधितं रसम् ।
अतीसारे ज्वरे घोरे ग्रहण्यामरुचौ तथा ॥ २५ ॥
सामे सशूले रक्ते च पिच्छास्रावे भ्रमे तथा ।
शोथे रक्तातिसारे च संग्रहग्रहणीषु च ॥ २६ ॥

इस रसकी प्रतिदिन प्रातःकाल उठकर गुरु और इष्टदेवका पूजन कर एक एक गोली भक्षण करे और ऊपरसे भुनेहुए बेलको गुडके साथ अथवा बकरीके दूधको किंवा जामुनकी छालके काथको अनुपानरूपसे सेवन करे । इसके सेवनसे अतिसार, ज्वर, ग्रहणी, अरुचि, आम, शूल, रक्तस्राव, भ्रम, सूजन, रक्तातिसार और प्रबल ग्रहणी रोग नष्ट होता है ॥ २४–२६ ॥

लोकनाथरस ।

भस्म सूतस्य भागैकं चत्वारः शुद्धगन्धकात् ।
क्षिप्त्वा वराटिकागर्भे टङ्कणेन निरुध्य च ॥ २७ ॥
भाण्डे रुद्ध्वा पुटे पाच्यं स्वाङ्गशीतं समुद्धरेत् ।
लोकनाथरसो नाम क्षौद्रगुञ्जाचतुष्टयम् ॥ २८ ॥
नागरातिविषामुस्तदेवदारुवचान्वितम् ।
कषायमनुपानं तु सर्वातीसारनाशनः ॥ २९ ॥

पारेकी भस्म १ भाग, शुद्ध गन्धक ४ भाग लेकर दोनोंको एक कौडीमें भरकर उसके मुखको सुहागेसे बन्द करके मूषायंत्रमें रखकर पुटपाकविधिसे पकावे । जब पककर स्वांगशीतल होजाय तब कौडीको निकालकर पीसलेवे ।

पश्चात् इस लोकनाथनामक रसको चार चार रत्तीकी मात्रासे शहदमें मिलाकर सेवन करे और ऊपरसे सोंठ, अतीस, नागरमोथा, देवदारु और वच इनके क्वाथको पीवे तो इससे सब प्रकारके अतिसार नष्ट होते हैं ॥ २७-२९ ॥

वृहच्चिन्तामणिरस ।

शुद्धसूतं मृतं ताम्रं गन्धकं प्रतिकार्षिकम् ।
चूर्णयेद्विषकर्षार्द्धं विषार्द्धं तिन्तिडीफलम् ॥ १२० ॥
मर्दयेत् खल्वमध्ये तु चाम्लेन गोलकीकृतम् ।
गर्तं षडङ्गुलं कुर्यात् सर्वतो वर्तुलं शुभम् ॥ २१ ॥
नागवल्ल्याः क्षिपेत् पत्रमादौ पात्रे च गोलकम् ।
आच्छाद्य तत्र पत्रेण रुद्ध्वा गजपुटे पचेत् ॥ २२ ॥
स्वांगशीतं समुद्धृत्य सपत्रं च विशेषतः ।
कर्षार्द्धं मरिचं दत्त्वा कर्षार्द्धं तिन्तिडीफलम् ॥ २३ ॥
गुञ्जामितां वटीं कुर्याच्चिन्तामणिरसो महान् ।
अतीसारे त्रिदोषोत्थे संग्रहग्रहणीगदे ॥
अनुपानं विधातव्यं यथादोषानुसारतः ॥ २४ ॥

शुद्धपारा, ताँबेकी भस्म और शुद्धगन्धक यह प्रत्येक औषधि एकएक कर्ष शुद्ध मीठातेलिया ८ माशे और इमलीका गूदा ३ माशे लेवे । इन सबको एकत्र खरल करके गोलासा बनालेवे । फिर छः अंगुल गहरे और चारोंओरसे गोल ऐसे एक उत्तम पात्रको लेकर उसमें एक नागरवेलका पान रक्खे और पानके ऊपर उक्त गोलेको रखकर दूसरे पानसे उसे ढकदेवे । फिर अच्छेप्रकारसे उसके मुखको बन्द करके गजपुटमें रखकर पकावे । जब स्वांगशीतल होजाय तब निकालकर पानोंसहित उसको पीसलेवे । पश्चात् उसमें कालीमिरच और इमलीका आठ आठ माशे चूर्ण डालकर एक एक रत्तीकी गोलियाँ बनालेवे । इस रसको त्रिदोषज अतिसार और संग्रहणीरोगमें यथादोषानुसार उचित अनुपानके साथ सेवन करना चाहिये । इसको वृहच्चिन्तामणिरस कहते हैं ॥ १२०-२४ ॥

भुवनेश्वर रस ।

सैन्धवं त्रिफलां चैव यमानीं बिल्वपेशिकाम् ।
गृहधूमं गृहीत्वा च प्रत्येकं समभागिकम् ॥ २५ ॥

जलेन मर्दयित्वा तु माषमात्रां वटीं चरेत् ।
खादेत्तोयानुपानेन सर्वातीसारशान्तये ॥ ३६ ॥

सैंधानमक, हरड, आमला, बहेडा, अजवायन, बेलगिरी और घरका धुआँ इन सबको समानभाग लेकर जलके साथ खरलकर एकएक माशेकी गोलियाँ बनालेवे । इसकी एकएक गोली जलके साथ सेवन करनेसे सब प्रकारका अतीसार शान्त होता है ॥ ३५ ॥ ३६ ॥

जातीफलरस ।

पारदाभ्रकसिन्दूरं गन्धं जातीफलं समम् ।
कुटजस्य फलं चैव धूर्त्तबीजानि टङ्कणम् ॥ ३७ ॥
व्योषं मुस्ताऽभया चैव चूतबीजं तथैव च ।
त्रिल्वकं सर्व्वबीजं च दाडिमीफलवल्कलम् ॥ ३८ ॥
एतानि समभागानि निक्षिपेत् खल्लमध्यतः ।
विजयास्वरसेनैव मर्दयेत् श्लक्ष्णचूर्णितम् ॥ ३९ ॥
गुञ्जाफलप्रमाणां तु वटिकां कारयेद् भिषक् ।
एकां कुटजमूलत्वक्कषायेण प्रयोजयेत् ॥ १४० ॥

शुद्धपारा, अभ्रक, रससिन्दूर, शुद्ध गन्धक, जायफल, इन्द्रजौ, धतूरेके बीज सुहागा, सोंठ पीपल, मिरच, नागरमोथा, हरड, आमकी गुठली, बेलगिरी, शालके बीज, अनारदाने और अनारका बक्कल इन सबको समानभाग लेकर बारीक चूर्ण करलेवे । फिर भाँगके रसमें खूब बारीक खरल करके एक एक रत्तीकी गोलियाँ बनालेवे । इसकी एकएक गोली प्रतिदिन प्रातःकाल कुडेकी जडकी छालके क्वाथके साथ सेवन करे ॥ ३७–१४० ॥

आमातिसारं हरति कुरुते वह्निदीपनम् ।
मधुना बिल्वशुण्ठ्या च रक्तग्रहणिकां जयेत् ॥ ४१ ॥
शुण्ठीधान्यकयोगेन चातिसारं निहन्त्यसौ ।
जातीफलरसो ह्येष ग्रहणीगदहारकः ॥ ४२ ॥

यह रस आमातिसारको नष्ट करता है और जठराग्निको दीपन करता है । इस रसको शहद और बेलगिरीके साथ सेवन करनेसे रक्तजग्रहणी दूर होती है । सोंठ और धनियेके क्वाथके साथ सेवन करनेसे अतिसार एवं जायफलके क्वाथके साथ सेवन करनेसे संग्रहणी रोग नष्ट होता है ॥ ४१ ॥ ४२ ॥

अभयनृसिंहरस।

दरदं च विषं व्योषं जीरकं टङ्कणं समम्।
गन्धकं चाभ्रकं चैव भागैकं शुद्धसूतकम् ॥ ४३ ॥
आफूकं सर्वतुल्यं स्यान्मर्दयेन्निम्बुकद्रवैः।
एकैकं भक्षयेच्चानु जीरकं मधुना सह ॥ ४४ ॥
त्रिदोषोत्थमतीसारं सज्वरं वाथ विज्वरम्।
सर्वरूपमतीसारं संग्रहग्रहणीं जयेत्।
रसोऽभयनृसिंहोऽयमतीसारे सुपूजितः ॥ ४५ ॥

सिंगरफ, शुद्ध मीठा तेलिया, सोंठ, पीपल, मिरच, जीरा, सुहागा, शुद्ध गन्धक, अभ्रक और शुद्धपारा ये सब समान भाग और अफीम सबके बराबर भाग लेवे। फिर सबको नींबूके रसमें खरल कर एक एक रत्तीकी गोलियाँ बनालेवे। इनमेंसे प्रतिदिन १-१ गोली शहदके साथ सेवन करनेसे त्रिदोषज अतिसार, ज्वरसहित व ज्वररहित अतिसार और संग्रहणीरोग नष्ट होता है। यह अभयनृसिंहनामक रस अतिसाररोगकी परमोत्तम औषधि है। ॥ ४३-४५ ॥

आनन्दभैरवरस।

दरदं मरिचं टङ्कममृतं मागधी समम्।
श्लक्ष्णपिष्टं तु गुञ्जैकं रसमानन्दभैरवम् ॥ ४६ ॥
लेहयेन्मधुना चानु कुटजस्य फलत्वचः।
चूर्णितं कर्षमात्रं तु त्रिदोषोत्थातिसारजित् ॥ ४७ ॥
दध्यन्नं दापयेत् पथ्यं दध्याज तक्रमेव च
पिपासायां जलं देयं विजया च हिता निशि ॥ ४८ ॥

सिंगरफ, मिरच, सुहागा, शुद्धमीठा तेलिया और पीपल इनको समान भाग लेकर खूब बारीक पीसकर जलमें खरलकरके एक एक रत्तीकी गोलियाँ बनालेवे। इस आनन्दभैरव नामक रसकी एक एक गोली मधुके साथ सेवन करें, और ऊपरसे इन्द्रजौ तथा कुडेकी जड़की छालके चूर्णको एकएक तोला परिमाण लेकर शहदके साथ सेवन करे। इसके सेवन करनेसे त्रिदोषज अतिसार नष्ट होता है। इसपर बकरीके दूध, दही और मट्ठेके साथ भातका पथ्य देवे। प्यास लगनेपर जल पान करना और रात्रिमें भाँगको सेवन कराना उपयोगी है॥ ४६-४८ ॥

कर्पूररस।

हिङ्गुल चाहिफेनं च मुस्तकेन्द्रयवं तथा।
जातीफलं च कर्पूरं सर्वं संमर्द्य यत्नतः॥
जलेन वटिका कार्या द्विगुञ्जापरिमाणतः॥ ४९॥
ज्वरातिसारिणे चैव तथाऽतीसाररोगिणे।
ग्रहणीषट्प्रकारे च रक्तातीसार उल्बणे॥ १५०॥

हिंगुल, अफीम, नागरमोथा, इन्द्रजौ, जायफल और कपूर इन सबको समान भाग लेकर जलमें उत्तमप्रकारसे खरलकरके दोदो रत्तीकी गोलियाँ बनालेवे। यह कर्पूररस ज्वरातिसारवाले तथा साधारण अतिसारवाले रोगीके लिये एवं छः प्रकारकी संग्रहणी और प्रबलरक्तातिसारमें हितकारी है॥ ४९॥ १५०॥

बब्बूराद्यरिष्ट।

तुलाद्वयं च बब्बूरं चतुर्द्रोणे जले पचेत्।
द्रोणशेषे रसे शीते गुडस्य च तुलां क्षिपेत्॥ ५१॥
धातकीं षोडशपलां कृष्णां द्विपलिकां तथा।
जातीफलानि कक्कोलं त्वगेलापत्रकेशरम्॥ ५२॥
लवङ्गं मरिचं चैव पलिकान्युपकल्पयेत्।
मासं भाण्डे स्थितस्त्वेष बब्बूरारिष्टको जयेत्।
क्षयं कुष्ठमतीसारं प्रमेहश्वासकासकान्॥ ५३॥

बबूलकी छालको २०० पल लेकर चार द्रोण जलमें पकावे। जब पककर एक द्रोण जल शेष रहजाय तब उतारकर छानलेवे। फिर शीतल होजानेपर उसमें १०० पल गुड़ डाले एवं धायके फूल ६४ तोले, पीपल ८ तोले तथा जायफल, शीतलचीनी, इलायची, तेजपात, नागकेशर, लौंग और कालीमिरच इन प्रत्येकका चूर्ण चार चार तोले डालदेवे। सबको एक मिट्टीके पात्रमें भरकर और उसके मुँहको बन्द करके एक महीनेतक रखा रहने देवे तो यह बब्बूराद्यरिष्ट सिद्ध होता है। यह अरिष्ट क्षय, कुष्ठ, सर्वप्रकारके अतिसार प्रमेह, श्वास, कास आदि व्याधियोंको नष्ट करता है॥ ५१-५३॥

कुटजारिष्ट।

तुलां कुटजमूलस्य मृद्वीकार्द्धतुलां तथा।
मधूकपुष्पकाश्मर्योर्भागान् दशपलोन्मितान्॥ ५४॥

चतुर्द्रोणेऽम्भसः पक्त्वा द्रोणं चैवावशेषितम् ।
धातक्या विंशतिपलं गुडस्य च तुलां क्षिपेत् ॥ ५५ ॥
मासमात्रं स्थितो भाण्डे कुटजारिष्टसंज्ञितः ।
ज्वरान् प्रशमयेत्सर्वान् कुर्यात्तीक्ष्णं धनञ्जयम् ।
दुर्वारां ग्रहणीं हन्ति रक्तातीसारमुल्बणम् ॥ ५६ ॥

कुड़ेकी जड़की छाल सौ पल, दाख १० पल, महुएके फूल १० पल और कुम्भेरकी छाल १० पल लेकर चार द्रोण जलमें पकावे । जब पककर एक द्रोण जल शेष रहजाय तब उतारकर छानलेवे । फिर उस काथमें धायके फूल एक सेर और गुड़ सौ पल डालकर एक उत्तम मृत्तिकाके पात्रमें भरकर और उसके मुँहको बन्द करके एक महीनेतक रक्खा रहनेदेवे । फिर एक महीने पीछे इसको निकालकर छानलेवे । इसको कुटजारिष्ट कहते हैं । यह अरिष्ट यथोचित मात्रासे सेवन करनेपर सर्व प्रकारके ज्वर दुस्साध्य संग्रहणी और प्रबल रक्तातिसारको शीघ्र नष्ट करता है और अग्निको दीपन करता है ॥ ५४–५६ ॥

अहिफेनासव ।

तुलां मधुकमद्यस्य शुभे भाण्डे निधापयेत् ।
फणिफेनस्य कुडवं मुस्तकं पलसम्मितम् ॥ ५७ ॥
जातीफलं चेन्द्रयवं तथैलां तत्र दापयेत् ।
मासमात्रं स्थितो भाण्डे यत्नतः परिरक्षयेत् ।
हन्त्यतीसारमत्युग्रं विषूचीमपि दारुणाम् ॥ ५८ ॥

महुएकी मद्य सौ पल, अफीम १६ तोले एवं नागरमोथा, जायफल, इन्द्रजौ और इलायची ये प्रत्येक ४–४ तोले लेवे । सबको एकत्र पीसकर एक उत्तम मिट्टीके बरतनमें भरकर और उसके मुँहको अच्छे प्रकारसे बन्द करके एक महीनेतक रक्खा रहनेदेवे । तत्पश्चात् उसको छानकर उचित मात्रासे सेवन करे तो यह अहिफेनासव अत्यन्त भयंकर अतीसार और विषूचिकाको शमन करता है ॥

ग्रहण्यां ये रसा वाच्यास्तेऽतीसारे नियोजिताः ।
हन्युः सर्वमतीसारं शिवस्याज्ञा विशेषतः ॥ ५९ ॥

ग्रहणीरोगमें जो रस कहे जायंगे उन सबको विशेषकर अतिसाररोगमें भी प्रयोग करना चाहिये उनसे सर्व प्रकारके अतिसार नष्ट होते हैं ॥ ५९ ॥

अतीसारमें वर्ज्जनीय ।

स्नानाभ्यङ्गावगाहांश्च गुरुस्निग्धातिभोजनम् ।
व्यायाममग्निसन्तापमतिसारी विवर्ज्जयेत ॥ १६० ॥

अतिसारवाले रोगीको स्नान, तैलमर्दन, जलमें घुसकर स्नान करना एवं गुरुपाकी और स्निग्ध पदार्थोंका भोजन, अधिक भोजन, व्यायाम और अग्निका ताप यह सब तत्काल त्यागदेने चाहिये ॥ १६० ॥

अतीसारमें पथ्य ।

वमनं लङ्घनं निद्रा पुराणाः शालिषष्टिकाः ।
विलेपी लाजमण्डश्च मसूरतुवरीरसः ॥ ६१ ॥
शशैणलावहरिणकपिञ्जलभवा रसाः ।
सर्वे क्षुद्रझषाः शृङ्गी खल्लिशो मधुरालिका ॥ ६२ ॥
तैलं छागघृतक्षीरे दधि तक्रं गवामपि
दधिजं वा पयोजं वा नवनीतं गवाजयोः ॥ ६३ ॥
नवं रम्भापुष्पफलं क्षौद्रं जम्बूफलानि च ।
भव्यं महार्द्रकं विश्वं शालूकं च विकङ्कतम् ॥ ६४ ॥
कपित्थं वकुलं विल्वं तिन्दुकं दाडिमद्वयम् ।
तालकं कञ्चटदलं चाङ्गेरी विजयाऽरुणा ।
अन्नपानानि सर्वाणि दीपनानि लघूनि च ॥ ६५ ॥

वमन, लंघन, पुराने शालिधानोंके चावल और साँठीके चावल, विलेपी, खीलोंका माँड, मसूर और अरहरका यूष एवं खरगोश, कालेहिरन, लवा, हिरन और कपिञ्जल इनके मांसका रस, सर्व प्रकारकी छोटी मछलियाँ, शृंगीमछली, खालिश मछली, क्षुद्रमछली, गाय बकरीका घी, दूध, दही, मट्ठा, दहीका निकाला हुआ या दूधका निकाला हुआ नैनीघी या मक्खन, केलेके नवीन फल-फूल, शहद, जामुन, लिसोडा (किसीके मतमें कमरख), अदरख, सोंठ, भसीडा, कण्टाई, कैथ, मौलसिरीके फूल, बेलगिरी, तेंदु, खट्टे-मीठे दोनों प्रकारके अनार, ताडके अनार, ताडके फल, जल चौलाई, नोनियाका शाक, भाँग, रक्तवर्णकी चौलाईका शाक एवं सर्व प्रकारके हल्के और अग्निप्रदीपक अन्न पान अतिसार रोगमें हितकर हैं ॥ ६१-६५ ॥

अतीसारमें अपथ्य ।

स्वेदोऽञ्जनं रुधिरमोक्षणमम्बुपानं
स्नानं व्यवायमपि जागरधूमनस्यम् ।
अभ्यञ्जनं सकलवेगविधारणं च
रूक्षाण्यसात्म्यमशनं च विरुद्धमन्नम् ॥ ६६ ॥
गोधूममाषयववास्तुककाकमाची-
निष्पावकन्दमधुशिग्रुरसालपूगम् ।
कूष्माण्डतुम्बिबदरं गुरु चान्नपानं
ताम्बूलमिक्षुगुडमद्यमुपोदिका च ॥ ६७ ॥
द्राक्षाऽम्लवेतसफलं लशुनं च धात्री
दुष्टाम्बु मस्तु गृहवारि च नारिकेलम् ।
सस्नेहनं मृगमदोऽखिलपत्रशाकं
क्षारः सराणि सकलानि पुनर्नवा च ॥ ६८ ॥
एर्वारुकं लवणमम्लमपि प्रकोपि
वर्गोऽतिसारगदपीडितमानवेषु ॥ ६९ ॥

स्वेद देना, अंजन लगाना, रुधिर निकलवाना (फस्तखुलवाना), अधिक जलपान, स्नान, मैथुन, रात्रि जागरण, धूम्रपान, नस्य ग्रहण, तैलादिकी मालिश, मल-मूत्रादिके वेगोंको रोकना एवं रूखे, स्वभाव विरुद्ध, देश-काल व संयोग विरुद्ध पदार्थोंका भोजन, गेहूं, उडद, जौ, बथुआ, मकोय, सेमरकी फली, सहिंजनेकी फली, आम, सुपारी, पेठा, तोम्बी (लौकी), बेर और भारी अन्न पान, ताम्बूल, ईख, गुड, मदिरा, पोईका शाक, दाख, अमलबेत, लहसुन, सर्व प्रकारके कन्द शाक, आमला, दूषितजल, काँजी, नारियल, स्नेहद्रव्य, कस्तूरी, सब प्रकारके पत्तोंवाले शाक और पुनर्नवा, ककडी, खारवाले और सारक (दस्तावर) पदार्थ, नमकीन, खट्टेपदार्थ ये सब पदार्थ अतीसारमें अहितकारी हैं ॥ ६६–६९ ॥

इति भैषज्यरत्नावल्यां अतिसारचिकित्सा ।

ग्रहणीरोगकी चिकित्सा।

ग्रहणीमाश्रितं दोषमजीर्णवदुपाचरेत्।
अतिसारोक्तविधिना तस्यामं च विपाचयेत्॥ १॥

संग्रहणीरोगमें अजीर्णरोगकी समान चिकित्सा करनी चाहिये और अतिसाररोगमें कही हुई विधिके द्वारा अपक्व दोषोंको पकाना चाहिये॥ १॥

शरीरानुगते सामे रसे लंघनपाचनम्।
विशुद्धामाशयायास्मै पंचकोलादिभिर्युतम्॥
दद्यात्पेयादि लघ्वन्नं पुनर्योगांश्च दीपकान्॥ २॥

शरीरमें अपक्वरसके संचित होनेपर रोगीको लंघन कराके दोषोंको पचावे। फिर वमन और विरेचनादिके द्वारा आमाशयको शुद्धकरके पंचकोलआदिसे सिद्ध किये हुए पेयादि हल्के अन्न भोजनके लिये और अग्निप्रदीपक औषधियें सेवन करावे॥२॥

ग्रहणीदोषिणां तक्रं दीपनं ग्राहि लाघवात्।
पथ्यं मधुरपाकित्वान्न च पित्तप्रकोपनम्॥ ३॥
कषायोष्णविकाशित्वाद्रौक्ष्याच्चैव कफे हितम्।
वाते स्वाद्वम्लसान्द्रत्वात्सद्यस्कमविदाहि तत्॥ ४॥

संग्रहणीरोगवाले मनुष्योंको तक्र (मट्ठा) लघुपाकी (हल्का) होनेसे अग्निप्रदीपक, मलरोधक और पथ्य है। एवं मधुरपाकी होनेसे पित्तको कुपित नहीं करता तथा कषैला, उष्ण, विकाशी और रूक्ष होनेसे कफजन्यरोगोंमें हितकारी है और मधुर, अम्ल तथा सान्द्र (गाढा) होनेसे वातरोगोंमें उपयोगी है। तत्कालका प्रस्तुतकिया हुआ मट्ठा विशेष गुणकारी और दाहनाशक है॥ ३॥ ४॥

शुंठीं समुस्तातिविषां गुडूचीं पिबेज्जलेन क्वथितां समांशाम्।
मन्दानलत्वे सततामतापामामानुबन्धे ग्रहणीगदे च॥ ५॥

मन्दाग्नि, आमातिसार, आमाविबन्ध और आमयुक्तग्रहणीमें सोंठ, नागरमोथा, अतीस और गिलोय इनको समानभाग लेकर यथाविधि क्वाथ बनाकर पान करना चाहिये॥ ५॥

धान्यकातिविषोदीच्ययमानीमुस्तनागरम्
बलाद्विपर्णीबिल्वं च दद्याद्दीपनपाचनम्॥ ६॥

धनियाँ, अतीस, सुगन्धवाला, अजवायन, नागरमोथा, सोंठ, खिरेंटी, शालपर्णी, पृश्निपर्णी, और बेलगिरी इनका क्वाथ अग्निको दीपन करनेके लिये एवं दोषोंको पचानेके लिये देना चाहिये ॥ ६ ॥

श्रीफलशलाटुकल्को नागरचूर्णेन मिश्रितः सगुडः ।
ग्रहणीगदमत्युग्रं तक्रभुजा तु शीलितो जयति ॥ ७ ॥

कच्चे बेलके कल्क और सोंठके चूर्णके साथ गुड मिलाकर सेवन करनेसे और ऊपरसे तक्र पान करनेसे अत्यन्त प्रबल ग्रहणीरोग शीघ्र नष्ट होता है ॥ ७ ॥

नागराद्यचूर्ण ।

नागरातिविषामुस्तं धातकीं सरसाञ्जनाम् ।
वत्सकत्वक्फलं बिल्वं पाठां कटुकरोहिणीम् ॥ ८ ॥
पिबेत् समांशं तच्चूर्णं सक्षौद्रं तण्डुलाम्बुना ।
पैत्तिके ग्रहणीदोषे रक्तं यच्चोपवेश्यते ॥ ९ ॥
अर्शांस्यथ गुदे शूलं जयेच्चैव प्रवाहिकाम् ।
नागराद्यमिदं चूर्णं कृष्णात्रेयेण पूजितम् ॥ १० ॥

सोंठ, अतीस, नागरमोथा, धायके फूल, रसौंत, कुडेकी छाल, इन्द्रजौ, बेलगिरी, पाढ और कुटकी इन सबके समानभाग मिश्रित चूर्णको शहद और चावलोंके पानीके साथ सेवन करनेसे पित्तज संग्रहणी, रक्तज बवासीर, गुदशूल और प्रवाहिकारोग दूर होता है । यह नागराद्यचूर्ण कृष्णात्रेय करके पूजित है ॥ ८-१० ॥

पाठाद्यचूर्ण ।

पाठाबिल्वानलव्योषजम्बुदाडिमधातकी ।
कटुकातिविषामुस्तादार्वीभूनिम्बवत्सकैः ॥ ११ ॥
सर्वैरेतैः समं चूर्णं कौटजं तण्डुलाम्बुना ।
सक्षौद्रं च पिबेच्छर्दिज्वरातीसारशूलवान् ॥
तृड्दाहग्रहणीदोषारोचकानलसादजित् ॥ १२ ॥

---

१ "शीतकषायमानेन तण्डुलोदककल्पना । केऽप्यष्टगुणतोयेन प्राहुस्तण्डुलभावनाम् ॥"
तण्डुलोदककी विधि–शीतकषायके मानके अनुसार तण्डुलोदककी कल्पना करनी चाहिये । कोई वैद्य कहते हैं कि, एक भाग कुटेहुए चावलोंको ८ भाग जलमें रात्रिकोभिगोदेना चाहिये फिर उसको प्रातःकाल छानकर काममें लाना चाहिये ।

पाढ, बेलगिरी, चीतेकी जड, सोंठ, पीपल, मिरच, जामुनकी छाल, अनारके वकल, धायके फूल, कुटकी, अतीस, नागरमोथा, दारुहल्दी, चिरायता और इन्द्रजौ इन सबके चूर्णको समानभाग और सम्पूर्ण चूर्णकी समान कुडेकी जडकी छालका चूर्ण सबको एकत्र मिलाकर चावलोंके जल और मधुके साथ पान करनेसे वमन, ज्वरातीसार, शूल, तृषा, दाह, संग्रहणी, अरुचि, अग्निमान्द्य आदि रोग नष्ट होते हैं ॥ ११ ॥ १२ ॥

कपित्थाष्टकचूर्ण ।

यमानीपिप्पलीमूलचातुर्जातकनागरैः ।
मरिचाग्निजलाजाजीधान्यसौवर्चलैः समैः ॥ १३ ॥
वृक्षाम्लधातकीकृष्णाबिल्वदाडिमतिन्दुकैः ।
त्रिगुणैः षड्गुणसितैः कपित्थाष्टगुणैः कृतः ॥ १४ ॥
चूर्णोऽतीसारग्रहणीक्षयगुल्मगलामयान् ।
कासश्वासाग्निसादार्शःपीनसारोचकाञ्जयेत् ॥ १५ ॥

अजवायन, पीपलामूल, दालचीनी, इलायची, तेजपात, नागकेशर, सोंठ, मिरच, लालचीता, सुगन्धवाला, कालाजीरा, धनियाँ और कालानमक इन सब औषधियोंका चूर्ण एक एक भाग एवं तिन्तिडीक, धायके फूल, पीपल, बेलगिरी अनारदानें और तेंदु ये प्रत्येक तीन तीन भाग, मिश्री ६ भाग और कैथका गूदा ८ भाग लेवें । सबको एकत्र मिलाकर इस चूर्णको उपयुक्त मात्रासे सेवन करे तो अतीसार संग्रहणी, क्षय, गुल्म, गलेके रोग, खाँसी, श्वास, मन्दाग्नि, बवासीर, पीनस और अरुचि ये सब रोग दूर होते हैं ॥ १३-१५ ॥

स्वल्प-गङ्गाधरचूर्ण ।

मुस्तसैन्धवशुण्ठीभिर्धातकीलोध्रवत्सकैः ।
बिल्वमोचरसाभ्यां च पाठेन्द्रयवबालकैः ॥ १६ ॥
आम्रबीजं चातिविषा लज्जा चैभिः सुचूर्णितम् ।
क्षौद्रतण्डुलतोयाभ्यां जयेत्पीत्वा प्रवाहिकाम् ॥ १७ ॥
सर्वातिसारशमनं सर्वशूलनिषूदनम् ।
संग्रहग्रहणीं हन्ति सूतिकातङ्कमेव च ॥
एतद्गङ्गाधरं चूर्णं सरिद्वेगावरोधनम् ॥ १८ ॥

नागरमोथा, सैंधानमक, सोंठ, धायके फूल, लोध, कुडेकी छाल, बेलगिरी, मोचरस, पाढ, इन्द्रजौ, सुगन्धवाला, आमकी गुठलीकी मींग, अतीस और लज्जावन्ती इन सब औषधियोंको समानभाग लेकर चूर्ण बनालेवे । इस चूर्णको यथोचित मात्रासे शहद और चावलोंके जलके साथ पान करनेसे प्रवाहिका रोग दूर होता है। यह गंगाधरचूर्ण सर्वप्रकारके अतिसार, समस्त शूल, संग्रहणी और प्रसूताके सम्पूर्ण रोगोंको दूर करताहै ॥१६-१८॥

मध्यम गङ्गाधरचूर्ण।

बिल्वं मोचरसं पाठा धातकी धान्यमेव च ।
ह्रीबेरं नागरं मुस्तं तथैवातिविषा समम् ॥ १९ ॥
अहिफेनं लोध्रकं च दाडिमं कुटजं तथा ।
पारदं गन्धकं चैव समभागं विचूर्णयेत् ॥ २० ॥
तक्रेण खादयेत्प्रातश्चूर्णं गंगाधरं महत् ।
ज्वरमष्टविधं हन्यादतीसारं सुदुस्तरम् ॥
ग्रहणीं विविधां चैव कोष्ठव्याधिहरं परम् ॥ २१ ॥

बेलगिरी, मोचरस, पाढ, धायके फूल, धनियाँ, सुगन्धवाला, सोंठ, नागरमोथा, अतीस, अफीम, लोध, अनारदाना, कुडेकी छाल, शुद्धपारा और शुद्ध गन्धक इन सबको समान भाग लेवे । प्रथम पारे और गन्धककी कज्जली करलेवे । फिर सब औषधियोंको एकत्र कूट पीसकर बारीक चूर्ण करके उसमें उक्त कज्जलीको खरल करलेवे । इसमेंसे प्रतिदिन प्रातःकाल तीनतीन माशे चूर्णको मट्ठेके साथ सेवन करे तो यह मध्यम गंगाधरचूर्ण आठ प्रकारके ज्वर, दारुण अतिसार, अनेक प्रकारकी संग्रहणी और अत्यन्तप्रबल कुष्ठ इन सब व्याधियोंको हरता है ॥ १९-२१ ॥

बृहद्गङ्गाधरचूर्ण।

बिल्वं शृङ्गाटकदलं दाडिमं दलमेव च ।
समुस्ताऽतिविषा चैव सजश्वेतं च धातकी ॥ २२ ॥
मरिचं पिप्पली शुण्ठी दार्वी भूनिम्बनिम्बकम् ।
जम्बू रसाञ्जनं चैव कुटजस्य फलं तथा ॥ २३ ॥
पाठा समङ्गा ह्रीबेरं शाल्मलीवेष्टमेव च ।
शक्राशनं भृङ्गराजचूर्णं देयं समं समम् ॥ २४ ॥

कुटजस्य त्वचश्चूर्णं सर्वचूर्णसमं मतम् ।
एतद्गङ्गाधरं नाम बृहच्चूर्णं महागुणम् ॥ २५ ॥

बेलगिरी, सिंघाडेके पत्ते, अनारके कोमल पत्ते, नागरमोथा, अतीस, राल, धायके फूल, मिरच, पीपल, सोंठ, दारुहल्दी, चिरायता, नीमकी छाल, जामुनकी छाल, रसौंत, इन्द्रजौ, पाढ, लज्जावंती, सुगन्धवाला, मोचरस, भाँग और भांगरा इन सबका चूर्ण समानभाग और समस्त चूर्णकी बराबर कुडेकी छालका चूर्ण लेवे । सबको एकत्र बारीक पीसकर कपडछान करलेवे । इसको प्रतिदिन उचित मात्रासे बकरीके दूध या मांड अथवा शहदके साथ मिलाकर सेवन करे । यह बृहद्गंगाधरनामवाला चूर्ण विशेष गुणकारी है ॥ २२–२५ ॥

नानावर्णमतीसारं चिरजं बहुरूपिणम् ।
दुर्वारां ग्रहणीं हन्ति तृष्णां कासं च दुर्जयम् ॥ २६ ॥
ज्वरं च विविधं हन्ति शोथं चैव सुदारुणम् ।
अरुचिं पाण्डुरोगं च हन्यादेव न संशयः ॥
छागीदुग्धेन मण्डेन मधुना वाथ लेहयेत् ॥ २७ ॥

यह चूर्ण विविधप्रकारके, बहुतदिनोंके पुराने और त्रिदोषज अतिसार, दुःसाध्य ग्रहणी, तृषा, प्रबल खाँसी, अनेक प्रकारके ज्वर, दारुण शोथ, अरुचि, पाण्डुरोग आदि व्याधियोंको निस्सन्देह नष्ट करनेवाला है ॥ २६ ॥ २७ ॥

वृद्धगङ्गाधरचूर्ण ।

मुस्तारलुकशुण्ठीभिर्धातकीलोध्रबालकैः ।
बिल्वमोचरसाभ्यां च पाठेन्द्रयववत्सकैः ॥ २८ ॥
आम्रबीजसमङ्गातिविषायुक्तैश्च चूर्णितैः ।
मधुतण्डुलपानीयं पीतं हन्ति प्रवाहिकाम् ॥ २९॥
हन्ति सर्वानतीसारान् ग्रहणीं हन्ति वेगतः ।
वृद्धगङ्गाधरं चूर्णं रुन्ध्याद्गीर्वाणवाहिनीम् ॥ ३० ॥

नागरमोथा, अरलूकी छाल, सोंठ, धायके फल, लोध, सुगन्धवाला, बेलगिरी, मोचरस, पाढ, इन्द्रजौ, कुडेकी छाल, आमकी गुठलीकी मींग, लज्जावंती और अतीस इन सबके समान भाग मिश्रित चूर्णको शहद और चावलोंके जलके साथ सेवन करनेसे प्रवाहिका और सर्वप्रकारके अतीसार नष्ट होते हैं । यह वृद्धगंगाधरचूर्ण गङ्गाके समान वेगवाली संग्रहणीको तत्काल दूर करताहै ॥

स्वल्पलवङ्गाद्यचूर्ण ।

लवङ्गातिविषामुस्तं बिल्वं पाठा च शाल्मली ।
जीरकं धातकीपुष्पं लोध्रेन्द्रयवबालकम् ॥ २१ ॥
धान्यं सर्ज्जरसं शृङ्गी पिप्पली विश्वभेषजम् ।
समङ्गा यावशूकं च सैन्धवं सरसाञ्जनम् ॥ २२ ॥
एतानि समभागानि श्लक्ष्णचूर्णानि कारयेत् ।
शमयेदग्निमान्द्यं च संग्रहग्रहणीं जयेत् ॥ २ ॥
नानावर्णमतीसारं सशोथां पाण्डुकामलाम् ।
इदमष्ठीलिकां हन्ति कासं श्वासं ज्वरं वमिम् ॥
सर्वरोगं निहन्त्याशु भास्करस्तिमिरं यथा ॥ २४ ॥

लौंग, अतीस, नागरमोथा, बेलगिरी, पाढ, सेमलकी छाल, जीरा, धायके फूल, लोध, इन्द्रजौ, सुगन्धबाला, धनियाँ, राल, काकडासिंगी, पीपल, सोंठ, लज्जावन्ती, जवाखार, सेंधानमक और रसौत इन सबको समान भाग लेकर बारीक चूर्ण कर लेवे। यह चूर्ण मन्दाग्नि, संग्रहणी अनेक कवर्णवाला और शोथयुक्त अतिसार, पाण्डु, कामला, अष्ठीलिका, श्वास, खाँसी, ज्वर, वमन औ। अनेकप्रम.ारके रोगोंको उसी प्रकार तत्काल नष्ट करता है जैसे सूर्यका प्रकाश अन्धकारको तत्क्षण दूर कर देता है ॥ २१–२४ ॥

बृहल्लवङ्गाद्यचूर्ण ।

लवङ्गातिविषामुस्तं पिप्पली मरिचानि च ।
सैन्धवं हबुषा धान्यं कट्फलं पुष्करं तथा ॥ २५ ॥
जातीकोषफलाजाजीसौवर्चलरसाञ्जनम् ।
धातकी मोचकं पाठा पत्रं तालीशकेशरम् ॥ २६ ॥
चित्रकं च विडं चैव तुम्बुरुर्बिल्वमेव च ।
त्वगेलापिप्पलीमूलमजमोदा यमानिका ॥ २७ ॥
समङ्गा वत्सकं शुण्ठी दाडिमं यावशूकजम् ।
निम्बं सर्ज्जरसं क्षारं सामुद्रं टङ्कणं तथा ॥ २८ ॥
ह्रीबेरं कुटजं चैव जम्ब्वाम्रं कटुरोहिणी ।
अभ्रकं पुटितं लौहं शुद्धगन्धकपारदम् ॥ २९ ॥

एतानि समभागानि श्लक्ष्णचूर्णानि कारयेत्।
मधुना वा लिहेच्चूर्णं पिबेत्तण्डुलवारिणा ॥ ४० ॥
सर्वदोषहरं चैव ग्रहणीं हन्ति दुस्तराम्।
वातिकीं पैत्तिकीं चैव श्लैष्मिकीं सान्निपातिकीम् ॥४१॥

लौंग, अतीस, नागरमोथा, पीपल, मिरच, सैंधानमक, हाऊबेर, धनियाँ, कायफल, पुहकरमूल, जावित्री, जायफल, कालाजीरा, कालानमक, रसौत, धायके फूल, मोचरस, पाढ, तेजपात, तालीसपत्र, नागकेशर, चीतेकी जड, बिरियासंचरनमक, तुम्बुरु, बेलगिरी, दालचीनी, इलायची, पीपलामूल, अजमोद, अजवायन, लज्जावन्ती, इन्द्रजौ, सोंठ, अनारका बक्कल, जवाखार, नीमकी छाल, राल, सज्जी, समुद्रफेन, सुहागा, सुगन्धवाला, कुडेकी छाल, जामुनकी छाल, आमकी छाल, कुटकी, अभ्रककी भस्म, लोहेकी भस्म शुद्ध गन्धग और शुद्ध पारा इन सबके समान भाग लेवे प्रथम पारे और गन्धककी कज्जली बनावे फिर सबको एकत्र खरल करके बारीक चूर्ण करलेवे। इस चूर्णको शहद अथवा चावलोंके जलके साथ सेवन करनेसे सब प्रकारके रोग, वातज, पित्तज, कफज और त्रिदोषज संग्रहणी नष्ट होती है ॥ ३९–४१ ॥

पक्वापक्वमतीसारं नानावर्णं सवेदनम्।
कृष्णारुणं च पीतं च मांसधावनसन्निभम् ॥ ४२ ॥
ज्वरारोचकमन्दाग्निं कासं श्वासं वमिं तथा।
अम्लपित्तं तथा हिक्कां प्रमेहं च हलीमकम् ॥ ४३ ॥
पाण्डुरोगं च विष्टम्भमर्शांसि विविधानि च।
प्लीहगुल्मोदरानाहशोथातीसारपीनसान् ॥ ४४ ॥
आमवातं तथाऽजीर्णं संग्रहग्रहणीं जयेत्।
उदरं प्रदरं चैव लवङ्गाद्यमिदं शुभम् ॥ ४५ ॥

एवं पक्वातिसार, आमातिसार, अनेकवर्णका पीडायुक्त काला, लाल, पीला अथवा मांसके धोवनकी समान अतिसार, ज्वर, अरुचि, मन्दाग्नि, खाँसी, श्वास, वमन, अम्लपित्त, हिचकी, प्रमेह, हलीमक, पाण्डुरोग, विबन्ध, अर्श, प्लीहा, गुल्म, उदररोग, अफारा, शोथयुक्त अतीसार, पीनस, आमवात, अजीर्ण, दारुण संग्रहणी, उदरविकार और प्रदररोग इन सब व्याधियोंको यह लवंगाद्य चूर्ण तत्काल नष्ट करता है ॥ ४२–४५ ॥

महालवङ्गाद्यचूर्ण ।

लवङ्गं जीरकं कौन्ती सैन्धवं त्रिसुगन्धिकम् ।
अजमोदा यमानी च मुस्तकं सकटुत्रयम् ॥ ४६ ॥
त्रिफला शतपुष्पा च पाठा भूनिम्बगोक्षुरम् ।
जातीकोषफले दार्वी नलदं चन्दनं मुरा ॥ ४७ ॥
शठी मधुरिका मेथी टङ्कणं कृष्णजीरकम् ।
क्षारद्वयं बालकं च बिल्वं पौष्करकं तथा ॥ ४८ ॥
चित्रकं पिप्पलीमूलं विडङ्गं सधनीयकम् ।
रसाभ्रगन्धकं लोहं समं सर्वं विचूर्णितम् ॥ ४९ ॥

लौंग, जीरा, रेणुका, सैंधानमक, दालचीनी, तेजपात, इलायची, अजमोद, अजवायन, नागरमोथा, सोंठ, पीपल, मिरच, हरड, आमला, बहेडा, सोया, पाढ, चिरायता, गोखुरु, जावित्री, जायफल, दारुहल्दी, खस, रक्तचन्दन, मुरामांसी, कचूर, सौंफ, मेथी, सुहागा, कालजीरा जवाखार, सज्जी, सुगन्धबाला, बेलगिरी, पुहकरमूल, चीतेकी जड, पीपलामूल, वायविडङ्ग, धनियाँ, शुद्धपारा, अभ्रक, शुद्ध गन्धक और लोहेकी भस्म इन सबको समान भाग लेकर बारीक चूर्ण करलेवे ॥ ४६-४९ ॥

उष्णोदकानुपानेन मन्दाग्नेर्दीपनं परम् ।
शीततोयानुपानैर्वा बुद्ध्वा दोषगतिं भिषक् ॥ ५० ॥
आमातिसारं ग्रहणीं चिरकालोत्थितामपि ।
शूलं विष्टम्भमानाहं विषूचीं शोथकामले ॥ ५१ ॥
हलीमकं पाण्डुरोगं हन्ति कासं विशेषतः ।
लवङ्गाद्यं महच्चूर्णं शर्करासहितं पिबेत् ॥ ५२ ॥
आध्मानं शमयेच्छीघ्रं लवंगस्यानुपानतः ।
अश्विभ्यां निर्मितं ह्येतल्लोकानुग्रहकाङ्क्षया ॥ ५३ ॥

इस चूर्णको गरम जलके साथ पान करनेसे अग्नि अत्यन्त दीपन होती है और दोषोंके बलाबलको विचारकर शीतलजलके साथ पान करनेसे आमयुक्त अतिसार, पुरानी संग्रहणी, शूल, विबन्ध, आनाह, विषूचिका, सूजन, कामला, हलीमक, पाण्डुरोग और विशेषकर खाँसी ये सब रोग शीघ्र नष्ट होते हैं । यह महालवंगाद्यचूर्ण मिश्रीके साथ सेवन करनेसे और इसपर लौंगके जलका अनुपान करनेसे अफारेको

तत्काल शमन करता है। इस चूर्णको सांसारिकजीवोंके ऊपर अनुग्रह करनेकी इच्छासे अश्विनीकुमारोंने निर्माण किया है ॥ ९०-९३ ॥

स्वल्पनायिकाचूर्ण।

त्रिशाणं पञ्चलवणं प्रत्येकं त्र्यूषणं पिचु।
गन्धकान्माषका अष्टौ चत्वारो माषका रसात् ॥ ९४ ॥
इन्द्राशनं पलं शाणत्रितयाधिकमिष्यते।
खादेन्मिश्रीकृताच्छाणमनुपेयं च काञ्जिकम् ॥ ९५ ॥
माषकादिक्रमेणैवमनुयोज्यं रसायनम्।
अत्यन्ताग्निकरं चैतद्भोजनं सार्वकामिकम् ॥ ९६ ॥
प्रसिद्धा योगिनी नारी तया प्रोक्तं रसायनम्।
ग्रहणीनाशनं ह्येतदग्निसन्दीपनं परम् ॥ ९७ ॥

पाँचों नमक प्रत्येक एकएक तोला, सोंठ, पीपल, मिरच ये प्रत्येक दो दो तोले, शुद्ध गन्धक ८ माशे, शुद्धपारा ४ माशे मिलाकर और भाँग पांच तोले लेवे। प्रथम गन्धककी कज्जली बनाकर फिर सबको एकत्र खूब बारीक पीसलेवे। इस कांजीका अनुपान करे तो इससे अग्निकी अत्यन्त वृद्धि होती है और संग्रहणी रोग दूर होता है। इसपर यथेच्छ भोजन करना चाहिये। इस रसायनका एक प्रसिद्ध योगिनी स्त्रीने वर्णन किया है ॥ ९४-९७ ॥

मध्यमनायिकाचूर्ण।

कर्षं गन्धकमर्द्धपारदयुतं कुर्याच्छुभां कज्जलीं
द्व्यक्षांशं त्रिकटोश्च पञ्चलवणात् सार्द्धं च कर्षं पृथक्।
सार्द्धाक्षं द्विपलं विचूर्ण्य सकलं शक्राशनान्मिश्रितात्
खादेच्छाणमतोऽनु काञ्जिकपलं मन्दाग्निसन्दीपनम् ॥
स्वेच्छं भोजनतो रसायनमिदं कण्ठादिकोपद्रवे
पेयं चात्र तु काञ्जिकं वदति सा नारी महायोगिनी ॥ ९८ ॥
हन्याद्वातं च पित्तं कफविकृतिमतीसारमत्युग्ररूपं
कासं श्वासं च शूलं ज्वरमुदररुजो राजयक्ष्माणमुग्रम्।
प्लीहानं चामवातं पडपि च गुदजान्कुष्ठरोगं समग्रं
वातास्रं कण्ठरोगानिदमिह कथितं दीपनं जाठराग्नेः ॥ ९९ ॥

शुद्धगन्धक एक तोला और शुद्धपारा ६ माशे इन दोनोंको एकत्र मिलाकर कज्जली बनालेवे। फिर सोंठ, मिरच, पीपल ये प्रत्येक दो दो तोले एवं पाँचों नमक डेढ डेढ तोले और भाँगका चूर्ण साढे आठ तोले लेवे। इन सबको एकत्र मिलाकर बारीक चूर्ण करलेवे। इस चूर्णको प्रतिदिन चार माशे परिमाण सेवन करे और पीछेसे एक पल कांजीको पान करे। इसके सेवन करनेसे मन्दहुई अग्नि अत्यन्त दीपन होती है। एवं वातज, पित्तज और कफज भयंकर अतिसार, खाँसी, श्वास, शूल, ज्वर, उदररोग, राजयक्ष्मा, प्लीहा, आमवात, छः प्रकारके गुदाके रोग, सम्पूर्ण कुष्ठरोग, वातरक्त और कण्ठरोग ये सब तत्काल नष्ट होते हैं। इसपर यथेच्छ भोजन करना चाहिये ॥ ५८ ॥ ५९ ॥

बृहन्नायिकाचूर्ण।

चित्रकं त्रिफला व्योषं विडंगं रजनीद्वयम्।
भल्लातकं यमानी च हिंगुर्लवणपञ्चकम ॥ ६० ॥
गृहधूमो वचा कुष्ठं घनमभ्रकगन्धकम्।
क्षारत्रयं चाजमोदा पारदो गजपिप्पली ॥ ६१ ॥
अमीषां चूर्णकं यावत् तावच्छक्राशनस्य च ॥ ६२ ॥
अभ्यर्च्य नायिकां प्रातर्योगिनीं कामरूपिणीम्।
बिडालपदमात्रं तु भक्षयेदस्य गुण्डकम् ॥ ६३ ॥

चीतेकी जड, हरड, आमला, बहेडा, सोंठ, पीपल, मिरच, वायविडङ्ग, हलदी, दारुहल्दी, भिलावे, अजवायन, हींग, पाँचों नमक, घरका धुआँ, वच, कूट, नागरमोथा, अभ्रक, शुद्ध, गन्धक, जवाखार, सज्जी, सुहागा, अजमोद, शुद्धपारा और गजपीपल इन सबको समान भाग लेकर प्रथम पारे और गन्धककी कज्जली बनालेवे। फिर सबको एकत्र मिलाकर चूर्ण करलेवे। फिर इन औषधियोंका जितना चूर्ण हो, उसीकी बराबर भाँगका चूर्ण मिलाकर सबको एकमएक करके एक उत्तम पात्रमें भरकर रखदेवे। प्रतिदिन प्रातःकाल कामरूपधारिणी योगिनीकी पूजा कर इस चूर्णको एकएक तोला परिमाण भक्षण करे। इसपर कांजी, चावलोंका जल, उडदका यूष, अभ्यङ्ग स्नान, मांसका भोजन, मट्ठा, भुनीहुई मछली और दही ये सब हितकर हैं ॥ ६०–६३ ॥

मन्दाग्निकासदुर्नामप्लीहपाण्डुचिरज्वरान्।
प्रमेहशोथविष्टम्भसंग्रहग्रहणीं जयेत् ॥ ६४ ॥

सर्वातीसारहरणः सर्वशूलनिषूदनः।
आमवातगदोच्छेदी सूतिकातङ्कनाशनः ॥ ६५ ॥
न च ते व्याधयः सन्ति वातपित्तकफोद्भवाः।
मान्द्यं हन्यादसौ सिद्धो गुण्डको नायिकाकृतः ॥ ६६ ॥
वार्यन्नमाषमभ्यङ्गस्नानं पिशितभोजनम्।
काञ्जिकाम्लं सदा पथ्यं दग्धमीनस्तथा दधि ॥
काष्ठमप्युदरे तस्य भक्षणाद्याति जीर्णताम् ॥ ६७ ॥

यह वृहन्नायिका , मन्दाग्नि, खाँसी, बवासीर, प्लीहा, पाण्डु, जीर्णज्वर, प्रमेह, शोथ, विष्टम्भ, प्रबल संग्रहणी, सब प्रकारका अतीसार, सम्पूर्ण शूलरोग, आमवात, प्रसूतिकाके विविध प्रकारके रोग इत्यादि दुस्तर व्याधियोंको शीघ्र नष्ट करता है। इस चूर्णसे वातज, पित्तज और कफज किसी प्रकारके भी रोग नहीं ठहर सकते और इससे अग्नि इतनी तीव्र होजाता है कि, भक्षण किया हुआ काष्ठ भी पच जाता है ॥ ६४-६७ ॥

ग्रहणीशार्दूलचूर्ण।

रसगन्धकलौहाभ्रं हिङ्गुर्लवणपञ्चकम्।
हरिद्रे कुष्ठकं चैव वचा मुस्तविडङ्गकम् ॥ ६८ ॥
त्रिकटु त्रिफला चित्रमजमोदा यमानिका।
गजोपकुल्या क्षाराणि तथैव गृहधूमकम् ॥ ६९ ॥
एतेषां कार्षिकं चूर्णं विजयाचूर्णकं समम्।
माषद्वयमिदं चूर्णं शालितण्डुलवारिणा ॥ ७० ॥
भक्षयेत् प्रातरुत्थाय ग्रहणीगदनाशनम्।
अग्निं च कुरुते दीप्तं वडवानलसन्निभम् ॥ ७१ ॥
सर्वातीसारशमनं तृष्णाज्वरविनाशनम्।
पक्वापक्वमतीसारं नानावर्णं सवेदनम् ॥ ७२ ॥
आमातीसारमखिलं विशेषात् श्वयथुं जयेत्।
असाध्यां ग्रहणीं हन्ति पाण्डुप्लीहचिरज्वरान् ॥
ग्रहणीशार्दूलचूर्णं सर्वरोगकुलान्तकम् ॥ ७३ ॥

शुद्ध पारा, शुद्ध गन्धक, लोहा, अभ्रक, हींग, पाँचोंनमक, हल्दी, दारुहल्दी, कूठ, बच, नागरमोथा, वायविडङ्ग, सोंठ, पीपल, मिरच, हरड, आमला, बहेडा, चीतेकी जड, अजमोद, अजवायन, गजपीपल, सज्जी, जवाखार, सुहागा और घरका धुआँ इन प्रत्येकका चूर्ण एक एक तोला और समस्त चूर्णके बराबर भाँगका चूर्ण लेकर सबको एकत्र मिलालेवे। इसमेंसे प्रतिदिन प्रातःकाल दो दो माशे चूर्ण शालिधानोंके चावलोंके पानीके साथ सेवन करनेसे संग्रहणीरोग दूर होता है और अग्नि बडवानलकी समान अत्यन्त दीपन होती है। एवं सब प्रकारके अतीसार और सब-प्रकारका आमातिसार, तृषा, ज्वर, पक्क अथवा अपक अनेक वर्णका और पीडा-युक्त अतिसार, सूजन, असाध्य ग्रहणी, पाण्डु, प्लीहा, जीर्णज्वर एवं अन्यान्य सर्व प्रकारके रोगसमूहको नाश करनेके लिये विशेषकर यह ग्रहणीशार्दूलचूर्ण सिंहके समान है ॥ ६८–७३ ॥

जातीफलाद्यचूर्ण।

जातीफलं विडङ्गानि चित्रकं तगरं तथा।
तालीशं चन्दनं शुण्ठी लवंगं चोपकुञ्चिका ॥ ७४ ॥
कर्पूरं चाभया धात्री मरिचं पिप्पली तुगा।
एषामक्षसमान् भागाँश्चातुर्जातकसम्मितान् ॥ ७५ ॥
ग्रहणीमतिसारं च वह्निमान्द्यं सपीनसम्।
वातश्लेष्मभवान् रोगान् प्रतिश्यायांश्च दुःसहान् ॥ ७६ ॥

जायफल, वायविडङ्ग, चीतेकी जड, तगर, तालीसपत्र, लालचन्दन, सोंठ, लौंग, कालाजीरा, कपूर, हरड, आमला, मिरच, पीपल, वंशलोचन, दारचीनी, तेजपात, इलायची और नागकेशर इन सबको एकएक तोला लेकर बारीक पीसकर चूर्ण करलेवे। यह चूर्ण ग्रहणी, अतिसार, मन्दाग्नि, पीनस, वात–कफजन्यरोग और दुस्साध्य प्रतिश्यायको शीघ्र नष्ट करताहै ॥ ७४–७६ ॥

जीरकाद्यचूर्ण।

जीरकं टङ्कणं मुस्तं पाठा बिल्वं सधान्यकम्।
बालकं शतपुष्पा च दाडिमं कुटजं तथा ॥ ७७ ॥
समङ्गा धातकीपुष्पं व्योषं चैव त्रिजातकम्।
मोचारसं कलिंगं च व्योम गन्धकपारदौ ॥ ७८ ॥
यावन्त्येतानि चूर्णानि तावज्जातीफलानि च।
एतत् प्राशितमात्रेण ग्रहणीं दुस्तरां जयेत् ॥ ७९ ॥

अतीसारं निहन्त्याशु सामं नानाविधं तथा।
कामलां पाण्डुरोगं च मन्दाग्निं च विशेषतः॥
जीरकाद्यमिदं चूर्णमगस्त्येन प्रकाशितम्॥ ८०॥

जीरा, सुहागा, नागरमोथा, पाढ, बेलगिरी, धनियाँ, सुगन्धवाला, सोया, अनारके बकल, कुडेकी छाल, लज्जावंती, धायके फूल, सोंठ, पीपल, मिरच, दारचीनी, तेजपात, इलायची, मोचरस, इन्द्रजौ, अभ्रक, शुद्ध पारे और शुद्ध गन्धककी कज्जली इन सबके चूर्णको समान भाग लेवे और जितना इन सब औषधियोंका चूर्ण हो उस सबकी बराबर जायफलका चूर्ण लेकर मिलालेवे। इस चूर्णको एक-एक माशेकी मात्रासे सेवन करतेही कठिन संग्रहणी; आमयुक्त तथा विविधप्रकारका अतिसार, कामला, पाण्डुरोग और विशेषकर मन्दाग्नि: ये सब रोग तत्काल दूर होते हैं। इस जीराकाद्यचूर्णको अगस्त्यऋषिने प्रकाशित किया है॥७७-८०॥

मार्कण्डेयचूर्ण।

शुद्धसूतं च गन्धं च हिङ्गुलं टङ्कणं तथा।
व्योषं जातीफलं चैव लवङ्गं तेजपत्रकम्॥ ८१॥
एलाबीजं चित्रकं च मुस्तकं गजपिप्पली।
नागरं सजलं चाभ्रं धातक्यतिविषा तथा॥ ८२॥
शिग्रुजं शाल्मलं चैवमहिफेनं पलाशकम्।
एतानि समभागानि श्लक्ष्णचूर्णानि कारयेत्॥ ८३॥
खादेदस्मात् प्रतिदिनं माषकं सितया सह।
संग्रहग्रहणीं हन्ति मन्दाग्निं च विनाशयेत्॥ ८४॥
धातुवृद्धिं वयोवृद्धिं बलपुष्टिं करोत्यपि।
मार्कण्डेयमिदं चूर्णं महादेवेन निर्मितम्॥ ८५॥

शुद्धपारे और शुद्ध गन्धककी कज्जली, सिंगरफ, सुहागा, सोंठ, पीपल, मिरच, जायफल, लौंग, तेजपात, इलायचीके दाने, चीतेकी जड, नागरमोथा, गजपीपल, सोंठ, सुगन्धवाला, अभ्रक, धायके फूल, अतीस, सहिंजनेके बीज, मोचरस और अफीम ये प्रत्येक औषधि चार चार तोले लेकर सबका एकत्र बारीक चूर्ण करलेवे। इसमेंसे प्रतिदिन एक एक माशा चूर्ण चार तोले मिश्रीके साथ मिलाकर सेवन करे तो यह चूर्ण प्रबल संग्रहणी और अग्निकी मन्दताको नष्ट करता है और धातुकी

वृद्धि, आयुकी वृद्धि, बलकी वृद्धि तथा पुष्टिको करता है। इस मार्कण्डेय चूर्णको श्रीमहादेवजीने कहा है॥ ८१-८६॥

कश्चटावलेह।

प्रस्थे पचेत् कंचटतालमूल्यौ सितार्द्धप्रस्थं शृतपादशेषे।
ततोऽक्षमात्राणि समानि दद्याच्चूर्णानि धीरो विधिवत्तदेषाम्॥
समङ्गा धातकी पाठा बिल्वं मुस्ताऽथ पिप्पली।
शक्राह्वातिविषाक्षारसौवर्चलरसाञ्जनम्॥ ८७॥
शाल्मलीवेष्टकं चैव सर्वं सिद्धे निधापयेत्।
शीते च मधुनश्चात्र कुडवार्द्धं विनिक्षिपेत्॥ ८८॥

जलपीपल और मूसली इन दोनोंको आठ आठ पल लेकर एक प्रस्थ जलमें पकावे। जब पककर चौथाई भाग जल शेष रहजाय तब उतारकर छानलेवे। फिर उस क्राथमें ३२ तोले मिश्री और लज्जावन्ती, धायके फूल, पाठ, बेलगिरी, नागरमोथा, पीपल, भाँग, अतीस, जवाखार, कालानमक, रसौंत और मोचरस इन प्रत्येक औषधिको डालकर पकावे। जब पककर अवलेहके समान गाढा होजाय तब चूर्णको बारीक पीसकर डालदेवे। जब अच्छे प्रकारसे पककर सिद्ध होजाय तब नीचे उतारकर शीतल होजानपर उसमें ८ तोले शहद मिलादेवे॥ ८६-८८॥

अस्य मात्रां प्रयुञ्जीत यथाकालप्रमाणतः।
सर्वातिसारं शमयेत् संग्रहग्रहणीं तथा॥ ८९॥
अम्लपित्तकृतं दोषमुदरं सर्वरूपिणम्।
विकारान् कोष्ठजान् हन्ति हन्यात् शूलमरोचकम्॥९०॥

इस अवलेहको दोष, काल और अवस्थाका विचारकर उपयुक्त मात्रासे सेवन करे तो यह सब प्रकारके अतिसार, संग्रहणी, अम्लपित्त, अजीर्ण, उदररोग, कोष्ठगतरोग, शूल, अरुचि एवं अन्यान्य सर्वप्रकारके विकारोंको दूर करता है॥ ८९॥ ९०॥

दशमूलगुड।

दशमूलीपलशतं जलद्रोणे विपाचयेत्।
तेन पादावशेषेण पचेद् गुडतुलां भिषक्॥ ९१

आर्द्रकस्य रसप्रस्थं दत्त्वा मृद्वग्निना ततः ।
लेहीभूते प्रदातव्यं चूर्णमेषां पलं पलम् ॥ ९२ ॥
पिप्पली पिप्पलीमूलं मरिचं विश्वभेषजम् ।
हिङ्गु भल्लातकं चैव विडंगमजमोदकम् ॥ ९३ ॥
द्वौ क्षारौ चित्रकं चव्यं पंचैव लवणानि च ।
दत्त्वा सुमथितं कृत्वा स्निग्धे भाण्डे निधापयेत् ॥
कोलमात्रं ततः खादेत् प्रातःप्रातर्विचक्षणः ॥ ९४ ॥

दशमूलकी औषधियोंको सौ पल लेकर एकद्रोण जलमें पकावे । जब पककर चौथाई भाग जल शेष रहजाय तब उतारकर छान लेवे । फिर उसमें पुराना गुड १०० पल और अदरखका रस एकप्रस्थ डालकर मन्द २ अग्निसे पकावे । जब पकते २ लेहकी समान गाढा होजाय तब नीचे उतारकर उसमें पीपल, पीपलामूल, मिरच, सोंठ, हींग, भिलावे, वायविडंग, अजमोद, जवाखार, सज्जी, चीतेकी जड़, चव्य और पांचों नमक इन औषधियोंके चारचार तोले चूर्णको डालकर सबको एकम्एक करके एक मिट्टीके चिकने बासनमें भरकर रखदेवे । इसमेंसे प्रतिदिन प्रातःकाल एक एक तोला भक्षण करे ॥९१-९४॥

हन्ति मन्दानलं शोथमामजां ग्रहणीमपि ।
आमं सर्वभवं शूलं प्लीहानमुदरं तथा ॥ ९५ ॥
मन्दानलभवं रोगं विष्टम्भं गुदजानि च ।
ज्वरं चिरन्तनं हन्ति तमिस्रं भानुमानिव ॥ ९६ ॥

यह औषधि मन्दाग्नि, सूजन, आमसे उत्पन्नहुई संग्रहणी, आम, सर्वप्रकारके शूल, प्लीहा, उदरविकार, मन्दाग्निसे उत्पन्नहुए रोग, विष्टम्भ और गुदामें होनेवाले सम्पूर्ण उपद्रवोंको नष्ट करती है ॥ ९५ ॥ ९६ ॥

कल्याणगुड ।

प्रस्थत्रयेणामलकीरसस्य शुद्धस्य दत्त्वाऽर्द्धतुलां गुडस्य ।
चूर्णीकृतैर्ग्रन्थिकजीरचव्यव्योषेभकृष्णाहवुषाजमोदैः ॥ ९६ ॥
विडंगसिन्धुत्रिफलायमानीपाठाग्निधान्यैश्च पलप्रमाणैः ।
दत्त्वा त्रिवृच्चूर्णपलानि चाष्टावष्टौ च तैलस्य पचेद्यथावत् ९८
तं भक्षयेदक्षपलप्रमाणं यथेष्टचेष्टं त्रिसुगन्धियुक्तम् ।
अनेन सर्वग्रहणीविकाराः सश्वासकासस्वरभेदशोथाः ॥ ९९ ॥

शाम्यन्ति चायं चिरमन्तराग्नेर्हतस्य पुंस्त्वस्य च वृद्धिहेतुः ।
स्त्रीणां च वन्ध्यामयनाशनोऽयं कल्याणको नाम गुडः प्रदिष्टः ॥
त्रिवृतां भर्ज्जयन्त्यत्र मनाक् तैले चिकित्सकाः ।
अत्रोक्तमानसावर्म्यात्रिसुगन्धिपलं पृथक् ॥ १०१ ॥

शुद्ध आमलोंके तीन प्रस्थ रसमें पीपलामूल, जीरा, चव्य, सोंठ, मिरच, पीपल, गजपीपल, हाऊबेर, अजमोद, वायविडङ्ग, सेंधानमक, हरड, आमला, बहेडा, अजवायन, पाढ, चीतेकी जड और धनियाँ इन प्रत्येकको चारचार तोले तेलमें भुना हुआ निसोतका चूर्ण ३२ तोले, तिलका तैल ३२ तोले और दालचीनी, तेजपात, इलायची इन प्रत्येकका चूर्ण ६४ तोले इन सबको मिलाकर यथाविधिसे गुड दो दो तोले डालकर पाककर पकावे । जब पाक उत्तम प्रकारसे सिद्ध होजाय तब उसमें त्रिसुगन्धि (दारचीनी, तेजपात, इलायची) का चूर्ण चारचार तोले मिलाकर प्रतिदिन एकएक तोला प्रमाण भक्षण करे । इससे सर्व प्रकारकी संग्रहणी, श्वास, खाँसी, स्वरभेद और सूजन दूर होती है तथा बहुत दिनोंकी पुरानी मन्दाग्नि दीपन होती है और पुरुषत्वकी वृद्धि होती है । यह कल्याण नामक गुड वन्ध्या स्त्रियोंके वन्ध्यात्व दोषको निवारण करनेकी सर्वश्रेष्ठ महौषध है ॥ ९७-१०१ ॥

कूष्माण्डगुडकल्याण ।

कूष्माण्डकानां रूढानां सुस्विन्नं निष्कुलत्वचम् ।
सर्पिःप्रस्थे पलशतं ताम्रभाण्डे शनैः पचेत् ॥ २ ॥
पिप्पली पिप्पलीमूलं चित्रकं हस्तिपिप्पली ।
धान्यकानि विडङ्गानि यमानीमरिचानि च ॥ ३ ॥
त्रिफला चाजमोदा च कलिंगाजाजिसैन्धवम् ।
एकैकस्य पलं चैव त्रिवृदष्टपलं भवेत् ॥ ४ ॥
तैलस्य च पलान्यष्टौ गुडपञ्चाशदेव तु ।
प्रस्थैस्त्रिभिः समेतं तु रसस्यामलकस्य च ॥ ५ ॥
यदा दर्वीप्रलेपस्तु तदैनमवतारयेत् ।
यथाशक्ति गुडान् कुर्यात कर्षकर्षार्द्धमानकान् ॥ ६ ॥

उत्तम प्रकारसे पके हुए पेठेको लेकर छील लेवे । फिर उसके टुकडे करके १०० पल, घी १ प्रस्थ एवं पीपल, पीपलामूल, चीतेकी जड, अजमोद, इन्द्रजौ, कालाजीरा,

और सैंधानमक इन प्रत्येकका चारचार तोले चूर्ण, निसोतका चूर्ण ३२ तोले, तिलका तैल ३२ तोले, गुड पचास पल और आमलोंका रस २ प्रस्थ लेवे सबको एकत्र मिलाकर ताँबेके पात्रमें विधिपूर्वक मन्दमन्द अग्निसे पकावे। जब पकते २ करछीसे लग तब उसको नीचे उतारले फिर उसमेंसे अपनी अग्निके बलानुसार ६ माशेकी मात्रासे लेकर एक तोलापर्यन्त सेवन करे ॥ १०२-१०६ ॥

अनेन विधिना चैव प्रयुक्तस्तु जयेदिमान्।
प्रसह्य ग्रहणीरोगान् कुष्ठान्यर्शोभगन्दरान् ॥ ७ ॥
ज्वरमानाहहृद्रोगगुल्मोदरविषूचिकाः।
कामलापाण्डुरोगांश्च प्रमेहांश्चैव विंशतिम् ॥ ८ ॥
वातशोणितवीसर्पदद्रुचर्म्महलीमकान्।
कफपित्तानिलान् सर्वान् प्ररूढांश्च व्यपोहति ॥ ९ ॥
व्याधिक्षीणा वयःक्षीणाः स्त्रीषु क्षीणाश्च ये नराः।
तेषां वृष्यश्च बल्यश्च वयःस्थापन एव च।
गुडकल्याणको नाम वन्ध्यानां गर्भदः परः ॥ ११० ॥

इसको प्रतिदिन नियमानुसार सेवन करनेसे संग्रहणी, कुष्ठ, अर्श, भगन्दर, ज्वर, आनाह, हृदयरोग, गुल्म, उदरविकार, विषूचिका, कामला, पाण्डुरोग, बीस प्रकारके प्रमेह, वातरक्त, विसर्प, दाद, चर्मरोग, हलीमक तथा कफ, पित्त और वायुसे उत्पन्न हुए सर्वप्रकारके बहुत पुराने रोग नष्ट होते हैं। जो मनुष्य व्याधिके कारण क्षीण हो गये हैं या अवस्थासे ही क्षीण हैं अथवा जो स्त्रियोंमें अधिक भोगविलास कर-नेसे क्षीण हो गये हैं, उनके लिये यह गुड अत्यन्त वृष्य, बलकारक और आयुको स्थापन करनेवाला है। इसको कूष्माण्डगुडकल्याण कहते हैं। यह वन्ध्यास्त्रियोंके लिये गर्भप्रदान करता है ॥ १०७-११० ॥

कामेश्वरमोदक।

सम्यङ् मारितमभ्रकं कटफलं कुष्ठाश्वगन्धामृता
मेथी मोचरसो विदारिमुसलीगोक्षूरकं चेक्षुरः।
रम्भाकन्दशतावरीत्वजमुदा मांसी तिला धान्यकं
यष्टी नागबला कचूरमदनं जातीफलं सैन्धवम् ॥ ११ ॥
भार्ङ्गी कर्कटशृङ्गकं त्रिकटुकं जीरद्वयं चित्रकं
चातुर्जातपुनर्नवा गजकणा द्राक्षा शठी बालकम्।

शाल्मल्यङ्घ्रि फलत्रिकं कपिभव बीजं समं चूर्णयेत्
चूर्णांशा विजया सिता द्विगुणिता मध्वाज्ययोः पिंडितम् ॥
कर्षांशा गुडिकाऽर्द्धकर्षमथवा सेव्याः सदा कामिभिः
सेव्यं क्षीरसितं सुवीर्यकरणं स्तम्भेऽप्ययं कामिनाम् ।
रामावश्यकरः सुखातिसुखदो बह्वङ्गनाद्रावणः
क्षीणे पुष्टिकरः क्षतक्षयहरो हन्याच्च सर्वामयान् ॥ १३ ॥
कासश्वासमहातिसारशमनः कामाग्निसन्दीपनो
दुर्नामग्रहणीप्रमेहनिवहश्लेष्मातिरेकप्रणुत् ।
नित्यानन्दकरो विशेषकविता वाचां विलासोद्भवो
धत्ते सर्वगुणं महास्थिरमतिर्बालो नितान्तोत्सवः ॥ १४ ॥
अभ्यासेन निहन्ति मृत्युपलितं कामेश्वरो वत्सरात्
सर्वेषां हितकारिणा निगदितः श्रीनित्यनाथेन सः ।
वृद्धानां मदनोदयोदयकरः प्रौढाङ्गनासंगमे
सिंहोऽयं समदृष्टिप्रत्ययकरो भूपैः सदा सेव्यताम् ॥ १५ ॥

उत्तम प्रकारसे शुद्ध की हुई अभ्रककी भस्म, कायफल, कूठ, असगन्ध, गिलोय, मेथी, मोचरस, विदारीकंद, मूसली, गोखरू, तालमखाना, केलेकी जड, शतावर, अजमोद, वालछड, तिलोंके चावल, धनियाँ मुलहठी, गंगेरन, कचूर, मैनफल, जायफल, सैंधानमक, भारंगी, काकडासिंगी, सोंठ, पीपल, मिरच, जीरा, कालाजीरा, चीतेकी जड, दालचीनी, तेजपात, छोटी इलायची, नागकेशर, पुनर्नवा, गजपीपल, दाख, गन्धपलाशी, सुगन्धवाला, सेमलकी मूसली, हरड, आमला, बहेडा और कोंचके बीज इन सब औषधियोंको समान भाग लेकर बारीक चूर्ण करलेवे । सम्पूर्ण चूर्णकी बराबर भाँगका चूर्ण और सबसे दूनी मिश्री लेवे । सबको यथोचित मधु और घृतमें विधिपूर्वक मिलाकर एक तोलाके अथवा छः माशके लड्डू बनालेवे । ये मोदक कामीपुरुषोंको प्रतिदिन दूध और मिश्रीके साथ सेवन करने चाहिये । ये मोदक अत्यन्त वीर्यवर्द्धक, स्तम्भक, स्त्रीको वशमें करनेवाले, अत्यन्त आनन्ददायक, अनेक स्त्रियोंमें रमणकी शक्तिप्रदायक, क्षीण शरीरको पुष्ट करनेवाले, कामाग्निको बढानेवाले तथा क्षतक्षय, खाँसी श्वास, प्रबल अतिसार, अर्श, संग्रहणी, प्रमेह, कफविकार एवं अन्यान्य सर्वप्रकारके उपद्रवोंको तत्काल नष्ट करते हैं । नित्य आनन्ददायक, विशेषकर कवित्वशक्ति और वाक्शक्तिको बढानेवाले हैं । इन कामेश्वर मोद-

कोंको एक वर्षपर्यन्त नियमपूर्वक सेवन करनेसे मनुष्य सर्वगुणसम्पन्न स्थिरबुद्धि होता है। विना अवस्थाके ही बालोंका पकना और मृत्युतक नष्ट होजाती है। इन श्रीकामेश्वर मोदकोंको सम्पूर्ण प्राणियोंके हितके लिये नित्यनाथने वर्णन किया है। ये कामेश्वरमोदक वृद्धमनुष्योंको प्रौढावस्थावाली स्त्रियोंके साथ संगम करनेपर वृद्धमनुष्योंके भी चित्तमें उत्पन्न कामशक्तिकी वृद्धि करते हैं। सिंहके समान पराक्रमी और अनुभवसिद्ध योग है। अतएव यह प्रयोग राजाओंको सदा सेवन करना चाहिये॥ ११-१५॥

मदनमोदक।

त्रैलोक्यविजयापत्रं सबीजं घृतभर्ज्जितम्।
समे शिलातले पश्चाच्चूर्णयेदतिचिक्कणम्॥ १६॥
त्रिकटु त्रिफला शृङ्गी कुष्ठधान्यकसैन्धवम्।
शठी तालीशपत्रं च कट्फलं नागकेशरम्॥ १७॥
अजमोदा यमानी च यष्टीमधुकमेव च।
मेथी जीरकयुग्मं च गृहीत्वा श्लक्ष्णचूर्णितम्॥ १८॥
यावन्त्येतानि चूर्णानि तावदेव तदौषधम्।
तावदेव सिता देया यावदायाति बन्धनम्॥ १९॥
घृतेन मधुना मिश्रं मोदकं परिकल्पयेत्।
त्रिसुगन्धिसमायुक्तं कर्पूरेणाधिवासयेत्।
स्थापयेद् घृतभाण्डे च श्रीमन्मदनमोदकम्॥ १२०॥

घीमें भुनीहुई बीजोंसहित भांगको २० तोले लेकर उत्तम पत्थरपर खूब बारीक पीसलेवे। फिर बहेडा, काकडासिंगी, कूठ, धनियाँ, सैन्धानमक, कचूर, तालीसपत्र, कायफल, नागकेशर, अजमोद, अजवायन, मुलहठी, मेथी, जीरा और कालाजीरा प्रत्येकका बारीक पिसा हुआ चूर्ण एकएक तोला और संपूर्ण चूर्णके बराबर मिश्री मिलालेवे। पश्चात् घृत और शहद इनको मिलाकर त्रिजातकके चूर्ण मिलाकर मोदक बनावे और उनको कपूरसे सुवासित कर घीके चिकने बासनमें भरकर रखदेवे। इसको मदनमोदक कहते हैं॥ १६-१२०॥

भक्षयेत् प्रातरुत्थाय वातश्लेष्मविनाशनम्।
कासघ्नं सर्वशूलघ्नमामवातविनाशनम्॥ २१॥

सर्वरोगहरो ह्येष संग्रहग्रहणीहरः ।
एतस्य सततांभ्यासाद् वृद्धोऽपि तरुणायते ॥ २२ ॥
(ब्रह्मणः प्रमुखात् श्रुत्वा वासुदेवे जगत्पतौ ॥
एष कामविवृद्ध्यर्थं नारदैः प्रतिपादितः ॥ २३ ॥
तेन लक्षं वरस्त्रीणां रेमे स यदुनन्दनः ॥ २४ ॥

प्रतिदिन प्रातःकाल एकएक मोदक भक्षण करनेसे वातकफ जन्य रोग, खाँसी, सर्व प्रकारके शूल, आमवात, संग्रहणी एवं अनेक प्रकारके रोग शीघ्र नष्ट होते हैं. इनको निरन्तर सेवन करनेसे वृद्ध पुरुष भी तरुण होजाता है ॥ २१-२४ ॥

मेथीमोदक ।

त्रिकटु त्रिफला मुस्तं जीरकद्वयधान्यकम् ।
कट्फलं पौष्करं शृङ्गी यमानी सैन्धवं विडम् ॥ २५ ॥
तालीशकेशरं पत्रं त्वगेला च फलं तथा ।
जातीकोषलवङ्गं च मुरा कर्पूरचन्दनम् ॥ २६ ॥
यावन्त्येतानि चूर्णानि तावदेव तु मेथिका ।
संचूर्ण्य मोदकः कार्यः पुरातनगुडेन च ॥ २७ ॥

सोंठ, पीपल, मिरच, हरड, आमला, बहेडा, नागरमोथा, जीरा, कालाजीरा-धनियाँ, कायफल, पुहकरमूल, काकडासिंगी, अजवायन, सैंधानमक, विरियासंचर, नमक, तालीसपत्र, नागकेशर, तेजपात, दालचीनी, इलायची, जायफल, जावित्री, लौंग, मुरा मांसी, कपूर और लालचन्दन प्रत्येकका चूर्ण एक एक तोला और समस्त चूर्णकी बराबर मेथीका चूर्ण एवं मेथीके चूर्णसहित समस्त चूर्णसे दूना पुराना गुड़ मिलाकर यथाविधिसे पाककर मोदक बनालेवे ॥ २५-२७ ॥

घृतेन मधुना किञ्चित् खादेदग्निबलं प्रति ।
अग्निं च कुरुते दीप्तं सामे मेदे महौषधम् ॥ २८ ॥
बलवर्णकरो ह्येष संग्रहग्रहणीहरः ।
प्रमेहान् विंशतिं हन्ति मूत्राघातांस्तथाऽश्मरीम् ॥ २९ ॥
पाण्डुरोगं तथा कासं यक्ष्माणं हन्ति कामलाम् ।
स्तनौ च पतितौ गाढौ स्यातां तालफलोपमौ ॥ ३० ॥

दृष्टिप्रसादनं चैव नारीणां चैव पुत्रदः ।
भाषितः कामदेवेन मेथीमोदकसंज्ञकः ॥ ३१ ॥

अग्निका बलाबल विचारकर इन मोदकोंको कुछेक घृत और शहद मिलाकर सेवन करना चाहिये। यह मोदक अग्निको अत्यन्त दीपन करते हैं और आमयुक्त मेदरोगकी अत्युत्तम औषधि है। बल और वर्णको बढानेवाले तथा संग्रहणीको हरनेवाले हैं। एवं बीसप्रकारके प्रमेह, मूत्राघात, पथरी, पाण्डुरोग, खाँसी, राजयक्ष्मा और कामलारोगको दूर करते हैं। इनको सेवन करनेसे स्त्रियोंके गिरेहुए स्तन ताडके फलके समान दृढ होजाते हैं। ये मोदक दृष्टिशक्तिको बढानेवाले तथा स्त्रियोंको पुत्रके देनेवाले हैं। इनको भी कामदेवने वर्णन किया है और यह मेथीमोदक नामसे प्रसिद्ध हैं ॥ २८-१२१ ॥

बृहन्मेथीमोदक।

त्रिफला धान्यकं मुस्तं शुण्ठी मरिचपिप्पली।
कट्फलं सैन्धवं शृंगी जीरकद्वयपुष्करम् ॥ ३२ ॥
यमानी केशरं पत्रं तालीशं विडमेव च।
जातीफलं त्वगेला च जावित्रीन्दुलवंगकम् ॥ ३३ ॥
शतपुष्पा मुरामांसी यष्टीमधुकपद्मकम्।
चव्यं मधुरिका दारु सर्वमेतत् समं भवेत् ॥ ३४ ॥
यावन्त्येतानि चूर्णानि तावन्मात्रा तु मेथिका।
सितया मोदकं कार्यं घृतमाध्वीकसंयुतम् ॥ ३५ ॥

हरड, आमला, बहेडा, धनियाँ, नागरमोथा, सोंठ, मिरच, पीपल, कायफल, सैंधानमक, काकडासिंगी, जीरा, कालाजीरा, पुहकरमूल, अजवायन, नागकेशर, तेजपात, तालीसपत्र, विरियासंचरनमक, जायफल, दालचीनी, इलायची, जावित्री, कपूर, लौंग, सोया, मुरामांसी, मुलहठी, पद्माख, चव्य, सौंफ और देवदारु इन सब औषधियोंको समान भाग लेकर बारीक चूर्ण करलेवे, फिर समस्त चूर्णके बराबर मेथीका चूर्ण और मेथीके चूर्णसहित सब चूर्णके समान भाग मिश्री एवं यथोचित परिमाणसे घृत और शहद मिलाकर लड्डू बनालेवे ॥ ३२-३५ ॥

भक्षयेत् प्रातरुत्थाय यथादोषानुपानतः।
हन्ति मन्दानलान् सर्वानामदोषं विशेषतः ॥ ३६ ॥

महाग्निजननं वृष्यमामवातनिषूदनम् ।
ग्रहण्यर्शोविकारघ्नं प्लीहपाण्डुगदापहम् ॥ ३७ ॥
प्रमेहान् विंशतिं हन्ति कासं श्वासं च दारुणम् ।
छर्द्यतीसारशमनं सर्वारूढिविनाशनम् ॥
मेथीमोदकनामेदं पतञ्जलिमुनेर्मतम् ॥ ३८ ॥

इन मोदकोंको नित्य प्रातःकाल यथादोषानुसार उचित अनुपानके साथ सेवन करनेसे सब प्रकारकी मन्दाग्नि, विशेषकर आमदोष, संग्रहणी, अर्श, प्लीहा, पाण्डु, बीसों प्रमेह, कठिन खाँसी, श्वास, वमन, अतिसार और सर्व प्रकारके पुराने जटिल रोग नष्ट होते हैं । ये मोदक अग्निको अत्यन्त दीपन करनेवाले और वृष्य तथा आमवातनाशक हैं । इस वृहन्मेथीमोदकनामक योगको पतञ्जलिमुनिने निर्माण किया है ॥ ३६-३८ ॥

मुस्तकादिमोदक ।

धान्यकं त्रिफला भृङ्गं त्रुटिः पत्रं लवङ्गकम् ।
केशरं शैलजं शुण्ठी पिप्पली मरिचानि च ॥ ३ ॥
जीरकं कृष्णजीरं च यमानी कट्फलं जलम् ।
धातकीपुष्पकं व्याधिर्जातीकोषफले तथा ॥ १४० ॥
मधुरिका चाजमोदा हबुषं नागपर्ण्यपि ।
उग्रगन्धा शठी मांसी कुटजस्य फलं शुभम् ॥ ४१ ॥
एतानि श्लक्ष्णचूर्णानि कारयेत् कुशलो भिषक् ।
सर्वचूर्णसमं देयं जलदस्यापि चूर्णकम् ॥
सिता च द्विगुणा देया मोदकं परिकल्पयेत् ॥ ४२ ॥

धनियाँ, हरड. आमला, बहेडा, दालचीनी, छोटीइलायची, तेजपात, लौंग, नागकेशर, भूरिछरीला, सोंठ, पीपल, मिरच, जीरा, कालाजीरा, अजवायन, कायफल, सुगन्धवाला, धायके फूल, कूट, जावित्री, जायफल, सौंफ, अजमोद, हाऊबेर, पान, वच, कचूर; बालछड, इन्द्रजौ और वंशलोचन इन सबको समान भाग लेकर बारीक चूर्ण करलेवे । फिर सब चूर्णकी बराबर नागरमोथेका चूर्ण और नागरमोथेके चूर्ण सहित समस्त चूर्णसे दुगुनी मिश्री लेवे । सबको यथाविधिसे एकत्र मिलाकर मोदक बनालेवे ॥ ३९-१४२ ॥

मन्दाग्निं शमयेदेतत् सरक्तां ग्रहणीं तथा ।
अतीसारं ज्वरं शोथं पाण्डुरोगं हलीमकम् ॥ ४३ ॥
कृमिरोगं रक्तपित्तमर्शोरोगं सुदुर्जयम् ।
लोकानां गदशान्त्यर्थं भैरवेन प्रकाशितम् ॥ ४४ ॥

ये मोदक मन्दाग्नि, रुधिरयुक्त संग्रहणी, अतिसार, ज्वर, सूजन, पाण्डुरोग, हलीमक, क्रिमिरोग, रक्तपित्त और अत्यन्त दुःसाध्य अर्शरोगको शमन करते हैं। सांसारिक मनुष्योंके रोगोंको दूर करनेके लिये इस प्रयोगको भैरवजीने कहा है। (इसपर मिश्री डालकर बकरीका दूध पान करना चाहिये) ॥ ४३ ॥ ४४ ॥

जीरकादिमोदक ।

श्लक्ष्णचूर्णीकृतं जीरं पलाष्टकमितं शुभम् ।
तदर्द्धं विजयाबीजं भर्जितं वस्त्रपूतकम् ॥ ४५ ॥
अयश्चूर्णं तथा वङ्गमभ्रकं कर्षमानतः ।
मधुरिका च तालीशं जातीकोषफले तथा ॥ ४६ ॥
धान्यकं त्रिफला चैव चातुर्जातलवङ्गकम् ।
शलेय चन्दने द्वे च मांसी द्राक्षा शठी तथा ॥ ४७ ॥
टङ्कण कुन्दुरू यष्टी तुगा कक्कोलवालकम् ।
गांगेरुस्त्रिकटुश्चैव धातकी बिल्वमर्ज्जुनम् ॥ ४८ ॥
शतपुष्पा देवदारु कर्पूरं सप्रियङ्गुकम् ।
जीरकं शाल्मलं चैव कटुका पद्मनालकम् ॥ ४९ ॥
एषां कर्षसमं चूर्णं गृह्णीयात् कुशलो भिषक् ।
शर्करा-मधुनाऽऽज्येन मोदकं च विनिर्मितम् ॥ १५० ॥

भुनेहुए जीरेका बारीक चूर्ण ३२ तोले, घीमें भुनीहुई भाँगका बारीक और कपडछान किया हुआ चूर्ण १६ तोले एवं लोहभस्म, वंग, अभ्रक प्रत्येककी एकएक कर्ष तथा सौंफ, तालीशपत्र, जावित्री, जायफल, धनियाँ, हरड, आमला, बहेडा, दालचीनी, तेजपात, इलायची, नागकेशर, लौंग, भूरिछरीला, सफेदचन्दन, लाल चन्दन, बालछड, दाख, कचूर, सुहागा, कुन्दुरू, मुलहठी, वंशलोचन, कंकोल, सुगन्धवाला, गँगेरन, सोठ, पीपल, मिरच, धायके फूल, बेलगिरी, अर्जुनकी छाल, सोया, देवदारु, कपूर, फूलप्रियंगु, जीरा, मोचरस, कुटकी और कमलकन्द (भसीडा) प्रत्येक औषधिके चूर्णको एकएक कर्ष और समस्तचूर्णसे दुगनी

कूट लेवे। सबको विधिपूर्वक एकत्र मिलाकर घृत शहदके योगसे लड्डू बनालेवे ॥ ४९–१५० ॥

खादेत् कर्षसमं तस्य प्रत्यहं प्रातरुत्थितः ।
शीततोयानुपानेन सर्वग्रहणिकां जयेत् ॥ ५१ ॥
आमदोषावृते पित्ते वह्निमान्द्ये तथैव च ।
रक्तातिसारेऽतीसारे प्रयोज्या विषमज्वरे ॥ ५२ ॥
सशब्दं घोरगम्भीरं हन्ति सद्यो न संशयः ।
अम्लपित्तकृत दोषमुदरं सर्वरूपिणम् ॥ ५३ ॥
सर्वातीसारशमनं संग्रहग्रहणीं जयेत
एकजं द्वन्द्वजं चैव दोषत्रयकृतं तथा ॥ ५४ ॥
विकारं कोष्ठजं चैव हन्ति शूलमरोचकम् ।
भाषितं वृष्णिनाथेन जन्तूनां हितकारणम् ॥ ५५ ॥

इनमेंसे प्रतिदिन प्रातःकाल एकएक तोलाप्रमाण खाय और ऊपरसे शीतल जलका अनुपान करे तो इससे सर्वप्रकारकी संग्रहणी दूर होती है । आमदोषयुक्त पित्त, अग्निकी मन्दता, रक्तातिसार, सामान्य अतिसार और विषमज्वरमें प्रयोग करना चाहिये । यह शब्दयुक्त, भयंकर और गम्भीर अम्लपित्तरोग, सब प्रकारके उदररोग, सम्पूर्ण, अतिसार, संग्रहणी, एकदोषज, द्विदोषज अथवा त्रिदोषज संग्रहणी, रोग, कोष्ठगत विकार, शूल और अरुचिको नष्ट करता है ॥

बृहज्जीरकादिमोदक ।

जीरकं कृष्णजीरं च कुष्ठ शुंठी च पिप्पली ।
मरिचं त्रिफला त्वक् च पत्रमेला च केशरम् ॥ ५६ ॥
शुभा लवंगं शैलेयं चन्दनं श्वेतचन्दनम् ।
काकोली क्षीरकाकोली जातीकोषफले तथा ॥ ५७ ॥
यष्टी मधुरिका मांसी मुस्तं सचलकं शठी ।
धान्यकं देवताडं च मुरा द्राक्षा नखी तथा ॥ ५८ ॥
शतपुष्पा पद्मकं च मेथी च सुरदारु च ।
सजलं नालिका चैव सैन्धवं गजपिप्पली ॥ ५९ ॥
कर्पूरं वनिता चैव कुन्दखोटी समांशकम् ।
लौहकाभ्रकवंगानां द्विभागं तत्र दापयेत ॥ १६० ॥

एतानि समभागानि श्लक्ष्णचूर्णानि कारयेत् ।
सर्वचूर्णसमं देयं भृष्टजीरस्य चूर्णकम् ॥ ६१ ॥
सिता द्विगुणिता देया मोदकं परिकल्पयेत् ।
घृतेन मधुना मिश्रं मोदकं च भिषग्वरः ॥ ६२ ॥

सफेदजीरा, कालाजीरा, कूठ, सोंठ, पीपल, मिरच, हरड, आमला, बहेडा, दारचीनी, तेजपात, इलायची, नागकेशर, वंशलोचन, लौंग, भूरिछरीला, लालचन्दन, सफेदचन्दन, काकोली, क्षीरकाकोला, जावित्री, जायफल, मुलहठी, सौंफ, वालछड, नागरमोथा, कालानमक, कचूर, धनियाँ, देवताडवृक्ष, मुरामांसी, दाख, नखी, सोया, पखाल, मेथी, देवदारु, सुगन्धवाला, नली गन्धद्रव्य, सैंधानमक, गजपीपल, कर्पूर, कुन्दुरू प्रत्येक औषधि एकएक तोला एवं लोहा, अभ्रक और वङ्ग ये प्रत्येक दो दो तोले इन सबको एकत्र मिलाकर वारीक चूर्ण करलेवे । फिर सब चूर्णके वरावर भुनेहुए जीरेका चूर्ण और जीरेके चूर्णसहित सम्पूर्ण चूर्णसे दुगुनी मिश्री लेवे । प्रथम मिश्रीका पाककर उसमें उक्त औषधियोंके चूर्णको डालकर घृत और मधुके योगसे मोदक बनालेवे ॥ ५६–१६२ ॥

भक्षयेत प्रातरुत्थाय यथादोषबलाबलम् ।
गव्यं सशर्करं चैव अनुपानं प्रयोजयेत् ॥ ६३ ॥
अशीतिं वातजान् रोगांश्चत्वारिंशच्च पैत्तिकान् ।
सर्वांस्तान् नाशयत्याशु वृक्षमिन्द्राशनिर्यथा ॥ ६४ ॥
नानावर्णमतीसारं विशेषादामसम्भवम् ।
शूलमष्टविधं हन्ति अर्शोरोगं चिरोद्भवम् ॥ ६५ ॥
जीर्णज्वरं च सततं विषमज्वरमेव च ।
स्त्रीणां चैवानपत्यानां दुर्बलानां च देहिनाम् ॥ ६६ ॥
पुत्रकृत् पुष्टिकृच्चैव बलवर्णकरं परम् ।
सूतिकारोगमत्युग्रं नाशयेन्नात्र संशयः ॥ ६७ ॥
प्रदरं नाशयत्याशु सूर्यस्तम इवोदितः ।
दाह सार्वांगिक चैव वातपित्तोत्थितं च यत ॥
अय सर्वगदोच्छेदी जीरकाद्यो हि मोदकः ॥ ६८ ॥

ये मोदक प्रतिदिन प्रातःकाल दोष तथा अग्निके बलाबलको विचारकर भक्षण करने और ऊपरसे मिश्री मिलाकर गायका दूध पान करना चाहिये । यह प्रयोग अस्सी प्रकारके वातज, ४० प्रकारके पित्तज और अन्यान्य सर्वप्रकारके रोगोंको इस प्रकार नष्ट करदेता है जैसे वज्र वृक्षोंको तत्काल नाश करदेता है । एवं अनेक अतिसार, विशेषकर आमातिसार, आठ प्रकारका शूल, बहुत पुराना अर्शरोग, जीर्णज्वर, सततज्वर और विषमज्वरको नष्ट करताहै । तथा वन्ध्या स्त्रियोंको पुत्र देनेवाला, दुर्बल मनुष्योंको पुष्ट करनेवाला और अत्यन्त बल वर्णको बढानेवाला है । प्रसूताके दारुण रोग प्रदररोग, वातिक व पैत्तिक सर्वशरीरकी दाह आदि रोगोंको निस्सन्देह दूर करता है ॥ ६३–६८ ॥

अग्निकुमारमोदक ।

उशीरं बालकं मुस्तं त्वक् पत्रं नागकेशरम् ।
जीरद्वयं च शृंगं च कट्फलं पुष्करं शठी ॥ ६९ ॥
त्रिकटु बिल्वकं धान्यं जातीफललवंगकम् ।
कपूरं कान्तलोहं च शैलजं वंशलोचना ॥ १७० ॥
एलाबीजं जटामांसी रास्ना तगरपादुकम् ।
समंगाऽतिबला चाभ्रं मुरा वङ्गं तथैव च ॥ ७१ ॥
अस्य चूर्णसमा मेथी चूर्णार्द्धं विजयारजः ।
शर्करामधुसंयुक्तं मोदकं परिकल्पयेत् ॥ ७२ ॥

खस, सुगन्धवाला, नागरमोथा, दालचीनी, तेजपात, नागकेशर, जीरा कालाजीरा, काकडासिंगी, कायफल, पुहकरमूल, कचूर, सोंठ, पीपल, मिरच, बेलगिरी, धनियाँ, जायफल, लौंग, कपुर, कान्तलोह, भूरिछरीला, वंशलोचन, इलायची, बालछड, रायसन, तगर, लज्जावंती, कंघी, अभ्रक, मुरामांसी और बंग इन सबका चूर्ण समानभाग और समस्त चूर्णके बराबर मेथीका चूर्ण एवं मेथीके चूर्णसहित सबचूर्णसे आधाभाग भाँगका चूर्ण और सम्पूर्ण चूर्णसे दूनी शुद्ध खाँड मिश्री लेवे । सबको यथाविधिसे एकत्रितकर शहद डालकर मोदक बनालेवे ॥ ६९–१७२ ॥

एककर्षप्रमाणं तु भक्षयेत् प्रातरुत्थितः ।
शीततोयानुपानेन आजेन पयसाऽथवा ॥ ७३ ॥

ग्रहणीं दुस्तरां हन्ति श्वासं कासमतीव च
आमवातमग्निमान्द्यमजीर्णं विषमज्वरम् ॥ ७४ ॥
विबन्धानाहशूलं च यकृत्प्लीहोदराणि च ।
हन्त्यष्टादशकुष्ठानि ग्रहणीदोषनाशनः ।
उदावर्त्तगुल्मरोगोदरामयविनाशनः ॥ ७५ ॥

इनमेंसे प्रतिदिन प्रातःकाल एकएक कर्षप्रमाण भक्षण करे और ऊपरसे शीतल-जल अथवा बकरीका दूध पान करे । यह मोदक दुस्तरग्रहणी, श्वास, खाँसी, आमवात, मन्दाग्नि, अजीर्ण, विषमज्वर, विबन्ध, आनाह, शूल, यकृत्, प्लीहा, उदररोग, १८ प्रकारके कुष्ठ, ग्रहणीके सब उपद्रव, उदावर्त, गुल्म और सर्वप्रकारके उदरविकारोंको शीघ्र नष्ट करते हैं ॥ ७३–१७५ ॥

हंसपोट्टली ।

दग्धान्कपर्दकान् पिष्ट्वा त्र्यूषणं टङ्कणं विषम् ।
गन्धकं शुद्धसूतं च तुल्यं जम्बीरजैर्द्रवैः ॥ ७६ ॥
मर्दयेद् भक्षयेन्माषं मरिचाज्यं लिहेदनु ।
निहन्ति ग्रहणीरोगं पथ्यं तक्रौदनं हितम् ॥ ७७ ॥

कौडीकी भस्म, सोंठ, पीपल, मिरच, सुहागा, शुद्ध मीठातेलिया, शुद्ध गन्धक और शुद्धपारा इन सबको समानभाग लेकर जम्बीरीनीबूके रसमें उत्तमप्रकारसे खरल करले । फिर प्रतिदिन एकएक मासे प्रमाण लेकर मिरचोंके चूर्ण और घीमें मिलाकर सेवन करना चाहिये । यह औषधि संग्रहणीरोगको नष्ट करतीहै । इसपर मट्ठे और भातका पथ्य देना हितकरहै ॥७६॥७७॥

ग्रहणीकपर्दपोट्टली ।

कपर्दतुल्यं रसकं तु गन्धकं लौहं मृतं टङ्कणकं च तुल्यम् ।
जयारसेनैकदिनं विमर्द्य चूर्णेन संवेष्ट्य पुटेच्च भाण्डे ॥
ददीत तत्पोट्टलिकाभिधानं वातप्रधानग्रहणीनिवृत्त्यै ॥ ७८ ॥

कौडीकी भस्म, शुद्धपारा, शुद्धगन्धक, लोहभस्म और सुहागा इन सबको समान भाग लेकर एकत्रकर भांगके रसमें एकदिनतक अच्छेप्रकारसे मर्दन करके गोलासा बनालेवे । उसको चूनसे लपेटकर एक बर्त्तनमें बन्दकर पुटपाकविधिसे पाककरे । जब पककर स्वयं शीतल होजाय तब औषधिको निकालकर चूर्ण करलेवे । इस ग्रहणीकपर्दपोट्टलीनामकरसको वातजसंग्रहणीरोगमें प्रयोग करना चाहिये ॥१७८

अग्निकुमाररस ।

रसं गन्धं विषं व्योषं टङ्कणं लौहभस्मकम् ।
अजमोदाऽहिफेनं च सर्वतुल्यं मृताभ्रकम् ॥ ७९ ॥
चित्रकस्य कषायेण मर्दयेद्यामममात्रकम् ।
मरिचाभां वटीं खादेदजीर्णं ग्रहणीं तथा ॥
नाशयेन्नात्र सन्देहो गुह्यमेतच्चिकित्सितम् ॥ १८० ॥

शुद्धपारा, शुद्धगन्धक, शुद्धमीठातेलिया, सोंठ, पीपल, मिरच, सुहागा, लोहभस्म, अजमोद और अफीम ये प्रत्येक समानभाग और सबकी बराबर अभ्रककी भस्म लेवे । सबको एकत्र मिलाकर चीतेके काथमें एक प्रहरतक खरल कर कालीमिरचकी बराबर गोलियाँ बनालेवे । इसकी प्रतिदिन एकएक गोली खानेसे अजीर्ण और ग्रहणीरोग दूर होता है । यह प्रयोग वैद्योंको गोपनीय है ॥ ७९-१८० ॥

स्वल्पग्रहणीकपाटरस १-९ ।

दरदं गन्धपाषाणं तुगाक्षीर्यहिफेनकम् ।
तथा वराटिकाभस्म सर्वं क्षीरेण मर्दयेत् ॥ ८१ ॥
रक्तिकायुग्ममानेन च्छायाशुष्कां वटीं चरेत् ।
ग्रहणीं विविधां हन्ति रक्तातीसारमुल्बणम् ॥ ८२ ॥

१-सिंगरफ, शुद्धगन्धक, वंशलोचन, अफीम और कौडीकी भस्म इन सबको समान भाग लेकर गोदुग्धमें मर्दन करके दो दो रत्तीकी गोलियाँ बनाकर छायामें सुखालेवे । यह रस विविध प्रकारकी संग्रहणी और अत्युग्र रक्तातिसारको दूर करता है ॥ १८१ ॥ १८२ ॥

रसगन्धकयोश्चापि जातीफललवंगयोः ।
प्रत्येकं शाणमानं च श्लक्ष्णचूर्णीकृतं शुभम् ॥ ८३ ॥
सूर्यावर्तरसेनैव बिल्वपत्ररसेन च ।
शृंगाटकस्य पत्राणां रसैः प्रत्येकशः पलैः ॥ ८४ ॥
चण्डातपेन संशोष्य वटिकां कारयेद् भिषक् ।
बिल्वपत्ररसेनैव दापयेद्रक्तिकाद्वयम् ॥ ८५ ॥
दध्ना च भोजनीयं च ग्रहणीरोगनाशनः ।
पाण्डुरोगमतीसारं शोथं हन्ति तथा ज्वरम् ॥
ग्रहणीकपाटनामाऽयं रसः परमदुर्लभः ॥ ८६ ॥

२-शुद्धपारा, शुद्धगन्धक, जायफल और लवंग ये प्रत्येक औषधि चार चार माशे लेकर बारीक पीसलेवे। फिर हुलहुल, बेलके पत्ते और सिंघाडेके पत्ते इन प्रत्येकके चार चार तोले रसमें उत्तम प्रकारसे खरल करके तेजधूपमें सुखाकर दो दो रत्तीकी गोलियाँ बनालेवे। इनमेंसे प्रतिदिन एक एक गोली बेलके पत्तोंके रसके साथ सेवन करनी चाहिये और इसपर दहीके सात भातका भोजन करना चाहिये। इसके सेवनसे संग्रहणी, पाण्डुरोग, अतीसार, सूजन और ज्वर ये सब रोग नष्ट होते हैं। यह ग्रहणीकपाटनामवाला रस अत्यन्त दुर्लभ है ॥ ८३-८६ ॥

श्वेतसर्ज्जस्य शुद्धस्य गन्धकस्य रसस्य च।
शुभेऽह्नि पृथगादाय चूर्णं माषचतुष्टयम् ॥ ८७ ॥
एकीकृत्य शिलाखल्ले दद्यात्तेषां तदा रसम्।
सूर्यावर्त्तस्य बिल्वस्य शृंगाटस्य च पत्रजम् ॥ ८८ ॥
प्रत्येकं पलमेकैकं दापयेद्ग्रहणीगदे।
दापयित्वा ततो यत्नाद्दधिभक्तं समाचरेत् ॥ ८९ ॥
असंवृतगुदद्वारं कपाटमिव ढक्कयेत्।
अतश्च ग्रहणीरोगे कपाटोऽयं रसः स्मृतः ॥ १९० ॥

२-सफेद राल, शुद्ध गंधक और शुद्धपारा इनको शुभदिनमें अलग अलग चार चार माशे लेकर चूर्ण करलेवे। फिर पत्थरके खरलमें डालकर हुलहुल, बेल और सिंघाडेके पत्तोंका रस चार चार तोले डालकर पृथक् पृथक् खरल करे और दो दो रत्तीकी गोलियाँ बनालेवे। इनमेंसे एक एक गोली सेवन करनेसे और इसपर दहीके साथ भातका भोजन करनेसे ग्रहणीरोग दूर होता है। यह रस खुले हुए गुदाके द्वारको किंवाडोंकी समान ढक देता है। इसलिये इसे ग्रहणीकपाटरस कहते हैं ॥ ८७-१९० ॥

गिरिजाभवबीजकज्जली परिमर्द्यार्द्ररसेन शोषिता।
कुटजस्य तु भस्मना पुनर्द्विगुणेनाथ विमर्द्य मिश्रिता ॥ ९१ ॥
मर्दयित्वा प्रदातव्यमस्य गुञ्जाचतुष्टयम्।
अजाक्षीरेण दातव्यं क्वाथेन कुटजस्य वा ॥ ९२ ॥
यूषं देयं मसूरस्य वारि भक्तं च शीतलम्।
दध्ना सह पुनर्देयं ग्रासादौ रक्तिकाद्वयम् ॥ ९३ ॥

वर्द्धयेद्दशपर्यन्तं ह्रासयेत् क्रमशस्तथा।
निहन्ति ग्रहणीं सर्वां विशेषात् कुक्षिमार्दवम् ॥ ९४ ॥

४-शुद्धपारा १ तोला और शुद्ध गन्धक १ तोला दोनोंकी एकत्र कज्जली बनाकर उसमें ४ तोले कुडेकी छालकी भस्म मिलाकर अदरखके रसमें खरल करे। फिर छायामें सुखाकर चार चार रत्तीकी गोलियाँ बनालेवे। इस रसकी एक एक गोली बकरीके दूध अथवा कुडेकी छालके काथके साथ सेवन करानी चाहिये। फिर भोजनके पहले ग्रासमें उसको दो रत्तीकी मात्रासे दहीके साथ सेवन करावे। इस रसको पहिले प्रतिदिन दो दो रत्तीकी मात्रासे लेकर दस रत्तीतक बढावे। फिर क्रमसे घटाकर चार रत्तीतक करलेवे। इसपर मसूरका यूष, शीतलजल तथा भातका पथ्य देना चाहिये। यह रस सब प्रकारकी संग्रहणी और विशेषकर कुक्षी (पेट) की मृदुताको दूर करता है ॥ ९१-९४ ॥

टङ्कणक्षारगन्धाश्मरसं जातीफलं तथा।
बिल्वं खदिरसारं च जीरकं श्वेतधूनकम् ॥ ९५ ॥
कपिहस्तकबीजं च तथैव बकपुष्पकम्।
एषां शाणं समादाय श्लक्ष्णचूर्णानि कारयेत् ॥ ९६ ॥
बिल्वपत्रककार्पासफलं शालिञ्चदुग्धिका।
शालिञ्चमूलं कुटजत्वचः कञ्चटपत्रकम् ॥ ९७ ॥
सर्वेषां स्वरसेनैव वटिकां कारयेद्भिषक्।
रक्तिकैकप्रमाणेन खादयेद् दिवसत्रयम् ॥ ९८ ॥
दधिमस्तु ततः पेयं पलमात्रप्रमाणतः।
अपि योगशताक्रान्तां ग्रहणीमुद्धतां जयेत् ॥ ९९ ॥
आमशूलं ज्वरं कासं श्वासं शोथं प्रवाहिकाम्।
रक्तस्रावकरं द्रव्यं कार्यं नैवात्र युक्तितः ॥ २०० ॥
लघवार्ताकुमत्स्यं च दधि तक्रं च शस्यते।
ज्ञात्वा वायोः कृतिं तत्र तैलं वारि प्रदापयेत् ॥ २०१ ॥

५-सुहागा, जवाखार, शुद्ध गन्धक, शुद्ध पारा, जायफल, बेलगिरी, खैरसार, जीरा, सफेद राल, कौंचके बीज और अगस्तियाके फूल प्रत्येक चार चार माशे लेकर बारीक चूर्ण करलेवे फिर उस चूर्णको बेलके पत्ते, कपासके फल, शालिञ्च-

शाक, दुद्धी, शालिञ्चकी जड, कुडेकी छाल और जलचौलाई इन सब औषधियोंके रसमें खरल करके एकएक रत्तीकी गोलियाँ बनालेवे। इस औषधिको प्रतिदिन एकएक गोलीके क्रमसे तीन दिनतक सेवन करे और ऊपरसे एकएक पल प्रमाण दहीका तोड पान करे। यह औषधि जो सैकडों प्रयोगोंसे भी दूर नहीं हुई हो ऐसी प्रबल संग्रहणी एवं आमयुक्त शूल, ज्वर, खाँसी, श्वास, शोथ और प्रवाहिका इन सब रोगोंको नष्ट करती है। इसपर रक्तस्राव करनेवाले पदार्थोंको कदापि सेवन नहीं करना चाहिये। काले बैंगन, मछली, दही और मट्ठेको सेवन करना चाहिये। एवं वायुके बलाबलको विचारकर इसपर तेल और जल देना चाहिये॥९९-२०१॥

ग्रहणीवज्रकपाटरस।

सूत गन्धं यवक्षारं जयन्त्युग्राभ्रटङ्कणम्।
जयन्तीभृंगजम्बीरद्रवैः पिष्ट्वा दिनत्रयम्॥ २०२॥
यामार्द्धं गोलकं स्वेद्यं मन्देन पावकेन च।
शीते जयारससमैः शाल्मलीविजयाद्रवैः॥ २०३॥
भावयेत्सप्तधा वज्रकपाटः स्याद् रसोत्तमः।
माषद्वयं त्रयं वाऽस्य मधुना ग्रहणीं जयेत्॥ २०४॥

शुद्ध पारा, शुद्ध गन्धक, जवाखार, अरणी, वच, अभ्रक और सुहागा इन सब औषधियोंके चूर्णको अरणी, भाँगरा और जम्बीरीनींबू इनके रसमें पृथक् पृथक् तीन दिनतक खरल करके गोलासा बनालेवे। उस गोलेको मन्दमन्द अग्निके द्वारा आधे प्रहरतक स्वेद देवे। फिर शीतल होजानेपर भाँग, सेमलकी मुसली और हरड इनके रस अथवा क्वाथमें सात चार भावना देवे तो यह ग्रहणीवज्रकपाटरस सिद्ध होता है। इस रसकी दो या तीन माशे मात्रा शहदके साथ मिलाकर सेवन करनेसे संग्रहणी दूर होती है॥ २०२-२०४॥

बृहद्ग्रहणीवज्रकपाट।

तारमौक्तिकहेमानि सारश्चैकैकभागकम्।
द्विभागो गन्धकः सूतस्त्रिभागो मर्दयेदिमान्॥५॥
कपित्थस्वरसैर्गाढं मृगशृंगे ततः क्षिपेत्।
पुटेन्मध्यपुटेनैव तत उद्धृत्य मर्दयेत्॥ ६॥
बलारसैः सप्तधैवमपामार्गरसैस्त्रिधा।
लोध्रं चातिविषा मुस्ता धातकीन्द्रयवामृताः॥ ७॥

प्रत्येकमेतत्स्वरसैर्भावना स्यात्त्रिधा त्रिधा ।
माषमात्रो रसो देयो मधुना मरिचैस्तथा ॥ ८ ॥
हन्ति सर्वानतीसारान् ग्रहणीं सर्वजामपि ।
कपाटो ग्रहणीरोगे रसोऽयं वह्निदीपनः ॥ ९ ॥

रूपा, मोती, सुवर्ण और लोह इन प्रत्येककी भस्म एक एक भाग, शुद्ध गन्धक दो भाग और शुद्ध पारा तीन भाग ले एकत्रितकर कैथके पत्तोंके स्वरसमें उत्तम प्रकारसे खरल करके हिरनके सींगमें भरकर और उसको अच्छे प्रकारसे बंद करके गजपुटमें रखकर पकावे । पश्चात् औषधिको निकालकर खिरैंटीके रसमें ७ वार एवं चिरचिटा, लोध, अतीस, नागरमोथा, धायके फूल, इन्द्रजौ और गिलोय इन प्रत्येकके रसमें तीन तीन चार भावना देकर एक एक माशेकी गोलियाँ बनालेवे । इनमेंसे एक एक गोली शहद और काली मिरचोंके चूर्णके साथ सेवन करनेसे यह रस सर्व प्रकारके अतिसार और सर्वदोषोत्पन्न ग्रहणीरोगको शीघ्र नष्ट करता है ॥ २०५-२०९ ॥

संग्रहग्रहणीकपाट रस ।

मुक्ता सुवर्णं रसगन्धटङ्कं घनं कपर्दामृततुल्यभागः ।
सर्वैः समं शङ्खकचूर्णमिष्टं खल्वे च भाव्योऽतिविषाद्रवेण२१०॥
गोलं च कृत्वा मृदुकर्पटस्थं सम्पाच्य भाण्डे दिवसार्द्धकं च ।
सर्वाङ्गशीते रस एष भाव्यो धुस्तूरवह्नीमुसलीद्रवैश्च ॥
लौहस्य पात्रे परिभावितश्च सिद्धो भवेत् संग्रहणीकपाटः॥२११॥

मोती, सुवर्ण, शुद्ध पारा, शुद्ध गन्धक, सुहागा, अभ्रक, कौडी इनकी भस्म और शुद्ध मीठातेलिया इन सबको समान भाग और सबके बराबर शङ्खकी भस्म लेवे, फिर सबको खरलमें डालकर अतीसके क्वाथमें खरल करके गोलासा बनालेवे । उस गोलेको सूक्ष्मवस्त्रमें लपेटकर किसी एक मट्टीके उत्तम पात्रमें यथाविधि बन्द करके गजपुटमें रखकर दो प्रहरतक पकावे । जब स्वांगशीतल होजाय तब औषधिको निकालकर लोहेके पात्रमें डालकर धतूरा, चीता और मुसली इनके रस व क्वाथमें अच्छे प्रकारसे खरल करके दो दो रत्तीकी गोलियाँ बनालेवे । इस प्रकार यह संग्रहग्रहणीकपाटरस सिद्ध होता है ॥ २१० ॥ २११ ॥

वातोत्तरायां मरिचाज्ययुक्तः पित्तोत्तरायां मधुपिप्पलीभिः ॥
कफोत्तरायां विजयारसेन कटुत्रयेणाज्ययुतो ग्रहण्याम् ॥१२॥

क्षये ज्वरे चार्शसि षट्प्रकारे मान्द्यातिसारेऽरुचिपीनसेषु।
मेहे च कृच्छ्रे गतधातुवर्द्धने हुआद्दयं चास्य महामयघ्नम् १३॥

इस रसको वाताधिक्य संग्रहणीमें मिरचोंके चूर्ण और घीके साथ तथा पित्ताधिक्य संग्रहणीमें शहद और पीपलके चूर्णके साथ और कफाधिक्य संग्रहणीमें भाँगके रस अथवा घृतमिश्रित त्रिकुटेके चूर्णके साथ सेवन करना चाहिये। एवं मन्दाग्नि, क्षय, ज्वर, छः प्रकारकी बवासीर, अतिसार, अरुचि, पीनस, प्रमेह, मूत्रकृच्छ्रादि रोगोंमें और नष्ट हुई धातुकी वृद्धिके लिये इसका प्रयोग करना चाहिये। यह रस बडी बडी दुस्तर व्याधियोंको नष्ट करता है ॥ १२ ॥ १३ ॥

ग्रहणीगजेन्द्रवटिका।

रसगन्धकलोहानि शङ्खटङ्कणरामठम्।
शठीतालीशमुस्तानि धान्यजीरकसैन्धवम् ॥ १४ ॥
धातक्यतिविषा शुण्ठी गृहधूमो हरीतकी।
भल्लातकं तेजपत्रं जातीफललवंगकम् ॥ १५ ॥
त्वगेला बालकं बिल्वं मेथी शक्राशनस्य च।
रसैः सम्मर्द्य वटिका रसवैद्येन कारिता ॥ १६ ॥
माषद्वयां वटीं खादेच्छागीदुग्धानुपानतः।
वयोऽग्निबलमावीक्ष्य युक्त्या वा वृटिवर्द्धनम् ॥ १७ ॥

शुद्ध पारा और शुद्ध गन्धक दोनोंकी कज्जली एवं लोहभस्म, शंखभस्म, सुहागा, हींग, कचूर, तालीसपत्र, नागरमोथा, धनियाँ, जीरा, सैंधानमक, धायके फूल, अतीस सोंठ, घरका धुआँ, हरड, भिलावें, तेजपात, जायफल, लौंग, दालचीनी, इलायची, सुगन्धवाला, बेलगिरी और मेथी इन सबको समानभाग लेकर बारीक चूर्ण करलेवे। फिर भाँगके रसमें खरल करके दो दो माशेकी गोलियाँ बनालेवे। इसको अवस्था और अग्निके बलाबलका विचारकर मात्राको न्यूनाधिकता करके बकरीके दूधके साथ सेवन करना चाहिये ॥ १४-१७ ॥

ग्रहणीं विविधां हन्ति ज्वरातीसारनाशिनी।
शूलगुल्माम्लपित्तांश्च कामलां च हलीमकम् ॥ १८ ॥
बलवर्णाग्निजननी सेविता च चिरायुषे।
कण्डूं कुष्ठं विसर्पं च गुदभ्रंशं कृमिं जयेत् ॥ १९ ॥

गहनानन्दनाथेन भाषितेयं रसायने ।
ग्रहणीगजेन्द्रसंज्ञेयं श्रीमता लोकरक्षणे ॥ २२० ॥

यह वटिका नानाप्रकारकी संग्रहणी, ज्वर, अतिसार, शूल, गुल्म, अम्लपित्त, कामला, हलीमक, खुजली, कुष्ठ, विसर्प, गुदभ्रंश और कृमिरोगको दूर करती है। एवं बल, वर्ण, अग्नि और आयुकी विशेष वृद्धि करनेवाली है । इस ग्रहणीगजेन्द्र नामक वटिकाको लोकके कल्याणकी इच्छासे श्रीमान् गहनानन्दनाथजीने निर्माण किया है । यह अत्युत्तम रसायन है ॥ १८-२० ॥

जातीफलाद्यवटिका ।

जातीफलं टङ्कणमभ्रकं च धुस्तूरबीजं समभागचूर्णम् ।
भागद्वयं स्यादहिफेनकस्य गन्धालिकापत्ररसेन मर्द्यम् ॥ २१ ॥
चणप्रमाणा वटिका विधेया मधुप्रयुक्ता ग्रहणीगदेषु ।
रोगेषु दद्यादनुपानभेदैर्युक्त्या विदध्यादतिसारवत्सु ॥ २२ ॥
सामेषु रक्तेषु सशूलकेषु पक्वेष्वपक्वेषु गुदामयेषु ।
पथ्यं सदध्योदनमत्र देयं रसोत्तमोऽयं ग्रहणीकपाटः ॥ २३ ॥

जायफल, सुहागा, अभ्रक और धतूरेके बीज प्रत्येक एकएक तोला और अफीम दो तोले लेवे । सबको एकत्र गन्धप्रसारिणीके रसमें मर्दन करके चनेकी बराबर गोलियाँ बनालेवे । इसको संग्रहणीरोगमें शहदके साथ, अतिसार, आमातिसार, रक्तातिसार, शूल, पक्व व अपक्व गुदारोग आदि विकारोंमें यथादोषानुसार अनुपानके साथ विधिपूर्वक सेवन करे तो सम्पूर्ण विकार नष्ट होते हैं । इसपर दहीके साथ भातका पथ्य देना चाहिये ॥ २१-२२ ॥

बृहज्जातीफलाद्यवटिका ।

विशुद्धसूतस्य च गन्धकस्य प्रत्येकशो माषचतुष्टयं च ।
विधाय शुद्धोपलपात्रमध्ये सुकज्जलीं वैद्यवरःप्रयत्नात् ॥ २४ ॥
जातीफलं शाल्मलिवेष्टमुस्तं सटङ्कणं सातिविषं सजीरम् ।
प्रत्येकमेषां मरिचस्य शाणप्रमाणमेकं विषमाषकं च ॥ २५ ॥
विचूर्ण्य सर्वाण्यवलोड्य पश्चाद्विभावयेत्पत्रभवैरमीषाम् ।
रसे रसोन्मानमिते रसालवंशौ च भद्रोत्कटकंचटौ च ॥२६॥
इन्द्राणिकेन्द्राशनकं सजम्बु जयन्तिका दाडिमकेशराजौ ।
अविद्धकर्णापि च भृंगराजो विभाव्य सम्यग्वटिका विधेया२७
कोलास्थिमाना च-

शुद्धपारा और शुद्धगन्धक दोनोंको चार चार माशे लेकर एक उत्तम पत्थरके खरलमें डालकर अच्छे प्रकारसे मर्दन करके कज्जली बनालेवे। फिर जायफल, मोचरस, नागरमोथा, सुहागा, अतीस, जीरा और मिरच ये प्रत्येक चार चार माशे और शुद्ध मीठातेलिया एक माशे लेवे। इन सबको एकत्र पीसकर पूर्वोक्त कज्जलीमें मिश्रित करके आम, बाँस, गन्धप्रसारिणी, जलपीपल, सिह्माळू, भाँग, जामुन, अरणी, अनार, कुकुरभाँगरा, पाढ और भाँगरा इन प्रत्येक औषधिके पत्तोंके स्वरसमें पृथक् २ अच्छे प्रकारसे खरल करके बेरकी गुठलीकी बराबर गोलियाँ बनालेवे ॥ २४–२७ ॥–

–बहुप्रकारं सामं निहन्त्यत्र यथानुपानम्।
कुर्याद्विशेषादनलावलम्बं कासं च पञ्चात्मकमम्लपित्तम् २८॥
इयं निहन्ति ग्रहणीं प्रवृद्धां मर्त्यस्य जीर्णग्रहणीमसाध्याम्।
चिरोद्भवां संग्रहकोष्ठदुष्टिं शोथं समुग्रं गुदजानसाध्यान् २९॥
आमानुबद्धं त्वतिसारमुग्रं जयेद् भृशं योगशतैरसाध्यम्।
विवर्जनीयास्त्विह भृष्टमत्स्या मत्स्यस्तथा पाण्डुरवर्ण एव ३०
रम्भाफलं मूलमथौदनं च बुधैर्विधेयं न कदाचिदत्र।
जातीफलाद्या वटिका विधेया यशोऽर्थिनोवैद्यवरस्य हृद्या।
अनेकसंभावितमर्त्यलोकनानाविधव्याधिपयोधिनौका ॥ ३१ ॥

यह वटी यथादोषानुसार अनुपानके साथ सेवन करनेसे नानाप्रकारके आमयुक्त विकारोंको नष्ट करतीहै और विशेषकर अग्निको दीपन करती है। एवं पाँचों प्रकारकी खांसी, अम्लपित्त, प्रबल और असाध्य संग्रहणी, बहुत पुरानी कोष्ठकी खराबी, अत्यन्त बढाहुआ शोथ, असाध्य गुदाके रोग, आमयुक्त अत्युग्र अतिसार और जो सैकडों प्रयोगोंसे भी सिद्ध न हो सके हों ऐसे असाध्य रोगोंको तत्काल नष्ट करती है। इसको सेवन करनेपर भुनीहुई मछली, पीले रंगकी मछली, केलेकी फली तथा कदलीके कन्द और भात इन पदार्थोंको कदापि भक्षण नहीं करना चाहिये। यह जातीफलाद्य वटिका यश चाहनेवाले वैद्योंके मनको हरनेवाली है और इस मनुष्यलोकमें अनेकप्रकारके रोगरूपी समुद्रमें डूबते हुए मनुष्योंको उबारनेके लिये नौकारूप है ॥ २८–३१ ॥

वडवामुख रस।

शुद्धसूतं समं गन्धं मृतताम्राभ्रटङ्कणम्।
सामुद्रं च यवक्षारं स्वर्जिसैन्धवनागरम् ॥ ३२ ॥

अपामार्गस्य च क्षारं पलाशतरुणस्य च ।
प्रत्येकं सूततुल्यं स्यादम्लयोगेन मर्दयेत ॥
हस्तिशुण्डीद्रवैश्चाग्नो मर्दयित्वा पुटेल्लघु ॥ २३ ॥
माषमात्रः प्रदातव्यो रसोऽयं वडवामुखः ।
ग्रहणीं विविधां हन्ति संग्रहग्रहणीं ज्वरम् ॥ २४ ॥

शुद्ध पारा, शुद्ध गन्धक, तॉबेकी भस्म, अभ्रककी भस्म, सुहागा, सामुद्रिक लवण, जवाखार, सज्जी, सैन्धानमक, सोंठ, चिरचिटेका खार, ढाकका क्षार और वरनेका क्षार इन सबको समानभाग लेकर कॉंजीके साथ खरल करे फिर हाथीशुण्डा और चीतेकी जड़के क्वाथमें खरल करके लघुपुटमें पकावे। यह वडवामुखनामक रस एक एक माशे परिमाण सेवन करनेसे अनेक प्रकारकी संग्रहणी और ज्वरादि रोगोंको शीघ्र दूर करता है ॥ २२-२४ ॥

ग्रहणीशार्दूलरस ।

रसगन्धकयोश्चापि कर्षमेकं सुशोधितम् ।
द्वयोः कज्जलिकां कृत्वा हाटकं षोडशांशतः ॥ २५ ॥
लवङ्गं निम्बपत्रं च जातीकोषफले तथा ।
एतेषां कर्षचूर्णेन सूक्ष्मैलां सह मेलयेत ॥ २६ ॥
मुक्तागृहे च संस्थाप्य पुटपाकेन साधयेत् ।
पञ्चगुञ्जाप्रमाणेन प्रत्यहं भक्षयेन्नरः ॥ २७॥

शुद्ध पारा और शुद्ध गन्धकको एकएक कर्ष प्रमाण लेकर एकत्र खरलकर कज्जली बनालेवे. फिर उसमें सुवर्णभस्म सोलहवां भाग एवं लौंग, नीमके पत्ते, जावित्री, जायफल और छोटी इलायची इनको एकएक कर्ष चूर्ण मिलाकर एक सीपीमें अच्छे प्रकारसे बंद करके और ऊपरसे कपरौटीकर पुटपाक करे। पश्चात् स्वांगशीतल होनेपर औषधिको निकालकर प्रतिदिन पांच पांच रत्तीकी मात्रासे भक्षण करे ॥ २५-२७ ॥

सूतिकां ग्रहणीरोगं हरत्येष सुनिश्चितम् ।
अर्शोघ्नो दीपनश्चैव बलपुष्टिप्रसाधनः ॥ २८ ॥
कासश्वासातिसारघ्नो बलवीर्यकरः परः ।
संग्रहग्रहणीरोगमामशूलं च नाशयेत् ॥
संसारलोकरक्षार्थं पुरा रुद्रेण भाषितः ॥ २९ ॥

यह रस सूतिकारोग,ग्रहणी,अर्श,खांसी श्वास, अतीसार,अत्यंत प्रबल ग्रहणी और आमशूल रोगको निश्चय नष्ट करता है. एवं अग्निको दीपन करनेवाला, बल पुष्टि और वीर्यको अत्यन्त वृद्धि करनेवाला है । इस रसको पूर्वकालमें सांसारिकजीवोंकी रक्षाके लिये महादेवजीने कहा है ॥ ३८ ॥ ३९ ॥

महागन्धक और सर्वाङ्गसुन्दररस ।

रसगन्धकयोः कर्षं ग्राह्यमेकं सुशोधितम् ।
ततः कज्जलिकां कृत्वा मृदुपाकेन साधयेत् ॥ २४० ॥
जात्याः फलं तथा कोषं लवङ्गारिष्टपत्रके ।
सिन्दुवारदलं चैव एलाबीजं तथैव च ॥ ४१ ॥
एतेषां कर्षमात्रेण तोयेन सह मर्दयेत् ।
मुक्तागृहे पुनः स्थाप्य पुटपाकेन साधयेत् ॥ ४२ ॥
घनपङ्के बहिर्लिप्त्वा पुटमध्ये निधापयेत् ।
गुञ्जाषट्कप्रमाणेन प्रत्यहं भक्षयेन्नरः ॥ ४३ ॥

शुद्ध पारा और शुद्ध गन्धक दोनोंको एक एक कर्ष लेकर कज्जली बनालेवे फिर उसमें जल मिलाकर लोहेके पात्रमें मन्द मन्द अग्निसे कुछ देरतक पकावे पश्चात् उसमें जायफल, जावित्री, लौंग, नीमके पत्ते, निर्गुंडीके पत्ते और छोटी इलायची इन प्रत्येकका एक एक कर्ष चूर्णको मिलाकर जलके साथ खरल करे । फिर इस औषधिको एक सीपीमें भरकर और दूसरी सीपीसे बन्दकरके केलोंके पत्तोंसे लपेटकर ऊपरसे गाढी २ कीचडका लेप करके आरने उपलोंकी अग्निमें रखकर पुटपाक करे । जब वह पककर लालवर्ण होजाय तब निकालकर शीतल होनेपर खरल करलेवे । इस रसको प्रतिदिन छः रत्ती प्रमाण यथादोषानुसार उचित अनुपानके साथ सेवन करना चाहिये ॥ २४०–४३ ॥

ज्वरघ्नं दीपनं चैव बलवर्णप्रसादनम् ।
दुर्वारं ग्रहणीरोगं जयत्येव प्रवाहिकाम् ॥ ४४ ॥
सूतिकां च जयेदेतद्रक्तार्शो रक्तसम्भवम् ।
कासश्वासातिसारघ्नं वाजीकरणमुत्तमम् ॥ ४५ ॥

यह रस ज्वर, दुस्साध्य संग्रहणी, प्रवाहिका, सूतिकारोग, रक्तार्श, खाँसी, श्वास, अतिसारआदि रोगोंको शीघ्र दूर करताहै तथा अग्निप्रदीपक, बल, वर्णको प्रसन्न करनेवाला और उत्तम वाजीकरण औषधि है ॥ ४४ ॥ ४५ ॥

एतत् प्रोक्तं कुमाराणां रक्षणाय महौषधम् ।
बालरोगं निहन्त्याशु सर्वोपद्रवसंयुतम् ॥ ४६ ॥
पिशाचा दानवा दैत्या बालानां ये विघातकाः ।
यत्रौषधवरस्तिष्ठेत् तत्र सीमां त्यजन्ति ते ॥ ४७ ॥
बालानां गदयुक्तानां स्त्रीणां चापि विशेषतः ।
महागन्धकमेतद्धि सर्वव्याधिनिषूदनम् ॥
विना पाकेन सर्वाङ्गसुन्दरोऽयं प्रकीर्त्तितः ॥ ४८ ॥

यह रस विशेषकर बालकोंकी रक्षाके लिये कहा गया है। बालकोंके सम्पूर्ण उपद्रवोंसहित रोगोंको तत्काल नष्ट करता है। जिस स्थानमें यह उत्तम औषधि रहती है वहाँ बालकोंके प्राणोंको हरनेवाले पिशाच, दैत्य और दानव आदि नहीं ठहर सकते। यह महागन्धक नामक रस रोगसे पीडित बालकों और विशेषकर स्त्रियोंके सब प्रकारके रोगोंको दूर करता है। इस रसकी यदि विना पुटपाक किये औषधियोंको एकत्र तपाये जलमें खरलकर गोली बना ली जाय तो इसको सर्वाङ्गसुन्दर रस कहते हैं ॥२४६-४८॥

वैद्यनाथ वटी ।

रसस्य शाणं संगृह्य काञ्जिकेन तु शोधयेत् ।
चित्रकस्य रसेनापि त्रिफलायाश्च बुद्धिमान् ॥ ४९ ॥
रसार्द्धं गन्धकं शुद्धं भृङ्गराजरसेन वा ।
द्वाभ्यां संमूर्च्छनं कृत्वा स्वरसैः शाणसम्मितैः ॥ २५० ॥
खल्लयेत्तु शिलाखल्ले क्रमशो वक्ष्यमाणजैः ।
निर्गुण्डीमण्डुकीश्वेताकुचेलाग्रीष्मसुन्दरैः ॥ ५१ ॥
भृङ्गाह्वकेशराजैश्च जयेन्द्राशनकोत्कटैः ।
सर्षपाभां वटीं कृत्वा दद्यात्तां ग्रहणीगदे ॥ ५२ ॥
आमवातेऽग्निमान्द्ये च ज्वरे प्लीहोदरेषु च ।
वातश्लेष्मविकारेषु तथा श्लेष्मगदेषु च ॥ ५३ ॥
दातव्या गुटिकाः सप्त रोगिणे ग्रहणीगदे ।
अम्लतक्रादि सेव्यं तु कुर्वीत स्वेच्छया बहु ॥ ५४ ॥
श्रीमता वैद्यनाथेन लोकानुग्रहकारिणा ।
स्वप्नान्ते ब्राह्मणस्येयं भाषिता लिखितापि च ॥ ५५ ॥

पारेको चार माशे परिमाण लेकर कांजी, चीतेके क्वाथ और त्रिफलेके क्वाथमें क्रमसे भावना देकर शुद्ध करे । फिर दो माशे गंधकको भांगरेके रसमें शुद्ध करके एकत्र पारेके साथ खरलकर पश्चात् एक पत्थरके खरलमें निर्गुण्डीके पत्ते, ब्राह्मी, सफेद कोयल, पाढ, ग्रीष्मसुन्दर (शालिंचशाक), कुकुरभांगरा, अरणी, भांग और दारचीनी इन प्रत्येकके चार चार मासे रसमें क्रमसे मर्दन करके सरसोंकी बराबर गोलियां बनालेवे । इसको ग्रहणीरोग, आमवात, मंदाग्नि, ज्वर, प्लीहा, उदररोग, वात-कफरोग और कफविकारमें सेवन करावे । संग्रहणीरोगमें इसको एक साथ सात गोली देवे और ऊपरसे दहीकी तोड अथवा तक्रको यथेच्छरूपसे सेवन करावे । इससे संग्रहणीरोग नष्ट होता है ॥ ५१-२५५ ॥

रससर्षपवटी ।

पक्वेष्टकाहरिद्राभ्यामागारधूमकेन च ।
शोधितं पारदं चैव कर्षार्द्धं तुलया धृतम् ॥ ५६ ॥
भृङ्गराजरसैः शुद्धं गन्धकं रससम्मितम् ।
द्वाभ्यां कज्जलिकां कृत्वा भावयेत्तत्तु भेषजैः ॥ ५७ ॥
सिन्दुवारदलरसे मण्डूकपर्णिकारसे ।
केशराजरसे चापि ग्रीष्मसुन्दरजे रसे ॥ ५८ ॥
रसेऽपराजितायाश्च सोमराजीरसे तथा ।
रक्तचित्रकपत्रोत्थे रसे च परिभावितम् ॥ ५९ ॥
रसमानसमानेन च्छायायां शोषयेद्भिषक् ।
सर्षपाभाश्च गुडिकाः कारयेत कुशलो भिषक् ॥ २६० ॥

पक्की ईंटके चूर्ण, हल्दीका चूर्ण और घरका धुआँसा इन तीनोंके द्वारा शुद्ध किया हुआ पारा एक तोला और भाँगरेके रससे शुद्ध किया हुआ गन्धक एक तोला लेवे दोनोंकी एकत्र कज्जली बनाकर निर्गुण्डीके पत्ते, ब्राह्मी, कुकुरभाँगरा, ग्रीष्मसुन्दर (शालिंचशाक), बापची और लालचीतेके पत्ते इन प्रत्येक औषधिके एकएक तोला रसमें पृथक् २ खरल कर सरसोंकी बराबर गोलियाँ बनाकर छायामें सुखालेवे ॥ ५६-२६० ॥

ततः सप्त वटीर्दद्याद्दधिमस्तुसमाप्लुताः ।
नित्यं दध्ना च भोक्तव्यं कोष्ठदुष्टिनिवृत्तये ॥ ६१ ॥

ग्रहणीमतिसारं च ज्वरदोषं च नाशयेत् ।
अग्निदार्ढ्यंकरं श्रेष्ठमामपर्पटिकाद्वयम् ॥ ६२ ॥

संग्रहणीरोगवाले मनुष्यको इसकी सात सात गोली दहीके पानीके साथ मिलाकर देनी चाहिये । इसपर कोष्ठदोषके निवारण करनेके लिये प्रतिदिन दहीके साथ भोजन करना चाहिये । इससे संग्रहणी, अतिसार और ज्वर दूर होता है । एवं अग्नि अत्यन्त दीपन होती है ॥ ६१ ॥ ६२ ॥

रसाभ्र वटी ।

शुद्धसूतस्य कर्षैकं कर्षैकं गन्धकस्य च ।
द्वयोःकज्जलिकां कृत्वा तुल्यं व्योम प्रदापयेत् ॥ ६३ ॥
केशराजस्य भृङ्गस्य निर्गुण्ड्याश्चित्रकस्य च ।
ग्रीष्मसुन्दरमण्डूकीजयन्तीन्द्राशनस्य च ॥ ६४ ॥
श्वेतापराजितायाश्च स्वरसं पर्णसम्भवम् ।
रसतुल्यं प्रदातव्यं चूर्णं च मरिचोद्भवम् ॥ ६५ ॥
देयं रसार्द्धभागेन चूर्णं टङ्कणसम्भवम् ।
सम्मर्द्य वटिकां कुर्यात् कलायसदृशीं बुधः ॥ ६६ ॥
हन्ति कासं क्षयं श्वासं वातश्लेष्मभवां रुजम् ।
ज्वरे चैवातिसारे च सिद्ध एष प्रयोगराट् ॥ ६७ ॥
चातुर्थिके ज्वरे श्रेष्ठो ग्रहण्यातङ्कनाशनः ।
दधि चावश्यकं देयं प्राह नागार्जुनो मुनिः ॥ ६८ ॥

शुद्ध पारा १ कर्ष और शुद्ध गन्धक १ कर्ष दोनोंकी कज्जली करके उसमें दो कर्ष अभ्रककी भस्म मिलाकर उसको कुकुरभाँगरा, सिह्मालू, चीता, ग्रीष्मसुन्दर, ब्राह्मी, अरणी, भाँग, सफेदकोयल और पान इनके एकएक कर्ष प्रमाण रसमें क्रमसे अलग २ खरल करके कालीमिरचोंका चूर्ण एक कर्ष और सुहागा आधा कर्ष दोनोंको मिलाकर अच्छे प्रकारसे खरलकरके मटरकी बराबर गोलियाँ बनालेवे । यह वटी खाँसी, क्षय, श्वास, वात कफजन्यविकार, ज्वर, अतीसार, चातुर्थिक ज्वर और संग्रहणी इन सब रोगोंको नष्ट करती है । इसपर दही अवश्य सेवन करना चाहिये ॥ ६३-६८ ॥

महाभ्रवटी ।

अभ्रकं पुटितं ताम्रं लोहं गन्धकपारदम् ।
कुनटी टङ्कणक्षारं त्रिफला च पलं पलम् ॥ ६९ ॥

गरलस्य तथा माषचतुष्कं चैव चूर्णयेत् ।
तत्सर्वं भावयेदेषां रसैः प्रत्येकशः पलैः ॥ २७० ॥
देवराजाशनाख्यस्य केशराजाख्यकस्य च ।
सोमराजस्य भृङ्गाख्यराजस्य श्रीफलस्य च ॥ ७१ ॥
पारिभद्राग्निमन्थस्य वृद्धदारस्य तुम्बुरोः ।
मण्डूकपर्णीनिर्गुण्डीपूतिकोन्मत्तकस्य च ॥ ७२ ॥
श्वेतापराजितायाश्च जयन्त्याश्चार्द्रकस्य च ।
ग्रीष्मसुंदरकस्याटरूषकस्य रसेन तु ॥ ७३ ॥
रसैस्ताम्बूलवल्ल्याश्च पत्रोत्थैर्भावयेत् पृथक् ।
द्रव्ये किञ्चित् स्थिते चूर्णं मरिचस्य पलं क्षिपेत् ॥ ७४ ॥
ततश्चैव वटीं कुर्यात्-

अभ्रकभस्म, तांबेकी भस्म, लोहेकी भस्म, शुद्ध गंधक, शुद्ध पारा, मैनसिल सुहागा, जवाखार, हरड, आमला, बहेडा ये प्रत्येक चार चार तोले और शुद्ध मीठातेलिया चार माशे लेकर प्रथम पारे और गंधककी कज्जली करके सबको खरल करके एकत्र चूर्ण करलेवे । फिर भांग, कुकुरभांगरा, बावची, भांगरा, बेलपत्र, फरहद, अरणी, विधारा, तुम्बुरू, ब्राह्मी, सिह्माल्द, दुर्गन्ध करंज, धतूरेके पत्ते श्वेत अपराजिता (सफेदकोयल), जयन्ती, अदरख, ग्रीष्मसुन्दर, अडूसा और पान इन प्रत्येक औषधिके पत्तोंके चार चार तोले रसमें पृथक् २ भावना देवे, जब कुछ रस शेष रहजाय तब उसमें कालीमिरचोंका चूर्ण चार तोले मिलाकर और अच्छे प्रकारसे खरल करके एक एक रत्तीकी गोलियां बनालेवे ॥ ६९-२७४ ॥-

-मात्रां दद्याद् यथोचिताम् ।
ज्वरे चैवातिसारे च कासे श्वासे क्षये तथा ॥ ७५ ॥
सन्निपातज्वरे चैव विविधे विषमज्वरे ।
क्षयरोगेषु सर्वेषु क्षीणशुक्रे च यक्ष्मणि ॥ ७६ ॥
ग्रहण्यां चिरभूतायां सूतिकायां विशेषतः ।
शोथे शूले तथाऽसाध्ये स्थविरे चामवातके ॥ ७७ ॥
मन्दानलेऽबले चैव सकले श्लेष्मजे गदे ।
पीनसेऽपीनसे चैव पक्केऽपक्के विशेषतः ॥ ७८ ॥

वातश्लेष्मणि वाते वा विविधे चेन्द्रियस्थिते।
वातवृद्धे पित्तवृद्धे बलासानावृतेऽपि च ॥ ७९ ॥
अष्टसूदररोगेषु कुष्ठरोगेषु शस्यते।
अजीर्णे कर्णरोगे च कृशे स्थूले च यक्ष्मणि ॥ ८० ॥
अयं सर्वगदेष्वेव रसो वै परिकीर्त्तितः।
महाभ्रवटिका सेयं परा श्रेष्ठा रसायने ॥ ८१ ॥

इन गोलियोंको यथोचितमात्रासे सेवन करनेसे ज्वर, अतीसार, श्वास, खांसी, क्षय, संनिपातज्वर विविधप्रकारके विषमज्वर, सब प्रकारके क्षयरोग, शुक्रकी क्षीणता, राजयक्ष्मा, पुरानी संग्रहणी, विशेषकर सूतिकारोग, स्थविर, आमवातरोग, मन्दाग्नि, निर्बलता, सर्वप्रकारके कफरोग, पीनस, पक्व अपक्व अपीनसरोग, वातश्लेष्म, अनेक प्रकारके वातरोग, आठ प्रकारके उदररोग, कुष्ठरोग आदि नष्ट होते हैं। यह महाभ्रवटिका अत्यन्त श्रेष्ठ रसायन है ॥ ७८-२८१॥

पीयूषवल्लीरस।

सूतकं गन्धकं चाभ्रं तारं लोहं सटङ्कणम्।
रसाञ्जनं माक्षिकं च शाणमेकं पृथक् पृथक् ॥ ८२ ॥
लवङ्गं चन्दनं मुस्तं पाठा जीरकधान्यकम्।
समङ्गाऽतिविषा लोध्रं कुटजेन्द्रयवं त्वचम् ॥ ८३ ॥
जातीफलं विश्वबिल्वं कनकं दाडिमीच्छदम्।
समङ्गा धातकी कुष्ठं प्रत्येकं रससम्मितम् ॥ ८४ ॥
भावयेत् सर्वमेकत्र केशराजरसैः पुनः।
चणकाभा वटी कार्या छागीदुग्धेन पेषिता ॥ ८५ ॥

शुद्ध पारे और शुद्ध गन्धककी कज्जली ८ माशे एवं अभ्रक, रौप्यभस्म, लोहभस्म सुहागा, रसौंत, सोनामाखी, लौंग, लालचन्दन, नागरमोथा, पाढ, जीरा, धनियाँ, लज्जावंती, अतीस, लोध, कुडेकी छाल, इन्द्रजौ, दालचीनी, जायफल, सोंठ, बेलगिरी, धतूरेके बीज, अनारका वक्कल, वराहक्रान्ता, धायके फूल और कूठ प्रत्येक चार चार माशे लेवे। सबको एकत्र पीसकरके कुकुरभाँगरेके रसकी बारम्बार भावना देवे। फिर बकरीके दूधमें खरल करके चनेकी बराबर गोलियाँ बनालेवे ॥ ८२-८५ ॥

अनुपानं प्रदातव्यं दग्धबिल्वसमं गुडम् ।
अतिसारं ज्वरं तीव्रं रक्तातीसारमुल्वणम् ॥ ८६ ॥
ग्रहणीं चिरजां हन्ति शोथं दुर्नामकं तथा ।
आमशूलविबन्धघ्नः संग्रहग्रहणीहरः ॥ ८७ ॥
पिच्छामदोषं विविधं पिपासादाहरोगकम् ।
हृल्लासारोचकच्छर्दिगुदभ्रंशं सुदारुणम् ॥ ८८ ॥
पक्कापक्कमतीसारं नानावर्णं सवेदनम् ।
कृष्णारुणं च पीतं च मांसधावनसन्निभम् ॥ ८९ ॥
प्लीहगुल्मोदरानाहसूतिकारोगसङ्करम् ।
असृग्दरं निहन्त्येव वन्ध्यानां गर्भदं परम् ॥ २९० ॥
कामलां पाण्डुरोगं च प्रमेहानपि विंशतिम् ।
एतान् सर्वान् निहन्त्याशु मासार्द्धं नात्र संशयः ॥ ९१॥
पीयूषवल्लीवटिका अश्विभ्यां निर्मिता पुरा ।
कश्यपाय ददेऽश्विभ्यां ततः प्राप प्रजापतिः ॥ ९२ ॥
धन्वन्तरिस्ततः प्राप देवतानां पतिस्ततः ।
परम्पराप्राप्त एष रसस्त्रैलोक्यदुर्लभः ॥ ९३ ॥

इस रसको समान भाग मिश्रितकर भुनेहुए बेल और गुड़के साथ सेवन करानेसे अतिसार, ज्वर, प्रबल अतिसार, बहुत पुरानी संग्रहणी, सूजन, बवासीर, आमशूल, विबन्धयुक्त संग्रहणी, पिच्छिलता, आमदोष, प्यास, दाह, उबकाई, अरुचि, वमन, दारुण गुदभ्रंश, पक्क अथवा अपक्क तथा विविध प्रकारकी पीड़ायुक्त अतिसार, काला, लाल, पीला और मांसके धोवनकी समान वर्णवाला अतिसार, प्लीहा (तिल्ली), गुल्म, उदररोग, अफारा, सूतिकारोग, रक्तप्रदर, वन्ध्यात्व, कामला, पाण्डु और बीसों प्रमेह इन सब रोगोंको यह रस एक पक्षमें ही निस्सन्देह नष्ट कर देता है तथा गर्भको उत्पन्न करता है। यह पीयूषवल्लीनामक वटी अश्विनी कुमारोंसे प्राप्तहुई थी ॥ ८६-९३ ॥

पानीयभक्तवटी ।

कृष्णाभ्रलौहमलशुद्धविडङ्गचूर्णं
प्रत्येकमेकपलिकं विधिवद् विधाय ।

चव्यं कटुत्रयफलत्रयकेशराज-
दन्तीपयोदचपलानलघण्टकर्णाः ॥ ९४ ॥
माणोल्लकन्दबृहतीत्रिवृताः समुर्व्या-
वर्त्ताः पुनर्नविकया सहितास्त्वमीषाम्।
मूलं प्रति प्रतिविशोधितमक्षमेकं
चूर्णं तदर्द्धरसगन्धकमेकसंस्थम् ॥ ९५ ॥

काला अभ्रक, शुद्ध लोहमल (मण्डूर), वायविडङ्ग ये प्रत्येक ४–४ तोले एवं चव्य, सोंठ, पीपल, मिरच, हरड, आमला, बहेडा, कुकुरभाँगरा, दन्तीकी जड, नागरमोथा, पीपल, चीतेकी जड, मोखावृक्ष, मानकन्द, जिमीकन्द, बडी कटेरी, निसोत, हुलहुल और विषखपरा इन प्रत्येकके मूलका शुद्ध चूर्ण दो दो तोले और शुद्ध पारा गन्धककी कज्जली एक तोला लेवे ॥ ९४ ॥ ९५ ॥

कृत्वाऽऽर्द्रकीयरससंवलितं च भूयः
संपिष्य तस्य वटिका विधिवद् विधेया।
हन्त्यम्लपित्तमरुचिं ग्रहणीमसाध्यां
दुर्नामकामलभगन्दरशोथगुल्मान् ॥ ९६ ॥
शूलं च पाकजनितं सतताग्निमान्द्यं
सद्यः करोत्युपचितिं चिरनष्टवह्नेः।
कुष्ठं निहन्ति पलितं च वलिं प्रवृद्धां
श्वासं च कासमपि पाण्डुगदं निहन्ति ॥ ९७ ॥
वायन्नमांसदधिकाञ्जिकतक्रमत्स्य-
वृक्षाम्लतैलपरिपक्वभुजो यथेष्टम्।
शृङ्गाटबिल्वगुडकश्चटनारिकेल-
दुग्धानि सर्वविदलानि विवर्जयेत्तु ॥ ९८ ॥

फिर सबका एकत्र अदरखके रसमें भावना देकर और उसीमें फिर उत्तम प्रकारसे खरल करके दो दो रत्तीकी गोलियाँ बनालेवे। यह वटी अम्लपित्त, अरुचि, असाध्य संग्रहणी, बवासीर, कामला, भगन्दर, शोथ, गुल्म, शूल, निरन्तर अग्निकी मन्दता, कुष्ठ, पलित (विना अवस्थाके ही बालोंका सफेद होजाना), वलि (विनाही अवस्थाके शरीरमें वलियोंका पडजाना), श्वास, खांसी, पण्डुरोगप्रभृति रोगोंको शीघ्र

नष्ट करती है। और बहुत दिनोंसे नष्ट हुई अग्निको तत्काल दीपन करती है। इसपर बासी अन्न, मांस, दही, काँजी, छाछ, मछली, चूका और तेल ये पदार्थ यथेच्छरूपसे सेवन करना चाहिये। एवं सिंघाडे, बेलगिरी, गुड, जलचौलाई, नारियल, दूध और सब प्रकारकी दालें इनको त्याग देना चाहिये ॥ ९६-९८ ॥

श्रीनृपतिवल्लभ रस।

जातीफललवङ्गाब्दत्वगेला टङ्करामठम्।
जीरकं तेजपत्रं च यमानी विश्वसैन्धवम् ॥ ९९ ॥
लौहमभ्रं रसो गन्धस्ताम्रं प्रत्येकशः पलम्।
मरिचं द्विपलं दत्त्वा छागीक्षीरेण पेषयेत् ॥ २०० ॥
धात्रीरसेन वा पेष्यं वटिकां, कुरु यत्नतः।
श्रीमद्गहननाथेन विचिन्त्य परिनिर्म्मितः ॥ १ ॥
सूर्यवत्तेजसा चायं रसो नृपतिवल्लभः।
अष्टादशवटीं खादेत् पवित्रः सूर्यदर्शकः ॥ २ ॥

जायफल, लौंग, नागरमोथा, दालचीनी, इलायची, सुहागा, हींग, जीरा, तेजपात, अजवायन, सोंठ, सैंधानमक, लोहा, अभ्रक, शुद्ध पारा, शुद्ध गन्धक और ताँबेकी भस्म ये प्रत्येक चार चार तोले एवं काली मिरचोंका चूर्ण ८ तोले लेकर सबको एकत्र बकरीके दूधमें खरल करे फिर आमलेके रसमें खरल करके उचित मात्रासे गोलियाँ तैयार करलेवे। नृपतिवल्लभनामक यह रस सूर्यके समान तेजवाला है। इसको प्रतिदिन प्रातःकाल शौचादिसे शुद्ध होकर अठारह गोली सेवन करे ॥ ९९-२०२ ॥

हन्ति मन्दानलं सर्वमामदोषं विषूचिकाम्।
प्लीहगुल्मोदराष्ठीलायकृत्पाण्डुत्वकामलाम् ॥ २०३ ॥
हृच्छूलं कुक्षिशूलं च पार्श्वशूलं तथैव च।
कटिशूलं कुक्षिशूलमानाहमष्टशूलकम् ॥ २०४ ॥
कासश्वासामवातांश्च श्लीपदं शोथमर्बुदम्।
गलगण्डं गण्डमालामम्लपित्तं च गर्दभीम् ॥ २०५ ॥
कृमिकुष्ठानि दद्रूणि वातरक्तं भगन्दरम्।
उपदंशमतीसारं ग्रहण्यर्शःप्रमेहकम् ॥ २०६ ॥

अश्मरीं मूत्रकृच्छ्रं च मूत्राघातं सुदारुणम् ।
ज्वरं जीर्णं तथा पाण्डुं तन्द्रालस्यभ्रमं क्लमम् ॥ २०७ ॥
दाहं च विद्रधिं हिक्कां जडगद्गदमूकताम् ।
मूढं च स्वरभेदं च वृध्नवृद्धिविसर्पकान् ॥ २०८ ॥
ऊरुस्तम्भं रक्तपित्तं गुदभ्रंशारुची तृषाम् ।
कर्णनासामुखोत्थांश्च दन्तरोगांश्च पीनसान् ॥ २०९ ॥
शोथं च शीतपित्तं च स्थावरादिविषाणि च ।
वातपित्तकफोत्थांश्च द्वन्द्वजान् सान्निपातिकान् ॥ २१० ॥
सर्वानेव गदान् हन्ति चण्डांशुरिव पापहा ।
बलवर्णकरो हृद्य आयुष्यो वीर्यवर्द्धनः ॥ २११ ॥
परं वाजीकरः श्रेष्ठः पटुदो मन्त्रसिद्धिदः ।
अरोगी दीर्घजीवी स्याद्रोगी रोगाद्विमुच्यते ।
रसस्यास्य प्रसादेन बुद्धिमान् जायते नरः ॥ २१२ ॥

यह रस–मन्दाग्नि, आमदोष, विषूचिका, प्लीहा, गुल्म, उदररोग, अष्ठीला, यकृत्, पाण्डु, कामला, हृदयशूल, पृष्ठशूल, पार्श्वशूल, कटिशूल, कुक्षिशूल, आनाह, आठ प्रकारके शूल, श्लीपद, खाँसी, श्वास, वात, आमवात, अर्बुद, गलगण्ड, गण्डमाला, अम्लपित्त, गर्दभी, कृमि, कुष्ठ, दद्रु, वातरक्त, भगन्दर, उपदंश, संग्रहणी, अतिसार, बवासीर, प्रमेह, पथरी, मूत्रकृच्छ्र, दारुण मूत्राघात, जीर्णज्वर, पांडु, तन्द्रा, आलस्य भ्रम, ग्लानि, दाह, विद्रधि, हिक्कारोग, जडता, मूकता, गद्गदता, मूढता, स्वरभेद, वृध्न (बद), अंडवृद्धि, विसर्प, ऊरुस्तम्भ, रक्तपित्त, गुदभ्रंश, अरुचि, तृषा, कान नाक मुख और दाँतोंके रोग, पीनस, शोथ, शीतपित्त, स्थावर आदि विष, वात पित्त और कफसे उत्पन्न हुए, द्वन्द्वज, सान्निपातिक सम्पूर्णरोगोंको शीघ्रही नष्ट करता है। बल वर्णको उत्पन्न करनेवाला, हृदयको हितकारी, आयु और वीर्यके बढाने-वाला है तथा अत्यन्त वाजीकरण है। चातुर्य और मन्त्रकी सिद्धिको देनेवाला है। इस रसके प्रतापसे रोगी सब रोगोंसे मुक्त होजाता है और अरोगी दीर्घजीवी और अत्यन्त बुद्धिमान् होता है ॥ २०३–२१२ ॥

बृहन्नृपवल्लभ ।

रसगन्धकलौहाभ्रं नागं चित्रं त्रिवृत्समम् ।
टङ्कं जातीफलं हिङ्गु त्वगेलाब्दलवङ्गकम् ॥ १२ ॥

तेजपत्रमजाजी च यमानी विश्वसैन्धवम् ।
प्रत्येकं तोलकं चूर्णं मरिचन्तारयोस्तथा ॥ १४ ॥
निरुत्थकं मृतं हेम तथा द्वादशरक्तिकम् ।
आर्द्रकस्य रसेनैव धात्र्याश्च स्वरसेन च ॥ १५ ॥
भावयित्वा प्रदातव्यो माषद्वयप्रमाणतः ।
भक्षयेत् प्रातरुत्थाय पथ्यं भक्षेद् यथेप्सितम् ॥ १६ ॥
अग्निमान्द्यमजीर्णं च दुर्नामग्रहणीं जयेत् ।
आमाजीर्णप्रशमनः सर्वरोगनिषूदनः ॥ १७ ॥
नाशयेदुदरान् रोगान् विष्णुचक्रमिवासुरान् ॥ १८ ॥
"ग्रन्थान्तरेऽस्य राजवल्लभ इति संज्ञा ॥"

शुद्ध पारा, शुद्ध गन्धक, लोहेकी भस्म, अभ्रककी भस्म, सीसेकी भस्म, चीतेकी जड, निसोत, सुहागा, जायफल, हींग, दालचीनी, इलायची, नागरमोथा, लौंग, तेजपात, कालाजीरा, अजवायन, सोंठ, सेंधानमक, कालीमिरच और रौप्यभस्म प्रत्येक एक एक तोला एवं स्वर्णभस्म बारह रत्ती सबको एकत्रकर अदरख और आंमलोंके रसमें पृथक् पृथक् भावना देकर दो दो माशेकी गोलियाँ बनालेवे । इसकी एक एक गोली प्रतिदिन प्रातःकाल सेवन करे और यथेच्छ आहार विहार करे । यह रस मन्दाग्नि, अजीर्ण, बवासीर, ग्रहणी, आमाजीर्ण, उदररोग और अन्यान्य सर्वप्रकारके विकारोंको नष्ट करता है । "अन्य ग्रन्थकार इस बृहन्नृपवल्लभ रसको राजवल्लभ भी कहते हैं" ॥ १२-१८ ॥

महाराज नृपतिवल्लभ ।

कर्षत्रयं मृतं कान्तं मृताभ्रं मृतताम्रकम् ।
मृतं तारं माक्षिकं च कर्षं कर्षं प्रदापयेत् ॥ १९ ॥
मृतं स्वर्णं मृतं तारं टङ्कणं शृङ्गमेव च ।
वसिरं दन्तिमूलं च मारिचं तेजपत्रकम् ॥ २० ॥
यमानी बालकं मुस्तं शुण्ठक च सधान्यकम् ।
सिन्धूद्भवं सकर्पूरं विडङ्गं चित्रकं विषम् ॥ २१ ॥
पारदं गन्धकं चैव तोलमानं प्रदापयेत् ।
तोलद्वयं त्रिवृच्चूर्णं लवङ्गं तच्चतुर्गुणम् ॥ २२ ॥

जातीकोषफले चैव तत्समं तु वराङ्गकम् ।
सर्वेषामर्द्धभागं तु विडकं तत्र मिश्रयेत् ॥ २३ ॥
सर्वमेकीकृतं यद्यत् त्रुटिचूर्णं च तत्समम् ।
भावना च प्रदातव्या च्छागीदुग्धेन सप्तधा ॥ २४ ॥
मातुलुङ्गरसैः पश्चाद् भावयेत सप्तवारकम् ।
छायाशुष्कां वटीं कृत्वा भक्षयेद्दशरक्तिकाम् ॥ २५ ॥

कान्तलोहभस्म २ तोले, अभ्रकभस्म, ताम्रभस्म, मोतीकी भस्म और सोना-माखी ये प्रत्येक एकएक कर्ष, एवं सोना चाँदीकी भस्म, सुहागा, काकडासींगी, गजपीपल, दन्तीकी जड, मिरच, तेजपात, अजवायन, सुगन्धवाला, नागरमोथा, सोंठ, धनियां, सैंधानमक, कपूर, वायविडङ्ग, चीता, शुद्ध मीठातेलिया, शुद्ध पारा और शुद्ध गन्धक प्रत्येक एक एक तोला, निसोतका चूर्ण दो तोले तथा लौंग, जावित्री और दालचीनी ये प्रत्येक आठ आठ तोले इन सब औषधियोंके चूर्णसे आधा भाग विरियासंचरनमक और समस्त चूर्णकी बराबर छोटी इलायचीका चूर्ण लेवे। फिर इन सबको एकत्र करके बकरीके दूधमें सात बार खरल करके बिजौरे नींबूके रसमें सातबार खरल करे फिर छायामें सुखाकर दस दस रत्तीकी गोलियाँ बनाकर भक्षण करे ॥ १९-२२५ ॥

मन्दानलं संग्रहणीं प्रवृद्धामामानुबन्धीं कृमिपाण्डुरोगम् ।
छर्द्यम्लपित्तं हृदयामयं च गुल्मोदरानाहभगन्दरं च ॥ २६ ॥
अर्शांसि वै पित्तकृतानशेषान् सामं सशूलाष्टकमेव हन्ति ।
साजीर्णविष्टम्भविसर्पदाहं विलम्बिकां चाप्यलसं प्रमेहम् ॥२७
कुष्ठान्यशेषाणि च कासशोषं हन्यात् सशोथं ज्वरमूत्रकृच्छ्रम् ।
मतान्तरे सर्वतोभद्रनाम महेश्वरेणैव विभाषितोऽयम् ॥ २८ ॥

इससे मन्दाग्नि, प्रबल संग्रहणी, कृमि, पाण्डुरोग, वमन, अम्लपित्त, हृदयरोग अर्शादि उपर्युक्त समस्त रोग दूर होते हैं। कोई २ आचार्य इस रसको सर्वतोभद्र कहते हैं ॥ २६-२२८ ॥

महाराजनृपवल्लभ ।

माक्षिकं लौहमभ्रं च वङ्गं रजतहाटकम् ।
ग्रन्थिर्धमानिका चोचं ताम्रं नागरटङ्कणम् ॥ २९ ॥

सैन्धवं बालकं मुस्तं धन्याकं गन्धकं रसम् ।
शृङ्गी कर्पूरकं चैव प्रत्येकं माषकोन्मितम् ॥ २३० ॥
माषद्वयं रामठं स्यान्मरिचानां चतुष्टयम् ।
जातीकोषं लवङ्गं च पत्रं च तोलकोन्मितम् ॥ ३१ ॥
नाभिशङ्खं विडङ्गं च शाणं माषद्वयं विषम् ।
कर्षषट्कं सत्रिमाषं सूक्ष्मैलानां ततः क्षिपेत् ॥ ३२ ॥
विडं कर्षद्वयं सर्वं छागीक्षीरेण पेषयेत् ।
चतुर्गुञ्जामितां खादेत् सानाहग्रहणीं जयेत् ॥ ३३ ॥
शम्भुना निर्मितो ह्येष पूर्ववद् गुणकारकः ।
नाम्ना महाराजपूर्वो नृपवल्लभ उच्यते ॥ ३४ ॥

सोनामाखी, लोहेकी भस्म, अभ्रककी भस्म, वङ्गकी भस्म, चाँदीकी भस्म, सुवर्णकी भस्म, पीपलामूल, अजवायन, दालचीनी, ताँबेकी भस्म, सोंठ, सुहागा, सेंधानमक, सुगन्धवाला, नागरमोथा, धनियाँ, शुद्ध गन्धक, शुद्ध पारा, काकडासिंगी और कपूर ये प्रत्येक एक एक मासा, हींग दो मासे, कालीमिर्चोंका चूर्ण चार मासे, जावित्री, लौंग और तेजपात प्रत्येक एक एक तोला, शंखनाभिकी भस्म और वायविडङ्ग प्रत्येक चार चार मासे शुद्ध मीठा तेलिया दो मासे, छोटी इलायचोंका चूर्ण ८ मासे और विरियासंचरनमक २ कर्ष लेवे । सबको एकत्र चूर्णकरके बकरीके दूधमें खरल करे । फिर चार चार रत्तीकी गोलियाँ बनाकर सेवन करे । इसके सेवनसे आनाहयुक्त संग्रहणी नष्ट होती है और यह पूर्वोक्त प्रयोगकी समान गुण करता है । इसको शिवजीने निर्माण किया है । यह रस महाराजनृपवल्लभ नामसे प्रसिद्ध है ॥ २९-२३४ ॥

अथ रसपर्पटी ।

श्रीविन्ध्यवासिपादान् नत्वा धन्वन्तरिं च सुरभिषजम् ।
रसगन्धकपर्पटिकापरिपाटीपाटवं वक्ष्ये ॥ १ ॥
अत्र पारदस्य नैसर्गिकदोषत्रयशोधनं चावश्यं कार्यम् ।
यदुक्तम्—
"मलशिखिविषनामानो रसस्य नैसर्गिका दोषाः ।
मूर्च्छां मलेन कुरुते शिखिना दाहं विषेण हिक्कां च ॥

गृहकन्या हरति मलं त्रिफला वह्निं चित्रक च विषम् ।
तस्मादेभिर्वारान् संमूर्च्छयेत् सप्तसप्तैव ॥ " इति ॥

मर्द्य रसे जयन्त्याः पश्चादेरण्डसम्भूते ।
आर्द्रकरसे च सूत पत्ररसे काकमाच्याश्च ॥ २ ॥

मग्नमुदितानुपूर्व्या मर्दनशुष्कं करेण गृह्णीयात् ।
प्रस्तरभाजनमध्ये शुद्धिरियं पारदस्योक्ता ॥ ३ ॥

श्रीविंध्याचलवासी (व्याडिमुनि) को और भगवान् धन्वन्तरिको प्रमाण करके मैं पारे और गन्धककी पर्पटीकी उत्तम विधिको कहता हूं । पर्पटीको प्रस्तुत करनेसे पहले इस प्रकार शुद्ध किया हुआ पारा पर्पटीके लिये लेना योग्य है–पारेके मलदोष, अग्निदोष और विषदोष करके तीन दोष हैं, मलदोषसे मूर्च्छा, अग्निसे दाह और विषसे हिका होती है, इसलिये इनको अवश्य दूर कर देने चाहिये । उसकी प्रणाली यह है कि, ८ तोले पारेको घीग्वारके रसमें मर्दन करनेसे उसका मलदोष दूर होता है, त्रिफलेके चूर्णमें मर्दन करनेसे अग्निदोष दूर होता है । चीतेके पत्तोंके रसमें खरल करनेसे विष दूर होता है । इस प्रकार पारेके दोषोंको दूर करके उसको अरणीके पत्ते, एरण्डके पत्ते, अदरख और मकोयकेपत्ते इनके रसोंमें पृथक् २ मिलाकर क्रमपूर्वक पत्थरके पात्रमें मर्दन करके शोषण करे । पारेकी यह शुद्धि करनी चाहिये ॥ १–३ ॥

शुकपुच्छसमच्छायो नवनीतसमद्युतिः ।
मसृणः कठिनः स्निग्धः श्रेष्ठो गन्धक इष्यते ॥ ४ ॥

कृत्वा भद्रं गन्धकमतिकुशलं क्षुद्रतण्डुलाकारम् ।
तद्भृङ्गराजरसैरनन्तरं भावयेत् पात्रे ॥ ५ ॥

तदनु शुष्कं कुर्यात् धूलिसमानं च सप्तधा रौद्रे ।
तदनु च शुष्कं चूर्णं कृत्वा विन्यस्य लोहिकामध्ये ॥६॥

निर्धूमबदरकाष्ठाङ्गारे न्यस्तं विलाप्य तैलसमम् ।
पात्रस्थितभृङ्गराज रसमध्ये ढालयेन्निपुणः ॥ ७ ॥

तस्मिन् प्रविष्टमात्रं कठिनत्वं याति गान्धकं चूर्णम् ।
पुनरपि रौद्रे शुष्कं केतकरजसा समानतां नीतम् ॥ ८ ॥

---

१ गृहकन्या–घृतकुमारी तस्या दलरसेन क्षालनम् त्रिफलायाश्चूर्णेन क्षालनम् । चित्रकस्य पत्ररसेन मूर्च्छनम् । तदेवं नैसर्गिकदोषापहारानन्तरं जयन्त्यादिद्रव्यचतुष्टयरसेन मूर्च्छनमभिगन्तव्यम् ॥

फिर तोतेकी पूँछके समान या नवनीतके समान कान्तिवाला, कोमल कठिन और स्निग्ध ऐसा गन्धक श्रेष्ठ होता है। ऐसे गन्धकको ८ तोले लेकर उसके चावलोंके समान छोटे-छोटे टुकडे करके पत्थरके पात्रमें भाँगरेके रसकी ७ बार भावना देवे और ७ बार धूपमें सुखावें, फिर धूलिकी समान बारीक चूर्ण करके उसको लोहेकी करछीमें रखकर धुएँरहित बेरीके अंगारोंपर पकावे। यह तेलकी समान पिघला होजाय तब भाँगरेके रसमें डाल देवे। उसमें डालतेही गन्धक सख्त होजाता है। उसको निकालकर और धूपमें सुखाकर केतकीके फूलोंकी रजकी समान चूर्ण करलेवे॥ ४-८॥

शुद्धे सूते शोधितगन्धकचूर्णेन तुल्यता कार्या।
तावन्मर्दनमनयोर्यावन्न कणोऽपि दृश्यते सूते॥ ९॥
पश्चात् कज्जलसदृश चूर्णं लौहीस्थितं प्रयत्नेन।
निर्धूमबदरकाष्ठाङ्गारे न्यस्तं विलाप्य तैलसमम्॥ १०॥
सद्यो गोमयनिहिते कदलदले चालयेन्मृदुनि।
लौहीस्थितमवशिष्टं कठिनं तन्न ग्रहीतव्यम्॥
पश्चात् पर्पटरूपा पर्पटिका कीर्त्यते लोकैः॥ ११॥

इस प्रकार शोधित पारे और गन्धकको समान भाग लेकर कज्जली करे, दोनों को तबतक मर्दन करे—जबतक पारेके सूक्ष्म कण दीखने बन्द होजाय. जब घुटते २ सब चूर्ण कज्जलकी समान कृष्णवर्ण होजाय तब उसको लोहेकी करछीमें रखकर धुएँरहित बेरीके लकडीके अंगारोंपर तेलकी समान पतला करके गोबरके ऊपर एक केलेके कोमल पत्तेको रखकर उसमें उक्त पिघलीहुई कज्जलीको ढालदेवे और तत्कालही दूसरे केलेके पत्तेसे ढककर उसपर गोबर रखकर किसी कपडे की पोटलीसे उसे दाब देवे, जिससे कि वह रस पर्पटीके आकारमें होजाय और जो करछीमें पिघली हुई कज्जलीका कठिन अंश शेष रहजाय उसको ग्रहण नहीं करना चाहिये। इस प्रकार यह रसपर्पटी सिद्ध होती है॥ ९-११॥

मयूरचन्द्रिकाकारं लिङ्गं यत्र तु दृश्यते।
तत्र सिद्धं विजानीयाद्वैद्यो नैवात्र संशयः॥ १२॥

पर्पटीकी परीक्षा यह है-कि, जो पर्पटी मोरकी पूँछकी चन्द्रिकाके समान कान्ति हो वह पर्पटी उत्तम प्रकारसे सिद्ध हुई जाननी चाहिये॥ १२॥

सम्मुदितपात्रे भरणाददनीया पर्पटी मनुजैः ।
जीरकगुञ्जे हिङ्गोरर्द्धं खादेच्च वातले जठरे ॥ १३ ॥
जीरकहिङ्ग्वो रसतस्त्वनुपानं सलिलधारया कार्यम् ।
रसगन्धकपर्पटिकाभक्षणमात्रे तु नाम्भसः पानम् ॥ १४ ॥

इस पर्पटीको वातप्रधान उदररोगमें दो रत्ती जीरे और १ रत्ती हींगके चूर्णके साथ सेवन करे किन्तु भुनेहुए जीरे और भुनीहुई हींगको जलमें घोलकर उसका अनुपान करना चाहिये और पर्पटीको भक्षण करके अनन्तर जलपान नहीं करना चाहिये ॥ १३-१४ ॥

प्रथमं गुञ्जायुगलं प्रतिदिनमेकैकवृद्धितो भक्ष्यम् ।
दशगुञ्जापरिमाणान्नाधिकमदनीयमेकविंशतिदिनानि ॥ १५ ॥

पहले दिन इसको २ रत्ती प्रमाण देवे । फिर प्रतिदिन एक एक रत्तीकी मात्रा बढाकर १० रत्तीतक सेवन करावे और फिर प्रतिदिन १-१ रत्ती घटाकर सेवन करावे इस प्रकार २१ दिनतक सेवन करावे । किन्तु १० रत्तीसे अधिक मात्रा नहीं बढानी चाहिये ॥ १५ ॥

वातातपकोपमनश्चिन्तनमाहारसमयवैषम्यम् ।
व्यायामश्चायासः स्नानं व्याख्यानमहितमत्यन्तम् ॥ १६ ॥

इस पर्पटीके सेवन करनेवालेको वायु, धूप, क्रोध, मानसिक चिन्ता, आहारके समयकी विषमता, व्यायाम, अत्यन्त परिश्रम, स्नान और अत्यन्त बोलना ये सब अहितकारी हैं । अतः इन सबको त्याग देना चाहिये ॥ १६ ॥

पाके स्तोकं सर्पिर्जीरकधन्याकवेशवारैश्च ।
सिन्धूद्भवेन रन्धनमोदनधान्यानि शालयो भक्ष्याः ॥ १७ ॥
कृष्णं वातिङ्गफलमविद्धकर्णा च वास्तुकम् ।
अक्षतमुद्गं सहितं कदलीपत्रं पटोलं च ॥ १८ ॥
क्रमुकफलशृङ्गवेरौ भक्ष्यौ शाकेषु काकमाची च ।
लावकवर्त्तकतित्तिरिमयूरमांसं च हिततरं भवति ॥ १९ ॥
मद्गुररोहितमीनावदनीयौ कृष्णमत्स्याश्च ।
नीरक्षीरं व्यञ्जनमदनीयं पक्वकदलं च ॥ २० ॥

थोडे घी, जीरे, धनिये और अन्यान्य मसालोंके द्वारा सिद्ध किये हुए सेंधानमक मिले हुए व्यञ्जनादि, पुराने शालिचावलोंका भात, काले बैंगन, पाढके पत्तोंका शाक, बथुआ, साबुत मूँग, केलेके पत्ते, परवल, सुपारी, अदरख, मकोयके पत्तोंका शाक, लवा, बत्तक, तीतर, मोर, इनका मांस, मद्गुर, रोहित और काली मछली, समानभाग मिश्रित जलके साथ सिद्ध किया हुआ दूध ये सब पदार्थ हितकारी हैं ॥ १७–२० ॥

रम्भाफलदलवल्कलमूलानां वर्जनं कार्यम् ।
तिक्तं निम्बादिकमपि भक्ष्यं नोष्णं तथाऽन्नं च ॥ २१ ॥
आनूपमांसजलचरपतत्रिपललं च सर्वथा त्याज्यम् ।
स्त्रीणां सम्भाषणमपि गडकस्य कृष्णमत्स्येषु ॥ २२ ॥
नाम्लं नो दधि शाकं पर्पट्या भक्षणे भक्ष्यम् ।
गुडखण्डशर्करादिकमिक्षुविकारो न भक्ष्य इक्षुश्च ॥
न दलं न फलं न लताप्यदनीया कारवेल्लस्य ॥ २३ ॥

एवं पकेहुए केलेके फल वक्कल और जड, नीमको आदि लेकर सम्पूर्ण कडुवे पदार्थ, गरम अनूपदेशके जीवोंका मांस तथा जलमें रहनेवाले जन्तुओंका मांस, पक्षियोंका मांस, मछली, कालीमछलियोंमें गडक नामवाली मछली, खट्टे पदार्थ, दही और शाक आदि पदार्थ कदापि नहीं भक्षण करने चाहिये और इस पर्पटीका सेवन करते हुए स्त्रियोंसे बात चीततक भी नहीं करनी चाहिये। तथा गुड, खाँड, शर्करा, ईखके रसके बनेहुए पदार्थ और ईख (गन्ने) करेलेके पत्ते, फल और बेल आदि भी कभी नहीं खाने चाहिये ॥ २१–२३ ॥

स्तोकं घृतमिह भक्ष्यं पथ्ये साकांक्षमुत्थानम् ।
क्षुत्पीडायां भोजनमवश्यकार्यं महानिशायां च ॥ २४ ॥
समजलमिश्रं पक्वं क्षीरं यद्वाऽधिकजलपक्वं च ।
कथमपि भोजनसमयातिक्रमजाते ज्वरे विरेके च ॥ २५ ॥
वमने च नारिकेलं सलिलं दुग्धं च पातव्यम् ।
स्वप्ने जाते रमिते विरेकतः क्षीरमेव पातव्यम् ॥ २६ ॥

इसपर घृत थोडा खाना चाहिये और पथ्यमें यथेच्छ आहार देना चाहिये। भूँख लगनेपर अवश्य भोजन करे। यदि आधीरातके समय भूँख लगे तब उस समय भी भोजन करना चाहिये। यदि कदाचित् भोजनके समयका उल्लंघन

होनेसे ज्वर और विरेचन हो तो समानभाग जल मिलाकर अथवा अधिक जल-मिश्रित दूधको पकाकर पीना चाहिये। वमन होनेपर नारियलका जल अथवा दूध पान करना चाहिये। यदि स्वप्नमें वीर्यपात हो जाय तो दुग्धपान करना चाहिये ॥ २४–२६ ॥

न जायते बुभुक्षा लक्ष्यालक्ष्या प्रतीयते यदि वा।
अशक्तिझिनिझिनिमस्तकशूलाद्यैर्नूनमवधार्या ॥ २७ ॥
किं बहु वाच्यं रोगी यदा यदा भवति साकांक्षः।
पाययितव्यं दुग्धं तदा तदा निर्भयी भूयः ॥ २८ ॥

भूँख उत्पन्न हुई है या नहीं इसकी परीक्षा इस प्रकार करनी चाहिये—जब शरीर शक्तिहीन हो, मस्तकमें शूल और झनझनाहट आदि लक्षण मालूम हों तब निश्चय भूख लगा समझना चाहिये। बहुत कहनेसे क्या है, रोगीको जब जब भूँख लगे तबही तब निर्भय होकर वारंवार दूध पिलावे ॥ २७ ॥ २८ ॥

विहिताकरणे चास्यामविहितकरणे च रोगखिन्नानाम्।
व्यापत्तयोऽपि बहुधा दृष्टाः प्रामाणिकैर्बहुशः ॥ २९ ॥
तस्मादवधातव्यं भवितव्य भोजने निपुणैः।
एवमियं क्रियमाणा भवति श्रेयस्करी नियतम् ॥ ३० ॥

इसमें कहे हुए नियमोंका पालन न करनेसे और निषिद्ध नियमोंको करनेसे रोगीको नानाप्रकारकी व्याधियाँ उत्पन्न होजाती हैं। ऐसा बडे २ प्रामाणिक मनुष्योंने अनेक बार देखकर कहा है, इसलिये भोजनादिमें कुशल वैद्योंको यथाविधि नियमोंका पालन करना चाहिये। इस प्रकार सेवन की हुई यह पर्पटी अवश्य महत् उपकार करती है ॥ २९ ॥ ३० ॥

अर्शोरोगं ग्रहणीं सामं शूलातिसारौ च।
कामलपाण्डुव्याधिं प्लीहानं चातिदारुणं हन्ति ॥ ३१ ॥
गुल्मजलोदरभस्मकरोगं हन्त्यामवातांश्च।
अष्टादश च कुष्ठान्यशेषशोथादिरोगांश्च ॥ ३२ ॥
इयमम्लपित्तशमनी त्रिदोषदमनी क्षुधातिसन्दीपनी।
अग्निं निमग्नमुदरे ज्वालाजटिलं करोत्याशु ॥ ३३ ॥
रसगन्धकपर्पटिका त्रपत्रयं व्याधिसंघातम्।
वलिकापलितविशून्यं पुरुषं दीर्घायुषं कुरुते ॥ ३४ ॥

यह पर्पटी—बवासीर, आमसहित संग्रहणी, शूल, अतिसार, कामला, पाण्डुरोग, अतिकठिन प्लीहा (तिल्ली), गुल्म, जलोदर, भस्मकरोग, आमवात, १८ प्रकारके कुष्ठ, सम्पूर्ण शोथ आदि रोग और अम्लपित्तको तत्काल नष्ट करती है। सब त्रिदोषको दमन करनेवाली, अत्यन्त भूँखको बढानेवाली, जठराग्निको तत्काल प्रज्वलित करती है। यह पारे और गन्धककी पर्पटी समस्त व्याधिसमूहको नष्ट करती है तथा वलिका (असमयमें शरीरमें बलीका पडना), पलित (असमय बालोंका पकना) रोगको दूर करती है और मनुष्यको दीर्घायु बनाती है ॥ २१–२४ ॥

व्याधिप्रभावहरणादपमृत्युत्रासनाशकरणाच्च ।
मर्त्यानाममृतवटी रसगन्धकपर्पटी जयति ॥ २५ ॥
शम्भुं प्रणम्य भक्त्या पूजां कृत्वा च विष्णुचरणाब्जे ।
रसगन्धकपर्पटिका भक्ष्या तेनातिसिद्धिदा भवति ॥ २६ ॥
नृणां सरुजां ध्रुवमियमारोग्यं सततशीलिता कुरुते ।
श्रीवत्साङ्कविनिर्म्मितसम्यग्रसपर्पटी श्रेष्ठा ॥ २७ ॥

व्याधिके प्रभावको हरने और अकालमृत्युके भयको नाश करनेके कारण यह पर्पटी मनुष्योंको अमृतवटीकी समान हितकारी है। भक्तिसहित शिवजीको प्रणाम कर और विष्णुके चरणकमलोंका पूजन करके इस पर्पटीको भक्षण करनेसे यह विशेष सिद्धिके देनेवाली है। यह पर्पटी निरन्तर उत्तम प्रकारसे मनुष्योंके आरोग्य करनेके लिये सर्वोत्तम औषधि है ॥ २५–२७ ॥

उक्तमेव हि कर्त्तव्यं नानारोगतया तथा ।
औषधक्रिययैवात्र कर्त्तव्या चोत्तरक्रिया ॥ २८ ॥
प्रत्यवायविनाशार्थं क्षेत्रपालबलिं न्यसेत् ।
कृतमंगलकः प्रातर्योगिनीनामतः परम् ॥ २९ ॥

[भक्षणात्पूर्वं बलिदानमन्त्रः—"ॐ क्षैं क्षें क्षेत्रपालाय नमः ।" क्षेत्रपालस्य सामान्यबलिदानमन्त्रः—"ॐ ह्रीं ह्रैं दिव्याभ्यो योगिनीभ्यो मातृभ्यः क्षेत्रीभ्यो भूतेभ्यः शालिकीभ्यो नमो नमो ह्रीं" इति सामान्ययोगिनीनां बलिः। "ॐ गन्धकमहाकालाय स्वाहा। ॐ ब्रह्मकोषिणि रक्ष रक्ष स्वाहा।" इति विशेषबलिः ॥]

इसमें कहीहुई विधिके अनुसारही विविध रोगोंमें प्रयोग करना चाहिये और औषधिकी क्रियाके अनुसार ही इसपर उत्तर क्रिया करनी चाहिये । विघ्नोंको हरनेके लिये प्रथम क्षेत्रपालको बलि देवे पश्चात् योगिनियोंको उक्तमन्त्रसे बलि देवे । फिर माङ्गलिक कार्य करके प्रातःसमय इसका सेवन करे ॥ ३८ ॥ ३९ ॥

लौहपर्पटी ।

समौ गन्धरसौ कृत्वा कज्जलीकृत्य यत्नतः ।
शुद्धलोहस्य चूर्णं तु रसतुल्यं प्रदापयेत् ॥ ४० ॥
एकीकृत्य ततो यत्नात् लोहपात्रे प्रमर्दितम् ।
घृतप्रलिप्तदर्व्यां तु स्वेदयेन्मृदुनाऽग्निना ॥ ४१ ॥
द्रवीभूतं समाहृत्य ढालयेत् कदलीदले ।
चूर्णीकृत्य सुखार्थाय पथ्यभुग्भिः प्रसेव्यते ॥ ४२ ॥
शीतोदकानुपानं वा क्वाथं वा धान्यजीरयोः ।
लौहेन पर्पटी ह्येषा भक्ष्या लोकस्य सिद्धिदा ॥ ४३ ॥

शोधित पारे और शोधित गन्धकको समान भाग लेकर यथाविधि कज्जली करलेवे । फिर उसमें पारेकी बराबर शुद्ध लोहेकी भस्म मिलाकर लोहेके बर्तनमें खरल करे पश्चात् लोहेकी करछीमें घी लगाकर उसमें कज्जलीको रखकर मन्द-मन्द अग्निसे पकावे । जब कज्जली पिघलकर पतली होजाय तब नीचे उतारकर पूर्वोक्त रसपर्पटीकी समान गोबरपर रक्खेहुए केलेके पत्तेपर डालकर दूसरे केलेके पत्तेसे ढककर ऊपरसे कपडेकी पोटलीसे धीरे २ दाबदेवे । फिर उसको सुखाकर चूर्ण करके शीशीमें भरकर रखदेवे । यह पर्पटी पथ्यसेवनवालेको देनी चाहिये और ऊपरसे शीतल जल अथवा जीरे और धनियेका क्वाथ पान करना चाहिये । इसके सेवनसे मनुष्यको यथेष्ट फलकी सिद्धि होती है ४०-४३ ॥

रक्तिकैकां समारभ्य वर्द्धयेद्रक्तिकां क्रमात् ।
सप्ताहं वा द्वयं वापि यावदारोग्यदर्शनम् ॥ ४४ ॥
सूतिकां च ज्वरं चैव ग्रहणीमतिदुस्तराम् ।
आमशूलातिसारांश्च पाण्डुरोगं सकामलम् ॥ ४५ ॥
प्लीहानमग्निमान्द्यं च भस्मकं च तथैव च ।
आमवातमुदावर्तं कुष्ठान्यष्टादशैव तु ॥ ४६ ॥

एवमादींस्तथा रोगान् गराणि विविधानि च ।
हन्त्यनेन प्रयोगेण वपुष्मान् निर्मलः सुधीः ॥ ४७ ॥
जीवेद् वर्षशतं पूर्ण वलीपलितवर्जितः ।
भोजनं रक्तशालीनां त्यक्त्वा शाकं विदाहि च ॥ ४८ ॥
आमवातप्रकोपं च चिन्तनं मैथुनं तथा ॥ ४९ ॥
प्रातरुत्थाय संसेव्या विधिनाऽऽयुःप्रवर्द्धिनी ॥ ५० ॥

इसको प्रतिदिन एक एक रत्तीसे बढाकर सात दिन, चौदह दिन अथवा जब आरोग्य लाभ न हो तबतक सेवन करावे तो यह लौहपर्पटी प्रसूतिरोग, ज्वर-ग्रहणी, आमशूल, अतिसार, पाण्डुरोग, कामला, प्लीहा (तिल्ली), मन्दाग्नि, भस्मकरोग, आमवात, उदावर्त्त, १८ प्रकारके कुष्ठ, एवं अन्यान्य रोगों और विविध-प्रकारके विषोंको अवश्य दूर करता है । इस प्रयोगके सेवनसे मनुष्य निर्मल शरीरवाला और विद्वान् होता है । एवं वली और पलित रोगसे मुक्त होकर पूर्ण सौ वर्षतक जीता है । इसपर लाल शालिधानोंके चावलोंका भात खाना चाहिये तथा शाक, दाहकारक पदार्थ, आमवातको कुपित करनेवाले पदार्थ, चिन्ता और मैथुन ये सब त्याग देने चाहिये । प्रातःकाल उठकर इसको विधिपूर्वक सेवन करनेसे आयुकी वृद्धि होती है ॥ ४५–५० ॥

स्वर्णपर्पटी ।

रसोत्तमं पलं शुद्धं हेम तोलकसंयुतम् ।
शिलायां मर्दयेत्तावद्यावदेकत्वमागतम् ॥ ५१ ॥
गन्धकस्य पलं चैकमयस्पात्रे ततो दृढे ।
मर्दयेद्दृढपाणिभ्यां यावत् कज्जलतां व्रजेत् ॥ ५२ ॥
ततः पाकविधानज्ञः पर्पटीं कारयेत् सुधीः ।
रक्तिकादिक्रमेणैव योजयेदनुपानतः ॥ ५३ ॥
ग्रहणीं विविधां हन्ति यक्ष्माणं च विशेषतः ।
शूलमष्टविधं हन्ति वृष्या सर्वरुजापहा ॥ ५४ ॥

सिंगरफसे निकालाहुआ शुद्ध पारा ४ तोले और सोनेकी भस्म १ तोला दोनोंको एकत्र मिलाकर पत्थरके खरलमें उत्तम प्रकारसे मर्दन करे जब दोनों मिलकर एकरूप होजाय तब उसमें गन्धक १ पल डालकर लोहेके पात्रमें अच्छे प्रकारसे खरल करे । जब घोटते २ कज्जलीकी समान होजाय तब पूर्वोक्त रस-

पर्पटीकी विधिके अनुसार विद्वान् वैद्य इसकी पर्पटी तैयार करलेवे । इसको क्रमशः एकएक रत्तीकी मात्रासे बढाता हुआ यथा दोषानुसार उचित अनुपानके साथ प्रयोग करावे । यह पर्पटी अनेक प्रकारकी संग्रहणी, विशेषकर राजयक्ष्मा, ८ प्रकारके शूल एवं अन्यान्य सर्वप्रकारके रोगको दूर करनेवाली और परम वृष्य है ॥ ३९१–९४ ॥

पञ्चामृतपर्पटी ।

अष्टौ गन्धकतोलका रसदलं लोहं तदर्द्धं शुभं
लोहार्द्धं च वराभ्रकं सुविमलं ताम्रं तथाऽभ्रार्द्धिकम् ।
पात्रे लोहमये च मर्दनविधौ चूर्णीकृतं चैकतो
कुर्यां बादरवह्निनाऽतिमृदुना पाकं विदित्वा दले ॥९५॥
रम्भाया लघु ढालयेत् ॥ पटुरियं पञ्चामृता पर्पटी
ख्याता क्षौद्रघृतान्विता प्रतिदिनं गुञ्जाद्वयं वृद्धितः ।
लोहे मर्दनयोगतः सुविमलं भक्ष्यक्रिया लोहवत्
गुञ्जाष्टावथवा त्रिकं त्रिगुणितं सप्ताहमेवं भजेत् ॥९६॥

शुद्ध गन्धक ८ तोले, शुद्ध पारा ४ तोले, लोहा २ तोले, अभ्रक १ तोला और ताँबा आधा तोला–इन पाँचों औषधियोंको लोहेके पात्रमें एकत्रितकर विधिपूर्वक खरल करे। फिर उस कज्जलीको लोहेकी करछीमें रखकर बेरीकी लकडीकी मन्द मन्द अग्निके द्वारा पकाकर पूर्वोक्त विधिसे केलेके पत्तेपर ढाल देवे। इस प्रकार यह पञ्चामृतपर्पटी सिद्ध होती है। इसकी दो दो रत्ती मात्राको शहद और घृतके साथ लोहेके पात्रमें खरल करके सेवन करे। प्रतिदिन २ रत्तीसे ८ रत्ती या १० रत्तीतक मात्राकी वृद्धि करता हुआ २१ दिनतक सेवन करे ॥ ९५ ॥ ९६ ॥

नानावर्णग्रहण्यामरुचिसमुदये दुष्टदुर्नामकादौ
छर्द्यां दीर्घातिसारे ज्वरभवकलिते रक्तपित्ते क्षयेऽपि ।
वृष्याणां वृष्यराज्ञी वलिपलितहरा नेत्ररोगैकहन्त्री
तुन्दं दीप्तस्थिराग्निं पुनरपि नवकं रोगिदेहं करोति ॥९७॥

यह पर्पटी संग्रहणी, अरुचि, दुस्तर बवासीर, वमन, बहुत पुराना अतिसार, ज्वर, रक्तपित्त और क्षय इन सब रोगोंमें हितकारी है। एवं वृष्य प्रयोगोंमें यह सर्वश्रेष्ठ है। वली और पलितको हरनेवाली नेत्ररोगको दूर करनेवाली है।

अत्यन्त मन्द जठराग्निको प्रज्वलित कर फिरसे रोगीके शरीरको नवीन करती है ॥ ५७ ॥

विजयपर्पटी।

गन्धकं क्षुद्रितं कृत्वा भाव्य भृङ्गरसेन तु।
सप्तधा वा त्रिधा वापि पश्चाच्छुष्कं विचूर्णयेत् ॥ ५८ ॥
चूर्णयित्वाऽऽयसे पात्रे कृत्वा वह्निगतं सुधीः।
द्रुतं भृङ्गरसे क्षिप्तं तत उद्धृत्य शोषयेत ॥ ५९ ॥
तं च गन्धं पलं चैकं गन्धार्द्धं शुद्धपारदम्।
सूतार्द्धं भस्म रौप्यं च तदर्द्धं स्वर्णभस्मकम् ॥ ६० ॥
तदर्द्धं मृतवैक्रान्तं तदर्द्धं मौक्तिकं क्षिपेत्।
एकीकृत्य ततः सर्वं कुर्यात् पर्पटिकां शुभाम् ॥ ६१ ॥
लौहपात्रे समरसं मर्दितं कज्जलीकृतम्।
बदराङ्गारवह्निस्थे लौहपात्रे द्रवीकृते ॥
मयूरचन्द्रिकाकारं लिङ्गं वा यदि दृश्यते ॥ ६२ ॥

गन्धकके छोटे २ टुकडे करके भाँगरेके रसमें ७ बार अथवा तीन बार भावना देकर धूपमें सुखाकर चूर्ण कर लेवे। फिर उसको लोहेके वर्तनमें रखकर अग्निपर पिघलाकर भाँगरेक रसमें डालदेवे। उसमेंसे निकालकर धूपमें सुखावे। इस प्रकार शोधित गन्धक ८ तोले, शुद्ध पारे ४ तोले, रौप्यभस्म २ तोले, स्वर्णभस्म १ तोला, वैक्रान्तमणिकी भस्म आधातोला और मोतीकी भस्म ३ मासे लेवे। पश्चात् सबको लोहेके पात्रमें एकत्र खरल करके कज्जली करलेवे। फिर उस कज्जलीको लोहेके बरतनमें रखकर बेरीकी लकडीके अंगारोंपर पिघलाकर पूर्वोक्त रसपर्पटीकी भाँति केलेके पत्तेपर ढालदेवे. जो मोरकी पूँछकी चंद्रिकाकी समान कान्तिवाली माऌम हो, वह उत्तम पर्पटी होती है ॥ ५८-६२ ॥

आद्ययोर्दृश्यते सूतं खरपाके न दृश्यते।
मृदौ न सम्यग्भङ्गः स्यान्मध्ये भङ्गश्च रूप्यवत् ॥६३॥
खरे लघुर्भवेद् भङ्गो रूक्षः सूक्ष्मोऽरुणच्छविः।
मृदुमध्यौ तथा खाद्यौ खरस्त्याज्यो विषोपमः ॥६४॥

कज्जलीका पाक मृदु, मध्य और खर इन भेदोंसे तीन प्रकारका होता है। मृदुपाक और मध्यपाककी पर्पटीमें पारा दीखता है किन्तु खरपाकमें नहीं

दीखता. मृदुपाकमें पारा अच्छे प्रकारसे नहीं टूटता किन्तु मध्यपाकमें चाँदीकी समान टूट जाता है और खरपाकमें बहुत थोडा टूटता है। खरपाकमें पारा रूक्ष, सूक्ष्म और लालवर्णका होता है । इनमेंसे मृदु और मध्यपाककी पर्पटी सेवन करनी चाहिये और खरपाककी पर्पटी विषकी समान त्याग देनी चाहिये ॥ ६३ ॥ ६४ ॥

ज्वरव्याधिशताकीर्णं विश्वं दृष्ट्वा पुरा हरिः ।
चकार पर्पटीमेतां यथा नारायणोऽमृतम् ॥६५॥

पूर्वकालमें विष्णुभगवान्‌ने जरा और व्याधिसे आक्रान्तहुए इस विश्वको देखकर इस विजयपर्पटीको बनायाथा, जो अमृतके समान हितकारी है ॥ ६५ ॥

आदौ शङ्करमभ्यर्च्य द्विजातीन् प्रणिपत्य च ।
प्रभाते भक्षयेदेनां प्राग्रक्तिद्वयसम्मिताम् ॥६६॥
रक्तिकादिक्रमाद् वृद्धिर्भक्ष्या नैव दशोपरि ।
आरोग्यदर्शनं यावत् तावद् ह्रासस्ततः परम् ॥६७॥

पहिले दिन प्रातःसमय इसको २ रत्ती प्रमाण भक्षण करे । फिर प्रतिदिन १-१ रत्तीके क्रमसे बढाताहुआ दस रत्तीतक बढाकर सेवन करावे । जब दश रत्तीकी मात्रा होजाय तब क्रमसे १-१ रत्ती घटाता जाय किन्तु इस दश रत्तिसे अधिक मात्रा नहीं बढानी चाहिये इस प्रकार जबतक उत्तम प्रकारसे आरोग्य न होजाय तबतक उसी प्रकार क्रमसे बढाकर और फिर घटाकर उसका सेवन करता रहे ६६-६७

अजीर्णे भोजनं नैव पथ्यकालव्यतिक्रमे ।
घृतसैन्धवधन्याकहिङ्गुजीरकनागरैः ॥६८॥
शस्यते व्यञ्जनं सिद्धं पित्ते स्वाद्वम्लमाक्षिकम् ।
कृष्णमत्स्येन दुग्धेन मांसेन जाङ्गलेन च ॥६९॥
जाङ्गलेषु शशच्छागौ मत्स्यौ रोहितमद्गुरौ ॥७०॥
पटोलफलपक्कं च कृष्णवार्त्ताकुजालिका ।
सुस्विन्नपूगैस्ताम्बूलैर्लाभे कर्पूरसंयुतैः ॥ ७१ ॥

इसके सेवन करनेपर यदि अजीर्ण होजाय तो भोजनके समयका उल्लंघन नहीं करना चाहिये । एवं घृत, सैंधानमक, धनियाँ, हींग, जीरा, सोंठ इनके द्वारा सिद्ध किये हुए व्यंजन खाने चाहिये । किन्तु पित्तकी अधिकता होनेपर मधुर और खट्टे

पदार्थ तथा शहद सेवन करे । काली मछली, दूध और जंगलीजीवोंके मांसका पथ्य देवे । जंगली जीवोंमें खरगोश या बकरेका मांस तथा रोहू मछली और मद्गुर मछली उत्तम है । शाकोंमें परवल, पटोलपत्र, काले बैंगन और तोरई, पकाई हुई सुपारी, इलायची और कपूर लगाहुआ पान खाना हितकारी है ॥ ६८–७१ ॥

क्षुधाकाले व्यतिक्रान्ते यदि वायुः प्रकुप्यति ।
झंझिनीति शिरःशूले विरेके वमने तथा ॥ ७२ ॥
तृष्णायां चाधिके पित्ते नारिकेलाम्बु निर्भयम् ।
नारिकेलपयः पेयं द्विर्भक्ष्यं क्षीरमेव च ॥ ७३ ॥
स्वप्ने शुक्रच्युतौ चैव-

भोजनके समय उल्लंघन होनेपर वायुके कुपित हो जानेसे शिरमें झिरझिनाहट, पीडा, विरेचन (दस्त), वमन (कै) ये उपद्रव उत्पन्न होजाते हैं । उस समय तृष्णा और पित्तकी अधिक वृद्धि होनेपर निर्भय होकर कच्चे नारियलका जल पान करना चाहिये । जलोंमें नारियलका जल और प्रतिदिन दो बार दूध पिलाना चाहिये । यदि स्वप्नमें वीर्यपात होजाय तो दुग्धपान करे ॥ ७२ ॥ ७३ ॥

चम्पकं कदलीफलम् ।
वर्ज्यं निम्बादिवा शाकं शाकाम्लं काञ्जिकं सुराम् ॥७४॥
कदलीफलपत्राङ्घ्रित्रपुषालाबुकर्कटी ।
कूष्माण्डं कारवेल्लं च व्यायामं जागरं निशि ॥ ७५ ॥
न पश्येन्न स्पृशेच्चैव स्त्रियं जीवितुमिच्छति ।
यद्यौषधे स्त्रियं गच्छेत् कर्त्तव्या तु प्रतिक्रिया ॥ ७६ ॥

इसपर चम्पा, केलेके, पत्ते, निम्बादिशाक, खट्टे पदार्थ, काँजी, मदिरा, केलेकी फली, पत्रांघ्रि, खीरा, लौकी, ककडी और करेला ये सब पदार्थ कसरत आदि परिश्रम और रातमें जागना ये सब त्याज्य हैं । जीनेकी इच्छा करनेवाला पुरुष स्त्रीको न देखे न स्पर्श करे और औषधि सेवन करते समय यदि किसी कारणसे स्त्रीसहवास करे तो उसका विशेषरूपसे प्रतीकार (चिकित्सा) करना ॥ ७४–७६ ॥

दुर्वारां ग्रहणीं हन्ति दुःसाध्यां बहुवार्षिकीम् ।
आमशूलमतीसारं सामं चैव सुदारुणम् ॥ ७७ ॥

अतिसारं षडर्शांसि यक्ष्माणं सपरिग्रहम् ।
शोथं च कामलां पाण्डु प्लीहानं च जलोदरम् ॥ ७८ ॥
पंक्तिशूलं चाम्लपित्तं वातरक्तं वमिं कृमिम् ।
अष्टादशविधं कुष्ठं प्रमेहान् विषमज्वरान् ॥
वातपित्तकफोत्थांश्च ज्वरान् हन्ति सुदारुणान् ॥ ७९ ॥

यह विजयपर्पटी बहुत वर्षोंकी पुरानी अनिवार्य संग्रहणी, आमशूल (आमातिसार), दारुण अतिसार, छः प्रकारकी बवासीर, सम्पूर्ण उपद्रवोंसहित राजयक्ष्मा, सूजन, कामला, पाण्डुरोग, प्लीहा, जलोदर, पंक्तिशूल, अम्लपित्त, प्रमेह, विषमज्वर और वात-पित्त-कफज्वर इन सब व्याधियोंको शीघ्र नष्ट करती है ॥ ७७-७९ ॥

जीर्णोऽपि पर्पटीसेवी वपुषा निर्मलः सुधीः ।
जीवेद्वर्षशतं श्रीमान् वलीपलितवर्जितः ॥ ८० ॥
प्रातस्तु खादति नरो नियतं द्विगुञ्जां
यस्तां स विन्दति तुलां कुसुमायुधस्य ।
आयुश्च दीर्घमनघं वपुषः स्थिरत्वं
हानिं वलीपलितयोरतुलं बलं च ॥ ८१ ॥

वृद्ध मनुष्य भी इस पर्पटीको सेवन करनेसे निर्मल शरीरवाला और विशेष बुद्धिमान् होता है । एवं वली और पलित रोगसे रहित होकर पूरे सौ वर्षतक जीता है । जो पुरुष प्रतिदिन प्रातःकाल इस पर्पटीको दो रत्ती प्रमाण सेवन करता है, वह कामदेवकी समान कान्तिमान्, दीर्घायुषी, पापरहित स्थिर देहवाला होता है । एवं वलीपलित रोगसे रहित होकर अतुल बलशाली होता है ॥ ८० ॥ ८१ ॥

दूसरी विजयपर्पटी ।

रस वज्रं हेम तारं मौक्तिकं ताम्रमभ्रकम् ।
सर्वतुल्येन गन्धेन कुर्याद् विजयपर्पटीम् ॥ ८२ ॥
दुर्वारां ग्रहणीं हन्ति दुःसाध्यां बहुवार्षिकीम् ।
आमशूलमतीसारं चिरोत्थमतिदारुणम् ॥ ८३ ॥
प्रवाहिकां षडर्शांसि यक्ष्माणं सपरिग्रहम् ।
शोथं च कामलां पाण्डुं प्लीहगुल्मजलोदरम् ॥ ८४ ॥

पंक्तिशूलमम्लपित्तं वातरक्तं वमिं भ्रमिम् ।
अष्टादशविधं कुष्ठं प्रमेहान् विषमज्वरान् ॥
चतुर्विधमजीर्णं च मन्दाग्नित्वमरोचकम् ॥ ८५ ॥
जीर्णोऽपि पर्पटीमश्नन् वपुषा निर्मलः सुधीः ।
जीवेद् वर्षशतं श्रीमान् वलीपलितवर्जितः ॥ ८६ ॥
जराव्याधिसमाकीर्णं विश्वं दृष्ट्वा पुरा हरः ।
चकार पर्पटीमेतां यथा नारायणः सुधाम् ॥ ८७ ॥

शुद्ध पारा, हीरा, सुवर्ण, चाँदी, मोती, ताँबा और अभ्रक प्रत्येककी भस्म एक एक तोला एवं शुद्ध गन्धक सबको बराबर अर्थात् ७ तोले लेवे। सबको एकत्र मर्दन करके कज्जली बनालेवे। फिर उसको पिघलाकर रसपर्पटीकी विधिके अनुसार पर्पटी तैयार कर लेवे। यह पर्पटी भी पूर्वोक्त पर्पटीकी समान संग्रहणी आदि समस्त रोगोंको दूर करती है। एवं इसके अन्यान्य गुण पथ्यापथ्य और नियमादि पूर्वोक्त विजयपर्पटीके समानही जानने चाहिये। यह तन्त्रान्तरोक्त विजय पर्पटी है ॥ ८२-८७ ॥

हिरण्यगर्भपोट्टली रस।

एकांशो रसराजस्य ग्राह्यौ द्वौ हाटकस्य च ।
मुक्ताफलस्य चत्वारो भागाः षड्दीर्घनिःस्वनात् ॥ ८८ ॥
त्र्यंशं बलेर्वराटयाश्च टङ्कणो रसपादिकः ।
पक्वनिम्बुकतोयेन सर्वमेकत्र मर्दयेत् ॥ ८९ ॥
मूषामध्ये न्यसेत् कल्कं तस्य वक्त्रं निरोधयेत् ।
गर्त्तेऽरत्निप्रमाणे तु पुटेत् त्रिंशद्वनोपलैः ॥ ९० ॥
स्वाङ्गशीतलतां ज्ञात्वा रसं मूषोदरान्नयेत् ।
ततः खल्लोदरे मद्य सुधारूपं समुद्धरेत् ॥ ९१ ॥

शुद्ध पारा १ भाग, सुवर्णभस्म २ भाग, मोतीकी भस्म ४ भाग, काँसेकी भस्म ६ भाग, शुद्ध गन्धक ३ भाग, कौडीकी भस्म ३ भाग और सुहागा ३ मासे इन सबको एकत्रित करके पकेहुए नींबूके रसमें खरल करे। फिर औषधिको मूषायंत्रमें रखकर उसके मुँहको बन्दकरके एक बालिश्त गहरे गड्ढेमें रखकर तीस आरने उपलोंकी अग्नि देवे। जब पककर स्वांगशीतल होजाय तब औषधिको मूषायन्त्रमेंसे निकालकर उत्तम प्रकारसे खरल करलेवे ॥ ८८-९१ ॥

एतस्यामृतरूपस्य दद्याद् गुञ्जाचतुष्टयम्।
घृतमाध्वीकसंयुक्तमेकोनत्रिंशदूषणैः ॥ ९२ ॥
मन्दाग्नौ रोगसंघे च ग्रहण्यां विषमज्वरे।
गुदाङ्कुरे महाशूले पीनसे श्वासकासयोः ॥ ९३ ॥
अतीसारे ग्रहण्यां च श्वयथौ पाण्डुके गदे।
सर्वेषु कोष्ठरोगेषु यकृत्प्लीहादिकेषु च ॥ ९४ ॥
वातपित्तकफोत्थेषु द्वन्द्वजेषु त्रिदोषजे।
दद्यात् सर्वेषु रोगेषु श्रेष्ठमेतद्रसायनम् ॥ ९५ ॥

इस अमृतकी समान गुणकारी रसको चार चार रत्ती प्रमाण लेकर घृत, शहद और २९ कालीमिरचोंके चूर्णके साथ मिलाकर सेवन करावे। यह रस मन्दाग्नि, संग्रहणी, विषमज्वर, बवासीर, दारुण शूल, पीनस, श्वास, खाँसी, अतिसार, सूजन, पाण्डुरोग, सब प्रकारके उदरविकार, यकृत, प्लीहा, वात-पित्त तथा कफजन्यरोग, द्विदोषज और त्रिदोषज आदि समस्त रोगोंमें प्रयोग करना चाहिये। इससे उक्त विकार तत्काल नष्ट होते हैं। यह अतिश्रेष्ठ रसायन है ॥ ९२-९५ ॥

स्वल्पचुक्र।

यन्मस्त्वादि शुचौ भाण्डे सगुडक्षौद्रकाञ्जिकम्।
धान्यराशौ त्रिरात्रस्थं शुक्तं चुक्रं तदुच्यते ॥ ९६ ॥

गुड़ १ भाग, शहद २ भाग, कांजी ४ भाग, एवं दहीका पानी ८ भाग लेवे। इन सबको एक मिट्टीके नये घड़ेमें भरकर उसके मुँहको बन्द करके नवीन धानोंके ढेरमें गाड़ देवे। फिर तीन दिनके बाद निकालकर सेवन करावे। इसके सेवनसे ग्रहणीप्रभृति विविध रोग नष्ट होते हैं। इसको चुक्र अथवा शुक्त कहते हैं ॥ ९६ ॥

बृहच्चुक्र।

प्रस्थं तण्डुलतोयतस्तुषजलात् प्रस्थत्रयं चाम्लतः
प्रस्थार्द्धं दधितोऽम्लमूलकपलान्यष्टौ गुडान् मानिके।
मान्यौ शोधितशृङ्गवेरशकलाद् द्वे सिन्धवजाज्योः पले
द्वे कृष्णोषणयोर्निशापलयुगं निक्षिप्य भाण्डे दृढे ॥ ९७ ॥
स्निग्धे धान्ययवादिराशिनिहितं त्रीन् वासरान् स्थापयेत्
ष्मे तोयधरात्यये च चतुरो वर्षासु पुष्पागमे।

षट्शीतेऽष्टदिनान्यतः परमिदं विस्राव्य संचूर्णयेच्चातुर्जातपलेन संहतमिदं शुक्तं च चुक्रं च तत् ॥ ९८ ॥
हन्याद्वातकफामदोषजनितान्नानाविधानामयान्
दुर्नामानि च शूलगुल्मजठरान् हत्वाऽनलं दीपयेत् ॥ ९९ ॥

चावलोंका जल एक प्रस्थ, तुषोदक (कांजीका भेद) २ प्रस्थ, खट्टा दही ३२ तोले, अम्लमूलक (बासीकांजीमें पकाई हुई मूलीके टुकडे) ८ पल, गुड़ दो शराव, शुद्ध किये हुए अदरखके टुकडे ३२ तोले, एवं सैंधानमक, जीरा पीपल, मिरच और हल्दी ये प्रत्येक आठ आठ तोले लेवे । इन सबको एकत्र मिलाकर मजबूत और चिकने मिट्टीके बर्त्तनमें भरकर उसके मुँहको अच्छे प्रकार बन्द करके धान अथवा जौके ढेरमें गाड़देवे । इसको गरमीके दिनोंमें तीन दिन, शरदृतुमें चार दिन, वर्षाकालमें अथवा वसंतऋतुमें ६ दिन और शीतकालमें ८ दिनतक गड़ा रखना चाहिये। फिर उसको निकालकर उसमें दालचीनी, तेजपात, इलायची और नागकेशर इन प्रत्येकका चूर्ण चार चार तोले मिला देवे । इस प्रकार यह बृहत् शुक्त अथवा बृहच्चुक्र सिद्ध होता है । यह चुक्र सेवन करतेही वात, कफ और आमदोषसे उत्पन्न हुए विविधप्रकारके रोग एवं अर्श, ग्रहणी, शूल, गुल्म और उदररोग इन सबको नष्ट करके अग्निको दीपन करता है ॥ ९७–९९ ॥

आयामकाञ्जिक ।

वाट्यस्य दद्याद्यवसक्तुकानां पृथक्पृथक्चाढकसम्मितं तु ।
मध्यप्रमाणानि च मूलकानि दद्याच्चतुः षष्टिसुकल्पितानि ॥
द्रोणेऽम्भसः प्लाव्य घटे सुधौते दद्यादिदं भेषजजातयुक्तम् ।
क्षारद्वयं तुम्बुरुवस्तगन्धा धनीयकं स्याद् विडसैन्धवं च ॥
सौवर्चलं हिङ्गु शिवाटिकां च चव्यं च दद्याद् द्विपलप्रमाणम् ।
इमानि चान्यानि पलोन्मितानि विजर्जरीकृत्य घटे क्षिपेच्च ॥
कृष्णामजाजीमुपकुञ्चिकां च तथाऽऽसुरीं कारविचित्रकं च ।
पक्षस्थितोऽयं बलवर्णदेहवयस्करोऽतीव बलप्रदश्च ॥ १०२ ॥

वाट्य (भूसीरहित जौको १४ गुने जलमें पकानेसे जो मांड प्रस्तुत होता है) एक आढक, जौके सत्तू १ आढक एवं मध्यम दर्जेकी (न बहुत

छोटी न बडी) हो ऐसी मूली ६४ इन सबको धोयहुए स्वच्छ घडेमें डालकर एक द्रोण परिमाण जल भर देवे । फिर उस घडेमें जवाखार, सज्जी, तुम्बुरु, अजवायन, धनियाँ, विरियासंचरनमक, सैंधानमक, कालानमक, हींग, वंशलोचन और चव्य प्रत्येक औषधि आठ आठ तोले, पीपल, जीरा, राई, सफेद सरसों, काला जीरा और चीतेकी जड ये प्रत्येक चार चार तोले सबको बारीक पीसकर डालदेवे । फिर घडेके मुँहको सिकोरेसे अच्छे प्रकार बन्द करके धानोंके ढेरमें १५ दिनतक गडा रक्खे। तदनन्तर उसको निकालकर यथोचित मात्रासे सेवन करे तो इससे शरीरमें बल वर्ण और आयुकी वृद्धि होती है । यह अत्यन्त बलके देनेवाली है ॥ १००-१०३॥

कान् जीवयामीति यतः प्रवृत्त-
स्तत् काञ्जिकेति प्रवदन्ति तज्ज्ञाः ।
आयामकालान्तरयेच्च भुक्त-
मायामिकेति प्रवदन्ति चैनम् ॥ १०४ ॥
दकोदरं गुल्ममथ प्लिहानं हृद्रोगमानाहमरोचकं च ।
मन्दाग्नितां कोष्ठगतं च शूलमर्शोविकारान् सभगन्दरांश्च ॥
वातामयानाशु निहन्ति सर्वान् संसेव्यमानं विधिवन्नराणाम् ॥

जब कोई चिकित्सक सब ओषधियोंसे निराश होकर यह विचारता है कि, रोगीकी किस प्रकार जीवरक्षा करूं? तब उस समयके लिये आयुर्वेदाचार्य महर्षिगण आयामकाञ्जिककोही बतलाते हैं। आयाम शब्दका अर्थ-१ प्रहर। यह १ प्रहरमें खाये हुए भोजनको पचादेता है, इसलिये इसको विद्वान्लोग आयामकाञ्जिक कहते हैं। यह उदररोग, गुल्म, प्लीहा, हृदयरोग, आनाह, अरुचि, मन्दाग्नि, कोष्ठगतशूल, अर्श, भगन्दर, वातरोग एवं अन्यान्य सर्वप्रकारके रोगोंको शीघ्र दूर करता है ॥१०४॥१०५॥

अष्टपलघृत ।

त्र्यूषणत्रिफलाकल्के बिल्वमात्र गुडात्पले ।
सर्पिषोऽष्टपलं पक्त्वा मात्रां मन्दानलः पिबेत् ॥ १ ॥

सोंठ, पीपल, मिरच, हरड, आमला और बहेडा इनका कल्क समान भाग मिश्रित चार तोले, गुड चार तोले और घी ३२ तोले लेवे । सबको एकत्र मिलाकर विधिपूर्वक घृतको सिद्ध करे । इसको रोगीकी अवस्था और अग्निके बलाबलको

विचारकर उचित मात्रासे सेवन करे तो मन्दाग्नि आदि सर्वविकार दूर होते हैं ॥ १॥

बिल्वादिघृत।

बिल्वाग्निचव्यार्द्रकशृङ्गवेरक्काथेन कल्केन च सिद्धमाज्यम्।
सच्छागदुग्धं ग्रहणीगदोत्थशोथाग्निमान्द्यारुचिनुद्वरिष्ठम् ॥ २ ॥

बेलगिरी, चीतेकी जड, चव्य, अदरख और सोंठ इन प्रत्येकके काथ और कल्क, एवं बकरीके दूधके साथ विधिपूर्वक घृतको सिद्ध करे। यह घृत संग्रहणी और तज्जन्य उपद्रव तथा सूजन, मन्दाग्नि, अरुचिप्रभृति विकारोंको नष्ट करनेके लिये सर्वोत्तम है ॥ २ ॥

बिल्वगर्भघृत।

मसूरस्य कषायेण बिल्वगर्भं पचेद् घृतम्।
हन्ति कुक्ष्यामयान् सर्वान् ग्रहणीपाण्डुकामलाः ॥ ३ ॥

मसूरका काथ और बेलगिरीके कल्कके द्वारा यथाविधि घृतको सिद्ध करे। यह घृत सर्वप्रकारके कुक्षिगत रोग एवं ग्रहणी, पाण्डु, कामला आदि विकारोंको शमन करता है ॥ ३ ॥

शुण्ठीघृत।

विश्वौषधस्य गर्भेण दशमूलजले शृतम्।
घृतं निहन्याच्छ्वयथुं ग्रहणीं सामतामयम् ॥ ४ ॥

सोंठके कल्क और दशमूलके काढेमें सिद्ध कियाहुआ घृत आमयुक्त ग्रहणी और सूजनको नष्ट करता है ॥ ४ ॥

नागरघृत।

घृतं नागरकल्केन सिद्धं वातानुलोमनम्।
ग्रहणीपाण्डुरोगघ्नं प्लीहकासज्वरापहम् ॥ ५ ॥

केवल सोंठके कल्कके द्वारा सिद्ध किया हुआ घृत ग्रहणी, पाण्डुरोग, तिल्ली खाँसी और ज्वरको दूर करता है और वायुका अनुलोमन करता है ॥ ५ ॥

चित्रकघृत।

चित्रकक्वाथकल्काभ्यां ग्रहणीघ्नं शृतं हविः।
गुल्मशोथोदरप्लीहशूलार्शोघ्नं प्रदीपनम् ॥ ६ ॥

चीतेके काथ और कल्कके द्वारा यथाविधि प्रस्तुत किया हुआ घी ग्रहणी, शोथ, उदररोग, गुल्म, प्लीहा, शूल, अर्शादिरोगोंको नाशकरनेवाला और विशेषकर अग्निप्रदीपक है ॥ ६ ॥

चाङ्गेरीघृत।

नागरं पिप्पलीमूलं चित्रको हस्तिपिप्पली।
श्वदंष्ट्रा पिप्पली धान्यं बिल्वं पाठा यमानिका ॥ ७ ॥
चाङ्गेरीस्वरसे सर्पिः कल्कैरेतैर्विपाचितम्।
चतुर्गुणेन दध्ना च तद् घृतं कफवातनुत् ॥ ८ ॥
अर्शांसि ग्रहणीदोषं मूत्रकृच्छ्रं प्रवाहिकाम्।
गुदभ्रंशार्त्तिमानाहं घृतमेतद् व्यपोहति ॥ ९ ॥

सोंठ, पीपलामूल, चीतेकी जड, गजपीपल, गोखुरू, पीपल, धनियाँ, बेलगिरी, पाढ और अजवायन इनके समानभाग मिश्रित कल्क और अम्ल नोनियाके स्वरसमें चौगुना दहीका पानी डालकर यथाविधिसे घृतको सिद्ध करे। यह घृत कफ और वातके रोग एवं बवासीर, संग्रहणी, मूत्रकृच्छ्र, प्रवाहिका, गुदभ्रंशकी पीडा और आनाह इन सबको दूर करता है ॥ ७-९ ॥

मरिचाद्यघृत।

मरिचं पिप्पलीमूलं नागरं पिप्पली तथा।
भल्लातकं यमानी च विडङ्गं हस्तिपिप्पली ॥ १० ॥
हिङ्गु सौवर्चलं चैव विडसैन्धवचव्यकम्।
सामुद्रं सयवक्षारं चित्रको वचया सह ॥ ११ ॥
एतैरर्द्धपलैर्भागैर्घृतप्रस्थं विपाचयेत्।
दशमूलीरसे सिद्धं पयसा द्विगुणेन च ॥ १२ ॥

मिरच, पीपलामूल, सोंठ, पीपल, भिलावे, अजवायन, वायविडङ्ग, गज, पीपल, हींग, कालानमक, विरियासंचरनमक, सैंधानमक, चव्य, समुद्रनमक, जवाखार, चीतेकी जड और बच इन प्रत्येकका कल्क दो दो तोले, दशमूलका क्वाथ और क्वाथसे दूना दूध लेवे। इन सबके द्वारा विधिपूर्वक एक प्रस्थ घृतको पकावे १०-१२

मन्दाग्नीनां हितं श्रेष्ठं ग्रहणीदोषनाशनम्।
विष्टम्भमामदौर्बल्यं प्लीहानमपकर्षति ॥ १३ ॥
कासं श्वासं क्षयं चैव दुर्नाम सभगन्दरम्।
कफजान् हन्ति रोगांश्च वातजान् कृमिसम्भवान्।
तान् सर्वान् नाशयत्याशु शुष्कं दावानलो यथा ॥ १४ ॥

यह घृत मन्दाग्निवालोंको अत्यन्त हितकारी एवं ग्रहणी, विष्टम्भ, आमदोष' दुर्बलता, प्लीहा, खाँसी, श्वास, क्षय, बवासीर, भगन्दर, कफजन्यरोग, वातज रोग और कृमिरोग इन सबको तत्काल इस प्रकार नष्ट करदेता है जैसे दावाग्नि सूखे काष्ठको तत्क्षण भस्म करदेता है ॥ १३ ॥ १४ ॥

महाषट्पलकघृत।

सौवर्चलं पञ्चकोलं सैन्धवं हवुषा विडम्।
अजमोदा यवक्षारं हिङ्गु जीरकमौद्भिदम् ॥ १५ ॥
कृष्णाजाजीं सभूतीकं कल्कीकृत्य पलार्द्धकम्।
आर्द्रकस्य रसं चुक्रं क्षीरमस्त्वम्लकाञ्जिकम् ॥ १६ ॥
दशमूलकषायेण घृतप्रस्थं विपाचयेत्।
भक्तेन सह पातव्यं निर्भक्तं वा विचक्षणैः ॥ १७ ॥
कृमिप्लीहोदराजीर्णज्वरकुष्ठप्रवाहिकाम्।
वातरोगान् कफव्याधीन् हन्याच्छूलमरोचकम् ॥ १८ ॥
पाण्डुरोगं क्षयं कासं दौर्बल्यं ग्रहणीगदम्।
महाषट्पलकं नाम वृक्षमिन्द्राशनिर्यथा ॥ १९ ॥

कालानमक, पीपल, पीपलामूल, चव्य, चीता, सोंठ, सैंधानमक, हाऊबेर, बिरियासंचरनमक, अजमोद, जवाखार, हींग, जीरा, समुद्रलवण, काला जीरा और अजवायन इनका कल्क दो दो तोले, एवं अदरखका रस, चूकेका स्वरस, दूध, दहीके तोड, कॉंजी, दशमूलका क्वाथ और घी ये प्रत्येक एक एक प्रस्थ लेवे सबको एकत्र मिलाकर विधिपूर्वक घृतको सिद्ध करे। इस घृतको भातके साथ अथवा बिनाही भातके सेवन करे तो यह महाषट्पलक नामक घृत कृमिरोग, तिल्ली, उदररोग, अजीर्ण, ज्वर, कुष्ठ, प्रवाहिका, वातरोग, कफरोग, शूल, अरुचि, पाण्डुरोग, क्षय, खाँसी, दुर्बलता, संग्रहणी प्रभृति रोगोंको इस प्रकार नष्ट करता है; जैसे वज्र वृक्षोंको तत्काल नाश करदेता है ॥ १५-१९ ॥

बिल्वतैल।

तुलार्धं शुष्कबिल्वस्य तुलार्द्धं दशमूलतः।
जलद्रोणे विपक्तव्यं चतुर्भागावशेषितम् ॥ २० ॥
आर्द्रकस्य रसप्रस्थमारनालं तथैव च।
तैलप्रस्थं समादाय क्षीरप्रस्थं तथैव च ॥ २१ ॥

धातकी बालबिल्वं च शठी रास्ना पुनर्नवा ।
त्रिकटु पिप्पलीमूलं चित्रकं गजपिप्पली ॥ २२ ॥
देवदारु वचा कुष्ठं मोचकं कटुरोहिणी ।
तेजपत्राजमोदं च जीवनीयगणस्तथा ॥ २३ ॥
एषामर्द्धपलान् भागान् पाचयेन्मृदुनाऽग्निना ।
एतद्धि बिल्वतैलाख्यं मन्दाग्नीनां प्रशस्यते ॥ २४ ॥

सूखी बेलगिरी ५० पल और दशमूलकी सब औषधियाँ ५० पल लेकर एक द्रोण जलमें पकावे। जब पककर चौथाई भाग जल शेष रहजाय तब उतारकर छानलेवे। फिर उसमें अदरखका रस १ प्रस्थ, कांजी १ प्रस्थ, दूध १ प्रस्थ और तिलका तेल एक प्रस्थ डालदेवे। धायके फूल, कच्ची बेलगिरी, कचूर, रायसन, लाल विषखपरा, सोंठ, पीपल, मिरच, पीपलामूल, चीतेकी जड़, गजपीपल, देवदारु, वच, कूठ, मोचरस, कुटकी, तेजपात, अजमोद, जीवक, ऋषभक, मेदा, महामेदा काकोली, क्षीरकाकोली, ऋद्धि, वृद्धि, मुगवन, मषवन, जीवन्ती और मुलहठी इन प्रत्येकके दो दो तोले कल्कको लेवे। सबको एकत्र मिलाकर मन्द मन्द अग्निसे तैलको पकावे। यह बिल्वनामक तैल मन्दाग्निवालोंके लिये विशेषकर उपयोगी है ॥ २०-२४ ॥

ग्रहणीं विविधां हन्ति चातीसारमरोचकम् ।
सग्रहग्रहणीं हन्ति अर्शसामपि नाशकम् ॥ २५ ॥
श्लीपदं विविधं हन्ति अन्त्रवृद्धिं च नाशयेत् ।
कफवातोद्भवं शोथं ज्वरमाशु व्यपोहति ॥ २६ ॥
कासं श्वासं च गुल्मं च पाण्डुरोगविनाशनम् ।
मक्कलशूलशमनं सूतिकातङ्कनाशनम् ॥ २७ ॥
मूढगर्भे च दातव्यं मूढवातानुलोमनम् ।
शिरोरोगहरं चैव स्त्रीणां गदनिषूदनम् ॥ २८ ॥
रजोदुष्टाश्च या नार्यो रेतोदुष्टाश्च ये नराः ।
तेऽपि तारुण्यशुक्राढ्या भविष्यन्ति महाबलाः ॥ २९ ॥
वन्ध्याऽपि लभते पुत्रं शूरं पण्डितमेव च ।
बिल्वतैलमिति ख्यातमात्रेयेण विनिर्मितम् ॥ ३० ॥

एवं नानाप्रकारकी ग्रहणी, अतिसार, अरुचि, संग्रहणी और अर्शादि समस्त उपद्रवोंको शीघ्र नष्ट करता है। जो स्त्रियाँ रजोदोषसे और जो पुरुष वीर्यदोषसे युक्त हैं, वेभी इसका सेवन करनेसे नवयौवनयुक्त, अत्यन्त वीर्यवान् और बलवान् होते हैं, वन्ध्या स्त्री भी शूरवीर और विद्वान् पुत्रको प्राप्त करती है। इस बिल्व तैलको आत्रेयमुनिने निर्माण किया है ॥ २९-३० ॥

ग्रहणीमिहिरतैल।

धन्याकं धातकी लोध्रं समङ्गाऽतिविषा शिवा।
उशीरं वारिवाहं च जलं मोचं रसाञ्जनम् ॥ ३१ ॥
बिल्वं नीलोत्पलं पत्रं केशरं पद्मकेशरम्।
गुडूचीन्द्रयवश्यामा पद्मकं कटुरोहिणी ॥ ३२ ॥
तगरं नलदं भृङ्गं केशराजः पुनर्नवा।
आम्रजम्बुकदम्बानां त्वचः कुटजवल्कलम् ॥ ३३ ॥
यमानी जीरकं चैषां कार्षकाणि प्रकल्पयेत्।
तैलप्रस्थं पचेत् सम्यक् तक्रेणान्यतमेन वा ॥ ३४ ॥
कुटजत्वक्कषायेण धान्यकक्वथितेन वा।
बुद्ध्वा दोषगतिं तत्तु तथान्यौषधवारिणा ॥ ३५ ॥

धनियाँ, धायके फूल, लोध, लज्जावन्ती, अतीस, हरड, खस, नागरमोथा, गन्धवाला, मोचरस, रसौंत, बेलगिरी, नीलकमल, तेजपात, नागकेशर, कमल, केशर, गिलोय, इन्द्रजौ, अनन्तमूल, पद्माख, कुटकी, तगर, बालछड, दालचीनी, कुकुरभाँगरा, पुनर्नवा, आमकी छाल, जामुनकी छाल, कदमकी छाल, कुडेकी छाल, अजवायन और जीरा इन प्रत्येक औषधिका कल्क एक एक कर्ष एवं तिलका तैल एक प्रस्थ, मठा एक प्रस्थ, कुडेकी छालका क्काथ एक प्रस्थ और धानियेका क्काथ एक प्रस्थ एवं जल एक द्रोण परिमाण लेवे। सबको एकत्रकर विधिपूर्वक तैलको सिद्ध करे। इस तैलको दोषोंके बलाबलका विचारकर अन्यान्य औषधियोंके साथ मिश्रितकरके सेवन करावे ॥ ३१-३५ ॥

एतद्रसायनवरं वलीपलितनाशनम्।
हन्ति सर्वानतीसारान् ग्रहणीं सर्वरूपिणीम् ॥ ३६ ॥
ज्वरं तृष्णां तथा कासं हिक्कां श्वासं वमिं भ्रमिम्।
सोपद्रवां कोष्ठरुजं नाशयेत् सत्यमेव हि ॥ ३७ ॥

अर्शांसि कामलां मेहं श्वयथुं शूलमुल्बणम् ।
एतद्धि बृंहणं वृष्यं सर्वरोगनिबर्हणम् ॥ ३८ ॥
वशीकरणमेतद्धि पुष्ययोगे विपाचयेत् ।
सायं स्त्रीषु प्रकर्तव्यं प्रत्यूषे राजसंसदि ॥ ३९ ॥
विवाहादिषु माङ्गल्यं विवादे विजयप्रदम् ।
गर्भस्य चलितस्यापि स्थापनं परमं शुभम् ॥ ४० ॥
गर्भारम्भे प्रकर्तव्यमेतद् गर्भविवर्द्धनम् ।
ग्रहणीमिहिरं नाम तैलं भुवनमङ्गलम् ॥ ४१ ॥

यह तेल अत्यन्त श्रेष्ठ रसायन है, बृंहण और वृष्य एवं वलीपलित आदि विकार तथा सर्वप्रकारके अतिसार, नानाप्रकारकी संग्रहणी आदि सम्पूर्ण व्याधियोंको नष्ट करता है । पुष्य नक्षत्रमें इस तेलको पकानेसे यह वशीकरणयोग होता है । यह तेल स्त्रियोंको सायंकालके समय और राजाओंको प्रातःकालके समय सेवन कराना चाहिये । यह विवाहादिमें मंगल करनेवाला, युद्धमें विजयका देनेवाला और विचलित हुए गर्भको पुनः स्थिर करनेवाला है । गर्भके आरम्भमें इसको सेवन करनेसे गर्भकी वृद्धि होती है । यह ग्रहणीमिहिर नामवाला तैल चौदह भुवनका कल्याण करनेवाला है ॥ ३६-४१ ॥

बृहद्ग्रहणीमिहिरतैल ।

तैलं प्रस्थमितं ग्राह्यं तक्रं दद्याच्चतुर्गुणम् ।
कुटजं धान्यकं चैव ग्राह्यं पलशतं पृथक् ॥ ४२ ॥
तयोः क्वाथं पचेद् द्रोणे अम्बु पादावशेषितम् ।
एकीकृत्य पचेद् वैद्यः कल्कं कर्षमितं पृथक् ॥ ४३ ॥
धान्यकं धातकी लोध्रं समङ्गाऽतिविषा शिवा ।
लवङ्गं बालकं चैव शृङ्गाटकरसाञ्जनम् ॥ ४४ ॥
नागपुष्पं पद्मकं च गुडूचीन्द्रयवं तथा
प्रियङ्गु कुटकी पद्मकेशरं तगरं तथा ॥ ४५ ॥
शरमूलं भृङ्गराजः केशराजः पुनर्नवा ।
आम्रजम्बुकदम्बानां कल्कानि च प्रदापयेत् ॥ ४६ ॥

तिलका तैल एक प्रस्थ, मठा ४ प्रस्थ एवं कुडेकी छाल और धनियेको अलग २ सौ सौ पल लेकर एक द्रोण जलमें पकाकर चतुर्थांश जल शेष रक्खे फिर छानकर

उसमें धनियाँ, धायके फूल, लोध, लज्जावन्ती, अतीस, हरड, लौंग, सुगन्धवाला, सिंघाडेके पत्ते, रसौंत, नागकेशर, पद्माख, गिलोय, इन्द्रजौ, फूलप्रियंगु, कुटकी, कमलकेसर, तगर, रामसरकी जड, भांगरा, केशराज, लाल पित्तपपरा, आमकी छाल, जामुनकी छाल और कदमकी छाल इन समस्त औषधियोंके कल्कको एक एक कर्ष प्रमाण डालकर विधिपूर्वक तैलको पकावे ॥ ४२–४६ ॥

ग्रहणीं हन्ति तच्छीघ्रं वलीपलितनाशनम् ।
हन्ति सर्वानतीसारान् ग्रहणीं सर्वरूपिणीम् ॥ ४७ ॥
ज्वरं तृष्णां तथा श्वासं कासं हिक्कां वमिं भ्रमिम् ।
सोपद्रवं कोष्ठरुजं नाशयेत् सद्य एव हि ॥ ४८ ॥
वशीकरणमेतद्धि पुष्ययोगेन कारयेत् ।
बृहद्ग्रहणीमिहिरतैलं भुवनमङ्गलम् ॥ ४९ ॥

यह तेल शरीरपर मालिश करनेसे सर्व प्रकारके अतिसार, सर्वदोषयुक्त ग्रहणी, वली–पलित रोग, ज्वर, तृष्णा, श्वास, खाँसी, हिचकी, वमन, भ्रम और संपूर्ण उपद्रवोंसहित उदरविकार इन सबको बहुत शीघ्र नष्ट करता है। पुष्यनक्षत्रमें इसको सिद्ध करनेसे यह वशीकरण योग होजाता है। यह बृहद्ग्रहणीमिहिर तैल १४ भुवनका मंगल करनेवाला है ॥ ४७–४९ ॥

तक्रारिष्ट।

यमान्यामलकं पथ्या मरिचं त्रिपलांशिकम् ।
लवणानि पलांशानि पञ्च चैकत्र चूर्णयेत् ॥ ५० ॥
तक्रकं संयुतं जातं तक्रारिष्टं पिबेन्नरः ।
दीपन शोथगुल्मार्शःकृमिमेहोदरापहम् ॥ ५१ ॥

अजवायन, आमले, हरड और मिरच प्रत्येक बारह १२ तोले और पाँचों नमक प्रत्येक चार चार तोले सबका एकत्र चूर्ण करके ४ सेर मट्ठेमें पकाकर १ मिट्टीके घडेमें भरकर चार दिनतक रक्खा रहनेदेवे, पश्चात् उसको निकालकर यथोचित मात्रासे सेवन करे तो अग्नि दीपन होती है एवं शोथ, गुल्म, अर्श, कृमि, प्रमेह और उदररोग दूर होते हैं ॥ ५० ॥ ५१ ॥

पिप्पल्याद्यासव।

पिप्पली मरिचं चव्यं हरिद्रा चित्रको घनः ।
विडङ्गं क्रमुको लोध्रः पाठा धात्र्येलवालुकम् ॥ ५२ ॥

उशीरं चन्दनं कुष्ठं लवङ्गं तगरं तथा।
मांसी त्वगेला पत्रं च प्रियङ्गुर्नागकेशरम् ॥ ५३ ॥
एषामर्द्धपलान् भागान् श्लक्ष्णचूर्णीकृताञ्छुभान् ॥
जलद्रोणद्वये क्षिप्त्वा दद्याद् गुडतुलात्रयम् ॥ ५४ ॥
पलानि दश धातक्या द्राक्षा षष्टिपला भवेत्।
एतान्येकत्र संयोज्य मृद्भाण्डे च विनिक्षिपेत् ॥ ५५ ॥
ज्ञात्वा जातरसं सर्वं पाययेदग्न्यपेक्षया।
क्षयं गुल्मोदरं कार्श्यं ग्रहणीं पाण्डुतां तथा ॥
अर्शांसि नाशयेच्छीघ्रं पिप्पल्याद्यासवस्त्वयम् ॥ ५६ ॥

पीपल, मिरच, चव्य हल्दी, चीता, नागरमोथा, वायविडङ्ग, सुपारी, लोध, पाढ, आमला, एलुआ, खस, लालचन्दन, कूठ, लौंग, तगर, बालछड़, दालचीनी, छोटी इलायची, तेजपात, फूलप्रियंगु और नागकेसर इन समस्त ओषधियोंके खूब बारीक पिसे हुए चूर्ण दो दो तोले, एवं पुराना गुड़ तीन सौ पल, धायके फूल दस पल और दाख ६० पल लेवे। इन सबको दो द्रोण परिमाण जलमें डालकर एक स्वच्छ मिट्टीके वर्त्तनमें भरकर एक महीनेतक रक्खारहने देवे। जब उसमें उत्तम प्रकारसे रस उत्पन्न हो जाय तब निकालकर छानलेवे, फिर इसको अग्निका बलाबल विचार-कर पान कराना चाहिये। यह पिप्पल्याद्यासव क्षय, गुल्म, उदररोग, कृशता, ग्रहणी, पाण्डुरोग और बवासीर इन समस्त रोगोंको नष्ट करता है ॥ ५२-५६ ॥

इति भैषज्यरत्नावल्यां ग्रहणीरोगचिकित्सा।

अर्शोरोगचिकित्सा।

दुर्नाम्नां साधनोपायश्चतुर्धा परिकीर्त्तितः।
भेषजक्षारशस्त्राग्निसाध्यत्वादाद्य उच्यते ॥ १ ॥

अर्शरोगकी चिकित्सा चार प्रकारकी कही गयी है। जैसे–औषधप्रयोग, क्षार-कर्म, शस्त्रक्रिया और अग्निक्रिया। चारोंमेंसे यहाँपर औषधचिकित्साका ही वर्णन करते हैं ॥ १ ॥

यद्वायोरानुलोम्याय यदग्निबलवृद्धये ।
अनुपानौषधद्रव्यं तत्सेव्यं नित्यमर्शसैः ॥ २ ॥

जो औषधियाँ और अनुपान वायुको अनुलोमन करनेवाले और अग्निके बलकी वृद्धि करनेवाले हैं, अर्शक रोगियोंको वे सब नित्य सेवन करने चाहिये ॥ २ ॥

शुष्कार्शसां प्रलेपादिक्रिया तीक्ष्णा विधीयते ।
स्राविणां रक्तमालोक्य क्रिया कार्याऽस्रपैत्तिकी ॥ ३ ॥

शुष्क अर्शरोगवाले मनुष्योंको प्रलेपादि तीक्ष्ण क्रिया करनी चाहिये और रुधिरस्राव होनेवाले अर्शरोगियोंको रक्तपित्तरोगकी समान चिकित्सा करनी चाहिये ॥३॥

स्नुक्क्षीरं रजनीयुक्तं लेपाद्दुर्नामनाशनम् ।
कोषातकीरजोघर्षान्निपतन्ति गुदोद्भवाः ॥ ४ ॥

थूहरके दूध और हल्दीके चूर्णको एकत्र मिलाकर लेप करनेसे अथवा तोरईका चूर्णको मलनेसे अर्शके अंकुर गिरपडते हैं ॥ ४ ॥

असितानां तिलानां प्राक् प्रकुञ्चं शीतवार्यनु ।
खादतोऽर्शांसि नश्यन्ति द्विजदार्ढ्याङ्गपुष्टिदम् ॥ ५ ॥

काले तिलोंके चार तोले परिमाण चूर्णको शीतल जलके साथ खानेसे अर्शरोग नष्ट होता है। दाँत दृढ और शरीर पुष्ट होता है ॥ ५ ॥

कफजे शृङ्गवेरस्य क्राथो नित्योपयोगिकः ॥ ६ ॥

कफकी बवासीरमें प्रतिदिन सोंठका क्राथ सेवन करना हितकारी है ॥ ६ ॥

अर्कक्षीरं स्नुहीक्षीरं तिक्ततुम्ब्याश्च पल्लवाः ।
करञ्जो बस्तमूत्रं च लेपनं श्रेष्ठमर्शसाम् ॥ ७ ॥

आकका दूध, थूहरका दूध, कडवीतोंबीके पत्ते, दुर्गन्ध करंज और बकरेका मूत्र इनको एकत्र मिलाकर लेप करना अर्शरोगवालोंके लिये हितकर है ॥ ७ ॥

अर्शोघ्नी गुदजा वर्त्तिर्गुडघोषाफलोद्भवा ।
ज्योत्स्निकामूलकल्केन लेपो रक्तार्शसां हितः ॥ ८ ॥

गुड और तोरईके फूलोंके चूर्णको एकत्र मिलाकर बत्ती बनावे। उसको गुदामें रखनेसे बवासीर दूर होती है और मालकांगुनीकी जडके कल्कका लेप करना रक्तार्शवाले रोगियोंको उपयोगी है ॥ ८ ॥

तुम्बीबीजं सोद्भिदं तु काञ्जिपिष्टं गुडीत्रयम् ।
अर्शोहरं गुदस्थं स्यादधि माहिषमश्नतः ॥ ९ ॥

कडुवी तोंबीके बीज और रेव दोनोंको समभाग लेकर कांजीमें पीसकर तीन गोलियाँ बनालेवे । इनमेंसे एकएक गोली गुदाम रखनेसे और इसपर भैंसका दही खानेसे अर्शरोग दूर होता है ॥ ९ ॥

महारोधिप्रदेशस्य पथ्या कोशातकीरजः ।
सफेनं लेपतो हन्ति लिङ्गार्शो नात्र संशयः ॥ १० ॥

मगध देशकी उत्पन्नहुई हरडाका चूर्ण, तोरईका चूर्ण और समुद्रफेन इनको एकत्र पीसकर प्रलेप करनेसे लिङ्गार्शरोग निस्सन्देह नष्ट होता है ॥ १० ॥

अपामार्गोद्भवान्मूलात क्षारं सहरितालकम् ।
लिङ्गार्शो लेपतो हन्ति चिरजातमसंशयम् ॥ ११ ॥

चिरचिटेकी जडका बनायाहुआ क्षार और हरताल दोनोंको समभाग लेकर जलके साथ पीसकर लेप करनेसे बहुत पुराना लिङ्गार्शरोग निश्चय दूर होताहै ११

वातातिसारवद्भिन्नवर्चांस्यर्शांस्युपाचरेत् ।
उदावर्त्तविधानेन गाढविट्कानि चासकृत् ॥ १२ ॥

अर्शके रोगियोंको पतले दस्त होते हों तो वातातिसारकी समस्त चिकित्सा करे और यदि मल कठिन उतरता हो तो उदावर्त्तरोगकी विधिके अनुसार चिकित्सा करे ॥ १२ ॥

विड्विबन्धे हितं तक्रं यमानीविडसंयुतम् ।
वातश्लेष्मार्शसां तस्मात् परं नास्तीह भेषजम् ॥ १३ ॥
तत् प्रयोज्यं यथादोषं सस्नेहं रूक्षमेव वा ।
न विरोहन्ति गुदजाः पुनस्तक्रसमाहिताः ॥ १४ ॥

वात और कफजनित अर्शके रोगियोंको मल विबन्ध हो जाने पर अजवायन और विरियासंचर नमक डालकर मट्ठेका सेवन करना चाहिये ऐसे रोगियोंके लिये मट्ठेसे बढ कर हित करनेवाली अन्य कोई औषधि नहीं है. इसलिये यथादोषानुसार मक्खनसहित अथवा मक्खनरहित मट्ठेका नित्य सेवन करना चाहिये । इस प्रकार तक्रका सेवन करनेसे नष्ट हूए गुदाके अंकुर फिर उत्पन्न नहीं होते हैं ॥ १३ ॥ १४ ॥

त्वचं चित्रकमूलस्य पिष्ट्वा कुम्भं प्रलेपयेत् ।
तक्रं वा दधि वा तत्र जातमर्शोहरं पिबेत् ॥ १५ ॥

पित्तश्लेष्मप्रशमनी कच्छूकण्डूरुजापहा।
गुदजान्नाशयत्याशु योजिता सगुडाऽभया ॥ १६ ॥

चीतेकी जडकी छालको पीसकर उसका एक घडेके भीतर लेप करके उस घडेमें मठा या दही भरकर पान करनेसे अर्शरोग दूर होता है। हरडका चूर्ण और गुड दोनोंको एकत्र मिलाकर सेवन करनेसे पित्त-कफजन्य विकार, कच्छू, कण्डू और अर्शरोग शीघ्र दूर होता हैं ॥ १५ ॥ १६ ॥

सगुडां पिप्पलीयुक्तामभयां घृतभर्जिताम्।
त्रिवृद्दन्तीयुतां वापि भक्षयेदानुलोमिकीम् ॥ १७ ॥

घीमें भूनीहुई हरडके चूर्ण और पीपलके चूर्ण अथवा निसोतके चूर्ण और दन्तीकी जडके चूर्णको गुडमें मिलाकर सेवन करनेसे वायुका अनुलोमन होता है ॥

तिलारुष्करसंयोगं भक्षयेदग्निवर्द्धनम्।
कुष्ठरोगहरं श्रेष्ठमर्शसां नाशनं परम् ॥ १८ ॥

काले तिल और भिलावेके चूर्णको समान भाग लेकर भक्षण करनेसे अग्निकी वृद्धि होती है। कुष्ट तथा अर्शरोग नष्ट होता है ॥ १८ ॥

गोमूत्राध्युषितां दद्यात् सगुडां वा हरीतकीम्।
पञ्चकोलयुतं वापि तक्रमस्मै प्रदापयेत् ॥ १९ ॥

रातको गोमूत्रमें हरडको भिगोकर दूसरे दिन प्रातःकाल पीसकर सेवन करनेसे अथवा पीपल, पीपलामूल, चव्य, चीता और सोंठ इनके चूर्णको मठेमें मिलाकर देनेसे अर्शरोग दूर होता है ॥ १९ ॥

मृल्लिप्तं सौरणं कन्दं पक्त्वाऽग्नौ पुटपाकवत्।
दद्यात् सतैललवणैर्दुर्नाम्नां विनिवृत्तये ॥ २० ॥

एक जिमीकन्दको लेकर इसके ऊपर अच्छे प्रकार मिट्टीका पुटपाककी विधिसे लेप करके अग्निमें पकावे। फिर उसको तिलके तैल और सैंधेनमकके साथ भूनकर सेवन करनेसे अर्शरोग दूर होता है ॥ २० ॥

स्विन्नं वार्त्ताकुफलं घोषायाः क्षारजेन सलिलेन।
तद्घृतभृष्टं युक्तं गुडेनातृप्तितो योऽत्ति ॥ २१ ॥
पिबति च तक्रं नूनं तस्याश्वेवातिबद्धगुदजानि।
यान्ति विनाशं पुंसां सहजान्यपि सप्तरात्रेण ॥ २२ ॥

तोरईके क्षारको छः गुने जलमें २१ बार छानकर फिर उस क्षारजलमे बैंगनको उत्तम प्रकारसे पकाकर फिर घीमें भून लेवे फिर उसमें कुछ पुराना

गुड मिलाकर जो अर्शरोगी भक्षण करे और ऊपरसे मट्ठा पीवे तो उसके अत्यन्त बढा हुआ सहज अर्शरोग सात दिनमें नष्ट होजाताहै ॥ २१ ॥ २२ ॥

चतुःपलं स्नुहीकाण्डं त्रिपलं लवणत्रयात् ।
वार्त्ताकुकुडवश्चार्कादष्टौ द्वे चित्रकात्पले ॥ २३ ॥
दग्ध्वा रसेन वार्त्ताकोर्गुडिका भोजनोत्तराः ।
भुक्त्वा भुक्तं पचत्याशु कासश्वासार्शसां हिता ॥
विषूचिकाप्रतिश्यायहृद्रोगशमनाश्च ताः ॥ २४ ॥

थूहरके वृक्षकी टहनी १६ तोले, काला नमक, सैंधानमक और चिरियासंचर नमक ये प्रत्येक ४ तोले, काले बैंगन १६ तोले, आककी जडकी छाल ३२ तोले और लालचीतेकी जड़ ८ तोले लेवे, सबको एकत्र दग्ध करके बैंगनके क्वाथमें खरल करके चनेके बराबर गोलियाँ बनालेवे । इनमेंसे भोजन करनेके पीछे एक एक गोली सेवन करनेसे खायाहुआ अन्न शीघ्र पच जाता है । ये गोलियाँ खाँसी, श्वास और अर्शरोगवालोंके लिये परम हितकारी हैं एवं विषूचिका, प्रतिश्याय और हृदयरोगको शमन करनेवाली हैं ॥ २३ ॥ २४ ॥

रक्तार्शश्चिकित्सा ।

रक्तार्शसामुपेक्षेत रक्तमादौ स्रवेद्भिषक् ।
दुष्टास्रे निगृहीते तु शूलानाहासृग्गदाः ॥ २५ ॥

रक्तज बवासीरकी चिकित्सा करते समय वैद्यको चाहिये कि, प्रथमही स्रवते हुये रुधिरको नहीं रोके । कारण-दूषित रक्तको रोकनेसे शूल, आनाह और रक्त सम्बन्धी अनेक रोग उत्पन्न होजाते हैं ॥ २५ ॥

शक्रकाथः सविश्वो वा किंवा बिल्वशलाटवः ।
योज्या रक्तार्शसैस्तद्वज्ज्योत्स्निकामूललेपनम् ॥ २६ ॥

इन्द्रजौका काथ सोंठका चूर्ण मिलाकर अथवा बेलगिरीका काथ सोंठका चूर्ण डालकर पान करनेसे किंवा तोरईकी जड़का लेप करनेसे रक्तार्शरोग दूर होता है ॥ २६ ॥

नवनीततिलाभ्यासात् केशरनवनीतशर्कराभ्यासात् ।
दधिसरमथिताभ्यासाद् गुदजाः शाम्यन्ति रक्तवहाः ॥ २७ ॥

नैनी घी (मक्खन), तिल या नागकेशर, मक्खन और मिश्री अथवा मलाई-सहित मथे हुए मट्ठेको कुछ दिनोंतक सेवन करनेसे रुधिरकी बवासीर नष्ट होती है ॥ २७ ॥

समङ्गोत्पलमोचाह्वतिरीटतिलचन्दनैः ।
छागक्षीरं प्रयोक्तव्यं गुदजे शोणितापहम् ॥ २८ ॥

लज्जावन्ती, नीलकमलकी जड़, मोचरस, लोध, काले तिल और लाल चन्दन इनके समान भाग मिश्रित कल्कके द्वारा सिद्ध कियाहुआ बकरीका दूध पान करनेसे रक्तज बवासीर दूर होता है ॥ २८ ॥

कोमलं नलिनीपत्रं पिष्ट्वा खादेत् सशर्करम् ।
प्रातराजं पयः पीत्वा रक्तस्रावाद्विमुच्यते ॥ २९ ॥

कमलनीके कोमल पत्तोंको पीसकर उसमें कुछ चीनी मिलाकर प्रतिदिन प्रातःकाल बकरीके दूधके साथ पान करनसे रक्तस्राव बन्द होता है ॥ २९ ॥

सशर्करं कृष्णतिलस्य कल्कं बास्तैः पयोभिः पिबति प्रभाते ।
सद्यो हरत्येव गुदोत्थरक्तं योगोऽयमित्थं गिरिशप्रयुक्तः ॥३०॥

काले तिलोंके कल्कको मिश्री मिलाकर बकरीके दूधके साथ प्रातःकाल सेवन करनेसे गुदासे रक्तका स्राव होना तत्काल दूर होता है ॥ ३० ॥

कौटजं कल्कमादाय पिष्ट्वा तक्रेण बुद्धिमान् ।
पीत्वा रक्तार्शसो रक्तस्रुतिमाशु नियच्छति ॥ ३१ ॥

कुडेकी छालके चूर्णको मठेके साथ पीसकर सेवन करनेसे रक्तज बवासीरमें रक्तका गिरना शीघ्र बन्द होता है ॥ ३१ ॥

तण्डुलसलिलोपेतं कल्कमपामार्गजं पिबतः ।
क्षीरमनुवाप्यभीरोर्गुदजाः शाम्यन्ति रक्तवहाः ॥
दाडिमस्य रसः पेयः शर्करामधुरीकृतः ॥ ३२ ॥

चिरचिटेके कल्कको चावलोंके पानीमें पीसकर पीनेसे अथवा शतावरके चूर्णको बकरीके दूधके साथ मिश्री डालकर अनारका रस पान करनेसे रक्तज बवासीर समूल नष्ट होते हैं ॥ ३२ ॥

कण्टकिफलान्तमुशलक्षारो गोरोचनाजलम् ।
लेपमात्रेण विस्राव्य रसान् हन्ति गुदाङ्कुरान् ॥ ३३ ॥

कटहलके फलके भीतरकी मूलके क्षारको गोरोचनके साथ जलमें पीसकर लेप करनेसे रक्तस्राव होकर रक्तज बवासीर नष्ट होती है ॥ ३३ ॥

भावितं रजनीचूर्णैः स्नुहीक्षीरे पुनः पुनः ।
बन्धनात् सुदृढं सूत्रं छिनत्त्यर्शो न संशयः ॥

थूहरके दूधमें हलदीके चूर्णको मिलाकर उसमें एक उत्तम और दृढ (मजबूत) सूतके धागेको वारवार भावना देवे फिर उस बवासीरके मस्सेको खूब कसकर बाँधनेसे मस्से शीघ्र ही कट पडते हैं ॥ ३४ ॥

लवणोत्तमादि चूर्ण ।

लवणोत्तमवह्निकलिङ्गयवाँ-
श्चिरबिल्वमहापिचुमर्दयुतान् ।
पिब सप्तदिनं मथिताल्लुलितान्
यदि मर्दितुमिच्छसि पायुरुहान् ॥ ३५ ॥

जो अर्शरोगको नष्ट करनेकी इच्छा है तो सैंधानमक, चीतेकी जड, इन्द्रजौ, दुर्गन्ध करञ्ज इनके समान भाग मिश्रित चूर्णको मट्ठेमें मिलाकर सात दिनतक सेवन करना चाहिये ॥ ३५ ॥

समशर्कराचूर्ण ।

शुण्ठीकणामरिचनागदलत्वगेलं
चूर्णीकृतं क्रमविवर्द्धितमूर्ध्वमन्त्यात् ।
खादेदिदं समसितं गुदजाग्निमान्द्य-
कासारुचिश्वसनकण्ठहृदामयेषु ॥ ३६ ॥

छोटी इलायची १ भाग; दालचीनी दो भाग, तेजपात तीन भाग, नागकेशर ४ भाग, काली मिरच ५ भाग, पीपल ६ भाग और सोंठ सात भाग सबको एकत्र मिलाकर बारीक चूर्ण करलेवे फिर समस्त चूर्णके बराबर मिश्री मिलाकर यथोचित मात्रासे सेवन करे। यह चूर्ण अर्श, मन्दाग्नि, खाँसी, अरुचि, श्वास एवं कण्ठ और हृदयके रोगोंमें विशेष हितकारी है ॥ ३६ ॥

व्योषादिचूर्ण ।

व्योषाग्न्यरुष्करविडङ्गतिलाभयानां
चूर्णं गुडेन सहितं तु सदोपयोज्यम् ।
दुर्नामकुष्ठगरशोफशकृद्विबन्ध-
मग्निर्जयत्यबलतां कृमिपाण्डुतां च ॥ ३७ ॥

सोंठ, पीपल, कालीमिरच, चीता, भिलावे, वायविडंग, तिल और हरड इनको समान भाग लेकर बारीक चूर्ण करलेवे फिर समस्त चूर्णकी बराबर गुड मिलाकर उपयुक्त मात्रासे प्रतिदिन सेवन करे तो बवासीर, कुष्ट, विषदोष, शोथ, मलविबन्ध, मन्दाग्नि, कृमि और पाण्डुप्रभृति विविध प्रकारके रोग नष्ट होते हैं ॥ २७ ॥

विजयचूर्ण ।

त्रिकत्रयवचाहिंगु पाठाक्षारनिशाद्वयम् ।
चव्यतिक्ताकलिङ्गाग्निशताह्वालवणानि च ॥ ३८ ॥
ग्रन्थिबिल्वाजमोदा च गणोऽष्टाविंशतिर्मतः ।
एतानि समभागानि श्लक्ष्णचूर्णानि कारयेत् ॥ ३९ ॥
ततो बिडालपदकं पिबेदुष्णेन वारिणा ।
एरण्डतैलयुक्तं तु सदा लिह्यात् ततो नरः ॥ ४० ॥

सोंठ, पीपल, मिरच, हरड, आमला, बहेडा, दालचीनी, इलायची, तेजपात, वच, हींग, पाढ, जवाखार, हल्दी, दारुहल्दी, चव्य, कुटकी, इन्द्रजौ, चीता, सौंफ, पाँचों नमक, पीपलामूल, बेलगिरी और अजमोद इन अट्ठाईस औषधियोंको समान भाग लेकर बारीक चूर्ण करलेवे फिर इसमेंसे प्रतिदिन एक तोला चूर्णको मन्दोष्ण जलके साथ अथवा अण्डीके तेलके साथ सेवन करे ॥ ३८–४० ॥

कासं हन्यात् तथा शोथमर्शांसि च भगन्दरम् ।
हृच्छूलं पार्श्वशूलं च वातगुल्मं तथोदरम् ॥ ४१ ॥
हिक्काश्वासप्रमेहांश्च कामलां पाण्डुरोगताम् ।
आमाशयमुदावर्त्तमन्त्रवृद्धिं गुदं कृमीन् ॥ ४२ ॥
अन्ये च ग्रहणीदोषा ये मया परिकीर्तिताः ।
महाज्वरोपसृष्टानां भूतोपहतचेतसाम् ॥ ४३ ॥
अप्रजानां तु नारीणां प्रजावर्द्धनमेव च ।
विजयो नाम चूर्णोऽयं कृष्णात्रेयेण पूजितः ॥ ४४ ॥

यह विजयनामवाला चूर्ण खाँसी, सूजन, बवासीर, भगन्दर, हृदयका शूल, पसलीका शूल, वातगुल्म, उदररोग, हिचकी, श्वास, प्रमेह, कामला, पाण्डुरोग, आमाशयके रोग, उदावर्त्त, अन्त्रवृद्धि, गुदाके विकार, कृमिरोग, संग्रहणी आदि जो अन्यान्य रोग मैंने कहे हैं उन सबको नष्ट करता है एवं महाज्वर और भूतबाधाको दूर करता है तथा वन्ध्या स्त्रियोंको सन्तानके देनेवाला यह चूर्ण कृष्णात्रेय ऋषि करके पूजित है ॥ ४१–४४ ॥

शूरणपिण्डी ।

चूर्णीकृताः षोडश शूरणस्य भागास्ततोऽर्द्धेन च चित्रकस्य ।
महौषधाद्वौ मरिचस्य चैको गुडेन दुर्नामजयाय पिण्डी ॥
"पिण्ड्यां गुडो मोदकवत् पिण्डत्वापत्तिकारकः" ॥ ४५ ॥

जिमीकंदका चूर्ण १६ भाग, लालचीतेकी जडका चूर्ण ८ भाग, सोंठका चूर्ण दो भाग और समस्त चूर्णकी बराबर गुड लेवे सबको एकत्र मिलाकर पिण्डी अर्थात् छोटे २ लड्डू बनालेवे। यह पिण्डी सर्व प्रकारकी बवासीरको नष्ट करनेके लिये अत्युत्तम औषध है। इसको उपयुक्त मात्रासे सेवन करे ॥ ४५ ॥

भल्लातकादिमोदक ।

भल्लातकं तिलं पथ्या चूर्णं गुडसमन्वितम् ।
मोदकं भक्षयेत् कर्षं मासात् पित्तार्शसां जयेत् ॥ ४६ ॥

भिलावे, तिल और हरड इनका चूर्ण समान भाग और समस्त चूर्णसे दुगुना गुड लेवे। सबको एकत्र मिलाकर एकएक कर्ष प्रमाणके मोदक बनालेवे। इन मोदकोंको एक मासपर्यन्त सेवन करनेसे पित्तज बवासीर दूर होती है ॥ ४६ ॥

नागरादिमोदक ।

सनागरारुष्करवृद्धदारकं गुडेन यो मोदकमत्त्युदारकम् ।
अशेषदुर्नामकरोगदारकं करोति वृद्धं सहसैव दारकम् ॥
" चूर्णे चूर्णसमो देयो मोदके द्विगुणो गुडः " ॥ ४७ ॥

सोंठ, शुद्ध भिलावेके अभावमें लालचन्दन और विधारा इन सबके समान भाग चूर्णमें समस्त चूर्णकी बराबर गुड मिलावे और मोदक बनाने हों तो उसमें दुगुन गुड डालकर लड्डू बनालेवे। इस औषधिके सेवन करनेसे सर्व प्रकारकी दारुण बवासीर शीघ्र ही नष्ट होती है। यह मोदक वृद्ध पुरुषको युवा करदेता है ॥ ४७ ॥

स्वल्पशूरणमोदक ।

मरिचमहौषधचित्रकशूरणभागा यथोत्तरं द्विगुणाः ।
सर्वसमो गुडभागः सेव्योऽयं मोदकः सिद्धफलः ॥४८॥
ज्वलनं ज्वालयति जाठरमुन्मूलयति गुल्मशूलगदान् ।
निःशेषयति श्लीपदमवश्यमर्शांसि नाशयत्याशु ॥४९॥

कालीमिरचोंका चूर्ण एक भाग, सोंठका चूर्ण २ भाग, चीतेकी जडका चूर्ण ४ भाग, जिमीकंदका चूर्ण ८ भाग और सब चूर्णकी बराबर गुड लेवे. सबको यथाविधि एकत्र मिलाकर लडडू बनालेवे। ये मोदक तत्काल सिद्ध फलके देनेवाले हैं एवं अग्निको दीपन करते हैं। उदररोग, गुल्म और शूलादि रोगोंको जडसे उखाड देते हैं और श्लीपद तथा अर्शरोगको निस्सन्देह तत्काल नष्ट करते हैं ॥ ४८ ॥ ४९ ॥

बृहच्छूरणमोदक।

शूरणषोडशभागा वह्नेरष्टौ महौषधस्यातः।
अर्द्धेन भागयुक्तिर्मरिचस्य च ततोऽपिचार्द्धेन ॥ ९० ॥
त्रिफला कणा समूला तालीशारुष्करकृमिघ्नानाम्।
भागा महौषधसमा दहनांशा तालमूली च ॥ ९१ ॥
भागः शूरणतुल्यो दातव्यो वृद्धदारकस्यापि।
भृङ्गैले मरिचांशे सर्वाण्येकत्र संचूर्ण्य ॥ ९२ ॥
द्विगुणेन गुडेन युतः सेव्योऽयं मोदकः प्रकामघनैः।
गुरुवृष्यभोज्यरहितेष्वितरेषूपद्रवं कुर्यात् ॥ ९३ ॥

जिमीकन्दका चूर्ण १६ तोले, चीतेकी जडका चूर्ण ८ तोले, सोंठका चूर्ण ४ तोले मिरचोंका चूर्ण २ तोले एवं हरड, आमला, बहेडा, पीपल, पीपलामूल, तालीसपत्र शुद्ध भिलावे और वायविडंग इन प्रत्यकेका चूर्ण चार चार तोले, मुशलीका चूर्ण ८ तोले, विधारेका चूर्ण १६ तोले, दालचीनी और छोटी इलायची प्रत्येकका चूर्ण दो दो तोले, सबको एकत्र खूब बारीक पीसकर दुगुना पुराना गुड मिलाकर तैयार करलेवें। ये मोदक काम और धनकी इच्छा करनेवाले पुरुषोंको सेवन करने चाहिये। किन्तु जो मनुष्य इन मोदकोंको सेवन करके इनपर भारी और वृष्य पदार्थ नहीं खाते हैं, उनके ये मोदक अनेक प्रकारके उपद्रवोंको उत्पन्न करदेते हैं ॥ ९०–९३ ॥

भस्मकमनेन जनितं पूर्वमगस्त्यस्य योगराजेन।
भीमस्य मारुतेरपि तौ येन महाशनौ जातौ ॥ ९४ ॥
अग्निबलवृद्धिहेतुः स केवलं शूरणो महावीर्यः।
प्रभवति शस्त्रक्षाराग्निभिर्विनाप्यर्शसामेषः ॥ ९५ ॥
श्वयथुश्लीपदजिद्ग्रहणीमपि कफवातसम्भूताम्।
नाशयति वलीपलितं मेधां कुरुते वृषत्वं च ॥ ९६ ॥
हिक्कां श्वास कासं सराजयक्ष्मप्रमेहांश्च।
प्लीहानं चाथोग्रं हन्ति च रसायनं पुंसाम् ॥ ९७ ॥

इसी योगराजके प्रभावसे पूर्वकालमें अगस्त्यऋषिके और भीमसेनके भस्माग्नि उत्पन्न होगयी थी, जिससे वे दोनों अधिक भोजन करते थे। इसमें अग्निके बलको बढानेवाला अत्युग्र वीर्यवान् केवल एक जिमीकन्द ही है। यह प्रयोग शस्त्र, क्षार और अग्निक्रियाके विनाही अर्शरोगको दूर करता है। एवं सूजन, श्लीपद, कफ-वातजन्य ग्रहणी, वली-पलितरोग, हिचकी, श्वास, खांसी, राजयक्ष्मा, प्रमेह और अत्युग्र प्लीहा इन सब व्याधियोंको शीघ्र नष्ट करता है तथा बुद्धिको तीव्र करता है मनुष्योंके लिये वृष्य और उत्तम रसायन है ॥ ५४ ॥ ५७ ॥

काङ्कायनमोदक ।

श्पयापञ्चपलानेकमजाज्या मरिचस्य च ।
पिप्पलीपिप्पलीमूलचव्यचित्रकनागराः ॥ ५८ ॥
पलाभिवृद्धाः क्रमशो यवक्षारपलद्वयम् ।
भल्लातकपलान्यष्टौ कन्दस्तु द्विगुणो मतः ॥ ५९ ॥
द्विगुणेन गुडेनैषां वटकानक्षसम्मितान् ।
कृत्वैन भक्षयेत् प्रातस्तक्रमम्भोऽनु वा पिबेत् ॥ ६० ॥
मन्दाग्निं दीपयत्येष ग्रहणीपाण्डुरोगनुत् ।
काङ्कायनेन शिष्येभ्यः शस्त्रक्षाराग्निभिर्विना ॥
भिषग्जितमिति प्रोक्तं श्रेष्ठमर्शोविकारिणाम् ॥ ६१ ॥

हरड २० तोले, जीरा, कालीमिरच और पीपल ये प्रत्येक एक एक पल, एवं पीपलामूल २ पल, चव्य ३ पल, चीतेकी जड ४ पल, सोंठ ५ पल, जवाखार २ पल, शुद्ध भिलावे आठ पल, जिमीकन्द १६ पल और सब औषधियोंसे दुगुना पुराना गुड लेवे। सबको एकत्र कूटपीसकर एक तोलेके बडे बनालेवे । इनमेंसे प्रतिदिन प्रातःकाल एक एक बडा खाय और ऊपरसे मठा अथवा शीतल जल पान करे तो यह बडे मन्दाग्निको दीपन करते हैं। एवं ग्रहणी, पाण्डुरोग आदि विविध रोगोंको नष्ट करते हैं। क्षार और अग्निक्रियाके विनाही इस कांकायन मोदकके द्वारा अर्शरोगको जीते। यह मोदक कांकायन ऋषिने अपने शिष्योंसे वर्णन किये हैं अर्शरोगियोंके लिये विशेषहितकारी है ॥ ५८-६१ ॥

माणिभद्रमोदक ।

विडङ्गसारामलकाभयानां पलं पलं स्यात्त्रिवृतात्रयं च ।
गुडस्य षड्द्वादशभागयुक्ता मासेन त्रिंशद्गुटिका विधेयाः ॥६२॥

निवारणे यक्षवरेण सृष्टः स माणिभद्रः किल शाक्यभिक्षवे ।
अयं हि कासक्षयकुष्ठनाशनो भगन्दरप्लीहजलोदरार्शसाम् ॥
यथेष्टचेष्टान्नविहारसेवी ह्यनेन वृद्धस्तरुणो भवेच्च ॥ ६३ ॥

वायविडंगसार, आमले और हरड प्रत्येक चार चार तोले एवं निसोत १२ तोले और पुराना गुड़ २४ तोले सबको विधिपूर्वक मिलाकर ३० गोलियाँ बनालेवे फिर एक मासपर्यन्त प्रतिदिन छः छः माशेकी एक एक गोली सेवन करे। इन मोदकोंको माणिभद्रनामवाले यक्षने शाक्यमुनिके अर्शको निवारण करनेके लिये बनाया था। ये मोदक खाँसी, श्वास, क्षय, कुष्ट, भगन्दर, जलोदर, बवासीर प्रभृति नानाप्रकारके रोगोंको नष्ट करते हैं। इसका सेवन करते समय यथेच्छ आहार विहार करना चाहिये। इस औषधिको सेवन करनेसे वृद्ध पुरुष भी तरुण होजाता है ॥६२॥६३॥

प्राणदा गुटिका ।

त्रिपलं शृङ्गवेरस्य चतुर्थं मरिचस्य च ।
पिप्पल्याः कुडवार्द्धं च चव्यं च पलमेव च ॥ ६४ ॥
तालीशपत्रस्य पलं पलार्द्धं केशरस्य च ।
द्वे पले पिप्पलीमूलादर्द्धकर्षं च पत्रकात् ॥ ६५ ॥
सूक्ष्मैला कर्षमेकं च कर्षं च त्वङ्मृणालयोः ।
गुडात् पलानि त्रिंशच्च चूर्णमेकत्र कारयेत् ॥ ६६ ॥
अक्षप्रमाणा गुटिका प्राणदेति प्रकीर्त्तिता ।
पूर्वं भक्ष्या च पश्चाच्च भोजनस्य यथाबलम् ॥
मद्यं मांसरस यूषं क्षीरं तोयं पिबेदनु ॥ ६७ ॥

सोंठ १२ तोले, काली मिरच १६ तोले, पीपल ८ तोले, चव्य ४ तोले, तालीसपत्र ४ तोले, नागकेशर २ तोले, पीपलामूल ८ तोले, तेजपात ८ मासे छोटी इलायची १६ मासे, दालचीनी १६ मासे, खस १६ मासे और पुराना गुड डेढसेर सबको एकत्र कूट पीसकर और गुडमें मिलाकर एक एक तोलेकी गोलियाँ बनालेवे, इसको प्राणदा गुटिका कहते हैं। इस बटीको जठराग्निका बलाबल विचारकर भोजनके पहले या पीछे सेवन करे और मदिरा, मांसरस, यूष, दूध और जल इनका अनुपान करे ॥ ६४-६७ ॥

हन्यादर्शांसि सर्वाणि सहजान्यसृजान्यपि।
वातपित्तकफोत्थानि सन्निपातोद्भवानि च ॥ ६८ ॥
पानात्यये मूत्रकृच्छ्रे वातरोगे गलग्रहे।
विषमज्वरे च मन्देऽग्नौ पाण्डुरोगे तथैव च ॥ ६९ ॥
कृमिहृद्रोगिणां चैव गुल्मशूलार्त्तिनां तथा।
श्वासकासपरीतानामेषा स्यादमृतोपमा ॥ ७० ॥
शुण्ठ्याः स्थानेऽभया देया विड्ग्रहे पित्तपायुजे।
प्राणदायाः सिता देया चूर्णमानाच्चतुर्गुणाः ॥ ७१ ॥

यह गुटिका सहज बवासीर, रक्तकी बवासीर आदि सर्वप्रकारकी बवासीर एवं वात-पित्त-कफसे उत्पन्न हुए रोग तथा सन्निपातजन्य रोग एवं अन्यान्य सब प्रकारके विकारोंमें अमृतकी समान हितकारी है इस वटीको मलविबन्धमें सोंठकी जगह हरड डालकर देवे और पित्तकी बवासीरमें गुडकी जगह सब औषधियोंके चूर्णसे चौगुनी मिश्री डालकर देवे ॥ ६८-७१ ॥

अम्लपित्ताग्निमान्द्यादौ प्रयोज्यं गुदजातुरे।
अनुपानं प्रयोक्तव्यं व्याधौ श्लेष्मभवे पलम् ॥
पलद्वयं त्वनिलजे पित्तजे तु पलत्रयम् ॥ ७२ ॥
पक्त्वैनं गुडिकाः कार्या गुडेन सितयाऽथवा।
परं हि वह्निसंसर्गाल्लघिमानं भजन्ति ताः ७३ ॥

इस प्राणदा गुटिकाको अम्लपित्त मन्दाग्नि और बवासीरमें प्रयोग करे। इसपर कफके रोगोंमें चार तोले, वातरोगोंमें ८ तोले और पित्तके रोगोंमें १२ तोले अनुपानके द्रव्योंका सेवन करे। यह प्राणदा गुटिका गुडके साथ अथवा मिश्रीके साथ पकाकर भी सिद्ध की जासकती है। इस प्रकार सिद्ध की हुई वे गोलियाँ अग्निके संसर्गसे अत्यन्त हल्की होजाती हैं ॥ ७२ ॥ ७३ ॥

नागार्जुनयोग।

त्रिफला पञ्चलवणं कुष्ठं कटुकरोहिणी।
देवदारुविडङ्गानि पिचुमर्दफलानि च ॥ ७४ ॥
बला चातिबला चैव हरिद्रे द्वे सुवर्चला।
एतत् सम्भृतसम्भावं करञ्जत्वग्रसेन च ॥ ७५ ॥

पिष्ट्वा च गुडिकां कृत्वा बदरास्थिसमां बुधः।
एकैकां तां समुद्धृत्य रोगे रोगे पृथक् पृथक् ॥ ७६ ॥

हरड, आमला, बहेडा, सैंधानमक, विरियासंचरनमक, समुद्रनमक, सांभर, कालानमक, कूठ, कुटकी, देवदारु, वायविडङ्ग, नीमके फल (निबौली), खिरेंटी, हल्दी, दारुहल्दी और दुलदुल इन सबको समान भाग लेकर बारीक चूर्ण करलेवे। फिर उस चूर्णको करंजकी छालके काथमें खरल करके बेरकी गुठलीकी बराबर गोलियाँ बनालेवे। इन गोलियोंमसे एक एक गोली पृथक् २ रोगोंमें अलग २ अनुपानोंके साथ सेवन करनी चाहिये ॥ ७५–७६ ॥

उष्णेन वारिणा पीता शान्तमग्निं प्रदीपयेत्।
अर्शांसि हन्ति तक्रेण गुल्ममम्लेन निर्हरेत् ॥ ७७ ॥
जन्तुदष्टं तु तोयेन त्वग्दोषं खदिराम्बुना।
मूत्रकृच्छ्रं तु तोयेन हृद्रोगे तैलसंयुता।
इन्द्रस्वरससंयुक्ता सर्वज्वरविनाशिनी ॥ ७८ ॥
मातुलुङ्गरसेनाथ सद्यः शूलहरी स्मृता।
कपित्थतिन्दुकानां तु रसेन सह मिश्रिता ॥
विषाणि हन्ति सर्वाणि पानाशनप्रयोगतः ॥ ७९ ॥
गोशकृद्रससंयुक्ता हन्यात् कुष्ठानि सर्वशः।
श्यामाकषायसहिता जलोदरविनाशिनी ॥ ८० ॥
भक्तच्छन्दं जनयति भुक्तस्योपरि भक्षिता।
अक्षिरोगेषु सर्वेषु मधुना घृष्य चाञ्जयेत् ॥ ८१ ॥
लेहमात्रेण नारीणां सद्यः प्रदरनाशिनी।
व्यवहारे तथा द्यूते संग्रामे मृगयादिषु ॥
समालभ्य नरो ह्येनां क्षिप्रं विजयमाप्नुयात् ॥ ८२ ॥

यह वटी गरम जलके साथ सेवन करनेसे मन्दाग्निको दीपन करती है। एवं मठेके साथ सेवन करनेसे सर्व प्रकारकी बवासीर और काँजीके साथ सेवन करनेसे गुल्मरोग, शीतल जलके साथ खानेसे विषैले जीवोंका काटा हुआ विष, खैरके काढेके साथ खानेसे त्वचाके रोग, जलके साथ सेवन करनेसे मूत्रकृच्छ्र, तिलके तेलके साथ सेवन करनेसे हृदयरोग, वर्षाके जलके साथ प्रयोग कर-

नेसे सर्वप्रकारके ज्वर, बिजौरे नींबूके रसके साथ देनेसे समस्त शूलरोग एवं कैथ और तेन्दूके रसके साथ सेवन करनेसे सब प्रकारके विषोंको तत्काल नष्ट करती है । एवं गोबरके रसके साथ सेवन करनेसे सर्वप्रकारके कुष्ठरोग और निसोतके क्वाथके साथ सेवन करनेसे जलोदररोगको दूर करती है । भोजनके पश्चात् इसको भक्षण करनेसे अरुचि दूर होकर रुचि उत्पन्न होती है । सर्वप्रकारके नेत्ररोगोंमें शहदके साथ घिसकर आँखोंमें आँजनेसे शीघ्र लाभ होता है । यह वटी शहदमें मिलाकर चाटनेसे स्त्रियोंके प्रदररोगको तत्काल नष्ट करती है । जो पुरुष न्यायालय, जुआ, संग्राम और शिकार खेलनेके समय इस वटीको लेकर जाता है, वह शीघ्रही विजय पाता है ॥ ७७–८२ ॥

कुटजलेह ।

कुटजत्वक्पलशतं जलद्रोणे विपाचयेत् ।
अष्टभागावशिष्टं तु कषायमवतारयेत् ॥ ८३ ॥
वस्त्रपूतं पुनः क्वाथं पचेल्लेहत्वमागतम् ।
भल्लातकं विडङ्गानि त्रिकटु त्रिफला तथा ॥ ८४ ॥
रसाञ्जनं चित्रकं च कुटजस्य फलानि च ।
वचामतिविषां बिल्वं प्रत्येकं च पलं पलम् ॥ ८५ ॥
गुडात् पलानि त्रिंशच्च चूर्णीकृत्य विनिक्षिपेत् ।
मधुनः कुडवं दद्याद् घृतस्य कुडवं तथा ॥ ८६ ॥

कुडेकी जडकी छालको सौ पल लेकर एक द्रोण जलमें पकावे । जब पककर आठवाँ भाग जल शेष रहजाय तब उतारकर वस्त्रमें छान लेवे । फिर उस क्वाथको दुबारा पकावे । जब पकते २ लेहकी समान गाढा होजाय तब नीचे उतारकर उसमें शुद्ध भिलावे, बायविडङ्ग, सोंठ, पीपल, मिरच, हरड, आमला, बहेडा, रसौंत, चीतेकी जड, इन्द्रजौ, वच, अतीस, बेलगिरी इन प्रत्येकका चूर्ण चार चार तोले एवं गुड ३० पल, शहद १६ तोले और घी १६ तोले डालकर सबको एकमएक कर देवे ॥ ८३–८६ ॥

एष लेहः शमयति चार्शो रक्तसमुद्भवम् ।
वातिकं पैत्तिकं चापि श्लैष्मिकं सान्निपातिकम् ॥८७॥
ये च दुर्नामजा रोगास्तान् सर्वान्नाशयत्यपि ।
अम्लपित्तमतीसारं पाण्डुरोगमरोचकम् ॥ ८८ ॥

ग्रहणीमार्दवं कार्श्यं श्वयथुं कामलामपि ।
अनुपानं घृतं दद्यान्मधु तक्रं जलं पयः ॥
रोगानीकविनाशाय कौटजो लेह उत्तमः ॥ ८९ ॥

यह लेह रुधिरकी बवासीर एवं वात पित्त और कफ इन प्रत्येकसे उत्पन्न हुई अथवा त्रिदोषोत्पन्न बवासीर तथा अन्यान्य सर्वप्रकारकी जो दुस्तर व्याधियाँ उन सबको तथा अम्लपित्त, अतिसार, पाण्डुरोग, अरुचि, ग्रहणीकी मृदुता, कृशता, सूजन और कामलारोगको तत्काल नष्ट करता है । इसपर घृत, शहद, मट्ठा, जल और दूध इन पदार्थोंका अनुपान करना चाहिये । यह कुटज अवलेह रोगसमूहको नष्ट करनेके लिये सर्वश्रेष्ठ है ॥ ८७-८९ ॥

कुटजरसक्रिया ।

कुटजत्वचो विपाच्यं शतपलमार्द्रं महेन्द्रसलिलेन ।
यावत् सान्द्ररसं तद् द्रव्यं स्वरसस्ततो ग्राह्यः ॥ ९० ॥
मोचरसः ससमङ्गा फलिनी च पलांशिभिस्त्रिभिस्तैश्च ।
वत्सकबीजं तुल्यं चूर्णीकृतमत्र दातव्यम् ॥ ९१ ॥
पूतोत्कथितः सान्द्रः सरसो दर्वीप्रलेपनो ग्राह्यः ।
मात्रा कालोपहिता रसक्रियैषा जयत्यसृक्स्रावम् ॥ ९२ ॥
छगलीपयसा युक्ता पेया मण्डेन वा यथाऽग्निबलम् ।
जीर्णौषधश्च शालीन् पयसा च्छागस्य भुञ्जीत ॥ ९३ ॥
रक्तार्शांस्यतिसारं शूलं सासृग्जो निहन्त्याशु ।
बलवच्च रक्तपित्तं रसक्रियैषा ह्युभयभागम् ॥ ९४ ॥

गीली कुडेकी छालको सौ पल लेकर वर्षाके एक द्रोण जलमें पकावे । जब पकते २ जल गाढा होजाय तब उसको नीचे उतार छानकर रस निकाले फिर उस रसमें मोचरस, लज्जावन्ती और फूलप्रियंगु इन प्रत्येकका चूर्ण ४-४ तोले और इन्द्रजौका चूर्ण १२ तोले मिलाकर पकावे जब पकते २ गाढा होजाय और करछीसे लगने लगे तब उसको नीचे उतार लेवे । फिर इस रसक्रियामात्राको समयानुसार निर्द्धारितकर और अपनी अग्निके बलाबल विचारकर बकरीके दूध अथवा मांडके साथ सेवन करे तो यह कुटज रसक्रिया तत्काल रक्तस्रावको बन्द करती है । इस औषधिके जीर्ण होजानेपर बकरीके दूधके साथ शालिधानोंके चावलोंका भात खावे । यह औषधि रक्तज बवासीर,

रक्तका अतिसार, शूल, सर्व प्रकारके रुधिरके विकार और ऊर्ध्व व अधः इन दोनों मार्गोंसे बहनेवाले बलवान् रक्त-पित्तको शीघ्र नष्ट करती है ॥ ९०-९४ ॥

दशमूल-गुड़ ।

दशमूलाग्निदन्तीनां प्रत्येकं पलपञ्चकम् ।
जलद्रोणेन संक्वाथ्य पादशेषे समुद्धरेत् ॥ ९५ ॥
गुडं पलशतं चैव सिद्धे शीते विमिश्रयेत् ।
त्रिवृताया रजः प्रस्थस्तदर्द्धं पिप्पलीरजः ॥ ९६ ॥
घृतभाण्डे स्थितं खादेत् कर्षमात्रं दिनेदिने ।
दशमूलगुडः ख्यातः शमयेद्रोगमार्शसम् ॥
अजीर्णं पाण्डुरोगं च सर्वरोगहरं परम् ॥ ८७ ॥

दशमूलकी सब औषधियाँ, चीतेकी जड और दन्तीकी जड प्रत्येक औषध २०-२० तोले लेकर एक द्रोण जलमें पकावे जब पकते २ चौथाई भाग जल शेष रहजाय तब उतारकर छानलेवे फिर उसमें १०० पल गुड डालकर दूसरी बार पकावे उत्तम प्रकारसे पाक होजानेपर नीचे उतारलेवे शीतल होनेपर उसमें निसोतका चूर्ण १ प्रस्थ और पीपलका चूर्ण आधा प्रस्थ मिलाकर घीके चिकने बासनमें भरकर रखदेवे । इसमेंसे प्रतिदिन एक एक कर्ष प्रमाण सेवन करे तो यह दशमूल-नामवाला गुड सर्व प्रकारकी बवासीर, अजीर्ण, पाण्डुरोग एवं अन्यान्य सम्पूर्ण रोगोंको दूर करता है ॥ ९५-९७ ॥

बाहुशाल गुड ।

त्रिवृत्तेजोवती दन्ती श्वदंष्ट्रा चित्रकं शठी ।
गवाक्षी मुस्तबिल्वाह्वविडङ्गानि हरीतकी ॥ ९८ ॥
पलोन्मितानि चैतानि पलान्यष्टावरुष्करात् ।
षट्पलं वृद्धदारस्य शूरणस्य तु षोडश ॥ ९९ ॥
जलद्रोणद्वये क्वाथ्यं चतुर्भागावशेषितम् ।
पूतं तु तं रसं भूयः क्वाथेभ्यस्त्रिगुणो गुडः ॥ १०० ॥
लेहं पचेत्तु तं तावद् यावद्दर्वीप्रलेपनम् ।
अवतार्य ततः पश्चाच्चूर्णानीमानि दापयेत् ॥ १ ॥

त्रिवृत्तेजोवतीकन्दचित्रकान् द्विपलांशिकान् ।
एलात्वङ्मरिचं चापि गजाह्वां चापि षट्पलाम् ॥ २ ॥
द्वात्रिंशत्पलमेवात्र चूर्णं दत्त्वा निधापयेत् ।
ततो मात्रां प्रयुञ्जीत जीर्णे क्षीररसाशनः ॥ ३ ॥

निसोत, चव्य, दन्ती, गोखरू, चीतेकी जड, कचूर, इन्द्रायन, नागरमोथा, बेलगिरी, वायविडङ्ग और हरड ये प्रत्येक ४-४ तोले, मिलावे ३२ तोले, विधारेकी जड २५ तोले और जिमीकन्द ६४ तोले लेवे। इन सबको एकत्रकर दो द्रोण ५१२ पल परिमाण जलमें पकावे। जब पकते २ चौथाई भाग जल शेष रहजाय तब उतारकर छान लेवे। फिर इस क्वाथमें क्वाथसे तिगुना पुराना गुड मिलाकर मन्दमन्द अग्निसे पकावे। जब पकते पकते करछीसे समस्त लेह चिपकने लगे तब नीचे उतारकर उसमें निसोत, चव्य, जिमीकन्द और चीतेकी जड इन प्रत्येकका चूर्ण ८८ तोले एवं छोटी इलायची, दालचीनी, कालीमिरच और गजपीपल प्रत्येकका चूर्ण २५-२५ तोले लेकर मिलादेवे (उक्त औषधियोंकी मात्रा निश्चितकर दीगई है तथापि "द्वात्रिंशत्पलम्" यह पद जो कहा गया है वह कहीं कहीं व्यवधान रहित निर्देश करनेपर भी प्रत्येक औषध समभाग नहीं है यह बतलानेके लिये है ।) फिर अपनी शक्तिके अनुसार मात्रा निर्द्धारित करके सेवन करे औषधके जीर्ण होनेपर दूध और मांसरस भक्षण करे ॥ ९८-१०३ ॥

पञ्च गुल्मान् प्रमेहांश्च पाण्डुरोगं हलीमकम् ।
जयेदर्शांसि सर्वाणि तथा सर्वोदराणि च ॥ ४ ॥
दीपयेद् ग्रहणीं मन्दां यक्ष्माणं चापकर्षति ।
पीनसे च प्रतिश्याये आढ्यवाते तथैव च ॥ ५ ॥
अयं सर्वगदेष्वेव कल्याणो लेह उत्तमः ।
दुर्नामारिरयं चाशु दृष्टो वारसहस्रशः ॥ ६ ॥
भवन्त्येनं प्रयुञ्जानाः शतवर्षं निरामयाः ।
आयुषो दैर्घ्यजननो वलीपलितनाशनः ॥ ७ ॥
रसायनवरश्चैव मेधाजनन उत्तमः ।
गुडः श्रीबाहुशालोऽयं दुर्नामारिः प्रकीर्त्तितः ॥ ८ ॥

"तोयपूर्णे यदा पात्रे क्षिप्तो न प्लवते गुडः ।
क्षिप्तश्च निश्चलस्तिष्ठेत् पतितस्तु न शीर्यते ॥ ९ ॥
यदा दर्वीप्रलेपः स्याद्यावद्वा तन्तुली भवेत् ।
एष पाको गुडादीनां सर्वेषां परिकीर्त्तितः ॥ ११० ॥
सुखमर्द्दः खरस्पर्शो गन्धवर्णसमन्वितः ।
पीडितो भजते मुद्रां गुडः पाकमुपागतः" ॥ १११ ॥

यह गुड पाँचों प्रकारके गुल्म, प्रमेह, पाण्डुरोग, हलीमक, सर्वप्रकारके अतिसार, सम्पूर्ण उदररोग, संग्रहणी, मन्दाग्नि, राजयक्ष्मा, पीनस, प्रतिश्याय, आढ्यवात और अन्यान्य सर्वप्रकारके विकारोंमें हित करनेवाला है और यह बवासीरको तत्काल नष्ट करता है। यह हजारोंवार परीक्षा करके देखा है। इसको सेवन करनेवाले मनुष्य आरोग्य होकर सौ वर्षतक जीते हैं। यह आयुको बढानेवाला, वली-पलितरोगनाशक, श्रेष्ठ रसायन और उत्तम मेधाजनक औषध है। यह श्रीबाहु-शालगुड बवासीरका शत्रु कहा गया है। "जब जलसे भरेहुए पात्रमें गुड डालनेपर तैरता न रहै अथवा जलमें नीचे न बैठे और फैले भी नहीं वा करछीसे चिपकने लगे किंवा अँगुलीपर लेकर बटनेसे तारसे छूटने लगे और जिस समय गुडको सहज २ मर्दन अथवा स्पर्श करे एवं अँगुलीसे मसले उस समय यदि गुडके ऊपर अंगुलीके निशान पडजायँ और गुडमें उपयुक्त गन्ध, वर्ण एवं रस हो तब गुडपाक हुआ जानना चाहिये। यह समस्त गुडपाकोंकी विधि कहीगई है" ॥ १०४-१११॥

गुडभल्लातक ।

भल्लातकसहस्रे द्वे जलद्रोणे विपाचयेत् ।
पादशेषे रसे तस्मिन् पचेद् गुडतुलां भिषक् ॥ १२ ॥
भल्लातकसहस्रार्द्धं छित्त्वा तत्र प्रदापयेत् ।
सिद्धेऽस्मिंस्त्रिफलाव्योषयमानीमुस्तसैन्धवम् ॥ १३ ॥
कर्षांशसम्मितं दद्यात् त्वगेलापत्रकेशरम् ।
खादेदग्निबलापेक्षी प्रातरुत्थाय मानवः ॥ १४ ॥
कुष्ठार्शःकामलामेहग्रहणीगुल्मपाण्डुताः ।
हन्यात् प्लीहोदरं कासकृमिरोगभगन्दरान् ॥
गुडभल्लातको ह्येष श्रेष्ठश्चार्शोविकारिणाम् ॥ १५ ॥

शुद्ध किये हुए २००० भिलावोंको लेकर १ द्रोण जलमें पकावें जब पकते २ चतुर्थांश जल शेष रहजाय तब उतार कर छानलेवे फिर उस रसमें गुड १०० पल और टुकडे किये हुए ९०० भिलावे डालकर पकावे। जब पाक अच्छे प्रकारसे सिद्ध होजाय तब त्रिफला, त्रिकुटा अजवायन, नागरमोथा, सैंधानमक, दालचीनी छोटी इलायची, तेजपात और नागकेसर ये प्रत्येक औषधि एक एक कर्ष प्रमाण बारीक पीसकर मिलादेवे। इसमेंसे प्रतिदिन प्रातःकाल अपनी अग्निके बलानुसार सेवन करे। इससे कुष्ठ, अर्श, कामला, प्रमेह ग्रहणी, गुल्म, पाण्डुता, खाँसी, कृमि-रोग, भगन्दर, प्लीहा, और उदरविकार ये सब रोग नष्ट होते हैं। यह गुडभल्लातक बवासीरके रोगियोंकी एकमात्र उत्तम औषधि है ॥ १२-१५ ॥

अन्य-गुडभल्लातक ।

दशमूलाऽमृता भार्ङ्गी श्वदंष्ट्रा चित्रकं शठी ।
भल्लातकसहस्रं च पलांशं क्राथयेद् बुधः ॥ १६ ॥
पादशेषे जलद्रोणे रसे तस्मिन् विपाचयेत ।
दत्त्वा गुडतुलामेकां लेहीभूतं समुद्धरेत् ॥ १७ ॥
माक्षिकं पिप्पलीं तैलमौरुबूकं च दापयेत ।
कुडवं कुडवं चात्र त्वगेला मरिचस्तथा ॥ १८ ॥
अर्शः कासमुदावर्त्तं पाण्डुत्वं शोथमेव च ।
नाशयेद्वह्निसादं च गुडभल्लातकः स्मृतः ॥ १९ ॥

दशमूल, गिलोय, भारंगी, गोखुरू, चीतेकी जड और कचूर प्रत्येक चार चार तोले एवं शुद्ध भिलावे एक हजार ले .वको एकत्र मिलाकर एक द्रोण जलमें पकावे जब चौथाई भाग जल शेष रहजाय तब उतारकर छानलेवे फिर इस क्वाथमें अण्डीका तेल एक कुडव और पुराना गुड सौ पल डालकर फिर पाक करें। जब पककर लेहकी समान होजाय तब नीचे उतारकर उसमें पीपल, दालचीनी, छोटी इलायची और काली मिरच ये चारों एक कुडव और शीतल होनेपर शहद एक कुडव परिमाण मिलादेवे। यह गुडभल्लातक अर्शरोग, खाँसी, उदावर्त, पाण्डु, शोथ और मन्दाग्नि इन सब विकारोंको नष्ट करता है ॥ १६-१९ ॥

माणशूरणादि-लोह ।

माणशूरणभल्लातत्रिवृद्दन्तीसमन्वितम् ।
त्रिकत्रयसमायुक्तमयो दुर्नामनाशनम् ॥ १२० ॥

मानकन्द, जिमीकन्द, भिलावे, निसोत, दन्तीकी जड, सोंठ, पीपल, मिरच, हरड, आमला, बहेडा, चीतेकी जड, नागरमोथा और वायविडंग इन प्रत्येकका चूर्ण समान भाग और सब चूर्णकी बराबर लोहभस्म लेवे। सबको एकत्र खरल करके एक माशेकी मात्रासे सेवन करनेसे अर्शरोग नष्ट होता है ॥ १२० ॥

अग्निमुखलोह ।

त्रिवृच्चित्रकनिर्गुण्डीस्नुहीमुण्डीतिकण्टकाः ।
प्रत्येकशोऽष्टपलिका जलद्रोणे विपाचयेत् ॥ २१ ॥
पलत्रयं विडङ्गाच्च व्योषात् कर्षत्रयं पृथक् ।
त्रिफलायाः पञ्चपलं शिलाजतुपलं न्यसेत् ॥ २२ ॥
दिव्यौषधिहतस्यापि वैकङ्कतहतस्य वा ।
पलद्वादशकं देयं रुक्मलोहस्य चूर्णकम् ॥ २३ ॥
चतुर्विंशत्पलैराज्यान्मधुशर्करयोरपि ।
घनीभूते सुशीते च दापयेदवतारिते ॥ २४ ॥

निसोत, चीता, सिह्माळू, थूहर, मुण्डी और भुईआमला ये प्रत्येक बत्तीस तोले लेकर एक द्रोण जलमें पकावे। जब चतुर्थांश जल शेष रहजाय तब उतारकर छानलेवे। फिर वायविडङ्ग १२ तोले, सोंठ, पीपल और कालीमिरच प्रत्येक चारचार तोले, हरड, आमला और बहेडा प्रत्येक समान भाग मिश्रित २० तोले, शोधित शिलाजीत ४ तोले, मैनशिल अथवा कंटाईके रसद्वारा भस्म कियेहुए रुक्मलोहका चूर्ण १२ पल, एवं गौका घी, शहद और मिश्री प्रत्येक २४-२४ पल लेवे। पाकके नियमानुसार प्रथम घीको चूल्हेपर चढाकर गरम करे फिर उसमें लोहचूर्ण डालकर मन्दमन्द अग्निसे भूने। जब अच्छे प्रकारसे भूनजाय तब उस चूर्णको निकालकर खांडकी चासनी कर उसमें उक्त क्वाथको डालकर धीरे २ पकावे। जब पककर पाक गाढा हो जाय तब शीतल होजानेपर उसमें उक्त औषधियोंके चूर्णको मिलादेवे ॥ १२१-१२४ ॥

एतदग्निमुखं नाम दुर्नामान्तकरं परम् ।
मन्दमग्निं करोत्याशु कालाग्निसमतेजसम् ॥ २५ ॥
पर्वता अपि जीर्यन्ति प्राशनादस्य देहिनः ।
गुरुवृष्यान्नपानानि पयो मांसरसो हितः ॥ २६ ॥
दुर्नामपाण्डुश्वयथुकुष्ठप्लीहोदरापहम् ।
अकालपलितं हन्यादामवातं गुदामयम् ॥ २७ ॥

न स रोगोऽस्ति यं चापि न निहन्यादिदं क्षणात् ।
करीरकाञ्जिकादीनि ककारादीनि वर्जयेत् ॥
स्रवत्यतोऽन्यथा लौहं देहात् किट्टं च दुर्जयम् ॥ २८ ॥

यह अग्निमुखनामक लोह बावासीरको नष्ट करनेवाला और मन्दाग्निको दीपन करनेवाला है । इसके खानेसे मनुष्यको पत्थरतक हजम हो सकते हैं। इसपर भारी और पुष्टिकारक अन्न पान, दूध और मांसरस ये पदार्थ हितकारी हैं। यह बवासीर, पाण्डुरोग, सूजन, कुष्ठ, प्लीहा, उदररोग, असमयमें बालोंका पकना, आमवात और गुदाके रोग इन सब रोगोंको एवं अन्यान्य और कोईभी ऐसा रोग नहीं है जिसको यह तत्क्षण ही नष्ट न करता हो । इसपर करीर, कांजी, ककडी आदि समस्त ककाराद्य पदार्थ सर्वथा त्यागदेने चाहिये । इस प्रकार न करनेसे शरीरसे लोहेका दुर्जय मैल टपकने लगता है ॥ २५-२८ ॥

चन्द्रप्रभागुटिका ।

कृमिरिपुदहनव्योषत्रिफलासुरदारुचव्यभूनिम्बम् ।
मागधिमूलं मुस्तं सशठी वचा धातुमाक्षिकं चैव ॥ २९ ॥
लवणक्षारनिशायुगकुस्तुम्बुरुगजकणातिविषाः ॥ १२० ॥
कर्षांशकान्येव समानि कुर्यात्पलाष्टकं चाश्मजतोर्विदध्यात् ।
निष्पत्रशुद्धस्य पुरस्य धीमान् पलद्वयं लोहरजस्तथैव ॥
सिताचतुष्कं पलमत्र वांश्यानिकुम्भकुम्भीत्रिसुगन्धियुक्तम् ॥ २१

वायविडंग, चीतेकी जड, सोंठ, पीपल, मिरच, हरड, आमला, बहेडा, देवदारु, चव्य, चिरायता, पीपलामूल, नागरमोथा, कचूर, बच, सोनामाखी, सैंधानमक, कालानमक, जवाखार, सज्जी, हल्दी, दारुहल्दी, धनियाँ, गजपीपल और अतीस ये प्रत्येक एक एक कर्ष और शिलाजीत ३२ तोले, शोधित गूगल ८ तोले, लोहभस्म ८ तोले, मिश्री १६ तोले, वंशलोचन ४ तोले, दन्तीकी जड ४ तोले, निशोय ४ तोले, एवं दालचीनी, तेजपात और इलायची ये तीनों मिश्रित ४ तोले लेवे । सबको यथाविधिसे एकत्र मिलाकर एक एक रत्तीकी गोलियाँ बनालेवे ॥ २९-१३१ ॥

चन्द्रप्रभेयं गुटिका विधेया ह्यर्शांसि निर्नाशयते षडेव ।
भगन्दरं कामलपाण्डुरोगं निघ्नवह्नेः कुरुते च दीप्तिम् ॥
हन्त्यामयान् पित्तकफानिलोत्थान्नाडीगते मर्मगते व्रणे च ॥ ३१

ग्रन्थ्यर्बुदे विद्रधिराजयक्ष्ममेहे भगाख्ये प्रदरे च योज्या।
शुक्रक्षये चाश्मरिमूत्रकृच्छ्रे मूत्रप्रवाहेऽप्युदरामये च ॥२३॥
तक्रानुपानं त्वथ मस्तुपानमाजो रसो जाङ्गलजो रसो वा।
पयोऽथवा शीतजलानुपानं बलेन नागस्तुरगो जवेन ॥ २४ ॥
दृष्ट्या सुपर्णः श्रवणे वराहः कान्त्या रतीशो धिषणश्च बुद्ध्या।
न पानभोज्ये परिहार्यमस्ति न शीतवातातपमैथुनेषु ॥२५॥

यह चन्द्रप्रभानामवाली गुटिका छहों प्रकारके अर्शरोग, भगन्दर, कामला और पाण्डुरोग इनको जडसहित नष्ट करदेती है और नष्ट हुई जठराग्निको फिरसे दीपन करती है। इसको पित्त कफ और वायुसे उत्पन्न हुए विकार, नाडीगतरोग, मर्मस्थानसम्बन्धी विकार, व्रण, ग्रन्थि, अर्बुद, विद्रधि, राजयक्ष्मा, प्रमेह, भगरोग, प्रदर, शुक्रक्षय, पथरी, मूत्रकृच्छ्र, मूत्रप्रवाह और उदररोग इन सबमें सेवन कराना चाहिये। इसपर मट्ठा, दहीका तोड, बकरेके मांसका रस, जंगली जीवोंका मांसरस, दूध अथवा शीतल जल इनमेंसे किसीएक वस्तुका अनुपान करना चाहिये। इस वटीके सेवन करनेवाला बलमें हाथीके समान, वेगमें घोडेके समान, दृष्टिमें गरुडके समान, सुननेमें बराहके समान, कान्तिमें कामदेवके समान, और बुद्धिमें बृहस्पतिके समान होजाता है। इसपर खान पानके शीत, वायु, धूप और मैथुन आदिका कुछ भी परहेज नहीं है ॥ २२-२५ ॥

शम्भुं समभ्यर्च्य कृतप्रणामं प्राप्ता गुटी चन्द्रमसः प्रसादात् ॥
संमर्द्य मधुसर्पिर्भ्यामादौ रक्तिचतुष्टयम।
भक्ष्यं वृद्ध्या यथायुक्ति यावन्माषचतुष्टयम् ॥ २७ ॥
त्रिवृद्दन्तीत्रिजातानां कर्षमाने पृथक् पृथक्।
शुक्रदोषान् निहन्त्याशु प्रमेहानपि दारुणान् ॥ २८ ॥
वलीपलितनिर्मुक्तो वृद्धोऽपि तरुणायते ॥ २९ ॥
" वृद्धवैद्योपदेशेन पलार्द्धं रसगन्धकम्।
केवलं मूर्च्छितं वापि पलं वा दापयेद्रसम् ॥
अभ्रकं च क्षिपेत् कश्चित् पलमानं भिषग्वरः " ॥३०॥

यह वटी शिवजी महाराजका पूजन करके और उनको प्रणाम करके चन्द्रदेवकी कृपासे प्राप्त की है। अतः प्रतिदिन शिवजीकी अर्चना और वन्दना करके पहले इस

वटीको चार रत्ती प्रमाण लेकर शहद और घीमें अच्छे प्रकारसे खरल करके सेवन करे फिर यथाक्रमसे बढाते २ चार माशेतक इसकी मात्राको बढावे । औषध सेवनके पश्चात यदि निसोत, दन्ती, दारचीनी, तेजपात और इलायची इनके एक एक कर्षप्रमाण चूर्णको भक्षण करे तो यह सम्पूर्ण शुक्रगत दोष और दारुण प्रमेहोंको तत्काल दूर करती है । वली (शरीरमें वलिका पडना) और पलित (असमय बालोंका पकना) इन विकारोंसे रहित होकर वृद्धपुरुष भी तरुण होजाता है । " वृद्धवैद्योंके उपदेशसे कोई २ वैद्य इसमें दो तोले शुद्ध पारा और दो तोले शुद्ध गन्धक अथवा केवल मूर्च्छित पारेको ही ४ तोले किंवा कोई कोई चार तोले अभ्रक कोही डालते हैं " ॥ ३६–१४० ॥

रसगुडिका ।

रसस्तु पादिकस्तुल्या विडङ्गमरिचाभ्रकाः ।
गङ्गापालङ्कजरसे खल्लयित्वा पुनः पुनः ॥ ४१ ॥
रक्तिमात्रा गुदाशोंघ्नी वह्नेरत्यर्थदीपनी ॥ ४२ ॥

रससिन्दूर १ भाग एव वायविडंग, कालीमिरच और अभ्रक ये प्रत्येक एक एक भाग लेवे । सबको एकत्र मिलाकर शालिञ्चशाक बड़ी पालकके रसमें खरलकर एक एक रत्तीकी गोलियों बनालेवे । यह वटी अर्शरोगको नष्ट करती है और अग्निको अत्यन्त दीपन करती है ॥ ४१ ॥ ४२ ॥

तीक्ष्णमुखरस ।

मृतसूतार्कहेमाभ्रं तीक्ष्णं मुण्डं च गन्धकम् ।
मण्डूरं च समं ताप्यं मर्द्यं कन्याद्रवैर्दिनम् ॥ ४३ ॥
अन्धमूषागतं सर्वं ततः पाच्यं दृढाग्निना ।
चूर्णितं सितया माषं खादेत्तच्चार्शसां हितम् ।
रसस्तीक्ष्णमुखो नाम चासाध्यमपि साधयेत् ॥ ४४ ॥

रससिन्दूर, ताम्रभस्म, सुवर्णभस्म, अभ्रकभस्म, तीक्ष्ण लोहभस्म, लोहभस्म, शुद्ध गन्धक, मण्डूरभस्म और सोनामाखीकी भस्म इन सबको समान भाग लेकर एक एक दिनतक घीगुवारके रसमें खरल करे फिर उसको अन्धमूषायन्त्रमें रखकर तीक्ष्ण अग्निके द्वारा पकावे । जब पककर स्वयं शीतल होजाय तब उसमेंसे औषधिको निकालकर बारीक चूर्ण करलेवे । इसमेंसे एक एक माशे परिमाण लेकर मिश्रीके साथ सेवन करे तो यह तीक्ष्णमुख नामक रस

असाध्य अर्शरोगको भी दूर करदेता है । अर्शरोगियोंके लिये यह अत्यन्त हितकारी है ॥ ४३ ॥ ४४ ॥

अर्शकुठाररस ।

शुद्धसूतं द्विधा गन्धं मृतलोहं च ताम्रकम् ।
प्रत्येकं द्विपलं दन्ती त्र्यूषणं शूरणं तथा ॥ ४५ ॥
शुभाटङ्कयवक्षारसैन्धवं पलपञ्चकम् ।
पलाष्टकं स्नुहीक्षीरं द्वात्रिंशच्च गवां जलैः ॥ ४६ ॥
आपिण्डितं पचेदग्नौ खादेन्माषद्वयं ततः ।
रसश्चार्शःकुठारोऽयं सर्वरोगकुलान्तकः ॥ ४७ ॥

शुद्ध पारा ४ तोले एवं शुद्ध गन्धक, लोहभस्म, ताम्रभस्म दन्तीकी जड, सोंठ, पीपल, मिरच और जिमीकन्द ये प्रत्येक ८-८ तोले, वंशलोचन, सुहागा, जवाखार और सैंधानमक प्रत्येक २०-२० तोले थूहरका दूध ३२ तोले और गोमूत्र १२८ तोले लेवे । इन सबको एकत्र कूट पीसकर गोमूत्रमें मन्द मन्द अग्निसे पकावे । जब उत्तम प्रकारसे पकजाय तब औषधिको सुखाकर चूर्ण करलेवे । फिर इस अर्शकुठारनामक रसको प्रतिदिन दो दो माशेकी मात्रासे सेवन करे तो इससे सर्वप्रकारके रोग नष्ट होते हैं ॥ ४५-४७ ॥

चक्राख्यरस ।

मृतसूताभ्रवैक्रान्तं ताम्रं कांस्यं समं समम् ।
सर्वतुल्येन गन्धेन दिनं भल्लातकद्रवैः ॥ ४८ ॥
मर्दयेद् यत्नतः पश्चाद् वटीं कुर्याद्विगुञ्जिकाम् ।
भक्षणाद् गुदजान् हन्ति द्वन्द्वजान् सर्वजानपि ॥ ४९ ॥

रससिन्दूर, अभ्रक, वैक्रान्तमणि, ताँबा, और कांसा प्रत्येककी भस्म समान भाग और सबकी समान भाग शुद्ध गन्धक लेवे । सबको एकत्र मिलाकर भिलावेंके रसमें एक दिनतक उत्तम प्रकारसे खरलकर दो दो रत्तीकी गोलियाँ बनालेवे । इन गोलियोंके खानेसे द्विदोषज अथवा त्रिदोषज सभी प्रकारके अर्शरोग नष्ट होते हैं ॥ ४८ ॥ ४९ ॥

चञ्चुत्कुठाररस ।

रसगन्धकलोहानां प्रत्येकं भागयुग्मकम् ।
दन्तीत्रिकटुकुष्ठकं षड्भागं लाङ्गलस्य च ॥ ५० ॥

क्षारसैन्धवटङ्कानां प्रत्येकं भागपञ्चकम् ।
गोमूत्रस्य च द्वात्रिंशत् स्नुहीक्षीरं तथैव च ॥ ५१ ॥
यावच्च पिण्डितं सर्वं तावन्मृद्वग्निना पचेत् ।
माषद्वयं ततः खादेद् दिवास्वप्नादि वर्जयेत् ॥
रसश्चञ्चत्कुठारोऽयमर्शसां कुलनाशनः ॥ ५२ ॥

शुद्ध पारा, शुद्ध गन्धक और लोहा ये प्रत्येक दो दो भाग, दन्ती, सोंठ, पीपल मिरच और कूठ ये प्रत्येक एक एक भाग, कलिहारीकी जड ६ भाग, जवाखार, सैंधानमक और सुहागा प्रत्येक ५-५ भाग, गोमूत्र और थूहरका दूध प्रत्येक बत्तीस बत्तीस भाग लेवे। सबको एकत्र मिलाकर तबतक मन्द २ अग्निसे पकावे जबतक पकते पकते सब औषधि पिण्डकी समान होजाय। फिर उसका चूर्ण करके उसमेंसे दो दो माशे परिमाण सेवन करे। इसपर दिनमें सोना आदि त्याग देना चाहिये। यह चञ्चत्कुठाररस सम्पूर्ण उपद्रवोंसहित अर्शरोगको नष्ट करता है ॥ १५०-५२॥

चक्रेश्वररस ।

चतुर्भागं शुद्धसूतं पञ्च टङ्कणमभ्रकम् ।
त्रिदिनं भावयेद् घर्म्मे द्रवैः श्वेतपुनर्नवैः ॥ ५३ ॥
द्विगुञ्जं भक्षयेन्नित्यं वातदुर्नामशान्तये ।
सिद्धश्चक्रेश्वरो नाम रसश्चार्शःकुलान्तकः ॥ ५४ ॥

शुद्ध पारा ४ भाग एवं सुहागा और अभ्रक प्रत्येक ५-५ भाग लेवे। सबको सफेद पुनर्नवेके रसमें धूपमें रखकर तीन दिनतक भावना देवे। पश्चात् दो दो रत्तीकी गोलियाँ बनाकर नित्य एक एक गोली सेवन करे। वातज बवासीरको नष्ट करनेके लिये तो यह चक्रेश्वर नामक रस प्रसिद्ध ही है। एवं अन्यान्य अर्शोंको भी समूल नष्ट करता है ॥ ५३ ॥ ५४ ॥

शिलागन्धकवटी ।

शिलागन्धकयोश्चूर्णं पृथग् भृंगरसाप्लुतम् ।
सप्ताहं भावयेत् सर्पिर्मधुभ्यां च विमर्दयेत् ॥ ५५ ॥
अर्शसश्चानुलोम्यार्थं इताग्निबलवर्द्धनम् ।
रक्तिकाद्वितयं खादेत् कुष्ठादिरहितो नरः ॥ ५६ ॥

मैनसिल और गन्धकके चूर्णको अलग अलग भाँगरेके रसमें १ सप्ताहतक भावना देकर घी और शहदके साथ खरल करके दो दो रत्तीकी गोलियाँ प्रस्तुत करलेवे । इसके खानेसे अर्शरोगीके वायुका अनुलोमन होता है, नष्ट हुई अग्नि पुनः दीपन होती है और क्षुधादि उपसर्गोंसे रहित होकर मनुष्य आरोग्य होता है ॥ ५५ ॥ ५६ ॥

जातीफलादिवटी ।

जातीफलं लवङ्गं च पिप्पली सैन्धवं तथा ।
शुण्ठी धुस्तूरबीजं च दरदं टङ्कणं तथा ॥ ५७ ॥
समं सर्वं विचूर्ण्याथ जम्भाम्भसा विमर्दयेत् ।
जातीफलवटी चेयमर्शोऽग्निमान्द्यनाशिनी ॥ ५८ ॥

जायफल, लौंग, पीपल, सैंधानमक, सोंठ, धतूरेके बीज, सिंगरफ और सुहागा इन सबको समान भाग लेकर एकत्र चूर्ण करलेवे । फिर जम्बीरी नींबूके रसमें खरल करके दो दो रत्तीकी गोलियाँ तैयार करलेवे । यह जातीफलाद्यवटी सर्वप्रकारके अर्शरोग और मन्दाग्निको नष्ट करती है ॥ ५७ ॥ ५८ ॥

पञ्चाननवटी ।

मृतसूताभ्रलोहानि मृतार्कगन्धकैः सह ।
सर्वाणि समभागानि भल्लातं सर्वतुल्यकम् ॥ ५९ ॥
वन्यशूरणकन्दोत्थद्रवैः पलप्रमाणतः ।
मर्दयेद्दिनमेकं च माषमात्रं पिबेद् घृतैः ॥१६० ॥
भक्षणाद्धन्ति सर्वाणि चार्शांसि च न संशयः ।
असाध्येष्वपि कर्त्तव्या चिकित्सा शङ्करोदिता ॥
कुष्ठरोगं निहन्त्याशु मृत्युरोगविनाशिनी ॥ ६१ ॥

रससिन्दूर, अभ्रक, लोहा, ताँबा और शुद्ध गन्धक ये सब समान भाग और शुद्ध भिलावे सबकी बराबर भाग लेवे । फिर सबको एकत्र पीसकर ४ तोले प्रमाण जंगली जिमिकन्दके रसमें खरल करके एक एक माशेकी गोलियाँ बनालेवे । इनमेंसे प्रतिदिन एक एक गोली घृतके साथ पान करे । इस वटीके सेवन करनेसे सर्वप्रकारके अर्शरोग निस्सन्देह नष्ट होते हैं । इस वटीके द्वारा असाध्य रोगोंमें भी चिकित्सा करनी चाहिये ऐसा शंकरने कहा है । यह वटी कुष्ठरोग और मृत्युरोगको तत्काल नाश करनेवाली है ॥ ५९-१६१ ॥

नित्योदित रस ।

शुद्धसूताभ्रलौहार्कविषं गन्धं समं समम् ।
सर्वतुल्यं तु भल्लातफलमेकत्र चूर्णयेत् ॥ ६२ ॥
द्रवैः शूरणकन्दोत्थैः खल्वे मर्द्यं दिनत्रयम् ।
माषमात्रं लिहेदाज्यं रसश्चार्शांसि नाशयेत् ॥
रसो नित्योदितो नाम गुदोद्भवकुलान्तकः ॥ ६३ ॥

शुद्ध पारा, अभ्रक, लोहा, ताँबा, शुद्ध मीठातेलिया और शुद्ध गन्धक ये सब समान भाग और सबकी बराबर भाग भिलावे लेकर सबको एकत्र चूर्ण करलेवे। फिर जिमीकन्द और मानकन्दके रसमें तीन दिनतक उत्तम प्रकारसे खरल करके इसमेंसे प्रतिदिन एक एक माशे परिमाण रसको घीके साथ मिलाकर चाटे तो सर्व प्रकारके अर्शरोग नष्ट होते हैं । विशेषकर यह नित्योदित नामक रस बवासीरको समूल नष्ट करते हैं ॥ ६२ ॥ ६३ ॥

अष्टाङ्गरस ।

गन्धं रसेन्द्रं मृतलौहकिट्टं फलत्रयं त्र्यूषणवह्निभृङ्गम् ।
कृत्वा समं शाल्मलिकागुडूचीरसेन यामत्रितयं विमर्द्य ॥
निष्कप्रमाणं गदितानुपानैः सर्वाणि चार्शांसि हरेद्रसस्य ॥६४

शुद्ध गन्धक, शुद्ध पारा, लोहभस्म, मण्डूरभस्म, हरड, आमला, बहेडा, सोंठ, पीपल, मिरच, चीता और भाँगरा इन सबको समान भाग लेकर सेमलकी मुसली और गिलोय प्रत्येकके रसमें तीन प्रहरतक खरल करके ४-४ माशेकी गोलियाँ बनालेवे । इस रसकी एक एक गोली प्रतिदिन घृतके साथ खानेसे सम्पूर्ण अर्श-रोग दूर होता है ॥ ६४ ॥

उदकषट्पलकघृत ।

सक्षारैः पञ्चकोलैस्तु पलिकैस्त्रिगुणोदकैः ।
समं क्षीरं घृतं प्रस्थं ज्वरार्शःप्लीहकासनुत ॥ ६५ ॥

जवाखार, पीपल, पीपलामूल, चव्य, चीतेकी जड और सोंठ ये प्रत्येक ४-४ तोले, जल सब औषधियोंसे तिगुना, दूध एक प्रस्थ और घी एक प्रस्थ लेवे सबको एकत्र मिलाकर यथाविधि घृतको सिद्ध करे । यह घृत ज्वर, बवासीर प्लीहा, खांसी आदि विकारोंको दूर करता है ॥ ६५ ॥

व्योषाद्यघृत।

व्योषगर्भं पलाशस्य त्रिगुणे भस्मवारिणि।
साधितं पिबतः सर्पिः पतन्त्यर्शांस्यसंशयम् ॥ ६६ ॥

सोंठ, पीपल और मिरच इनके समान भाग मिश्रित कल्कसे तिगुने ढाककी भस्मके जलमें घृतको सिद्ध करके पान करनेसे अर्शके अंकुर निश्चय गिरजाते हैं ॥

चव्याद्यघृत।

चव्यं त्रिकटुकं पाठां क्षारं कुस्तुम्बुरूणि च।
यमानी पिप्पलीमूलमुभे च विडसैन्धवे ॥ ६७ ॥
चित्रकं बिल्वमभयां पिष्ट्वा सर्पिर्विपाचयेत्।
शकृद्वातानुलोम्यार्थं जाते दध्नि चतुर्गुणे ॥ ६८ ॥
प्रवाहिकां गुदभ्रंशं मूत्रकृच्छ्रं परिस्रवम्।
गुदवङ्क्षणशूलं च घृतमेतद् व्यपोहति ॥ ६९ ॥

चव्य, सोंठ, पीपल, मिरच, पाढ, जवाखार, धनियां, अजवायन, पीपलामूल, नागरमोथा, विरियासंचर नमक, सैंधानमक, चीतेकी जड, बेलगिरी और हरड इन सबको समान भाग लेकर एकत्र पीसलेवे फिर इनके कल्क और कल्कसे चौगुने दहीके पानीमें १ प्रस्थ घृतको पकावे इस घृतको पान करनेसे मल और वायुका अनुलोमन होता है। एवं यह घृत प्रवाहिका, गुदभ्रंश, अर्श, मूत्रकृच्छ्र, रक्तस्राव, गुदा और वंक्षणका शूल इन सबको दूर करता है ॥ ६७–६९ ॥

कुटजाद्यघृत।

कुटजफलवल्कलकेशरनीलोत्पललोध्रधातकीकल्कैः।
सिद्धं घृतं विधेयं शूले रक्तार्शसां भिषजा ॥ १७० ॥

इन्द्रजौ, कुडेकी जडकी छाल, नागकेशर, नीलकमल, लोध और धायके फूल इनके समान भाग मिश्रित कल्कके द्वारा घृतको यथाविधि सिद्ध करके शूल और रुधिरकी बवासीरवाले रोगियोंको सेवन कराना चाहिये ॥ १७० ॥

सिद्धामृतघृत।

पचेद्वारिचतुर्द्रोणे कण्टकार्यमृताशतम्।
तत्राग्नित्रिफलाव्योषपूतीकत्वक्कलिङ्गकैः ॥ ७१ ॥
सकाश्मर्यविडङ्गैस्तु सिद्धं दुर्नाममेहनुत्।
घृतं सिद्धामृतं नाम बोधिसत्त्वेन भाषितम् ॥ ७२ ॥

कटेरी और गिलोय इन दोनोंको सौ सौ पल लेकर ४ द्रोण परिमाण जलमें पकावे जब चतुर्थांश जल शेष रहजाय तब उतारकर छानलेवे। फिर उसमें चीतेकी जड़, हरड़, आमला, बहेड़ा, सोंठ, पीपल, मिरच, दुर्गन्ध करंजकी छाल, इन्द्रजौ, कुम्भेर और वायविडंग इनके समान भाग मिश्रित कल्क और १ प्रस्थ घृतको डालकर विधिपूर्वक घृतको सिद्ध करे। यह सिंहामृतनामक घृत बवासीर और प्रमेहको नष्ट करता है ऐसा बोधिसत्त्वमुनिने कहा है ॥ ७१ ॥ ७२ ॥

सुनिषण्णक चांगेरीघृत।

अवाक्पुष्पी बला दार्वी पृश्निपर्णी त्रिकण्टकः।
न्यग्रोधोदुम्बराश्वत्थशुङ्गाश्च द्विपलोन्मिताः ॥ ७३ ॥
कषाय एषां पेष्यास्तु जीवन्ती कटुरोहिणी।
पिप्पली पिप्पलीमूलं मरिचं देवदारु च ॥ ७४ ॥
कलिङ्गं शाल्मलीपुष्पं वीरा चन्दनमञ्जनम्।
कट्फलं चित्रको मुस्तं प्रियंग्वतिविषे स्थिरा ॥ ७५ ॥
पद्मोत्पलानां किञ्जल्कः समङ्गा सनिदिग्धिका।
बिल्वं मोचरसः पाठा भागाः स्युः कार्षिकाः पृथक् ॥ ७६ ॥
चतुःप्रस्थशृतं प्रस्थं कषायमवतारयेत्।
"त्रिंशत्पलानि तु प्रस्थो विज्ञेयो द्विपलाधिकः" ॥ ७७ ॥
सुनिषण्णकचाङ्गेर्योः प्रस्थौ द्वौ स्वरसस्य च।
सर्वैरेतैर्यथोद्दिष्टैर्घृतप्रस्थं विपाचयेत् ॥ ७८ ॥

सोया, खिरैंटी, दारुहल्दी, पृश्निपर्णी, गोखरू, बड़, गूलर और पीपलके अंकुर ये प्रत्येक आठ आठ तोले लेकर एक द्रोण जलमें पकावे जब चौथाई भाग जल शेष रह जाय तब उतारकर छानलेवे। फिर इस क्वाथमें जीवन्ती, कुटकी, पीपल पीपलामूल, मिरच, देवदारू, इन्द्रजौ, सेमलके फूल, क्षीरकाकोली, लालचन्दन, रसौंत, कायफल, चीता, नागरमोथा, फूलप्रियंगु, अतीस, शालपर्णी, कमलकेशर, नीले कमलकी केशर, लज्जावन्ती, कटेरी, मोचरस और पाढ इन प्रत्येक औषधिको एक-एक कर्ष प्रमाण लेकर बारीक पीसकर औषधियोंके ४ प्रस्थ क्वाथमें डालकर जब पकते २ एक प्रस्थ क्वाथ शेष रहजाय तब उतारलेवे। (यहांपर प्रस्थ ३२ पलका मानना चाहिये)। फिर उसमें शिरियारीके शाकका स्वरस और नोनियाका स्वरस एक एक प्रस्थ एवं घृत एक प्रस्थ डालकर विधिपूर्वक घृतको पकावे ॥ ७३-७८ ॥

एतदर्शस्स्वतीसारे त्रिदोषे रुधिरस्रुतौ।
प्रवाहणे गुदभ्रंशे पिच्छासु विविधासु च ॥ ७९ ॥
उत्थाने चातिबहुशः शोथशूले गुदाश्रये।
मूत्रग्रहे मूढवाते मन्देऽग्नावरुचावपि ॥ १८० ॥
प्रयोज्य विधिवत् सर्पिर्बलवर्णाग्निवर्द्धनम्।
विविधेष्वनुपानेषु केवलं वा निरत्ययम् ॥ ८१ ॥

इस घृतको सर्वप्रकारके अर्शरोग, अतिसार, त्रिदोषज रक्तस्राव, प्रवाहिका, गुदभ्रंश, नानाप्रकारकी पिच्छिलता, वारंवार मलका निकालना, गुदागत शोथ अथवा शूल, मूत्राशयसम्बन्धी रोग, मूढवात, मन्दाग्नि, अरुचि आदि रोगोंमें विविधप्रकारके अनुपानोंके साथ अथवा केवल घृतको ही विधिपूर्वक सेवन करानेसे उक्त समस्त विकार दूर होते हैं एवं बल वर्ण और अग्निकी वृद्धि होती है ॥ ८१ ॥

कासीसाद्यतैल।

कासीस दन्तिसिन्धूत्थकरवीरानलैः पचेत्।
तैलमर्कपयोमिश्रमभ्यङ्गात् पायुकीलजित् ॥ ८२ ॥

कसीस, दन्तीकी जड, सैंधानमक, कनेरकी जड और चीतेकी जड इन प्रत्येकके एकएक तोले कल्कके द्वारा एक प्रस्थ प्रमाण तिलके तैलको पकावे। फिर आकके दूधमें मिलाकर मालिश करनेसे अर्शके अंकुरोंको दूर करता है ॥ ८२ ॥

बृहत्कासीसाद्यतैल।

कासीसं सैन्धवं कृष्णा शुण्ठी कुष्ठं च लाङ्गली।
शिलाभिदश्वमारश्च दन्ती जन्तुघ्नचित्रकम् ॥
तालकं कुनटी स्वर्णक्षीरी चैतैः पचेद्भिषक् ॥ ८३ ॥
तैलं स्नुह्यर्कपयसा गवां मूत्रं चतुर्गुणम्।
एतदभ्यङ्गतोऽर्शांसि क्षारेणेव पतन्ति हि ॥
क्षारकर्मकरं ह्येतन्न च सन्दूषयेद्वलिम् ॥ ८४ ॥

कसीस, सैंधानमक, पीपल, सोंठ, कूठ, कलिहारीकी जड, पाषाणभेद, कनेरकी जड, दन्तीकी जड, वायविडङ्ग, चीतेकी जड, हरताल, मैनसिल, पीले फूलकी सत्यानासी, कटेरी इन सबको समान भाग एवं तिलका तैल एक प्रस्थ थूहरका दूध १ प्रस्थ, आकका दूध १ प्रस्थ और गोमूत्र ४ प्रस्थ लेवे। सबको एकत्र मिलाकर

विधिपूर्वक तैलको पकावे । इस तैलकी मालिश करनेसे अर्शके अंकुर इस प्रकार निस्सन्देह गिरजाते हैं, जिसप्रकार क्षारसे गुदाके अंकुर नष्ट होजाते हैं । क्षारकी समान कार्य करनेवाला यह तैल अर्शकी वलिको दूषित नहीं करता है ॥८३॥८४॥

पिप्पल्याद्यतैल ।

पिप्पलीं मधुकं बिल्वं शताह्वां मदनं वचाम् ।
कुष्ठं शुण्ठीं पुष्कराख्यं चित्रकं देवदारु च ॥ ८५ ॥
पिष्ट्वा तैलं विपक्तव्यं द्विगुणक्षीरसंयुतम् ।
अर्शसां मूढवातानां तच्छ्रेष्ठमनुवासनम् ॥८६॥
गुदनिस्सरणं शूलं मूत्रकृच्छ्रं प्रवाहिकाम् ।
कट्यूरुपृष्ठदौर्बल्यमानाहं वङ्क्षणाश्रयम् ॥ ८७ ॥
पिच्छास्रावं गुदे शोथं वातवर्चोविनिग्रहम् ।
उत्थानं बहुशो यच्च जयेच्चैवानुवासनात् ॥ ८८ ॥

पीपल, मुलहठी, बेलगिरी, सोया, मैनफल, वच, कूठ, सोंठ, पुहकरमूल, चीता और देवदारु इन सबको समान भाग लेकर एकत्र पीस लेवे । इस कल्कके द्वारा १ प्रस्थ तेलको दुगुने दूधके साथ मिलाकर पकावे । इस तेलको अर्शरोगियों और वातसे पीडित रोगियोंके अनुवासनवस्तिद्वारा प्रयोग करना श्रेष्ठ है । एवं गुदाका बाहर निकलना, शूल, मूत्रकृच्छ्र प्रवाहिका, कमर, पीठ और जंघाओंकी दुर्बलता, अफारा, वंक्षणकी पीडा, पिच्छिलतायुक्त स्राव, गुदाकी सूजन, वायु और मलका अवरोध ये लक्षण यदि बारबार उत्पन्न हों तो इस तेलकी अनुवासनवस्तिसे इन सब विकारोंको जीतना चाहिये ॥ ८५-८८ ॥

दन्त्यरिष्ट ।

दन्तीचित्रकमूलानामुभयोः पञ्चमूलयोः ।
भागान् पलांशानायोज्य जलद्रोणे विपाचयेत् ॥ ८९ ॥
त्रिपलं त्रिफलायाश्च दलानां तत्र दापयेत् ।
रसे चतुर्थशेषे तु पूतशीते प्रदापयेत् ॥ १९० ॥
तुलां गुडस्य तिष्ठेन्मासार्द्धं घृतभाजने ।
तन्मात्रया पिबेन्नित्यमर्शोभ्यः प्रविमुच्यते ॥ ९१ ॥

ग्रहणीपाण्डुरोगघ्नं वातवर्चोऽनुलोमनम् ।
दीपनं चारुचिघ्नं च दन्त्यरिष्टमिदं विदुः ॥
पात्रेऽरिष्टादिसन्धान धातकीलोध्रलेपिते ॥ ९२ ॥

दन्तीकी जड, चीतेकी जड और दशमूलकी समस्त औषधियाँ प्रत्येकको चार चार तोले लेकर एकत्र कूटकर १ द्रोण जलमें पकावे और पाक होते समय उसमें हरड आमला और बहेडा इन तीनोंके पत्तोंको तीन पल प्रमाण डाल देवे। जब पकते २ चौथाई भाग जल शेष रहजाय तब उतारकर कपडेमें छानलेवे। फिर शीतल होनेपर उसमें पुराना गुड सौ पल प्रमाण डालकर घीके चिकने बर्त्तनमें भरकर और उसके मुँहको अच्छे प्रकारसे बन्द करके पन्द्रह दिनतक रक्खा रहनेदेवें तत्पश्चात् इसको उचित मात्रासे प्रतिदिन पान करनेसे मनुष्य अर्शरोगसे सर्वथा मुक्त होजाता है। यह अरिष्ट ग्रहणी और पाण्डुरोगनाशक, वायु और मलका अनुलोमन करनेवाला, अग्निदीपक और अरुचिको दूर करनेवाला है। इसको पूर्वाचार्यगण दन्त्यरिष्ट कहते हैं। धायके फूल और लोधके द्वारा लेप कियेहुए पात्रमें अरिष्टादि रखने चाहिये ॥ १८९-१९२ ॥

क्षार।

प्रशस्तेऽहनि नक्षत्रे कृतमङ्गलपूर्वकम् ।
कालमुष्ककमाहृत्य दग्ध्वा भस्म समाहरेत् ॥ ९३ ॥
आढकं त्वेकमादाय जलद्रोणे पचेद्भिषक् ।
चतुर्भागावशिष्टेन वस्त्रपूतेन वारिणा ॥ ९४ ॥
शंखचूर्णस्य कुडवं प्रक्षिप्य विपचेत पुनः ।
शनैः शनैर्मृदावग्नौ यावत् सान्द्रतनुर्भवेत् ॥ ९५ ॥
सर्जिकायावशूकाभ्यां शुण्ठी मरिचपिप्पली ।
वचा चातिविषा चैव हिङ्गुचित्रकयोस्तथा ॥ ९६ ॥
एषां चूर्णानि निक्षिप्य पृथक्त्वेनाष्टमाषकम् ।
दर्व्या संघट्टितं चापि स्थापयेदायसे घटे ॥
एष वह्निसमः क्षारः कीर्त्तितः कश्यपादिभिः ॥ ९७ ॥

उत्तम दिन और शुभ नक्षत्रमें पहले मांगलिक कार्य करके काले फलके घण्टापाडलवृक्षकी शाखा लाकर उसको अग्निमें जलाकर भस्म करलेवे, फिर उस भस्मको १ आढक परिमाण लेकर १ द्रोण जलमें पकावे जब पकते २ चौथाई भाग जल

शेष रहजाय तब उतारकर वस्त्रमें छानलेवे । फिर उसमें शंखका चूर्ण १ कुडव परिमाण डालकर धीरे २ मन्द अग्निसे पकावे जब पकते २ पाक गाढा होजाय तब उसको नीचे उतारकर उसमें सज्जी, जवाखार, सोंठ मिरच, पीपल, वच, अतीस, हींग और लालचीतेकी जड इन औषधियोंके आठ आठ मासे चूर्णको डालकर करछीसे अच्छीतरह घोटकर लोहके पात्रमें भरकर रखदेवे । यह क्षार अग्निकी समान तीक्ष्ण है ऐसा कश्यपादि ऋषियोंने कहा है ॥ ९३–९७ ॥

क्षारपाकविधि ।

तोये कालकमुष्ककस्य विपचेद्भस्माढकं षड्गुणे
पात्रे लौहमये दृढे विपुलधीर्दर्व्या शनैर्घट्टयन् ।
दग्ध्वाऽग्नौ बहुशंखनाभिशकलान् पूतावशेषे क्षिपे-
द्यद्येरण्डजनालमेष दहति क्षारो वरो वाक्शतात् ॥९८॥
प्रायस्त्रिभागशिष्टेऽस्मिन्नच्छपैच्छिल्यरक्तता ।
सञ्जायते तदास्राव्य क्षारको ग्राह्यमिष्यते ॥ ९९ ॥
तुर्येणाष्टमकेन षोडशगुणेनांशेन संख्यूहिमा
मध्यः श्रेष्ठ इति क्रमेण विहितः क्षारोदकाच्छङ्खकः॥२००
नातिसान्द्रो नातितनुः क्षारपाक उदाहृतः ।
दुर्नामकादौ निर्दिष्टः क्षारोऽय प्रतिसारणः ॥ १ ॥
पानीयो यस्तु गुल्मादौ तं वारानेकविंशतिम् ।
स्रावयेत् षड्गुणे तोये केचिदाहुश्चतुर्गुणे ॥ २ ॥

काले फूलके घण्टापाटलवृक्षकी भस्मको १ आढक परिमाण लेकर छःगुने जलमें डालकर लोहेके पात्रमें मन्द २ अग्निसे पकावे और करछीसे धीरे धीरे चलाता जाय और उसमें शंखनाभिके टुकडोंको अग्निमें दग्ध करके, और वस्त्रमें छानकर डालदेवे सौकी गिनती गिननेमें जितनी देर लगे उतनी देरमें यह क्षार यदि अण्डकी नालको जलादेवे तो उत्तम क्षार हुआ जानना चाहिये । प्रायः तीसरा भाग जल अवशेष रहनेपर इस क्षारमें पिच्छिलता और लालिमा उत्पन्न होजाय तो उसको टपकाकर क्षार जल ग्रहण करना चाहिये । मृदु, मध्य और तीक्ष्ण इन भेदोंसे क्षार तीन प्रकारका होता है । पूर्वोक्त क्षार जलसे चौथाई भाग शंखभस्म डालकर बनायाहुआ क्षार मृदु क्षार, जलसे आठवाँ भाग शंखभस्म डालकर बनायाहुआ क्षार मध्यम और

जलसे सोलहवाँ भाग शंखभस्म डालकर बनायाहुआ क्षार तीक्ष्ण वा श्रेष्ठ होता है। क्षारका पाक न अत्यन्त गाढा और न अत्यन्त पतला होना चाहिये। किन्तु जिससे अर्शके अंकुरोंपर सहजही मालिश की जासके इस प्रकारका क्षार पाक करना चाहिये। बवासीर आदि रोगोंमें प्रतिसारण क्षार उत्तम कहागया है और पानीयक्षार गुल्मादिरोगोंमें हितकर है। इस पानीयक्षारको क्षारसे ६ गुने, किसी २ के मतसे ४ गुने जलमें डालकर २१ बार टपकाना चाहिये ॥९८-२०२॥

अर्शरोगमें पथ्य।

विरेचनं लेपनमस्रमोक्षः क्षाराग्निशस्त्राचरितं च कर्म।
पुरातना लोहितशालयश्च सषष्टिकाश्चापि यवाःकुलित्थाः ॥३
पटोलपत्रूरसोनवह्निपुनर्नवाशूरणवास्तुकानि।
जीवन्तिका दन्तिशठी सुरा च त्रुटिर्वयःस्था नवनीततक्रम्॥४
कक्कोलधात्रीरुचकं कपित्थमौष्ट्राणि मूत्राज्यपयांसि चापि।
भल्लातकं सर्षपजं च तैलं गोमूत्रसौवीरतुषोदकानि॥
वातापहं यच्च यदग्निकारि तदन्नपानं हितमर्शसेभ्यः॥५॥

अर्शरोगियोंके लिये विरेचन, प्रलेप, रक्तमोक्षण, क्षार, अग्नि और शस्त्रकर्म, पुराने लाल शालिधानोंके चावल, साँठीके चावल, जौ, कुलथी, परवल, शालिंचशाक, लहसुन, चीता, लालविषखपरा, जिमीकन्द, बथुआ, जीवन्तीका शाक, दन्तीकी जड, कचूर, मद्य, छोटी इलायची, हरड, नैनीघी, मट्ठा, शीतलचीनी, आमला, कालानमक, कैथ, ऊँटका मूत्र घी और दूध, भिलावे, सरसोंका तैल, गोमूत्र, सौवीरनामक काँजी और तुषोदक नामक काँजी एवं वायुनाशक और अग्निवर्द्धक समस्त अन्न पान हितकारी हैं॥ ३-५॥

अर्शरोगमें अपथ्य।

आनूपमामिषं मत्स्यं पिण्याकं दधि पिष्टकम्।
माषान् करीरं निष्पावं बिल्वं तुम्बीमुपोदिकाम्॥६॥
पक्काम्रं शालुकं सर्वं विष्टम्भीनि गुरूणि च।
आतपं जलपानानि वमनं वस्तिकर्म च॥७॥
विरुद्धानि च सर्वाणि मारुतं पूर्वदिग्भवम्।
वेगरोधं स्त्रियं पृष्ठयानमुत्कटकासनम्॥
यथास्वं दोषलं चान्नमर्शसः परिवर्ज्जयेत्॥८॥

यत पथ्यं यदपथ्यं च वक्ष्यते रक्तपित्तिनाम् ॥
रक्तार्शोरोगिणां तत्तदपि विद्याद्विशेषतः ॥ ९ ॥

आनूपदेशके पशुपक्षियोंका मांस, मछली, तिलकूट, दही, पिट्ठीके बने पदार्थ, उडद, बाँसके अंकुर, सेमकी फली, बेल, लाकी, पोईका शाक, पका आम, भसींडा एवं सर्व प्रकारके विबन्धकारक गुरुपाकी पदार्थ, धूप, जलपान, वमन, वस्तिकर्म, सर्वप्रकारके प्रकृतिविरुद्ध, देश काल और संयोगविरुद्ध पदार्थ, पूर्वदिशाकी वायु, मलमूत्रादिके वेगको रोकना, स्त्रीप्रसंग, घोडे आदिकी सवारी करना, टेढे तिरछे होकर बैठना, एवं अर्शके दोषको बढानेवाले यथेच्छ अन्न पानादि पदार्थ अर्शरोगवालेको त्यागदेने चाहिये । रक्तपित्तरोगियोंके लिये जो पथ्यापथ्य कहा गया है वह सब पथ्यापथ्य अर्शमें भी विशेषरूपसे सेवन कराना चाहिये ॥ २०६-२०९ ॥

इति अर्शोरोगचिकित्सा ॥

अग्निमान्द्यचिकित्सा ।

सारमेतच्चिकित्सायाः परमग्नेश्च पालनम् ।
तस्माद्यत्नेन कर्त्तव्यं वह्नेस्तु प्रतिपालनम् ॥ १ ॥
अस्तु दोषशतं क्रुद्धं सन्तु व्याधिशतानि च ।
कायाग्निमेव मतिमान् रक्षन् रक्षति जीवितम् ॥ २ ॥

जठराग्निको समान भावसे रक्षा करना ही इस रोगकी चिकित्साका प्रधान कर्त्तव्य है, इसलिये सैकडों दोषों और सैकडों व्याधियोंके कुपित होनेपर भी सबसे पहले यत्नपूर्वक अग्निकी रक्षा करनी चाहिये । कारण, अग्निके क्षीण होजानेपर कोई भी औषधि गुण नहीं करती है । जठराग्निकी रक्षा करताहुआ बुद्धिमान् वैद्य जीवनकी रक्षा करता है ॥ १ ॥ २ ॥

समस्य रक्षणं कार्यं विषमे वातनिग्रहः ।
तीक्ष्णे पित्तप्रतीकारो मन्दे श्लेष्मविशोधनम् ॥ ३ ॥

समाग्निकी सदैव रक्षा करनी चाहिये । विषमाग्निमें वायुकी शान्ति, तीक्ष्णाग्निमें पित्तको शमन करनेवाली और मन्दाग्निमें, कफको प्रशमन करनेवाली क्रिया एवं लंघनादि करने चाहिये ॥ ३ ॥

हरीतकी भक्ष्यमाणा नागरेण गुडेन वा ।
सैन्धवोपहिता वापि सातत्येनाग्निदीपनी ॥ ४ ॥

हरड और सोंठके चूर्णको गुड वा सैन्धानमकके साथ प्रतिदिन सेवन करनेसे अग्नि दीपन होती है ॥ ४ ॥

समयावशूकमहौषधचूर्णं लीढं घृतेन गोसर्गे।
कुरुते क्षुधां सुखोदकं पीतं विश्वौषधं वैकम् ॥ ५ ॥

जवाखार और सोंठके चूर्णको समान भाग लेकर अथवा केवल सोंठके चूर्णको गौके घीमें मिलाकर प्रतिदिन प्रातःकाल चाटे और ऊपरसे कुछ गरम जल पीवे तो क्षुधाकी वृद्धि होती है ॥ ५ ॥

अन्नमण्डं पिबेदुष्णं हिङ्गुसौवर्चलान्वितम् ।
विषमोऽपि समस्तेन मन्दो दीप्येत पावकः ॥ ६ ॥

हींग और काला नमक मिलाकर भातका सुहाता २ मांड पीनेसे विषमाग्नि सम और मन्दाग्नि दीपन होती है ॥ ६ ॥

भोजनाग्रे सदा पथ्यं जिह्वाकण्ठविशोधनम् ।
अग्निसन्दीपनं हृद्यं लवणार्द्रकभक्षणम् ॥ ७ ॥

भोजन करनेसे पहले प्रतिदिन सैंधानमक और अदरखको भक्षण करनेसे जीभ और कण्ठकी शुद्धि होती है । अग्नि दीपन होती है और यह प्रयोग हृदयको हितकारी है ॥ ७ ॥

तीक्ष्णाग्निचिकित्सा ।

नारीक्षीरेण संयुक्तां पिबेतौदुम्बरीं त्वचम् ।
आभ्यां वा पायसं सिद्धं पिबेदत्यग्निशान्तये ॥ १ ॥
यत् किञ्चिद् गुरु मेध्यं च श्लेष्मकारि च भेषजम् ।
सर्वं तदत्यग्निहितं भुक्त्वा प्रस्वपनं दिवा ॥ २ ॥

तीक्ष्णाग्निको शान्त करनेके लिये गूलरकी छालको स्त्रीके दूधमें पीसकर पान करे अथवा स्त्रीके दूध और गूलरकी छालकी खीर बनाकर सेवन करे। एवं गुरुपाकी मेध्य और कफकारक जितने पदार्थ या औषध हैं, उन सबको सेवन करना और दिनमें सोना ये सब तीक्ष्णाग्निवाले रोगीके लिये हितकर है ॥ १ ॥ २ ॥

मुहुर्मुहुरजीर्णेऽपि भोज्यमस्योपकल्पयेत् ।
निरिन्धनोऽन्तरं लब्ध्वा यथैनं न निपातयेत् ॥ ३ ॥

तीक्ष्ण अग्निवाले मनुष्यको अजीर्ण होनेपर भी वारवार भोजन कराना चाहिये। कारण जिससे भोजनरूपी ईंधनके विना जठराग्नि अवसर पाकर शरीरके रसादिको सुखाकर रोगीको नष्ट न करदेवे ॥ ३ ॥

आमाजीर्णचिकित्सा ।

तत्रामे वमनं कार्यं विदग्धे लंघनं हितम् ॥ १ ॥

आमके अजीर्णमें वमन और विदग्धाजीर्णमें लंघन कराने उपयोगी हैं ॥ १ ॥

वचालवणतोयेन वान्तिरामे प्रशस्यते ।
कणासिन्धुवचाकल्कं पीत्वा च शिशिराम्भसा ॥ २ ॥

आमयुक्त अजीर्णमें वच और सेंधनमकके चूर्णको गरम जल डालकर पान करानेसे अथवा पीपल सेंधानमक और वच इनके कल्कको शीतल जलके साथ पान करानेसे वमन होकर आम शान्त होती है ॥ २ ॥

धान्यनागरसिद्धं तु तोयं दद्याद्विचक्षणः ।
आमाजीर्णप्रशमनं दीपनं बस्तिशोधनम् ॥ ३ ॥

धनियाँ और सोंठका क्वाथ सेवन करनेसे अमाजीर्ण शमन होता है, अग्निदीपन होती है और मूत्राशय शुद्ध होता है ॥ ३ ॥

भवेद्यदा प्रातरजीर्णशङ्का तदाऽभयां नागरसैन्धवाभ्याम् ।
विचूर्णितां शीतजलेन भुक्त्वा भुञ्ज्यादशङ्कं मितमन्नकाले ॥

यदि प्रातःसमय अजीर्णकी आशंका हो तो हरड, सोंठ और सैंधानमक इनको एकत्र पीसकर शीतल जलके साथ पान करके भोजनके समय थोडा भोजन कराना चाहिये ॥ ४ ॥

चित्रकगुडिका ।

चित्रकं पिप्पलीमूलं द्वौ क्षारौ लवणानि च ।
व्योषं हिङ्ग्वजमोदां च चव्यं चैकत्र चूर्णयेत् ॥ ५ ॥
सौवर्चलं सैन्धवं च विडमौद्भिदमेव च ।
सामुद्रेण समं पञ्चलवणान्यत्र योजयेत् ॥ ६ ॥
गुडिका मातुलुङ्गस्य दाडिमस्य रसेन वा ।
कृत्वा विपाचयत्यामं दीपयत्याशु चानलम् ॥ ७ ॥

[दृष्टफलोऽयम्]

चीतेकी जड, पीपलामूल, जवाखार, सज्जी, काला नमक, सैन्धानमक, विरिया-संचर नमक, साम्भर नमक, सामुद्र नमक, पीपल, मिरच, हींग, अजमोद और चव्य इन सबको समान भाग लेकर एकत्र चूर्ण करलेवे अथवा बिजौरे नीम्बूके रसमें किंवा अनारके रसमें खरल करके एक एक माशेकी गोलियां बनाकर सेवन करे तो यह गोली आमको तत्काल पचाती है और अग्निको दीपन करती है। यह अनुभवसिद्ध प्रयोग है ॥ ५-७ ॥

विदग्धाजीर्णचिकित्सा।

अन्नं विदग्धं हि नरस्य शीघ्रं
शीताम्बुना वै परिपाकमेति।
तत्तस्य शैत्येन निहन्ति पित्त-
माक्लेदिभावाच्च नयत्यधस्तात् ॥ १ ॥

शीतल जल पान करनेसे मनुष्यके विदग्ध अन्न शीघ्र पचजाता है एवं जलकी शीतलताके कारण पित्त प्रशमित होता है और क्लेदयुक्त (द्रव) होनेसे भोजनको नीचे गेरदेता है ॥ १ ॥

विदह्यते यस्य च भुक्तमात्रं दह्येत हृत्कोष्ठगलं च यस्य।
द्राक्षासितामाक्षिकसंप्रयुक्तां लीढ्वाऽभयां वै स सुखं लभेत ॥२॥

जिसके भोजन करते ही दाह उत्पन्न हो एवं हृदय, कोष्ठ और गलेमें जलन हो तो दाख, मिश्री, शहद और हरड इन सबको एकत्र मिलाकर सेवन करनेसे सुख प्राप्त होता है ॥ २ ॥

हरीतकी धान्यतुषोदसिद्धा सपिप्पली सैन्धवहिंगुयुक्ता।
सोद्गारधूमं भृशमप्यजीर्णं विभज्य सद्यो जनयेत्क्षुधां च ॥३॥

हरड धान्य तुषोदकनामक कांजीमें पकाकर उसमें पीपल, सैंधानमक और हींग मिलाकर सेवन करे तो यह धुएँकी समान डकारोंका आना और अत्यन्त प्रबल अजीर्णको नष्ट करके क्षुधाको तत्काल उत्पन्न करता है ॥ ३ ॥

विष्टब्धरसशेषाजीर्णचिकित्सा।

विष्टब्धे स्वेदनं पथ्यं पेयं च लवणोदकम्।
रसशेषे दिवास्वप्नो लङ्घनं वातवर्ज्जनम् ॥ १ ॥

विष्टब्ध अजीर्णमें पसीना निकलवाना और सैंधानमक मिला हुआ जल पान करना हितकारी है। एवं रसशेषाजीर्णमें दिनमें सोना, लंघन करना और वातरहित स्थानमें रहना उत्तम है ॥ १ ॥

व्यायामप्रमदाध्ववाहनरतान् क्लान्तानतीसारिणः
शूलश्वासवतस्तृषापरिगतान् हिक्कामरुत्पीडितान्।
क्षीणान् क्षीणकफाञ्छिशून्मदहतान् वृद्धान् रसाजीर्णिनो
रात्रौ जागरितान्नरान् निरशनान् कामं दिवा स्वापयेत्॥ २॥

रसशेषाजीर्णमें व्यायाम, दण्ड कसरत आदि परिश्रम, स्त्रीप्रसङ्ग, मार्ग चलने और घोड़े आदिकी सवारीपर चढ़नेसे थकेहुए मनुष्योंको एवं अतीसार, शूल, श्वास, तृषा, हिचकी और वायुसे पीडित रोगियोंको तथा क्षीणकफवाले, बालक, मद्यपीनेसे बेहोश, वृद्ध, अजीर्णरसवाले, रात्रिमे जागनेवाले और लंघन करनेवाले ऐसे मनुष्योंको दिनमें यथेच्छ शयन करानाही श्रेष्ठ है॥ २॥

आलिप्य जठरं प्राज्ञो हिङ्गुत्र्यूषणसैन्धवैः।
दिवास्वप्नं प्रकुर्वीत सर्वाजीर्णप्रणाशनम्॥ ३॥

हींग, सोंठ, पीपल, मिरच और सेंधानमक इनको पीसकर पेटपर लेप करके दिनमें शयन करानेसे सर्वप्रकारका अजीर्ण नष्ट होता है॥ ३॥

पथ्यात्रिक।

पथ्यापिप्पलिसंयुक्तं चूर्णं सौवर्चलं पिबेत्।
मस्तुनोष्णोदकेनाथ बुद्ध्वा दोषगतिं भिषक्॥ ४॥
चतुर्विधमजीर्णं च मन्दानलमथारुचिम्।
आध्मानं वातगुल्मं च शूलं चाशु नियच्छति॥ ५॥

हरड, पीपल और कालानमक इनके चूर्णको समान भाग लेकर दहीके पानी अथवा उष्णजलके साथ दोषोंकी गतिको जानकर वैद्य पान करानेसे चारों प्रकारका अजीर्ण, मन्दाग्नि, अरुचि, अफारा, वातगुल्म और शूल ये सब तत्काल दूर होते हैं॥ ४॥ ५॥

विशिष्टद्रव्याजीर्णकी विधि।

फलं पनसपाकाय फलं कदलसम्भवम्।
कदलस्य तु पाकाय बुधैरपि घृतं हितम्॥
घृतस्य परिपाकाय जम्बीरस्य रसो हितः॥ ६॥
नारिकेलफलतालबीजयोः पाचकं सपदि तण्डुलं विदुः।
क्षीरमेव सहकारपाचनं चारमज्जनि हरीतकी हिता॥ ७॥

मधूकमालूरनृपादनानां परूषखर्ज्जूरकपित्थकानाम् ।
पाकाय पेयं पिचुमर्दबीजं घृतेऽपि तक्रेऽपि तदेव पथ्यम् ॥८॥
खर्ज्जूरशृङ्गाटकयोः प्रशस्तं विश्वौषधं कुत्र च भद्रमुस्तम् ।
यज्ञाङ्गबोधिद्रुफलेषु शस्तं भुक्ते तथा पर्युषितः प्रपीतम् ॥९॥
तण्डुलेषु च पयः पयस्स्वथो दीपकं तु चिपिटे कणायुतः ।
षष्टिका दधिजलेन जीर्य्यते कर्कटी च सुमनेषु जीर्य्यते॥१०॥

कटहलके खानेसे अजीर्ण हुआ हो तो उसको पचानेके लिये केला खाना चाहिये। यदि केलेके खानेसे अजीर्ण हुआ हो तो घृत पान कराना चाहिये। घृतके अजीर्णमें जम्बीरीनींबूका रस पीना चाहिये। नारियल और ताडके फलोंके अजीर्णमें भात चावलोंका खाना चाहिये। आमको पचानेके लिये दूध सर्वश्रेष्ठ है। चिरोंजीके अजीर्णमें हरड सेवन करना हितकारी है। महुआ, बेल, खिरनी, फालसे खजूर और कैथको पचानेके लिये नीमके बीजों (निबोलियों) को पीसकर पीना चाहिये। घृत और मट्ठेके अजीर्णमें भी नीमके बीजों (निबोलियों) को सेवन करना चाहिये। खजूर और सिंघाडेके अजीर्णमें सोंठ और किसी किसी मतसे नागरमोथेको सेवन करना चाहिये। गूलर, पीपलके फल और पाखरके फलको खानेसे हुए अजीर्णमें बासीजल पान करना चाहिये। चावलोंके अजीर्णमें दूध, दूधके अजीर्णमें अजवायन और चिवडे अर्थात् चौलोंके अजीर्णमें पीपल और अजवायनका चूर्ण सेवन करना चाहिये। साठीके चावल दहीके तोडको पीनेसे पचते हैं और ककडी-गहूक पदार्थ खानेसे पचजाती है ॥ ८-१० ॥

गोधूममाषहरिमन्थसतीनमुद्ग-
पाको भवेज्झटिति मातुलपुत्रकेण ।
खर्ज्जूरिकाबिसकशेरुसितासु शस्तः
शृंगाटके मधुफलेष्वपि भद्रमुस्तम् ॥ ११ ॥

कङ्गुश्यामाकनीवाराः कुलित्थाश्चाविलम्बितम् ।
दध्नो जलेन जीर्यन्ति वैदलः काञ्जिकेन तु ॥ १२ ॥
पिष्टान्नं शीतलं वारि कृसरां सैन्धवं पचेत् ।
माषेण्डरीं निम्बुफलं पायसं मुद्गयूषकः ॥ १२ ॥

वटो वेशवाराच्चवङ्गेन फेनी समं पर्पटः शिग्रुबीजेन याति।
कणामूलतोलड्डुकापूपसठ्यादिपाको भवेत्तण्डुलीमण्डयोश्च ॥

गेहूँ, उरद, चने, मटर और मूँग इन सबका अजीर्ण धतूरेके बीजोंको सेवन करनेसे शीघ्र दूर होता है। पिण्डखजूर, भसींडा, कशेरु, मिश्री, सिंघाडे और छुहारेके अजीर्णमें नागरमोथेका सेवन उत्तम है। कंगनी, समा, नीवारधान और कुलथी ये अन्न दहीके पानीके सेवनसे शीघ्र जीर्ण होजाते हैं और कांजीके सेवनसे सर्व प्रकारके दो दलवाले अन्न पचजाते हैं। पिष्टान्न (पिट्ठीके बने मिष्टान्नादि) पदार्थोंके अजीर्णमें शीतलजल और खिचडीके अजीर्णमें सैंधानमक सेवन करना चाहिये। इमरतीके अजीर्णको कागजी नींबूका रस और खीरको मूँगका यूष पचादेताहै। बडे वेशवार (मसाले) चरपटे सेवन करनेसे और फेनी लौंगके सेवन करनेसे पचती है। पापडका अजीर्ण सहिंजनेके बीजोंको खानेसे दूर होता है। लड्डुओंके अजीर्णमें पीपलामूलका चूर्ण गरम जलके साथ सेवन करना चाहिये। मालपुये और सठ्यकादि अजीर्णमें तिलमिश्रित यवागू सवन करना चाहिये ॥ ११-१४ ॥

विषूचिकाकी चिकित्सा।

विषूचिकायां वमितं विरिक्तं सुलङ्घितं वा मनुजं विदित्वा।
पेयादिभिर्दीपनपाचनैश्च सम्यक् क्षुधार्त्तं समुपक्रमेत ॥ १ ॥

विषूचिका (हैजा) में वमन, विरेचन और लंघन करानेके पश्चात् रोगीको अच्छे प्रकारसे भूँख लगनेपर अग्निप्रदीपक और दोषोंको पचानेवाले पेयादि हल्का पथ्य देना चाहिये ॥ १ ॥

जलपीतमपामार्गमूलं हन्ति विषूचिकाम् ॥ २ ॥

चिरचिटेकी जडको जलमें पीसकर सेवन करनेसे विषूचिकरोग दूर हो ॥ २ ॥

कुष्ठसैन्धवयोः कल्कं चुक्रतैलसमन्वितम्।
विषूच्या मर्दनं कोष्णं खल्लीशूलनिवारणम् ॥ ३ ॥

विषूचिकामें कूठ और सैंधानमकके चूर्णको चूक और तिलके तेलमें मिलाकर गरम करके सुहाता २ पेटपर लेप करनेसे खल्लीशूल दूर होताहै ॥ ३ ॥

व्योषं करञ्जस्य फलं हरिद्रा-
मूलं समावाप्य च मातुलुङ्ग्याः।
छायाविशुष्का गुडिकाः कृतास्ता
हन्युर्विषूचीं नयनाञ्जनेन ॥ ४ ॥

सोंठ, पीपल, मिरच, करंजुयेके फल, हल्दी और बिजौरेनींबूकी जड इन सबको समान भाग लेकर जलमें खरल करके गोलियाँ बनाकर छायामें सुखा लेवे । इन गोलियोंको घिसकर आँखोंमें आँजनेसे विषूचिका नष्ट होती है ॥ ४ ॥

गुडपुष्पसारशिखरीतण्डुलगिरिकर्णिकहरिद्राभिः ।
अंजनगुडिका विलयति विषूचिकां त्रिकटुसंयुक्ता ॥ ५ ॥

महुएका सार, चिरचिटेके चावल, सफेद अपराजिताकी जड, हल्दी, सोंठ, पीपल और काली मिरच इन सबको एकत्र पीसकर गोलियाँ बनालेवे । यह गोली आँखोंमें आँजतेही विषूचिकारोगको दूर करती है ॥ ५ ॥

त्वक्पत्ररास्नागुरुशिग्रुकुष्ठैरम्लप्रपिष्टैः सवचाशताह्वैः ।
उद्वर्तनं खल्लिविषूचिकाघ्नं तैलं विपक्वं च तदर्थकारि ॥ ६ ॥

दालचीनी, तेजपात, अगर, सहिंजनेकी छाल, कूठ, वच और सोया इनको समान भाग लेकर काँजीमें पीसकर पेटपर मलनेसे खल्लीरोग और विषूचिका रोग नष्ट होता है । अथवा उक्त औषधियों और काँजीके द्वारा तिलके तैलको यथाविधि पकाकर मालिश करनेसे भी वैसाही गुण होता है ॥ ६ ॥

अलसकचिकित्सा ।

वमनं त्वलसे पूर्वं लवणेनोष्णवारिणा ।
स्वेदो वर्त्तिर्लङ्घनं च क्रमश्चातोऽग्निवर्द्धनः ॥ १ ॥

अलसकरोगमें पहले सैंधानमक मिश्रित गरम जलपान कराकर वमन करावे फिर स्वेद, वर्त्ति, लंघन और अग्निवर्द्धक औषधियोंका प्रयोग इन क्रियाओंको क्रमपूर्वक करे ॥ १ ॥

उदरकी पीडाकी चिकित्सा ।

सरुक् चानद्धमुदरमम्लपिष्टैः प्रलेपयेत् ।
दारुहैमवतीकुष्ठशताह्वाहिङ्गुसैन्धवैः ॥ १ ॥

देवदारु, वच, कूठ, सौंफ, हींग और सैंधानमक इन औषधियोंको समान भाग लेकर काँजीमें पीसकर उदरपर प्रलेप करनेसे पेटकी पीडा और अफारा दूर होती है ॥ १ ॥

तक्रेण युक्तं यवचूर्णमुष्णं सक्षारमार्तिं जठरे निहन्यात् ।
स्वेदो घटैर्वा बहुबाष्पपूर्णैरुष्णैस्तथाऽन्यैरपि पाणितापैः ॥२॥

जौके चूर्णको मट्ठेमें सानकर और गरम करके नाभिके चारों ओर लेप करे अथवा मट्ठा, जौचूर्ण और जवाखार इन सबको एक घडेमें भरकर पकावे या हाथोंको

गरम करके पेटको बार बार सेक करनेसे इस प्रकार घड़ेमें गरम कांजी भरकर हल्के स्वेद देनेसे भी उदरकी पीडा दूर होती है ॥ २ ॥

तीव्रार्त्तिरपि नाजीर्णी पिबेच्छूलघ्नमौषधम्।
दोषच्छन्नोऽनलो नालं पक्तुं दोषौषधाशनम् ॥ ३ ॥

ऊर्ध्वमार्गगत रक्तपित्तमें–रोगीके बल और मांसके क्षीण न होनेपर एवं अग्निके प्रदीप्त होनेपर पहले उसको लंघन कराने चाहिये ॥ २ ॥

ऊर्ध्वगे तर्पणं पूर्वं कर्त्तव्यं च विरेचनम् ।
प्रागधोगमने पेया वमनं च यथाबलम् ॥ ३ ॥

ऊर्ध्वगत रक्तपित्तरोगमें–पहले तृप्तिजनक क्रियायें और फिर विरेचन देना चाहिये । एवं अधोगत रक्तपित्तमें प्रथम भोजनके विषे पेय देवे, फिर उसके बलानुसार वमन कराकर दोषोंको दूर करे ॥ ३ ॥

शालिषष्टिकनीवारकोरदूषप्रशातिकाः ।
श्यामाकश्च प्रियङ्गुश्च भोजनं रक्तपित्तिनाम् ॥ ४ ॥

पुराने शालिचावल, सांठी चावल, नीवार, (लडियाधान,) कोदों, लालनीवार, समा और कंगनी चावल ये सब अन्न रक्तपित्तवाले रोगियोंको भोजनके लिये देने चाहिये ॥ ४ ॥

मसूरमुद्गचणकाः समुकुष्ठाढकीफलाः।
प्रशस्ताः सूपयूषार्थं कल्पिता रक्तपित्तिनाम् ॥ ५ ॥

रक्तपित्तवाले रोगीको मसूर, मूँग, चने मोठ और अरहर इन सबकी दालोंका यूष देना चाहिये ॥ ५ ॥

शाकं पटोलवेत्राग्रतण्डुलीयादिकं हितम्।
मांसं लावकपोतादिशशैणहरिणादिजम् ॥ ६ ॥

रक्तपित्तवाले रोगीको—पटोलपात, बेतका अग्रभाग, चौलाई आदिका शाक एवं लवा, कबूतर, खरगोश और काला हिरन आदि जीवोंका मांस हितकारी है ॥

क्षीणमांसबलं वृद्धं बालं शोषानुबन्धिनम्।
अवम्यमविरेच्यं च स्तम्भनैः समुपाचरेत् ॥ ७ ॥

जिसका मांस और बल क्षीण होगया हो, एवं वृद्ध, बालक और जो शोष-रोगसे पीडित हो ऐसे रक्तपित्तरोगीको वमन आर विरेचन नहीं कराने चाहिये, किन्तु स्तंभन औषधिके द्वारा चिकित्सा करना चाहिये ॥ ७ ॥

वृषपत्राणि निष्पीड्य रसं समधुशर्करम्।
पिबेत्तेन शमं याति रक्तपित्तं सुदारुणम् ॥ ८ ॥

अडूसेके पत्तोंको एक बर्त्तनमें भरकर और दूसरे बर्त्तनसे उसको ढककर कुछ देरतक अग्निपर गरम करे। फिर उनको निचोडकर रस निकाल लेवे। उसमेंसे दो दा ताल प्रमाण रसको शहद और मिश्रीमें मिलाकर पीनेसे दारुण रक्तपित्तरोग शमन होता है ॥ ८॥

समाक्षिकः फल्गुफलोद्भवो वा पीतो रसः शोणितमाशु हन्ति॥९॥

कठूमरके फलोंका रस २ तोले लेकर शहदमें मिलाकर पीनेसे रक्तपित्तरोग नष्ट होता है ॥ ९ ॥

अभया मधुसंयुक्ता पाचनी दीपनी मता।
श्लेष्माणं रक्तपित्तं च हन्ति शूलातिसारनुत ॥ १० ॥

हरडको शहदमें मिलाकर सेवन करनेसे आमका परिपाक होकर अग्नि दीपन होती है एवं कफ, रक्तपित्त, शूल और अतिसार आदि रोग शीघ्र दूर होते हैं१०॥

वासकस्वरसे पथ्या सप्तधा परिभाविता।
कृष्णा वा मधुना लीढा रक्तपित्तं द्रुतं जयेत् ॥ ११ ॥

अडूसेके रसमें हरडको सातवार भावना देकर सेवन करनेसे अथवा पीपलको शहदमें मिलाकर सेवन करनेसे रक्तपित्तरोग शीघ्र दूर होता है ॥ ११ ॥

पक्कोदुम्बरकाश्मर्यपथ्याखर्जूरगोस्तनाः।
मधुना घ्नन्ति संलीढा रक्तपित्तं पृथक् पृथक् ॥ १२ ॥

गूलरके पके फल, कुम्भेर, हरड, खजूर और दाख ये सब औषधि रक्तपित्तरोगनाशक हैं। इसलिये रक्तपित्तको दूर करनेके लिये इनमेंसे किसी एक औषधिको शहदमें मिलाकर सेवन करे ॥ १२ ॥

खदिरस्य प्रियंगूनां कोविदारस्य शाल्मलेः।
पुष्पं चूर्णं तु मधुना लिहन्नारोग्यमश्नुते ॥ १३ ॥

खैर, फूलप्रियंगु, कचनार और सेमल इनमेंसे किसी एकके फूलोंका चूर्ण शहदके साथ मिलाकर सेवन करनेसे रक्तपित्तरोग दूर होता है ॥ १३ ॥

लाक्षाचूर्णं सुकृतं क्षौद्राज्यसमन्वितं सकृल्लीढम्।
शमयति सोद्धतवमनं सरक्तपित्तस्य सिद्धमिदम् ॥१४॥

लाखका बारीक चूर्ण ६ मासे लेकर शहद और घीमें मिलाकर एकबार चाटनेसे ही वमन और रक्तपित्त दूर होता है ॥ १४ ॥

द्राक्षामधुककाश्मर्यसितायुक्तं विरेचनम्।
यष्टीमधुकयुक्तं च सक्षौद्रं वमने हितम् ॥ १५ ॥

रक्तपित्तरोगमें—दाख, मुलहठी और कुम्भेर इनके चूर्णको मिश्रीमें मिलाकर विरेचनके लिये और मुलहठीके चूर्णको शहदमें मिलाकर वमनके लिये देना अत्युत्तम है ॥ १५ ॥

लङ्घितस्य ततः पेयां विदध्यात्स्वल्पतण्डुलाम्।
तर्पणं पाचनं लेहान् सर्पींषि विविधानि च ॥ १६ ॥

लंघन करानेके पश्चात् थोडे चावलोंकी बनाई हुई पेया पान करावे फिर तर्पण, पाचन, अवलेह और विविध प्रकारके घृत प्रयोग करे ॥ १६ ॥

तर्पणं सघृतक्षौद्रलाजचूर्णैः प्रदापयेत्।
ऊर्ध्वगं रक्तपित्तं तत्पीतकाले व्यपोहति ॥ १७ ॥

जलं खर्जूरमृद्वीकामधुकैः सपरूषकैः ।
शृतशीतं प्रयोक्तव्यं तर्पणार्थं सशर्करम् ॥ १८ ॥

ऊर्ध्वगत रक्तपित्तरोगमें खीलोंके चूर्णको घृत और शहदमें मिलाकर रोगीको खानेके लिये देवे अथवा छुहारा, दाख, मुलहठी और फालसे इनका षडंग पानीय विधिके अनुसार बनाया हुआ शीतल काथ मिश्री मिलाकर पान करानेसे रक्तपित्त-रोग शमन होता है ॥ १७ ॥ १८ ॥

त्रिवृता त्रिफला श्यामा पिप्पली शर्करा मधु ।
मोदकः सन्निपातोर्द्ध्वरक्तपित्तज्वरापहः ॥ १९ ॥

ऊर्ध्वगत रक्तपित्तमें यदि हो -सोंत, त्रिफला, अनन्तमूल और पीपल इन सबका चूर्ण समान भाग और समस्त चूर्णसे दुगुनी खाँड एवं शहद मिलाकर लड्डू बनालेवे । इनके सेवनसे ऊर्ध्वगत रक्तपित्त और सन्निपात ज्वर दूर होता है ॥१९॥

शालपर्ण्यादिना सिद्धा पेया पूर्वमधोगते ।
वमनं मदनोन्मिश्रो मन्थः सक्षौद्रशर्करः ॥ २० ॥

अधोगत रक्तपित्तमें पहले शालपर्णी आदि स्वल्प पञ्चमूलके काथमें सिद्ध की हुई पेया सेवन करावे । फिर वमनक लिये मैनफल, शहद और खांड मिलाहुआ मन्थ बनाकर देवे ॥ २० ॥

विना शुण्ठीं षडङ्गेन सिद्धं तोयं च दापयेत् ॥ २१ ॥

रक्तपित्तरोगीको ज्वराधिकारमें कहेहुए षडंग पानीयकी औषधियों (नागरमोथा, पित्तपापडा, सुगन्धवाला, खस, सोंठ और लालचन्दन) मेंसे सोंठको निकालकर अन्य ५ औषधियोंके द्वारा सिद्ध किया हुआ ठंढा काथ पान करावे ॥ २१ ॥

आटरूषकनिर्यूहे प्रियंगुमृत्तिकाञ्जने ।
विनीय लोध्रं सक्षौद्रं रक्तपित्तहरं पिबेत् ॥ २२ ॥

अडूसेके क्वाथमें फूलप्रियंगु, मृत्तिका, अञ्जन, लोध और शहद डालकर पीनेसे रक्तपित्त दूर होता है ॥ २२ ॥

वासाकषायोत्पलमृत्प्रियङ्गुलोध्राञ्जनाम्भोरुहकेशराणि ।
पीत्वा सिताक्षौद्रयुतानिहन्यात्पित्तासृजोवेंगमुदीर्णमाशु॥२३॥

अडूसेके क्वाथमें उत्पल (नीलोफर), गोपीचन्दन, फूलप्रियंगु, लोध, रसौत और कमलकी केशर इनका समान भाग चूर्ण शहद और मिश्री मिलाकर पान करनेसे अत्यन्त वेगवान् रक्तपित्त शीघ्र नष्ट होता है ॥ २३ ॥

तालीशचूर्णसहितः पेयः क्षौद्रेण वासकस्वरसः ।
कफपित्ततमकश्वासस्वरभेदरक्तपित्तहरः ॥ २४ ॥

अडूसेके स्वरसमें तालीशपत्रका चूर्ण और शहद मिलाकर पीनेसे कफपित्त, तमकश्वास, स्वरभेद और रक्तपित्तरोग शमन होता है ॥ २४ ॥

वासायां विद्यमानायामाशायां जीवितस्य च ।
रक्तपित्ती क्षयी कासी किमर्थमवसीदति ॥ २५ ॥

रक्तपित्त, श्वास, क्षय और खाँसीवाले रोगियोंके लिये अडूसेकी समान अन्य हितकर औषधि नहीं है । इसलिये अडूसेके विद्यमान रहतेहुए उक्तरोगवाले मनुष्य जीवनकी आशा करनेमें क्यों दुःखी होते हैं ? ॥ २५ ॥

मद्यन्त्यङ्घ्रिजः क्वाथस्तद्वत् समधुशर्करः ।

मोतियाकी जडके क्वाथमें शहद और मिश्री मिलाकर पीनेसे रक्तपित्त नष्ट होता है ॥

अतसीकुसुमसमङ्गा वटावरोहत्वगम्भसा पीता ।
प्रशमयति रक्तपित्तं यदि भुङ्क्ते मुद्गयूषेण ॥ २६ ॥

अलसीके फूल, लज्जावन्ती, बडके अंकुर और छाल इन सबको समान भाग लेकर जलके साथ पीसकर पान करनेसे और मूँगके यूषका पथ्य देनेसे रक्तपित्त शमन होता है ॥ २६ ॥

घ्राणप्रवृत्ते जलमाशु देयं सशर्करं नासिकया पयो वा ।
द्राक्षारसं क्षीरघृतं पिबेद्वा सशर्करं चेक्षुरसं हितं वा ॥२७॥

नासिकाके द्वारा रक्तस्राव होनेपर तत्काल जलको अथवा दूधको शर्करा मिलाकर नासिकाद्वारा पान करे । अथवा दाखोंका स्वरस (या क्वाथ) या दूधमेंसे निकला-हुआ घी अर्थात् मक्खन अथवा ईखका रस मिश्री मिलाकर नासिकासे पान करना हितकर है ॥ २७ ॥

नस्यं दाडिमपुष्पाख्यो रसो दूर्वाभवोऽथवा ।
आम्रास्थिजः पलाण्डोर्वा नासिकास्रुतरक्तजित् ॥ २८ ॥

अनारके फूलोंका रस अथवा दूबका स्वरस आमकी गुठलीका चूर्ण अथवा प्याजका स्वरस इनमेंसे किसी एक रसका नस्य लेनेसे नासिकाके द्वारा रक्तका स्राव होना दूर होता है ॥ २८ ॥

रसो दाडिमपुष्पस्य दूर्वारससमन्वितः।
अलक्तकरसोपेतः पथ्यया वा समन्वितः ॥ २९ ॥
योजितो नस्यतः क्षिप्रं त्रिदोषमपि देहिनाम्।
नासाप्रवृत्तं रक्तं तु हन्यादेव न संशयः ॥ ३० ॥

अनारके फूलोंका स्वरस और दूबका स्वरस दोनोंको एकत्र मिलाकर अथवा आलका क्वाथ और हरडका कषाय मिलाकर नस्य देनेसे त्रिदोषजनित नासिकागत रक्तस्राव निस्सन्देह तत्काल बन्द होता है ॥ २९ ॥ ३० ॥

नासाप्रवृत्तरुधिरं घृतभृष्टं श्लक्ष्णपिष्टमामलकम्।
सेतुरिव तोयवेगं रुणद्धि मूर्ध्नि प्रलेपेन ॥ ३१ ॥

आमलोंको खूब बारीक पीसकर और घीमें भूनकर मस्तकपर लेप करे तो नासिकासे होनेवाला रक्तस्राव इस प्रकार तत्काल नष्ट होता है, जैसे पुलके द्वारा जलका वेग रुक जाता है ॥ ३१ ॥

मेढ्रगेऽतिप्रवृत्ते तु वस्तिरुत्तरसंज्ञितः।
शृतं क्षीरं पिबेद्वापि पञ्चमूल्या तृणाह्वया ॥ ३२ ॥

लिंगके द्वारा रक्तका स्राव होनेपर प्रथम वस्तिक्रिया करे। फिर पंच तृणमूल (कुशा, काँस, रामरस, काली ईख और धान पाँचोंकी जडको पंच तृणमूल कहते हैं) को दूधमें औटाकर पान करे तो लिंगगत रक्तपित्त रोग दूर होता है ॥ ३२ ॥

ह्रीबेरादि।

ह्रीबेरमुत्पलं धान्यं चन्दनं यष्टिकाऽमृताः।
उशीरं च त्रिवृच्चैषां क्वाथं समधुशर्करम् ॥ ३३ ॥
पाययेत्तेन सद्यो हि रक्तस्रुतिः प्रशाम्यति।
रक्तपित्तं जयत्युग्रं तृष्णां दाहं ज्वरं तथा ॥ ३४ ॥

सुगन्धवाला, नीलकमल, धनियाँ, लालचन्दन, मुलहठी, गिलोय, खस और निसोथ इनके क्वाथको शहद और चीनी मिलाकर पान करानेसे दारुण रक्तपित्त, रुधिरका स्राव, तृषा, दाह और ज्वर ये सब रोग नष्ट होते हैं ३३ ॥ ३४ ॥

वासकादि।

वासापत्रसमुद्भूतो रसः समधुशर्करः।
क्वाथो वा हरते पीतो रक्तपित्तं सुदारुणम् ॥ ३५ ॥

अडूसेके पत्तोंका स्वरस अथवा काथ शहद और मिश्री मिलाकर पान करनेसे अत्यन्त दारुण रक्तपित्तरोग दूर होता है ॥ ३५ ॥

धान्यकादि ।

धन्याकधात्रीवासानां द्राक्षापर्पटयोर्हिमः ।
रक्तपित्तं ज्वरं दाहं तृष्णां शोषं च नाशयेत् ॥ ३६ ॥

धनियाँ, आमले, अडूसेके पत्ते, दाख और पित्तपापडा इनके शीतल काथको शहद और मिश्री मिलाकर पीनेसे रक्तपित्त, ज्वर, दाह, तृषा और शोष आदि रोग नष्ट होते हैं ॥ ३६ ॥

अटरूषकादि ।

अटरूषकमृद्वीकापथ्याक्काथः सशर्करः ।
क्षौद्राढ्यः श्वसनोत्क्लेशरक्तपित्तनिवारणः ॥ ३७ ॥

अडूसा, दाख और हरड इनके क्वाथमें चीनी और शहद डालकर पान करनेसे कठिनतासे श्वासका लेना, रक्तवमन, रक्तपित्त आदि रोग निवृत्त होते हैं ॥ ३७ ॥

उशीरादिचूर्ण ।

उशीरं तगरं शुण्ठी कक्कोलं चन्दनद्वयम् ।
लवङ्गं पिप्पलीमूलं कृष्णैला नागकेशरम् ॥ ३८ ॥
मुस्ता मधुककर्पूरं तुगाक्षीरी च पत्रकम् ।
कृष्णागुरुसमं चूर्णं सिता चाष्टगुणा तथा ।
रक्तवान्तिं च तापं च नाशयेन्नात्र संशयः ॥ ३९ ॥

खस, तगर, सोंठ, कङ्कोल, सफेद चन्दन, लाल चन्दन, लवङ्ग, पीपलामूल, बडी इलायची, नागकेशर, नागरमोथा, मुलहठी, कपूर, वंशलोचन और तेजपात इन सब औषधियोंका चूर्ण समान भाग और काली अगरका चूर्ण सम्पूर्ण चूर्णके बराबर भाग लेवे । फिर अगरके चूर्णसहित सब चूर्णसे अठगुनी मिश्री मिलाकर प्रतिदिन प्रातःकाल छः छः माशे परिमाण सेवन करे । इसका सेवन करनेसे रक्तवमन और शरीरका दाह नष्ट होता है ॥ ३८–३९ ॥

एलादिगुटिका ।

एलापत्रत्वचोऽर्द्धाक्षाः पिप्पल्यर्द्धपलं तथा ।
सितामधुकखर्जूरमृद्वीकाश्च पलोन्मिताः ॥ ४० ॥

सञ्चूर्ण्य मधुना युक्तां गुटिकां कारयेद्भिषक्।
अक्षमात्रां ततश्चैकां भक्षयेच्च दिने दिने ॥ ४१ ॥

इलायची १ तोला, तेजपात १ तोला, दालचीनी १ तोला, पीपल दो तोले और मिश्री, मुलहठी, खजूर और दाख ये प्रत्येक चार चार तोले लेवे। इन सबका एकत्र चूर्ण करके शहदके साथ खरल कर एक एक तोलेकी गोलियाँ बनालेवे। इनमेंसे प्रतिदिन प्रातःसमय एक एक गोली सेवन करे ॥ ४० ॥ ४१ ॥

श्वासं कासं ज्वरं हिक्कां छर्दिं मूर्च्छां मदं भ्रमम्।
रक्तनिष्ठीवनं तृष्णां पार्श्वशूलमरोचकम् ॥ ४२ ॥
शोषप्लीहाढ्यवातांश्च स्वरभेदं क्षतक्षयम्।
गुटिका तर्पणी वृष्या रक्तपित्तं विनाशयेत् ॥ ४३ ॥

इसको सेवन करनेसे श्वास, खाँसी, ज्वर, हिचकी, वमन, मूर्च्छा, मद, भ्रम, रुधिरका थूकना, तृषा, पसलीकी पीडा, अरुचि, शोषरोग, तिल्ली, आमवात, स्वरभेद, क्षतक्षय और रक्तपित्तादि सब रोग नष्ट होते हैं। यह वटी वीर्यवर्द्धक और तृप्तिकारक है ॥ ४२ ॥ ४३ ॥

अर्केश्वररस।

मृतार्कं मृतवङ्गं च मृताभ्रं च समाक्षिकम्।
अमृतास्वरसैर्भाव्यं त्रिसप्तकपुटे पचेत् ॥ ४४ ॥
वासाक्षीरविदारीभ्यां चतुर्गुञ्जाप्रमाणतः।
भक्षणाद्विनिहन्त्याशु रक्तपित्तं सुदारुणम् ॥ ४५ ॥

ताम्रभस्म, वङ्गभस्म, अभ्रकभस्म और सोनामाखीकी भस्म इन सबको समान भाग लेकर गिलोयके स्वरसमें २१ बार भावना देवे, फिर सम्पुटमें रखकर पकावे तो अर्केश्वर रस सिद्ध होता है। इसको चार चार रत्तीकी मात्रासे अडूसा और दूध विदारीकन्दके स्वरस वा क्वाथके साथ प्रतिदिन सेवन करनेसे अत्यन्त दारुण रक्तपित्तरोग शीघ्र नष्ट होता है ॥ ४४ ॥ ४५ ॥

रक्तपित्तान्तकरस।

मृताभ्रं मृततीक्ष्णं च माक्षिकं रसतालकम्।
गन्धकं च भवेत्तुल्यं यष्टिद्राक्षामृताद्रवैः ॥ ४६ ॥
दिनैकं मर्दयेत्खल्वे सिताक्षौद्रसमन्वितम्।
माषमात्रं निहन्त्याशु रक्तपित्तं सुदारुणम् ॥
ज्वरं दाहं क्षतक्षीणं तृष्णां शोषमरोचकम् ॥ ४७ ॥

अभ्रकभस्म, तीक्ष्ण लोहभस्म, सोनामाखीकी भस्म, शुद्ध पारा, शुद्ध हरताल और शुद्ध गन्धक इन सबको समान भाग लेकर मुलहठी, दाख और गिलोय इन प्रत्येकके क्वाथमें एक एक दिनतक खरल करे। फिर नित्यप्रति प्रातःकाल इसको एक एक मासे परिमाण मिश्री और शहदमें मिलाकर सेवन करे। इससे दुस्तर रक्तपित्त, ज्वर, दाह, क्षतक्षय, तृषा, शोथ और अरुचि आदि रोग दूर होते हैं ॥ ४६-४७ ॥

रसामृतरस।

रसस्य द्विगुणं गन्धं माक्षिकं च शिलाजतु।
गुडूची चन्दनं द्राक्षा मधुपुष्पं च धान्यकम् ॥ ४८ ॥
कुटजस्य त्वचं बीजं धातकी निम्बपत्रकम्।
यष्टीमधुसमायुक्तं मधुशर्करयाऽन्वितम् ॥ ४९ ॥
विधिना मर्दयित्वा तु कर्षमात्रं तु भक्षयेत्।
धारोष्णपयसा युक्तं प्रातरेव समुत्थितः ॥ ५०
पित्तं तथाऽम्लपित्तं च रक्तपित्तं विशेषतः।
निहन्ति सर्वदोषं च ज्वरं सर्वं न संशयः ॥
रसामृतरसो नाम गहनानन्दभाषितः ॥ ५१ ॥

शुद्ध पारा १ भाग, शुद्ध गन्धक २ भाग, सोनामाखीकी भस्म, शुद्ध शिलाजीत, गिलोय, लालचन्दन, दाख, महुएके फूल, धनियाँ, कुडेकी छाल, इन्द्रजौ, धायके फूल, नीमके पत्ते और मुलहठी—ये प्रत्येक एक एक भाग लेवे। सब औषधियोंको यथाविधि एकत्र कूट पीसकर बारीक चूर्ण करलेवे। इसमेंसे प्रतिदिन प्रातःकाल एक तोला परिमाण लेकर शहद और मिश्री मिलाकर धारोष्ण दूधके साथ सेवन करे। इसको सेवन करनेसे पित्त, अम्लपित्त, विशेषकर रक्तपित्त, ज्वर और अन्यान्य सर्वप्रकारके विकार नष्ट होते हैं। इस रसामृतनामक रसको श्रीगहनानन्दजीने निर्माण किया है ॥४८-५१॥

सुधानिधिरस।

सूतं गन्धं माक्षिकं लौहचूर्णं सर्वं घृष्टं त्रैफलेनोदकेन।
मूषामध्ये भूधरे तत्पुटित्वा दद्याद् गुंजां त्रैफलेनोदकेन ॥
लौहे पात्रे गोपयः पाचयित्वा रात्रौ दद्याद्रक्तपित्तप्रशान्त्यै ॥

शुद्ध पारा, शुद्ध गन्धक, सोनामाखीकी भस्म, लोहभस्म इन सबको समान भाग लेकर त्रिफलेके क्वाथमें एकदिनतक खरल करके एक घडियामें रखकर भूधरयन्त्रमें पकावे। जब पककर शीतल होजाय तब औषधि निकालकर खरल करलेवे। इसको प्रतिदिन रात्रिके समय एक एक रत्तीकी मात्रासे त्रिफलेके क्वाथके साथ सेवन करावे और ऊपरसे लोहेके पात्रमें गायका दूध औटाकर पान करावे। यह रस रक्तपित्तको नष्ट करनेके लिये अत्युत्तम है ॥ ९२ ॥

कपर्दकरस ।

मृतं वा मूर्च्छितं सूतं कार्पासकुसुमद्रवैः ।
मर्दयेद्दिनमेकं तु तेन पूर्या वराटिका ॥ ९३ ॥
निरुध्य चान्धमूषायां भाण्डे रुद्ध्वा पुटे पचेत् ।
उद्धृत्य चूर्णयेत् श्लक्ष्णं मरिचैर्द्विगुणैः सह ॥ ९४ ॥
गुञ्जामात्रं घृतेनैव भक्षयेत्प्रातरुत्थितः ।
उदुम्बरं घृतं चैव अनुपानं प्रयोजयेत् ॥
कपर्दकरसो नाम रक्तपित्तविनाशनः ॥ ९५ ॥

रससिन्दूर अथवा शुद्ध कियेहुए पारेको कपासके फूलोंके रसमें एक दिनतक खरल करके कौडीमें भरलेवे फिर उस कौडीको अन्धमूषानामक यन्त्रमें रखकर और उस यन्त्रको मिट्टीके पात्रमें बन्द करके पुटपाक करे। जब वह उत्तम प्रकारसे पककर अपने आप शीतल होजाय तब औषधि निकालकर उसमें दुगुना काली मिरचोंका चूर्ण मिलाकर लेवे। इसमेंसे प्रतिदिन प्रातःकाल एक एक रत्ती प्रमाण घृतके साथ मिलाकर सेवन करे। अनुपान—गूलरका रस और घृत। यह कपर्दक नामक रस रक्तपित्तनाशक है ॥ ९३–९५ ॥

समशर्कर लौह ।

लौहाच्चतुर्गुणं क्षीरमाज्यं द्विगुणमुत्तमम् ।
चूर्णं पादं तु वैडङ्गं दद्यान्मधुसिते समे ॥ ९६ ॥
ताम्रपात्रे शुभे पक्त्वा स्थापयेद् घृतभाजने ।
माषकादिक्रमेणैव भक्षयेद्विधिपूर्वकम् ॥ ९७ ॥
अनुपानं प्रयुञ्जीत नारिकेलजलादिकम् ।
रक्तपित्तं जयेत्तीव्रमम्लपित्तं क्षतक्षयम् ॥
पुष्टिदं कान्तिजननमायुष्यं वृष्यमुत्तमम् ॥ ९८ ॥

लोहभस्म ४ तोले, बकरीका दूध १६ तोले, घी ८ तोले, मिश्री ४ तोले, शहद ४ तोले और वायविडङ्गका चूर्ण लोहभस्मसे चौथाई भाग लेवे। प्रथम ताँबेके एक उत्तम पात्रमें लोह भस्म, दूध, घी और मिश्री इनको एकत्रकर पकावे। जब पाक उत्तम प्रकारसे सिद्ध होजाय तब नीचे उतारकर उसमें वायविडङ्गका चूर्ण मिलादेवे और शीतल होजानेपर शहद डालकर घीके चिकने बासनमें भरकर रख देवे। इसको प्रतिदिन एक एक मासेकी मात्रासे सेवन करने और ऊपरसे नारियलका जल पान करनेसे तीव्र अम्लपित्त, रक्तपित्त, क्षतक्षय आदि रोग दूर होते हैं। यह लोह-अत्यन्त पुष्टिकारक, कान्तिजनक, आयुकी वृद्धि करनेवाला और वृष्यतम है ॥ ५६-५८ ॥

शतमूल्यादिलौह।

शतमूलीसिताधान्यनागकेशरचन्दनैः।
त्रिकत्रयतिलैर्युक्तं लौहं सर्वगदापहम् ॥
तृष्णादाहज्वरच्छर्दिरक्तपित्तहरं परम् ॥ ५९ ॥

शतावर, मिश्री, धनियाँ, नागकेशर, लाल चन्दन, सोंठ, मिरच, पीपल, हरड, बहेडा, आमला, वायविडङ्ग नागरमोथा, चीतेके जडकी छाल और काले तिल इन सबका चूर्ण समान भाग और सब चूर्णकी बराबर लोहभस्म मिलाकर एकत्र खरल करके रखलेवे। उसको उचित मात्रासे नित्य शहदमें मिलाकर सेवन करे। इससे तृषा, दाह, ज्वर, वमन और रक्तपित्त दूर होता है ॥ ५९ ॥

शर्कराद्यलौह।

शर्करातिलसंयुक्तं त्रिकत्रययुतं त्वयः।
रक्तपित्तं निहन्त्याशु चाम्लपित्तहरं परम् ॥ ६० ॥

मिश्री, काले तिल, त्रिकुटा, त्रिफला और वायविडंङ्ग, नागरमोथा, चीता सब समान भाग ले सबको एकत्र मिलाकर सेवन करनेसे अम्लपित्त और रक्तपित्त शीघ्र नष्ट होता है ॥ ६० ॥

रक्तपित्तान्तकलौह।

धात्री च पिप्पलीचूर्णं तुल्यं तु सितया सह।
रक्तपित्तहरं लौहं योगराजमिति स्मृतम् ॥ ६१ ॥
वृष्याग्निदीपनं बल्यमम्लपित्तविनाशनम्।
पित्तोत्थानपि वातोत्थान्निहन्ति विविधान् गदान् ॥ ६२ ॥

आमले, पीपल और मिश्री प्रत्येक एक एक तोला और लोहभस्म २ तोले इन सबको जलके साथ खरल करके दो दो रत्तीकी मात्रासे सेवन करे। यह योगराज-लोह रक्तपित्त, अम्लपित्त और पित्तज तथा वातज अनेक प्रकारके विकारोंको नष्ट करता है। एवं अग्निको दीपन करनेवाला और बल-वीर्यवर्द्धक है॥

खंडकाद्यलोह।

शतावरीच्छिन्नरुहा वृषमुण्डीतिका बला।
तालमूली च गायत्री त्रिफलायास्त्वचस्तथा॥ ६३॥
भार्ङ्गी पुष्करमूलं च पृथक् पञ्चपलानि च।
जलद्रोणे विपक्तव्यमष्टभागावशेषितम्॥ ६४॥
दिव्यौषधिहतस्यापि माक्षिकेण हतस्य वा।
पलद्वादशकं देयं कान्तालौहस्य चूर्णितम्॥ ६५॥
खण्डतुल्यं घृतं देयं पलं षोडशिकं बुधैः।
पचेत्ताम्रमये पात्रे गुडपाको मतो यथा॥ ६६॥
प्रस्थार्द्धं मधुनो देय शुभाश्मजतुकं त्वचम्।
शृङ्गी कृष्णा विडङ्गं च शुण्ठ्यजाजी मलं पलम्॥ ६७॥
त्रिफला धान्यकं पत्रं द्व्यक्षं मरिचकेशरम्।
चूर्णं दत्त्वा सुमथितं स्निग्धभाण्डे निधापयेत्॥ ६८॥

शतावर, गिलोय, अडूसेकी छाल, गोरखमुंडी, गंगेरन, मुसली, खैरसार, त्रिफला, भारंगी, पोहकरमूल ये प्रत्येक औषधि बीस बीस तोले लेकर १ द्रोण जलमें पकावे। जब आठवाँ भाग जल शेष रहजाय तब उतारकर छानलेवे। फिर मैनसिलके द्वारा अथवा सुवर्णमाक्षिकके द्वारा भस्म किया हुआ कान्तलोह ४८ तोले खाँड ६४ तोले और घी ६४ तोले लेकर सबको उक्त क्वाथके साथ ताँबेके बर्त्तनमें पकावे, जब पकते पकते गुडपाककी समान गाढा होजाय तब उसमें वंश-लोचन, सिलाजीत, दारचीनी, काकडासिंगी, वायविडंग, पीपल, सोंठ और काला जीरा प्रत्येक चार चार तोले, एवं त्रिफला, धनियाँ, तेजपात, काली मिरच और केशर प्रत्येक दो दो तोले बारीक पीसकर डाल देवे और शीतल होनेपर ३२ तोले शहद मिलाकर चिकने बर्त्तनमें भरकर रखदेवे॥ ६३-६८॥

यथाकालं प्रयुञ्जीत बिडालपदकं ततः।
गव्यक्षीरानुपानं च सेव्यो मांसरसः पयः ॥ ६९ ॥
गुरुवृष्यान्नपानानि स्निग्धं मांसादि बृंहणम्।
रक्तपित्तं क्षयं कासं पंक्तिशूलं विशेषतः ॥ ७० ॥
वातरक्तं प्रमेहं च शीतपित्तं वमिं क्लमम्।
श्वयथुं पाण्डुरोगं च कुष्ठं प्लीहोदरं तथा ॥ ७१ ॥
आनाहं शोणितस्रावमम्लपित्तं निहन्ति च।
चक्षुष्यं बृंहणं वृष्यं माङ्गल्य प्रीतिवर्द्धनम् ॥ ७२ ॥
आरोग्यं पुत्रदं श्रेष्ठं कामाग्निबलवर्द्धनम्।
श्रीकरं लाघवकरं खण्डकाद्य प्रकीर्त्तितम् ॥ ७३ ॥

इसमेंसे प्रतिदिन प्रातःसायंकाल एक एक तोला परिमाण सेवन करे। अनुपान–गोदुग्ध। इसपर मांसरस, दूध, गुरुपाकी वीर्यवर्द्धक स्निग्ध अन्नपान और मांसादि पौष्टिक पदार्थ सेवन करने चाहिये। यह लौह रक्तपित्त, क्षय, खाँसी, परिणामशूल वातरक्त, प्रमेह, शीतपित्त, वमन, क्लम, सूजन, पाण्डुरोग, कुष्ठ, प्लीहा, उदररोग अफारा, रुधिरस्राव, और अम्लपित्त इन सम्पूर्ण व्याधियोंको नष्ट करताहै। एवं नेत्रोंको हितकर, अत्यन्त पौष्टिक, वीर्यवर्द्धक, कल्याणकारक, स्नेहवर्द्धक, आरोग्यप्रद, पुत्रजनक, कामाग्नि और बलकी वृद्धि करनेवाला है तथा कान्तिजनक और लघुता उत्पन्न करनेवाला है। इसको खण्डकाद्यलौह कहते हैं ॥ ६९–७३ ॥

कूष्माण्डखण्ड।

कूष्माण्डकात्पलशतं सुस्विन्नं निष्कुलीकृतम्।
पचेत्तप्ते घृतप्रस्थे शनैस्ताम्रमये दृढे ॥ ७४ ॥
यदा मधुनिभः पाकस्तदा खण्डशतं न्यसेत्।
पिप्पलीशृङ्गवेराभ्यां द्वे पले जीरकस्य च ॥ ७५ ॥
त्वगेलापत्रमरिचधान्यकानां पलार्द्धकम्।
न्यसेच्चूर्णीकृतं तत्तु दर्व्या संघट्टयेत्पुनः ॥
तत्पक्कं स्थापयेद्भाण्डे दत्त्वा क्षौद्रं घृतार्द्धकम ॥ ७६ ॥

एक उत्तम पुराने पेठेको छीलकर और बीज निकालकर साफ़ करलेवे। फिर उसको जलमें कुछदेर उबालकर, वस्त्रमें निचोडकर उसका रस निकाललेवे, फिर

उस पेठेको धूपमें सुखालेवे। पश्चात् उक्त सुखायेहुए पेठेके टुकड़ोंका १०० पल चूर्णको एक उत्तम ताँबेके पात्रमें डालकर एक प्रस्थ गरम घृतमें धीरे धीरे भूने, जब वह भुनते २ मधुकी समान लाल होजाय तब उसको पूर्वोक्त पेठेके रसके साथ सौ पल खाँड मिलाकर यथाविधि पकावे। जब उत्तम प्रकारसे पाक सिद्ध होजाय तब पीपल, सोंठ और जीरा प्रत्येक दो पल, दारचीनी, छोटी इलायची, तेजपात, काली मिरच और धनियाँ ये प्रत्येक औषधि दो दो तोले बारीक पीसकर मिलादेवे और शीतल होजानेपर ६४ तोले शहद डालकर करछीसे सबको एकमएक करके घीके चिकने वर्त्तनमें भरकर रखदेवे ७४–७६

तद्यथाग्निबलं खादेद्रक्तपित्ती क्षतक्षयी ॥ ७७ ॥
कासश्वासतमश्छर्दितृष्णाज्वरनिपीडितः।
वृष्यं पुनर्नवकरं बलवर्णप्रसादनम् ॥ ७८ ॥
उरःसन्धानकरणं बृंहणं स्वरवर्द्धनम्।
अश्विभ्यां निर्मितं श्रेष्ठं कूष्माण्डकरसायनम् ॥ ७९ ॥
["खण्डामलकमानानुसारात्कूष्माण्डकद्रवात्।
पात्रं पाकाय दातव्यं यावद्द्वाऽत्र रसो भवेत् ॥
अत्रापि मुद्रया पाको निस्त्वचं निष्कुलीकृतम्॥८०॥"]

इसको प्रतिदिन अपनी अग्निके बलानुसार सेवन करे और बकरीके गरम दूधका अनुपान करे। इसके सेवनसे रक्तपित्त, क्षतक्षय, खाँसी, श्वास, तमक, तृषा, ज्वर आदि रोगोंसे पीडित रोगी शीघ्र आरोग्य होता है। यह औषधि अत्यन्त वीर्य-वर्द्धक, शरीरको फिरसे नवीन करनेवाली, बल और वर्णको उत्पन्न करनेवाली, उरःसन्धानकारक, पौष्टिक और स्वरवर्द्धक है। इस कूष्माण्डखण्ड नामक उत्तम रसायनको अश्विनीकुमारोंने निर्म्माण किया है॥८०

वासाकूष्माण्डखण्ड।

पञ्चाशच्च पलं स्विन्नं कूष्माण्डात्प्रस्थमाज्यतः।
प्राह्यं पलशतं खण्डं वासाक्राथाढके पचेत् ॥ ८१ ॥
मुस्ता धात्री शुभा भार्ङ्गी त्रिसुगन्धैश्च कार्षिकैः।
एलेयविश्वधन्याकमरिचैश्च पलांशिकैः ॥ ८२ ॥
पिप्पलीकुडवं चैव मधुमानीं प्रदापयेत्।
एतच्चूर्णीकृतं तत्र दर्व्या संघट्टयेत्पुनः ॥ ८३ ॥

कासं श्वासं क्षयं हिक्कां रक्तपित्तं हलीमकम् ।
हृद्रोगमम्लपित्तं च पीनसं च व्यपोहति ॥ ८४ ॥

एक उत्तम पकाहुआ पेठा लेकर और उसको छीलकर तथा बीज निकालकर कुछ उबालकर सुखालेवे । ऐसे पेठेके टुकडोंको ५० पल लेकर और उनको पीसकर एक प्रस्थ घृतमें उत्तम प्रकारसे भूनलेवे । फिर उसको अडूसेके २५६ तोले क्वाथमें ४०० तोले खाँडके साथ धीरे धीरे पकावे । जब पाक यथाविधि सिद्ध होजाय तब उसमें नागरमोथा, आमले, वंशलोचन, भारंगी, दारचीनी, तेजपात और छोटी इलायची ये प्रत्येक एक एक कर्ष, एलुआ, सोंठ, धनियाँ और कालीमिरच ये प्रत्येक एक एक तोला और पीपल १६ तोले इन सबको बारीक पीसकर डालदेवे और शीतल होजानेपर ३२ तोले शहद डालकर करछीसे सबको एकमएक करके घीके चिकने बर्तनमें भरकर रखदेवे । इस वासाकूष्माण्डखण्डको प्रतिदिन छः छः मासे प्रमाण सेवन करनेसे खाँसी, श्वास, क्षय, हिचकी, रक्तपित्त, हलीमक, हृदयरोग, अम्लपित्त और पीनस ये सब रोग नष्ट होते हैं ॥ ८१-८४ ॥

वासाखण्ड ।

तुलामादाय वासायाः पचेदष्टगुणे जले ।
तेन पादावशेषेण पाचयेदाढकं भिषक् ॥ ८५ ॥
चूर्णानामभयानां च खण्डाच्छुद्धाच्छतं तथा ।
द्विपलं पिप्पलीचूर्णात्सिद्धे शीते च माक्षिकात् ॥ ८६ ॥
कुडवं पलमानं तु चातुर्जातं च चूर्णितम् ।
क्षिप्त्वा विलोडितं खादेद्रक्तपित्ती क्षतक्षयी ॥
कासश्वासपरीतश्च यक्ष्मणा च प्रपीडितः ॥ ८७ ॥

अडूसेको १०० पल लेकर अठगुने जलमें पकावे । जब पकते २ चौथाई भाग जल शेष रहजाय तब उतारकर छानलेवे । उस क्वाथमें सौ पल शुद्ध खाँड डालकर पकावे । जब अच्छे प्रकारसे चासनी होजाय तब उसमें हरडोंका चूर्ण २५६ तोले और पीपलका चूर्ण ८ तोले डालकर अग्निसे नीचे उतार लेवे । शीतल होजानेपर दारचीनी, छोटी इलायची, तेजपात और नागकेशर इनका चूर्ण ४ तोले एवं शहद ३२ तोले डालकर करछीसे सबको मिलादेवे) इस औषधिको छः छः मासेकी मात्रासे प्रतिदिन सेवन करनेसे रक्तपित्त, उरःक्षत, खाँसी, श्वास और यक्ष्मारोगसे पीडित रोगी आरोग्यलाभ करता है । ८५-८७ ॥

बृहत्कूष्माण्डावलेह।

पुराणं पीनमानीय कूष्माण्डस्य फलं दृढम्।
तद्बीजाधारबीजत्वक्-शिराशून्यं समाचरेत् ॥ ८८ ॥
ततोऽतिसूक्ष्मखण्डानि कृत्वा तस्य तुलां पचेत्।
गोदुग्धस्य तुलामध्ये मन्देऽग्नौ वा पचेच्छनैः ॥ ८९ ॥
शर्करायास्तुलां सार्द्धां गोघृतं प्रस्थमात्रकम्।
प्रस्थार्द्धं माक्षिकं चापि कुडवं नारिकेलतः ॥ ९० ॥
पियालफलमज्जानां द्विपलं गोक्षुरी पलम्।
क्षिपेदेकत्र विपचेल्लेहवत्साधु साधयेत् ॥ ९१ ॥

उत्तम पकेहुए पुराने और एक दृढ पेठेको लेकर और उसको छीलकर बीज और छिलके रहित करलेवे। फिर उसको कुछ उबालकर और उसको वस्त्रमें रस निचोडकर छोटे २ टुकडे करके धूपमें सुखालेवे। ऐसे पेठेके ४०० तोले टुकडोंको चार सौ तोले गोदुग्धमें धीरे धीरे मन्द मन्द अग्निके द्वारा पकावे। जब वह अच्छी तरह पकजाय तब १५० पल खाँड, ६४ तोले गोघृत, शहद ३२ तोले, नारियल १६ तोले, चिरौंजीकी मींग ८ तोले, गोखुरू ४ तोले इन सबको एकत्र मिलाकर लेहकी समान पकावे ॥ ८८–९१ ॥

भिषक् सुपक्वमालोक्य ज्वलनादवतारयेत्।
कोष्णे तत्र क्षिपेदेषां चूर्णं तानि वदाम्यहम् ॥ ९२ ॥
एकोऽक्षः शतपुष्पाया अथ क्षारो यमानिका।
गोक्षुरः क्षुरकः पथ्या कपिकच्छुफलानि च ॥ ९३ ॥
सप्तमी त्वक् च सर्वेषामक्षयुग्मं पृथक् पृथक्।
धान्यकं पिप्पलीमुस्तमश्वगन्धा शतावरी ॥ ९४ ॥
तालमूली नागबला बालकं पत्रकं शठी।
जातीफलं लवङ्गं च सूक्ष्मैला बृहदेलिका ॥
शृङ्गाटकं पर्पटकं सर्वं पलमितं पृथक् ॥ ९५ ॥
चन्दनं नागरं धात्री फलं च पि कशेरुकम्।
प्रत्येकं पञ्चकर्षाणि चत्वार्येतानि निक्षिपेत् ॥
पलद्वयमुशीरस्य मसृनस्योषणस्य च ॥ ९६ ॥

वैद्य पाकको उत्तम प्रकारसे सिद्ध हुआ जानकर चूल्हेपरसे उतारलेवे । कुछगरम रहनेपर उसमें नीचे लिखी औषधियोंका चूर्ण मिलादेवे । सोंफका चूर्ण २ तोले, जवाखार, अजवायन, गोखुरू, तालमखाना, हरड, कौंचके बीज और दालचीनी ये प्रत्येक चार चार तोले, धनियाँ, पीपल, नागरमोथा, असगन्ध, शतावर, मुसली, गंगेरन, सुगन्धवाला, तेजपात, कचूर, जायफल, लौंग, छोटी इलायची, बड़ी इलायची, सिंघाडे और पित्तपापडा ये सब एक एक पल, लाल चन्दनका चूरा, सोंठ, आमले और कशेरू ये चारों पाँच पाँच कर्ष लेवे एवं खस ८ तोले, बावची ८ तोले और काली मिरच ८ तोले—सबको एकत्र मिलाकर मिट्टीके एक नवीन चिकने बर्त्तनमें भरकर रखदेवे ॥ ९२–९६ ॥

कूष्माण्डस्यावलेहोऽयं भक्षितः पलमात्रया ।
किंवा यथावह्निबलं भुक्त्वा रोगं विनाशयेत् ॥ ९७ ॥
रक्तपित्तं शीतपित्तमम्लपित्तमरोचकम् ।
वह्निमान्द्यं सदाहं च तृषां प्रदरमेव च ॥ ९८ ॥
रक्तार्शोऽपि तथा च्छर्दिं पाण्डुरोगं च कामलाम् ।
उपदंशं विसर्पं च जीर्णं च विषमज्वरम् ॥ ९९ ॥
लेहोऽयं परमो वृष्यो बृंहणो बलवर्द्धनः ।
स्थापनीयःप्रयत्नेन भाजने मृन्मये नवे ॥ १०० ॥

इसको प्रतिदिन प्रातःसायंकाल चार चार तोले अथवा अपनी जठराग्निके बलानुसार सेवन करनेसे रक्तपित्त, शीतपित्त, अम्लपित्त, अरुचि, मन्दाग्नि, दाह, तृषा, प्रदर, रुधिरकी बवासीर, वमन, पाण्डु, कामला, उपदंश, विसर्प, जीर्णज्वर और विषमज्वर आदि रोग शीघ्रही नष्ट होते हैं । यह अवलेह अत्यन्त बल—वीर्य्य-वर्द्धक और पुष्टिकारक है । इसको बृहत् कूष्माण्डावलेह कहते हैं ॥

त्रिवृत्तादिमोदक ।

त्रिवृत्ता त्रिफला श्यामा पिप्पली शर्करा मधु ।
मोदकं सन्निपातोर्द्ध्वरक्तपित्तज्वरापहम् ॥ १ ॥

निसोत, त्रिफला, फूलप्रियंगु, पीपल और खाँड—सबको समान भाग लेकर यथाविधि मधुके साथ मिलाकर मोदक बनालेवे । इसमेंसे प्रतिदिन छः छः मासे मोदकको शीतल जलके साथ सेवन करनेसे सन्निपातजन्य ऊर्ध्वगत रक्तपित्त और ज्वर दूर होता है ॥ १ ॥

वासाद्यघृत ।

वासां सशाखां सफलां समूलां
कृत्वा कषायं कुसुमानि चास्याः ।
प्रदाय कल्कं विपचेद् घृतं च
क्षौद्रेण पानाद्विनिहन्ति रक्तम् ॥ २ ॥
(" शणस्य कोविदारस्यवृषस्य ककुभस्य च ।
कल्काढ्यत्वात्पुष्पकल्कं प्रस्थे पलचतुष्टयम् " ॥)

शाखा, फल और जडसहित अडूसेको ४ सेर लेकर ३२ सेर जलमें पकाकर ८ सेर जल शेष रक्खे । फिर उस क्वाथमें अडूसेके फूलोंका कल्क आठ तोले और गोघृत १ सेर डालकर यथाविधि घृतको सिद्ध करे । इस घृतको शहदके साथ मिलाकर सेवन करनेसे रक्तपित्त नष्ट होता है । (किसी २ के मतसे इसमें—सन, कचनार, अडूसा और अर्जुन—इनके फूलोंका कल्क, चार पल, घी १ प्रस्थ डालकर घृतको पकाना चाहिये) ॥ २ ॥

दूर्वाद्यघृत ।

दूर्वा सोत्पलकिंजल्का मञ्जिष्ठा सैलवालुका ।
सिता शीतमुशीरं च मुस्तं चन्दनपद्मकम् ॥ ३ ॥
विपचेत्कार्षिकैरेतैः सर्पिराजं सुखाग्निना ।
तण्डुलाम्बु त्वजाक्षीरं दत्त्वा चैव चतुर्गुणम् ॥ ४ ॥
तत्पानं वमतो रक्तं नावनं नासिकागते ।
कर्णाभ्यां यस्य गच्छेत्तु तस्य कर्णौ प्रपूरयेत् ॥ ५ ॥
चक्षुःस्राविणि रक्ते च पूरयेत्तेन चक्षुषी ।
मेढ्रपायुप्रवृत्ते च वस्तिकर्मसु तद्धितम् ॥
रोमकूपप्रवृत्ते तु तदभ्यङ्गे प्रयोजयेत् ॥ ६ ॥

दूब, कमल, कमलकी केशर, मँजीठ, एलुआ, मिश्री, सफेद चन्दन, खस, नागरमोथा, लालचन्दन और पद्माख— प्रत्येक औषधि एक एक कर्ष एवं चाव-लोंका जल और बकरीका दूध सब औषधियोंसे चौगुना, बकरीका घी १ सेर लेवे। सबको एकत्र मिलाकर यथाविधि मन्द मन्द अग्निके द्वारा घृतको सिद्ध करे। इस दूर्वाद्यघृतको- वमनके द्वारा रक्तस्राव होनेपर पान करे, नासिकाके द्वारा

रुधिरका स्राव होनेपर नस्य देवे । कानोंमेंसे रक्तस्राव हो तो इस घृतको कानोंमें डाले । नेत्रोंमेंसे रुधिरका स्राव होनेपर नेत्रोंमें भरे, जो लिङ्ग और गुदाके द्वारा रक्तस्राव हो तो इस घृतकी पिचकारी लगावे और रोमकूपोंके द्वारा रक्तस्राव होय तो इस घृतकी शरीरमें मालिश करे ॥ ३–६ ॥

सप्तप्रस्थघृत ।

शतावरीपयोद्राक्षाविदारीक्ष्वामले रसैः ।
सर्पिषा सह संयुक्तैः सप्तप्रस्थं पचेद् घृतम् ॥ ७ ॥
शर्करापादसंयुक्तं रक्तपित्तहरं पिबेत् ।
उरःक्षते पित्तशूले चोष्णवातेऽप्यसृग्दरे ।
बल्यमोजस्करं वृष्यं क्षयहृद्रोगनाशनम् ॥ ८ ॥

शतावर, सुगन्धवाला, दाख, विदारीकन्द, ईख और आमले इन सबका स्वरस और गोघृत ये प्रत्येक एक एक प्रस्थ लेवे । सबको घृतके साथ मिलाकर यथाविधि घृतको पकावे । जब उत्तम प्रकारसे पककर सिद्ध होजाय तब उसमें १६ तोले शुद्ध खांड मिलादेवे । इस घृतको प्रतिदिन छः छः मासे पान करनेसे रक्तपित्त, क्षय और हृदयरोग दूर होता है । यह घृत उरःक्षत, पित्तशूल उष्णवात और रक्तप्रदर रोगोंमें हितकारी एवं बल, ओज और वीर्यकी अत्यन्त वृद्धि करता है तथा क्षय और हृदयरोगको नष्ट करता है ॥ ७ ॥ ८ ॥

शतावरीघृत ।

शतावर्यास्तु मूलानां रसं प्रस्थद्वयं मतम् ।
तत्समं च भवेत्क्षीरं घृतप्रस्थं विपाचयेत् ॥ ९ ॥
जीवकर्षभकौ मेदा महामेदा तथैव च ।
काकोली क्षीरकाकोली मृद्वीकामधुकं तथा ॥ ११० ॥
मुद्गपर्णी माषपर्णी विदारी रक्तचन्दनम् ।
शर्करामधुसंयुक्तं सिद्धं विस्रावयेद् घृतम् ॥ ११ ॥

शतावरका रस दो प्रस्थ, गौका दूध दो प्रस्थ, उत्तम घृत १ प्रस्थ तथा जीवक, ऋषभक, मेदा, महामेदा, काकोली, क्षीरकाकोली दाख, मुलहठी, मुगवन, मषवन, विदारीकन्द और लालचन्दन इनका कल्क १६ तोले डालकर घृतको सिद्ध करे । जब घृत अच्छे प्रकारसे सिद्ध होजाय तब उसमें सोलह-सोलह तोले मिश्री और शहद मिलाकर उतार लेवे ॥ १०९ –१११ ॥

रक्तपित्तविकारेषु वातरक्तगदेषु च।
क्षीणशुक्रेषु दातव्यं वाजीकरणमुत्तमम् ॥ १२ ॥
अङ्गदाहं शिरोदाहं ज्वरं पित्तसमुद्भवम्।
योनिशूलं च दाहं च मूत्रकृच्छ्रं च पैत्तिकम् ॥ १३ ॥
एतान्रोगान्निहन्त्याशु छिन्नाभ्राणीव मारुतः।
शतावरीसर्पिरिदं बलवर्णाग्निवर्द्धनम् ॥
स्नेहपादः स्मृतः कल्कः कल्कवन्मधुशर्करे ॥ १४ ॥

इस घृतको रक्तपित्त, वातरक्त और शुक्रकी क्षीणतामे देना चाहिये। यह अत्यन्त वाजीकरण है एव शरीरकी दाह, शिरोदाह, पित्तज्वर, योनिशूल सर्व प्रकारकी कफ और पित्तज मूत्रकृच्छ इन समस्त विकारोंको इस प्रकार नष्ट करदेताहै जैसे वायुके वेगसे मेघोंका समूह तत्काल छिन्न भिन्न होजाताहै। यह शतावरीघृत बल, वर्ण और जठराग्निकी विशेष वृद्धि करता है॥ १२-१४॥

बृहच्छतावरीघृत।

शतावरीमूलतुलाश्चतस्रः संप्रपीडयेत्।
रसेन क्षीरतुल्येन पचेत्तेन घृताढकम् ॥ १५ ॥
जीवनीयैः शतावर्या मृद्वीकाभिः परूषकैः।
पिष्टैःपियालैश्चाक्षांशैर्द्विगुणैर्यष्टिमधुकैर्भिषक् ॥ १६ ॥
सिद्धशीते च मधुनः पिप्पल्याश्च पलाष्टकम्।
दत्त्वा दशपलं चात्र सितायास्तद्विमिश्रितम् ॥ १७ ॥

शतावरकी जडको कूट पीसकर वस्त्रमें निचोडकर रस निकाल लेवे। ऐसा रस ४०० पल, गौका दूध ४०० पल और घी १ आढक लेवे। सबको एकत्र मिलाकर घृतको पकावे। कुछ देर बाद जीवक, ऋषभक, मेदा, महामेदा, काकोली, क्षीर-काकोली जीवन्ती, मुलहठी, मुगवन, मषवन, शतावर, दाख, फालसे, चिरौंजी मुलहठी और महुआ प्रत्येक औषधिको दो दो तोले पीसकर डालदेवे। जब घृत उत्तम प्रकारसे पककर सिद्ध होजाय तब नीचे उतारलेवे। शीतल होनेपर घृतको छानकर उसमें शहद ३२ तोले, पीपलका चूर्ण ३२ तोले और मिश्री ४० तोले डालकर सबको अच्छी तरह मिला देवे॥ १५-१७

ब्राह्मणान्प्राशयेत्पूर्वं लिह्यात्पाणितलं ततः।
योन्यसृक्शुक्रदोषघ्नं वृष्यं पुंसवनं च तत् ॥ १८ ॥

क्षतक्षयं रक्तपित्तं कासं श्वासं हलीमकम् ।
कामलां वातरक्तं च विसर्पं हृच्छिरोग्रहम् ॥
उन्मादादीनपस्मारान्वातपित्तात्मकाञ्जयेत् ॥ १९ ॥

यह घृत पहले ब्राह्मणोंको भोजन कराकर पश्चात् एकएक तोला परिमाण सेवन करना चाहिये । इसका सेवन करनेसे योनिद्वारा रक्तका स्राव, वीर्यदोष, क्षतक्षय, रक्तपित्त, खाँसी, श्वास, हलीमक, कामला, वातरक्त, विसर्प, हृदयरोग, शिरदर्द, उन्माद, अपस्मार और वात-पित्तजन्य विकार ये सब नष्ट होते हैं, एवं वीर्यकी और पुरुषत्वकी प्राप्ति होती है ॥ ११८ ॥ ११९ ॥

कामदेवघृत ।

अश्वगन्धापलशतं तदर्द्धं गोक्षुरस्य च
शतावरी विदारी च शालपर्णी बला तथा ॥ १२० ॥
अश्वत्थस्य च शृङ्गानि पद्मबीजं पुनर्नवा
काश्मरीफलमेतत्तु माषबीजं तथैव च ॥ २१ ॥
पृथग्दशपलान्भागांश्चतुर्द्रोणेऽम्भसः पचेत् ।
चतुर्भागावशेषं तु कषायमवतारयेत् ॥ २२ ॥
मृद्वीका पद्मकं कुष्ठं पिप्पली रक्तचन्दनम् ।
बालकं नागपुष्पं च आत्मगुप्ताफलं तथा ॥ २३ ॥
नीलोत्पलं शारिवे द्वे जीवनीयं विशेषतः ।
पृथक् कर्षसमं चैव शर्करायाः पलद्वयम् ॥ २४ ॥
रसस्य पौण्ड्रकेक्षूणामाढकं तत्र दापयेत् ।
चतुर्गुणेन पयसा घृतप्रस्थं विपाचयेत् ॥ २५ ॥

असगन्ध १०० पल, गोखरू ५० पल एवं शतावर, विदारीकन्द, शालपर्णी, खिरेंटी, पीपलके वृक्षके अंकुर, कमलगट्टा, पुनर्नवा, कुम्भेरके फल और उड़द ये प्रत्येक औषधि दश-दश पल लेवे। सबको एकत्र कूटकर ४द्रोण जलमें पकावे। जब पकते पकते चौथाई भाग जल शेष रहजाय तब उतारकर छान लेवे। फिर इस क्वाथमें दाख, पद्माख, कूठ, पीपल, लालचन्दन, सुगन्धवाला, नागकेशर, कौंचके बीज, नीलकमल, दोनों सारिवा और जीवनीयगणकी समस्त औषधियों (जीवक, ऋषभक, ऋद्धि, वृद्धि, मेदा, महामेदा, काकोली, क्षीरकाकोली, मुद्गपर्णी, माषपर्णी, मुगवन और मषवन) ये प्रत्येक

औषधि दो दो तोले, मिश्री ९ तोले, पौण्डे गन्नोंका रस १ आढक, दूध ४ प्रस्थ और घी १ प्रस्थ डालकर मन्द मन्द अग्निके द्वारा धीरे धीरे विधिपूर्वक घृतको सिद्ध करे ॥ १२०-२५ ॥

रक्तपित्तं क्षतक्षीणं कामलां वातशोणितम्।
हलीमकं तथा शोथं स्वरभेदं बलक्षयम् ॥ २६ ॥
अरोचकं मूत्रकृच्छ्रं पार्श्वशूलं च नाशयेत्।
एतद्राज्ञां प्रयोक्तव्यं बह्वन्तःपुरचारिणाम् ॥ २७ ॥
स्त्रीणां चैवानपत्यानां दुर्बलानां च देहिनाम्।
क्लीबानामल्पशुक्राणां जीर्णानामल्परेतसाम् ॥ २८ ॥
श्रेष्ठं बलकरं हृद्यं वृष्यं पेयं रसायनम्।
ओजस्तेजस्करं चैव आयुःप्राणविवर्द्धनम् ॥ २९ ॥
संवर्द्धयति शुक्रं च पुरुषं दुर्बलेन्द्रियम्।
सर्वरोगविनिर्मुक्तस्तोयसिक्तो यथा द्रुमः ॥
कामदेव इति ख्यातः सर्वर्तुषु च शस्यते ॥ १३० ॥

यह कामदेव घृत रक्तपित्त, क्षतक्षी कामला, वातरक्त, हलीमक, सूजन, स्वर भंग. बलकी क्षीणता, अरुचि, मूत्रकृच्छ्र और पसलीका शूल इन सम्पूर्ण व्याधियोंको नष्ट करता है। यह घृत अधिकतर अन्तःपुरमें रहनेवाले राजाओंको सेवन करना चाहिये एवं वन्ध्या स्त्रियों, दुर्बल मनुष्यों, नपुंसक, क्षीणवीर्य, वृद्ध मनुष्य और अल्पवीर्यवाले मनुष्योंको अत्यन्त हितकारी है। एवं बलकारक, हृदयको हितकारी, वीर्यवर्द्धक, रसायन तथा ओज, तेज, आयु और प्राणोंकी वृद्धि करनेवाला, दुर्बल इन्द्रियवाले पुरुषके शरीरमें पुरुषत्वकी प्राप्ति और वीर्यकी वृद्धि करता है। इस घृतके सेवनसे सर्वप्रकारके रोग दूर होते हैं ॥ १२६-१३० ॥

उशीरासव।

उशीरं बालकं पद्मं काश्मरीं नीलमुत्पलम्।
प्रियङ्गु पद्मकं लोध्रं मञ्जिष्ठा धन्वयासकम् ॥ ३१ ॥
पाठा किराततिक्तं च न्यग्रोधोदुम्बरं शठी।
पर्पटं पुण्डरीकं च पटोलं काञ्चनारकम् ॥ ३२ ॥
जम्बुशाल्मलिनिर्यासं प्रत्येकं पलसम्मितम्।
भागांस्तु चूर्णितान्कृत्वा द्राक्षायाः पलविंशतिम् ॥ ३३ ॥

धातकीं षोडशपलां जलद्रोणद्वये क्षिपेत् ।
शर्करायास्तुलां दत्त्वा क्षौद्रस्यैकतुलां तथा ॥ ३४ ॥
मासैकं स्थापयेद्भाण्डे मांसीमरिचधूपिते ।
उशीरासव इत्येष रक्तपित्तविनाशनः ॥
पाण्डुकुष्ठप्रमेहार्शःकृमिशोथहरस्तथा ॥ ३५ ॥

खस, सुगन्धवाला, कमल, कुम्भेरकी छाल, नीलकमल, फूलप्रियंगु, पद्माख, लोध, मंजीठ, धमासा, पाढ, चिरायता, बडकी छाल, गूलरकी छाल, कचूर, पित्तपापडा, सफेदकमल, पटोलपात, कचनारकी छाल, जामुनकी छाल और मोचरस ये प्रत्येक औषधि चार चार तोले लेकर सबका एकत्र चूर्ण करलेवे। फिर दाख २० पल धायके फूल १६ पल, खाँड १०० पल और शहद १०० पल इन सबको एकत्रकर दो द्रोण परिमाण जलमें डालदेवे। फिर उसको बालछड और कालीमिरचोंके चूर्णके द्वारा धूप दियेहुए पात्रमें भरकर और उसका मुँह बाँधकर एक महीनेतक रक्खा रहनेदेवे। एक महीनेके पश्चात् उसको निकालकर छानलेवे। इसको उशीरासव कहते हैं। इसका सेवन करनेसे रक्तपित्त, पाण्डु, कुष्ठ, प्रमेह, अर्श, कृमि और शोथ ये सब विकार नष्ट हो ॥ ३१-३५ ॥

रक्तपित्तमें पथ्य।

अधोगते च्छर्दनमूर्द्ध्वनिर्गमे विरेचनं स्यादुभयत्र लङ्घनम् । पुरातनाः षष्टिकशालिकोद्रवप्रियङ्गुनीवारयवप्रशातिकाः ॥ ३६ ॥ मुद्गा मसूराश्चणकास्तुवर्यो मुकुष्टकाश्चिङ्कटवर्मिमत्स्याः । शशः कपोतो हरिणैणलावशरारिपारावतवर्त्तकाश्च ॥ ३७ ॥ बका उरभ्राश्च सकालपुच्छाः कपिञ्जलाश्चापि कषायवर्गः । गवामजायाश्च पयो घृतं च घृतं महिष्याः पनसं प्रियालम् ॥ ३८ ॥

अधोगतरक्तपित्तमें-वमन, ऊर्ध्वगत रक्तपित्तमें विरेचन और अधो व ऊर्ध्व दोनों मार्गोंसे रुधिरस्राव होनेपर लंघन करावे। पुराने साँठीके चावल, शालिधानोंके चावल, कोदों कङ्गनीके चावल, नीवार धान, जौ और लाल नीवार धानोंके चावल, मूँग, मसूर, चने, अरहर, मोठ, और चिङ्कट मछली, वर्म्मि मछली, एवं खरगोश, कबूतर, हिरन, काले हिरन, लवा, शरारिपक्षी, परेवा, बतक, बगुला, मेढा, बारह-

सिहा और तीतर इन सब जीवोंका मांस एवं कषायवर्गकी सब औषधियाँ, गौका दूध, घी, बकरीका दूध, घी, भैंसका घी, कटहल, चिरौंजी ॥ ३६–३८ ॥–

रम्भाफलं कच्चटतण्डुलीयपटोलवेत्राग्रमहार्द्रकाणि । पुराणकूष्माण्डफलं च पक्वतालानि तद्बीजजलानि वासा ॥ ३९ ॥ स्वादूनि बिम्बानि च दाडिमानि खर्जूरधात्रीमिषिनारिकेलम् । कशेरुशृङ्गाटमरुष्कराणि कपित्थशालूकपरूषकाणि ॥ ४० ॥ भूनिम्बशाकं पिचुमर्दपत्रं तुम्बी कलिङ्गानि च लाजसक्तुः । द्राक्षा सिता माक्षिकमैक्षवश्च शीतोदकं चौद्भिदवारि चापि ॥ ४१ ॥ सेकोऽवगाहः शतधौतसर्पिरभ्यङ्गयोगः शिशिरप्रदेहः । हिमानिलश्चन्दनमिन्दुपादो यथा विचित्राश्च मनोऽनुकूलाः ॥ ४२ ॥

केलेकी फली, नाडीका शाक, चौलाईका शाक, परवल, बेतका अग्रभाग, वन-अदरख, पुराना पेठा, पके ताडके फल और उसके बीज, अडूसा मधुररसवाले पदार्थ, कन्दुरी, अनार, खजुर, आमले, सौंफ, नारियल, कशेरु, सिंघाडे, भिलावा, कैथ, भसींडे, फालसे, चिरायता, नीमके पत्ते, लौकी, तरबूज, खीलोंके सत्तू, दाख, मिश्री, शहद, ईखका रस, और ईखके रसके बनेहुए अन्य पदार्थ, शीतल जल, औद्भिदजल, शरीरपर शीतल जलका सिंचन, जलमें घुसकर स्नान, सौवार धोयेहुए-घीकी मालिश, शीतलवस्तुओंका प्रलेप, शीतल वायुका सेवन, लालचन्दन, चाँदनी मनको आनन्ददायक मधुर वार्त्तालाप ३९–४२॥

धारागृहं भूमिगृहं सुशीतं वैडूर्यमुक्तामणिधारणं च । रम्भोत्पलाम्भोरुहपत्रशय्या क्षौमाम्बरं चोपवनं सुशीतम् ॥ ४३ ॥ प्रियङ्गुकश्चन्दनरूषितानामालिङ्गनं चापि वराङ्गनानाम् । पद्माकराणां सरितां ह्रदानां चन्द्रोदयानां हिमवद्दरीणाम् ॥ ४४ ॥ सुशीतलानां गिरिनिर्झराणां श्रुतिप्रशस्तानि च कीर्तनानि । प्रफुल्लनीरं हिमवालुका च मित्रं नृणां शोणितपित्तरोगे ॥ ४५ ॥

फुहारेवाले और शीतल भूमिगृहमें निवास, वैदूर्यमणि और मोतियोंकी मालाको धारण करना, केलेके पत्तों, कुमुदके पत्तों और कमलके पत्तोंपर शयन करना, रेशमी वस्त्रोंका पहरना, शीतल वायुयुक्त बगीचेमें भ्रमण, फूलप्रियंगु और चन्दनसे सुगन्धित अङ्गोंवाली कामिनी स्त्रियोंके साथ आलिङ्गन करना, खिले हुए कमलोंसे युक्त नदियें और तालाब, चाँदनी युक्त बरफके कणोंसे शीतलपर्वतोंकी गुफाओंमें निवास, पर्वतके झरनोंका जलपान, कर्णप्रिय गीत और वाद्योंका सुनना, निर्मल जल और कपूर ये सब पदार्थ रक्तपित्तरोगवाले मनुष्योंके लिये हितकारी हैं ॥ १४२-१४५ ॥

रक्तपित्तमें अपथ्य ।

व्यायामाध्वनिषेवणं रविकरस्तीक्ष्णानि कर्म्माणि च
क्षोभो वेगविधारणं चपलता हस्त्यश्वयानानि च ।
स्वेदास्रस्रुतिधूमपानसुरतक्रोधाः कुलत्थो गुडो
वार्ताकुस्तिलमाषसर्षपदधिक्षाराणि कौपं पयः ॥
ताम्बूलं नलदाम्बुमद्यलशुनाः शिम्बी विरुद्धाशनं
कट्वम्लं लवणं विदाहि च गणस्त्याज्योऽस्रपित्ते नृणाम् ॥ ४६ ॥

कसरत आदि परिश्रम, अधिक रास्ता चलना, तीक्ष्ण धूपका सेवन, कठिन काम करना, क्षोभ, मल मूत्र आदिके वेगको रोकना, चञ्चलता, हाथी, घोडे आदिकी सवारीपर चढकर चलना, स्वेद निकलवाना, रुधिर निकलवाना, धूम्रपान, स्त्रीप्रसङ्ग, क्रोध, कुलथी, गुड, बैंगन, तिल, उडद, सरसों, दही, क्षारवाले पदार्थ, कुएका जल, ताम्बूल, नीम, मदिरा, लहसुन, सेमकी फली, विरुद्ध भोजन, चरपरे, खट्टे, अधिक लवणरसवाले और दाहकारक पदार्थ ये सब रक्तपित्त रोगवाले मनुष्योंको त्यागदेने चाहिये ॥ १४६ ॥

इति भैषज्यरत्नावल्यां रक्तपित्तचिकित्सा ॥

अथ यक्ष्मरोगचिकित्सा ।

ज्वराणां शमनीयो यः पूर्वमुक्तः क्रियाविधिः ।
क्षयिणां ज्वरदाहेषु स सर्वोऽपि प्रशस्यते ॥ १ ॥

ज्वरकी चिकित्सामें जो संशमनविधि कही है वह समस्त विधि क्षयरोग ज्वर और दाहमें करनी चाहिये ॥ १ ॥

उपद्रवा ज्वराद्यास्ते साध्याः स्वैः स्वैश्चिकित्सितैः।
तेषु शान्तेषु रोगेषु पश्चाच्छोषमुपाचरेत् ॥ २ ॥

यदि यक्ष्मरोगमें ज्वर आदि उपद्रव उत्पन्न हों तो उनकी चिकित्सा उन्हीं २ रोगोंके अधिकारमें कहीहुई विधिके अनुसार करनी चाहिये। उन सम्पूर्ण रोगोंके शमन होनेपर फिर यक्ष्मरोगकी चिकित्सा करनी चाहिये ॥ २ ॥

शालिषष्टिकगोधूमयवमुद्गादयः शुभाः।
मद्यानि जाङ्गलाः पक्षिमृगाः शस्ता विशुष्यताम् ॥३॥
शुष्यतां क्षीणमांसानां कल्पितानि विधानवित्।
दद्यात्क्रव्यादमांसानि बृंहणानि विशेषतः ॥ ४ ॥

एक वर्षसे अधिक पुराने शालिधान और साठी धानोंके चावल, गेहूँ, जौ, मूँग, मद्य, जांगलदेशके पशु और पक्षियोंका मांस ये सब यक्ष्मरोगके लिये हितकर हैं। यक्ष्मरोगमें यदि रोगीका बल और मांस क्षीण होगया हो तो व्याघ्र और गिद्ध आदिके मांसको शास्त्रोक्त विधिके अनुसार विविध प्रकारकी कल्पनाओंद्वारा सिद्ध करके देवे और विशेषकर पौष्टिक पदार्थ देवे। ये सब मांसवर्द्धक, बलकारक और पौष्टिक हैं ॥ ३ ॥ ४ ॥

दोषाधिकानां वमनं शस्यते सविरेचनम्।
स्नेहस्वेदोपपन्नानां सस्नेहं यन्न कर्षणम् ॥ ५ ॥

अधिक दोषोंवाले यक्ष्मरोगियोंको प्रथम स्वेद देकर और स्नेह (घृत-तैलादि पान कराकर सस्नेह मृदु वमन और विरेचन कराने चाहिये। किन्तु ऐसा उपाय करे जिससे रोगी दुर्बल और कृश न हो ॥ ५ ॥

बलिनो बहुदोषस्य पञ्च कर्माणि कारयेत्।
यक्ष्मिणः क्षीणदेहस्य तत्कृतं स्याद्विषोपमम् ॥ ६ ॥

दोषोंकी अधिकता हो तो बलवान् यक्ष्मरोगीके पञ्चकर्म (अर्थात् वमन, विरेचन, अनुवासनवस्ति, निरूहणवस्ति और नस्यकर्म) का प्रयोग करना चाहिये। किन्तु बल हीन और क्षीण रोगीके लिये उक्त सम्पूर्ण क्रियायें विषकी समान हानिकर हैं ॥ ६ ॥

शुद्धकोष्ठस्य युञ्जीत विधिं बृंहणदीपनम्।
शुक्रायत्तं बलं पुंसां मलायत्तं हि जीवनम् ॥
तस्माद्यत्नेन संरक्षेद्यक्ष्मिणो मलरेतसी ॥ ७ ॥

वमन विरेचनादिके द्वारा कोष्ठ शुद्धि हो जानेपर रोगीको बलकारक और अग्नि-वर्द्धक औषधियाँ देनी चाहिये. क्योंकि मनुष्योंका बल शुक्रके अधीन है और जीवन मलके अधीन है। इसलिये राजयक्ष्मरोगीके वीर्य और मलकी यत्नपूर्वक रक्षा करनी चाहिये। कारण, अधिक वीर्यक्षय होनेसे बलका ह्रास और अधिक मल निकलनेसे जीवन नष्ट होता है ॥ ७ ॥

पारावतकपिच्छागकुरङ्गानां पृथक् पृथक् ।
मांसचूर्णमजाक्षीरैः पीतं क्षयहरं परम् ॥ ८ ॥

परेवा (कबूतर), बन्दर, बकरा और हिरन इनके मांसको पृथक् पृथक् भून कर और उनका चूर्ण करके बकरीके दूधके साथ सेवन करनेसे क्षयरोग नष्ट होता है ॥ ८ ॥

घृतकुसुमरसलीढं क्षयं नयति गजबलामूलम् ।
दुग्धेन केवलेन च वायसजङ्घा निपीतैव ॥ ९ ॥

गंगेरनकी जडको बारीक पीसकर घी और शहदमें मिलाकर सेवन करनेसे वा केवल मसीघासको पीसकर दूधके साथ पीनेसे क्षयरोग निवृत्त होता है ॥ ९ ॥

शर्करामधुसंयुक्तं नवनीतं लिहन् क्षयी।
क्षीराशी लभते पुष्टिमतुल्ये चाज्यमाक्षिके ॥ १० ॥

क्षयरोगी, मिश्री और शहदको नैनीघीमें मिलाकर सेवन करे और दूधका भोजन करे अथवा घृत और शहदको असमान भाग अर्थात् ४ माशे और २ माशे लेकर सेवन करे तो उसके शरीरकी पुष्टि होती है ॥ १० ॥

अलक्तकरसैः क्षौद्रं रक्तवान्तिहरं परम् ॥ ११ ॥

लाखके रस अथवा लाखके काढेमें शहद मिलाकर सेवन करनेसे रक्तकी वमन दूर होती है ॥ ११ ॥

ककुभत्वङ्नागबला वानारिबीजानिचूर्णितं पयसि ।
पक्वं घृतमधुयुक्तं ससितं यक्ष्मादिकासहरम् ॥ १२ ॥

अर्जुनकी छाल, गंगेरन और कौंचके बीज-इनके समान भाग चूर्णको दूधमें डाल-कर पकावे, फिर उसमें शहद, घी और मिश्री मिलाकर पान करनेसे यक्ष्मा, खाँसी आदि रोग दूर होते हैं ॥ १२ ॥

कृष्णा द्राक्षा सितालेहः क्षयहा क्षौद्रतैलवान् ।
मधुसर्पिर्युतो वाऽश्वगन्धाकृष्णासितोद्भवः ॥ १३ ॥

पीपल, दाख और मिश्री इन तीनोंको समान भाग लेकर शहद और तिलके साथ अथवा असगन्ध, पीपल और मिश्री इनको शहद और घीमें मिलाकर सेवन करनेसे क्षयरोग नष्ट होता है ॥ १३ ॥

यष्ट्याह्वं चन्दनोपेतं सम्यक् क्षीरप्रपेषितम् ।
क्षीरेणालोड्य पातव्यं रुधिरच्छर्दिनाशनम् ॥ १४ ॥

मुलहठी और चन्दन, दोनोंको समान भाग लेकर और दूधमें बारीक पीसकर और दूधमें घोलकर पान करनेसे रुधिरकी वमन दूर होती है ॥ १४ ॥

छागमांसं पयश्छागं छागं सर्पिः सशर्करम् ।
छागोपसेवा शयनं छागमध्ये तु यक्ष्मनुत् ॥ १५ ॥

बकरीका मांस खाना, बकरीका दूध पीना, बकरीके घृतको मिश्रीमें मिलाकर सेवन करना, बकरियोंकी सेवा करना और बकरियोंके बीचमें सोना इन उपायोंके द्वारा यक्ष्मरोग नष्ट होता है ॥ १५ ॥

दशमूलक्वाथ ।

दशमूलबलारास्ना पुष्करसुरदारुनागरैः क्वथितम् ।
पेयं पार्श्वासशिरोरुक्क्षयकासादिशान्तये सलिलम् ॥ १६॥

दशमूलकी समस्त औषधियाँ, खिरेंटी, रास्ना, पोहकरमूल, देवदारु और सोंठ इनका यथाविधि क्वाथ बनाकर पीनेसे क्षय, कास, पार्श्वशूल कन्धोंकी पीडा और शिरःशूलादि रोग शमन होते हैं ॥ १६ ॥

अश्वगन्धादिक्वाथ ।

अश्वगन्धामृताभीरुदशमूलीबलावृषाः ।
पुष्करातिविषे घ्नन्ति क्षयं क्षीररसाशिनः ॥ १७ ॥

असगन्ध, गिलोय, शतावर, दशमूल, खिरेंटी, अडूसा, पोहकरमूल और अतीस इनका क्वाथ बनाकर पान करे और दूध तथा मांसरसका भोजन करे तो क्षयरोग नष्ट होता है ॥ १७ ॥

त्रयोदशाङ्गक्वाथ ।

धन्याकपिप्पलीविश्वदशमूलीजलं पिबेत् ।
पार्श्वशूलज्वरश्वासपीनसादिनिवृत्तये ॥ १८ ॥

धनियाँ, पीपल, सोंठ और दशमूल इनके क्वाथको पान करनेसे क्षयरोगीके पार्श्वशूल, ज्वर, श्वास, पीनस आदि विकार दूर होते हैं ॥ १८ ॥

बलादिचूर्ण ।

बलाऽश्वगन्धाश्रीपर्णीबहुपुत्रीपुनर्नवाः ।
पयसा नित्यमभ्यस्ताः शमयन्ति क्षतक्षयम् ॥ १९ ॥

खिरैंटी, असगन्धक, कुम्भेर, शतावर और पुनर्नवा इनको समान भाग लेकर बारीक चूर्ण करके एक वस्त्रमें छानलेवे । इस चूर्णको प्रतिदिन दूधके साथ सेवन करनेसे क्षत और क्षय दूर होता है ॥ १९ ॥

लवंगाद्य चूर्ण ।

लवङ्गकक्कोलमुशीरचन्दनं नतं सनीलोत्पलपत्रजीरकम् ।
त्रुटिः सकृष्णागुरुभृङ्गकेशरं मुस्ता सविश्वानलदं सहांबुदम् ॥
अहीन्द्रजातीफलवंशलोचनाः सिताष्टभागं समसूक्ष्मचूर्णितम् ।
सुरोचनं तर्पणमग्निदीपनं बलप्रदंवृष्यतमं त्रिदोषनुत ॥ २१ ॥
उरोविबद्धं तमकं गलग्रहं सकासहिक्कारुचियक्ष्मपीनसम् ।
ग्रहण्यतीसारभगन्दरार्बुदं प्रमेहगुल्मांश्च निहन्ति सज्वरान् ॥

लौंग, कंकोल, खस, चन्दन, तगर, नीलकमल (अभावमें नीलोफर) तेजपात, जीरा, छोटी इलायची, पीपल, अगर, दारचीनी, नागकेशर, नागरमोथा, सोंठ, बालछड, सुगन्धवाला, अनन्तमूल, जायफल और वंशलोचन इन सबको समान-भाग लेकर बारीक चूर्ण करके अठगुनी मिश्री मिलादेवे । इस चूर्णको प्रतिदिन चार २ मासेकी मात्रासे सेवन करे । यह चूर्ण रुचिकारक, तृप्तिजनक और अग्नि-वर्द्धक एवं बल-वीर्यको उत्पन्न करनेवाला और त्रिदोषनाशक है तथा उरःक्षत, तमक, गलेकी पीडा, खाँसी, हिचकी, अरुचि, यक्ष्मा, पीनस, संग्रहणी, अतिसार, भगन्दर, अर्बुद, प्रमेह, गुल्म और ज्वर इन सब रोगोंको नष्ट करता है ॥ २०-२२ ॥

शृङ्ग्यर्जुनाद्य चूर्ण ।

शृङ्ग्यर्जुनाश्वगन्धानागबलापुष्कराभयाच्छिन्नरुहाः ।
तालीसादिसमेता लेह्या मधुसर्पिभ्यां यक्ष्महराः ॥ २३ ॥

काकडासिंगी, अर्जुनकी छाल, असगन्ध, गंगेरन, पोहकरमूल, हरड, गिलोय, तालीशपत्र, सोंठ, मिरच, पीपल, वंशलोचन, दारचीनी, छोटी इलायची और मिश्री इन सबको समान भाग लेकर बारीक चूर्ण करके वस्त्रमें छान लेवे । इसको २ मासे परिमाण शहद और घीमें मिलाकर सेवन करनेसे राजयक्ष्मा रोग दूर होता है ॥ २३ ॥

सितोपलादिलेह ।

सितोपला तुगाक्षीरी पिप्पली बहुलात्वचः ।
अन्त्यादूर्द्धं द्विगुणितं लेहयेत्क्षौद्रसर्पिषा ॥ २४ ॥
चूर्णं वा प्राशयेदेतं श्वासकासक्षयापहम् ।
सुप्तजिह्वारोचकिनं मन्दाग्निं पार्श्वशूलिनम् ॥
हस्तपादांसदाहेषु ज्वरे रक्ते तथोर्द्धगे ॥ २५ ॥

मिश्री १६ तोले, वंशलोचन ८ तोले, पीपल ४ तोले, छोटी इलायची दो तोले और दारचीनी १ तोला लेवे। सबको एकत्र चूर्ण करके शहद और घीके साथ मिलाकर सेवन करनेसे श्वास, खाँसी, क्षय, जिह्वाकी जडता, अरुचि, मन्दाग्नि, पसलीकी पीडा आदि रोग दूर होते हैं। इसको हाथ पाँव एवं शिरकी दाह, ज्वर और ऊर्ध्वगत रक्तपित्तादि रोगाम भी सेवन कराना चाहिये ॥ २४ ॥ २५ ॥

वासावलेह ।

शतं संगृह्य वासायास्तोयद्रोणे विपाचयेत् ।
चतुर्भागावशेषेऽस्मिन् शर्करायाः पलं शतम् ॥ २६ ॥
त्रिकटु त्रिसुगन्धिश्च कट्फलं मुस्तकं गदम् ।
जीरकं पिप्पलीमूलं रोचनी चविका शुभा ॥ २७ ॥
कटुका श्रेयसी चैव तालीशं सधनीयकम् ।
कार्षिकं पृथगेतेषां क्षिपेन्मधु पलाष्टकम् ॥ २८ ॥

अडूसेके पंचांगको १०० पल लेकर एक द्रोण जलमें पकावे । जब पकते पकते चौथाई भाग जल शेष रहजाय तब उतारकर छानलेवे । फिर उसमें १०० पल शुद्ध खांड डालकर मन्दमन्द अग्निसे पकावे । जब वह पककर कुछ गाढा होजाय तब त्रिकुटा, दारचीनी, तेजपात, छोटी इलायची, कायफल, नागरमोथा, कूठ, जीरा, पीपलामूल, गोरोचन, चव्य, वंशलोचन, कुटकी, गजपीपल, तालीशपत्र और धनियाँ, प्रत्येक औषधिका चूर्ण दो दो तोले डालदेवे और शीतल होजानेपर ३२ तोले शहद मिलादेवे ॥ २६-२८ ॥

तद्यथाग्निबलं लिह्याच्छृतशीताम्बुपानतः ।
निहन्ति राजयक्ष्माणं रक्तपित्तं क्षतक्षयम् ॥ २९ ॥
वातिकं पैत्तिकं चैव श्वासं चैव सुदारुणम् ।
हृच्छूलं पार्श्वशूलं च वमिश्चैवारुचिं ज्वरम् ॥
"अश्विभ्यां निर्मितो ह्येष बृहद्वासावलेहकः" ॥ ३० ॥

इस अवलेहको अपनी अग्निके बलानुसार (शृतशीतल) औटाकर शीतल किये हुए जलके साथ सेवन करनेसे राजयक्ष्मा, रक्तपित्त, क्षतक्षय, वात-पित्त जन्य दारुण श्वास, हृदयशूल, पसलीकी पीडा, वमन, अरुचि और ज्वरादिविकार शीघ्र नष्ट होते हैं। "इस वासावलेहको अश्विनीकुमारोंने निर्माण किया है॥"

बृहद्वासावलेह १-२।

पञ्चविंशत्पलं ग्राह्यं बृहत्योर्वासकस्य च।
भार्ङ्याश्च पञ्चविंशच्च जलद्रोणे विपाचयेत् ॥ २१ ॥
पादशेषे रसे तस्मिन् खण्डं शतपलं न्यसेत्।
कुडवार्द्धं च हविषो मधुनः कुडवं तथा ॥ २२ ॥
मृताभ्रकं पलं चैकं कणाचूर्णं चतुःपलम्।
कुष्ठं तालीशपत्रं च मरिचं तेजपत्रकम् ॥ २३ ॥
मुरा मांसीमुशीरं च लवङ्गं नागकेशरम्।
त्वग्भार्ङ्गी वालकं मुस्तं प्रत्येकं कर्षसम्मितम् ॥
श्लक्ष्णचूर्णीकृतं सर्वं लेहीभूते विनिःक्षिपेत ॥ २४ ॥

बडी कटेरी, कटेरी, अडूसा और भारङ्गी इन औषधियोंको पच्चीस २ पल लेकर एक द्रोण जलमें पकावे। जब पकते पकते चतुर्थांश जल शेष रहजाय तब उतारकर छानलेवे फिर उसमें सौ पल शुद्ध खाँड डालकर मन्दमन्द अग्निसे पकावे। जब पाक उत्तम प्रकारसे सिद्ध होजाय तब उसमें अभ्रक भस्म ४ तोले, पीपलका चूर्ण १६ तोले, एवं कूट, तालीशपत्र, मिरच, तेजपात, मुरा, मांसी, खस, लौंग, नागकेशर, दारचीनी, भारगी, सुगन्धवाला और नागरमोथा प्रत्येकका बारीक चूर्ण एक एक कर्ष और घी ८ तोले डालदेवे। शीतल होनेपर १६ तोले शहद मिलादेवे। सबको अच्छे प्रकारसे मिलाकर एक उत्तम पात्रमें भरकर रखदेवे ॥ २१-२४ ॥

हन्ति यक्ष्माणमत्युग्रं कासं पञ्चविधं तथा ॥ २५
रक्तपित्तं क्षयं कासं ज्वरं प्लीहानमेव च।
बालानामपि वृद्धानां तरुणानां विशेषतः ॥ २६ ॥
पार्श्वशूलं च हृच्छूलमम्लपित्तं वमिं तथा।
बृहद्वासावलेहोऽयं महादेवेन निर्मितः ॥ २७ ॥

इसको प्रतिदिन छःछः मासे परिमाण सेवन करे। यह बृहद्वासावलेह दारुण राजयक्ष्मा, पाँच प्रकारकी खाँसी, रक्तपित्त, क्षय, ज्वर, प्लीहा, पसलीकी पीडा, हृदयशूल, अम्लपित्त और वमन इन सम्पूर्ण रोगोंको नष्ट करता है एवं बालक, वृद्ध और तरुण पुरुषोंके लिये विशेष उपयोगी है॥ २९-३७॥

तुलामादाय वासाया जलद्रोणे विपाचयेत्।
पादशेषे रसे तस्मिन्न खण्डं शतपलं न्यसेत्॥ ३८॥
शनैर्मृद्वग्निना सम्यक् सिद्धे तत्र प्रदापयेत्।
त्रिकटु त्रिसुगन्धं च कट्फलं मुस्तमेव च॥ ३९॥
कुष्ठं कम्पिल्लकं श्वेतजीरकं कृष्णजीरकम्।
त्रिवृता पिप्पलीमूलं चव्यं कटुकरोहिणी॥ ४०॥
शिवा तालीशधन्याकं प्रत्येकं च द्विकार्षिकम्।
चूर्णयित्वा क्षिपेत्तत्र शीते मधु पलाष्टकम्॥ ४१॥

२-अडूसेकी जडकी छाल या पंचांगको सौ पल लेकर एक द्रोण जलमें पकावे। जब पकते २ चौथाई जल शेष रहजाय तब उतारकर छानलेवे फिर उस क्वाथमें सौ पल शुद्ध खांड डालकर धीरे धीरे मन्दमन्द अग्निसे पकावे। जब पककर लेहकी समान गाढा होजाय तब-सोंठ, मिरच, पीपल, दारचीनी, तेजपात, छोटी इलायची, कायफल, नागरमोथा, कूठ, कबीला, सफेद जीरा, काला जीरा, निसोत, पीपलामूल, चव्य, कुटकी, हरड, तालीशपत्र और धनियाँ इन प्रत्येक औषधिको दो दो कर्ष बारीक पीसकर डालदेवे और शीतल होनपर ३२ तोले शहद मिलादेवे॥३८-४१॥

अस्य मात्रां ततो लीढ्वा तोयमुष्णं पिबेदनु।
सर्वकासाधिकारेषु स्वरभङ्गे विशेषतः॥ ४२॥
राजयक्ष्मणि दुस्साध्ये वातश्लेष्माश्रये तथा।
आनाहे वह्निमान्द्ये च हृद्रोगे च क्षतक्षये॥
मूत्रकृच्छ्रे च कृच्छ्रे च शस्तोऽयं लेह उत्तमः॥ ४३॥

इनको प्रतिदिन प्रातःकाल छः मासे अथवा १ तोला परिमाण सेवन करके ऊपरसे मन्दोष्ण जल पान करे। यह अवलेह सर्वप्रकारकी खाँसी, स्वरभंग, विशेषकर दुस्साध्य राजयक्ष्मा, वात-कफजन्य रोग, आनाह, मन्दाग्नि, हृदयरोग, क्षतक्षय, मूत्रकृच्छ्र और मूत्राघात आदि रोगमें विशेष उपयोगी है॥ ४२-४३॥

चयवनप्राश ।

बिल्वाग्निमन्थश्योनाककाश्मर्यः पाटला बला ।
पर्ण्यश्चतस्रः पिप्पल्यः श्वदंष्ट्रा बृहतीद्वयम् ॥ ४४ ॥
शृङ्गी तामलकी द्राक्षा जीवन्ती पुष्कराग्रुरू ।
अमृता चाभया ऋद्धिर्जीवकर्षभकौ शठी ॥ ४५ ॥
मुस्तं पुनर्नवा मेदा सूक्ष्मैलोत्पलचन्दने ।
विदारीवृषमूलानि काकोली काकनासिका ॥ ४६ ॥
एषां पलोन्मितान्भागाञ्छतान्यामलकस्य च ।
पञ्च दद्यात्तदैकस्थं जलद्रोणे विपाचयेत् ॥ ४७ ॥
ज्ञात्वा गतरसान्येतान्यौषधान्यथ तं रसम् ।
तच्चामलकमुद्धृत्य निष्कुलं तैलसर्पिषोः ॥ ४८ ॥
पलद्वादशके भृष्ट्वा दत्त्वा चार्द्धतुलां भिषक् ।
मत्स्यण्डिकायाः पूताया लेहवत्साधु साधयेत ॥ ४९ ॥

बेल, अरणी, स्योनापाठा, (आलू) कुम्भेर, पाडल इनकी छाल, खिरैंटी, शालपर्णी, पृश्निपर्णी, मुद्गपर्णी, माषपर्णी, पीपल, गोखुरू, कटेरी, बडीकटेरी, काकडासिंगी, भुंई आमला, दाख, जीवन्ती, पोहकरमूल, अगर, गिलोय, हरड, ऋद्धि, जीवक, ऋषभक, कचूर, नागरमोथा, पुनर्नवा, मेदा, (अभावमें असगन्ध), छोटी इलायची, नीलकमल, लालचन्दन, विदारीकन्द, अडूसेकी जड, काकोली और काकनसा (कौआठोडी) ये प्रत्येक ओषधि चार चार तोले एवं सुपक्व और बडे बडे आमले ५०० लेवे । प्रथम आमलोंको वस्त्रकी पोटलीमें बाँधकर समस्त औषधियोंके साथ १ द्रोण जलमें पकावे । जब पकते २ चौथाई भाग जल शेष रहजाय तब उतारकर छानलेवे और आमलोंको निकालकर उनकी गुठली अलग करके हाथसे मथकर वस्त्रमें छानलेवे । फिर उन आमलोंको ४८ तोले तिलके तैल और ४८ तोले गोघृतमें मन्दमन्द अग्निसे भूनकर पीसलेवे । फिर पूर्वोक्त क्वाथमें ५० पल मिश्री और उक्त आमले डालकर धीरे २ पकावे ॥ ४४–४९ ॥

षट्पलं मधुनश्चात्र सिद्धशीते प्रदापयेत् ।
चतुःपलं तुगाक्षीर्याः पिप्पल्या द्विपलं तथा ॥ ५० ॥

पलमेकं विदध्याच्च त्वगेलापत्रकेशरात् ।
इत्ययं च्यवनप्राशः परमुक्तो रसायनः ॥ ५१ ॥

जब पकते २ लेहकी समान होजाय तब नीचे उतारकर उसमें वंशलोचन १६ तोले, पीपल ८ तोले, एवं दारचीनी, छोटी इलायची तेजपात और नागकेशर इनका चूर्ण चार चार तोले डालदेवे और शीतल होनेपर २४ तोले शहद मिलादेवे। फिर करछीसे सबको अच्छे प्रकारसे मिलाकर घीके चिकने बासनमें भरकर रखदेवे। यह च्यवनप्राशावलेह परमश्रेष्ठ रसायन है ॥ ५० ॥ ५१ ॥

कासश्वासहरश्चैव विशेषेणोपदिश्यते ।
क्षीणक्षतानां वृद्धानां बालानाञ्चाङ्गवर्द्धनः ॥ ५२ ॥
स्वरक्षयमुरोरोगं हृद्रोगं वातशोणितम् ।
पिपासां मूत्रशुक्रस्थान् दोषांश्चैवापकर्षति ॥ ५३ ॥
अस्य मात्रां प्रयुञ्जीत नोपरुन्ध्याच्च भोजनम् ।
अस्य प्रयोगाच्च्यवनः सुवृद्धोऽभूत्पुनर्युवा ॥ ५४ ॥

इसके सेवन करनेसे खाँसी और श्वास दूर होते हैं। यह अवलेह विशेषकर क्षतक्षीणरोगी वृद्ध मनुष्य और बालकोंके अंगोकी वृद्धि और पुष्टि करनेवाला है एवं स्वरभंग, उरोरोग, हृदयरोग, वातरक्त, तृषा, मूत्र और वीर्य सम्बन्धी सम्पूर्ण-दोष इन सब विकारोंको हरता है। इस अवलेहको २ मासे अथवा ६ मासे परिमाण लेकर बकरीके दूध या शहदके साथ सेवन करना चाहिये। इसपर भोजनादि किसी प्रकारके पथ्य करनेका नियम नहीं है। इस अवलेहको सेवन करनेसे अत्यन्त वृद्ध च्यवन ऋषि फिरसे तरुण हो गये थे ॥ ५२-५४ ॥

मेधां स्मृतिं कांतिमनामयत्वमायुःप्रकर्षं बलमिन्द्रियाणाम् ।
स्त्रीषु प्रहर्षं परमग्निवृद्धिं बलप्रसादं पवनानुलोम्यम् ॥ ५५॥
रसायनस्यास्य नरः प्रयोगाल्लभेत जीर्णोऽपि कुटिप्रवेशात् ।
जराकृतं पूर्वमपास्य रूपं बिभर्त्ति रूपं नवयौवनस्य ॥ ५६ ॥
[" सिता मत्स्यण्डिकालाभे धात्र्याश्च मृदुभर्जनम् ।
चतुर्भागजले प्रायो द्रव्यं गतरसं भवेत् ॥ ५७ "]

यह अवलेह-मेधा, स्मरणशक्ति, कांति, आरोग्य, आयु इन्द्रियोंके बलकी वृद्धि करता है। एवं स्त्रियोंमें आनन्द, जठराग्निकी अत्यन्त वृद्धि, शरी-

रमें बलका संचार और वायुका अनुलोमन करता है । इस रसायनको सेवन करनेसे वायु और धूपको न सहनेवाला वृद्ध मनुष्य भी वृद्धावस्थाके पूर्वरूपको दूरकर नवयौवनके रूपको प्राप्त करता है ॥ ५५-५७ ॥

प्रत्येकं कार्षिकं चैव श्लक्ष्णचूर्णं च कारयेत् ।
जलेन मर्दयित्वा तु वटीं कुर्याद्विरक्तिकाम् ॥ २१ ॥
यथाव्याध्यनुपानेन योजयेच्च चिकित्सकः ।
अपस्मारे महाघोरे मूर्च्छारोगे च शस्यते ॥ २२ ॥
वातजान्सर्वरोगांश्च हन्यादचिरसेवनात् ।
नातः परतरं श्रेष्ठमपस्मारेषु वर्त्तते ॥
ब्रह्मणा निर्मितः पूर्वं नाम्ना वातकुलान्तकः ॥ २३ ॥

कस्तूरी, हरड, नागकेशर, बहेडा, पारा, गन्धक, जायफल, इलायची और लौंग इन प्रत्येकको एक एक कर्ष लेकर बारीक चूर्ण करलेवे। फिर उस चूर्णको जलके साथ खरल कर दो दो रत्तीकी गोलियाँ बनालेवे। वैद्य इस रसको यथादोषानुसार अनुपानके साथ अत्यन्त प्रबल अपस्मार और मूर्च्छारोगमें प्रयोग करे। यह सर्वप्रकारके वातरोगोंको बहुत शीघ्र नष्ट करता है। अपस्माररोगपर इस रससे बढकर अन्य कोई श्रेष्ठ औषधि नहीं है। इस वातकुलान्तक रसको पूर्वकालमें ब्रह्माजीने निर्माण किया है ॥२०—२३॥

कुष्माण्डघृत।

कूष्माण्डस्वरसे सर्पिरष्टादशगुणे पचेत्।
यष्ट्याह्वकल्कं तत्पानमपस्मारविनाशनम् ॥ २४ ॥

अठारह गुने पेठेके स्वरसमें १ भाग गोघृत, चौथाई भाग मुलहठीका कल्क डालकर घृतको पकावे। उस घृतको पान करतेही अपस्मार नाश होताहै ॥२४॥

ब्राह्मीघृत।

ब्राह्मीरसे वचाकुष्ठशङ्खपुष्पीभिरेव च।
पुराणं मेध्यमुन्मादग्रहापस्मारनुद् घृतम् ॥ २५ ॥

ब्राह्मीके रसमें बच, कूठ और शङ्खपुष्पी इनके समान भाग मिश्रित कल्कके साथ पुराने घृतको डालकर पकावे। वह घृत मेधाजनक एवं उन्माद, ग्रहबाधा और अपस्माररोगनाशक है ॥ २५ ॥

स्वल्पपञ्चगव्य घृत।

गोशकृद्रसदध्यम्लक्षीरमूत्रैः समैर्घृतम्।
सिद्धं चातुर्थिकोन्मादग्रहापस्मारनाशनम् ॥ २६ ॥

गौके गोबरका रस, खट्टा दही, दूध, गोमूत्र और घी इन सबको समान भाग लेकर यथाविधि घृतको सिद्ध करे। इस घृतको सेवन करनेसे चौथिया ज्वर, उन्माद, ग्रहपीडा और अपस्मार नष्ट होजाताहै ॥ २६ ॥

बृहत्पञ्चगव्यघृत।

द्वे पञ्चमूले त्रिफलां रजन्यौ कुटजत्वचम्।
सप्तपर्णमपामार्गं नीलिनीं कटुरोहिणीम् ॥ २७ ॥
शम्याकं फल्गुमूलं च पौष्करं सदुरालभम्।
द्विपलानि जलद्रोणे पचेत् पादावशेषिते ॥ २८ ॥

दोनों पञ्चमूल, त्रिफला, हल्दी, दारुहल्दी, कुडेकी छाल, सतवन, चिरचिटा, नील, कुटकी, अमलतास, कठूमरकी जड, पोहकरमूल, और धमासा इन प्रत्येक औषधिको आठ आठ तोले, लेकर एक द्रोण जलमें पकावे। जब पककर चौथाई भाग जल शेष रहजाय तब उतारकर छानलेवे ॥ २७ ॥ २८ ॥

भार्ङ्गीं पाठां त्रिकटुकं त्रिवृतां निचुलानि च।
श्रेयसीमाढकीं मूर्वां दन्तीं भूनिम्बचित्रकौ ॥
द्वे शारिवे रौहिषं च भूतिकां मदयन्तिकाम् ॥ २९ ॥
क्षिपेत्पिष्ट्वाऽक्षमात्राणि तैः प्रस्थं सर्पिषः पचेत्।
गोशकृद्रसदध्यम्लक्षीरमूत्रैश्च तत्समैः ॥
पञ्चगव्यमिदं ख्यातं महत्तदमृतोपमम् ॥ ३० ॥

फिर उसमें भारङ्गी, पाढ, त्रिकुटा, निसोत, जलबेंत, गजपीपल, अरहर, मूर्वा, दन्ती, चिरायता, चीता, कालीसर, गौरीसर, रोहिषतृण, अजवायन और मोतिया के फूल इन प्रत्येकका कल्क दो दो तोले एवं गौका घी, गोबरका रस, खट्टा दही, दूध और गोमूत्र ये प्रत्येक एक एक प्रस्थ डालकर उत्तम प्रकारसे घृतको पकावे ॥ २९ ॥ ३० ॥

अपस्मारे ज्वरे कासे श्वयथावुदरे तथा ॥ ३१ ॥
गुल्मार्शःपाण्डुरोगेषु कामलायां हलीमके।
अलक्ष्मीग्रहरक्षोघ्नं चातुर्थिकविनाशनम् ॥ ३२ ॥

यह बृहत्पञ्चगव्यनामक घृत अपस्मार, ज्वर, खाँसी, शोथ, उदररोग, गुल्म, अर्श, पाण्डुरोग, कामला और हलीमकादि रोगोंमें अमृतकी समान हितकर है। एवं दारिद्र्य, ग्रहबाधा, राक्षसबाधा, और चातुर्थिकज्वरको दूर करता है ॥ ३१ ॥ ३२॥

महाचैतसघृत।

शणस्त्रिवृत्तथैरण्डो दशमूली शतावरी।
रास्ना मागधिका शिग्रुः क्वाथ्यं द्विपलिकं भवेत् ॥ ३३ ॥
विदारी मधुकं मेदे द्वे काकोल्यौ सिता तथा।
एभिः खर्जूरमृद्वीकाभीरुमुञ्जातगोक्षुरैः।
चैतसस्य घृतस्याङ्ग पक्तव्यं सर्पिरुत्तमम् ॥ ३४ ॥

सनके बीज, निसोत, अण्डकी जड, दशमूल, शतावर, रायसन, पीपल और सहिंजना इन प्रत्येक औषधिको आठ आठ तोले लेकर क्वाथ बनालेवे। फिर उस

क्वाथमें विदारीकन्द, मुलहठी, मेदा, महामेदा, काकोली, क्षीरकाकोली, मिश्री, खजूर, दाख, शतावर, पुष्पशाकभेद (अभावमें ताडका गुदा), गोखरू और चैतसघृतकी समस्त औषधियोंके कल्कके साथ उत्तम प्रकारसे घृतको पकाना चाहिये ॥ ३३ ॥ ३४ ॥

महाचैतससंज्ञं तु सर्वापस्मारनाशनम् ॥ ३५ ॥
गरोन्मादप्रतिश्यायतृतीयकचतुर्थकान्।
पापालक्ष्मीर्जयेदेतत्सर्वग्रहनिवारणम् ॥ ३६ ॥
श्वासकासहरं चैव शुक्रार्त्तवविशोधनम्।
घृतमानं क्वाथविधिरिह चैतसवन्मतः ॥ ३७ ॥
कल्कश्चैतसकल्कोक्तद्रव्यैः सार्धं च पादिकः।
"नित्यं मुञ्जातकाभावे तालमस्तकमिष्यते" ॥ ३८ ॥

यह महाचैतसनामक घृत सर्वप्रकारके अपस्मारको नष्ट करता है एवं विषोत्पन्न, उन्माद, प्रतिश्याय, तिजारीज्वर, चौथियाज्वर, पापग्रह, अलक्ष्मी, सर्वप्रकारकी ग्रह-बाधा, श्वाँस और खाँसी इन सबको निवारण करता है। शुक्र और आर्त्तवको शुद्ध करता है। इसमें चैतसघृतकी समान यथाविधि क्वाथ बनाकर उसमें उक्त घृतके कल्ककी समस्त ओषधियोंका कल्क एक भाग और घी चार भाग डालकर घृतको सिद्ध करें ॥ ३५-३८ ॥

पलंकषाद्यतैल।

पलङ्कषावचापथ्यावृश्चिकाल्यर्कसर्षपैः।
जटिलापूतनाकेशीलाङ्गलीहिङ्गुचोरकैः ॥ ३९ ॥
लशुनातिविषाचित्राकुष्ठैर्विड्भिश्च पक्षिणाम्।
मांसाशिनां यथालाभं बस्तमूत्रे चतुर्गुणे ॥
सिद्धमभ्यञ्जनात्तैलमपस्मारविनाशनम् ॥ ४० ॥

गोरखमुण्डी, वच, हरड, बिछाटी घास, आककी जड, सरसों, बालछड, भूत-केशी, जलपीपल, हींग, असवरग, लहसन, अतीस, चीता, कूठ और बाज आदि मांसाहारी पक्षियोंकी (जितनी प्राप्त होसके) विष्ठा इन सबके समान भाग मिश्रित कल्कके साथ तिलके तैलको बकरेके चौगुने मूत्रमें सिद्ध करे। इस तैलको शरीरमें मर्दन करनेसे अपस्माररोग नाश होता है ॥ ३९ ॥ ४० ॥

अपस्माररोगमें पथ्यापथ्यविधि ।

उन्मादेषु यदुद्दिष्टं पथ्यनस्याञ्जनौषधम् ।
अपस्मारेऽपि तत्सर्वं प्रयोक्तव्यं भिषग्वरैः ॥ ४१ ॥

उन्मादरोगमें जो पथ्य, नस्य, अञ्जन और ओषधियाँ कहीगई हैं, उन सबको अपस्माररोगमें भी प्रयोग करना चाहिये ॥ ४१ ॥

इति भैषज्यरत्नावल्यामपस्माररोगचिकित्सा ।

वातव्याधिकी चिकित्सा ।

स्वाद्वम्ललवणैः स्निग्धैराहारैर्वातरोगिणाम् ।
अभ्यङ्गस्नेहवस्त्याद्यैः सर्वानेवोपपादयेत् ॥ १ ॥

मधुर, अम्ल, नमकीन, स्निग्ध आहारके द्वारा, तैलादि मर्दन, स्नेह पदार्थोंकी वस्ति आदि क्रियाओंके द्वारा वातरोगियोंके समस्त रोगोंकी चिकित्सा करे ॥ १ ॥

कोलं कुलत्थाः सुरदारु रास्ना माषातसीतैलफलानि कुष्ठम् ।
वचाशताह्वायवचूर्णमम्लमुष्णानि वातामयिनां प्रदेहः ॥ २ ॥

बेर, कुलथी, देवदारु, रायसन, उडद, अलसीका तैल, त्रिफला, कूठ, वच, सौंफ और जौका चूर्ण इन सबको समान भाग लेकर काँजीके साथ खरल करके उसको कुछ गरम कर वातरोगियोंके प्रलेप करना चाहिये ॥ २ ॥

पक्षाघातं कटिहनुशिरःकर्णनासाक्षितालु-
ग्रीवाग्रन्थिप्रबलमनिलं सार्दितं सापतानम् ।
मूत्राघातं ग्रहणिगलरुक्श्वाससर्वाङ्गकम्पं
तैलद्रोणी हरति न चिरात्काञ्जिकद्रोणिका च ॥ ३ ॥

एक बडे बर्त्तनमें तिलका तैल या काँजी भरकर उसमें गोता लगाकर स्नान करनेसे पक्षाघात, कमर, ठोडी, शिर, कान, नाक, आँख, तालु, ग्रीवा और ग्रन्थि इनमें स्थित प्रबल वायु एवं अर्दित, अपतानक, मूत्राघात, संग्रहणी, गलेके रोग, श्वास सम्पूर्ण अङ्गोंमें स्थित कम्प आदि विकार शीघ्र दूर होते हैं ॥ ३ ॥

तैलं घृतं चार्द्रकमातुलुङ्ग्यो रसं सचुक्रं सगुडं पिबेद्वा ।
कट्यूरुपृष्ठत्रिकगुल्मशूलगृध्रस्युदावर्त्तहरः प्रयोगः ॥ ४ ॥

तिलका तैल, घी, अदरखका रस, बिजौरेनींबूका रस इन सबको समान भाग लेकर चूक अथवा गुड मिलाकर सेवन करनेसे कमरकी पीडा, ऊरुस्तम्भ, पृष्ठदण्डकी पीडा, गुल्म, शूल, गृध्रसी और उदावर्त ये सब रोग नष्ट होते हैं ॥ ४ ॥

पञ्चमूलीबलासिद्धं क्षीरं वातामये हितम् ॥ ५ ॥

वातरोगमें बृहत्पञ्चमूल और खिरैंटीके द्वारा सिद्ध किया हुआ दुग्ध पान करना हितकर है ॥ ५ ॥

कोष्ठगत-वातकी चिकित्सा।

विशेषतस्तु कोष्ठस्थे वाते क्षारं पिबेन्नरः ॥ ६ ॥

कोष्ठगत वातमें विशेषकर जवाखार अथवा संग्रहणीरोगमें कहीहुई अग्निमदीपक और क्षारयुक्त ओषधियाँ सेवन करनी चाहिये ॥ ६ ॥

आमाशयगत-वातकी चिकित्सा।

आमाशयस्थे शुद्धस्य यथा रोगहरी क्रिया।
अमाशयगते वाते च्छर्दिताय यथाक्रमम् ॥
रूक्षः स्वेदो लङ्घनं च कर्त्तव्यं वह्निदीपनम् ॥ ७ ॥

आमाशयस्थित वातमें रोगीको प्रथम वमन और विरेचनके द्वारा शुद्ध कर पश्चात् रोगनाशक चिकित्सा करनी चाहिये। एवं वमन कराकर रूक्ष स्वेद देना, लंघन कराना, अग्निदीपक ओषधियोंका सेवन आदि क्रियायें करनी चाहिये ॥ ७ ॥

पक्वाशयगत-वातकी चिकित्सा।

पक्वाशयगते वाते हितं स्नेहविरेचनम् ॥ ८ ॥

पक्वाशयमें वातरोगके होनेपर रोगीको अण्डीका तेल पान कराकर दस्त कराना॥

वस्त्यादिगत-वातकी चिकित्सा।

कार्यो वस्तिगते वापि विधिर्वस्तिविशोधनः।
त्वङ्मांसासृक्शिराप्राप्ते कुर्याच्चासृग्विमोक्षणम् ॥ ९ ॥

वस्ति (मूत्राशय) गत वातरोगमें मूत्राघात और अश्मरीरोगमें कही हुई विधिसे चिकित्सा करनी चाहिये। त्वचा, मांस, रुधिर और शिरागत वायुरोगमें रक्तमोक्षण कराना चाहिये ॥ ९ ॥

स्नायुसन्ध्यस्थिगत-वातकी चिकित्सा।

स्नेहोपनाहाग्निकर्म्मबन्धनान्मर्दनानि च।
स्नायुसन्ध्यस्थिसंप्राप्ते कुर्याद्वाते विचक्षणः ॥ १० ॥

तैल, घृतादिका सेवन, प्रलेप, अग्निकर्म, बन्धन और तेलकी मालिश आदिके द्वारा स्नायु, सन्धि और अस्थिगत वातकी चिकित्सा करनी चाहिये ॥ १० ॥

त्वग्गत-वातकी चिकित्सा।

स्वेदाभ्यङ्गावगाहांश्च हृद्यं चान्नं त्वगाश्रिते ॥ ११ ॥

त्वचामें वातरोग होनेपर स्वेदक्रिया, तैलकी मालिश, गोता लगाकर जलमें स्नान करना और हृदयको हितकारी अन्नका भोजन आदि उपचार कराना ॥

रक्तगत-वातकी चिकित्सा।

शीताः प्रदेहा रक्तस्थे विरेको रक्तमोक्षणम् ॥ १२ ॥

रुधिरगत वातरोगमें शीतल प्रलेप, विरेचन और रक्तमोक्षण आदिके द्वारा चिकित्सा करनी चाहिये ॥ १२ ॥

मांसमेदोगत-वातकी चिकित्सा।

विरेको मांसमेदस्थे निरूहाः शमनानि च ॥ १३ ॥

मांस और मेदोगत वातरोगमें विरेचन, निरूहवस्ति और शमनकारक औषधियाँ प्रयोग करनी चाहिये ॥ १३ ॥

अस्थिमज्जागत-वातकी चिकित्सा।

बाह्याभ्यन्तरतः स्नेहैरस्थिमज्जागतं जयेत् ॥ १४ ॥

अस्थि और मज्जामें स्थित वातको घृतपान और तैलादिकी मालिश आदिके द्वारा जीतना चाहिये ॥ १४ ॥

शुक्रगत- वातकी चिकित्सा।

हृद्यान्नपानं शुक्रस्थे बलशुक्रकरं हितम् ॥ १५ ॥
विबद्धमार्गंशुक्रं तु दृष्ट्वा दद्याद्विरेचनम्।
सारल्यात्कोपिनो वायोर्वीर्यद्वारं हि शुध्यति ॥ १६ ॥

शुक्रस्थित वातमें हृदयको हितकारी, सुस्वादु, बलकारक, और शुक्रवर्द्धक अन्न पान सेवन करने हितकारी हैं। यदि शुक्र निकलनेका मार्ग अवरुद्ध होगया हो तो विरेचक औषधियाँ सेवन करावे। कारण-विरेचनके द्वारा कुपित वायुके सरल होजाने से वीर्य निकलनेका मार्ग साफ होजाताहै ॥ १५ ॥ १६ ॥

शुष्कगर्भकी चिकित्सा।

गर्भे शुष्के तु वातेन बालानां चापि शुष्यताम्।
सितामधुककाश्मर्यैर्हितमुत्थापने पयः ॥ १७ ॥

वायुके द्वारा गर्भाशय अथवा गर्भस्थ सन्तानके शुष्क होजानेपर मिश्री, मुलहठी, कुम्भेर इनके साथ दूधको पकाकर गर्भिणीको पान कराना चाहिये ॥ १७ ॥

शिरोगत-वातकी चिकित्सा ।

शिरोगतेऽनिले वातशिरोरोगहरी क्रिया ॥ १८ ॥

शिरमें वातरोग होनेपर वातज शिरोरोगमें कहीहुई विधिके अनुसार चिकित्सा करनी चाहिये ॥ १८ ॥

व्यादितकी चिकित्सा ।

व्यादितास्ये हनुं स्विन्नमङ्गुष्ठाभ्यां प्रपीड्य च ।
प्रदेशिनीभ्यां चोन्नम्य चिबुकोन्नमनं हितम् ॥ १९ ॥

वातरोगमें मुखके फैलजानेपर गण्डस्थलोंमें स्वेद देकर अँगूठोंके द्वारा ठोडीको दबावे फिर तर्जनी और मध्यमा अँगुलियोंके द्वारा ठोडीको ऊपरको उठावें । इस प्रकार करनेसे मुखका विकृतभाव दूर होताहै ॥ १९ ॥

आर्दितकी चिकित्सा ।

रसोनकल्कं नवनीतमिश्रं खादेन्नरो योऽर्दितरोगयुक्तः ।
तस्यार्दितं नाशयतीह शीघ्रं वृन्दं घनानामिव मातरिश्वा ॥

यदि आर्दितरोगी लहसुनके कल्कको नैनीघीमें मिलाकर सेवन करे तो उसका आर्दितरोग इस प्रकार शीघ्र नाश होजाता है, जैसे वायुका वेग मेघोंके समूहको तत्काल नष्ट करदेता है ॥ २० ॥

अर्दिते नवनीतेन खादेन्माषण्डरीं नरः ।
क्षीरमांसरसैर्भुक्त्वा दशमूलीरसं पिबेत् ॥ २१ ॥

आर्दितरोगमें नैनीघीके साथ उडदकी बडियें भक्षण करे । पश्चात् दूध और मांसरसके साथ भोजन करके दशमूलका क्वाथ पान करे ॥ २१ ॥

स्वेदाभ्यङ्गशिरोवस्तिपाननस्यपरायणः ।
अर्दितं सजयेत्सर्पिः पिबेदोत्तरभक्तितम् ॥ २२ ॥

आर्दितरोगमें स्वेद, तैलमर्दन, घृतपान, शिरोवस्ति और नस्य इन क्रियाओंका यथाविधि प्रयोग कर भोजनके बाद घृत पान करानेसे आर्दितरोग नष्ट हो ॥

मन्यास्तम्भकी चिकित्सा ।

पञ्चमूलीकृतः क्वाथो दशमूलीकृतोऽथवा ।
रूक्षः स्वेदस्तथा नस्यं मन्यास्तम्भे प्रशस्यते ॥ २३ ॥

मन्यास्तम्भरोगमें बृहत्पञ्चमूल अथवा दशमूलका काथ पान करना एवं रूक्ष स्वेद और नस्य देना चाहिये ॥ २३ ॥

ग्रीवास्तम्भकी चिकित्सा ।

कटुतैलेनाभ्यक्ते लिप्ते कल्केन वाजिगन्धायाः ।
शाम्येद्ग्रीवास्तम्भशूलं महदप्यनायासम् ॥ २४ ॥

कडुवे तेलकी मालिश और असगन्धकी जडको पानीमें पीसकर लेप करनेसे अत्यन्त प्रबल ग्रीवास्तम्भकी शूलभी सहजमें ही दूर होजाता है ॥ २४ ॥

जिह्वास्तम्भकी चिकित्सा ।

वाताद् वाग्धमनीदुष्टौ स्नेहगण्डूषधारणम् ॥ २५ ॥

वायुसे वाणीको बहानेवाली नाडीके विकृत होजानेपर वातनाशक तेल अथवा घृतके गण्डूषधारण करने चाहिये ॥ २५ ॥

कुब्जकी चिकित्सा ।

वातघ्नैर्दशमूल्या च नरं कुब्जमुपाचरेत् ।
स्नेहैर्मांसरसैर्वापि प्रवृद्धं तं विवर्जयेत् ॥ २६ ॥

वायुके द्वारा मनुष्यके शरीरमें कुब्ज (कुबडापन) होजानेपर वातनाशक भद्रदार्व्वादिगणकी ओषधियोंका काथ या दशमूलका काथ अथवा वातनाशक तैल घृतादि और मांसरस सेवन आदि उपचार करे । किन्तु बहुत पुराने स्थायी कुब्जको असाध्य:जानकर छोडदेवे ॥ २६ ॥

आध्मानकी चिकित्सा ।

आध्माने लंघनं पाणितापश्च फलवर्त्तयः ।
दीपनं पाचनं चैव वस्तिश्चाप्यत्र शोधनः ॥ २७ ॥

आध्मान (अफारा) रोगमें लंघन करना; हाथको अग्निपर तपाकर स्वेद देना, फलवर्त्ति क्रिया, अग्निदीपक और पाचक ओषधियोंको प्रयोग करनी और वस्तिक्रिया करनी चाहिये ॥ २७ ॥

अष्ठीला और प्रत्यष्ठीलाकी चिकित्सा ।

प्रत्यष्ठीलाष्ठीलिकयोरन्तर्विद्रधिगुल्मवत् ॥ २८ ॥

अष्ठीला, प्रत्यष्ठीलारोगमें अन्तर्विद्रधि और गुल्मरोगकी समान चिकित्सा करनी चाहिये ॥ २८ ॥

गृध्रसीकी चिकित्सा।

तैलमेरण्डजं वापि गोमूत्रेण पिबेन्नरः।
मासमेकं प्रयोगोऽयं गृध्रस्यूरुग्रहापहः॥ २९॥

अण्डीके तेलको गोमूत्रके साथ एक महीनेतक सेवन करनेसे गृध्रसी और ऊरुस्तम्भ दूर होता है॥ २९॥

शेफालिकादलक्वाथो मृद्वग्निपरिसाधितः।
दुर्वारं गृध्रसीरोगं पीतमात्रं समुद्धरेत्॥ ३०॥

मन्दमन्द अग्निके द्वारा सिद्ध किया हुआ निर्गुण्डीके पत्तोंका क्वाथ पान करतेहीं दुस्साध्य गृध्रसीरोगको नष्ट करता है॥ ३०॥

पिष्ट्वैरण्डफलं क्षीरे सविश्वं वा फलं रुबोः।
पायसो भक्षितः सिद्धो गृध्रसीकटिशूलनुत्॥ ३१॥

छिलकेरहित अण्डके बीजोंको पीसकर अथवा अण्डेके बीज और सोंठको एकत्र पीसकर उनकी दूधमें खीर बनाकर भक्षण करनेसे गृध्रसी और कमरका शूल नष्ट होता है। (इसमें अण्डके बीजोंसे चौगुने चावल और चावलोंसे चौगुना दूध लेना चाहिये)॥ ३१॥

वातकण्टककी चिकित्सा।

रक्तावसेचनं कार्य्यमभीक्ष्णं वातकण्टके।
पिबेदेरण्डतैलं वा दहेत्सूचीभिरेव वा॥ ३२॥

वातकण्टकरोगमें बारबार रक्तमोक्षण करावे अथवा अण्डीके तेलका पान करें या गरम सुईके द्वारा व्याधिस्थानको दग्ध करे॥ ३२॥

खल्वकी चिकित्सा।

खल्व्यां स्निग्धाम्ललवणैः स्वेदोन्मर्दोपनाहनम्॥ ३३॥

स्निग्ध, अम्ल और लवणयुक्त द्रव्योंके द्वारा स्वेद देना, मर्दन और प्रलेप करना आदि क्रियायें खल्वी (एक प्रकारका कम्प) रोगमें उपयोगी हैं॥ ३३॥

शिराग्रहकी चिकित्सा।

शिराग्रहे तु कर्त्तव्या शिरागतमरुत्क्रिया।
दशमूलीकषायेण मातुलुङ्गरसेन च॥
शृतेन तैलेनाभ्यङ्गः शिरोवस्तिश्च युज्यते॥ ३४॥

शिराग्रहरोगमें शिराओंमें स्थित वायुकी वातनाशक चिकित्सा करनी चाहिये एवं दशमूलके क्वाथ और बिजौरे नींबूके रसके साथ पकायेहुए तेलकी मालिश करना और शिरमें वस्ति (पिचकारी) का प्रयोग करना चाहिये ॥ ३४ ॥

अपतानककी चिकित्सा ।

अथापतानकेनार्त्तमस्रुताक्षमवेपनम् ।
अखट्वापातिनं चैव त्वरया समुपाचरेत् ॥ ३५ ॥

अपतानकरोगसे आक्रान्त रोगीकी जिसके नेत्रोंमें आँसू न निकले हों, शरीरमें कम्प न हुआ हो और वह खाटपर न पड़ा हो तो उसकी बहुत शीघ्र चिकित्सा करनी चाहिये । कारण, चिकित्सामें देर करनेसे रोग असाध्य होता है ॥ ३५ ॥

पक्षाघातकी चिकित्सा ।

पक्षाघातसमाक्रान्तं सुतीक्ष्णैश्च विरेचनैः ।
शोधयेद्वस्तिभिश्चापि व्याधिरेवं प्रशाम्यति ॥ ३६ ॥

पक्षाघातवाले रोगीको तीक्ष्ण औषधियोंके द्वारा विरेचन कराकर और वस्तिक्रियाके द्वारा शोधन करे । इस प्रकार करनेसे रोग शमन होता है ॥ ३६ ॥

दशमूलीबलामाषक्वाथं तैलाज्यमिश्रितम् ।
सायं भुक्त्वा पिबेन्नस्यं विश्वाच्यामवबाहुके ॥ ३७ ॥

विश्वाची और अवबाहुक रोगमें दशमूल, खिरैंटी और उड़द इनके क्वाथको तिलका तैल और घी मिलाकर शामको भोजन करनेके पश्चात् नासिका द्वारा पान करे ॥ ३७ ॥

अपतन्त्रककी चिकित्सा ।

अथापतन्त्रकेनार्त्तमातुरं नापतर्पयेत् ।
निरूहवस्तिवमनं सेवयेन्न कदाचन ॥ ३८ ॥
श्वसनाः कफवाताभ्यां रुद्धास्तस्य विमोक्षयेत ।
तीक्ष्णैः प्रधमनैः संज्ञां तासु मुक्तासु विन्दति ॥ ३९ ॥

अपतन्त्रकरोगसे ग्रसित रोगीको लङ्घन, निरूहवस्ति और वमन कदापि नहीं करानी चाहिये । इसमें कफ और वायुके द्वारा श्वास प्रश्वासको बढ़ानेवाली सब नाड़ियें रुक जाती हैं, इसलिये तीक्ष्ण प्रधमन क्रिया करके उनको खोलदेवे । नाड़ियोंके खुलजानेपर रोगी चैतन्यताको प्राप्त होता है ॥ ३८ ॥ ३९ ॥

खञ्ज और पंगुताकी चिकित्सा।

उपाचरेदभिनवं खञ्जं पङ्गुमथापि वा।
विरेकास्थापनस्वेदगुग्गुलुस्नेहवस्तिभिः ॥ ४० ॥

विरेचन, निरूहवस्ति, स्वेद, गूगल और स्नेहवस्ति इन क्रियाओंके द्वारा नवीन खञ्ज और पंगु रोगीकी चिकित्सा करनी चाहिये ॥ ४० ॥

क्रोष्टुशीर्षकी चिकित्सा।

गुग्गुलुं क्रोष्टुशीर्षे तु गुडूचीत्रिफलाम्भसा।
क्षीरेणैरण्डतैलं वा पिबेद्वा वृद्धदारुकम् ॥ ४१ ॥
रसैस्तित्तिरिमांसस्य पीतैर्गुग्गुलुसंयुतैः।
वातरक्तक्रियाभिश्च जयेज्जम्बुकमस्तकम् ॥ ४२ ॥

क्रोष्टुशीर्ष वातरोगमें गिलोय और त्रिफलेके क्वाथके साथ शुद्ध गूगल या गौके दूधके साथ अण्डीका तैल अथवा दूधके साथ विधारेका चूर्ण सेवन करना चाहिये। तीतरके मांसरसके साथ गूगलको मिलाकर पान करनेसे और वातरक्तविकारमें कही हुई विधिके अनुसार चिकित्सा करनेसे क्रोष्टुशीर्ष रोग नष्ट होता है ॥४१॥ ॥४२॥

कलायखञ्जकी चिकित्सा।

क्रमः कलायखञ्जस्य खञ्जपङ्ग्वोरिव स्मृतः।
विशेषात्स्नेहनं कर्म कार्यमत्र विचक्षणैः ॥ ४३ ॥

खञ्ज और पंगुरोगकी समान कलायखञ्जरोगकी चिकित्सा करनी। इसमें विशेषकर स्नेहकर्म अर्थात् वातनाशक तैल घृतादिका मर्दन व पान करना ॥ ४३ ॥

बाह्यान्तरायामकी चिकित्सा।

बाह्यायामेऽन्तरायामे विधेयाऽर्दितवत्क्रिया ॥ ४४ ॥

बाह्यायाम और अन्तरायामरोगमें अर्दितरोगकी समान चिकित्सा करनी ॥४४॥

त्रिकशूलकी चि[illegible]।

कारयेद्वालुकास्वेदं त्रिकशूले प्रयत्नतः।
यद्वाऽवस्तात्करीषाग्निं धारयेत्सततं नरः ॥ ४५ ॥

त्रिकशूलरोगमें वालूके द्वारा विधिपूर्वक स्वेद देवे अथवा कमरके नीचे आरने उपलोंकी अग्निको रखकर बार बार सेंके ॥ ४५ ॥

पाददाहकी चिकित्सा।

वातरक्तक्रमं कुर्यात्पाददाहे विशेषतः।
मसूरविदलैः पिष्टैः शृतशीतेन वारिणा ॥ ४६ ॥
चरणौ लेपयेत्सम्यक् पाददाहप्रशान्तये।
नवनीतेन संलिप्तौ वह्निना परितापितौ ॥
मुच्येते चरणौ क्षिप्रं परितापात्सुदारुणात् ॥ ४७ ॥

पाददाहरोगमें विशेषकर वातरक्तकी समान चिकित्सा करनी चाहिये। मसूरकी दालको पीसकर जलके साथ पकाकर शीतल होजानेपर पैरोंमें लेप करनेसे पाँवोंकी दाह शान्त होती है। अथवा पाँवोंमें नैनी घी लगाकर अग्निपर तपानेसे पैरोंकी दारुण दाह शीघ्र दूर होती है ॥ ४६ ॥ ४७ ॥

पादहर्षकी चिकित्सा।

पादहर्षे तु कर्त्तव्यः कफवातहरो विधिः ॥ ४८ ॥

पादहर्षरोगमें कफ और वातनाशक चिकित्सा करनी चाहिये ॥ ४८ ॥

दशमूलादिक्काथ।

दशमूलीकृतः क्काथः पञ्चमूल्याऽपि कल्पितः।
मन्यास्तम्भं निहन्त्याशु कम्पवातं विशेषतः ॥ ४९ ॥

दशमूल अथवा बृहत् पञ्चमूलका काढा बनाकर पान करनेसे मन्यास्तम्भ रोग और विशेषकर कम्पवातरोग शीघ्र नष्ट होता है ॥ ४९ ॥

बलादिक्वाथ।

बलामूलशृतं तोयं सैन्धवेन समन्वितम्।
बाहुशोषकरे वाते मन्यास्तम्भे च शस्यते ॥ ५० ॥

बाहुशोष और मन्यास्तम्भ वातरोगमें खिरेंटीकी जडका क्वाथ बनाकर उसको सैन्धानमकके साथ सेवन करना चाहिये ॥ ५० ॥

एरण्डादिक्वाथ।

एरण्डमूलं बिल्वं च बृहती कण्टकारिका।
कषायो रुचकोपेतः पीतो वङ्क्षणवस्तिजम् ॥
गृध्रसीजं हरेच्छूलं चिरकालानुबन्धि च ॥ ५१ ॥

अण्डकी जडकी छाल, बेलकी छाल, बडी कटेरी और कटेरी इनके काढेमें कालानमक डालकर पान करनेसे वंक्षण और वस्तिगत शूल और पुरानी गृध्रसीका शूलरोग दूर होता है ॥ ५१ ॥

सिंहास्यादिक्वाथ ।

सिंहास्यदन्तीकृतमालकानां पिबेत्कषायं रुबुतैलमिश्रम् ।
यो गृध्रसीनष्टगतिः प्रसुप्तः स शीघ्रगः स्याद्धि किमत्र चित्रम्॥

जो गृध्रसीरोगीकी गतिशक्ति नष्ट होगई हो और जडता होगई हो तो उसको अडूसा, दन्तीकी जड और अमलतास इनका क्वाथ अण्डीका तेल मिलाकर पान कराना चाहिये इससे रोगी शीघ्र चलने लगता है ॥ ९२ ॥

रास्नासप्तकक्वाथ ।

रास्नामृतारग्वधदेवदारुत्रिकण्टकैरण्डपुनर्नवानाम् ।
क्वाथं पिबेन्नागरचूर्णमिश्रं जंघोरुपृष्ठत्रिकपार्श्वशूली ॥९३॥

रायसन, गिलोय, अमलतास, देवदारु, गोखुरू, अण्डकी जड और पुनर्नवा इनके मन्दोष्ण क्वाथको सोंठका चूर्ण डालकर पान करनेसे जङ्घा, ऊरु, पीठ, त्रिक और पार्श्वशूलवाला रोगी आरोग्य होता है ॥ ९३ ॥

माषादिक्वाथ ।

माषात्मगुप्तावातारिवाट्यालकजटाशृतम् ।
हिङ्गुसैन्धवसंयुक्तं पक्षाघातं विनाशयेत् ॥ ९४ ॥

उडद, कौंचके बीज, एरण्डमूल, खिरैंटी और बालछड इनके क्वाथमें हींग और सैंधानमक डालकर पीनेसे पक्षाघात रोग नष्ट होता है ॥ ९४ ॥

गोक्षुरादिक्वाथ ।

गोक्षुरमेरण्डमूलं वचा रास्ना पुनर्नवा
कषाय एष शस्तस्तु वाते सर्वाङ्गमाश्रिते ॥ ९५ ॥

गोखुरू, अण्डकी जड, वच, रायसन और पुनर्नवा इनका क्वाथ सर्वाङ्गगत वातरोगमें हितकारी है ॥ ९५ ॥

माषबलादिक्वाथ ।

माषबलाशुकशिम्बीकत्तृणरास्नाश्वगन्धोरुबुकानाम् ।
क्वाथो यस्य निपीतो रामठलवणान्वितः कोष्णः ॥
अपहरति पक्षघातं मन्यास्तम्भं सकर्णनादरुजम् ।
दुर्जयमर्दितवातं सप्ताहाज्जयति चावश्यम् ॥ ९६ ॥

उडद, खिरैंटीकी जड, कौंचके बीज, रोहिषतृण, रायसन, असगन्ध और अण्डकी जड इनके मन्दोष्ण क्वाथको हींग और सैंधानमक मिलाकर पान

करनेसे पक्षाघात, मन्यास्तम्भ, कर्णरोग और दुस्साध्य अर्दितरोग सात दिनमेंही अवश्य नाश होता है ॥ ५६ ॥

कल्याणलेह।

सहरिद्रा वचा कुष्ठं पिप्पली विश्वभेषजम्।
अजाजी चाजमोदा च यष्टीमधुकसैन्धवम् ॥ ५७ ॥
एतानि श्लक्ष्णचूर्णानि समभागानि कारयेत्।
तच्चूर्णं सर्पिषाऽऽलोड्य प्रत्यहं भक्षयेन्नरः ॥ ५८ ॥
एकविंशतिरात्रेण नरः श्रुतिधरो भवेत्।
मेघदुन्दुभिनिर्घोषो मत्तकोकिलनिस्वनः ॥
जडगद्गदमूकत्वं लेहः कल्याणको जयेत् ॥ ५९ ॥

हल्दी, वच, कूठ, पीपल, सोंठ, कालाजीरा, अजमोद, मुलहठी और सेंधानमक इन सबको समान भाग लेकर बारीक पीसकर वस्त्रमें छानलेवे। इस चूर्णको घीमें मिलाकर प्रतिदिन प्रातःकाल सेवन करनेसे मनुष्य इक्कीस दिनमें सुनतेही बातको धारण करता है। मेघ और दुन्दुभिकी समान घोर शब्द करनेवाला और मदोन्मत्त कोयलकी समान कण्ठस्वरवाला होता है। यह कल्याण लेह जिह्वाकी जडता गद्गद्-पन और मूकताको दूर करता है ॥ ५७–५९ ॥

शाल्वणस्वेद।

काकोल्यादिः सवातघ्नः सर्वाम्लद्रव्यसंयुतः।
सानूपमांसः सुस्विन्नः सर्वस्नेहसमन्वितः ॥ ६० ॥
सुखोष्णः स्पष्टलवणः शाल्वणः परिकीर्त्तितः।
तेनोपनाहं कुर्वीत सर्वदा वातरोगिणाम् ॥ ६१ ॥

काकोल्यादिगणकी समस्त ओषधि, भद्रदार्वादिगणकी सब ओषधि, सर्व प्रकारके अम्लपदार्थ, सर्व प्रकारके स्नेह (तैल, घृत, चर्बी, मज्जा) द्रव्य और सर्व प्रकारके अनूपदेशके जीवोंका मांस इन सबको एकत्र उत्तम प्रकारसे पकावे फिर उसमें नमक डालकर उससे सुहाता २ स्वेद देनेको शाल्वणस्वेद कहते हैं। इसके द्वारा वातरोगियोंको सदा उपनाह स्वेद देना ॥ ६० ॥ ६१ ॥

वातघ्नो भद्रदार्वादिः काकोल्यादिस्तु सौश्रुतः।
मांसेनात्रौषधं तुल्यं यावताऽम्लेन चाम्लता ॥ ६२ ॥

पट्टीस्यात्स्वेदनार्थं च काञ्जिकाद्यम्लमिष्यते।
चतुःस्नेहोऽत्र तावान्स्यात्सुस्विन्नत्वं यतो भवेत् ॥ ६३ ॥
समस्तं वर्गमर्द्धं वा यथालाभमथापि वा।
प्रयुञ्जीतेति वचनं सर्वत्र गणकर्म्मणि ॥ ६४ ॥

भद्रदार्वादिगण और काकोल्यादिगणकी ओषधियाँ वातनाशक हैं, यह सुश्रुतने कहा है। इसमें मांसकी बराबर सब ओषधियाँ जितने अम्लपदार्थोंके द्वारा अम्लता हो सके वह पट्टी स्वेद देनेके लिये ग्रहण करनी, काँजी आदि अम्लपदार्थ लेना। इसमें चारों स्नेहद्रव्य उतनेही लेने जितने द्रव्योंसे वह अच्छी तरह सीजजाय। सम्पूर्ण वर्गकी या आधे वर्गकी अथवा जितनी मिल सकें उतनी ओषधियाँ लेनी चाहिये। यह वचन सब जगह गणकर्ममें प्रयोग करना ॥ ६३-६४ ॥

वातगजांकुश।

मृतं सूतं मृतं लौहं ताप्यं गन्धकतालकम्।
पथ्या शृङ्गी विषं व्योषमग्निमन्थं च टङ्कणम् ॥ ६५ ॥
तुल्यं खल्ले दिनं मर्द्यं मुण्डीनिर्गुण्डिकाद्रवैः।
द्विगुञ्जां वटिकां खादेत्सर्ववातप्रशान्तये ॥ ६६ ॥
कणाचूर्णयुतं चैव जिञ्जीकाथं पिबेदनु।
साध्यासाध्यं निहन्त्याशु रसो वातगजांकुशः ॥ ६७ ॥
सप्ताहाद् गृध्रसीं हन्ति दारुणं सान्निपातिकम्।
क्रोष्टुशीर्षकवातं चाप्यवबाहुकसंज्ञकम् ॥ ६८ ॥
मन्यास्तम्भमुरुस्तम्भं हनुस्तम्भं विनाशयेत्।
पक्षाघातादिरोगेषु कथितः परमोत्तमः ॥ ६९ ॥

शुद्ध पारेकी भस्म, लोहभस्म, सोनामाखीकी भस्म, शुद्ध गन्धक, हरताल, हरड़, काकड़ासिंगी, शुद्ध मीठा तेलिया, सोंठ, पीपल, मिरच अरणी और सुहागा इन सबको समान भाग लेकर मुण्डी और निर्गुण्डीके रसके साथ एक एक दिनतक खरल करके दो दो रत्तीकी गोलियाँ बनालेवे। सर्व प्रकारक वातरोगको शमन करनेके लिये इसकी प्रतिदिन एक एक गोली भक्षण करे और ऊपरसे पीपल का चूर्ण मिलाकर मंजीठके क्वाथको पीवे। यह वातगजांकुशरस साध्य व असाध्य सर्व प्रकारके वातरोगको तत्काल नष्ट करता है। एवं गृध्रसी

दारुण सन्निपात, क्रोष्टुशीर्षक, अवबाहुक, मन्यास्तम्भ और हनुस्तम्भ इन समस्त वातरोगोंको सात दिनमें ही नाश कर देता है । पक्षाघात आदि व्याधियोंमें यह अत्युत्तम कहागया है ॥ ६६–६९ ॥

बृहद्वातगजांकुश ।

सूताभ्रतीक्ष्णकान्तानि ताम्रतालकगन्धकम् ।
स्वर्णं शुण्ठी बला धान्यं कट्फलं चाभया विषम् ॥७०॥
पथ्या शृङ्गी पिप्पली च मरिचं टङ्कणं तथा ।
तुल्यं खल्वे दिनं मर्द्यं मुण्डीनिर्गुण्डिकाद्रवैः ॥ ७१ ॥
द्विगुञ्जां वटिकां खादेत्सर्ववातप्रशान्तये ।
साध्यासाध्यं निहन्त्याशु बृहद्वातगजाङ्कुशः ॥ ७२ ॥

शुद्ध पारा, अभ्रक, कान्तलोह, ताँबा, हरताल इनकी भस्म, शुद्ध गन्धक, सुवर्णभस्म, सोंठ, खिरैंटी, धनियाँ, कायफल, शुद्ध मीठा तेलिया काकडासिङ्गी, पीपल, मिरच और सुहागा ये प्रत्येक एक एक भाग और हरड दो भाग लेकर सबको एकत्र मुण्डी और निर्गुण्डीके रसमें एक एक दिनतक खरल करके दो दो रत्तीकी गोलियाँ बनालेवे । इस रसको सर्वप्रकारके वातरोगोंको शान्त करनेके लिये सेवन करे । बृहद्वातगजांकुशरस साध्य और असाध्य सम्पूर्ण वातविकारोंको शीघ्र नष्ट करताहै ॥ ७०–७२ ॥

महावातगजांकुश ।

मृताभ्रतीक्ष्णताम्रं च सूततालकगन्धकम् ।
भार्ङ्गी शुण्ठी बला धान्यं कट्फलं चाभया विषम् ॥७३॥
संपिष्य चपलाद्रावैर्निष्कैकां भक्षयेद्वटीम् ।
वातश्लेष्महरो ह्येष गुरुवातगजाङ्कुशः ॥ ७४ ॥

अभ्रकभस्म, लोहभस्म, ताम्रभस्म, शुद्ध पारा, हरताल, शुद्ध गन्धक, भारङ्गी, सोंठ, खिरैंटी, धनियाँ, कायफल, हरड और शुद्ध मीठा तेलिया इन सबको समान भाग लेवे । फिर एकत्र पीसकर पीपलके क्वाथमें खरल करके दो दो रत्तीकी गोलियाँ बनाकर प्रतिदिन एक एक गोली सेवन करे । यह महावातगजांकुश रस वात और कफसे उत्पन्न हुये सब रोगोंको दूर करता है ॥ ७३ ॥ ७४ ॥

लघुआनन्दरस ।

पारदं गन्धकं लोहमभ्रकं विषमेव च ।
समांशं मरिचस्याष्टौ टङ्कणं तु चतुर्गुणम् ॥ ७५ ॥

भृङ्गराजरसेनैव दातव्याः पञ्च भावनाः ।
तथा दाडिमतोयेन वटीं कुर्यात्समाहितः ॥
निहन्ति वातजान्रोगान्भ्रमदाहपुरःसरान् ॥ ७६ ॥

शुद्ध पारा, शुद्ध गन्धक, लोहभस्म, अभ्रकभस्म और शुद्ध मीठा तेलिया ये सब समान भाग काली मिर्च अठगुनी और सुहागा चौगुना लेकर सबको एकत्र करके भाँगरेके रस और अनारके रसमें पाँच पाँच बार भावना देकर दो दो रत्तीकी गोलियाँ बनालेवे । यह रस सर्वप्रकारके वातरोग, भ्रम, दाह आदि उपद्रवोंको नष्ट करता है ॥ ७५ ॥ ७६ ॥

गगनादिवटी ।

मृतगगनरसार्कं मुण्डतीक्ष्णं सताप्यं सबलिसममिदं स्याद्यष्टितोयप्रपिष्टम् । तदनु सलिलजातैर्वासकै- र्गोस्तनीभिर्मृदितमनु विदारीवारिणा घस्रमेकम् ॥ घृत- मधुसहितेयं निष्कमात्रा वटीति क्षपयति गुरुवातं पित्त- रोगं क्षयं च । भ्रममदकफशोषान्दाहतृष्णासमुत्थान् मलयजमिह पेयं चानुपेयं सचन्द्रम् ॥ ७७ ॥

अभ्रकभस्म, शुद्ध पारा, ताम्रभस्म, मण्डूरभस्म, तीक्ष्ण लोहभस्म, सोनामाखीकी भस्म और शुद्ध गन्धक इन प्रत्येक औषधिको समान भाग लेकर मुलहठीके क्काथमें खरल करके फिर कमल, अडूसेके पत्ते, दाख और विदारीकन्दके रसमें क्रमसे एक एक दिनतक खरल कर सुखालेवे । फिर तीन तीन रत्तीकी गोलियाँ बनाकर प्रतिदिन एक एक गोली घृत और शहदके साथ मिलाकर सेवन करे । औषध सेवन करनेके पश्चात् सफेद चन्दन और कपूरका अनुपान करे । यह वटी प्रबल वातरोग, पित्तके रोग, क्षय, भ्रम, मद, कफ, शोष, दाह और तृषासे उत्पन्न हुए सब विकारोंको दूर करती है ॥ ७७ ॥

कुब्जविनोद रस ।

रसगन्धौ समौ शुद्धौ चाभया तालकं तथा ।
विषं कटुकि व्योष च बोलजैपालकौ समौ ॥ ७८ ॥
भृङ्गराजरसैर्मर्द्यं स्नुह्यर्कस्वरसैस्तथा ।
गुञ्जाद्वयं भक्षयेच्च हृच्छूलं पार्श्वशूलकम् ॥ ७९ ॥
आमवाताढ्यवातादीन कटिशूलं च नाशयेत् ।
अग्निं च कुरुते दीप्तं स्थौल्यं चाप्यपकर्षति ॥ ८० ॥

शुद्ध पारा, शुद्ध गन्धक, हरड, हरताल, शुद्ध मीठा तेलिया, कुटकी, सोंठ, मिरच, पीपल, बोल और जमालगोटा इन सबको समान भाग लेकर भाँगरेके रस, थूहरके दूध और आकके दूधके साथ क्रमसे एकएक दिनतक खरल करके दो दो रत्तीकी गोलियाँ बनालेवे। इसकी प्रतिदिन एक एक गोली सेवन करनेसे हृदयका शूल, पसलीकी पीडा, आमवात आदि सर्वप्रकारके वातरोग और कमरकी पीडा नाश होती है। यह रस अग्निको अत्यन्त दीपन करता और स्थूलताको दूर करता है ॥७८-८०॥

सर्वाङ्गकम्पारिरस ।

मृतं सूतं मृतं ताम्रं मर्दयेत्कटुकद्रवैः ।
एकविंशतिवारं च शोष्यं पेष्यं पुनःपुनः ॥
चणमात्रा वटी भक्ष्या रसः सर्वाङ्गकम्पजित् ॥ ८१ ॥

शुद्ध पारे और ताँबेकी भस्मको समान भाग लेकर कुटकीके क्वाथमें इकीस बार भावना देकर सुखालेवे। फिर पीसकर इसकी चनेकी बराबर गोली बनाकर भक्षण करनेसे सर्वाङ्गगत कम्पवात नष्ट होता है ॥ ८१ ॥

चिन्तामणिरस ।

कर्षैकं रससिन्दूरं तत्समं मृतमभ्रकम् ।
तदर्द्धं मृतलौहं च स्वर्णं शाणं क्षिपेद् बुधः ॥ ८२ ॥
कन्यारसेन सम्मर्द्य गुञ्जामात्रां वटीं चरेत् ।
अनुपानादिकं दद्याद् बुद्ध्वा दोषबलाबलम् ॥ ८३ ॥

रससिन्दूर और अभ्रकभस्म ये प्रत्येक दो दो तोले, लोहभस्म एक तोला और सुवर्णभस्म ४ मासे इन सबको घीगुआरके रसमें खरल करके एक एक रत्तीकी गोलियाँ बनालेवे। इस वटीको दोषोंका बलाबल विचारकर यथोचित अनुपानके साथ सेवन करावे ॥ ८२ ॥ ८३ ॥

हन्ति श्लेष्मान्वितं वातं केवलं पित्तसंयुतम् ।
हृल्लासमरुचिं दाहं वान्तिं भ्रान्तिं शिरोग्रहम् ॥ ८४ ॥
प्रमेहं कर्णनादं च ज्वरगद्गदमूकताम् ।
बाधिर्यं गर्भिणीरोगमश्मरीं सूतिकामयम् ॥ ८५ ॥
प्रदरं सोमरोगं च यक्ष्माणं ज्वरमेव च ।
बलवर्णाग्निदः सम्यक् कान्तिपुष्टिप्रसाधकः ।
चिन्तामणिरसश्चायं चिन्तामणिरिवापरः ॥ ८६ ॥

यह चिन्तामणिनामक रस कफसहित वात, केवल वात और पित्तयुक्त वात, एवं हृल्लास, अरुचि, दाह, वमन, भ्रान्ति, शिरःपीडा, प्रमेह, कर्णनाद, ज्वर, गद्गदता, मूकता, बहरापन, गर्भिणीके रोग, पथरी, प्रसूतिरोग, प्रदर, सोमरोग, राजयक्ष्मा, और सर्वप्रकारके ज्वरको नष्ट करता है। एवं बल, वर्ण और अग्निकी वृद्धि, कान्ति और पुष्टिको उत्पन्न करनेवाला है। यह चिन्तामणिरस दूसरी चिन्तामणिकी समान है॥ ८४–८६॥

चिन्तामणिचतुर्मुख।

विशुद्धं रससिन्दूरं तदर्द्धं लौहमभ्रकम्।
तदर्द्धं कनकं खल्वे कन्यास्वरसमर्दितम्॥ ८७॥
एरण्डपत्रैरावेष्ट्य धान्यराशौ निधापयेत्।
त्रिदिनान्ते समुद्धृत्य सर्वरोगेषु योजयेत्॥ ८८॥

शुद्ध रससिन्दूर दो तोले, लोहभस्म १ तोला, अभ्रकभस्म एक तोला और सुवर्णभस्म ६ मासे इन सबको एकत्र घीकुँआरके रसमें खरल करके अण्डके पत्तोंसे लपेटकर धानोंकी राशिमें रखदेवे। फिर तीन दिनके बाद निकालकर उसको सर्वप्रकारके रोगोंमें प्रयोग करे॥ ८७–८८॥

एतद्रसायनवरं त्रिफलामधुसंयुतम्।
तद्यथाग्निबलं खादेद्वलीपलितनाशनम्॥ ८९॥
अपस्मारं महोन्मादं रोगान् वातसमुद्भवान्।
क्रमेण शीलितं हन्ति वृक्षमिन्द्राशनिर्यथा॥ ९०॥

इस उत्तम रसायनको अग्निका बलाबल विचारकर यथोचित मात्रासे त्रिफलेके रस और शहदके साथ मिलाकर सेवन करनेसे वली और पलितरोग नाश होते हैं। एवं अपस्मार महोन्माद और वातजनित समस्त रोगोंको यह रस इस प्रकार नष्ट करदेता है जैसे इन्द्रका वज्र वृक्षको नाश करदेता है॥८९॥९०॥

बृहद्वातचिन्तामणि।

भागत्रयं स्वर्णभस्म द्विभागं रौप्यमभ्रकम्।
लौहात्पंच प्रवालं च मौक्तिकं त्रयसम्मितम्॥ ९१॥
भस्मसूतं सप्तकं च कन्यारसविमर्दितम्।
वल्लमात्रा वटी कार्या भिषग्भिः परियत्नतः॥ ९२॥

——

यथाव्याध्यनुपानेन नाशयेद्रोगसङ्कुलम् ।
वातरोगं पित्तकृतं निहन्ति नात्र चिन्तनम् ॥ ९३ ॥
वृद्धोऽपि तरुणस्पर्शी कन्दर्पसमविक्रमः ।
दृष्टः सिद्धफलश्चायं वातचिन्तामणिस्त्विह ॥ ९४ ॥

सुवर्णभस्म ३ तोले, चाँदीकी भस्म दो तोले, अभ्रकभस्म दो तोले, लोहभस्म ९ तोले, मूँगेकी भस्म ९ तोले, मोतीकी भस्म ३ तोले और शुद्ध पारेकी भस्म ७ तोले इन सबको एकत्र घीकुँआरके रसमें खरल करके दो या डेढ रत्तीकी गोलियाँ बना-लेवे। फिर रोगके अनुसार अनुपानके साथ इसको प्रतिदिन सेवन करनेसे समस्त रोगसमूह और पित्ताश्रित वातरोग निस्सन्देह नष्ट होते हैं। एवं वृद्ध पुरुषभी कामदेवकी समान पराक्रमशाली और तरुण होजाता है। यह वातचिन्तामणि रस वातरोगमें सिद्धफलका देनेवाला है ॥ ९१-९४ ॥

चतुर्मुखरस ।

रसगन्धकलौहाभ्रं समं सुताङ्घ्रि हेम च ।
सर्वं खल्लतले क्षिप्त्वा कन्यास्वरसमर्दितम् ॥ ९५ ॥
एरण्डपत्रैरावेष्ट्य धान्यराशौ दिनत्रयम् ।
संस्थाप्य च तदुद्धृत्य सर्वरोगेषु योजयेत् ॥ ९६ ॥

शुद्ध पारा, शुद्ध गन्धक, लोहभस्म, अभ्रकभस्म ये प्रत्येक एक एक तोला और सुवर्णभस्म तीन मासे लेकर सबको खरलमें एकत्र करके घीकुँआरके रसमें खरल करे। फिर गोलासा बनाकर उसको अण्डके पत्तोंसे लपेटकर धानोंकी राशिमें गाड-देवे। तीन दिनतक रखा रहनेके बाद उसको निकालकर सर्वप्रकारके रोगोंमें प्रयोग करे ॥ ९५ ॥ ९६ ॥

एतद्रसायनवरं त्रिफलामधुयोजितम् ।
तद्यथाग्निबलं खादेद्वलीपलितनाशनम् ॥ ९७ ॥
क्षयमेकादशविधं पाण्डुरोगं प्रमेहकम् ।
कासं शूलं च मन्दाग्निं हिक्कां चैवाम्लपित्तकम् ॥ ९८ ॥
व्रणान्सर्वानाढ्यवातं विसर्पं विद्रधिं तथा ।
अपस्मारं महोन्मादं सर्वार्शांसि त्वगामयान् ॥ ९९ ॥
क्रमेण शीलितं हन्ति वृक्षमिन्द्राशनिर्यथा ।
पौष्टिकं बल्यमायुष्यं स्त्रीणां प्रसवकारकम् ॥ १०० ॥

जगतां च हितार्थाय चतुर्मुखमुखोदितः ।
रसश्चतुर्मुखो नाम चतुर्मुख इवापरः ॥ १०१ ॥

इस उत्तम रसायनको प्रतिदिन जठराग्निके बलाबलके अनुसार उपयुक्त मात्रासे त्रिफलेके काथ और शहदके साथ सेवन करे, तो यह रस वली और पलितरोग, ग्यारह प्रकारका क्षय, पाण्डु, प्रमेह, खाँसी, शूल, मन्दाग्नि, हिचकी, अम्लपित्त, सर्वप्रकारके व्रण, आमवात, विसर्प, विद्रधि, मृगी, घोर उन्माद, सब प्रकारकी बवासीर, और त्वचाके समस्त रोग इन सबको इस प्रकार शीघ्र नष्ट करता है, जैसे वज्र वृक्षको तत्काल नष्ट करदेता है। एवं यह अत्यन्त पौष्टिक, बलकारक, आयुवर्द्धक और स्त्रियोंके सन्तानोत्पत्ति करनेवाला है। इस रसको संसारके हितके लिये ब्रह्माजीने निर्माण किया है, इसलिये इसको चतुर्मुख रस कहते हैं। यह दूसरे ब्रह्मा की समान है ॥ ९५–१०१ ॥

लक्ष्मीविलासरस।

पलं कृष्णाभ्रचूर्णस्य तदर्द्धौ रसगन्धकौ ।
बला नागबला भीरु विदारीकन्दमेव च ॥ १०२ ॥
कृष्णाधुस्तूरनिचुलं गोक्षुरवृद्धदारयोः ।
बीजं शक्राशनस्यापि जातीकोषफले तथा ॥ १०३ ॥
कर्पूरं चैव कर्षांशं श्लक्ष्णचूर्णं पृथक्पृथक् ।
गृहीत्वा चाष्टमांशेन स्वर्णं पर्णरसेन च ॥ १०४ ॥
वटिकां स्विन्नचणकप्रमाणां कारयेद्भिषक् ।
रसो लक्ष्मीविलासोऽयं पूर्ववद् गुणकारकः ॥ १०५ ॥

काली अभ्रककी भस्म ४ तोले, शुद्ध पारा और शुद्ध गन्धक ये प्रत्येक एक एक तोला लेकर दोनोंकी कज्जली करलेवे। एवं खिरैंटी, गंगेरन, शतावर, विदारीकन्द, काला धतूरा, बेत, गोखरू, विधारा, भाँगके बीज, जावित्री, जायफल और भीमसेनीकपुर ये प्रत्येक औषधि एक एक कर्ष लेकर सबका बारीक चूर्ण करलेवे। फिर समस्त चूर्णसे आठवाँ भाग स्वर्णभस्म लेकर सबको एकत्र पानके रसके साथ खरल करके सीजेहुए चनेकी बराबर गोलियाँ बनालेवे। यह लक्ष्मीविलासरस पूर्वोक्त चतुर्मुखरसकी समानही गुण करनेवाला है ॥ १०२–१०५ ॥

योगेन्द्ररस।

विशुद्धं रससिन्दूरं तदर्द्धं शुद्धहाटकम् ।
तत्समं कान्तलौहं च तत्समं चाभ्रमेव च ॥ १०६ ॥

विशुद्धं मौक्तिकं चैव वङ्गं च तत्समं मतम् ।
कुमारिकारसैर्भाव्यं धान्यराशौ दिनत्रयम् ॥ १०७ ॥
ततो रक्तिद्वयमितां वटीं कुर्याद्विचक्षणः ।
योगवाही रसो ह्येष सर्वरोगकुलान्तकः ॥ १०८ ॥

शुद्ध रससिन्दूर २ तोले एवं सुवर्णभस्म, लोहभस्म, अभ्रकभस्म, मोतीकी भस्म और वङ्गभस्म इन सबको एक एक तोला लेकर घीकुँवारके रसमें खरल करके तीन दिनतक धानोंकी राशिमें रक्खे। फिर उसको निकालकर दो दो रत्तीकी गोलियाँ बनालेवे। यह योगवाही रस सर्व प्रकारके रोगोंको समूल नष्ट करता है ॥ १०६–१०८ ॥

वातपित्तभवान् रोगान्प्रमेहान्बहुमूत्रताम् ।
मूत्राघातमपस्मारं भगन्दरगुदामयान् ॥ १०९ ॥
उन्मादं मूर्च्छां यक्ष्माणं पक्षाघातं हतेन्द्रियम् ।
शूलाम्लपित्तकं हन्ति भास्करस्तिमिरं यथा ॥ ११० ॥
त्रिफलारसयोगेन शुभया सितयाऽपि वा ।
भक्षयित्वा भवेद्रोगी कामरूपी सुदर्शनः ॥ १११ ॥
रात्रौ सेव्यं गवां क्षीरं कृशानां च विशेषतः ।
योगेन्द्राख्यो रसो नाम्ना कृष्णात्रेयेण निर्मितः ॥ ११२ ॥

एवं वातज, पित्तज रोग, प्रमेह, बहुमूत्रता, मूत्राघात, अपस्मार, भगन्दर, गुदाके रोग, उन्माद, मूर्च्छा, राजयक्ष्मा, पक्षाघात, इन्द्रियका नष्ट होजाना, सर्व प्रकारके शूल और अम्लपित्तादि रोगोंको इस प्रकार नष्ट करता है जैसे सूर्य अन्धकारको नष्ट कर देता है। इस रसको प्रतिदिन त्रिफलेके क्वाथ और शहदके साथ अथवा मिश्रीके साथ भक्षण करके रात्रिमें काली गौका दूध पीनेसे रोगी कामदेवको समान कान्तिमान् होता है। इस योगेन्द्रनामक रसको कृष्णात्रियजीने निर्माण किया है॥१०९–११२॥

वातारिरस ।

रसभागो भवेदेको द्विगुणो गन्धको मतः ।
त्रिगुणा त्रिफला ग्राह्या चतुर्भागं तु चित्रकम् ॥ ११३ ॥
गुग्गुलोः पञ्च भागाः स्यू रुबूतैलेन मर्दयेत् ।
क्षिप्त्वाऽत्र पूर्वकं चूर्णं पुनस्तेनैव मर्दयेत् ॥ ११४ ॥

गुडिकां कर्षमात्रां तु भक्षयेत्प्रातरुत्थितः।
नागरैरण्डमूलानां कषायं प्रपिबेदनु ॥ ११५ ॥
अभ्यज्यैरण्डतैलेन स्वेदयेत्पृष्ठदेशकम्।
विरेके तेन सञ्जाते स्निग्धमुष्णं च भोजयेत् ॥ ११६ ॥
वातारिसंज्ञको ह्येष रसो निर्वातसेवितः।
मासेन मरुतो रोगान् हरेत्सुरतवर्जितः ॥ ११७ ॥

शुद्ध पारा एक भाग और शुद्ध गन्धक दो भाग लेकर दोनोंकी कज्जली करलेवे। फिर गूगलको पांच भाग लेकर अण्डीके तैलके साथ खरल करके उसके साथ पूर्वोक्त कज्जली एवं त्रिफलेका चूर्ण तीन भाग और चीतेकी जडका चूर्ण चार भाग मिलाकर फिर अण्डीके तैलमें खरल करे। पश्चात् एक कर्षकी गोलियाँ बनाकर प्रतिदिन प्रातःकाल एक एक गोली सेवन करे। ऊपरसे सोंठ और अण्डकी जडका क्वाथ पान करे। प्रातःकाल औषध सेवन करनेके पश्चात् रोगीकी पीठमें अण्डीका तैल मलकर स्वेद देवे। इसके द्वारा विरेचन होजानेपर स्निग्ध और उष्ण पदार्थोंका भोजन करावे। स्त्रीप्रसंगको त्यागकर इस वातारिनामक रसको वायुरहित स्थानमें रहता हुआ मनुष्य एक मासपर्यन्त सेवन करे, यह रस सर्वप्रकारके वातरोगोंको दूर करता है ॥ १२-१७ ॥

अनिलारिरस।

रसेन गन्धं द्विगुणं विमर्द्य वातारिनिर्गुण्डिरसैर्दिनैकम्।
निवेशयेत्ताम्रमये पुटे तत्सर्वं मृदाश्वेष्टय च वालुकाख्ये ॥ ११८
यन्त्रे पुटेद्गोमयचूर्णवह्नौ स्वभावशीते तु समुद्धरेत्तत्।
निर्गुण्डिकावातहराग्नितोयैः सञ्चूर्ण्य यत्नेन विभावयेत्तत् ॥
रसोऽनिलारिः कथितोऽस्य वल्लमेरण्डतैलेन ससैन्धवेन।
मरीचचूर्णेन ससर्पिषा वा निर्गुण्डिचित्रैश्च कटुत्रिकैर्वा ॥१२०

शुद्ध पारा १ तोला और शुद्ध गन्धक २ तोले लेकर दोनोंको अण्डकी जड और निर्गुण्डीके रसके साथ एक एक दिनतक खरल करे। फिर उसको ताँबेके पात्रमें बन्द करके मिट्टीसे लहेसकर वालुकायन्त्रमें रख आरने उपलोंकी अग्निमें एक प्रहरतक पकावे। जब उत्तम प्रकारसे पककर स्वयं शीतल होजाय तब उसको निकालकर निर्गुण्डी, अण्ड और चीता इनके रसमें क्रमसे एक एक बार भावना दकर दो अथवा तीन रत्तीकी गोलियाँ बनालेवे। इसको अण्डीके तैल और सैन्धा-

नमकके चूर्णके साथ या मिरचोंके चूर्ण और घीके साथ अथवा त्रिकुटेके चूर्ण, निर्गुण्डी और चीतेके क्वाथके साथ सेवन करे । इसको अनिलारि (वातनाशक) रस कहते हैं ॥ १८-१२० ॥

सर्वाङ्गसुन्दररस ।

शुद्धसूताभ्रताम्रायोहिङ्गुलं कार्षिकं मतम् ।
गन्धकश्चैकभागः स्यात्सर्वमेकत्र मर्दयेत् ॥ २१ ॥
सप्तपर्णार्कस्नुकक्षीरवासावातारिवारिणा ।
विषमुष्टिसमं सर्वं पेष्यं तद्गोलकीकृतम् ॥ २२ ॥
विपचेद्वालुकायन्त्रे द्वियामान्ते समुद्धरेत् ।
पिप्पलीविषसंयुक्तो रसः सर्वाङ्गसुन्दरः ॥
सर्ववातविकारघ्नः सर्वशूलनिषूदनः ॥ २३ ॥

शुद्ध पारा, अभ्रकभस्म, ताम्रभस्म, लोहभस्म और सिंगरफ ये प्रत्येक दो दो तोले और शुद्ध गन्धक एक तोला लेकर सबको एकत्रकर सतौना, आक, थूहरका दूध, अडूसा और अण्डके क्वाथमें भावना देवे। फिर सब औषधकी बराबर कुचला मिलाकर खरल करके गोलासा बनालेवे । उस गोलेको वालुकायन्त्रमें रखकर दो प्रहर तक पकावे । पककर शीतल होजानेपर उसमें पीपलका चूर्ण और शुद्ध मीठा तेलिया दो दो तोले मिलादेवे । यह सर्वांगसुन्दर रस सर्व प्रकारके वायुके विकार और सर्व प्रकारके शूलरोगको नष्ट करता है ॥ २१-२३ ॥

शीतारिरस ।

रसेन गन्धं द्विगुणं प्रगृह्य पुनर्नवाग्निस्वरसैर्विभाव्य ।
पक्वार्कपत्रस्य रसेन पश्चाद्विपाचयेदष्टगुणेन यत्नात् ॥ २४ ॥
रसार्द्धभागं च विषं च दत्त्वा विपाचयेदग्निजले क्षणं तत् ।
शीतारिसंज्ञस्य रसायनस्य वल्लं च सार्द्धं मरिचार्द्रकेण ॥२५॥
मरीचचूर्णेन घृताप्लुतेन सेवेत मांसं च घृतं च पथ्यान् ॥२६॥

शुद्ध पारा एक तोला और शुद्ध गन्धक दो तोले दोनोंको पुनर्नवा और चीतेके स्वरसमें भावना देकर पके हुए आकके पत्तोंके अठगुने रसके साथ वालुकायन्त्रमें रखकर यत्नपूर्वक पकावे । पश्चात् पारेसे आधा शुद्ध मीठा तेलिया डालकर चीतेके रसमें क्षणभरतक पकावे । इस शीतारिनामक रसायनको डेढ वा दो रत्ती परिमाण लेकर मिरचोंके चूर्ण और अदरखके रसके साथ अथवा मिरचोंके चूर्ण और घृतके

साथ सेवन करे। इसपर मांसरस और घृतका पथ्य करे। यह रस शीतवातको नष्ट करता है ॥ २४-२६ ॥

तालकेश्वररस।

एकभागो रसस्य स्याच्छुद्धतालैकभागिकः।
अष्टौ स्युर्विजयायाश्च गुडिकां गुडतश्चरेत् ॥ २७ ॥
एकैकां भक्षयेत्प्रातश्छायायामुपवेशयेत्।
तालकेश्वरनामाऽयमस्पर्शरोगनाशनः ॥ २८ ॥

शुद्ध पारा १ तोला, शुद्ध हरताल १ तोला और भाँग ८ तोले लेकर सबका एकत्र चूर्ण करलेवे। फिर सब चूर्णकी बराबर गुड मिलाकर तीन तीन माशेकी गोलियाँ बनालेवे। प्रतिदिन प्रातःकाल एक एक गोली भक्षण करे और छायामें रहे। यह तालकेश्वरनामक रस अस्पर्शवातरोगको नष्ट करनेवाला है ॥ २७-२८ ॥

वातविध्वंसन रस।

सूतमभ्रकसत्त्वं च कांस्यं शुद्धं च माक्षिकम्।
गन्धकं तालकं सर्वं भागोत्तरविवर्द्धितम् ॥ २९ ॥
कज्जलीकृत्य तत्सर्वं वातारिस्नेहसंयुतम्।
सप्ताहं मर्दयित्वा तु गोलकीकृत्य यत्नतः ॥ ३० ॥
निम्बुद्रवेण सम्पीड्य तिलकल्केन लेपयेत्।
अर्द्धाङ्गुलदलेनैव परिशोष्य प्रयत्नतः ॥
प्रपचेद्वालुकायन्त्रे द्वादशप्रहरं ततः ॥ ३१ ॥

शुद्ध पारा १ भाग, अभ्रकसत्त्व २ भाग, काँसा ३ भाग, शुद्ध सोनामाखी ४ भाग, शुद्ध गन्धक ५ भाग और शुद्ध हरताल ६ भाग लेवे। पहले पारे और गन्धककी एकत्र कज्जली करके उसमें अन्य सब औषधियोंको मिलाकर अण्डीके तैलमें ७ दिनतक खरल करे। फिर जम्बीरीनींबूके रसमें खरल करके गोलासा बनालेवे। उस गोलेपर आध अंगुल परिमाण तिलके कल्कका लेपकर और धूपमें सुखाकर उसको वालुकायन्त्रमें रखकर १२ प्रहरतक पकावे ॥

जठरस्य रुजाः सर्वास्तथा च मलविग्रहम्।
आध्मानकं तथाऽऽनाहं विषूचिं वह्निमान्द्यकम् ॥ ३२ ॥
आमदोषमशेषं च गुल्मं छर्दिं च दुर्जयम्।
ग्रहणीं श्वासकासौ च कृमिरोगं विशेषतः ॥ ३३ ॥

हन्यात्पूर्वाङ्गशूलं च मन्यास्तम्भं तथैव च ।
ज्वरे चैवातिसारे च शूलरोगे त्रिदोषजे ॥ ३४ ॥
पथ्यं रोगानुसारेण देयमस्मिन् भिषग्वरैः ।
श्रीमता नन्दिनाथेन वातविध्वंसनो रसः ॥ ३५ ॥

इस प्रकार सिद्ध किया हुआ यह रस उदरके सब विकार, मलका अवरोध, आध्मान, आनाह, विषूचिका, मन्दाग्नि, समस्त आमदोष, गुल्म, दुर्जय वमन, संग्रहणी, श्वास, खाँसी, विशेषकर कृमिरोग, पूर्वांग व सर्वांगशूल, मन्यास्तम्भ, ज्वर, अतिसार और त्रिदोषज शूलरोग इन सम्पूर्ण रोगोंको नष्ट करताहै । इसमें रोगके अनुसार पथ्य देना चाहिये । इस वातविध्वंसन रसको श्रीमान् नान्दिनाथेन निर्माण कियाहै ॥२९-३५॥

वातनाशनरस ।

सूतहाटकवज्राणि ताम्रं लोहं च माक्षिकम् ।
तालं नीलाञ्जनं तुत्थं सिन्धुफेनं समांशिकम् ॥ ३६ ॥
पञ्चानां लवणानां च भागैकं सुविमर्दयेत् ।
वज्रीक्षीरैर्दिनैकं तु रुद्ध्वा तं भूधरे पचेत् ॥
माषैकमार्द्रकद्रावैर्लिह्याद्वातविनाशनम् ॥ ३७ ॥
पिप्पलीमूलकक्वाथं सकृष्णमनुपाययेत् ॥
सर्वान्वातविकारांश्च निहन्त्याक्षेपकादिकान् ॥ ३८ ॥

शुद्ध पारा, सुवर्णभस्म, हीराभस्म, ताम्रभस्म, लोहभस्म, सोनामाखीकी भस्म, हरताल, नीलासुरमा, नीलाथोथा और समुद्रफेन ये प्रत्येक समान भाग और पाँचों नमक एक भाग लेकर सबका एकत्र चूर्ण करलेवे । उस चूर्णको थूहरके दूधके साथ एक दिनतक खरल करके भूधरयन्त्रमें रखकर पकावे । इस रसको प्रतिदिन एक एक माशे परिमाण लेकर अदरखके रस और शहदके साथ मिलाकर सेवन करे और औषधिसेवन करनेके पश्चात् पीपलका चूर्ण डालकर पीपलामूलका क्वाथ पान करे । यह रस आक्षेपकादि सम्पूर्ण वातविकारोंको दूर करता है ॥ ३६-३८ ॥

वातकण्टकरस ।

वज्रं मृताभ्रहेमार्कतीक्ष्णमुण्डं क्रमोत्तरम् ।
मरिचं मर्दयेदम्लवर्गेण दिवसत्रयम् ॥ ३९ ॥

द्विक्षारं पञ्चलवणं मर्दितं स्यात्समं समम्।
ततो निर्गुण्डिकाद्रावैर्मर्दयेद्दिवसत्रयम् ॥ ४० ॥
शुद्धमेतद्विचूर्ण्याथ विषं चास्याष्टमांशतः।
टङ्कणं विषतुल्यांशं दत्त्वा जम्बीरकद्रवैः।
भावयेद्दिनमेकं तु रसोऽयं वातकण्टकः ॥ ४१ ॥

हीरा १ भाग, अभ्रक २ भाग, सुवर्ण ३ भाग, तांबा ४ भाग, तीक्ष्णलोह ५ भाग, मुण्डलोह ६ भाग और कालीमिरच ७ भाग इन सब औषधियोंको एकत्रकर अम्लवर्गकी औषधियोंके द्वारा ३ दिनतक खरल करे। फिर उसमें सज्जी, जवाखार, पाँचोंनमक ये प्रत्येक समान भाग मिलाकर निर्गुण्डीके रसमें तीनदिन खरल करे। फिर औषधिको सुखाकर और चूर्ण करके समस्त औषधका आठवाँ भाग शुद्ध मीठा तेलिया और विषकी बराबर सुहागा मिलाकर जम्बीरी नींबुके रसमें एक दिनतक भावना देवे। इस प्रकार यह वातकण्टकरस सिद्ध होता है ॥३९-४१॥

दातव्यो वातरोगेषु सन्निपाते विशेषतः ॥ ४२ ॥
द्विगुञ्जमार्द्रकद्रावैर्घृतैर्वा वातरोगिणे।
निर्गुण्डीमूलचूर्णं तु महिषाक्षं च गुग्गुलुम् ॥ ४३ ॥
समांशं मर्दयेदाज्ये तद्वटी कर्षसम्मिता।
अनुयोज्या घृतैर्नित्यं स्निग्धमुष्णं च भोजयेत् ॥ ४४ ॥
मण्डलं नाशयेत्सर्वं वातरोगं विशेषतः।
सन्निपाते पिबेच्चानु तालमूलीकषायकम् ॥ ४५ ॥

सर्वप्रकारके वातरोगोंमें यह रस दो दो रत्ती प्रमाण लेकर अदरखके रस अथवा गोघृतके साथ वातरोगीको सेवन करावे। औषध सेवन करनेके पश्चात् निर्गुण्डीकी जडका चूर्ण और भैंसिया गूगल इनको समान भाग लेकर घीमें खरल करके एक एक कर्षकी गोलियाँ बनाकर प्रतिदिन एक एक गोली घृतके साथ मिलाकर सेवन करनी चाहिये और इसपर स्निग्ध और उष्ण पदार्थोंका भोजन करे। इसके द्वारा शरीरके चकत्ते और सम्पूर्ण वातरोग दूर होते हैं। सन्निपातमें इस रसको सेवन कर ऊपरसे मुसलीका क्वाथ पान करे ॥४२-४५॥

त्रैलोक्यचिन्तामणिरस।

हीरं सुवर्णं सुमृतं च तारमेषां समं तीक्ष्णरजश्चतुर्णाम्।
समं मृताभ्रं रससिन्दुरं च निष्पिष्टतीक्ष्णस्य तथाऽश्मनो वा॥

खल्वे द्रवेणैव कुमारिकाया गुञ्जाप्रमाणां वटिकां प्रकुर्यात् ।
त्रैलोक्यचिन्तामणिरेष नाम्ना संपूज्य सम्यग्गिरिजां दिनेशम् ॥
हन्त्यामयान् योगशतैर्विवर्ज्यांस्तत्प्रणाशाय मुनिप्रणीतः ।
अस्य प्रसादेन गदानशेषान् जरां विनिर्जित्य सुखं विभाति ॥

हीरा, सुवर्ण, मोती और लोहा इन चारोंकी भस्म एक एक तोला, अभ्रकभस्म चार तोले और रससिन्दूर चार तोले इन सबको लोहेके अथवा पत्थरके खरलमें एकत्र करके घीकुँआरके रसके साथ उत्तम प्रकारसे खरल कर एक एक रत्तीकी गोलियाँ बनालेवे । इस त्रैलोक्यचिन्तामणिनामक रसको प्रतिदिन प्रातःकाल पार्वती और सूर्यनारायणका यथाविधि पूजन कर सेवन करे । सैकडों प्रयोगोंके करनेसे भी जो दूर न हुए हों ऐसे रोगोंको नष्ट करनेके लिये मुनियोंने इस रसको निर्दिष्ट किया है । इसके प्रभावसे मनुष्य सम्पूर्ण रोगों और वृद्धताको जीतकर सुख भोगता है ॥ ४६-४८ ॥

स्निग्धे श्लेष्मण्यार्द्रकस्य रसेन पाययेत्सुधीः ।
शुष्के च माक्षिकेणैव पित्ते घृतसितायुतम् ॥ ४९ ॥
श्लेष्मणि मारुते सम्यग्दुष्टे च समतां गते ।
कणाचूर्णं क्षौद्रयुतं प्रमेहे दुग्धसंयुतम् ॥ १५० ॥
बलवर्णाग्निजननः कासघ्नः कफवातजित् ।
आयुःपुष्टिकरो वृष्यः सर्वरोगनिषूदनः ॥ १५१ ॥

बुद्धिमान् वैद्य इस रसको कफकी तरल अवस्थामें अदरखके रसके साथ, कफके शुष्क होनेपर शहदके साथ, पित्तविकारमें घी और मिश्रीके साथ, कफका प्रकोप होनेपर एवं वायुकी समान अवस्थामें पीपलके चूर्ण और शहदके साथ और प्रमेहरोगमें दूधके साथ सेवन करावे । यह रस बल, वर्ण और अग्निको उत्पन्न करता एवं खाँसी, कफ और वातको दूर करता है । एवं आयुर्वर्द्धक, पुष्टिकारक, वृष्य और सब रोगोंका नाश करनेवाला है ॥ ४९-१५१ ॥

["तारशब्देनात्र शुद्धमौक्तिकमेवोच्यते नतु रजतम् । सममिति समभागं, चतुर्णां समं मृताभ्रम, केषाञ्चिन्मते रससिन्दूरस्थाने स्वर्णसिन्दूरं देयमिति ॥"]

("यहाँ तारशब्दसे शुद्ध मोती कहागया है, चाँदी नहीं । 'समम्' शब्दसे चारों भस्म समान भाग और चारोंकी बराबर अभ्रक भस्म लेवे । किसी २ के मतमें

रससिन्दूरकी जगह स्वर्णसिन्दूर डालना चाहिये। हीरेके अभावमें वैक्रान्तमणि अथवा पीली कौडीकी भस्म लेनी चाहिये।]

स्वल्परसोनपिण्ड।

पलमर्द्धपलं चैव रसोनस्य सुकुट्टितम्।
हिङ्गुजीरकसिन्धूत्थैः सौवर्चलकटुत्रिकैः॥ ९२॥
चूर्णितैर्माषकोन्मानैरवचूर्ण्य विलोडितम्।
यथाग्नि भक्षितं प्रातारुबुकाथानुपानतः॥ ९३॥
दिनेदिने प्रयोक्तव्यं मासमेकं निरन्तरम्।
वातरोगं निहन्त्याशु अर्दितं सापतन्त्रकम्॥ ९४॥
एकाङ्गरोगिणे चैव तथा सर्वाङ्गरोगिणे।
ऊरुस्तम्भे च गृध्रस्यां कृमिदोषे विशेषतः।
कटीपृष्ठामयं हन्यादुदरं च विनाशयेत्॥ ९५॥

छिल्के आदिसे रहित और शुद्ध लहसनको ६ तोले लेकर कूटलेवे। फिर उसमें हींग, जीरा, सेंधानमक, कालानमक और त्रिकुटा ये प्रत्येक एक-एक माशे परिमाण बारीक चूर्णकर मिलादेवे। इसको प्रतिदिन प्रातःकाल अग्निके बलानुसार उपयुक्त मात्रासे अण्डके काथके साथ एक महीनेतक सेवन करे। यह रसोनपिण्ड वातरोग, अर्दित, अपतन्त्रक, एकाङ्गरोग, सर्वाङ्गरोग, ऊरुस्तम्भ, गृध्रसी, कृमिरोग, विशेषकर कमर व पीठकी पीडा और सब प्रकारके उदररोगोंको नष्ट करता है॥९२-९५॥

त्रयोदशाङ्गगुग्गुलु।

आहाऽश्वगन्धा हबुषा गुडूची शतावरी गोक्षुरवृद्धदारम्।
रास्ना शताह्वा सशठी यमानी सनागरा चेति समैश्च चूर्णम्॥
तुल्यं भवेत्कौशिकमत्र मध्ये देयं तथा सर्पिरथार्द्धभागम्॥९६

आहा (बबूरकी फली), असगन्ध, हाऊबेर, गिलोय, शतावर, गोखुरू, विधारेके बीज, रायसन, सौंफ, कचूर, अजवायन और सोंठ, इन प्रत्येक औषधिका चूर्ण समान भाग और सम्पूर्ण चूर्णकी बराबर गूगल और गूगलसे आधा गौका घी लेकर सबको एकत्र उत्तम प्रकारसे खरल करके शुद्ध पात्रमें भरकर रखदेवे॥

सार्द्धाक्षमात्रं तु ततः प्रयोगात्कृत्वाऽनुपानं सुरयाथ यूषैः।
मद्येन वा कोष्णजलेन वाथ क्षीरेण वा मांसरसेन वापि॥९७

कटीग्रहे गृध्रसि बाहुपृष्ठे हनुग्रहे जानुनि पादयुग्मे ।
सन्धिस्थिते चास्थिगते च वाते मज्जाश्रिते स्नायुगते च कुष्ठे ॥
रोगाञ्जयेद्वातकफानुविद्धान् वातेरितान्हृद्ग्रहयोनिदोषान् ।
भग्नास्थिबद्धेषु च खञ्जवाते त्रयोदशाङ्गं प्रवदन्ति सन्तः ॥

इस गूगलको छः मासे वा एक तोला परिमाण लेकर मदिरा, यूष, मन्दोष्ण जल वा दूध अथवा मांसरसके साथ सेवन करना चाहिये। इस त्रयोदशाङ्ग गूगलको कमरकी पीडा, गृध्रसी, बाहु और पृष्ठगत वात, हनु (ठोडी), जानु (घुटना), दोनों चरण, सन्धिस्थान, अस्थि, मज्जा और स्नायुगत वातरोग, कुष्ठ, अस्थिके भग्न, व विद्ध होनेपर और खञ्जवातरोगमें प्रयोग करना चाहिये। यह गूगल वातकफजन्य रोग, वातजनित हृदयकी पीडा, योनिदोष आदि सम्पूर्ण व्याधियोंको नष्ट करता है। इस प्रकार आयुर्वेदाचार्योंने कहा है ॥

दशमूलाद्यघृत ।

दशमूलस्य निर्यूहे जीवनीयैः पलोन्मितैः ।
क्षीरेण च घृतं पक्वं तर्पणं वातपित्तजित् ॥
क्वाथोऽत्र द्विगुणः सर्पिःप्रस्थः साध्यः पयःसमम् ॥ १६० ॥

दशमूलके काढेमें जीवनीयगण (जीवक, ऋषभक, मेदा, महामेदा, काकोली, क्षीरकाकोली, जीवन्ती, मुलहठी, ऋद्धि और वृद्धि) की औषधियोंका कल्क चार चार तोले, दूध, एक प्रस्थ और घी एक प्रस्थ डालकर यथाविधि घृतको सिद्ध करे। यह घृत तृप्तिकारक, वात और पित्तको दूर करनेवाला है। इसमें दुगुना क्वाथ, घी और दूध समान भाग लेना चाहिये ॥ १६० ॥

अश्वगन्धाद्यघृत ।

अश्वगन्धाकषाये च कल्के क्षीरं चतुर्गुणम् ।
घृतं पक्वं तु वातघ्नं वृष्यं मांसविवर्द्धनम् ॥ ६१ ॥

असगन्धके क्वाथ और कल्कमें घी और घीसे चौगुना दूध डालकर घृतको पकावे। वातनाशक, वृष्य और मांसवर्द्धक है ॥ ६१ ॥

नकुलाद्यघृत ।

नकुलस्य च मांसस्य पचेत्प्रस्थं जलाढके ।
तत्समं दशमूलं च पक्वं माषबलान्वितम् ॥ ६२ ॥

घृतप्रस्थं पचेत्तत्र चतुर्भागावशेषितम्।
शतावरीरसप्रस्थं गव्यदुग्धं च तत्समम् ॥ ६३ ॥
अष्टौ वर्गाश्च काकोल्यौ जीवन्ती मधुयष्टिका।
एला त्वचं च पत्रं च त्रिकटु त्रिफला तथा ॥
मुस्तकं नागजिह्वा च कर्षं कर्षं प्रदापयेत् ॥ ६४ ॥

नौलेके १ प्रस्थ मांसको १ आढक जलमें पकावे। जब पकते पकते चौथाई भाग जल शेष रहजाय तब उतारकर छानलेवे। इसी प्रकार दशमूलकी औषधियाँ, उडद और खिरैंटी इनको एक एक प्रस्थ लेकर पृथक् पृथक् एक एक आढक जलमें पकाकर चौथाई जल शेष रक्खे। फिर उसमें घृत १ प्रस्थ, शतावरका रस १ प्रस्थ, गौका दूध, १ प्रस्थ एवं अष्टवर्गकी औषधियाँ (जीवक, ऋषभक, मेदा, महामेदा, ऋद्धि, वृद्धि, काकोली, क्षीरकाकोली), जीवन्ती, मुलहठी, इलायची, दारचीनी, तेजपात, सोंठ, मिरच, पीपल, हरड, बहेडा, आमला, नागरमोथा और अनन्त-मूल, इन प्रत्येकके कल्कको एक एक कर्ष परिमाण डालकर विधिपूर्वक घृतको पकावे ॥ ६२–६४ ॥

सर्ववातविकारेषु अपस्मारे विशेषतः ॥ ६५ ॥
पक्षाघाते महोन्मादे चाध्माने कोष्ठनिग्रहे।
हस्तकम्पे शिरःकम्पे बाधिर्य्ये मूकमिन्मिने ॥ ६६ ॥
ऊर्ध्वजत्रुगते वाते जंघापार्श्वादिसंश्रिते।
नकुलाद्यमिदं नाम्ना ऊर्ध्वजत्रुगदापहम् ॥ ६७ ॥

इस नकुलाद्यनामक घृतको सर्वप्रकारके वातविकार, विशेषकर अपस्मार, पक्षाघात, महोन्माद, आध्मान, कोष्ठबद्धता, हस्तकम्प, शिरःकम्प, बधिरता, मूकता, मिनमिनापन, ऊर्ध्वजत्रुगतवात, जंघागतवात, और पार्श्वादिगत वातरोगमें सेवन कराना चाहिये। यह ऊर्ध्वजत्रुगत सम्पूर्ण रोगोंको दूर करता है ॥ ६५–६७ ॥

छागलाद्यघृत।

आजं चर्मविनिर्मुक्तं त्यक्तशृङ्गनखादिकम्।
पञ्चमूलीद्वयं चैव जलद्रोणे विपाचयेत् ॥ ६८ ॥
तेन पादावशेषेण घृतप्रस्थं विपाचयेत्।
जीवनीयैः सयष्ट्याह्वैः क्षीरं चैव शतावरीम् ॥ ६९ ॥

चर्म, सींग और नखादिसे रहित बकरेका मांस ५० पल और दशमूलके समान भाग मिश्रित समस्त औषधियाँ ५० पल लेकर दोनोंको अलग अलग

एकएक द्रोण (३२ सेर) जलमें पकावे । जब पकते-पकते चौथाई भाग जल शेष रह जाय तब उतारकर छानलेवे । फिर उसमें घी एक प्रस्थ, दूध १ प्रस्थ, शतावरका रस १ प्रस्थ एवं जीवक, ऋषभक, मेदा, महामेदा, ऋद्धि, वृद्धि, काकोली, क्षीरकाकोली, मुगवन, मषवन, जीवन्ती और मुलहठी इन सबका कल्क घीसे चौथाई भाग डालकर घृतको पकाना चाहिये ॥ ६८ ॥ ६९ ॥

छागलाद्यमिदं नाम्ना सर्ववातविकारनुत् ।
अर्दिते कर्णशूले च बाधिर्ये मूकमिन्मिने ॥ १७० ॥
जडगद्गदपंगूनां खञ्जे गृध्रसिकुब्जयोः ।
अपतानेऽपतन्त्रे च सर्पिरेतत्प्रशस्यते ॥ ७१ ॥

इस छागलाद्य घृतको सेवन करनेसे सर्व प्रकारके वातरोग नष्ट होते हैं। यह घृत अर्दितवात, कर्णशूल, बधिरता, मूकता, मिन्मिनापन, जडता, गद्गदता, पंगुता, खञ्जवात, गृध्रसी, कुबडापन, अपतानक और अपतन्त्रक इन समस्त रोगोंमें हितकर है ॥ १७०–१७१ ॥

बृहच्छागलाद्यघृत ।

छागमांसतुलां गृह्य दशमूल्याः पलं शतम् ।
अश्वगन्धापलशतं वाट्यालकशतं तथा ॥७२॥
घृताढकं पचेत्तोयैश्चतुर्भागावशेषितैः ।
क्षीरं स्नेहसमं दद्याच्छतावर्या रसं तथा ॥
ताम्रपात्रे दृढे चैव शनैर्मृद्वग्निना पचेत् ॥ ७३ ॥

आरोग्य बकरीका अथवा नपुंसक बकरेका मांस १०० पल, दशमूल १०० पल, असगन्ध १०० पल और खिरैंटी १०० पल लेकर प्रत्येकको एक एक द्रोण परिमाण जलमें पकावे । जब पकते २ चौथाई भाग जल शेष रहजाय तब उतारकर छानलेवे और सबको एकत्र मिलालेवे। फिर उस क्वाथमें गौका घी, दूध, और शतावरका रस प्रत्येक एकएक आढक (१२८ पल) डालकर सुदृढ ताँबेके बर्त्तन में धीरे धीरे मन्दमन्द अग्निके द्वारा पकावे ॥ ७२ ॥ ७३ ॥

अस्यौषधस्य कल्कस्य प्रत्येकं शुक्तिसम्मितम् ॥ ७४ ॥
जीवन्ती मधुकं द्राक्षा काकोल्यौ नीलमुत्पलम् ।
मुस्तं सचन्दनं रास्ना पर्णिनीद्वयशारिवे ॥ ७५ ॥

मेदे द्वे च तथा कुष्ठं जीवकर्षभकौ शठी।
दार्वीप्रियङ्गु त्रिफला नतं तालीशपद्मकौ ॥ ७६ ॥
एला पत्रं वरी नागं जातीकुसुमधान्यकम्।
मञ्जिष्ठां दाडिमं दारु रेणुकं सैलवालुकम् ॥ ७७ ॥
विडङ्गं जीरकं चैव पेषयित्वा विनिक्षिपेत्।
वस्त्रपूते च शीते च शर्कराप्रस्थसंयुतम् ॥ ७८ ॥
निधापयेत्स्निग्धभाण्डे मृन्मये भाजने शुभे।
देवदेवं नमस्कृत्य सम्पूज्य गणनायकम् ॥ ७९ ॥
पिबेत्पाणितलं तस्य व्याधिं वीक्ष्यानुपानतः।
अस्यौषधस्य सिद्धस्य शृणु वीर्यमतः परम् ॥ १८० ॥

कल्कके लिये जीवन्ती, मुलहटी, दाख, काकोली, क्षीरकाकोली, नीलकमल, नागरमोथा, लालचन्दन, रास्ना, शालपर्णी, पृश्निपर्णी, शारिवा, अनन्तमूल, मेदा, महामेदा, कूठ, जीवक, ऋषभक, कचूर, दारुहल्दी, फूलप्रियंगु, त्रिफला, तगर, तालीसपत्र, पद्माख, इलायची, तेजपात, शतावर, नागकेशर, चमेलीके फूल, धनियाँ, मंजीठ, अनार, देवदारु, रेणुका, भूरिछरीला, एलुआ, वायविडंग और जीरा इस प्रत्येक औषधिको चार चार तोले पीसकर पकते समय डालदेवे। जब घृत उत्तम प्रकारसे पककर शीतल होजाय तब वस्त्रमें छानकर उसमें एक प्रस्थ शुद्ध खाँड मिलाकर चिकने और स्वच्छ मिट्टीके बर्त्तनमें भरकर रखदेवे। प्रतिदिन प्रातःकाल देवाधिदेव गणेशजीको नमस्कार और पूजन कर एक एक तोला परिमाण घृत पान करे और ऊपरसे यथारोगानुसार अनुपानका सेवन करे। अब इस सिद्ध औषधके वीर्यको कहते हैं, उसको सुनो-॥७४-१८०॥

सर्ववातविकारेषु अपस्मारे विशेषतः।
उन्मादे पक्षघाते च आध्माने कोष्ठनिग्रहे ॥ ८१ ॥
कर्णरोगे शिरोरोगे बाधिर्ये चापतन्त्रके।
भूतोन्मादे च गृध्रस्यां सोदरे चाक्षिपातजे ॥ ८२ ॥
पार्श्वशूले च हृच्छूले बाह्यायामेऽर्दिते तथा।
वातकण्टकहृद्रोगमूत्रकृच्छ्रसपङ्गके ॥ ८३ ॥
क्रोष्टुशीर्षे तथा खञ्जे कुब्जे चाध्मानमिन्मिने।
अपतानेऽन्तरायामे रक्तपित्ते तथैव च ॥ ८४ ॥

आनाहेऽर्शोविकारेषु चातुर्थिकज्वरेऽपि च ।
हनुग्रहे तथा शोषे क्षीणे चैवापबाहुके ॥ ८५ ॥
दण्डापतानके भग्ने दाहे चाक्षेपके तथा ।
जीर्णज्वरे विषे कुष्ठे शेफःस्तम्भे मदात्यये ॥ ८६ ॥
आढ्यवातेऽग्निमान्द्ये च वातरक्तगदेषु च ।
एकाङ्गरोगिणे चैव तथा सर्वाङ्गरोगिणे ॥ ८७ ॥
हस्तकम्पे शिरःकम्पे जिह्वास्तम्भे ज्वरे भ्रमे ।
क्षीणेन्द्रिये नष्टशुक्रे शुक्रनिस्सरणे तथा ॥ ८८ ॥
स्त्रीणां वातास्रपाते च पटले चाक्षिस्पन्दने ।
एकाङ्गस्पन्दने चैव सर्वाङ्गस्पन्दने तथा ॥ ८९ ॥
नगादिपतिते वाते स्त्रीणामप्राप्तिहेतुके ।
आभिचारिकदोषे च मनस्सन्तापसम्भवे ॥ १९० ॥

उन्मादे वातभग्ने च शूले जन्तोः प्रशस्यते ॥ १११ ॥

फिर निकालकर उसमेंसे प्रतिदिन एक एक तोला सेवन करे और ऊपरसे शीतल जल या मद्य पान करे । इस रसोनपिण्डको आमगत, वातरोग, सर्वाङ्गगत,

वात तथा एकाङ्गगतवात, अपस्मार, मन्दाग्नि, खाँसी, श्वास, विषविकार, उन्माद, वातभम, शूल और कृमिरोगमें प्रयोग करना चाहिये ॥ ११० ॥ १११ ॥

महारसोनपिण्ड।

रसोनस्य पलशतं तदर्द्धं निस्तुषात्तिलात्।
पात्रं गव्यस्य तक्रस्य पिष्ट्वा चैतानि संक्षिपेत् ॥ १२ ॥
त्रिकटु धान्यकं चव्यं चित्रकं गजपिप्पली।
आजमोदा त्वगेला च ग्रन्थिकं च पलांशिकम् ॥ १३ ॥
शर्करायाः पलान्यष्टौ पलांशं मरिचस्य च।
कुष्ठाजाज्योश्च चत्वारि मधुनः कुडवं तथा ॥ १४ ॥
आर्द्रकस्य च चत्वारि सर्पिषोऽष्टौ पलानि च।
तिलतैलस्य चत्वारि शुक्तकस्यापि विंशतिः ॥ १५ ॥
सिद्धार्थकस्य चत्वारि राजिकायास्तथैव च।
कर्षप्रमाणं दातव्यं हिङ्गुलं वणपञ्चकम् ॥
एकीकृत्य दृढे कुम्भे धान्यराशौ निधापयेत् ॥ १६ ॥

छिल्केरहित लहसन १०० पल, भूसीरहित तिल ५० पल और गायका मट्ठा ८ सेर लेकर सबको एकत्र करके पीसलेवे। फिर सोंठ, मिरच, पीपल, धनियाँ, चव्य, चीता, गजपीपल, अजमोद, दारचीनी, इलायची और पीपलामूल, ये प्रत्येक एक एक तोला एवं मिश्री ८ पल, मिरच १ तोला, कूठ १६ तोले, कालाजीरा १६ तोले, शहद १६ तोले, अदरख १६ तोले, गोघृत ३२ तोले, तिलका तेल १६ तोले, काँजी ८० तोले, सफेद सरसों १६ तोले, राई १६ तोले हींग २ तोले और पाँचों नमक प्रत्येक दो दो तोले इन सबको एकत्र पीसकर उक्त गोतक्रमें मिलादेवे। फिर धूपमें सुखाकर मजबूत और घीके चिकने वर्त्तनमें भरकर और उसका मुख बन्दकर के धानोंकी राशिमें गाडदेवे ॥ १२-१६ ॥

द्वादशाहात्समुद्धृत्य प्रातः खाद्यं यथाबलम्।
सुरा सौवीरकं सीधु क्षीरं चानु पिबेन्नरः ॥ १७ ॥
जीर्णे यथेप्सितं भोज्यं दधिपिष्टान्नवर्जितम्।
एकमासप्रयोगेण सर्वान्व्याधीन्व्यपोहति ॥ १८ ॥
अशीतिं वातजान्रोगांश्चत्वारिंशच्च पैत्तिकान्।
विंशतिं श्लैष्मिकांश्चैव प्रमेहानपि विंशतिम् ॥ १९ ॥

अर्शांसि षट्प्रकाराणि गुल्मं पञ्चविधं तथा ।
अष्टादशविधं कुष्ठमेकादशविधं क्षयम् ॥ १२० ॥
श्वयथुं योनिशूलं च सर्वमाशु विनाशयेत् ।
क्षतसन्ध्यस्थिभग्नानां सन्धानकरणः परः ॥ २१ ॥
दृष्टेर्बलकरो हृद्य आयुष्यो बलवर्द्धनः ।
महारसोनपिण्डोऽयमामवातकुलान्तकः ॥ १२२ ॥

बारह दिनके बाद निकालकर इसको प्रतिदिन प्रातःकाल जठराग्निके बलाबलके अनुसार यथोचित मात्रासे सेवन करे और ऊपरसे मद्य, सौवीरकनामक काँजी, सीधु (सिर्का), अथवा गोदुग्ध पान करे । औषधिके जीर्ण (हज्म) होजानेपर यथेच्छरूपसे भोजन करे और दही, पिष्टान्न (पिठी आदिके बनेहुए पदार्थों) को त्यागदेवे । इस औषधको एक महीनेतक सेवन करनेसे यह सम्पूर्ण व्याधियोंको दूर करती है एवं अस्सी प्रकारके वातजरोग, चालीस प्रकारके पित्तज और बीस प्रकारके कफजन्यरोग, बीसों प्रकारके प्रमेह, छः प्रकारके अर्श, पाँच प्रकारके गुल्म, १८ प्रकारके कुष्ठ, ११ प्रकारके क्षयरोग, शोथ और योनिशूल इन सब रोगोंको शीघ्र नष्ट करती है । एवं क्षत (घाव) और सन्धिस्थानकी पीडाको दूर करती तथा टूटी हुई हड्डीको जोड देती है । दृष्टि शक्तिको प्रबल करती, हृदयको हितकारी, आयु बलकी वृद्धि करनेवाली है । यह महारसोनपिण्ड आमवातरोगको तो समूल नष्ट कर देता है ॥ १७–२२ ॥

वातारिगुग्गुलु ।

वातारितैलसंयुक्तं गन्धकं पुरसंयुतम् ।
फलत्रययुतं कृत्वा पिष्टयित्वा चिरं रुजी ॥
भक्षयेत्प्रत्यहं प्रातरुष्णतोयानुपानतः ॥ २३ ॥

शुद्ध गन्धक, गूगल, हरड, बहेडा और आमला प्रत्येक औषधिको समान भाग लेकर खूब बारीक चूर्ण करके अण्डीके तेलमें खरल करलेवे । इसको नित्यप्रति प्रातःकाल छाछःमासे परिमाण सेवनकर ऊपरसे उष्णजल पान करे ॥ २३ ॥

दिनेदिने प्रयोक्तव्यं मासमेकं निरन्तम् ।
आमवातं कटीशूलं गृध्रसीं खञ्जपङ्गुताम् ॥ २४ ॥
वातरक्तं सशोथं च सदाहं क्रोष्टुशीर्षकम् ।
शमयेद्बहुशो दृष्टमपि वैद्यविवर्जितम् ॥ २५ ॥

इसको निरन्तर एक महीनेतक सेवन करनेसे आमवात, कटिशूल, गृध्रसीवात, खञ्ज, पंगुता, वातरक्त, सूजन, दाह, क्रोष्टुशीर्षकरोग और ऐसे अनेकों रोग जिनको देखकर वैद्योंने त्यागदिया हो वे भी शीघ्र शमन होते हैं ॥ २४ ॥ २५ ॥

योगराजगुग्गुलु।

चित्रकं पिप्पलीमूलं यमानी कारवी तथा।
विडङ्गान्यजमोदा च जीरकं सुरदारु च ॥ २६ ॥
चव्यैला सैन्धवं कुष्ठं रास्ना गोक्षुरधान्यकम्।
त्रिफलां मुस्तकं व्योषं त्वगुशीरं यवाग्रजम् ॥ २७ ॥
तालीशपत्रं पत्रं च श्लक्ष्णचूर्णानि कारयेत्।
यावन्त्येतानि चूर्णानि तावन्मात्रं तु गुग्गुलुम् ॥
सम्मर्द्य सर्पिषा गाढं स्निग्धे भाण्डे निधापयेत् ॥ २८ ॥

चीतेकी जड, पीपलामूल, अजवायन, कालाजीरा, वायविडङ्ग, अजमोद, जीरा, देवदारु, चव्य, छोटी इलायची, सैंधानमक, कूठ, रास्ना, गोखुरु, धनियाँ, त्रिफला, नागरमोथा, त्रिकुटा, दारचीनी, खस, जवाखार, तालीसपत्र और तेजपात इन सबको समान भाग लेकर बारीक चूर्ण करलेवे। फिर समस्त चूर्णकी बराबर शुद्ध गूगल मिलाकर सबको एकत्र पीसलेवे और गोघृतके साथ उत्तमप्रकारसे खरलकरके चिकने वर्त्तनमें भरकर रखदेवे ॥ २६-२८ ॥

अतो मात्रां प्रयुञ्जीत यथेष्टाहारवानपि।
योगराज इति ख्यातो योगोऽयममृतोपमः ॥ २९ ॥
आमवाताढ्यवातादीन् कृमिदुष्टव्रणानि च।
प्लीहगुल्मोदरानाहदुर्नामानि विनाशयेत् ॥ १३० ॥
अग्निं च कुरुते दीप्तं तेजोवृद्धिं बलं तथा।
वातरोगान् जयत्येष सन्धिमज्जगतानपि ॥ ३१ ॥

इसमेंसे प्रतिदिन प्रातःकाल यथोचित मात्रासे सेवन करे और इसके जीर्ण होनेपर यथेच्छ भोजन करे। यह योगराजनामक प्रसिद्ध योग अमृतकी समान उपकारी है। यह औषधि आमवात, आढ्यवात, कृमिरोग, दुष्टव्रण, प्लीहा, गुल्म, उदररोग, अफारा और बवासीर इन समस्त व्याधियोंको नष्ट करती है एवं सन्धि और मज्जागत वातरोगोंको भी दूर करती है। जठराग्निको दीपन करती तथा बल और तेजकी वृद्धि करती है ॥ २९-१३१ ॥

त्रिकटु त्रिफला पाठा शताह्वा रजनीद्वयम् ।
अजमोदा वचा हिङ्गु हबुषा हस्तिपिप्पली ॥ ३२ ॥
उपकुंची शठी धान्यं विडसौवर्चलं तथा ।
सैन्धवं पिप्पलीमूलं त्वगेला पत्रकेशरम् ॥ ३३ ॥
फणिज्झकं च लौहं च सर्जकं च त्रिकण्टकम् ।
रास्ना चातिविषा शुण्ठी यवक्षाराम्लवेतसम् ॥ ३४ ॥
चित्रकं पुष्करं चव्यं वृक्षाम्लं दाडिमं रुबु ।
अश्वगन्धा त्रिवृद्दन्ती बदरं देवदारु च ॥ ३५ ॥
हरिद्रा कटुका मूर्वा त्रायमाणा दुरालभा ।
विडङ्गं मृतवङ्गं च यमानी वासकाभ्रकम् ॥ ३६ ॥
एतानि समभागानि श्लक्ष्णचूर्णानि कारयेत् ।
शोधितं गुग्गुलुं चैव सर्वचूर्णसमं नयेत ॥ ३७ ॥
घृतेन पिष्टयित्वा च स्निग्धभाण्डे निधापयेत् ।
प्रातः सायं च षण्माषान्भक्षयेत्प्रतिवासरम् ॥ ३८ ॥

सोंठ, मिरच, पीपल, आमला, हरड, बहेडा, पाढ, सोया, हल्दी, दारुहल्दी अजमोद, वच, हींग, हाऊबेर गजपीपल, छोटी इलायची, कचूर, धनियां, विडनमक, कालानमक, सेंधानमक, पीपलामूल, दारचीनी, बडी इलायची, तेजपात, नागकेशर, छोटे पत्तोंकी तुलसी, लोहभस्म, राल, गोखरू, रायसन, अतीस, सोंठ, जवाखार, अमलवेत, चीता, पोहकरमूल, चव्य, चिर्पाचिल, अनार, अण्डकी जड, असगन्ध, निसोत, दन्ती, बेरकी गुठली, मींग, देवदारु, हल्दी, कुटकी, मूर्वा, त्रायमाणा, धमासा, वायविडङ्ग, वङ्गभस्म, अजवायन, अडूसा और अभ्रकभस्म इन सब औषधियोंको समान भाग लेकर एकत्र कर बारीक चूर्णकर लेवे । फिर समस्त चूर्णकी बराबर शुद्ध गूगल लेकर सबको एकत्र मिलाकर घृतके साथ खाल करके चिकने बासनमें भरकर रख देवे । इसको नित्यप्रति प्रातः-सायंकाल छः छः माशेकी मात्रासे सेवन करे ॥ ३२-३८ ॥

रसघातेन ये भग्नाः कटिभग्नाश्च ये जनाः ।
एकाङ्गं शुष्यते येषां कुब्जं वापि क्षतोत्तरम् ॥
पादौ विस्तारितौ येषां येषां वा गृध्रसीग्रहः ॥ ३९ ॥
सन्धिवातं क्रोष्टुशीर्षं वातं सर्वशरीरगम् ।

अशीतिं वातजान् रोगांश्चत्वारिंशच्च पैत्तिकान् ॥१४०॥
विंशतिं श्लैष्मिकांश्चैव हन्त्यवश्यं न संशयः।
अयं बृहद्योगराजगुग्गुलुः सर्ववातहा ॥ १४१ ॥

यह बृहद् योगराजगूगल वायुके विकारसे जिनके शरीर नष्ट हो गये हैं एवं जिनकी कमर टूट गई है, जिनका एक अंग सूख गया है, जिनके कुब्ज और क्षत अत्यन्त बढते जाते हों, पैर फट गये हों, जिनको गृध्रसीवातने जकड लिया हो एवं सन्धिगतवात, क्रोष्टुशीर्षवात और सर्व शरीरगत तथा अस्सी प्रकारके वातरोग, चालीस प्रकारके पैत्तिक और बीस प्रकारके कफजनित रोगोंको निस्सन्देह नष्ट करता है। यह बृहद्योगराजगूगल सर्व प्रकारकी वातव्याधिको नष्ट करनेवाली परमोत्कृष्ट औषध है ॥ २९-१४१ ॥

व्याधिशार्दूलगुग्गुलु।

त्रिफलायाः पलान्यष्टौ प्रत्येकं द्विपलं पुनः।
कटुतैलं पलद्वन्द्वं दोलाशोधितगुग्गुलुम् ॥ ४२ ॥
सार्द्धाढकजले पक्त्वा पादशेषं पुनः पचेत्।
चूर्णीकृत्य क्षिपेत्सिद्धे पृथक् कर्षार्द्धसम्मितम् ॥४३॥
त्रिकटु त्रिफला मुस्तं विडङ्गामलकानि च।
गुडूच्यग्निस्त्रिवृद्दन्ती चवी शूरणमानकम् ॥ ४४ ॥
सार्द्धं शतद्वयं दद्याच्चूर्णितं कानकं फलम्।
रसगन्धकलौहाभ्रं प्रत्येकं कर्षसम्मितम् ॥ ४५ ॥

हरड, बहेडा और आमला इन प्रत्येककी आठ आठ पल लेकर डेढ आढक जलमें पकावे। जब चौथाई भाग जल शेष रह जाय तब उतारकर छान लेवे। फिर कड़वा तेल दो पल और दोलायन्त्रके द्वारा शुद्धकी हुई गूगल दो पल इनको एकत्र मर्दन करके पूर्वोक्त क्वाथमें मिलाकर पकावे। जब पाक उत्तम प्रकारसे पककर सिद्ध हो जाय तब उतारकर उसमें त्रिकुटा, त्रिफला, नागरमोथा, वायविडंग, आमले, गिलोय, चीतेकी जड, निसोत, दन्ती, चव्य, जिमीकन्द और मानकन्द प्रत्येक औषधि एक एक तोला, शुद्ध जमालगोटेके बीज २५० एवं शुद्ध पारा शुद्ध गन्धक लोहभस्म और अभ्रकभस्म ये प्रत्येक एक एक कर्ष इन सबको एकत्र चूर्ण करके डालदेवे। फिर सबको एकम एक करके चिकने बासनमें भरकर रखदेवे ॥४२-४५॥

ततो माषद्वयं जग्ध्वा प्रातरुष्णोदकं पिबेत् ॥
अग्निं च कुरुते दीप्तं वयोबलविवर्द्धनम् ॥ ४६ ॥
अर्शोऽश्मरीमूत्रकृच्छ्रं शिरोवाताम्लपित्तनुत् ।
कासं पञ्चविधं श्वासं दाहोदरभगन्दरम् ॥ ४७ ॥
शोथान्त्रवृद्धितिमिरं श्लीपदं प्लीहकामलम् ।
शूलगुल्मक्षयं कुष्ठं सपाण्डुविषमज्वरम् ॥ ४८ ॥
जानुजङ्घाखुरपादगतं वातं कटीग्रहम् ।
हन्ति चान्यान्कफोत्थांश्च आम वातं विशेषतः ॥
व्याधिशार्दूलको नाम्ना गुग्गुलुः परिकीर्त्तितः ॥ ४९ ॥

इसमेंसे नित्यप्रति प्रातःसमय दो दो मासे खाकर ऊपरसे उष्ण जल पान करे । यह गूगल जठराग्निको दीपन करता है, आयु और बलको बढाता है । एवं अर्श, पथरी, मूत्रकृच्छ्र, शिरोरोग, वातविकार, अम्लपित्त, पाँचों प्रकारकी खाँसी, श्वास, दाह, उदरपीडा, भगन्दर शोथ, अन्त्रवृद्धि, तिमिररोग, श्लीपद, प्लीहा, कामला, शूल, गुल्म, क्षय, कोढ, पांडुयुक्त विषमज्वर, जानु, जङ्घा और पादस्थित वातपीडा, कटिग्रह एवं अन्यान्य कफोत्पन्न रोगोंको और विशेषकर आमवातरोगको शीघ्र नष्ट करता है । यह गूगल व्याधिशार्दूलनामसे प्रसिद्ध है ॥

बृहत्सिंहनाद-गुग्गुलु ।

पिष्टितां गुग्गुलोर्मानीं कटुतैलाष्टके ।
प्रत्येकं त्रिफलाप्रस्थौ सार्द्धद्रोणे जले पचेत् ॥ १५० ॥
पादशेषं च पूतं च पुनरेतद्विमिश्रयेत् ।
त्रिकटु त्रिफला मुस्तविडङ्गामरदारु च ॥ ५१ ॥
गुडूच्यग्नित्रिवृद्दन्ती चवी शूरणमानकम् ।
पारदं गन्धकं चैव प्रत्येकं शुक्तिसम्मितम् ॥ ५२ ॥
सहलं कानकफलं सिद्धे सञ्चूर्ण्य निक्षिपेत् ।
ततो माषद्वयं जग्ध्वा पिबेत्तप्तजलादिकम् ॥ ५३ ॥

कटाहुआ और पोटलीमें बाँधकर शुद्ध किया हुआ गूगल १६ पल, सरसोंका तेल ८ पल लेवे । प्रथम त्रिफलेकी प्रत्येक ओषधि दो दो प्रस्थ लेकर डेढ द्रोण जलमें पकावे । पकते २ जब चौथाई भाग जल शेष रहजाय तब उतारकर छानलेवे । फिर

उस काथमें उक्त पदार्थोंको मिलाकर पकावे। जब पाक पककर गाढा होजाय तब उसमें त्रिकुटा, त्रिफला, नागरमोथा, वायविडंग, देवदारु, गिलोय, चीता, निसोत, दन्ती, चव्य, जिमीकन्द, मानकन्द, शोधित पारा और गन्धक ये प्रत्येक दो दो तोले और शुद्ध किये हुए जमालगोटेके १००० बीजोंकी मींग इन सबको बारीक पीसकर डालदेवे और करछीसे सबको एकमएक करके शुद्ध पात्रमें भरकर रखदेवे। इसमेंसे प्रतिदिन प्रातःकाल दो दो माशे खाकर ऊपरसे गरम जल पान करे॥ १५०–५३॥

अग्निं च कुरुते दीप्तं वडवानलसन्निभम्।
धातुवृद्धिं वयोवृद्धिं बलं सुविपुलं तथा॥ ५४॥
आमवातं शिरोवातं सन्धिवातं सुदारुणम्।
जानुजंघाश्रितं वातं सकटीग्रहमेव च॥ ५५॥
अश्मरीं मूत्रकृच्छ्रं च भगं च तिमिरोदरे।
अम्लपित्तं तथा कुष्ठं प्रमेहं गुदनिर्गमम्॥ ५६॥
कासं पञ्चविधं श्वासं क्षयं च विषमज्वरम्।
प्लीहानं श्लीपदं गुल्मं पाण्डुरोगं सकामलम्॥ ५७॥
शोथान्त्रवृद्धिशूलानि गुदजानि विनाशयेत्।
मेदःकफमसंघातं व्याधिवारणदर्पहा॥
सिंहनाद इति ख्यातो योगोऽयममृतोपमः॥ ५८॥

यह रस वडवानलकी समान अग्निको दीपन करता है एवं धातु, आयु और बलकी अत्यन्त वृद्धि करता है तथा आमवात, शिरोवात, सन्धिगतवात, जानु और जंघागतवात, कमरकी पीडा, पथरी, मूत्रकृच्छ्र, भगन्दर, तिमिर, उदररोग, अम्लपित्त, कुष्ठ, प्रमेह, गुदाके रोग, पाँचों प्रकारकी खाँसी, श्वास, क्षय, विषमज्वर, प्लीहा, श्लीपद, गुल्म, पाण्डुरोग, कामला, सूजन, अन्त्रवृद्धि, शूल और बवासीर इत्यादि रोगोंको नष्ट करता है। एवं मेद, कफ, आम इन रोगोंको और व्याधिरूपी गजेन्द्रके मदको दूर करता है। यह बृहत् सिंहनादनामक गूगल अमृतके समान गुणकारी है॥ १५४–५८॥

शुण्ठीघृत।

नागरक्वाथकल्काभ्यां घृतप्रस्थं विपाचयेत्।
चतुर्गुणेन तेनाथ केवलेनोदकेन वा॥ ५९॥

वातश्लेष्मप्रशमनमग्निसन्दीपनं परम् ।
नागरं घृतमित्युक्तं कट्यामशूलनाशनम् ॥ १६० ॥

सोंठके क्वाथ और कल्कके द्वारा १ प्रस्थ घृतको पकावे अथवा किसी किसीके मतसे सोंठके क्वाथके बदले केवल घृतसे चौगुने जलके साथ घृतको पकावे । इस घृतको यथाविधि पान करनेसे वात-कफजन्य रोग, कमरकी पीडा, आमवात और शूलरोग नष्ट होते हैं । यह जठराग्निको अत्यन्त दीपन करता है । इसको शुण्ठी-घृत कहते हैं ॥ ५९ ॥ १६० ॥

शृङ्गवेराद्यघृत ।

शृङ्गवेरयवक्षारपिप्पलीमूलपिप्पलीः ।
पिष्ट्वा विपाचयेत्सर्पिरारनालं चतुर्गुणम् ॥ ६१ ॥
शूलंविबन्धमानाहमामवातं कटीग्रहम् ।
नाशयेद्ग्रहणीदोषमग्निसन्दीपनं परम् ॥ ६२ ॥

सोंठ, जवाखार, पीपलामूल, और पीपल इन ओषधियोंको समान भाग लेकर बारीक पीसकर इनके कल्क और घृतसे चौगुनी कॉंजीके साथ एक प्रस्थ घृतको पकावे । यह घृत शूल, विबन्ध, आनाह, आमवात, कटीग्रह और संग्रहणी इन सबको नाश करताहै और अग्निको अत्यन्त दीपन करताहै ॥ ६१ ॥ ६२ ॥

प्रसारणीतैल ।

प्रसारण्या रसैः सिद्धं तैलमेरण्डजं पिबेत् ।
सर्वदोषहरं चैव आमवातहरं परम् ॥ ६२ ॥

प्रसारणीके क्वाथके साथ अण्डीके तेलको यथाविधि पकाकर पान और मर्दन करनेसे सम्पूर्ण दोष और आमवातरोग नष्ट होते हैं ॥ ६३ ॥

सैन्धवाद्यतैल ।

सैन्धवं देवकाष्ठं च वचा शुण्ठी च कट्फलम् ।
शताह्वा मुस्तकं चव्यं मेदे मलहरं त्रिवृत् ॥ ६४ ॥
हिज्जलस्य त्वचं बालं चित्रकं ब्रह्मयष्टिका ।
शठी विडङ्गं मधुकं रेणुकाऽतिविषा स्नुः ॥ ६५ ॥
अम्बष्ठी नीलिनी दन्तीमूलं मरिचमेव च ।
अजमोदा पिप्पली च कुष्ठं रास्ना च ग्रन्थिकम् ॥६६॥

एषां कर्षमितैः कल्कैः शनैर्मृद्वग्निना पचेत्।
प्रस्थं च कटुतैलस्य मूर्च्छितस्य यथाविधि ॥ ६७ ॥

सैंधानमक, देवदारु, वच, सोंठ, कायफल, सोया, नागरमोथा, चव्य, मेदा, महामेदा, जमालगोटेकी छाल, निसोत, हिज्जल (जलबेंत) वृक्षकी छाल, दारचीनी, सुगन्धवाला, चीतेकी जड, भारङ्गी, कचूर, वायविडंग, मुलहठी, रेणुका, अतीस, अण्डकी जड, पाढ, नीलके वृक्षकी जड, दन्तीकी जड, मिरच, अजमोद, पीपल, कूठ, रायसन और पीपलामूल इन प्रत्येक ओषधिके दो दो तोले कल्क और अठगुने जलके साथ एक प्रस्थ सरसोंके तैलको विधिपूर्वक शनैः शनैः मन्दमन्द अग्नि के द्वारा पकावे। जब उत्तम प्रकारसे पककर सिद्ध हो जाय तब उतारकर छान लेवे ॥ ६४–६७ ॥

एतत्तैलवरं श्रेष्ठमभ्यङ्गात्सर्ववातनुत्।
विशेषेणामवातेषु कटिजानूरुसन्धिषु ॥ ६८ ॥
हृत्पार्श्वसर्वगात्रेषु शूलं चैव निनाशयेत्।
वातश्लेष्मणि बाह्यामावन्त्रवृद्धौ भगन्दरे ॥ ६९ ॥
शस्तं नाडीव्रणान्सर्वान्नाशयत्यथ देहिनाम्।
अन्यांश्च विविधान् रोगान् वृक्षमिन्द्राशनिर्यथा ॥
सैन्धवाद्यमिदं तैलं सर्वामयनिषूदनम् ॥ १७० ॥

यह सब तैलोंमें उत्तम तेल है। इसकी मालिश करनेसे समस्त वातविकार नष्ट होते हैं। इसको विशेषकर आमवात, कटिग्रह, जानु जंघा और संधिस्थानोंमें स्थित वात, हृदय, पार्श्व और सर्वशरीरगत वात एवं वातकफजन्य विकार, बाह्य, आम, अन्त्रवृद्धि और भगन्दर इन रोगोंमें प्रयोग करना चाहिये। यह सैन्धवाद्य तैल सर्व प्रकारके नाडीव्रण, शूल, समस्तदोषजन्य रोग और अन्यान्य नानाप्रकारकी व्याधियोंको इस प्रकार नष्ट करता है जैसे वज्रपात वृक्षको नाश करदेता है ॥ ६८–१७० ॥

बृहत्सैन्धवाद्यतैल।

सैन्धवं श्रेयसी रास्ना शतपुष्पा यमानिका।
सर्जिका मरिचं कुष्ठं शुण्ठी सौवर्चलं विडम् ॥ ७१ ॥
वचाऽजमोदा मधुकं जीरकं पौष्करं कणा।
एतान्यर्धपलांशानि श्लक्ष्णपिष्टानि कारयेत् ॥ ७२ ॥

प्रस्थमेरण्डतैलस्य प्रस्थाम्बु शतपुष्पजम् ।
काञ्जिकं द्विगुणं दत्त्वा तथा मस्तु शनैः पचेत् ॥ ७३ ॥

सैंधानमक, गजपीपल, रायसन, सोया, अजवायन, सज्जी, कालीमिरच, कूठ, सोंठ, कालानमक, बिडनमक, वच, अजमोद, मुलहठी, जीरा, पोहकरमूल और पीपल इन प्रत्येक ओषधिको दो दो तोले लेकर एकत्र कूट पीसकर बारीक चूर्ण करलेवे । फिर यह चूर्ण, अण्डीका तेल १ प्रस्थ, सोयेका काथ १ प्रस्थ, कौंजी दो प्रस्थ और दहीका तोड दो प्रस्थ लेकर सबको एकत्र मिश्रित करके मन्द मन्द अग्निके द्वारा शनैः शनैः तैलको पकावे ॥ ७१-७३ ॥

सिद्धमेतत्प्रयोक्तव्यमामवातहरं परम् ।
पानाभ्यञ्जनवस्तौ च कुरुतेऽग्निबलं भृशम् ॥ ७४ ॥
वातार्त्तवंक्षणे शस्तं कटिजानूरुसन्धिजे ।
शूले हृत्पार्श्वपृष्ठेषु कृच्छ्रेऽश्मरिनिपीडिते ॥ ७५ ॥
बाह्यायामार्दितानाहे अन्त्रवृद्धिनिपीडिते ।
अन्यांश्चानिलजान् रोगान् नाशयत्याशु देहिनाम् ॥७६॥

जब उत्तम प्रकारसे पककर सिद्ध होजाय तब इसको पान, मर्दन और बस्तिक्रियाद्वारा प्रयोग करे । यह बृहत्सैन्धवाद्यतैल आमवातको नष्ट करनेके लिये परम श्रेष्ठ ओषध है और जठराग्निको अत्यन्त दीपन करनेवाला है । इसको वातपीडा, वंक्षणसन्धिगत वात एवं कमर जानु, जंघा और सन्धिगतवात, हृदय पार्श्व और पृष्ठदेशस्थित शूलरोगमें तथा मूत्रकृच्छ्र, पथरी, बाह्यायाम, अर्दित, आनाह और अन्त्रवृद्धिकी पीडा इन रोगोंमें प्रयोग करे । यह तैल मनुष्योंकी अन्य सब प्रकारकी वातव्याधियोंको तत्काल नाश करता है ॥ ७४-७६ ॥

विजयभैरवतैल ।

रसगन्धशिलातालं सर्वं कुर्यात्समांशकम् ।
चूर्णयित्वा ततः सूक्ष्ममारनालेन पेषयेत् ॥ ७७ ॥
तैलकल्केन संलिप्य सूक्ष्मवस्त्रं ततः परम् ।
तैलाक्तां कारयेद्वर्त्तिमूर्द्ध्वभागे च दीपयेत् ॥ ७८ ॥
वर्त्त्यधः स्थापिते भाण्डे तैलं पतति शोभनम् ।
लेपयेत्तेन गात्राणि भक्षणाय च दापयेत् ॥ ७९ ॥
नाशयेत्सूततैलं तद्वातरोगानशेषतः ।

बाहुकम्पं शिरःकम्पं जङ्घाकम्पं ततः परम् ।
एकाङ्गं च तथा वातं हन्ति लेपान्न संशयः ॥ १८० ॥

शुद्ध पारा, शुद्ध गन्धक, मैनशिल और हरताल इन सबको समान भाग (अर्थात् एक एक तोला) लेकर एकत्र बारीक चूर्ण करके काँजीके साथ खरल करे फिर उसका बारीक (मलमलआदि) कपडेके टुकडेपर लेप करके उसको सुखाकर बत्ती बनालेवे । पश्चात् उस बत्तीको तिलके तेल अथवा अण्डीके तेलमें भिगोकर दीपककी लोयपर जलावे और उसके निचे एक बर्त्तन रखदेवे । बत्तीके जलनेपर जो एकएक बूंद तैल उस बर्त्तनमें टपकेगा उसको लेकर शीशीमें भरकर रखलेवे । इस तैलको शरीरपर उत्तम प्रकारसे मर्दन (मालिश) करानेसे और पान करानेसे यह विजय-भैरवतैल सम्पूर्ण वातरोगोंको नष्ट करता है । इसका प्रलेप करनेसे बाहुकम्प, शिरःकम्प, जंघाकम्प और एकांगगतवातकी पीडा ये सब रोग निश्चय दूर होते हैं ॥ ७७-१८० ॥

महाविजय-भैरवतैल ।

फणिफेनयुतं चैतन्महद्विजयभैरवम् ॥ ८१ ॥

इस उपर्युक्त तैलके साथ अफीम मिलादेनेसे यहही " महाविजय-भैरव तैल " कहाजाता है । आमवातरोगकी अत्युत्कृष्ट औषध है ॥ ८१ ॥

आमवातमें पथ्य ।

रूक्षः स्वेदो लंघनं स्नेहपानं बस्तिर्लेपो रेचनं पायुवर्त्तिः ।
अब्दोत्पन्नाः शालयो ये कुलत्था जीर्णं मद्यं जाङ्गलानां रसाश्च
वातश्लेष्मोत्पादि सर्वं च तक्रं वर्षाभूश्चैरण्डतैलं रसोनम् ॥८२॥
पटोलपत्तूरककारवेल्लं वार्त्ताकुशिग्रूणि च तप्तनीरम् ।
मन्दारगोकण्टकवृद्धदारं भल्लातकं गोजलमार्द्रकं च ॥ ८३ ॥
कटूनि तिक्तानि च दीपनानि स्युरामवातामयिने हितानि ८४

रूक्ष स्वेद देना, लंघन कराना, स्नेहद्रव्योंका पान, बस्तिक्रिया (पिचकारी लगाना), लेप करना, दस्त कराना, गुदामें बत्ति लगाना, एक वर्षके पुराने शालिधानोंके चावल और कुलथीका भोजन, पुरानी मद्य, जङ्गली पशु-पक्षियोंका मांसरस, वायु और कफनाशक समस्त द्रव्योंका सेवन, मट्ठा, श्वेत पुनर्नवा, अण्डीका तेल, लहसन, परवल, शालिञ्चशाक, करेला, बैंगन, सहिंजनेकी फली, गरम जल, फरहद, गोखरू, विधारा, भिलावा, गोमूत्र, अदरख एवं चरपरे कडवे और अग्निवर्द्धक पदार्थ आमवातरोगीके लिये हितकारी हैं ॥ ८२-८४ ॥

आमवातमें अपथ्य।

दधिमत्स्यगुडक्षीरपोतकीमाषपिष्टकान्।
वर्जयेदामवातार्त्तो मांसं चानूपसम्भवम् ॥ ८५ ॥
अभिष्यन्दकरा ये च ये चान्ये गुरुपिच्छिलाः।
वर्जनीयाः प्रयत्नेन आमवातार्दितैर्नरैः ॥ १८६ ॥

दही, मछली, गुड, दूध, पोईका शाक, उड़द, पिट्ठीके बने पदार्थ, अनूपदेशजन्य जीवोंका मांस एवं जो कफकारक, भारी और पिच्छिल (मलाईकी समान गिलगिला और चिकना) हों ये सब पदार्थ आमवात रोगियोंको यत्नपूर्वक त्यागदेने चाहिये ॥ ८५ ॥ १८६ ॥

इति भैषज्यरत्नावल्याम् आमवातचिकित्सा।

शूलरोगकी चिकित्सा।

वमनं लंघनं स्वेद पाचनं फलवर्त्तयः।
क्षारचूर्णानि गुडिकाः शस्यन्ते शूलशान्तये ॥ १ ॥

शूलरोगमें कफकी प्रधानता होनेपर वमन, आमको पचानेके लिये लंघन, पित्तको छोडकर वात और कफके शूलमें स्वेदक्रिया, पाचनक्रिया, फलवर्त्ति, क्षारवर्त्ति वा क्षारप्रयोग एवं चूर्ण और गोलियाँ (जिनको आगे कहेंगे) ये सब शूलरोगको शान्त करनेके लिये उपयोगी कहे गये हैं ॥ १ ॥

पुंसः शूलाभिपन्नस्य स्वेद एव सुखावहः।
पायसैः कृशरैः पिष्टैः स्निग्धैर्वा पिशितोत्करैः ॥ २ ॥

शूलरोगयुक्त रोगीको खीर, खिचडी, पिट्ठी, स्निग्ध पदार्थ अथवा मेंढक आदिके मांसद्वारा स्वेद देनाही हितकारी है ॥ २ ॥

वातिक-शूलचिकित्सा।

वातात्मकं हन्त्यचिरेण शूलं स्नेहेन युक्तस्तु कुलत्थयूषः।
ससैन्धवो व्योषयुतः सलावः सहिङ्गुसौवर्चलदाडिमाढ्यः ॥ ३ ॥

कुलथी और लवेके मांसका समान भाग लेकर दोनोंका एकत्र क्वाथ करके यूष सिद्ध करलेवे। फिर उसको हींग और घृतके साथ तलकर उसमें सैंधानमक, त्रिकुटा,

कालानमक इनका चूर्ण और अनारका रस यथोचित मात्रामें मिलाकर सेवन करनेसे वातज शूल शीघ्र नष्ट होता है ॥ ३ ॥

बलापुनर्नवैरण्डबृहतीद्वयगोक्षुरैः ।
सहिङ्गु लवणोपेतं सद्यो वातरुजापहम् ॥ ४ ॥

खिरैंटी, पुनर्नवा, अण्डकी जड, बडीकटेरी, कटेरी और गोखुरू इनके क्वाथमें हींग और सेंधानमक मिलाकर सेवन करनेसे वातज शूल दूर होता है ॥ ४ ॥

शूली निरन्नकोष्ठोऽद्भिरुष्णाभिश्चूर्णिताः पिबेत् ।
हिङ्गुप्रतिविषाव्योषवचासौवर्चलाभयाः ॥ ५ ॥

हींग, अतीस, त्रिकुटा, वच, कालानमक और हरड इनका चूर्ण बनाकर बिना भोजन किये शूलरोगी प्रातःकालके समय उष्ण जलके साथ पान करे ॥ ५ ॥

तुम्बुरूण्यभया हिङ्गु पौष्करं लवणत्रयम् ।
पिबेद्यवाम्बुना वातशूलगुल्मापतन्त्रकी ॥ ६ ॥

तुम्बुरु, हरड, हींग, पोहकरमूल, सैंधानमक, कालानमक और बिडनमक इनको एकत्र पीसकर जौके क्वाथके साथ पान करनेसे वातशूल, गुल्म और अपतन्त्ररोग दूर होते हैं ॥ ६ ॥

यमानीहिङ्गुसिन्धूत्थक्षारसौवर्चलाभयाः ।
सुरामण्डेन पातव्या वातशूलनिषूदनाः ॥ ७ ॥

अजवायन, हींग, सैंधानमक, जवाखार, कालानमक और हरड इनके समान भाग चूर्णको एकत्र मिश्रित करके सुराके मण्डके साथ पान करानेसे वातजन्य शूल दूर होता है ॥ ७ ॥

विश्वमेरण्डजं मूलं क्वाथयित्वा जलं पिबेत् ।
हिङ्गुसौवर्चलोपेतं सद्यः शूलनिवारणम् ॥ ८ ॥

सोंठ १ भाग और अण्डकी जड २ भाग इनका यथाविधि क्वाथ बनाकर उसमें हींग और कालानमक मिलाकर पीनेसे शूलरोग तत्काल नष्ट होता है ॥ ८ ॥

हिङ्गुपुष्करमूलाभ्यां हिङ्गुसौवर्चलेन वा ।
विश्वैरण्डयवक्वाथः सद्यः शूलनिवारणः ॥ ९ ॥

सोंठ, अण्डकी जड और जौ इनके क्वाथमें हींग, पोहकरमूलका चूर्ण या हींग और कालानमक मिलाकर पान करनेसे शूलरोग शीघ्र शमन होता है ॥ ९ ॥

तद्वद्बुयवक्वाथो हिङ्गुसौवर्चलान्वितः ॥ १० ॥

एवं अण्डकी जड और जौके क्वाथमें हींग और कालानमक डालकर पान करने से शूलरोग दूर होता है ॥ १० ॥

सौवर्चलाम्लिकाजाजीमरिचैर्द्विगुणोत्तरैः ।
मातुलुङ्गरसैः पिष्ट्वा गुडिका वातशूलनुत् ॥ ११ ॥

कालानमक १ तोला, इमली २ तोले, कालाजीरा ४ तोले और कालीमिरच ८ तोले इनके चूर्णको एकत्र बिजौरेनींबूके रसमें खरल करके ३-३ मासेकी गोलियाँ बनालेवे। ये गोलियाँ प्रतिदिन प्रातःकाल उष्ण जलके साथ खानेसे वातशूलको नष्ट करती हैं ॥ ११ ॥

बीजपूरकमूलं च घृतेन सह पाययेत् ।
जयेद्वातभवं शूलं कर्षमेकप्रमाणतः ॥ १२ ॥

बिजौरेनीम्बूकी जडको पीसकर दो तोले परिमाण लेकर घृतके साथ पान कराने से वातजन्य शूल दूर होता है ॥ १२ ॥

हिंग्वम्लवेतसव्योषयमानीलवणत्रिकैः ।
बीजपूररसोपेतैर्गुटिका वातशूलनुत् ॥ १३ ॥

हींग, अमलबेंत, सोंठ, पीपल, मिरच, अजवायन, सैंधानमक, कालानमक और बिडनमक इनको समान भाग लेकर चूर्ण करलेवे। फिर सबको एकत्र करके बिजौरेनीम्बूके रसमें खरल करके तीन तीन मासेकी गोलियाँ उष्ण जलके साथ सेवन करनेसे वातज शूलको नष्ट करती हैं ॥ १३ ॥

बिल्वमूलतिलैरण्डं पिष्ट्वा चाम्लतुषाम्भसा ।
गुडिकां भ्रामयेदुष्णां वातशूलविनाशिनीम् ॥ १४ ॥

बेलकी जड, तिल और अण्डकी जड इनको एकत्र काँजीके साथ खरल करके गोली बनालेवे। इस गोलीको गरम करके पीडास्थानपर लेप (भ्रमण) करनेसे वातज शूल नष्ट होता है ॥ १४ ॥

तिलैश्च गुडिकां कृत्वा भ्रामयेज्जठरोपरि ।
गुडिका शमयत्येषा शूलं चैवातिदुस्तरम् ॥ १५ ॥

तिलोंको खट्टी काँजीमें पीसकर गोली बनावे। फिर उसको गरम करके पेटके ऊपर लेप करे। यह गोली दारुण वातशूलको भी दूर करदेती है ॥ १५ ॥

नाभिलेपाज्जयेच्छूलं मदनः काञ्जिकान्वितः ।
जीवन्तीमूलकल्को वा सतैलः पार्श्वशूलनुत् ॥ १६ ॥

मैनफलको कांजीमें पीसकर नाभिके ऊपर लेप करनेसे वातशूल दूर होता है और जीवन्तीकी जडको पीसकर तिलके तैलमें मिलाकर लेप करनेसे पार्श्वशूल नष्ट होता है ॥ १६ ॥

पैत्तिक-शूलचिकित्सा ।

गुडशालियवाः क्षीरं सर्पिष्पानं विरेचनम् ।
जाङ्गलानि च मांसानि भेषजं पित्तशूलिनाम् ॥ १७ ॥

गुड, शालिधानोंके चावल, जौ, दूध, घृतपान, विरेचन और जङ्गली जीवोंका मांस ये सब ओषधियाँ पित्तके शूलवाले रोगियोंको हितकर हैं ॥ १७ ॥

पैत्ते तु शूले वमनं पयोऽम्बुरसैस्तथेक्षोः सपटोलनिम्बैः ।
शीतावगाहाः सरितां च वाताः कांस्यादिपात्राणि जलप्लुतानि ॥ १८ ॥

पित्तजशूलमें गरम जल, दुग्ध वा ईखके रसके साथ परवल और नीमकी छाल का रस रोगीको पान कराकर वमन करावे एवं शीतल जलमें गोता लगाकर स्नान करना, नदीके किनारेकी शीतल वायुका सेवन करना, शीतल जलसे भरेहुए काँसीके पात्रको पेटपर रखना ये सब उपचार पित्तज शूलवाले रोगियोंको हितकारी हैं ॥ १८ ॥

विरेचनं पित्तहरं च शस्तं रसाश्च शस्ताः शशलावकानाम् ।
संतर्पणं लाजमधूपपन्नं योगाः सुशीता मधुसंप्रयुक्ताः ॥ १९ ॥

पित्तशूलमें पित्तनाशक द्रव्योंके द्वारा विरेचन, खरगोश और लवा आदिके मांस का यूष, सन्तर्पण (खीलोंको जलमें भिजोकर उसमें शहद मिलाकर तृप्तिके लिये पान करना) और अन्यान्य शीतल ओषधियोंमें शहद मिलाकर सेवन करना ये सब प्रयोग उपयोगी कहेगये हैं ॥ १९ ॥

छर्द्यां ज्वरे पित्तभवेऽथ शूले घोरे विदाहे त्वतिकर्शिते च ।
यवस्य पेयां मधुना विमिश्रां पिबेत्सुशीतां मनुजः सुखार्थी ॥

सुखकी इच्छा करनेवाला मनुष्य वमन, ज्वर, पित्तशूल, घोर दाह और अत्यन्त कृशताके होनेपर जौकी पेया बनाकर उसको शहद मिलाकर शीतल करके पान करे ॥ २० ॥

धाञ्या रसं विदार्या वा त्रायन्ती गोस्तनाम्बु वा ।
पिबेत्सशर्करं सद्यः पित्तशूलनिषूदनम् ॥ २१ ॥

आमलोंका रस वा विदारीकन्दका रस अथवा त्रायमाणका रस या दाखोंका क्वाथ मिश्री मिलाकर पान करनेसे पित्तशूल तत्काल नष्ट होता है॥ २१ ॥

शतावरीरसं क्षौद्रयुतं प्रातः पिबेन्नरः ।
दाहशूलोपशान्त्यर्थं सर्वपित्तामयापहम् ॥ २२ ॥

शतावरके रसको शहद मिलाकर प्रातः समय सेवन करनेसे दाह, शूल एवं सर्व प्रकारके पित्तजरोग दूर होते हैं ॥ २२ ॥

शतावरीसयष्टयाह्ववाट्यालकुशगोक्षुरैः ।
शृतशीतं पिबेत्तोयं सगुडक्षौद्रशर्करम् ॥
पित्तासृग्दाहशूलघ्नं सद्यो दाहज्वरापहम् ॥ २३ ॥

शतावर, मुलहठी, खिरैंटी, कुशा और गोखुरू इनका क्वाथ बनाकर उसको शीतल करके गुड, शहद और मिश्री मिलाकर पान करनेसे पित्तशूल, रक्तपित्त, दाह, शूल और दाहयुक्त ज्वर ये सब रोग नष्ट होते हैं ॥ २३ ॥

तैलमेरण्डजं वापि मधुकाक्काथसंयुतम् ।
शूलं पित्तोद्भवं हन्ति गुल्मं पैत्तिकमेव च ॥ २४ ॥

मुलहठीके क्वाथमें अण्डीका तेल मिलाकर पान करनेसे पित्तजन्य शूल और पित्तज गुल्म दूर होते हैं ॥ २४ ॥

प्रलिह्यात्पित्तशूलघ्नं धात्रीचूर्णं समाक्षिकम् ॥ २५ ॥

आमलोंके चूर्णको शहदमें मिलाकर सेवन करनेसे पित्तजशूल नष्ट होता है ॥२५॥

श्लैष्मिक—शूलचिकित्सा ।

श्लेष्मात्मके छर्दनलङ्घनानि शिरोविरेकं मधुसीधुपानम् ।
मधूनि गोधूमयवानरिष्टान् सेवेन रूक्षान्कटुकांश्च सर्वान् ॥ २६ ॥

कफजन्य शूलमें वमन, लङ्घन और नस्य देना, मधुके द्वारा बनाई हुई सीधु (मद्यविशेष). शहद, गेहूँ, जौ, अरिष्ट, रूखे और कटुरसवाले पदार्थोंको सेवन करना चाहिये ॥ २६ ॥

लवणत्रयसंयुक्तं पञ्चकोलं सरामठम् ।
सुखोष्णेनाम्बुना पीतं कफशूलनिवारणम् ॥ २७ ॥

सैंधानमक, बिडनमक, कालानमक, पीपलामूल, चव्य, चीता, सोंठ और हींग इनके समान भाग मिश्रित चूर्णको सुखोष्ण जलके साथ पान करनेसे कफजन्य शूल दूर होता है ॥ २७ ॥

बिल्वमूलमथैरण्डं चित्रकं विश्वभेषजम्।
हिङ्गुसैन्धवसंयुक्तं सद्यः शूलनिवारणम् ॥ २८ ॥

बेलकी जड, अण्डकी जड, चीतेकी जड और सोंठ इनके क्वाथमें हींग और सेंधानमक डालकर पीनेसे कफशूल शीघ्र निवृत्त होता है ॥ २८ ॥

आम-शूलचिकित्सा।

आमशूले क्रिया कार्या कफशूलविनाशिनी।
सेव्यमामहरं सर्वं यदग्निबलवर्द्धनम् ॥ २९ ॥

आमके शूलमें कफशूलनाशक समस्त क्रिया करनी एवं जो ओषधियाँ अग्निबलको बढानेवाली हों व आमनाशक हों वे सब सेवन करनी चाहिये ॥ २९ ॥

दीप्यकं सैन्धवं पथ्या नागरं च चतुःसमम्।
चूर्णं शूलं जयत्याशु मन्दस्याग्नेश्च दीपनम् ॥ ३० ॥

अजवायन, सेंधानमक, हरड और सोंठ इनके समान भाग चूर्णको उष्ण जलके साथ सेवन करनेसे आमशूल शीघ्र दूर होता है और जठराग्नि दीपन होती है ॥३०॥

वातपैत्तिक-शूलचिकित्सा।

समाक्षिकं बृहत्यादि पिबेत्पित्तानिलात्मके।
व्यामिश्रं वा विधिं कुर्याच्छूले पित्तानिलात्मके ॥ ३१॥

वातपित्तजन्य शूलमें बडी कटेरी, गोखुरू, कटेरी, अण्डकी जड, कुशा, काँस इनका क्वाथ बनाकर उसमें शहद डालकर पान करे वा मिश्रित क्रिया करे ॥ ३१ ॥

पित्तश्लैष्मिक-शूलचिकित्सा।

पित्तजे कफजे चापि क्रिया या कथिता पृथक्।
एकीकृत्य प्रयुञ्जीत तां क्रियां कफपित्तजे ॥ ३२ ॥

पित्तके शूल और कफके शूलमें जो पृथक् पृथक् चिकित्सा कही गई है उन दोनोंको एकत्र मिश्रित करके पित्त-कफजन्य शूलमें प्रयोग करे ॥ ३२ ॥

वातश्लैष्मिक-शूलचिकित्सा।

रसोनं मधुसंमिश्रं पिबेत्प्रातः प्रकांक्षितः।
वातश्लेष्मभवं शूलं निहन्त्यग्निप्रदीपनम् ॥ ३३ ॥

प्रातःकालमें लहसनको शहदमें मिलाकर यथेच्छरूपसे सेवन करनेसे वातकफजन्य शूल दूर होता है और अग्नि दीप्त होती है ॥ ३३ ॥

त्रिदोषज-शूलचिकित्सा ।

शङ्खचूर्णं सलवणं सहिङ्गु व्योषसंयुतम् ।
उष्णोदकेन तत्पीतं शूलं हन्ति त्रिदोषजम् ॥ ३४ ॥

शंखका चूर्ण, सेंधानमक, हींग और त्रिकुटा इनका एकत्र पीसकर गरम जलके साथ पान करनेसे त्रिदोषजन्य शूल नष्ट होता है ॥ ३४ ॥

हिङ्गु सौवर्चलं शुण्ठी पथ्या च द्विगुणोत्तरम् ।
एतच्चूर्णं कटीकुक्षिपार्श्वहृद्वस्तिशूलनुत् ॥ ३५ ॥

हींग १ तोला, कालानमक २ तोले, सोंठ ४ तोले और हरड ८ तोले इनके चूर्णको एकत्र पीसकर सेवन करनेसे कमर, कुक्षि, पसली, हृदय और वस्तिगत शूल नष्ट होता है ॥ ३५ ॥

गोमूत्रशुद्धं मण्डूरं त्रिफलाचूर्णसंयुतम् ।
विलिहन् मधुसर्पिर्भ्यां शूलं हन्ति त्रिदोषजम् ॥ ३६ ॥

गोमूत्रद्वारा शुद्ध कीहुई मण्डूरभस्म १ तोला और त्रिफलेका चूर्ण समान भाग मिश्रित १ तोला सबको घृत और मधुके साथ मिलाकर सेवन करनेसे त्रिदोषजन्य शूल दूर होता है ॥ ३६ ॥

दग्धमनिर्गतधूमं मृगशृङ्गं गोघृतेन सह पीतम् ।
हृदयनितम्बजशूलं हरति शिखी दारुनिवहमिव ॥३७॥

अनिर्गतधूम (जिसका धुआँ बाहर न निकल सके ऐसी) अग्निके द्वारा हिरनके सींगको भस्म करके गोघृतके साथ पान करनेसे हृदय और नितम्बगत शूलरोग नष्ट होता है ॥ ३७ ॥

परिणाम-शूलचिकित्सा ।

वमनं तिक्तमधुरैर्विरेकश्चात्र शस्यते ।
वस्तयश्च हिताः शूले परिणामसमुद्भवे ॥ ३८ ॥

परिणामशूलरोगमें कडवी और मधुर औषधियोंके द्वारा वमन, विरेचन और वस्तिक्रिया प्रयोग करना हितकारी है ॥ ३८ ॥

नागरतिलगुडकल्कं पयसा संसाध्य कः पुमानद्यात् ।
नश्यति परिणतिशूलं तस्योग्रं सप्तरात्रेण ॥ ३९ ॥

सोंठ २ तोले, गुड २ तोले और तिलोंका कल्क ८ तोले सबको दूधमें पकाकर सेवन करनेसे सात दिनमेंही अत्युत्कट परिणामशूल नष्ट होता है ॥ ३९ ॥

शम्बूकजं भस्म पीतं जलेनोष्णेन तत्क्षणात् ।
पंक्तिजं विनिहन्त्येतच्छूलं विष्णुरिवासुरान् ॥ ४० ॥

घोंघेकी भस्मको उष्ण जलके साथ पान करनेसे परिणामशूल इस प्रकार तत्काल नष्ट होजाता, है, जैसे विष्णुभगवान् सुदर्शन चक्रके द्वारा असुरोंको शीघ्र नष्ट करदेते हैं । इस औषधिको सेवन करनेसे पहले मुखमें घृत लगालेवे, ऐसा न करनेसे मुख और जिह्वामें छाले पडजाते हैं ॥ ४० ॥

दध्नाऽलूनसरेणाद्यात् सतीनयवसक्तुकान् ।
अचिरान्मुच्यते शूलान्नरोऽन्नपरिवर्जनात् ॥ ४१ ॥

अन्नको परित्याग करके शूलरोगी मलाईसहित दहीके साथ मटर और जौके सत्तुओंको सेवन करनेसे शूलरोगसे बहुत शीघ्र मुक्त होजाता है ॥ ४१ ॥

तिलनागरपथ्यानां भागं शम्बूकभस्मनाम् ॥ ४२ ॥
द्विभागगुडसंयुक्तां गुटीं कृत्वाऽक्षभागिकाम् ।
शीताम्बुपानात्पूर्वाह्ने भक्षयेत्क्षीरभोजनः ॥ ४३ ॥
सायाह्ने रसकं पीत्वा नरो मुच्येत दुर्जयात् ।
परिणामसमुत्थाच्च शूलाच्चिरभवादपि ॥ ४४ ॥

तिल, सोंठ, हरड और शम्बूकभस्म ये प्रत्येक औषधि एक एक तोला और गुड ८ तोले इन सबको एकत्र कूट पीसकर दो दो तोलेकी गोलियाँ बनाकर इनमेंसे प्रतिदिन प्रातःकाल एक एक गोली शीतल जलके साथ सेवन करे । इस औषधिको सेवन करनेपर प्रातःसमय दुग्धपान करने और सायंकालमें मांसका यूष सेवन करनेसे शूलरोगी अतिदुस्तर और चिरकालीन परिणामशूलसे भी मुक्त होजाता है॥४२-४४॥

यः पिबति सप्तरात्रं सक्तूनेकान्कलाययूषेण ।
स जयति परिणतिशूलं चिरजं किमुत नूतनजम् ।

जो रोगी केवल जौके सत्तुओंको मटरके यूषके साथ ७ दिनतक पान करे तो उसका बहुत पुराना परिणामशूलभी नष्ट होजाता है । नयेका तो कहनाही क्या है। ४५

लोहचूर्णं वरायुक्तं विलीढं मधुसर्पिषा ।
हन्यात्परीणामशूलं तन्मलं वा प्रयोजितम् ॥ ४६ ॥

लोहभस्म अथवा मण्डूरभस्म २ तोले और हरड, बहेडा, आमला इनका चूर्ण एक एक तोला लेकर सबको एकत्र मिश्रित करके घृत और मधुके साथ सेवन करनेसे परिणामशूल नाश होता है ॥ ४६ ॥

नारिकेलक्षार ।

नारिकेलं सतोरं च लवणेन प्रपूरितम् ।
मृदाऽऽवेष्टितं शुष्कं पक्कं गोमयवह्निना ॥ ४७ ॥
पिप्पल्या भक्षितं हन्ति शूलं च परिणामजम् ।
वातिकं पैत्तिकं चापि श्लैष्मिकं सान्निपातिकम् ॥ ४८ ॥

जलयुक्त और उत्तम प्रकारसे पकेहुए नारियलमें सैंधेनमकका चूर्ण भरकर उसके ऊपर मिट्टीका लेप करके सुखालेवे । फिर उसकी पुटपाक विधिके अनुसार आरने उपलोंकी अग्निमें भस्म करके उसके भीतरके द्रव्यको निकाल लेवे । पश्चात् उसको पीपलके चूर्णके साथ प्रतिदिन सेवन करनेसे वातज, पित्तज, कफज और त्रिदोषज परिणामशूल दूर होता है ॥ ४७ ॥ ४८ ॥

शंखादिचूर्ण ।

शङ्खचूर्णस्य च पलं पञ्चैव लवणानि च ।
क्षारं टङ्कणकं जाती शतपुष्पा यमानिका ॥ ४९ ॥
हिङ्गु त्रिकटुकं चैव सर्वमेकत्र चूर्णयेत् ।
आमवातं यकृच्छूलं परिणामसमुद्भवम् ॥ ५० ॥
अन्नद्रवकृतं शूलं शूलं चैव त्रिदोषजम् ॥ ५१ ॥

शंखकी भस्म एवं पाँचों नमक, जवाखार, सुहागा, जायफल, सोया, अजवायन, हींग और त्रिकुटा प्रत्येकको चार चार तोले लेकर एकत्र चूर्ण करलेवे । इस चूर्णको प्रतिदिन तीन तीन माशेकी मात्रासे उष्ण जलके साथ सेवन करनेसे आमवात, यकृच्छूल, परिणामशूल, अन्नद्रवनामकशूल और त्रिदोषजन्य शूल शीघ्र नष्ट होता है ॥ ४९–५१ ॥

सामुद्राद्यचूर्ण ।

सामुद्रं सैन्धवं क्षारौ रुचकं रोमकं विडम् ।
दन्ती लौहरजः किट्टं त्रिवृच्छूरणकं समम् ॥ ५२ ॥
दधिगोमूत्रपयसा मन्दपावकपाचितम् ।
तद्यथाग्निबलं चूर्णं पिबेदुष्णेन वारिणा ॥
जीर्णेऽजीर्णे च भुञ्जीत मांसादि घृतसाधितम् ॥ ५३ ॥

सामुद्रनमक, सैंधानमक, जवाखार, सज्जी, कालानमक, सांभरनमक, विरियासञ्चर नमक, दन्ती, लोहेकी भस्म, मण्डूरभस्म, निसोत और जिमीकन्द इन सबको समान-

भाग लेकर चूर्ण करके चूर्णसे चौगुने दही, गोमूत्र और दूधके साथ मिलाकर मन्दमन्द अग्निसे पकावे। जब उत्तम प्रकारसे पककर सिद्ध होजाय तब उस चूर्णको अग्निके बलाबलके अनुसार यथोचित मात्रासे गरम जलके साथ सेवन करे। इस चूर्णके जीर्ण होनेपर अथवा न होनेपर घृतके द्वारा सिद्ध किये हुए मांसके यूषको भोजन करे ॥ ५२ ॥ ५३ ॥

नाभिशूलं प्लीहशूलं यकृद्गुल्मकृतं च यत्।
विद्रध्यष्ठीलिकां हन्ति कफवातोद्भवं तथा ॥ ५४ ॥
शूलानामपि सर्वेषामौषधं नास्त्यतः परम्।
परिणामसमुत्थस्य विशेषेणान्तकृन्मतम् ॥ ५५ ॥

यह चूर्ण नाभिशूल, प्लीहाशूल, यकृत्शूल, गुल्मशूल, विद्रधि, अष्ठीला, कफ-वातजन्य शूल, विशेषकर परिणामशूल और अन्य सर्वप्रकारके शूलरोगोंको दूर करता है। सर्वप्रकारके शूलरोगोंकी इससे बढकर अन्य औषध नहीं है ॥

शम्बूकादिगुडिका।

शम्बूकं त्र्यूषणं चैव पञ्चैव लवणानि च।
समांशा गुडिकाः कार्याः कलम्बकरसेन च ॥ ५६ ॥
प्रातर्भोजनकाले वा भक्षयेत्तद्यथाबलम्।
शूलाद्विमुच्यते जन्तुः सहसा परिणामजात् ॥ ५७ ॥

घोंघेकी भस्म, सोंठ, मिरच, पीपल, और पांचों नमक प्रत्येकको एकएक तोला लेकर एकत्र चूर्ण करके नाडीके शाकके रसमें खरल कर गोलियाँ बनालेवे। इसको प्रातःकाल अथवा भोजनसे पहले अग्निके बलाबलके अनुसार लेकर मन्दोष्ण जलके साथ सेवन करे। इसके सेवनसे परिणामशूल तत्काल शमन होता है ॥ ५६ ॥ ५७॥

शङ्खरसगुडिका।

पलानि चिञ्चाक्षारस्य पञ्च पञ्च पलानि च।
लवणानां क्षिपेत्प्रस्थद्वयं जम्बीरवारिणः ॥ ५८ ॥
शङ्खस्य द्वादशपलं भस्मीभूतं क्षिपेत्पुनः।
पूर्वत्रयेण सम्मर्द्य हिङ्गुव्योषचतुःपलम् ॥ ५९ ॥
रसामृतसुगन्धानां पलार्द्धं च पृथक् पृथक्।
दद्यात्समस्तं सम्मर्द्य जम्बीराम्ले दिनत्रयम् ॥ ६० ॥

बदरास्थिप्रमाणेन गुटिकां कारयेद्भिषक् ।
भक्षयेत्प्रातरुत्थाय तोयमुष्णं पिबेदनु ॥ ६१ ॥
शूलं च सर्वगुल्मं च अजीर्णं परिणामजम् ।
अन्त्रशूलं पङ्क्तिशूलं हृच्छूलं च विशेषतः ॥ ६२ ॥
कुक्षिशूलं पार्श्वशूलं पृथग्वातादिसम्भवम् ।
आमशूलमुदावर्त्तं नाशयेन्नात्र संशयः ॥ ६३ ॥

इमलीका क्षार ९ पल, पाँचों नमक प्रत्येक पांच पांच पल, जम्बीरी नींबूका रस दो प्रस्थ सबको एकत्र मर्दन करके, मन्दमन्द अग्निद्वारा पकावे । फिर शंखकी भस्म १२ पल एवं हींग, सोंठ, मिरच, पीपल ये प्रत्येक चार चार तोले, शुद्ध पारा शुद्ध मीठा तेलिया और शुद्ध गन्धक ये प्रत्येक दो दो तोले लेकर सबको एकत्र मिश्रित करके जम्बीरीनींबूके रसमें तीन दिनतक खरल करके बेरका गुठलीकी बराबर गोलियाँ बनालेवे । इस औषधको प्रतिदिन प्रातःकाल सेवन करके ऊपरसे गरम जल पान करनेसे सर्व प्रकारके शूल, गुल्म, अजीर्णशूल, परिणामशूल, अन्त्र-शूल, पंक्तिशूल, हृदयशूल, विशेषकर कुक्षिशूल, पार्श्वशूल एवं वात, पित्त, कफ इन तीनों दोषोंसे पृथक् पृथक् उत्पन्नहुए शूल, आमशूल और उदावर्त्त ये सब रोग निस्सन्देह नाश होते हैं ॥ ५८-६३ ॥

शूलहरणयोग ।

हरीतकी त्रिकटुकं कुचिला हिङ्गु सैन्धवम् ।
गन्धकं च समं सर्वं वटीं कुर्यात्सुखावहाम् ॥ ६४ ॥
लघुकोलप्रमाणां तु शस्यते प्रातरेव हि ।
एकैका वटिका ग्राह्या गुल्मशूलविनाशिनी ॥ ६५ ॥
ग्रहण्यामतिसारे च साजीर्णे मन्दपावके ।
योजयेदुष्णपयसा सुखमाप्नोति निश्चितम् ॥
सुवर्णं च भवेद्देहं सदोत्साहयुतं नृणाम् ॥ ६६ ॥

हरड, सोंठ, मिरच, पीपल, कुचला, हींग, सैंधानमक, और शुद्ध गन्धक सबको समान भाग लेकर एकत्र उत्तम प्रकारसे खरल करके छोटे बेरकी बराबर गोलियाँ बनालेवे । इनमेंसे प्रतिदिन प्रातःकाल एक एक गोली उष्ण जलके साथ सेवन करे । यह औषध गुल्म और शूलरोगनाशक है । इसको संग्रहणी, अतिसार, अजीर्ण, मन्दाग्नि आदि रोगोंमें प्रयोग करनेसे अवश्य आरोग्य लाभ होता है । इसके सेवन करनेसे

मनुष्योंका शरीर उत्साही और सुवर्णकी समान कान्तिमान् होता है ॥६४-६६॥

शूलगजकेसरी।

शुद्धसूतं द्विधा गन्धं यामैकं मर्दयेद्दृढ।
द्वयोस्तुल्यं शुद्धताम्रं सम्पुटे तं निरोधयेत् ॥
ऊर्द्धाधो लवणं दत्त्वा मृद्भाण्डे स्थापयेद् बुधः ॥६७॥
रुद्ध्वा गजपुटं दत्त्वा स्वाङ्गशीतं समुद्धरेत्।
सम्पुटं चूर्णयेच्छ्लक्ष्णं पर्णखण्डे द्विगुञ्जकम् ॥
भक्षयेत्सर्वशूलार्त्तो हिङ्गुशुण्ठीसजीरकम् ॥ ६८ ॥
वचामरिचजं चूर्णं कर्षमुष्णजलैः पिबेत्।
असाध्यं साधयेच्छूलं श्रीशूलगजकेसरी ॥ ६९ ॥

शुद्ध पारा १ भाग और शुद्ध गन्धक २ भाग इन दोनोंको एकत्रकर उत्तम प्रकारसे एक प्रहरतक खरल करे। फिर उसमें शुद्ध ताम्रभस्म ३ भाग मिलाकर ताँबेके एक मूषायन्त्रमें उसको भरदेवे। (मूषापर लेप करनेकी आवश्यकता नहीं है।) फिर एक मिट्टीकी हाँडीमें ८ तोले नमक डालकर उस हाँडीका मुख बन्द करके गजपुटमें पकावे। जब उत्तम प्रकारसे पककर स्वांगशीतल होजाय तब औषधि निकालकर उसका बारीक चूर्ण करलेवे। इस औषधको २ रत्ती प्रमाण लेकर पानमें रखकर सेवन करे। ऊपरसे हींग, सोंठ, जीरा, वच और कालीमिरच इन प्रत्येकके १ कर्ष चूर्णको उष्ण जलके साथ पान करे। यह श्रीशूलगजकेसरीरस सर्व प्रकारके शूलरोग एवं असाध्य शूलको नष्ट करता है ॥ ॥

शूलवज्रिणीवटी।

रसगन्धकलौहानां पलार्द्धेन समन्वितम्।
टङ्कणं रामठं शुण्ठी त्रिकटु त्रिफला शठी ॥ ७० ॥
त्वगेला पत्रतालीशंजातीफलल वङ्गकम्।
यमानी जीरकं धान्यं प्रत्येकं तोलकं शुभम् ॥
माषैका वटिका कार्या छागीदुग्धेन पेषिता ॥ ७१ ॥

शुद्ध पारा, शुद्ध गन्धक और लोहभस्म ये प्रत्येक दो दो तोले एवं सुहागा, हींग, सोंठ, त्रिकुटा, त्रिफला, कचूर, दारचीनी, इलायची, पत्रज, तालीसपत्र,

जायफल, लौंग, अजवायन, जीरा और धनियाँ इन प्रत्येकको एक एक तोला लेकर चूर्ण करलेवे । फिर सबको एकत्र बकरीके दूधमें अच्छे प्रकारसे खरल करके एक एक माशेकी गोलियाँ बनालेवे ॥ ७० ॥ ७१ ॥

गणेशं योगिनीं शम्भुं हरिं सूर्यं प्रपूज्य च ।
शीततोयानुपानेन च्छागीदुग्धेन वा पुनः ॥ ७२ ॥
एकैका भक्षिता चेयं वटिका शूलवज्रिणी ।
शूलमष्टविधं हन्ति प्लीहगुल्मोदरज्वरम् ॥ ७३ ॥
अष्ठीलानाहमेहांश्च मन्दाग्नित्वमरोचकम् ।
अम्लपित्तामवातांश्च कामलां पाण्डुरोगकम् ॥ ७४ ॥
गुरुणा चन्द्रनाथेन वटिकैषा प्रकीर्तिता ।
संसारलोकरक्षार्थं विचिन्त्य परिनिर्मिता ॥ ७५ ॥

फिर प्रतिदिन प्रातःकाल गणेश, योगिनी, शिवजी, विष्णु और सूर्य इन देवताओंका पूजन करके इस शूलवज्रिणीवटीरसकी एक एक गोली शीतल जल या बकरीके दूधके साथ सेवन करे । यह वटी आठों प्रकारके शूल, प्लीहा, गुल्म, उदररोग, ज्वर, अष्ठीलावात, अफरा, प्रमेह, मन्दाग्नि, अरुचि, अम्लपित्त, कामला, पाण्डु आदि समस्त व्याधियोंको नष्ट करती है । श्रीगुरुचन्द्रनाथजीने सांसारिक जीवोंकी रक्षाके लिये विशेषरूपसे विवेचना कर इस वटीको निर्माण किया है ॥ ७२–७५ ॥

शूलान्तकरस ।

त्र्यूषणं त्रिफला मुस्तं त्रिवृता चित्रकं तथा ।
एकैकशः समो भागस्तदर्द्धं रसगन्धयोः ॥
लौहाभ्रकविडङ्गानां भागस्तद्द्विगुणो भवेत् ॥ ७६ ॥
एतत्सर्वं समादाय चूर्णयित्वा विचक्षणः ।
त्रिफलायाः कषायेण गुडिकाः कारयेद्भिषक् ॥
तदेकां भक्षयेत्प्रातर्भक्तवारि पिबेदनु ॥ ७७ ॥
हन्ति परिणामोत्थमम्लपित्तं वमिं तथा ।
अन्नद्रवभवं शूलं सन्निपातसमुद्भवम् ॥
सर्वशूलं निहन्त्याशु शुष्कं दार्वनलो यथा ॥ ७८ ॥

सोंठ, मिरच, पीपल, हरड, बहेडा, आमला, नागरमोथा, निसोत और चीता ये प्रत्येक एक एक तोला, शुद्ध पारा और शुद्ध गन्धक छः छः माशे, लोहभस्म, अभ्रकभस्म और वायविडङ्ग ये प्रत्येक दो दो तोले लेवे। इन सबको एकत्र बारीक चूर्ण करके त्रिफलेके क्वाथमें खरल कर चारचार रत्तीकी गोलियाँ बनालेवे। इनमेंसे प्रतिदिन प्रातःकाल एकएक गोली सेवन करके ऊपरसे कॉंजी पान करे। यह शूलान्तकरस परिणामशूल, अम्लपित्त, वमन, अन्नद्रवजन्य शूल, सन्निपातजन्य शूल और अन्य सर्वप्रकारके शूलरोगोंको इस प्रकार नष्ट करता है जैसे सूखे काष्ठको अग्नि तत्काल भस्म करदेता है ॥ ७६-७८ ॥

त्रिगुणाख्यरस।

टङ्कणं हारिणं शृङ्गं स्वर्णं गन्धं मृतं रसम्।
दिनैकमार्द्रकद्रावैर्मर्द्यं रुद्ध्वा पुटे पचेत् ॥ ७९ ॥
त्रिगुणाख्यो रसो ह्यस्य माषैकं मधुसर्पिषा।
सैन्धवं जीरकं हिङ्गु मध्वाज्याभ्यां लिहेदनु ॥
पंक्तिशूलहरः ख्यातो याममात्रान्न संशयः ॥ ८० ॥

सुहागा, हिरनके सींगकी भस्म, स्वर्णभस्म, शुद्ध गन्धक और पारेकी भस्म इन सबको समान भाग लेकर अदरखके रसमें एक दिनतक खरल करके सम्पुटमें रखकर गजपुटमें पकावे। जब स्वाङ्गशीतल होजाय तब औषधि निकालकर चूर्ण करलेवे। इस त्रिगुणाख्यरसको प्रतिदिन प्रातःकाल एकएक मासेकी मात्रासे घृत और शहदमें मिलाकर सेवन करे और ऊपरसे सैंधानमक, जीरा, हींग इनके समान भाग चूर्णको घृत और शहदके साथ मिलाकर सेवन करे। यह रस एक प्रहरमेंही परिणामशूलको निश्चय नष्ट करदेता है ॥ ७९ ॥ ८० ॥

श्रीविद्याधराभ्र।

विडङ्गमुस्तत्रिफलागुडूचीदन्तीत्रिवृद्धह्निकटुत्रिकं च।
प्रत्येकमेषां पिचुभागचूर्णं पलानि चत्वार्ययसो मलस्य ॥ ८१ ॥
गोमूत्रशुद्धस्य पुरातनस्य यद्वाऽयसो वापि शिवाटिकायाः।
कृष्णाभ्रकाच्चूर्णपलं विशुद्धं निश्चन्द्रकं श्लक्ष्णमतीव सूतात् ८२
पादोनकर्षं स्वरसेन खल्ले शिलातलेऽगस्त्यमुनेर्दलस्य।
संमर्द्य यत्नादतिशुद्धगन्धपाषाणचूर्णेन पिचून्मितेन ॥ ८२ ॥
युक्त्या ततः पूर्वरजांसि दत्त्वा सर्पिर्मधुभ्यामवमर्द्य पश्चात्।
संस्थापयेत्स्निग्धविशुद्धभाण्डे-

वायविडङ्ग, नागरमोथा, त्रिफला, गिलोय, दन्ती, निसोत, चीता और त्रिकुटा इन औषधियोंका चूर्ण दो दो तोले, गोमूत्रमें भावना देकर शुद्ध कियेहुए पुराने मण्डूरकी भस्म या लोहभस्म अथवा लोहेके पत्थरकी भस्म १६ तोले, शुद्ध काली अभ्रककी भस्म ४ तोले, अगस्तियाके स्वरसके साथ पत्थरके खरलमें उत्तम प्रकारसे शुद्ध किया हुआ पारा १ तोला और शुद्ध गन्धकका चूर्ण दो तोले इन सबको लोहेके पात्रमें एकत्रित करके घृत और मधुके साथ लोहेके दण्डेके द्वारा खरल कर स्निग्ध और स्वच्छ पात्रमें भरकर रखदेवे ॥ ८१-८३ ॥—

ततः प्रयोज्यौ तु रसायनस्य ॥ ८४ ॥
प्राङ्माषको द्वावथवा त्रयो वा गवां पयो वा शिशिरं जलं वा।
पिबेदयं योगवरः प्रभूतकालप्रनष्टानलदीपकश्च ॥ ८५ ॥
रोगं निहन्यात्परिणामशूलं शूलं तथाऽन्नद्रवसंज्ञकं च।
यक्ष्माम्लपित्तं ग्रहणीं प्रदुष्टां जीर्णज्वरं लोहितपित्तमुग्रम् ८६
न संति ते यान्न निहंति रोगान् योगोत्तमःसम्यगुपास्यमानः८७

इसमेंसे प्रतिदिन प्रातःकाल दो मासे अथवा तीन मासे परिमाण लेकर सेवन करे और गोदुग्ध या शीतल जलका अनुपान करे। यह प्रयोग चिरकालसे मन्द हुई अग्निको अत्यन्त दीपन करता है एवं परिणामशूल, अन्नद्रवशूल, राजयक्ष्मा, अम्लपित्त, दुस्तर संग्रहणी, जीर्णज्वर और अत्युग्र रक्तपित्त इन सब रोगोंको नष्ट करता है। यथाविधि सेवन किया हुआ यह प्रयोग जिनको दूर न करता हो ऐसा कोई रोग नहीं है ॥ ८४-८७ ॥

बृहद्विद्याधरःभ्र।

शुद्धसूतं तथा गन्धं फलत्रयकटुत्रयम्।
विडङ्गं मुस्तकं चैव त्रिवृतादन्तिचित्रकम् ॥ ८८ ॥
आखुपर्णी ग्रन्थिकं च प्रत्येकं कर्षसम्मितम्।
पलं कृष्णाभ्रचूर्णस्य मृतायश्च चतुर्गुणम् ॥ ८९ ॥
घृतेन मधुना पिष्ट्वा वटिकां कोलसम्मिताम्।
एकैकां वटिकां खादेत्प्रातरुत्थाय नित्यशः ॥
अनुपानं गवां क्षीरं नीरं वा नारिकेलजम् ॥ ९० ॥

शुद्ध पारा और शुद्ध गन्धक, त्रिफला, त्रिकुटा, वायविडङ्ग, नागरमोथा, निसोत, दन्ती, चीता, मूसाकानी और पीपलामूल ये प्रत्येक दो दो तोले, काली अभ्रककी

भस्म ४ तोले और लोहेकी भस्म १६ तोले इन सबको एकत्र कूट पीसकर घृत और शहदके साथ खरल करके एक एक तोलेकी गोलियाँ बनालेवे। फिर प्रतिदिन प्रातःकाल एक एक गोली सेवन कर ऊपरसे गौका दूध अथवा नारियलका जल पान करे ॥ ८८-९० ॥

सर्वशूलं निहन्त्याशु वातपित्तभवं तथा।
एकजं द्वन्द्वजं चैव तथैव सान्निपातिकम् ॥ ९१ ॥
परिणामोद्भवं शूलमामवातोद्भवं तथा।
कार्श्यं वैवर्ण्यमालस्यं तन्द्रारुचिविनाशनम् ॥
साध्यासाध्यं निहन्त्याशु भास्करस्तिमिरं यथा ॥ ९२ ॥

यह बृहद्विद्याधराभ्ररस सर्व प्रकारके शूल, वातपित्तजन्य शूल, एकदोषज, द्विदोषज व त्रिदोषज शूल, परिणामशूल, आमवातजात शूल, कृशता, विवर्णता, आलस्य, तन्द्रा, अरुचि और अन्य साध्य व असाध्य सभी व्याधियोंको इस प्रकार शीघ्र नष्ट करता है जैसे सूर्य अन्धकारको तत्काल नाश करदेता है ॥ ९१ ॥ ९२ ॥

त्रिफलालौह।

तीक्ष्णायश्चूर्णसंयुक्तं त्रिफलाचूर्णमुत्तमम्।
क्षीरेण पाययेद्धीमान् सद्यः शूलनिवारणम् ॥ ९३ ॥

हरड, बहेडा और आमला इनका समान भाग मिश्रित बारीक पिसा हुआ चूर्ण १ भाग और लोहभस्म २ भाग लेकर एकत्र खरल करलेवे। इस चूर्णको २-२ रत्तीकी मात्रासे दुग्धके साथ सेवन करानेसे शूलरोग तत्काल शमन होय ॥

शर्करा‌द्यलौह।

त्रिफलायास्तथा धात्र्याश्चूर्णं वा काललौहजम्।
शर्कराचूर्णसंयुक्तं सर्वशूलेषु योजयेत् ॥ ९४ ॥

त्रिफला और आमले इनके समान भाग मिश्रित चूर्णकी बराबर लोहभस्म और सबकी बराबर शुद्ध खाँड मिलाकर इसको सर्व प्रकारके शूलरोगोंमें प्रयोग करना उपयोगी है ॥ ९४ ॥

सप्तामृतलौह।

मधुकं त्रिफलाचूर्णमयोरजःसमं लिहन्।
मधुसर्पिर्युतं सम्यग्गव्यं क्षीरं पिबेदनु ॥ ९५ ॥
छर्दिं सतिमिरं शूलमम्लपित्तं ज्वरं क्लमम्।
आनाहं मूत्रसङ्गं च शोथं चैव निहन्ति तत् ॥ ९६ ॥

मुलहठी, हरड, बहेडा और आमला इन प्रत्येकका चूर्ण एक एक तोला और लोहभस्म ४ तोले इन सबको एकत्र खरल करके तीन तीन रत्तीकी मात्रासे घृत और मधुके साथ मिलाकर सेवन करे और पीछेसे गोदुग्ध पान करे तो वमन, तिमिररोग, शूल, अम्लपित्त, ज्वर, क्लम, आनाह, मूत्रकृच्छ्र और शोथ आदि रोग नष्ट होते हैं ॥ ९५ ॥ ९६ ॥

शूलराजलोह।

कर्षैकं कान्तलोहस्य शुद्धमभ्रं पलं तथा।
सितायाश्च पलं चैकं मधु सर्पिस्तथैव च ॥ ९७ ॥
सर्वमेकीकृतं पात्रे लोहदण्डेन मर्दयेत्।
त्रिकटु त्रिफला मुस्तं विडङ्गं चव्यचित्रकम् ॥ ९८ ॥
प्रत्येकं तोलकं मानं चूर्णितं तत्र दापयेत्।
भक्षयेत्प्रातरुत्थाय शिशिराम्ब्वनुपानतः ॥ ९९ ॥

कान्तलोह २ तोले, शुद्ध अभ्रक ४ तोले, मिश्री ४ तोले, शहद ४ तोले और घृत ४ तोले इन सबको लोहेके पात्रमें एकत्रित करके लोहेकी मुसलीसे खरल करे। पश्चात् उसमें त्रिकुटा, त्रिफला, नागरमोथा, वायविडङ्ग, चव्य और चीता इन प्रत्येकके चूर्णको एक एक तोला मिलाकर उत्तम प्रकारसे खरल करे। इस औषधको प्रतिदिन प्रातःकाल चार चार रत्ती प्रमाण लेकर शीतल जलके अनुपानके साथ सेवन करे ॥ ९७–९९ ॥

सर्वदोषभवं शूलं कुक्षिशूलं च यद्भवेत्।
हृच्छूलं पार्श्वशूलं च अम्लपित्तं च नाशयेत् ॥ १०० ॥
अर्शांसि ग्रहणीदोषं प्रमेहांश्च विषूचिकाम्।
शूलराजमिदं लोहं हरेण परिनिर्मितम् ॥ १ ॥

यह औषध सर्व प्रकारके दोषोंसे उत्पन्न हुआ शूल, कुक्षिगत शूल, हृदयशूल, पार्श्वशूल, अम्लपित्त, अर्श, संग्रहणी, प्रमेह, विषूचिका आदि रोगोंको नष्ट करती है। इस शूलराजलोहको महादेवजीने निर्माण किया है ॥ १०० ॥ १०१ ॥

वैश्वानरलोह।

द्विदलं तिन्तिडीक्षारं तथाऽपामार्गसम्भवम्।
शम्बूकभस्मसंयुक्तं लवणं च समं तथा ॥
चतुर्णां समभागाः स्युस्तुल्यं च लोहचूर्णकम् ॥ २ ॥

चूर्णं संपिष्य खल्लादौ कारयेदेकतां भिषक् ।
शूलस्यागमवेलायां खादेन्माषद्वयं नरः ॥
शूलमष्टविधं हन्ति साध्यासाध्यं न संशयः ॥ ३ ॥

इमलीका खार २ पल, चिरचिटेका खार २ पल, घोंघेकी भस्म २ पल, सेंधा-नमक २ पल और लोहेकी भस्म ८ पल इन सबको खरलमें एकत्र करके उत्तम प्रकारसे मर्दन करे । फिर इस औषधको शूलकी पीडा होनेके समय दो मासे परिमाण सेवन कर ऊपरसे शीतल जल पान करे । इसके सेवनसे साध्य व असाध्य आठों प्रकारके शूलरोग निस्सन्देह नष्ट होते हैं ॥ १०२ ॥ १०३ ॥

चतुःसमलोह ।

अभ्रं गन्धं रसं लोहं प्रत्येकं संस्कृतं पलम् ।
सर्वमेतत्समाहृत्य यत्नतः कुशलो भिषक् ॥ ४ ॥
आज्ये पलद्वादशके दुग्धे वत्सरसंख्यके ।
पक्त्वा क्षिपेत्तत्र चूर्णं सुपूतं घनवाससा ॥ ५ ॥
विडङ्गत्रिफलावह्नित्रिकटूनां तथैव च ।
पिष्ट्वा पलोन्मितानेतांस्तथा संमिश्रितान्नयेत् ॥
तत्तु पिष्टं शुभे भाण्डे स्थापयेत्तु विचक्षणः ॥ ६ ॥

अभ्रक, शुद्ध गन्धक, शुद्ध पारा और लोहभस्म प्रत्येकको चार चार तोले लेकर १२ पल घृत और १२ पल दूधमें उत्तम प्रकारसे पकाकर मोटे कपडेमें छान लेवे । फिर उसमें वायविडङ्ग, त्रिफला, चीता, सोंठ, मिरच और पीपल इन औषधियोंके चार चार तोले सूक्ष्म चूर्णको वस्त्रमें छानकर मिलादेवे । फिर उसको चौके चिकने और उत्तम पात्रमें भरकर रखदेवे ॥ १०४—१०६ ॥

आत्मनः शोभने चाह्नि पूजयित्वा रविं गुरुम् ।
घृतेन मधुनाऽऽमर्द्य भक्षयेन्माषकावधि ॥ ७ ॥
क्रमेण वर्द्धयेत्तच्च समाहितमनाः सदा ।
अनुपानं च दुग्धेन नारिकेलोदकेन वा ॥ ८ ॥
जीर्णेऽस्मिन् हितशाल्यन्नक्षुद्रमांसरसादिभिः ।
रसायनाविरुद्धानि चान्यान्यपि च कारयेत् ॥ ९ ॥

इस औषधिको शुभ मुहूर्त्तमें अपने गुरु और सूर्यभगवान्का पूजन करके प्रतिदिन प्रातःकाल एक एक माशा परिमाण लेकर घृत और मधुके साथ

मिश्रित करके सेवन करे। फिर क्रमसे इसकी मात्रा बढाता जाय। एवं दूध अथवा नारियलके जलका अनुपान करे। इस औषधिके जीर्ण होजानेपर पुराने शालिधानोंके चावल, मूंग और मांसरसादि पदार्थ सेवन करने हितकारी हैं। एवं रासायनिक और अन्य सर्व प्रकारके स्वभावानुकूल पदार्थोंको सेवन करना चाहिये ॥ १०७-१०९ ॥

हृच्छूलं पार्श्वशूलं चाप्यामवातं कटिग्रहम् ।
गुल्मशूलं नाभिशूलं यकृत्प्लीहानमेव च ॥ ११० ॥
अग्निमान्द्यं क्षयं कुष्ठं कासं श्वासं विचर्चिकाम् ।
अश्मरीं मूत्रकृच्छ्रं च योगेनानेन साधयेत् ॥ ११ ॥

इस औषधिके सेवनसे हृदयशूल, पार्श्वशूल, आमवात, कटीग्रह, गुल्मशूल, नाभिशूल, यकृतविकार, प्लीहा, मन्दाग्नि, क्षय, कुष्ठ, खाँसी, श्वास, विचर्चिका, पथरी, मूत्रकृच्छ्र आदि समस्त रोग दूर होते हैं ॥ ११० ॥ १११ ॥

धात्रीलौह ।

धात्रीचूर्णस्याष्टौ पलानि चत्वारि लौहचूर्णस्य ।
यष्टीमधुकरजश्च द्विपलं दद्यात्खल्वे घृष्टम् ॥ १२ ॥
अमृताक्वाथेनैतच्चूर्णं भाव्यं च सप्ताहम् ।
चण्डातपेषु शुष्कं भूयः पिष्ट्वा नवे घटे स्थाप्यम् ॥ १३ ॥
घृतमधुना सह युक्तं भक्तादौ मध्यतोऽन्ते च ।
त्रीनपि वारान्खादेत् पथ्यं दोषानुबन्धेन ॥ १४ ॥
भक्तस्यादौ हरते रोगान् पित्तानिलोद्भूतान् ।
मध्येऽन्नं विष्टब्ध जयति नृणां दह्यते नान्नम् ॥ १५ ॥
पानान्नकृतान् दोषान् भुक्तान्ते शीलितो जयति ।
एवं जीर्यति चान्ने शूलं नृणां सुकष्टमपि ॥ १६ ॥
हरति सहसा प्रयुक्तो योगश्चायं जरत्पित्तम् ।
चक्षुष्यं पलितघ्नं कफपित्तसमुद्भवाञ्जयेद्रोगान् ॥ १७ ॥

आमलोंका चूर्ण ८ पल, लोहचूर्ण ४ पल और मुलहठीका चूर्ण २ पल इन सबको खरलमें एकत्र कर आमलोंके क्वाथके साथ सात दिनतक ७ बार भावना

देवे। फिर प्रचण्ड धूपमें सुखाकर और बारीक चूर्ण करके इस औषधको नवीन पात्रमें भरकर रखदेवे। उसमेंसे प्रतिदिन एक एक मासे परिमाण लेकर घृत और शहदके साथ मिलाकर भोजनके पहले, मध्यमें और अन्तमें इस प्रकार तीन बार सेवन करे और यथादोषानुसार पथ्य करे। यह लोह भोजनकी आदिमें खानेसे वात-पित्त-जन्य रोगोंको, मध्यमें खानेसे अन्नविष्टम्भ (अन्नके न पचनेसे उत्पन्न हुआ अफारा) और अन्नकी दाहको एवं अन्तमें सेवन करनेसे अन्न-पानसे उत्पन्न हुए विकार और अन्नके जीर्ण होजानेपर उत्पन्न हुए प्रबल शूलको शीघ्र नष्ट करता है। युक्ति-पूर्वक सेवन करनेसे जरत्पित्तरोगको दूर करता है एवं नेत्रोंको हितकारी, पलित और कफ-पित्तजन्यरोगनाशक है॥ १२-१७॥

बृहद्धात्रीलौह।

षट्पलं शुद्धमण्डूरं यवस्य कुडवं तथा।
पाकाय नीरप्रस्थार्द्धं दद्यात्पादावशेषितम्॥ १८॥
शतमुलीरसस्याष्टावामलक्या रसस्तथा।
तथा दधिपयोभूमिकुष्माण्डस्य चतुःपलम्॥ १९॥
चतुःपलं सर्पिरिक्षुरसं दद्याद्विचक्षणः।
प्रक्षिपेज्जीरधान्याकं त्रिजातं करिपिप्पली॥ १२०॥
मुस्तं हरीतकी चैव लौहमभ्रं कटुत्रिकम्।
रेणुकं त्रिफला चैव तालीशं नागकेशरम्॥
एतेषां कार्षिकैर्भागैश्चूर्णयित्वा विनिक्षिपेत्॥ २१॥

कुटे हुए जौको १६ तोले लेकर ३२ तोले जलमें पकावे। जब पकते पकते चौथाई भाग जल शेष रहजाय तब उतारकर छानलेवे। फिर शतावरका रस, आमलोंका रस, दही, दूध ये प्रत्येक आठ आठ पल एवं विदारीकन्दका रस, घृत और ईखका रस ये प्रत्येक चार चार पल और गोमूत्रद्वारा शुद्ध किया हुआ मण्डूर २४ तोले इन सबको एकत्र मिलाकर उत्तम प्रकारसे पकावे। जब पाक अच्छे प्रकारसे पककर सिद्ध होजाय तब नीचे उतारकर उसमें जीरा, धनियाँ, दारचीनी, इलायची, तेजपात, गजपीपल, नागरमोथा, हरड, लोहा, अभ्रक, त्रिकुटा, रेणुका, त्रिफला, तालीसपत्र और नागकेशर इन औषधियोंको दो दो तोले लेकर बारीक चूर्ण करके मिलादेवे॥ १८-१२१॥

भोजनाद्यवसानेच मध्ये चैव समाहितः।
तोलेकं भक्षयेच्चानु पेयं नित्यं पयस्तथा॥ २२॥

शूलमष्टविधं हन्ति साध्यासाध्यमथापि वा ।
वातिकं पैत्तिकं चापि श्लैष्मिकं सान्निपातिकम् ॥ २३ ॥
परिणामभवं शूलमन्नद्रवभवं तथा ।
द्वन्द्वजानपि शूलांश्च अम्लपित्तं सुदारुणम् ॥ २४ ॥
सर्वशूलहरं श्रेष्ठं धात्रीलौहमिदं शुभम् ॥ २५ ॥

इस औषधिको प्रतिदिन प्रातः मध्याह्न और सायंकालमें भोजन करनेसे पहले एक एक तोला परिमाण सेवन करे और ऊपरसे दुग्धपान करे । यह बृहद्धात्रीलोह आठों प्रकारके साध्य व असाध्य शूलरोग एव वातज, पित्तज, श्लैष्मिक व त्रिदोषज शूल, परिणामशूल, अन्नद्रवशूल, द्वन्द्वज शूल और दारुण अम्लपित्त इन सब रोगोंको नष्ट करता है और सर्व शूलरोगको हरनेके लिये परमोत्कृष्ट औषध है ॥ २२–२५ ॥

क्षीरमण्डूर ।

लौहकिट्टपलान्यष्टौ गोमूत्रार्द्धाढके पचेत् ।
क्षीरप्रस्थेन तत्सिद्धं पंक्तिशूलहरं परम् ॥ २६ ॥

मण्डूरभस्मको ८ पल लेकर अर्द्ध आढक गोमूत्र और एक प्रस्थ गोदुग्धके साथ मिलाकर यथाविधि पकावे । इसको सेवन करनेसे पंक्तिशूल नष्ट हो ॥ २६ ॥

रसमण्डूर ।

कुडवं पथ्याचूर्णं द्विपलं गन्धाश्म लोहकिट्टं च ।
शुद्धस्य रसस्यार्द्धं भृङ्गस्य रसं च केशराजस्य ॥ २७ ॥
प्रस्थोन्मितं च दत्त्वा पात्रे लौहेऽथ दण्डसंघृष्टम् ।
शुष्कं मधुघृतयुक्तं मृदितं स्थाप्यं च भाजने स्निग्धे ॥ २८ ॥
उपयुक्तमेतदचिरान्निहन्ति रोगान् कफोद्भवानखिलान् ।
शूलं तथाऽम्लपित्तं संग्रहणीं कामलां चोग्राम् ॥ २९ ॥

हरडका चूर्ण १६ तोले, शुद्ध गन्धक ८ तोले, शुद्ध मण्डूर ८ तोले और शुद्ध पारा २ तोले इन सब औषधियोंको एकत्र बारीक चूर्णकर भाँगरेके और केशराजके एक एक प्रस्थ स्वरसके साथ लोहेके पात्रमें लोहेके दण्डद्वारा उत्तम प्रकारसे खरल करके धूपमें सुखालेवे और मिट्टीके चिकने बर्त्तनमें भरकर रखदेवे । फिर इसको प्रतिदिन दो दो रत्ती प्रमाण लेकर घृत और मधुके साथ मिलाकर सेवन करे । इसकी प्रतिदिन २ रत्तीसे लेकर ३ माशेतक मात्रा वृद्धि करे । यह प्रयोग कफजन्य समस्त रोग,

शूल, अम्लपित्त, संग्रहणी और प्रबल कामला रोगको बहुत जल्द नष्ट करता है ॥ २७–२९ ॥

कोलादिमण्डूर ।

कोलाग्रन्थिकशृङ्गवेरचपलाक्षारैः समं चूर्णितं
मण्डूरं सुरभीजलेऽष्टगुणिते पक्काऽथ सान्द्रीकृतम् ।
तत्खादेदशनादिमध्यविरतौ प्रायेण दुग्धान्नभुक्
जेतुं वातकफामयान् परिणतौ शूलान्यशूलानि च ॥ ३० ॥

चव्य, पीपलामूल, सोंठ, पीपल और जवाखार ये सब समान भाग और सबकी बराबर शुद्ध मण्डूर लेकर सबका एकत्र चूर्ण करके उसको अठगुने गोमूत्रमें पकावे। जब वह पकते २ अवलेहकी समान गाढा होजाय तब उतारलेवे । फिर इसको भोजन करनेसे पूर्व, मध्यमें और अन्तमें सेवन करनेसे और प्रायः दूध–भातका भोजन करनेसे यह मण्डूर वात–कफोत्पन्न रोग, परिणामशूल और अन्य सर्व प्रकारके शूलोंको नष्ट करता है ॥ १३० ॥

चतुःसममण्डूर ।

सद्यो लौहमलाज्यमाक्षिकसिताभागाः समा मानतः
पात्रे ताम्रमये दिनान्तमथितं संस्थापयेदातपे ।
पश्चात्तद्घनतां प्रणीय रजनीमेकां बहिः स्थापयेत्
पात्रे ताम्रमये निधेयमथवा पात्रे हविर्भाविते ॥ ३१ ॥
पश्चान्माषचतुष्टयं प्रतिदिनं जग्ध्वा जलं शीतलं
पेयं भोजनपूर्वमध्यविरतौ स्वच्छन्दभोज्यैर्नरैः ।
जेतुं शूलहुताशमांद्यकसनश्वासाम्लपित्तज्वरो-
न्मादापस्मृतिमेहसर्वजठराजीर्णादिसर्वा रुजः ॥ ३२ ॥

शुद्ध मण्डूर, घृत, शहद और मिश्री इनको एक एक पल लेकर ताँबेके पात्रमें रख लोहेके दण्डेसे एक दिनतक खरल करके १ दिनतक धूपमें सुखावे, फिर उसको गाढा करके एक रात्रितक ओसमें रक्खे। पश्चात् इस औषधिको ताँबेके अथवा घीसे चिकने मिट्टीके बर्तनमें भरकर रखदेवे । उसमेंसे प्रतिदिन चार मासे परिमाण खाकर ऊपरसे शीतल जल पान करे। इसको भोजनके पूर्व, मध्य और अन्तमें सेवन करना एवं इसके सेवन करनेपर, यथेच्छ भोजन करना चाहिये । इसके सेवनसे सर्वप्रकारके शूल,

मन्दाग्नि, खाँसी श्वास, अम्लपित्त, ज्वर, उन्माद, मृगी, समस्त प्रमेह, उदररोग और अजीर्णादि रोग दूर होते हैं ॥ ३१ ॥ ३२ ॥

भीमवटकमण्डूर ।

कोलाग्रन्थिकसहितैर्विश्वौषधमागधीयवक्षारैः ।
प्रस्थमयोमलरजसः पलिकांशैश्चूर्णितैर्मिश्रैः ॥ ३३ ॥
अष्टगुणमूत्रयुक्तं क्रमपाकात्पिण्डतां नयेत्सर्वम् ।
कोलप्रमाणवटिकास्तस्तो भोज्यादिमध्यविरतौ च ॥ ३४ ॥
शुद्ध पारा, शुद्ध गन्धक, शीशा, वङ्ग, मैनसिल, हल्दीके पत्ते, जवाखार, सज्जी, सुहागा, लोहभस्म, ताँबा, और अभ्रकभस्म इन सबको बराबर २ लेकर थूहरके दूधमें खरल करें। फिर चीता अडूसा और दन्ती इनमेंसे किसी एकके क्वाथमें एक दिनतक अच्छेप्रकार खरल करे। इस नागेश्वररसको प्रतिदिन एकएक माशा प्रमाण पानके रसके साथ भक्षण करे। इससे गुल्म, प्लीहा, पाण्डु, सूजन, अफारा आदि रोग दूर होते हैं ॥ ६४–६६ ॥

गुल्मकालानलरस।

पारदं गन्धकं तालं ताम्रकं टङ्कणं समम्।
तोलद्वयमितं भागं यवक्षारं च तत्समम् ॥ ६७ ॥
मुस्तकं पिप्पली शुण्ठी मरिचं गजपिप्पली।
हरीतकी वचा कुष्ठं तोलैकं चूर्णयेत्सुधीः ॥ ६८ ॥
सर्वमेकीकृतं पात्रे भावना क्रियते ततः।
पर्पटं मुस्तकं शुण्ठ्यपामार्गं पापचेलिकम् ॥ ६९ ॥
तद्गुणच्चूर्णयेत्पश्चात्सर्वगुल्मनिवारणम्।
गुञ्जाचतुष्टयं खादेद्धरीतक्यनुपानतः ॥ ७० ॥
वातिकं पैत्तिकं गुल्मं श्लैष्मिकं सान्निपातिकम्।
द्वन्द्वजं विनिहन्त्याशु वातगुल्मं विशेषतः ॥
श्रीमद्गहननाथेननिर्मितो विश्वसम्पदे ॥ ७१ ॥

पारा, गन्धक, हरताल, ताँबा, सुहागा और जवाखार ये प्रत्येक दो दो तोले, नागरमोथा, पीपल सोंठ, मिरच, गजपीपल, हरड, वच और कूठ ये प्रत्येक ओषधि एक एक तोला लेवे। इन सबको एकत्र कूट पीसकर पित्त-

पापडा, नागरमोथा, सोंठ, चिरचिटा और पाढ इनके काथमें भावना देवे। फिर धूपमें सुखाकर चूर्ण करलेवे। इन चूर्णको नित्यप्रति चार चार रत्ती, हरडके साथ सेवन करे। यह गुल्मकालानलरस वातिक, पैत्तिक, श्लैष्मिक, सन्निपातज, द्विदोषज और विशेषकर वातगुल्मको तत्काल नष्ट करतीहै। संसारकी भलाईके लिये श्रीमान् गहनानन्दनाथने इसको बनायाहै ॥६७–७१॥

बृहद्गुल्मकालानलरस।

अभ्रं लौहं रसं गन्धं टङ्कणं कटुकं वचाम्।
द्विक्षारं सैन्धवं कुष्ठं त्र्यूषणं सुरदारु च ॥ ७२ ॥
पत्रमेलां त्वचं नागं खादिरं सारमेव च।
गृहीत्वा समभागेन श्लक्ष्णचूर्णं प्रकल्पयेत् ॥ ७३ ॥
जयन्तीचित्रकोन्मत्तकेशराजदलं तथा।
निष्पीड्य स्वरसं दत्त्वा भावयेत्कुशलो भिषक् ॥ ७४ ॥
चतुर्गुञ्जाप्रमाणेन वटिका कारयेत्ततः।
उत्थाय भक्षयेत्प्रातरनुपानं जलं पयः ॥ ७५ ॥

अभ्रक, लोहा, पारा गन्धक, सुहागा, कुटकी, बच, जवाखार, सज्जी, सैंधानमक, कूठ, सोंठ, मिरच, पीपल, देवदारु, तेजपात, इलायची, दारचीनी, नागकेशर और खैरसार इनको समान भाग लेकर बारीक चूर्ण करलेवे। फिर जयन्ती (जैतीघास), चीता, धतूरा और भाङ्गरा इनके पत्तोंके रसमें क्रमशः खरल करके चार चार रत्तीकी गोलियाँ बनावे। प्रतिदिन प्रातःकाल उठकर इस रसकी एकएक गोली जल या दूधके साथ भक्षण करे ॥७२–७५॥

गुल्मं पञ्चविधं हन्ति यकृत्प्लीहोदराणि च।
कामलां पाण्डुरोगं च शोथं चैव सुदारुणम् ॥ ७६ ॥
हलीमकं रक्तपित्तं मन्दाग्निमरुचिं तथा।
ग्रहणीमार्द्रवं कार्श्यं जीर्णं च विषमज्वरम् ॥ ७७ ॥

यह पाँचों प्रकारके गुल्म, यकृत, तिल्ली, उदररोग, कामला, पाण्डुरोग, दारुण शोथ, हलीमक, रक्तपित्त, मन्दाग्नि, अरुचि, संग्रहणी, आर्द्रव, कृशता, जीर्णता और विषमज्वर इत्यादि रोगोंको दूर करता है ॥ ७६–७७ ॥

महागुल्मकालानलरस।

गन्धकं तालकं ताम्रं तथैव तीक्ष्णलौहकम्।
समांशं मर्दयेद्गाढं कन्यानीरेण यत्नतः ॥ ७८ ॥

संपुटं कारयेत्पश्चात सन्धिलेपं च कारयेत् ।
ततो गजपुटं दत्त्वा स्वाङ्गशीतं समुद्धरेत् ॥ ७९ ॥
द्विगुञ्जां भक्षयेद् गुल्मे शृङ्गवेरानुपानतः ।
सर्वगुल्मं निहन्त्याशु भास्करस्तिमिरं यथा ॥ ८० ॥

शुद्ध गन्धक, हरताल, ताम्रभस्म और तीक्ष्णलोह इनको सम भाग लेकर घीग्वारके रसमें विधिपूर्वक खरल करे। फिर इसको सम्पुटमें रख सन्धिस्थानोंको बन्द करके गजपुटमें पकावे। जब स्वांगशीतल होजाय तब निकालकर चूर्ण करलेवे। इसको प्रतिदिन दो दो रत्ती प्रमाण अदरखके रसके साथ खाय। जैसे सूर्य अन्धकारको हरताहै वैसेही यह रस सर्वप्रकारके गुल्मोंको अल्पकालमें ही नष्ट करता है ॥ ७८-८० ॥

गुल्मशार्दूलरस।

रसं गन्धं शुद्धलौहं गुग्गुलुः पिप्पलः पलम् ।
त्रिवृत्ता पिप्पली शुण्ठी शठी धान्यकजीरकम् ॥ ८१ ॥
प्रत्येकं पलिकं ग्राह्यं पलार्द्धं कानकं फलम् ।
सञ्चूर्ण्य वटिका कार्या घृतेन वल्लमानतः ॥
वटीद्वयं भक्षयेच्चार्द्रकोष्णाम्बु पिबेदनु ॥ ८२ ॥

शुद्ध पारा, गन्धक, लोहा, गुगल, पीपलके वृक्षकी छाल, निसोत, पीपल, सोंठ, कचूर, धनियाँ और जीरा ये प्रत्येक एक एक पल तथा जमालगोटे दो तोले लेवे। सबको एकत्र घृतमें खरल करके तीन तीन रत्तीकी गोलियाँ प्रस्तुत कर नित्यप्रति दो गोली अदरखके रसके साथ खाय और ऊपरसे गरमजल पीवे ॥

हन्ति प्लीहयकृद्गुल्मकामलोदरशोथकम् ।
वातिकं पैत्तिकं गुल्मं श्लैष्मिकं रौधिरं तथा ॥ ८३ ॥
गहनानन्दनाथोक्तो रसोऽयं गुल्मशार्दुलः ॥ ८४ ॥

इससे प्लीहा, यकृत्, गुल्म, कामला, पेटकी पीडा, सूजन, वातिक, पैत्तिक, श्लैष्मिक तथा रक्तजगुल्म नष्ट होते हैं। श्रीमान् गहनानन्दनाथ महाराजने इस गुल्मशार्दूलनामक रसको निर्मित किया है ॥ ८३-८४ ॥

सर्वेश्वररस।

ताम्रं दशगुणं स्वर्णात्स्वर्णपादं कटुत्रिकम् ।
त्रिकटु त्रिफला तुल्या त्रिफलार्द्धमयोरजः ॥ ८५ ॥

अयसोऽर्द्धं विषं चैव सर्वं सम्मर्द्य यत्नतः ।
सर्वेश्वरो रसो नाम गुल्मरौधिरनाशनः ॥ ८६ ॥

ताँबेकी भस्म १० तोले, सुवर्णभस्म एक तोला, त्रिकुटा २ मासे त्रिफला २ मासे, लोहभस्म डेढ मासा और विष पौन मासा लेवे । सबको एकत्र खरल कर गोलियाँ बनालेवे । प्रतिदिन दो रत्तीभर खाय । इससे स्त्रियोंका रक्तगुल्म शीघ्र नष्ट होता है ॥ ८५ ॥ ८६ ॥

गुल्मवज्रिणीवटिका ।

रसगन्धकताम्रं च कांस्यं टङ्कणतालकम् ।
प्रत्येकं पलिकं ग्राह्यं मर्दयेदतियत्नतः ॥ ८७ ॥
तद्यथाग्निबलं खादेद्रक्तगुल्मप्रशान्तये ।
निर्मिता नित्यनाथेन वटिका गुल्मवज्रिणी ॥
कामलापाण्डुरोगघ्नी ज्वरशूलविनाशिनी ॥ ८८ ॥

शुद्ध पारा, गन्धक, ताँबा, काँसा, सुहागा और हरताल ये प्रत्येक एकएक पल लेकर उत्तम रीतिसे खरल करे । फिर तीन तीन रत्तीकी गोलियाँ बनालेवे । अपनी अग्निका बलाबल विचारकर इन गोलियोंको सेवन करे । श्रीमान् नित्यनाथने इस गुल्मवज्रिणीवटीको बनाया है । यह कामला, पाण्डु, ज्वर और शूलरोगको नष्ट करनेवाली है ॥ ८७ ॥ ८८ ॥

रसायनामृतलोह ।

त्रिकटु त्रिफला मुस्तं विडङ्गं जीरकद्वयम् ।
यमानीद्वयभूनिम्बं त्रिवृद्दन्ती च निम्बकम् ॥ ८९ ॥
सर्वेषां कार्षिकं भागं सैन्धवं कर्षमभ्रकम् ।
खण्डस्य षोडशपलं प्रस्थं च त्रिफलाजलम् ॥ ९० ॥
जम्बीराणां रसं दद्यात्पलषोडशकं तथा ।
पाच्यं सर्वं प्रयत्नेन लोहं दत्त्वा पलद्वयम् ॥ ९१ ॥
सिद्धे पाके पुनर्देयं घृतं पलचतुष्टयम् ।
सर्वरोगेषु युञ्जीत महामृतरसायनम् ॥ ९२ ॥

त्रिफलेका काथ १ प्रस्थ, जम्बीरीनींबूका रस १६ पल और खाँड १६ पल इन सबको एकत्र मिलाकर पकावे । पकते पकते जब गाढा होजाय तब इसमें त्रिकुटा, त्रिफला, नागरमोथा, वायविडङ्ग, जीरा, कालाजीरा, अजवायन, अजमोद, चिरा-

घता, निसोत, दन्ती, नीमकी छाल, सैंधानमक और अभ्रकभस्म इन सब ओषधियोंको दो दो तोले कुटापिसा चूर्ण तथा लोहभस्म ८ तोले और घृत १६ तोले डालकर यथाविधि पकावे। इस रसायनामृत लोहको सब रोगमें प्रयोग करना चाहिये ॥ ८९-९२ ॥

गुल्मं पञ्चविधं हन्ति यकृत्प्लीहोदराणि च।
कामलां पाण्डुरोगं च शोथं जीर्णज्वरं तथा॥
रोगान्सर्वान्निहन्त्याशु भास्करस्तिमिरं यथा॥ ९३ ॥

सूर्यनारायण जैसे अन्धकारके समूहको नष्ट करते हैं वैसेही यह औषधि पाँच प्रकारके गुल्म, जिगर, तिल्ली, उदररोग, कमलवाय, पाण्डु, शोथ, जीर्ण ज्वर और अन्यान्य सर्व प्रकारके रोगोंको शीघ्र नाश करती है ॥ ९३ ॥

दन्तीहरीतकी।

जलद्रोणे विपक्तव्या विंशतिः पञ्च चाभया।
दन्त्याः पलानि तावन्ति चित्रकस्य तथैव च॥ ९४ ॥
तेनाष्टभागशेषेण पचेद्दन्तीसमं गुडम्।
ताश्चाभयास्त्रिवृच्चूर्णात्तैलाच्चापि चतुःपलम्॥ ९५ ॥
पलमेकं कणाशुण्ठ्योः सिद्धे लेहे च शीतलम्।
क्षौद्रं तैलसमं दद्याच्चातुर्जातपलं तथा॥ ९६ ॥

पोटलीमें बँधीहुई हरड २५ पल, दन्तीकी जड २५ पल और चीतेकी जड २५ पल लेवे। सबको एकत्र ३२ सेर जलमें पकावे। जब पकते पकते ४ सेर जल शेष रहजाय तब उतारकर छानलेवे और पोटलीमेंसे हरडोंको निकालकर गुठली निकाल डाले। तदनन्तर गुड २५ पल, काढेमेंसे निकालीहुई सब हरड निसोतका चूर्ण १६ तोले, तिलका तेल १६ तोले, पीपल और सोंठ चार चार तोले इन सबको पूर्वोक्त क्वाथमें डालकर अच्छे प्रकार पकावे। जब पककर अवलेहकी समान गाढा होजाय तब उतारले, शीतल होजानेपर उसमें शहद १६ तोले और चातुर्जातकका चूर्ण चार तोले मिलादेवे ॥ ९४-९६ ॥

ततो लेहपलं लीढ्वा जग्ध्वा चैकां हरीतकीम्।
सुखं विरिच्यते स्निग्धो दोषप्रस्थमनामयः॥ ९७ ॥
प्लीहश्वयथुगुल्मार्शोहृत्पाण्डुग्रहणीगदाः।
शाम्यन्त्युत्क्लेशविषमज्वरकुष्ठान्यरोचकाः॥ ९८ ॥

इसमेंसे प्रतिदिन चार तोले अवलेह और एक हरड सेवन करे तो इससे कोठा स्निग्ध होकर सुखपूर्वक दस्त होने लगते हैं तथा प्लीहा, सूजन, गुल्म, बवासीर, हृदयरोग, पाण्डु, संग्रहणी, वमन, विषमज्वर, कुष्ठ और अरुचि आदि रोग शमन होते हैं ॥ ९७ ॥ ९८ ॥

पञ्चपलकघृत ।

पिप्पल्याः पिचुरध्यर्द्धो दाडिमाद्द्विपलं पलम् ।
धान्यात्पञ्च घृताच्छुण्ठ्याः कर्षं क्षीरं चतुर्गुणम् ॥ ९९ ॥
सिद्धमेतद् घृतं सद्यो वातगुल्मं चिकित्सति ।
योनिशूलं शिरःशूलमर्शांसि विषमज्वरम् ॥ १०० ॥

पीपल ३ तोले, अनारके बीज ८ तोले, धनियाँ ४ तोले, घृत २० तोले, सोंठ २ तोले और दूध चौगुना लेवे । सबको एकत्रकर अच्छेप्रकार घृतको सिद्ध करे । यह घृत वातगुल्म, योनिशूल, शिरःशूल, अर्श और विषमज्वर इन रोगोंको शीघ्र दूर करता है ॥ ९९ ॥ १०० ॥

भल्लातकाद्यघृत ।

भल्लातकात्कल्ककषायपक्वं सर्पिः पिबेच्छर्करया विमिश्रम् ।
तद्रक्तगुल्मं विनिहन्ति पीतं बलासगुल्मं मधुना समेतम् ॥

भिलावोंके कल्क और क्वाथके द्वारा घृतको पकावे । जब पककर शीतल हो जाय तब मिश्री डालकर पान करे । इससे रक्तगुल्म तत्काल दूर होता है और शहदके साथ पान करनेसे कफजन्य गुल्मरोग नष्ट होता है ॥ १०१ ॥

त्रायमाणाद्यघृत ।

जले दशगुणे साध्यं त्रायमाणाचतुःपलम् ।
पञ्चभागस्थितं पूतं कल्कैः संयोज्य कार्षिकैः ॥ १०२ ॥
रोहिणीकटुकामुस्तत्रायमाणादुरालभाः ।
कल्कास्तामलकीवीराजीवन्तीचन्दनोत्पलैः ॥ १०३ ॥
रसस्यामलकानां च क्षीरस्य च घृतस्य च ।
पलानि पृथगष्टाष्टौ दत्त्वा सम्यग्विपाचयेत् ॥ १०४ ॥

१—" पलो लेह्यागते मानं न द्वैगुण्यमिहेष्यते ।
चत्वारिंशत्पलं तेन तोयं दशगुणं भवेत् ॥ "

पित्तगुल्मं रक्तगुल्मं विसर्पं पैत्तिकज्वरम् ।
हृद्रोगं कामलां कुष्ठं हन्यादेतद् घृतोत्तमम् ॥ १०५ ॥

त्रायमाणाको १६ तोले लेकर दसगुने जलमें पकावे । पकते पकते जब आधा जल बाकी रहजाय तब उतारकर छानलेवे । फिर इस क्वाथमें हरड, कुटकी, नागरमोथा, त्रायमाणा, धमासा, भुई आमला, क्षीरकाकोली, जीवन्ती, चन्दन और नीलकमल इन प्रत्येक औषधियोंका कल्क दो दो तोले एवं आमलोंका रस, दूध और घृत ये प्रत्येक आठ आठ पल डालकर अच्छे प्रकार पकावे । उत्तम प्रकारसे सिद्ध हुए इस घृतको सेवन करनेसे पित्तगुल्म, रक्तगुल्म विसर्प, पित्तका ज्वर, हृदयरोग, कामला, कुष्ठप्रभृतिरोग शीघ्र दमन होते हैं ॥ २-२०५ ॥

नाराचघृत ।

चित्रकं त्रिफला दन्ती त्रिवृता कण्टकारिका ।
स्नुहीक्षीरं विडङ्गानि घृतं दशमसुच्यते ॥ १०६ ॥
एकैकस्य च कर्षेण घृतस्य कुडवं पचेत् ।
अस्य मात्रां पिबेत्काले पलार्द्धेन च सम्मिताम् ।
उष्णोदकेन च प्रातर्विरेकार्थं पिबेन्नरः ॥ १०७ ॥

चीतेकी जड, त्रिफला, दन्ती, निसोत, कटेरी, थूहरका दूध और वायविडङ्ग इन औषधियोंको एकएक कर्ष लेकर कल्क बनावे । फिर इस कल्कके द्वारा १८ तोले घृतको दो सेर जलमें विधिपूर्वक पकावे । नित्यप्रति प्रातःकाल इस घृतको दो तोलेकी मात्रासे गरम जलके साथ दस्त होनेके लिये सेवन करे ॥ ६ ॥ ७ ॥

पिबेत्सर्पिर्यवागूं हि पेयां वा क्षीरसाधिताम् ।
रसेन जाङ्गलानां वा भोजयेन्मतिमान् भिषक् ॥१०८॥
वातगुल्ममुदावर्त्तं प्लीहार्शोब्रध्नकुण्डलम् ।
ग्रहणीं दीपयेन्मन्दां कोष्ठदोषांश्च नाशयेत् ॥ १०९ ॥
नाराचकमिदं सर्पिः ख्यातं नाराचसन्निभम् ॥ ११० ॥

इसपर घृतमिश्रित यवागू या दूधमें सिद्ध कीहुई पेया अथवा जांगलदेशके जीवोंके मांसरसके साथ भोजन करे । यह नाराचघृत वातगुल्म, उदावर्त्त, प्लीहा, अर्श, ब्रध्नकुण्डलरोग, संग्रहणी, मन्दाग्नि और कोठेके सम्पूर्ण दोषोंको नाराच (बाण) के समान तत्क्षण नाश करता है ॥ १०८-११० ॥

हवुषाद्यघृत ।

हवुषाव्योषपृथ्वीकाचव्यचित्रकसैन्धवैः ।
साजाजीपिप्पलीमूलदीप्यकैः पाचयेद् घृतम् ॥ ११ ॥
सकोलमूलकरसं सक्षीरदधिदाडिमम् ।
तत्परं वातगुल्मघ्नं शूलानाहविबन्धनुत् ॥ १२ ॥
योन्यर्शोग्रहणीदोषश्वासकासारुचिज्वरान् ।
पार्श्वहृद्वस्तिशूलं च घृतमेतदपोहति ॥ १३ ॥

घृत दो सेर, सूखेबेरोंका क्वाथ दो सेर, सूखीमूलीका क्वाथ दो सेर, दूध दो सेर, दही दो सेर और अनारका क्वाथ दो सेर एवं कल्कके लिये हाऊवेर, सोंठ, मिरच, पीपल, इलायची, चव्य, चीता, सैंधानोन, कालाजीरा, पीपलामूल और अजवायन इन औषधियोंका चूर्ण आधसेर लेवे । फिर सबको एकत्रकर भलीभाँति घृतको सिद्ध करे । इस घृतको गरम दूधके साथ पान करे । वातगुल्म, शूल, आनाह, विबन्ध, योनिरोग, बवासीर, संग्रहणी, श्वास, खाँसी, अरुचि, ज्वर, पार्श्व, हृदय और वस्ति इनके शूलको यह घृत नष्ट करता है ॥ १३ ॥

क्षीरषट्पलकघृत ।

पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः ।
पलिकैः सयवक्षारैः सर्पिःप्रस्थं विपाचयेत् ॥ १४ ॥
क्षीरप्रस्थेन तत्सर्पिर्हन्ति गुल्मं कफात्मकम् ।
ग्रहणीपाण्डुरोगघ्नं प्लीहकासज्वरापहम् ॥ १५ ॥

घी १ प्रस्थ, पीपल, पीपलामूल, चव्य, चीता, सोंठ और जवाखार इन औषधियोंका कल्क चार चार तोले और दूध १ प्रस्थ लेवे । सबको एकत्र मिलाकर विधिपूर्वक घृतको पकावे । इस घृतको नियमानुसार सेवन करनेसे कफजन्य गुल्म, संग्रहणी, पाण्डु, प्लीहा, खाँसी, ज्वरादि उपद्रव नष्ट होते हैं ॥ १४ ॥ १५ ॥

धात्रीषट्पलकघृत ।

धात्रीफलानां स्वरसैः षडङ्गं पाचयेद् घृतम् ।
शर्करासैन्धवोपेतं तद्धितं सर्वगुल्मिनाम् ॥ १६ ॥

घृत १ प्रस्थ, आमलोंका रस ४ सेर एवं पीपल, पीपलामूल, चव्य, चीता, सोंठ और जवाखार इनका कल्क चार चार तोले लेवे । सबको ४ सेर जलमें मिलाकर

यथाविधि घृतको सिद्ध करे। गुल्मरोगीको यह घृत शर्करा और सैंधानमक डालकर पान करनेसे विशेष उपकार करता है ॥ १६ ॥

द्राक्षाद्यघृत।

द्राक्षामधुकखर्जूरं विदारीं सशतावरीम्।
परूषकाणि त्रिफलां साधयेत्पलसम्मिताम् ॥ १७ ॥
जलाढके पादशेषे रसमामलकस्य च।
घृतमिक्षुरसं क्षीरमभयाकल्कपादिकम् ॥ १८ ॥
साधयेत्तु घृतं सिद्धं शर्कराक्षौद्रपादिकम्।
प्रयोगात्पित्तगुल्मघ्नं सर्वपित्तविकारनुत् ॥ १९ ॥
"साहचर्यादिह पृथक् घृतादेः क्वाथतुल्यता ॥"

दाख, महुआ, खजूर, विदारीकन्द, शतावर, फालसे और त्रिफला ये प्रत्येक चार चार तोले लेकर आठ सेर जलमें पकावे। जब पकते पकते दो सेर जल शेष रहजाय तब उतारकर छानलेवे। फिर इस क्वाथमें आमलोंका रस २ सेर, घृत २ सेर, ईखका रस २ सेर, दूध २ सेर और हरडका कल्क आधा सेर लेकर डालदेवे। सबोंको अच्छे प्रकार मिलाकर घृतको सिद्ध करे। जब सिद्ध होकर शीतल होजाय तब खाँड और शहद आध आध सेर मिलादेवे। इस घृतको सेवन करनेसे पित्तोत्पन्न गुल्म एवं अन्यान्य प्रकारके पित्तके सब विकार नाश होते हैं ॥ १७-१९ ॥

गुल्मरोगमें पथ्य।

स्नेहः स्वेदो विरेकश्च वस्तिर्बाहुशिराव्यधः।
लङ्घनं वर्त्तिरभ्यङ्गः स्नेहः पक्के तु पाटनम् ॥ १२० ॥
संवत्सरसमुत्पन्नाः कलाया रक्तशालयः।
खडः कुलत्थयूषश्च धन्वमांसरसं सुरा ॥ २१ ॥
गवामजायाश्च पयो मृद्वीका च परूषकम्।
खर्जूरं दाडिमं धात्री नागरङ्गाम्लवेतसम् ॥ २२ ॥
तक्रमेरण्डतैलं च लशुनं बालमुस्तकम्।
पत्तुरो वास्तुकं शिग्रु यवक्षारो हरीतकी ॥ २३ ॥
रामठं मातुलुङ्गं च त्र्यूषणं सुरभीजलम्।
यदन्नं स्निग्धमुष्णं च बृंहणं लघु दीपनम् ॥
वातानुलोमनं चैव पथ्यं गुल्मे नृणां भवेत् ॥ २४ ॥

स्नेह (घृत तैलादि) पान, स्वेददेना, विरेचन (जुलाब), पिचकारी लगाना, बाहोंकी अधःस्थ शिराको वेदना, लंघन, गुदामें बत्ती चढाना, तेलकी मालिश, स्निग्ध द्रव्योंका प्रयोग, पाटन (पकनेपर नस्तरसे चीरना), पुरानी मटर, शालिके चावल, खडयूष, कुलत्थीका यूष, धन्वदेशके जीवोंका मांसरस, मदिरा, गौका व बकरीका दूध, दाख, फालसे, खजूर, अनार, आमले, नारङ्गी, अमलवेत, मट्ठा, अण्डीका तेल, लहसन, कच्चीमूली, शान्तिशाक, बथुआ, सहिंजनेकी फली, जवाखार, हरड, हींग, बिजौरानींबू, सोंठ, मिरच, पीपल, गोमूत्र एवं स्निग्ध, गरम, पुष्टिकर, हलका, अग्निवर्द्धक और वायुको अनुलोमन करनेवाला भोजन ये सब पदार्थ गुल्मरोगीको हितकारी हैं ॥ १२०-१२५ ॥

गुल्मरोगमें अपथ्य ।

वातकारीणि सर्वाणि विरुद्धान्यशनानि च ।
वल्लूरं मूलकं मत्स्यान्मधुराणि फलानि च ॥ १२५ ॥
शुष्कशाकं शमीधान्यं विष्टम्भीनि गुरूणि च ।
अधोवातशकृन्मूत्रश्रमश्वासाश्रुधारणम् ॥
वमनं जलपानं च गुल्मरोगी परित्यजेत् ॥ १२६ ॥

गुल्मरोगी वायुवर्द्धक समस्त पदार्थ, विरुद्ध भोजन, सूखामांस मूली, मछली, मीठे फल, सूखे शाक, समेके चावल, विष्टम्भकारक, भारी पदार्थ तथा अपानवायु, मल, मूत्र, परिश्रम, श्वास और आँसू इनके वेगको रोकना, वमन और जलपान करना सबको त्याग देवे, क्योंकि ये सब गुल्मरोगमें अपथ्य हैं ॥ १२५-१२६ ॥

इति भैषज्यरत्नावल्यां गुल्मरोगचिकित्सा ।

हृद्रोगकी चिकित्सा ।

वातोपसृष्टे हृदये वामयेत्स्निग्धमातुरम् ।
द्विपञ्चमूलीक्वाथेन सस्नेहलवणेन च ॥ १ ॥

वातजन्य हृदयरोगमें-तैलादिके द्वारा स्निग्धशरीरवाले रोगीको दशमूलके क्वाथमें घृत, लवण और मैनफलका चूर्ण डालकर वमन करावे ॥ १ ॥

पिप्पल्येला वचा हिङ्गु यवक्षारोऽथ सैन्धवम्।
सौवर्चलमथो शुण्ठी अजमोदा च चूर्णितम् ॥ २ ॥
फलधान्याम्लकौलत्थदधिमद्यासवादिभिः।
पाययेच्छुद्धदेहं च स्नेहेनान्यतमेन वा ॥ ३ ॥

वमन विरेचनादिके द्वारा शुद्ध हुए रोगीको पीपल, इलायची, वच, हींग, जवाखार, सेंधानमक, कालानमक, सोंठ और अजमोद इन औषधियोंके समान भाग चूर्णको एकत्र करके बिजौरेनींबूके रस, काँजी, कुलथीके यूष, दही, मद्य, आसव या अन्य घृतादि स्निग्ध पदार्थोंके साथ मिश्रितकर पान करावे ॥

नागरं वा पिबेदुष्णं कषायं चाग्निवर्द्धनम्।
कासश्वासानिलहरं शूलहृद्रोगनाशनम् ॥ ४ ॥

सोंठके मन्दोष्ण क्वाथको पान करनेसे अग्नि बढती है तथा खाँसी, श्वास, वायुविकार, शूल और हृदयरोग दूर होता है ॥ ४ ॥

श्रीपर्णीमधुकक्षौद्रसितागुडजलैर्वमेत्।
पित्तोपसृष्टे हृदये सेवेत मधुरैः शृतम् ॥
घृतं कषायांश्चोद्दिष्टान् पित्तज्वरविनाशनान् ॥ ५ ॥

पित्तोत्पन्न हृदयरोगमें कुम्भेरके फल, मुलहठी इनके अर्द्धपक क्वाथमें शहद, मिश्री और गुड मिलाकर रोगीको पान कराकर वमन करावे। एवं मधुर पदार्थोंके साथ सिद्ध किया हुआ घी और पित्तज्वरनाशक क्वाथ सेवन करे ॥ ५ ॥

शीताः प्रदेहाः परिषेचनानि तथा विरेको हृदि पित्तदुष्टे।
द्राक्षासिताक्षौद्रपरूषकैः स्याच्छुद्धे च पित्तापहमन्नपानम् ॥
पिष्ट्वा पिबेद्वापि सिताजलेन यष्ट्याह्वयं तिक्तरोहिणीं च ॥ ६ ॥

पित्तज हृदयरोगमें चन्दनादि शीतल पदार्थोंका प्रलेप, शीतल जलका सेचन और विरेचनादि क्रिया करे। एवं वमन विरेचनादिसे शरीरकी शुद्धि हो जानेपर, दाख, मिश्री, शहद और फालसे इत्यादि द्रव्योंके साथ पित्तनाशक अन्न तथा पान सेवन करे। मुलहठी और कुटकीको जलमें पीसकर मिश्री डालकर पान करे तो पित्तका हृद्रोग दूर होता है ॥ ६ ॥

अर्जुनस्य त्वचा सिद्धं क्षीरं योज्यं हृदामये।
सितया पञ्चमूल्या वा बलया मधुकेन वा ॥ ७ ॥

अर्जुनवृक्षकी छाल २ तोले, दूध ८ तोले और जल ३२ तोले सबको एकत्र कर पकावे। जब ८ तोले जल शेष रहजाय तब शीतल होजानेपर उस दूधको मिश्री मिलाकर पीवे। इसी प्रकार पञ्चमूल, खिरेंटी या मुलहठीके काथसे सिद्ध किये हुए दूधको चीनी डालकर पीवे तो पित्तज हृदयरोग दूर होय ॥ ७ ॥

घृतेनदुग्धेन गुडाम्भसा वा पिबन्ति चूर्णं ककुभत्वचो ये।
हृद्रोगजीर्णज्वररक्तपित्तं हत्वा भवेयुश्चिरजीविनस्ते ॥ ८ ॥

जो हृदयरोगी घृत, दुग्ध अथवा गुडके शर्बतके साथ अर्जुनकी छालका चूर्ण सेवन करे तो वह हृदयरोग, जीर्णज्वर और रक्तपित्तरोगको नष्ट करके दीर्घजीवी होता है ॥ ८ ॥

वचानिम्बकषायाभ्यां वान्तं हृदि कफोत्थिते।
वातहृद्रोगनुच्चूर्णं पिप्पल्यादिं च पाययेत् ॥ ९ ॥

कफजन्य हृदयरोगमें वच और नीमकी छालका काथ पान कराकर वमन करावे। फिर वातजहृदयरोगको नष्ट करनेवाला पिप्पल्यादिगणका चूर्ण सेवन करे ॥ ९ ॥

त्रिदोषजे लंघनमादितः स्यादन्नं च सर्वेषु हितं विधेयम्।
हीनातिमध्यत्वमवेक्ष्य चैव कार्यं त्रयाणामपि कर्म शस्तम् ॥

त्रिदोषजहृदयरोगमें पहले लंघन करावे, फिर त्रिदोषनाशक तथा हितकारी अन्न-पान देवे। इसमें तीनों दोषोंकी प्रबलता, समता अथवा हीनताको अच्छे प्रकार विचारकर चिकित्सा करनी चाहिये ॥ १० ॥

चूर्णं पुष्करजं लिह्यान्माक्षिकेण समायुतम्।
हृच्छूलश्वासकासघ्नं क्षयहिक्कानिवारणम् ॥ ११ ॥

पोहकरमूलके चूर्णको शहदमें मिलाकर चाटे तो हृदयशूल, श्वास, खाँसी, क्षय और हिचकी आदि रोग दूर होते हैं ॥ ११ ॥

तैलाज्यगुडविपक्वं चूर्णं गोधूमपार्थजं चापि।
पिबति पयोऽनु च यः स भवेज्जितसकलहृदामयः पुरुषः १२ ॥

गेहूँ और अर्जुनकी छालके चूर्णको तेल, घी और गुडके द्वारा पकाकर दूधके साथ पीवे। इससे सर्वप्रकारका हृदयरोग नष्ट होता है ॥ १२ ॥

मूलं नागबलायास्तु चूर्णं दुग्धेन पाययेत्।
हृद्रोगश्वासकासघ्नं ककुभस्य च वल्कलम् ॥ १३ ॥
रसायनं परं बल्यं वातजिन्मासयोजितम्।
संवत्सरप्रयोगेण जीवेद्वर्षशतं ध्रुवम् ॥ १४ ॥

गंगेरनकी जडके चूर्णको दूधके साथ पान करे तो हृदयरोग, श्वास और खाँसी नष्ट होते हैं। एवं अर्जुनकी छालके चूर्णको यदि एक महीनेतक सेवन करे तो अत्यन्त बल बढता है और वायुका प्रकोप शमन होता है। यदि इस उत्तम रसायनको एक वर्षतक सेवन करे तो सौ वर्ष पर्यन्त जीवे ॥ १३ ॥ १४ ॥

हिंगूग्रगन्धाविडविश्वकृष्णाकुष्ठाभयाचित्रकयावशूकम्।
पिबेत्ससौवर्चलपुष्कराढ्यं यवाम्भसा शूलहृदामयघ्नम् ॥ १५ ॥

हींग, वच, विडनमक, सोंठ, पीपल, कूठ, हरड, चीता, जवाखार, काला नमक और पोहकरमूल इन सबको समान भाग लेकर चूर्ण बनालेवे। प्रतिदिन इस चूर्णको जौके क्वाथके साथ सेवन करनेसे शूल और हृदयरोग नष्ट होता है ॥ १५ ॥

दशमूलकषायस्तु लवणक्षारयोजितः।
कासं श्वासं च हृद्रोगं गुल्मशूलं च नाशयेत् ॥ १६ ॥

दशमूलके काढेको सेंधानमक और जवाखारके चूर्णके साथ सेवन करे तो खाँसी, श्वास, हृदयरोग, गुल्म तथा शूलरोग नष्ट होते हैं ॥ १६ ॥

पाठां वचां यवक्षारमभयां चाम्लवेतसम्।
दुरालभां चित्रकं च त्र्यूषणं च फलत्रयम् ॥ १७ ॥
शठीं पुष्करमूलं च तिन्तिडीकं सदाडिमम्।
मातुलुङ्गस्य मूलानि श्लक्ष्णचूर्णानि कारयेत् ॥ १८ ॥
सुखोदकेन मद्यैर्वा प्लुतान्येतानि पाययेत्।
अर्शः शूलं च हृद्रोगं गुल्मं चाशु नियच्छति ॥ १९ ॥

पाढ, वच, जवाखार, हरड, अमलवेत, धमासा, चीता, सोंठ, मिरच, पीपल, हरड, बहेडा, आमला, कचूर, पोहकरमूल, इमली, अनार और बिजौरे नींबूकी जड ये सब समान भाग ले एकत्र कूट पीसकर बारीक चूर्ण करलेवे। यह चूर्ण कुछ गरमजल या मदिराके साथ पान करे तो बवासीर, शूल, हृदयरोग और गुल्मरोगको तत्काल नष्ट करता है ॥ १७-१९ ॥

पुटदग्धमश्मपिष्टं हरिणविषाणं हि सर्पिषा पिबतः।
हृत्पृष्ठशूलमुपशममुपयात्यचिरेण कष्टमपि ॥ २० ॥

हिरनके सींगको पुटपाककी विधिसे भस्मकर पत्थरके खरलमें पीसलेवे। फिर इस भस्मको घीमें मिलाकर सेवन करनेसे अत्यन्त पुराने और कष्टसाध्य हृदयरोग तथा पृष्ठशूल शीघ्र शमन होते हैं ॥ २० ॥

क्रुमिहृद्रोगिणं स्निग्धं भोजयेत्पिशितौदनम् ।
दध्ना च पललोपेतं त्र्यहं पश्चाद्विरेचयेत् ॥ २१ ॥
सुगन्धिभिः सलवणैर्योगैः साजाजिशर्करैः ।
विडङ्गगाढं धान्याम्लं पाययेद्धितमुत्तमम् ॥ २२ ॥

कृमिजनित हृदयरोगमें प्रथम रोगीको स्निग्ध करके मांसके साथ तीन दिनतक भात भक्षण करावे। फिर दहीके और तिलकुटके साथ तीन दिनतक मांसरस और भात भक्षण कराकर पश्चात् विरेचन देवे। तदनन्तर दारचीनी, इलायची, तेजपात, नागकेशर, सेंधानमक, जीरा और मिश्री इन ओषधियोंके समान भाग चूर्णके साथ वायविडङ्गका चूर्ण मिलीहुई धानोंकी काँजीको पान करावे ॥ २१ ॥ २२ ॥

कृमिजे च पिबेन्मूत्रं विडङ्गमयसंयुतम् ।
हृदि स्थिताः पतन्त्येवमधस्तात्क्रुमयो नृणाम् ।
यवान्नं वितरेच्चास्मै सविडङ्गमतः परम् ॥ २३ ॥

वायविडङ्गके चूर्णको और कूठके चूर्णको गोमूत्रमें मिलाकर पान करनेसे हृदयमें स्थित कृमि स्वस्थानसे गिरकर मलके द्वारा निकल जाते हैं। इस प्रकार कृमि पतित होजानेपर रोगीको भोजनके लिये वायविडङ्गका चूर्ण डालकर जौका बना अन्न भक्षण करावे ॥ २३ ॥

रसायन ।

रसगन्धाभ्रभस्मानि पार्थवृक्षत्वगम्बुना ।
एकविंशतिधा घर्म्मे भावितानि विधानतः ॥ २४ ॥
माषमात्रमिदं चूर्णं मधुना सह लेहयेत् ।
वातजं पित्तजं श्लेष्मसम्भूतं वा त्रिदोषजम् ॥
कृमिजं चापि हृद्रोगं निहन्त्येव न संशयः ॥ २५ ॥

शुद्ध पारा, शुद्ध गन्धक और अभ्रकभस्म इनको समान भाग लेवे और सबको एकत्रकर अर्जुनवृक्षकी छालके क्वाथमें २१ वार भावना देवे। फिर धूपमें सुखाकर सबको बारीक पीसलेवे। प्रतिदिन प्रातःकाल १ मासे चूर्णको शहदमें मिलाकर चाटे तो वातज, पित्तज, कफज, त्रिदोषज और कृमिजनित हृदयरोग निस्सन्देह नष्ट होता है ॥ २४ ॥ २५ ॥

नागार्जुनाभ्र ।

सहस्रपुटनैः शुद्धं वज्राभ्रमर्जुनत्वचः ।
सत्त्वैर्विमर्दितं सप्तदिनं खल्वे विशोषितम् ॥ २६ ॥

छायाशुष्का वटी कार्या नाम्नेदमर्जुनाह्वयम् ।
हृद्रोगं सर्वशूलार्शोहृल्लासच्छर्द्यरोचकान् ॥ २७ ॥
अतीसारमग्निमान्द्यं रक्तपित्तं क्षतक्षयम् ।
शोथोदराम्लपित्तं च विषमज्वरमेव च ॥
हन्त्यन्यानपि रोगांश्च बल्यं वृष्यं रसायनम् ॥ २८ ॥

हजार पुटों द्वारा शुद्ध कीहुई वज्राभ्रकभस्मको अर्जुनवृक्षकी छालके क्वाथमें सात दिनतक उत्तम प्रकारसे खरल करके छायामें सुखाकर गोलियाँ बनालेवे । यह नागार्जुन नामकी अभ्रक हृदयरोग, सर्वप्रकारक शूल, अर्श, हल्लास, वमन, अरुचि एवं अन्य नाना प्रकारकी व्याधियोंको शीघ्र नष्ट करती है तथा बल्य, पुष्टिकर और रसायन है ॥ २६-२८ ॥

हृदयार्णवरस ।

सूतार्कगन्धकं क्वाथे वराया मर्दयेद्दिनम् ।
काकमाच्या वटीं कृत्वा चणमात्रां च भक्षयेत् ।
हृदयार्णवनामाऽयं हृद्रोगदलनो रसः ॥ २९ ॥

शुद्ध पारा, ताँबा और शुद्ध गन्धक इनको समान भाग लेकर त्रिफलेके क्वाथ और मकोयके रसमें एक दिनतक विधिपूर्वक खरल करके चनेकी बराबर गोलियाँ बनालेवे । नित्यप्रति एक एक गोली सेवन करनेसे हृदयार्णवनामवाला यह रस हृदय रोगको नष्ट करताहै ॥ २९ ॥

पञ्चाननरस ।

सूतगन्धौ द्रवैर्धात्र्या मर्दयेद्दोस्तनीद्रवैः ।
यष्टिखर्जूरसलिलैर्दिनं च परिमर्दयेत् ॥
धात्रीचूर्णं सितां चानु पिबेद्धृद्रोगशान्तये ॥ ३० ॥

पारे और गन्धकको बराबर २ लेकर आमलोंके रसमें खरल करके दाख मुलहठी और खजूरके क्वाथमें एक दिनतक यथाविधि खरल करे । इस रसको प्रतिदिन दो दो रत्तीभर, आमलोंके चूर्ण और मिश्रीके साथ मिलाकर सेवन करनेसे हृदयरोग शान्त होताहै ॥ ३० ॥

प्रभाकरवटी ।

माक्षिकं लोहमभ्रं च तुगाक्षीरं शिलाजतु ।
क्षिप्त्वा खल्लोदरे पश्चाद्भावयेत्पार्थवारिणा ॥ ३१ ॥

वल्लद्वयमितां कुर्याद्वटीं छायाविशोषिताम् ।
प्रभाकरवटी सेयं हृद्रोगान्निखिलाञ्जयेत् ॥ २२ ॥

सोनामाखी, लोहेकी भस्म, अभ्रकभस्म, वंशलोचन और शिलाजीत ये सब औषधि समान भाग लेवे । सबको खरलमें रख अर्जुनवृक्षकी छालके क्वाथको डालकर अच्छे प्रकार खरल करे । फिर छायामें सुखाकर दो दो रत्तीकी गोलियाँ बनालेवे । यह प्रभाकरवटी यथानियम सेवन करनेसे समस्त हृदयसम्बन्धी रोगोंको दूर करती है ॥ २१ ॥ २२ ॥

चिन्तामणिरस ।

पारदं गन्धकं चाभ्रं लोहं वङ्गं शिलाजतु ।
समं समं गृहीत्वा च स्वर्णं सूताङ्घ्रिसम्मितम् ॥ २३॥
स्वर्णस्य द्विगुणं रौप्यं सर्वमेकत्र मर्दयेत् ।
चित्रकस्य द्रवेणापि भृङ्गराजाम्भसा ततः ॥ २४ ॥
पार्थस्याथ कषायेण सप्तकृत्वो विभावयेत् ।
ततो गुञ्जामिताः कुर्याद्वटीश्छायाप्रशोषिताः ।
एकैकां दापयेदासां गोधूमक्वाथवारिणा ॥ २५ ॥

शुद्ध पारा, गन्धक, अभ्रक, लोहा, वङ्ग और शिलाजीत ये प्रत्येक एक एक तोला एवं सुवर्णभस्म तीन मासे, चाँदीके भस्म ६ मासे लेवे, सबको एकत्रकर चीता, भाँगरा और अर्जुनवृक्षकी छालके क्वाथमें ७ बार खरल करके छायामें सुखाकर एक एक रत्तीकी गोलियाँ बनालेवे । इसमेंसे प्रतिदिन प्रातःसमय एक एक गोली गेहूँके क्वाथके साथ सेवन करे ॥ २४-२५ ॥

हृद्रोगान्निखिलान् हन्ति व्याधीन् फुफ्फुसजानपि ।
प्रमेहान्विंशतिं श्वासान् कासानपि सुदुस्तरान् ॥ २६ ॥
बलपुष्टिकरो हृद्यो रसश्चिन्तामणिः स्मृतः ॥ २७ ॥

यह चिन्तामणि रस सम्पूर्ण हृदयरोग, फुफ्फुसजन्यरोग, बीस प्रकारके प्रमेह, श्वास, दुस्तर खाँसी, अन्य सर्वप्रकारके रोगोंको, तत्काल नष्ट करता है एवं बल और पुष्टिकारक तथा हृदयको अत्यन्त हितकारी है ॥ २६ ॥ २७ ॥

विश्वेश्वररस ।

स्वर्णाभ्रलोहवङ्गानां रसगन्धकयोरपि ।
वैक्रान्तस्य च संगृह्य भागांस्तोलकसम्मितान् ॥ २८ ॥

कर्पूरसलिलेनाथ भावयित्वा यथाविधि ।
रक्तिकैकप्रमाणेन विदध्याद्वटिकास्ततः ॥ ३९ ॥
अयं विश्वेश्वरो नाम रसः फुप्फुसजान् गदान् ।
हृद्रोगांश्च जयेत्सर्वान् संशयोऽत्र न विद्यते ॥ ४० ॥

सोना, अभ्रक, लोहा, बङ्ग, शुद्ध पारा, शुद्ध गन्धक और वैक्रान्तमणि इन सब द्रव्योंकी भस्मको एक एक तोला लेकर कपूरके जलमें विधिपूर्वक खरल करके एक एक रत्तीकी गोलियाँ बनालेवे। प्रतिदिन नियमानुसार सेवन करनेसे यह विश्वेश्वर-नामक रस फुफ्फुससे उत्पन्न हुए रोगों और समस्त हृदयरोगोंको शीघ्र जीतता है। इसमें कुछ सन्देह नहीं है ॥ ३८–४० ॥

शङ्करवटी ।

रसस्य भागाश्चत्वारो बलेरष्टौ तथा मताः ।
त्रयो लौहस्य नागस्य द्वावित्येकत्र मर्दयेत् ॥ ४१ ॥
भावयेत्काकमाच्याश्च चित्रकस्यार्द्रकस्य च ।
स्वरसेन जयन्त्याश्च वासाया बिल्वपार्थयोः ॥ ४२ ॥
ततो गुञ्जाद्वयमितां विदध्याद्वटिकां भिषक् ।
एकैकां दापयेदासामीषदुष्णेन वारिणा ॥ ४३ ॥

शुद्ध पारा ४ तोले, शुद्ध गन्धक ८ तोले, लोहा ३ तोले और शीशा दो तोले इन सबको एकत्रितकर मकोय, चीता, अदरख, जयन्ती, अडूसा, बेलकी छाल और अर्जुनवृक्षकी छालके क्वाथमें यथाक्रम भावना देकर अच्छी तरह खरल करे। फिर दो दो रत्तीकी गोलियाँ बनालेवे। इनमेंसे हररोज एक एक गोली सुखोष्ण जलके साथ सेवन करे ॥ ४१–४३ ॥

जयेदियं फुप्फुसजान रोगान् हृदयसम्भवान् ।
जीर्णज्वरं तथा घोरं प्रमेहानपि विंशतिम् ॥ ४४ ॥
कासश्वासामवातांश्च ग्रहणीमपि दुस्तराम् ।
वटी श्रीशङ्करप्रोक्ता बलपुष्टिविवर्द्धिनी ॥ ४५ ॥

यह वटी फुफ्फुसजन्यरोग, हृदयगतरोग, पुराना ज्वर, बीसों प्रमेह, खाँसी, श्वास, आमवात और दुस्तर संग्रहणी आदि रोगोंको तत्काल नष्ट करती है। यह वटी श्रीशङ्कर भगवान्ने कही है। यह अतिबलकारक और पुष्टिकर है ॥ ४४ ॥ ४५ ॥

कल्याणसुन्दररस।

सिन्दूरमभ्रं तारं च ताम्रं हेम च हिङ्गुलम्।
सर्वं खल्वतले क्षिप्त्वा मर्दयेद्वह्निवारिणा ॥ ४६ ॥
हस्तिशुण्डाम्भसा पश्चाद्भावयित्वा च सप्तधा।
गुञ्जामात्रां वटीं कृत्वा कोष्णतोयेन दापयेत् ॥ ४७ ॥
उरस्तोयं च हृद्रोगं वक्षोवातमुरोऽस्रकम्।
फौफ्फुसान्हन्ति रोगांश्च रसः कल्याणसुन्दरः ॥ ४८ ॥

रससिन्दूर, अभ्रक, चाँदी, ताँबा, सोना और हिंगुल इन सबको समान भाग लेकर खरलमें रक्खे, फिर उसमें चीतेका क्काथ डालकर घोटे। पश्चात् हाथीशुण्डीके क्काथकी सात वार भावना देकर उत्तम प्रकारसे घोटे। तदनन्तर एक एक रत्तीकी गोली बनाकर रखले। प्रतिदिन मन्दोष्ण जलके साथ एक एक गोली भक्षण करे तो उरस्तोय, हृदयरोग, वक्षःस्थलकी वात, उरोरक्तस्राव तथा फुफ्फुससम्बन्धी अनेक प्रकारके रोग नष्ट होते हैं ॥ ४६-४८ ॥

वल्लभघृत।

मुख्यं शतार्द्धं च हरीतकीनां सौवर्चलस्यापि पलद्वयं च।
पक्वं घृतं वल्लभकेति नाम्ना हृद्रोगशूलोदरमारुतघ्नम् ॥ ४९ ॥

बीजरहित उत्तम हरड ५० और कालानमक ८ तोले इन दोनोंके साथ पकाये हुए घृतको पान करनेसे हृदयरोग, शूल, उदररोग और वातरोग दूर होते हैं। यह वल्लभनामसे प्रसिद्ध है ॥ ४९ ॥

श्वदंष्ट्राद्यघृत।

श्वदंष्ट्रोशीरमञ्जिष्ठा बला काश्मर्यकत्तृणम्।
दर्भमूलं पृथक्पर्णी पलाशर्षभकौ स्थिरा ॥ ५० ॥
पलिकान्साधयेत्तेषां रसे क्षीरे चतुर्गुणे।
कल्कैः स्वगुप्तर्षभकमेदाजीवन्तिजीवकैः ॥ ५१ ॥
शतावर्यृद्धिमृद्वीकाशर्कराश्रावणीबिसैः।
प्रस्थं सिद्धो घृताद्वातपित्तहृद्रोगशूलनुत् ॥ ५२ ॥
मूत्रकृच्छ्रप्रमेहार्शःश्वासकासक्षयापहः।
धनुःस्त्रीमद्यभाराध्वखिन्नानां बलमांसदः ॥ ५३ ॥

गोखुरू, खस, मंजीठ, खिरैंटी, कुम्भेर, सुगन्धित तृण, कुशाकी मूल, पृश्निपर्णी, ढाककी छाल, ऋषभक और शालपर्णी इनको पृथक् पृथक् चार चार तोले लेकर

-सबसे चौगुने जलमें पकावे। पकते पकते जब चतुर्थांश जल रहे तब उतारकर छानलेवे। फिर इस काथमें रससे चौगुना दूध एवं कौंचके बीज, ऋषभक, मेदा, जीवन्ती, जीवक, शतावर, ऋद्धि, दाख, खांड, गोरखमुण्डी और कमलकन्द इन सब औषधियोंका मिला हुआ चूर्ण एक सेर तथा घृत चार सेर डालकर उत्तम प्रकारसे घृतको सिद्ध करे। यह घृत वातज-पित्तजहृदयरोग, शूल, मूत्रकृच्छ्र, प्रमेह, बवासीर, श्वास, खाँसी और क्षय इत्यादि विकारोंको दूर करता है और धनुषके भारसे, अधिक स्त्रीप्रसङ्गसे अथवा अधिक मद्यपानके करने किंवा बोझ उठानेसे और अधिक रास्ता चलनेसे क्षीण हुए पुरुषोंके शरीरमें बल तथा मांसको बढ़ाता है ॥ ५०–५३ ॥

बलाद्यघृत।

घृतं बलानागबलार्जुनाम्बुसिद्धं सयष्टीमधुकल्कपादम्।
हृद्रोगशूलक्षतरक्तपित्तकासानिलासृक् शमयत्युदीर्णम् ५४॥

खिरेंटी, गंगेरन और अर्जुनकी छालके काथ एवं मुलहठीके कल्कके द्वारा घृतको सिद्ध करे। इस घृतको पान करनेसे हृदयरोग, शूल, क्षत, रक्तपित्त, खाँसी और दारुण वातरक्तरोग नष्ट होता है ॥ ५४ ॥

अर्जुनघृत।

पार्थस्य कल्कस्वरसेन सिद्धं शस्तं घृतं सर्वहृदामयेषु ॥

अर्जुनवृक्षकी छालके कल्क और काथके द्वारा सिद्ध किये हुए घृतको सेवन करनेसे सर्वप्रकारके हृदयरोग नष्ट होते हैं।

हृदयरोगमें पथ्य।

स्वेदो विरेको वमनं च लंघनं वस्तिर्विलेपी चिररक्त-शालयः। मृगद्विजा जाङ्गलसंज्ञयाऽन्विता यूषा रसा मुद्गकुलत्थसम्भवाः ॥ ५५ ॥ रागाः खडाः काम्बलि-काश्च खाडवा भक्ष्यं पटोलं कदलीफलान्यपि। पुराण-कूष्माण्डरसालदाडिमं शम्याकशाकं नवमूलकान्यपि ॥ ५६ ॥ एरण्डतैलं गगनाम्बु सैन्धवं द्राक्षापि तक्रं च पुरातनो गुडः। शुण्ठी यमा लशुनं हरीतकी कुष्ठं च कुस्तुम्बुरु कृष्णमार्द्रकम् ॥ ५७ ॥ सौवीरशुक्तं मधु वारुणीरसः कस्तूरिका चन्दनकं प्रपाणकम्। ताम्बूल-मप्येष गणः सुखावहो मर्त्यस्य हृद्रोगनिपीडितस्य ॥५८॥

स्वेदक्रिया, विरेचन, वमन, लङ्घन, वस्तिप्रयोग और प्रलेप करना, पुराने शालिके चावल, जङ्गली मृग-पक्षियोंके मांसका रस, मूँग और कुलथीका यूष, अनार, दाखयुक्त मूँगका यूष, खडयूष, काम्बलिक (काँजी विशेष), खाडव (सुगन्धित द्रव्योंसे सिद्ध खाद्यविशेष), कमरख, परवल, केला, पुरानापेठा, पका आम, अनार, अमलतासका शाक और कच्ची मूली इनका भोजन, अण्डीका तेल, वर्षाका जल, सैंधानमक, दाख, मट्ठा, पुरानागुड, सोंठ, अजवायन, लहसुन, हरड, कूठ, धनियाँ, कालीमिरच, अदरख, सौवीरनामक काँजी, शहद, वारुणीमदिरा, कस्तूरी, चन्दन, शर्वत और ताम्बूल ये सब वस्तुयें हृदयरोगसे पीडित मनुष्यके लिये अत्यन्त हितकारी हैं ५५-५८

हृदयरोगमें अपथ्य ।

तृड्छर्दिमूत्रानिलशुक्रकासोद्गारश्रमश्वासविडश्रुवेगान् ।
सह्याद्रिविन्ध्याद्रिनदीजलानि मेषीपयो दुष्टजलं कषायम् ५९
विरुद्धमुष्णं गुरु तिक्तमम्लं पत्रोत्थशाकानि चिरन्तनानि ।
क्षारं मधूकानि च दन्तकाष्ठं रक्तस्रुतिं हृद्गदवांस्त्यजेच्च ॥६०

तृषा, वमन, मूत्र, अपानवायु, वीर्य, खाँसी, डकार, श्रमजन्य श्वास, मल और आँसू इनके वेगको रोकना एवं सह्यपर्वत और विन्ध्याचलसे निकली नदियोंके जलका सेवन, भेडका दूध, दूषित जल, कषैले, विरुद्ध, गरम, भारी, कडुवे और खट्टे पदार्थ, बहुत पुराने पत्रशाक, खारपदार्थ, महुआ, दन्तधावन तथा रक्तमोक्षण(फस्त खुलवाना) इन सबको हृदयरोगी शीघ्र त्याग देवे ॥ ५९ ॥ ६० ॥

इति भैषज्यरत्नावल्यां हृद्रोगचिकित्सा ॥

मूत्रकृच्छ्रकी चिकित्सा ।

अभ्यञ्जनस्नेहनिरूहवस्तिस्वेदोपनाहोत्तरवस्तिसेकान् ।
स्थिरादिभिर्वातहरैश्च सिद्धान्दद्याद्रसांश्चानिलमूत्रकृच्छ्रे ॥ १ ॥

वायुसे उत्पन्न हुए मूत्रकृच्छ्रमें रोगीको वायुनाशक तैलादिकी मालिश, स्नेहद्रव्योंका पान, निरूहवस्ति, स्वेदप्रधान प्रलेप, उत्तरवस्ति और सेंक करे, एवं वातनाशक शालपर्णी आदि औषधियोंसे पकाये हुए मांस रस देवे ॥ १ ॥

सेकावगाहाः शिशिराः प्रदेहा ग्रैष्मो विधिर्वस्तिपयोविरेकाः ।
द्राक्षाविदारीक्षुरसैर्घृतैश्च कृच्छ्रेषु पित्तप्रभवेषु कार्याः ॥ २ ॥

पित्तजनित मूत्रकृच्छ्रमें रोगीके शरीरपर जल छिडकना, शीतलजलमें घुसकर स्नान करना, चन्दन, खसादि शीतल पदार्थोंका प्रलेप, ग्रीष्मकालके अनुसार शीतल उपचार करना, पिचकारी लगाना, दुग्धपान, विरेचन (जुलाब) देना और दाख, विदारीकन्द तथा ईखके रसके साथ घृतपान करना इत्यादि सब कृत्य करने चाहिये २

क्षारोष्णतीक्ष्णौषधमन्नपानं स्वेदो यवान्नं वमनं निरूहः ।
तक्रं सतिक्तौषधसिद्धतैलमभ्यङ्गपानं कफमूत्रकृच्छ्रे ॥ ३ ॥

कफजन्यमूत्रकृच्छ्रमें क्षार, गरम तथा तीक्ष्ण औषधि, अन्नपान, पसीना निकलवाना, जौके आटेका बना भोजन, वमन, निरूहवस्ति, मट्ठा, कडुवी और उष्ण औषधियोंसे पकाये हुए तेलकी मालिश अथवा पान करावे ॥ ३ ॥

सर्वं त्रिदोषप्रभवे च वायोः स्थानानुपूर्व्यां प्रसमीक्ष्य कार्यम् । त्रिभ्योऽधिके प्राग्वमनं कफे स्यात्पित्ते विरेकः पवने च वस्तिः ॥ ४ ॥

तीनों दोषोंसे उत्पन्न मूत्रकृच्छ्रमें वायुके स्थानसे लेकर कफपर्यन्त जो विधि कही हैं उन सबोंको मिलकर इसमें चिकित्सा करे । विशेष करके दोषोंकी अवस्थाको देखकर मिश्रित उपचार करे । त्रिदोषज मूत्रकृच्छ्रमें कफकी अधिकता होनेपर वमन, पित्ताधिक्यमें विरेचन, वातकी आधिक्यमें वस्ति देवे ॥ ४ ॥

तथाऽभिघातजे कुर्य्यात्सद्यो व्रणचिकित्सितम् ।
मूत्रकृच्छ्रे सदा कार्या वातरोगहरी क्रिया ॥
स्वेदचूर्णक्रियाभ्यङ्गवस्तयः स्युः पुरीषजे ॥ ५ ॥

चोट आदिके लगनेसे प्रगटहुए मूत्रकृच्छ्रमें शीघ्रही व्रणरोगकी समान समस्त वातजमूत्रकृच्छ्रनाशक चिकित्सा करे । मलके रोकनेसे जो मूत्रकृच्छ्र उत्पन्न हुआ होय तो स्वेद प्रयोग, या विरेचन औषधियोंका चूर्ण नलीमें भरकर गुदामें प्रवेश करना, तैलादिकी मालिश अथवा वस्तिकर्म करे ॥ ५ ॥

क्रिया हिता त्वश्मरिशर्करायां या मूत्रकृच्छ्रे कफमारुतोत्थे ।

वायु और कफसे जो मूत्रकृच्छ्र हुआ हो तो अश्मरी तथा शर्करारोगमें कही हुई विधिके अनुसार चिकित्सा करे ॥

लेह्यं शुक्रविबन्धोत्थे शिलाजतु समाक्षिकम् ।
वृष्यैर्बृंहितधातोश्च विधेया प्रमदोत्तमा ॥ ६ ॥

वीर्यके रोकनेसे प्रादुर्भूत मूत्रकृच्छ्रमें शिलाजीतको शहदके साथ मिलाकर चाटे अथवा पुष्टिकारक औषधियोंको सेवन करनेसे वीर्यके बढनेके कारण उत्पन्न हुए मूत्रकृच्छ्रमें सुन्दर स्त्रीके साथ प्रसंग करे ॥ ६ ॥

यन्मूत्रकृच्छ्रे विहितं च पैत्ते तत्कारयेच्छोणितमूत्रकृच्छ्रे ।

रुधिरसहित मूत्र आनेवाले मूत्रकृच्छ्रमें पित्तज मूत्रकृच्छ्रमें कही हुई विधिके अनुसार चिकित्सा करे ।

कूष्माण्डकरसं पीत्वा सयवक्षारशर्करम् ।
मूत्रकृच्छ्राद्विमुच्येत शीघ्रं च लभते सुखम् ।

पेठेके रसको जवाखार और मिश्री मिलाकर पीनेसे मूत्रकृच्छ्ररोग शीघ्र दूर होकर आनन्द प्राप्त होता है ॥ ७ ॥

गुडेनामलकं वृष्यं श्रमघ्नं तर्पणं परम् ।
पित्तासृग्दाहशूलघ्नं मूत्रकृच्छ्रनिवारणम् ॥ ८ ॥

गुडके साथ आमलोंका चूर्ण सेवन करनेसे वीर्यकी वृद्धि, श्रमनाश, अत्यन्त तृप्ति एवं रक्तपित्त, दाह, शूल और मूत्रकृच्छ्ररोग दूर होता है ॥ ८ ॥

एर्वारुबीजं मधुकं च दार्वीं पैत्ते पिबेत्तण्डुलधावनेन ।
दार्वीं तथैवामलकीरसेन समाक्षिकां पैत्तिकमूत्रकृच्छ्रे ॥ ९ ॥

पैत्तिक मूत्रकृच्छ्रमें ककडीके बीज, मुलहटी और दारुहल्दी इनके चूर्णको चावलोंके जलके साथ पान करे अथवा आमलोंके रसमें दारुहल्दीका चूर्ण और शहद डालकर पीनेसे पित्तज मूत्रकृच्छ्र नष्ट होता है ॥ ९ ॥

सितातुल्यो यवक्षारः सर्वकृच्छ्रविनाशनः ।

जवाखार और मिश्री समान भाग मिलाकर सेवन करनेसे सर्वप्रकारके मूत्रकृच्छ्र नाश होते हैं ॥

सूर्यावर्त्तभवं बीजं श्लक्ष्णं दृषदि पेषितम् ।
व्युषितोदकसंपीतं कृच्छ्रं हन्ति सुदारुणम् ॥ १० ॥

हुलहुलके बीजोंको शिलापर खूब बारीक पीसकर बासी जलके साथ पीनेसे दारुण मूत्रकृच्छ्र नष्ट होता है ॥ १० ॥

मधुना च यवक्षारं मूत्रकृच्छ्राश्मरीहरम् ।

शहद जवाखार एकत्र मिलाकर सेवन करे तो मूत्रकृच्छ्र एवं अश्मरी जाय ॥

सगन्धकं यवक्षारं शर्करातक्रतः पिबेत्।
मूत्रकृच्छ्राद्विमुच्येत साध्यासाध्यान्न संशयः ॥ ११ ॥

शुद्ध गन्धक, जवाखार और चीनी इनको समान भाग ले मट्ठेमें मिलाकर पीवे तो साध्य व असाध्य सर्वप्रकारका मूत्रकृच्छ्र निश्चय दूर होता है ॥ ११ ॥

नारिकेलोद्भवं पुष्पं तण्डुलोदकसंयुतम्।
सरक्तं मूत्रकृच्छ्रं हि पीतं हन्ति न संशयः ॥ १२ ॥

नारियलके फूलोंके जलके साथ पीसकर सेवन करनेसे रक्तसहित होनेवाला मूत्रकृच्छ्र निस्संदेह दूर होता है ॥ १२ ॥

क्वाथं गोक्षुरबीजस्य यवक्षारयुतं पिबेत्।
मूत्रकृच्छ्रं तथा रक्तं पीतं शीघ्रं निवारयेत् ॥ १३ ॥

गोखुरूके बीजोंके क्वाथमें जवाखारका चूर्ण मिश्रितकर पीवे तो मूत्रकृच्छ्र और रक्तस्राव तत्काल नष्ट होते है ॥ १३ ॥

विदारी गोक्षुरं यष्टी केशरं च समं पचेत्।
तत्कषायं पिबेत्क्षौद्ररसभस्मयुतं पुनः ॥
मूत्रकृच्छ्रं हरेत्सर्वं सप्ताहात्पित्तसम्भवम् ॥ १४ ॥

विदारीकन्द, गोखुरू, मुलहठी और नागकेशर इनको समान भागसे मिश्रित कर पकावे। फिर उस क्वाथमें शहद तथा पारदभस्म डालकर पान करे तो सात दिनमेंही पित्तजन्य मूत्रकृच्छ्र दूर होता है ॥ १४ ॥

तृणपञ्चमूल।

कुशः काशः शरो दर्भ इक्षुश्चेति तृणोद्भवम्।
पित्तकृच्छ्रहरं पञ्चमूलं वस्तिविशोधनम् ॥ १५ ॥

तृणपञ्चमूल (कुशा, कांस, रामशर, डाभ और ईख) की जडको औटाकर पान करनेसे पित्तज मूत्रकृच्छ्र दूर होता है तथा वस्ति शुद्ध होती है ॥ १५ ॥

पञ्चतृणक्षीर।

एतत्सिद्धं पयः पीतं मेद्रगं हन्ति शोणितम्।

तृणपञ्चमूलके क्वाथसे सिद्ध कियेहुए दूधका पीनेसे लिंगद्वारा रक्तस्राव होना बन्द होता है ॥

त्रिकण्टकादि।

त्रिकण्टकारग्वधदर्भकाशदुरालभापर्वतभेदपथ्याः।
निघ्नन्ति पीडां मधुनाऽश्मरीं च सम्प्राप्तमृत्योरपि मूत्रकृच्छ्रम् ॥

गोखुरू, अमलतास, डाभ, काँस, धमासा, पाषाणभेद, और हरड इनको समान भाग लेकर कूट पीसकर चूर्णको शहदमें मिलाकर सेवन करे तो अश्मरी और मृत्युके समान प्राप्त हुई मूत्रकृच्छ्की पीडा नष्ट होती है ॥ १६ ॥

धात्र्यादि ।

धात्री द्राक्षा विदारी च यष्ट्याह्वं गोक्षुरं तथा ।
एभिः कषायं विपचेत्पिबेच्छीतं सशर्करम् ॥
अपि योगशतासाध्यं मूत्रकृच्छ्रं जयेल्लघु ॥ १७ ॥

आमला, दाख, विदारीकन्द, मुलहठी और गोखुरू इनका काढा बनाकर शीतल होनेपर मिश्री डालकर पीवे । जो सैकडों योगोंसे भी असाध्य हो ऐसे मूत्रकृच्छ्को यह छोटासा प्रयोग नष्ट कर देता है ॥ १७ ॥

बृहद्धात्र्यादि ।

धात्री द्राक्षा च यष्ट्याह्वं विदारी सत्रिकण्टका ।
दर्भेक्षुमूलमभया क्राथयित्वा जलं पिबेत् ॥
ससितं मूत्रकृच्छ्रघ्नं रुजं दाहहरं परम् ॥ १८ ॥

आमला, दाख, मुलहठी, विदारीकन्द, गोखुरू, डाभ, ईखकी मूल और हरड इनका यथाविधि क्वाथ बनाकर मिश्री डालकर पीनेसे अत्यन्त दाहयुक्त मूत्रकृच्छ्र-रोग शमन होता है ॥ १८ ॥

अमृतादि ।

अमृता नागरं धात्री वाजिगन्धा त्रिकण्टकम् ।
प्रपिबेद्वातरोगार्त्तः सशूलो मूत्रकृच्छ्रवान् ॥ १९ ॥

गिलोय, सोंठ, आमले, असगन्ध और गोखुरू इनके क्वाथको पान करनेसे शूलसहित मूत्रकृच्छ्ररोग व वातरोग शान्त होता है ॥ १९ ॥

शतावर्यादि ।

शतावरी काशकुशश्वदंष्ट्राविदारिशालीक्षुकशेरुकाणाम् ।
क्वाथं सुशीतं मधुशर्करात्तं पिबञ्जयेत्पैत्तिकमूत्रकृच्छ्रम् ॥२०॥

शतावर, काँस, कुशा, गोखुरू, विदारीकन्द, शालिके चावल, ईखकी जड और कसेरू इनके क्वाथको विधिपूर्वक बनावे । जब शीतल होजाय तब शहद और चीनी मिलाकर पीवे । इससे पित्तसे हुआ मूत्रकृच्छ्र दूर होता है ॥ २० ॥

हरीतक्यादि।

हरीतकीगोक्षुरराजवृक्षपाषाणभिद्बिल्वयवासकानाम्।
क्वाथं पिबेन्माक्षिकसंप्रयुक्तं कृच्छ्रे सदाहे सरुजे विबन्धे २१॥

हरड, गोखुरू, आमलतास, पाषाणभेद, बेलगिरी और धमासा इनके क्वाथमें शहद मिलाकर सेवन करे तो दाहयुक्त मूत्रकृच्छ्र और विबन्धरोग नष्ट होता है॥

तारकेश्वररस।

शुद्धसूतं समं गन्धं लौहं वङ्गं मृताभ्रकम्।
दुरालभां यवक्षारं बीजं गोक्षुरजं शिवाम्॥ २२॥
समांशं कारयेत्सर्वं कूष्माण्डफलवारिणा।
पञ्चतृणभवक्वाथे रसे गोक्षुरजे तथा॥ २३॥
संपिष्य वटिका कार्या द्विगुञ्जाफलमानतः।
मधुनाऽऽमर्द्य विलिहेन्मूत्रकृच्छ्रविनाशनः॥ २४॥
उदुम्बरफलं पक्वं चूर्णितं कर्षमात्रकम्।
लेहयेन्मधुना सार्द्धमनुपानं सुखावहम्॥
अजाक्षीरं भवेत्पथ्यं शर्करेक्षुरसो हितः॥ २५॥

शुद्ध पारा, शुद्ध गन्धक, लोहा, वङ्ग और अभ्रक इनकी भस्म, धमासा, जवाखार, गोखुरूके बीज और हरड ये प्रत्येक औषधि समान भाग लेकर एकत्र कूट पीसले, फिर इस चूर्णको पेठेके रस, तृणपञ्चमूलके क्वाथ और गोखुरूके क्वाथमें क्रमपूर्वक खरल करके दो दो रत्तीकी गोलियां बनालेवे। प्रतिदिन प्रातःकाल एक एक गोली शहदमें मिलाकर सेवन करे अथवा पकेहुए गूलरके फलोंके दो तोले चूर्णको शहदमें मिलाकर सेवन करनेसे मूत्रकृच्छ्ररोग दूर होता है। इसपर बकरीका दूध, चीनी और ईखका रस पथ्य है॥ २२-२५॥

त्रिनेत्राख्यरस।

वङ्गं सूतं गन्धकं भावयित्वा लौहे पात्रे मर्दयेदेकघस्रम्। दूर्वायष्टीगोक्षुरैः शाल्मलीभिर्मूषामध्ये भूधरे पाचयित्वा ॥ २६॥ तत्तद्द्रावैर्भावयित्वाऽस्य वल्लं दद्याच्छीतं पायसं वक्ष्यमाणम्। दूर्वायष्टीशाल्मलीतोयदुग्धैस्तुल्यैः कुर्यात् पायसं तद्ददीत॥ प्रातःकाले शीतपानीयपानाज्जाते मूत्रे सुखिनं तं करोति॥ २७॥

वङ्ग, पारा और गन्धक इनको समान भाग लेकर लोहेके पात्रमें रख दूर्वा, मुलहठी, गोखुरू और शेमलकी जड इनके क्वाथसे अच्छे प्रकार खरल करे। फिर मूषायन्त्रमें रखकर भूधरयंत्रमें पकावे। जब शीतल होजाय तब इसको निकालकर उपर्युक्त औषधियोंके क्वाथमें भावना देकर दो दो रत्तीकी गोलियाँ बनालेवे। तदनन्तर दूध, मुलहठी और शेमलकी जडका क्वाथ एवं दूध ये सब बराबर बराबर लेकर खीर बनावे। नित्यप्रति एक एक गोली इसी खीरके साथ खाय। प्रातःसमय औषधि सेवन करके शीतल जल पीनेसे जब पेशाब होगा तब रोगी सुखी होगा। यह मूत्रकृच्छ्रको नष्ट करनेके लिये उत्तम है ॥ २६ ॥ २७ ॥

मूत्रकृच्छ्रान्तकरस १-२।

शतावरीरसैः पिष्ट्वा मृतसूतं च तालकम् ।
शिखितुत्थं च तुल्यांशं दिनैकं मर्दयेद्दृढम् ॥ २८ ॥
तद्गोलं सार्षपे तैले पाच्यं यामं च चूर्णयेत् ।
मूत्रकृच्छ्रान्तकश्चास्य क्षौद्रैर्गुञ्जाचतुष्टयम् ॥ २९ ॥
भक्षणान्नात्र सन्देहो मूत्रकृच्छ्रं निहन्त्यलम् ।
तुलसीतिलपिण्याकं बिल्वमूलं तुषाम्बुना ॥
कर्षैकं वाऽनुपानेन सुरया वा सुवर्चलैः ॥ ३० ॥

१-पारेकी भस्म, हरताल और शुद्ध नीलाथोथा इनको समान भाग लेवे। फिर सबको शतावरके रसमें एक दिनतक उत्तम प्रकार खरल करके गोलासा बनालेवे। इस गोलेको सरसोंके तेलमें एक पहरतक पकावे और शीतल होजानेपर चूर्ण करलेवे। इस प्रकार यह मूत्रकृच्छ्रान्तक रस सिद्ध होता है। इसको नित्यप्रति प्रातःकाल चार चार रत्ती प्रमाण शहदमें मिलाकर खानेसे निस्सन्देह समस्त मूत्रकृच्छ्र नष्ट होते हैं। अनुपान-तुलसीका रस, तिलकी खल और बेलकी जडके क्वाथको तुषाम्बुनामवाली काँजीमें अथवा मदिरामें हुलहुलका रस मिलाकर एकएक कर्षकी मात्रासे पान करे ॥ २८-३० ॥

सूतं स्वर्णं च वैक्रान्तं गन्धतुल्यं विमर्दयेत् ।
चण्डाली-राक्षसीद्रावैर्द्दियामान्ते तुगोलकम् ॥ ३१ ॥
शुष्कं बद्ध्वा पुटेच्चाद्यः करीषाग्नौ महापुटे ।
माषमात्रं लिहेत्क्षौद्रैर्मूत्रकृच्छ्रप्रशान्तये ॥ ३२ ॥

२-शुद्ध पारा, गन्धक, सुवर्ण और वैक्रान्तमणि सबको बराबर २ लेकर लिंगिनीलता और चोरनामक गन्धद्रव्य (भटेउर) के रसमें दो प्रहरतक विधिपूर्वक खरल करके गोलासा बनालेवे । फिर इस गोलेको सुखालेवे और महापुटमें स्थापनकर सन्धिस्थानोंको बन्द करके उपलोंकी अग्निमें एक दिनतक पुट देवे । जब शीतल होजाय तब निकालकर चूर्ण कर लेवे । इसमेंसे प्रतिदिन एकएक मासा, शहदमें मिलाकर चाटे तो मूत्रकृच्छ्र शान्त होता है ॥ ३१ ॥ ३२ ॥

शतावरीघृत और क्षीर ।

शतावरीकाशकुशश्वदंष्ट्राविदारिकेक्ष्वामलकेषु सिद्धम् ।
सर्पिःपयो वा सितया विमिश्रं कृच्छ्रेषु पित्तप्रभवेषु योज्यम् ३३

शतावर, कांस, कुश, गोखुरू, विदारीकन्द, ईख और आमले इनके क्वाथमें सिद्ध कियाहुआ घृत अथवा दूध मिश्री डालकर पान करे तो पित्तज मूत्रकृच्छ्र दूर होता है ॥ ३३ ॥

त्रिकण्टकाद्य घृत ।

त्रिकण्टकैरण्डकुशाद्यभीरुकर्कारुकेक्षुस्वरसेन सिद्धम् ।
सर्पिर्गुडार्द्धांशयुतं प्रपेयं कृच्छ्राश्मरीमूत्रविघातहेतोः ॥३४॥

गोखुरू, अण्डकी जड, कुशादि पञ्चमूल, शतावर, पेठा और ईख इनके स्वरस (अभावमें क्वाथ) से सिद्ध कियाहुआ घी और घीसे आधा भाग गुड मिलाकर पीवै । इस घृतके सेवन करनेसे मूत्रकृच्छ्र, पथरी और मूत्राघात रोग शीघ्र नष्ट होते हैं ॥ ३४ ॥

मूत्रकृच्छ्रमें पथ्य ।

पुरातना लोहितशालयश्च क्षारो यवान्नानि च तीक्ष्णमुष्णम् । तक्रं पयो दध्यपि गोप्रसुतं धन्वामिषं मुद्गरसाः सिता च ॥ ३५ ॥ पुराणकूष्माण्डफलं पटोलं महार्द्रकं गोक्षुरकं कुमारी । गुवाकखर्ज्जूरकनारिकेलतालद्रुमाणां च शिरांसि पथ्या ॥ ३६ ॥ तालास्थिमज्जा त्रपुषं त्रुटिश्च शीतानि पानान्यशनानि चापि । प्रणीरनीरं हिमवालुका च हितं नृणां स्यात्प्रति मूत्रकृच्छ्रे॥३७॥

पुराने लाल शालिके चावल, जवाखार आदि खार द्रव्य, जौका भोजन, तीक्ष्ण और गरम पदार्थ, मट्ठा, गौका दूध, दही, मरुदेशके जीवोंका मांस

रस, भृंगका यूष, मिश्री, पुराना पेठा, परवल, वन अदरख, गोखुरू, घीग्वार, सुपारी, खजूर, नारियल, ताडके वृक्षोंकी गिरी, हरड, ताडके फलोंका गूदा, खीरा, छोटी इलायची, शीतल अन्न पान, शीतल जल और कपूर ये सब वस्तुयें मूत्रकृच्छ्र-रोगमें हितकारी हैं ॥ ३५–३७ ॥

मूत्रकृच्छ्रमें अपथ्य ।

मद्यं श्रमं निधुवनं गजवाजियानं सर्वं विरुद्धमशनं विषमाशनं च । ताम्बूलमत्स्यलवणार्द्रकतैलभृष्टंपिण्या-कहिङ्गुतिलसर्षपवेगराधान् ॥ माषान् करीरमतितीक्ष्ण-विदाहिरूक्षमम्लं तु मुञ्चतु जनः सति मूत्रकृच्छ्रे ॥ ३८ ॥

मूत्रकृच्छ्ररोग होनेपर रोगी मद्यपान, परिश्रम, मैथुन, हाथी या घोडेकी सवारी, सर्वप्रकारके विरुद्ध भोजन, विषम भोजन, ताम्बूलचर्वण, मछली, लवण, अदरख, तेलके भुने द्रव्योंका भक्षण, खल, हींग, तिल, सरसोंका सेवन, मल मूत्रादिके वेगको रोकना, उडद, बाँसके कल्ले, अत्यन्त तीक्ष्ण-दाहकारी, रूखे और अम्लरस-युक्त पदार्थोंको तत्काल त्याग देवे ॥ ३८ ॥

इति भैषज्यरत्नावल्यां मूत्रकृच्छ्रचिकित्सा ॥

मूत्राघातकी चिकित्सा

मूत्राघातान् यथादोषं मूत्रकृच्छ्रहरैर्जयेत् ।
वस्तिमुत्तरवस्तिं च दद्यात्स्निग्धविरेचनम् ॥ १ ॥

मूत्राघातमें वातादिदोषोंको विचारकर, मूत्रकृच्छ्रनाशक औषधियोंसे विधिपूर्वक चिकित्सा करे एवं बस्ति और उत्तरवस्तिका प्रयोग तथा रोगीको स्निग्ध कर विरेचन देवे ॥ १ ॥

कल्कमेर्वारुबीजानामक्षमात्रं ससैन्धवम् ।
धान्याम्लयुक्तं पीत्वैव मूत्राघाताद्विमुच्यते ॥ २ ॥

ककडीके बीजोंके २ तोले कल्क और सैंधेनमकको काँजीमें मिलाकर पीते ही मूत्राघातरोग नष्ट होता है ॥ २ ॥

यवक्षारं गुडोन्मिश्रं पिबेत्पुष्पफलोद्भवम् ।
रसं मूत्रविबन्धघ्नं शर्कराश्मरिनाशनम् ॥ ३ ॥

पेठेके स्वरसमें जवाखार और पुराना गुड मिलाकर सेवन करनेसे मूत्राघात, शर्करा और अश्मरीरोग नष्ट होते हैं ॥ ३ ॥

सपत्रफलमुलस्य क्वाथं गोक्षुरकस्य च ।
पिबेन्मधुसितायुक्तं मूत्राघातादिरोगनुत् ॥ ४ ॥

पत्र, फल और जडसहित गोखरूके क्वाथको बनाकर शहद और मिश्री मिलाकर पीवे तो मूत्राघात, मूत्रकृच्छ्र और अश्मरीरोग दूर होते हैं ॥ ४ ॥

नलकुशकाशेक्षुशिफां क्वथितां प्रातः सुशीतलां ससिताम् ।
पिबतः प्रयाति नियतं मूत्रग्रह इत्युवाच कचः ॥ ५ ॥

नल, कुश, काँस और ईखकी जड इनका क्वाथ बनालेवे। शीतल होनेपर इसको मिश्री डालकर प्रातःकाल पीनेसे मूत्राघात निश्चय दूर होता है, ऐसा कचऋषिने कहा है ॥ ५ ॥

बिम्बीमूलं च संपिष्टं काञ्जिकेन समन्वितम् ।
नाभिलेपनमात्रेण मूत्ररोधं निहन्ति च ॥ ६ ॥

कन्दूरीकी जडको काँजीमें पीसकर नाभिके ऊपर लेप करनेसे मूत्राघात रोग दूर होता है ॥ ६ ॥

मूत्रे विबन्धे कर्पूरचूर्णं लिंगे प्रवेशयेत् ।
कूष्माण्डकरसो वापि पेयः सक्षारशर्करः ॥ ७ ॥

मूत्राघात होनेपर कपूरके बारीक पिसे चूर्णको लिङ्गके छिद्रमें प्रवेश करे अथवा पेठेके रसको जवाखार और खांड डालकर पीवे तो इससे पेशाब खुलकर आता है ॥ ७ ॥

जलेन खदिरीबीजं मूत्राघाताश्मरीहरम् ।
मूलं रुद्रजटायाश्च तक्रपीतं तदर्थकृत् ॥ ८ ॥

खैरीशाकके बीजोंको जलमें पीसकर एवं रुद्रजटाकी जडको मट्ठेके साथ पीसकर पान करे तो मूत्राघात और अश्मरीरोग दूर होते हैं ॥ ८ ॥

शृतशीतपयोऽन्नाशी चन्दनं तण्डुलाम्बुना ।
पिबेत्सकरं श्रेष्ठमुष्णवातविनाशनम् ॥ ९ ॥

लाल चन्दनको चावलोंके जलमें घिसकर उसमें मिश्री डालकर पीवे। पश्चात् औटाकर शीतल किये हुए दूधके साथ भोजन करे तो उष्णवात (मूत्राघात विशेष) रोग नष्ट होता है ॥ ९ ॥

गोधावल्या मूलं क्वथितं घृततैलगोरसोन्मिश्रम्।
पीतं निरुद्धमचिराद्भिनत्ति मूत्रस्य संरोधम्॥ १०॥

गोधापदी (कालीमुसली) की जडका क्वाथ बनाकर उसमें घृत, तेल और गौका दूध डालकर पीनेसे बहुत पुराना मूत्राघातरोग शीघ्र नष्ट भ्रष्ट होता है॥ १०॥

धान्याम्ललवणोपेतं सूतं यश्च पिबेन्नरः।
तस्य नश्यन्ति वेगेन मूत्राघातास्त्रयोदश॥ ११॥

काँजी और सैंधेनमकमें शुद्ध पारेको मिलाकर पीवे तो तेरह प्रकारके मूत्राघातरोग तत्काल नष्ट होते हैं॥ ११॥

धान्यगोक्षुरकघृत।

धान्यगोक्षुरकक्वाथकल्कयुक्तं घृतं हितम्।
मूत्राघाते मूत्रदोषे शुक्रदोषे च दारुणे॥ १२॥

धनियाँ दो सेर और गोखुरू दो सेर इन दोनोंको १६ सेर जलमें औटावे। जब पकते पकते चार सेर जल बाकी रहे तब उतारकर छानलेवे फिर इस क्वाथमें घृत २ सेर और धनियाँ तथा गोखुरूका कल्क सोलह सोलह सेर डालकर यथाविधि घृत को सिद्ध करे। यह घृत मूत्राघात, मूत्रकृच्छ्र और दारुण वीर्यदोष में विशेष हितकर है॥ १२॥

मूत्राघातमें पथ्य।

अभ्यञ्जनस्नेहविरेकवस्तिस्वेदावगाहोत्तरवस्तयश्च।
पुरातना लोहितशालयश्च मांसानि धन्वप्रभवानि मद्यम्॥ १३॥
तक्रं पयो दध्यपि माषयूषः पुराणकूष्माण्डफलं पटोलम्।
महार्द्रकं तालफलास्थिमज्जा हरीतकी कोमलनारिकेलम्॥ १४॥
गुवाकखर्जूरकनारिकेलतालद्रुमाणामपि मस्तकानि।
यथामलं सर्वमिदं च मूत्राघातातुराणां हितमावहन्ति॥ १५॥

मूत्राघातवाले रोगियोंको तेल मलना, स्नेह (घृतादि) का पान, विरेचन और वस्तिक्रिया, स्वेद देना, शीतल जलमें घुसकर स्नान, उत्तरवस्ति प्रयोग पुराने लाल शालिके चावल, धन्वदेशोत्पन्न पशु पक्षियोंके मांसका रस, उडदका यूष, मदिरा, मट्ठा, गौका दूध, दही, पुराना पेठा, परवल, वन अदरख, ताडके फलोंकी गुठलीकी मींग, हरड, कच्चा नारियल, सुपारी, खजूर, नारियल और ताडके वृक्षों के अंकुर ये सब पदार्थ हितकारी हैं॥ १३-१५॥

मूत्राघातमें अपथ्य।

विरुद्धानि च सर्वाणि व्यायामं मार्गशीलनम्।
रूक्षं विदाहि विष्टम्भि व्यवायं वेगधारणम्॥
करीरं वमनं चापि मूत्राघाती विवर्जयेत्॥ १६॥

सर्व प्रकारके विरुद्ध भोजन, व्यायाम (कसरत आदि), रास्ता चलना, रूखे, दाहकारक और विष्टम्भकारक द्रव्योंका सेवन, स्त्रीप्रसङ्ग, मल मूत्रादिके वेगको धारण करना, बाँसके अंकुरोंको भक्षण करना और वमन करना इन समस्त पदार्थों व क्रियाओंको मूत्राघातवाला रोगी शीघ्र छोडदेवे॥ १६॥

इति भैषज्यरत्नावल्यां मूत्राघातचिकित्सा।

अश्मरीकी चिकित्सा।

सगुडो वरुणक्वाथस्तत्कल्केनाथवाऽन्वितः।
शिग्रुक्वाथोथवाऽत्युष्णो हन्त्याशु सरुगश्मरीम्॥ १॥

वरनाकी छालके क्वाथ या कल्कके साथ गुड मिलाकर सेवन करे अथवा सहिंजनेकी जडका गरम गरम क्वाथ पान करे तो पीडासहित अश्मरीरोग शीघ्र नष्ट होता है॥ १॥

त्रिकण्टकस्य बीजानां चूर्णं माक्षिकसंयुतम्।
अजाक्षीरेण सप्ताहं पेयमश्मरिभेदनम्॥ २॥

गोखुरूके बीजोंके चूर्णको शहद और बकरीके दूधके साथ मिलाकर एक सप्ताह पर्यन्त सेवन करनेसे पथरी नष्ट होती है॥ २॥

प्रपिबेत्तालमुल्या वा कल्कं व्युषितवारिणा।
तेनैवाथ गवाक्ष्या वा त्र्यहादश्मरिशातनम्॥ ३॥

मुसली अथवा इन्द्रायनकी जडके चूर्णको बासी जलमें पीसकर पीवे तो तीन दिनमें पथरी गलकर निकल पडती है॥ ३॥

यो नारिकेलकुसुमं सक्षारं वारिणा पिष्ट्वा।
पिबति हि तस्य दिनैकान्निपतति घोराऽश्मरी नूनम्॥४॥

यदि नारियलके पुष्प और जवाखारको जलमें पीसकर पीवे तो दारुण पथरी एक दिनमेंही निश्चय छिन्नभिन्न होकर निकल जाती है॥ ४॥

वरुणादि ।

वरुणस्य त्वचं श्रेष्ठां शुण्ठीगोक्षुरसंयुताम् ।
यवक्षारं गुडं दत्त्वा क्वाथयित्वा जलं पिबेत् ॥
अश्मरीं वातजां हन्ति चिरकालानुबन्धिनीम् ॥ ५ ॥

उत्तम वरनाकी छाल, सोंठ, गोखुरूके बीज इनका क्वाथ बनाकर उसमें जवाखार व गुड डालकर पान करे । इससे वातजन्य बहुत पुरानी पथरी दूर होती है ५॥

बृहद्वरुणादि ।

वारुणं वल्कलं शुण्ठी बीजं गोक्षुरसम्भवम् ।
तालमूली कुलत्थं च कुशादिपञ्चमूलकम् ॥ ६ ॥
शर्कराक्षारसंयुक्तं क्वाथयित्वा जलं पिबेत् ।
अश्मरीमूत्रकृच्छ्रघ्न वस्तिमेहनशूलनुत ॥ ७ ॥

वरनाकी छाल, सोंठ, गोखुरूके बीज, मुसली, कुलथी और कुशादि तृणपञ्चमूल इनके यथाविधि क्वाथको बनाकर चीनी और जवाखार मिश्रित करके पान करनेसे पथरी, मूत्रकृच्छ्र, वस्तिशूल और लिंगशूल नाश होता है ॥ ६ ॥ ७ ॥

शुंठ्यादि ।

शुण्ठ्यग्निमन्थपाषाणशिग्रुवरुणगोक्षुरैः ।
काश्मर्यारग्वधफलैः क्वाथं कृत्वा विचक्षणः ॥ ८ ॥
रामठक्षारलवणचूर्णं दत्त्वा पिबेन्नरः ।
अश्मरीमूत्रकृच्छ्रघ्नं दीपनं पाचनं परम् ॥ ९ ॥

सोंठ, अरणी, पाषाणभेद, सहिंजनेकी छाल, वरनाकी छाल, गोखुरू, कुम्भेरकी छाल और अमलतास इनको समान भाग लेकर क्वाथ बनालेवे । फिर इस क्वाथमें हींग, जवाखार और सैंधेनमकका चूर्ण डालकर पीवे तो अश्मरी, मूत्रकृच्छ्र और समस्त वातविकार दूर होते हैं एवं जठराग्नि दीप्त होती है और पाचन होती है ॥ ८ ॥ ९ ॥

एलादि ।

एलोपकुल्यामधुकाश्मभेदकौन्तीश्वदंष्ट्रावृषकोरुबूकैः ।
शृतं पिबेदश्मजतु प्रगाढं सशर्करे चाश्मरिमूत्रकृच्छ्रे॥१०॥

इलायची, पीपल, मुलहठी, पाषाणभेद, रेणुका, गोखुरू अडूसेकी छाल और अण्डकी अश्मरी जड इनके क्वाथको विधिपूर्वक प्रस्तुत करके शिलाजीत डालकर पीनेसे शर्करा और मूत्रकृच्छ्ररोगमें शीघ्र लाभ होता है ॥ १० ॥

वीरतर्वादिगण।

वीरतरुसहचरद्वयदर्भवृक्षादनी-
गुन्द्रानलकुशकाशाश्मभेदकाग्निमन्थाः।
मोरटवसुकवसिरभल्लूककुरुण्ट-
केन्दीवरकपोतवङ्काः श्वदंष्ट्रा चेति ॥ ११ ॥
वीरतर्वादिरित्येष गणो वातविकारनुत्।
अश्मरीशर्कराकृच्छ्रमूत्राघातरुजापहः ॥ १२ ॥

वीरवृक्ष, नीलीकटसरैया, लालकटसरैया, दर्भ, बाँदा, गुन्द्रा (तृणविशेष), नल सर, कुश, काँस, पाषाणभेद, अरणी, ईसकी जड, आककी जड, गजपीपल, सोनापाठेकी छाल, पीला पियाबाँसा, नीलकमल, ब्राह्मी और गोखुरू ये वीरतर्वादिगणकी समस्त औषधियें समान भाग लेकर क्वाथ बनालेवे। इस क्वाथको प्रतिदिन सेवन करनेसे वातजन्य विकार, शर्करा, मूत्रकृच्छ्र और मूत्राघातरोग दूर होते हैं ॥ ११ ॥ १२ ॥

आनन्दयोग।

तिलापामार्गकदलीपलाशामलकाण्डकान्।
दग्ध्वा तद्भस्मतोयं तु वस्त्रपूतं च कारयेत् ॥ १३ ॥
तत्पचेत्तोयशेषं तु ततश्चूर्णं द्विगुञ्जकम्।
पाययेदविमूत्रेण शर्कराश्मरिजिद्भवेत् ॥ १४ ॥

तिल चिरचिटा, केला, ढाक और आमले इनके वृक्षोंके गुद्दोंको लेकर भस्म करलेवे। फिर इन सबकी समानांश मिश्रित भस्म दो सेर और जल ३२ सेर एकत्रकर पकावे। जब पकते २ जल ८ सेर शेष रहजाय तब उतारकर छानलेवे। तदनन्तर इस क्षारजलको दूसरी बार पकावे। जब पानी सब जलजाय तब उतारकर पात्रमेंसे खारको खुरचलेवे। इस खारको नित्यप्रति प्रातःकाल दो रत्ती प्रमाण लेकर भेडके या बकरीके मूत्रमें मिलाकर सेवन करे तो शर्करा और पथरीरोग नष्ट होता है ॥ १३ ॥ १४ ॥

बृहद्गोक्षुराद्यवलेह ।

गोक्षुरकं पलशतं दशमूलं तथैव च ।
पाषाणभेदोऽष्टपलं गुडूची पलपञ्चकम् ॥ १५ ॥
एरण्डाभीर्वोरष्टौ च पलान्येव पृथक् दश ।
सर्वमेकत्र संकुट्य जलद्रोणे विपाचयेत् ।
पद्ममूलं चाश्वगन्धा प्रत्येकं पलविंशतिः ॥ १६ ॥
सर्वमेकत्र संकुट्य जलद्रोणे विपाचयेत् ।
पादशेषं तु संगृह्य वस्त्रपूतं समाक्षिपेत् ॥ १७ ॥
गव्याज्यं प्रस्थमेकं तु शिलाजं च तथा स्मृतम् ।
घनीभूते तु सञ्जाते द्रव्याणीमानि दापयेत् ॥ १८ ॥
तालमूली शताह्वा च त्रिकटु त्रिफला तथा ।
सूक्ष्मैला भूतकेशी च ह्रीबेरं नागकेशरम् ॥ १९ ॥
पद्मकं जातिपत्रत्वग्मधुयष्टी सरोचना ।
जातीफलमुशीरं च त्रिवृता रक्तचन्दनम् ॥ २० ॥
धान्यकं कटुका क्षारी नागवल्ली च शृङ्गिका ।
पुष्कराह्वं शठी दारु सीसं लौहं च वङ्गकम् ॥ २१ ॥
द्रव्याणीमानि संगृह्य प्रत्येकं पलमात्रकम् ।
स्निग्धभाण्डे निधाय-

गोखुरू १०० पल, दशमूलकी ओषधियाँ १०० पल, पाषाणभेद ८ पल गिलोय ५ पल, अण्डकी जड ८ पल, शतावर १० पल, पद्ममूल (भसींडा) २० पल और असगन्ध २० पल इन सबको एकत्र कूटकर ३२ सेर जलमें पकावे । जब ८ सेर जल शेष रहे तब उतारकर कपडेमें छानलेवे । फिर इस क्वाथमें गौका घी एक प्रस्थ (६४ तोले) और शिलाजीत एक प्रस्थ डालकर यथाविधि पाक करे । पकते पकते जब अवलेहकी समान गाढा होजाय तब उसमें मुसली, साफ, त्रिकुटा; त्रिफला, छोटी इलायची, भूतकेशीकी जड, सुगन्धवाला, नागकेशर, पद्माख, जावित्री, दारचीनी, मुलहठी, गोरोचन, जायफल, खस, निसोत, लालचन्दन, धनियाँ, कुटकी, जवाखार, सज्जी, पान, काकडासिंगी, पोहकरमूल, कचूर, देवदारु, शीसा, लोहा और वंगभस्म इन औषधियोंको चार चार तोले लेकर बारीक चूर्ण करके घीके चिकने बासनमें भरकर रखदेवे ।

—अथ नित्यं लिह्यात्पलोन्मितम् ॥ २२ ॥
खादेद्बलाग्निं संप्रेक्ष्य पथ्यं सेवेत मानवः ।
अश्मरीं मूत्रकृच्छ्रं च मूत्राघातो विबन्धता ॥ २३ ॥
प्रमेहं विंशतिं चैव शुक्रदोषस्तथैव च ।
धातुक्षयश्चोष्णवातो वातकुण्डलिकादयः ॥ २४ ॥
ते सर्वे प्रशमं यान्ति भास्करेण तमो यथा ।
नातः परतरं किञ्चित्कृष्णात्रेयेण पूजितः ॥ २५ ॥

तदनन्तर नित्यप्रति प्रातःकाल उठकर ईश्वरस्मरण करके इसमेंसे चार चार तोले परिमाण अथवा अपनी अग्निके बलाबलको विचारकर भक्षण करे । इसपर हलका और हितकारी भोजन करे । इसके सेवन करनेसे पथरी, मूत्रकृच्छ्र, मूत्राघात, विबन्ध, बीस प्रकारके प्रमेह, वीर्यदोष, धातुक्षीणता, उष्णवात और वातकुण्डलिकाप्रभृति सम्पूर्ण रोग इसप्रकार नाश होते हैं, जैसे सूर्यकी प्रभासे अन्धकार तत्काल नष्ट होजाता है । उक्त रोगोंको नष्ट करनेके लिये इससे श्रेष्ठ और कोई औषधि नहीं है । इसको कृष्णात्रेय मुनिने निर्माण किया है ॥ २२–२५ ॥

पाषाणभिन्न ।

शुद्धसूतं द्विधा गन्धं शिलाजतु रसात्पलम् ।
श्वेतपुनर्नवावासारसैः श्वेतापराजितैः ॥ २६ ॥
प्रतिदिनं त्र्यहं मर्द्यं शुष्कं तद्भाण्डसम्पुटे ।
स्वेदयेद्दोलिकायन्त्रे संशुष्कं तं विचूर्णयेत् ॥ २७ ॥
रसः पाषाणभिन्नः स्याद्द्विगुञ्जश्चाश्मरीं हरेत् ।
भूधात्रीफलविशालां पिष्ट्वा दुग्धेन पाययेत् ॥
कुलत्थक्वाथसंपीतमनुपानं सुखावहम् ॥ २८ ॥

शुद्ध पारा ४ तोले, शुद्ध गन्धक ८ तोले और शिलाजीत ४ तोले इनको एकत्रकर सफेद पुनर्नवा, अडूसेके पत्तों और सफेद अपराजिताके पत्तोंके रसमें एक एक दिन अच्छे प्रकार खरल करके सुखालेवे । फिर मिट्टीके चिकने बर्त्तनमें रख मुख बन्द करके दोलायन्त्रसे स्वेद देवें । पश्चात् उसको निकालकर उत्तम प्रकारसे सुखाकर खूब बारीक पीसलेवे । इस प्रकार यह पाषाणभिन्ननामक रस सिद्ध होता है । इसकी प्रतिदिन प्रातःसमय दो दो रत्ती मात्राको ले भुंईआमला और इन्द्रायणके फलोंको दूधमें पीसकर इसमें मिलालेवे अथवा कुलथीके

क्वाथमें मिलाकर सेवन करनेसे अश्मरीरोग शीघ्र नष्ट होता है और रोगी आनन्द होजाता है ॥ २६-२८ ॥

पाषाणवज्ररस ।

शुद्धसूतं द्विधा गन्धं रसैः श्वेतपुनर्नवैः ।
मर्दयित्वा दिनं खल्वे रुद्धा तद्भूधरे पचेत् ॥ २९ ॥
दिनान्ते तत्समुद्धृत्य मर्दयेद् गुडसंयुतम् ।
अश्मरीं वस्तिशूलं च हन्ति पाषाणवज्रकः ॥ ३० ॥
गोरक्षकर्कटीमूलं क्वाथं कौलत्थकं तथा ।
अनुपानं प्रयोक्तव्यं बुद्ध्वा दोषबलाबलम् ॥ ३१ ॥

शुद्ध पारा एक भाग और गन्धक दो भाग इन दोनोंको सफेद पुनर्नवेके रसमें एकदिन खरलकर सम्पुटमें स्थापन करके भूधरयन्त्रमें पकावे। जब अच्छे प्रकार पककर शीतल होजाय तब सायंकालमें इसको निकालकर गुड मिलाकर पुनः खरल कर लेवे। इस प्रकार सिद्ध किया हुआ यह पाषाणवज्र नामवाला रस गोरखककडीकी जडके और कुलथीके क्वाथके साथ मिलाकर तथा वातादि दोषोंके बलाबलको विचारकर सेवन करनेसे पथरी और वस्तिशूल रोगको नष्ट करता है ॥ २९-३१ ॥

वरुणाद्यलौह ।

द्विपलं वरुणं धात्र्यास्तदर्द्धं धातिपुष्पकम् ।
हरीतक्याः पलार्द्धं च पृश्निपर्णं तदर्द्धकम् ॥ ३२ ॥
कर्षमानं च लौहाभ्रं चूर्णमेकत्र कारयेत् ।
भक्षयेत्प्रातरुत्थाय शाणमानं विधानवित् ॥ ३३ ॥
मूत्राघातं तथा घोरं मूत्रकृच्छ्रं च दारुणम् ।
अश्मरीं विनिहन्त्याशु प्रमेहं विषमज्वरम् ॥ ३४ ॥
बलपुष्टिकरं चैव वृष्यमायुष्यमेव च ।
वरुणाद्यमिदं लौहं चरकेण विनिर्म्मितम् ॥ ३५ ॥

बरनाकी मींग ८ तोले, आमले ८ तोले, धायके फूल ४ तोले, हरड दो तोले, पृश्निपर्णी एक तोला, लोहे और अभ्रककी भस्म एक एक कर्ष लेवे। सबको एकत्र कूटपीसकर बारीक चूर्ण करलेवे। इस चूर्णको प्रतिदिन प्रातःकाल उठकर चार चार माशेकी मात्रासे सेवन करे। इसके सेवनसे घोर मूत्राघात, दारुण

मूत्रकृच्छ्र, पथरी, प्रमेह और विषमज्वर इत्यादि विकार अल्पकालमें शमन होते हैं तथा बल, वीर्य और आयु बढ़ती है एवं शरीरकी पुष्टि होती है। इस वरुणाद्य लोहको चरकमहाराजने निर्माण किया है ॥ ३२-३५ ॥

कुलत्थाद्यघृत ।

कुलत्थसिन्धूत्थविडङ्गसारसं सशर्करं शीतलि यावशूकम् ।
बीजानि कूष्माण्डकगोक्षुराणां घृतं पचेत्तद्वरुणस्य तोये॥३६॥
दुःसाध्यसर्वाश्मरिमूत्रकृच्छ्रं मूत्राभिघातं च समूत्रबन्धम् ।
एतानि सर्वाणि निहन्ति शीघ्रं प्ररूढवृक्षानिव वज्रपातः ३७

कुलथी, सेंधानमक, वायविडङ्गके चावल, खाँड, शीतलि (शीतलीलता), जवाखार, पेठेके और गोखुरूके बीज ये प्रत्येक चार चार तोले लेवे और सबको एकत्र कूट पीसकर कल्क बनालेवे। फिर चतुर्भागावशिष्ट बनाये हुए वरनाके क्वाथमें इस कल्कको और गौके घृतको डालकर उत्तम रीतिसे पकावे। इस घृतको नियमबद्ध हो सेवन करनेसे दुःसाध्य पथरी, मूत्रकृच्छ्र, मूत्राघात और मूत्रावरोधादि सर्वप्रकारके मूत्ररोग इस प्रकार नष्ट होते हैं, जैसे कि अत्यन्त मजबूत जडवाले वृक्षोंको वज्र तत्काल नष्ट करदेता है ॥ ३६ ॥ ३७ ॥

वरुणघृत ।

वरुणस्य तुलां क्षुण्णां जलद्रोणे विपाचयेत् ।
पादशेषं परिस्राव्य घृतप्रस्थं विपाचयेत् ॥ ३८ ॥
वरुणं कदली बिल्वं तृणजं पञ्चमूलकम् ।
अमृता चाश्मजं देयं बीजं च त्रपुषोद्भवम् ॥ ३९ ॥
शतपर्वा तिलक्षारं पलाशक्षारमेव च ।
यूथिकायाश्च मूलानि कार्षिकाणि समावपेत् ॥ ४० ॥

वरनाकी छाल १०० पल लेकर कूटके, फिर उसको ३२ सेर जलमें पकावे। पकते २ जब चौथाई भाग जल शेष रहजाय तब उतारकर वस्त्रमें छानलेवे। इस क्वाथमें गौका घी १ प्रस्थ एवं वरनाकी छाल, केलेकी जड, बेलकी छाल, तृणपञ्चमूल, गिलोय, शुद्ध शिलाजीत, खीरेके बीज, ईखकी जड, तिलोंका खार, ढाकका क्षार और जुहीकी जड; ये प्रत्येक औषधि दो दो तोले बारीक पीसकर डालदेवे और मन्दमन्द अग्निके द्वारा शनैः शनैः घृतको सिद्ध करे ॥

अस्य मात्रां पिबेज्जन्तुर्देशकालव्यपेक्षया ।
जीर्णे तस्मिन्पिबेत्पूर्वं गुडं जीर्णं तु मस्तुना ॥
अश्मरीं शर्करां चैव मूत्रकृच्छ्रं विनाशयेत् ॥ ४१ ॥

पश्चात् देश तथा कालको विचारकर इसकी मात्राका निरूपण करके सेवन करना चाहिये । जिस समय घृत पचजाय तब पुराने गुडको दहीके तोडके साथ मिलाकर पान करे । इससे पथरी, शर्करा और मूत्रकृच्छ्र प्रभृति अनेकों रोग दूर होते हैं ॥ ४१ ॥

पाषाणाद्यघृत ।

पाषाणभेदो वसुको वसिरोऽश्मन्तकस्तथा ।
शतावरी श्वदंष्ट्रा च बृहती कण्टकारिका ॥ ४२ ॥
कपोतवङ्कार्त्तगलकाञ्चनोशीरगुल्मकाः ।
वृक्षादनी भल्लूकश्च वरुणः शाकजं फलम् ॥ ४३ ॥
यवाः कुलत्थाः कोलानि कतकस्य फलानि च ।
ऊषकादिप्रतीवापमेषां क्वाथे शृतं घृतम् ॥ ४४ ॥
भिनत्ति वातसम्भूतामश्मरीं क्षिप्रमेव तु ।
क्षारान् यवागूः पेयांश्च कषायाणि पयांसि च ॥
भोजनानि च कुर्वीत वर्गेऽस्मिन्वातनाशने ॥ ४५ ॥

पाषाणभेद, आककी जड, गजपीपल, अश्मन्तक (अम्लोन), शतावर, गोखरू, बडी कटेरी, कटेरी, ब्राह्मी, नील फूलकी कटसरैया, कचनारकी छाल खस, गुल्मक (लाल करवीरवृक्ष), बन्दा, सोनापाडेकी छाल, वरनाकी छाल, सागौनके फल, जौ, कुलथी, बेर और निर्मलीके फल ये सब औषधें समान भागसे मिलीहुई चार सेर लेवे । पुनः सबको ३२ सेर जलमें पकाकर चतुर्थांश जल शेष रहनेपर उतारले । पश्चा वस्त्रमें छानकर इस क्वाथमें ऊषकादिगण (खारी मिट्टी, सैंधानमक, हींग, पुष्पकसीस, धातुकसीस, गुगल, शिलाजीत और नीलाथोथा,) की ओषधियोंकी समभाग मिश्रित चूर्ण एक सेर और गोघृत ४ सेर डालकर उत्तम विधिसे पकावे । जब अच्छी तरह पककर घृतमात्र शेष रहजाय तब उतारकर चिकने बासनमें भरकर रख देवे । इसके सेवनसे वातोत्पन्न पथरी तत्क्षण नष्ट भ्रष्ट होती है । इस घृतको सेवन करते समय क्षार, यवागू, पेया, क्वाथ, दूध और वातनाशक द्रव्योंका भोजन करे ॥ ४२-४५ ॥

भद्रावहघृत ।

अम्बष्ठा पाटला चैव वर्षाभूद्वयमेव च ।
काशो विदारीकन्दश्च कुशमोरटगोक्षुराः ॥ ४६ ॥
पाषाणभेदी वाराही शालिमूलं शरस्तथा ।
भल्लातकं शिरीषस्य मूलमेषामथाहरेत् ॥ ४७ ॥
समभागानि सर्वाणि क्वाथयित्वा विचक्षणः ।
पादशेषकषायेण घृतप्रस्थं विपाचयेत् ॥ ४८ ॥
कल्कं दत्त्वाऽथ मतिमान् गिरिजं मधुकं तथा ।
नीलोत्पलं च काकोलीबीजं त्रपुषमेव च ॥ ४९ ॥
कूष्माण्डं च तथैवारुसम्भवं च समं भवेत् ।
उष्णवातं निहन्त्येतद् घृतं भद्रावहं शुभम् ॥
मूत्राघाताश्मरीमेहान्भास्करस्तिमिरं यथा ॥ ५० ॥

पाढ, पाढल, श्वेत पुनर्नवा, लालपुनर्नवा, काँस, विदारीकन्द, कुशा, ईखकी जड, गोखुरू, पाषाणभेद, वाराहीकन्द, शालिके चावलोंकी जड, रामसर, भिलावे और शिरीषकी जड इन सबको समान भाग लेकर चौगुने जलमें पकावे। चतुर्भागावशिष्ट क्वाथको ग्रहण कर उसमें गोघृत १ प्रस्थ एवं भूरिछरीला, मुलहठी, नीलकमल, काकोली, खीरेके बीज, पेठेके और ककडीके बीज इनके समान भाग कल्कको डालकर उत्तम प्रकार घृतको सिद्ध करे। यह भद्रावहनामवाला उत्तम घृत उष्णवात (सोजाक), मूत्राघात, पथरी और प्रमेहादि व्याधियोंको शीघ्र नाश करताहै। जैसे सूर्य अन्धकारको भेद देताहै ॥ ४६–५० ॥

विदारीघृत ।

विदारी वृषको यूथी मातुलुङ्गी च भूस्तृणम् ।
पाषाणभेदं कस्तूरी वसुको वसिरोऽनिलः ॥ ५१ ॥
पुनर्नवा वचा रास्ना बला चातिबला तथा ।
कशेरुविश्वशृङ्गाटतामलक्याः स्थिरादयः ॥ ५२ ॥
शरेक्षुदर्भमूलं च कुशः काशस्तथैव च ।
पलद्वयं तु संहृत्य जलद्रोणे विपाचयेत् ॥ ५३ ॥
पादशेषे रसे तस्मिन् घृतप्रस्थं विपाचयेत् ।
शतावर्यास्तथा धात्र्याः स्वरसो घृतसम्मितः ॥ ५४ ॥

षट्पलं शर्करायाश्च कार्षिकाण्यपराणि च ।
यष्ट्याह्वं पिप्पलीद्राक्षा काश्मर्यं सपरूषकम् ॥ ९५ ॥
एला त्वगालमा कौन्ती कुङ्कुमं नागकेशरम् ।
जीवनीयानि चाष्टौ च दत्त्वा च द्विगुणं पयः ॥
एतत्सर्पिर्विपक्तव्यं शनैर्मृद्वग्निना बुधैः ॥ ९६ ॥

विदारीकन्द, अडूसेकी छाल, जुही, बिजौरानिंबू, गन्धतृण, पाषाणभेद, कस्तूरी, आककी जड गजपीपल, चीतेकी जड, विषखपरा, वच, रास्सन, खिरैंटी, कैथी, कसेरू, भसींडे, सिंवाडे, भुईंआमला, शालपर्णी आदि, स्थिरादिगणकी समस्त ओषधियाँ, रामसर, ईखकी जड, डाभकी जड, कुशा और कास इन सबको आठ आठ तोले लेकर कूटकर एक द्रोण (३२ सेर) जलमें औटावे । जलते २ जब चौथाई भाग जल शेष रहे तब उतारकर वस्त्रमें छान लेवे । पुनः उस क्वाथमें गौका घी एक प्रस्थ, शतावरका रस एक प्रस्थ, आमलोंका रस एक प्रस्थ, सफेद बूरा या मिश्री २४ तोले एवं मुलहठी, पीपलदाख, कुम्मेर, फालसे, इलायची, धमासा, रेणुका, केशर, नागकेशर और जीवनीयगण (ऋद्धि, वृद्धि, मेदा, महामेदा, काकोली, क्षीरकाकोली, जीवक और ऋषभक) ये सब औषधें दो दो तोले लेकर बारीक कूट पीसकर डालदेवे और गौका दूध दो प्रस्थ डालकर मन्दमन्द अग्निद्वारा यथाविधि शनैः शनैः घृतको पकावे । इस प्रकार घृतको सिद्ध करके उत्तम पात्रमें भरकर रख देवे ॥ ९१–९६ ॥

मूत्राघातेषु सर्वेषु विशेषात्पित्तजेषु च ॥ ९७ ॥
कासश्वासक्षतोरस्के धनुःस्त्रीभारकर्शिते ।
तृष्णाच्छर्दिमनःकम्पे शोणितच्छादने तथा ॥ ९८ ॥
रक्ते यक्ष्मण्यपस्मारे तथोन्मादे शिरोग्रहे ।
योनिदोषे रजोदोषे शुक्रदोषे सुरामये ॥ ९९ ॥
एतत्स्मृतिकरं वृष्यं वाजीकरणमुत्तमम् ।
पुत्रदं बलवर्णाढ्यं विशेषाद्वातनाशनम् ॥ ६० ॥
पानभोजननस्येषु न क्वचित्प्रतिहन्यते ।
विदारीघृतमित्युक्तं रसयनुत्तमम् ॥६१ ॥

यह घृत सम्पूर्ण मूत्राघात, विशेषकर पित्तज मूत्ररोग, खाँसी, श्वास, क्षत, उरःक्षत, धनुषके चढानेसे, अत्यन्त मैथुन करनेसे या अत्यन्त बोझ उठानेसे उत्पन्नहुई कृशता,

प्यास, वमन, मनोव्याधि, कम्प, रुधिरकी वमन, रक्तस्राव, राजयक्ष्मा, मृगी, उन्माद, शिरोरोग, योनिदोष, रजोदोष, वीर्यदोष और स्वरभङ्गप्रभृति रोगोंमें शीघ्र उपकार करता है । स्मरणशक्ति और वीर्यको बढाता है तथा अत्यन्त वाजीकरण, पुत्रदायक, बल-वर्णवर्द्धक एवं विशेषकर वायुके विकारोंको नष्ट करनेवाला है । इस घृतको पान, भोजन और नस्यमें व्यवहार करना चाहिये । यह अत्युत्तम रसायन विदारीघृतनामसे प्रसिद्ध है ॥ ५७-६१ ॥

वरुणाद्य तैल ।

त्वक्पत्रपुष्पमूलस्य वरुणास्यत्रिकण्टकात् ।
कषायेण पचेत्तैलं वस्तिनाऽऽस्थापनेन च ॥
शर्कराश्मरिशूलघ्नं मूत्रकृच्छ्रविनाशनम् ॥ ६२ ॥

छाल, पत्ते, फूल और जडसहित वरना और गोखुरूके बीज इनको समान भाग लेकर क्वाथ बनालेवे । फिर इस क्वाथके साथ तिलके तेलको सिद्ध करके आस्थापनवस्ति देवे तो शर्करा, पथरी, शूल और मूत्रकृच्छ्ररोग दूर होते हैं ६२ ॥

शिलोद्भिदादितैल ।

शिलोद्भिदेरण्डसमास्थिराभिः पुनर्नवाभीरुरसेषु सिद्धम् ।
तैलं घृतं क्षीरमथानुपानं कालेषु कृच्छ्रादिषु संप्रयोज्यम् ॥ ६३ ॥

पुनर्नवा और शतावरके रसमें पाषाणभेद, अण्डकी जड और शालपर्णी इनका समान भाग मिश्रित चूर्ण डालकर तिलके तेल अथवा घृतको पकावे । इस तेलको दूधके साथ मिलाकर बहुत पुराने मूत्रकृच्छ्ररोगमें पान करना चाहिये । इससे उक्त रोग जल्द आराम होता है ॥ ६३ ॥

उशीराद्य तैल ।

उशीरं तगरं कुष्ठं यष्टीमधुकचन्दनम् ।
विभीतकाभयामीरु पद्ममुत्पलशारिवे ॥ ६४ ॥
बला तुरगगन्धा च दशमूलं शतावरि ।
विदारी चैव काकोली गुडूच्यतिबला तथा ॥ ६५ ॥
श्वदंष्ट्रा शपुष्पा च वत्सालकमधूरिके ।
एतैः कर्षमितैर्भागैस्तैलप्रस्थं विपाचयेत् ॥ ६६ ॥
सपत्रफलमूलस्य गोक्षुरस्य पलं शतम् ।
जलद्रोणे विपक्तव्यं पादांशेनावतारयेत् ॥ ६७ ॥

तक्रं तैलसमं देयं वीरणक्वाथमाढकम् ॥ ६८ ॥

पत्र, फल और मूलसहित गोखुरू १०० पल लेकर एक द्रोण जलमें पकावे। पकते पकते जब चतुर्थांश जल बाकी रहजाय तब उतारकर छानलेवे। फिर इस क्वाथमें खस, तगर, कूठ, मुलहठी, लालचन्दन, बहेडा, हरड, कटेरी, कमल, नीलकमल, अनन्तमूल, श्यामालता, खिरैंटी, असगन्ध, दशमूल, शतावर, विदारीकन्द, काकोली, गिलोय, कंघी, गोखुरू, सोया, पीली खिरैंटी और सौंफ इन औषधियोंका कल्क दो दो तोले एवं तिलका तेल १ प्रस्थ, गौका मट्ठा १ प्रस्थ और पूर्वोक्त विधिके अनुसार बनायाहुआ खसका क्वाथ १ आढक (८ सेर) मिलाकर उत्तम प्रकारसे घृतको सिद्ध करे ॥ ६४–६८ ॥

मूत्राघातं मूत्रकृच्छ्रमश्मरीं हन्ति दारुणम् ।
बलवर्णकरं वृष्यं वातपित्तनिषूदनम् ।
उशीराद्यमिदं तैलं काशिराजेन निर्मितम् ॥ ६९ ॥

यह उशीराद्यनामक तेल मूत्राघात, मूत्रकृच्छ्र और दारुण अश्मरीरोग तथा वात-पित्तजन्य रोगोंको नाश करता है। बल-वीर्यवर्द्धक तथा शरीरको कान्तियुक्त बनानेवाला है। इसको श्रीमान् महाराजा काशिराजाने बनाया है ॥ ६९ ॥

अश्मरीरोगमें पथ्य।

वस्तिर्विरेको वमनं च लङ्घनं स्वेदोऽवगाहोऽपि च वारिसेचनम् । यवाः कुलत्थाः प्रपुराणशालयो मद्यानि धन्वाण्डजसम्भवा रसाः ॥ ७० ॥ पुराणकूष्माण्डफलं च तल्लता गोकण्टको वारुणशाकमार्द्रकम् । पाषाणभेदी यवशूकवेणवः स्थिरा समाकर्षणमश्मनापि । एतानि सर्वाणि भवन्ति सर्वदा मुदेऽश्मरीरोगनिपीडितानाम् ॥ ७१ ॥

पिचकारी, विरेचन, वमन, लंघन, पसीना निकालना, शीतल जलमें घुसकर स्नान करना, जलसिञ्चन, जौ, कुलथी, पुराने शालिके चावल, मदिरा, मरुदेशके और अण्डज प्राणियोंके मांसका रस, पुराना पेठा, पेठेकी बेल, गोखुरू, बरनाके कोमल पत्तोंका शाक, अदरख, पाषाणभेद, जवाखार, बाँसके चावल, शालपर्णी और पथरीको निकालनेवाले द्रव्य ये सब वस्तुयें अश्मरीरोगसे पीडित जनोंको सर्वदा सर्वकालमें हितकारी हैं ॥ ७० ॥ ७१ ॥

अश्मरीरोगमें अपथ्य ।

मूत्रस्य शुक्रस्य च वेगमम्लं विष्टम्भि रूक्षं गुरु चान्नपानम् ।
विरुद्धपानाशनमश्मरीमान् विवर्जयेत्सन्ततमप्रमत्तः ॥ ७२ ॥

मूत्र और शुक्रके अवरोध, खट्टे रस, विष्टम्भकारक, रूखे और पचनेमें भारी ऐसे अन्न तथा पान एवं प्रकृतिविरुद्ध अन्नपान करना पथरीवाले रोगीको तत्काल छोड़ देने चाहिये । क्योंकि ये सब इस रोगमें अपथ्य हैं ॥ ७२ ॥

इति भैषज्यरत्नावल्याम् अश्मरीचिकित्सा ॥

प्रमेहकी चिकित्सा ।

स्थूलः प्रमेही बलवानिहैकः कृशस्तथाऽन्यः परिदुर्बलश्च ।
संबृंहणं तत्र कृशस्य कार्यं संशोधनं दोषबलाधिकस्य ॥ १ ॥

प्रमेहरोगी दो प्रकारके होते हैं, जैसे–कोई स्थूल और बलवान्, कोई कृश तथा दुर्बल । इनमें कृश पुरुषोंको बृंहण (मांस और बलवर्द्धक) औषधियोंसे एवं बलवान् पुरुषोंको दोषोंकी अधिकता होनेपर वमन, विरेचनादिसे शुद्ध करे १

ऊर्ध्वं तथाऽधश्च मलेऽपनीते मेहेषु सन्तर्पणमेव कार्यम् ।
संशोधनं नार्हति यः प्रमेही तस्य क्रिया संशमनी विधेया ॥२

प्रमेहरोगमें वमन और विरेचनादिद्वारा सम्पूर्ण दोष ऊपर तथा नीचे मार्गसे निकल जायँ तब सन्तर्पण क्रिया करे । किन्तु जो प्रमेहरोगी संशोधन करने योग्य नहीं हों उनकी रोगको नष्ट करनेवाली औषधियोंसे चिकित्सा करे ॥ २ ॥

ये विष्किरा ये प्रतुदा विहङ्गास्तेषां रसैर्जाङ्गलजैर्मनोज्ञैः ।
मन्दाः कषाया रसचूर्णलेहा मसूरमुद्गा लघवश्च भक्ष्याः ॥३॥

प्रमेहरोगीको विष्किर (मुरगा, कबूतर, हंस, मोर, तीतर) और प्रतुद (गिद्ध, बाज, काकादि) पक्षियोंका मांस एवं बकरी आदि जंगली पशुओंका मांसरस तथा कषैले रसवाले पदार्थ व अल्प परिमाण क्वाथ, रस, चूर्ण, अवलेह, मसूर और मूँग आदि हलके पदार्थ भोजन करने चाहिये ॥ ३ ॥

श्यामाककोद्रवोद्दालगोधूमचणकाढकी ।
कुलत्थाऽत्र हिता भोज्या पुराणा मेहिनां सदा ॥
जाङ्गलं तिक्तशाकं च यवान्नं चंक्रमो मधु ॥ ४ ॥

बहुत पुराने समेके चावल, कोदों, वनकोदों, गेहूँ, चने, अरहर और कुलथी ये सब अन्न प्रमेहरोगियोंको खाने चाहिये। एवं जङ्गली पशु-पक्षियोंका मांसरस, कडुवे शाक, जौके बने अन्न और शहद इनका सेवन तथा परिभ्रमण करना इस रोगमें विशेष हितप्रद हैं ॥ ४ ॥

रूक्षमुद्वर्त्तनं गाढं व्यायामो निशि जागरः।
यच्चान्यच्छ्लेष्मपित्तघ्नं बहिरन्तश्च तद्धितम् ॥ ५ ॥

रूखे (बेसन आदि) पदार्थोंकी शरीरपर खूब जोरसे मालिश करना, दण्ड-कसरत, भ्रमण, रातमें जागना और शारीरिक अथवा मानसिक क्रियाद्वारा जो कफ-पित्तको नष्ट करे ऐसे पदार्थ प्रमेहरोगियोंको हितकारी हैं ॥ ५ ॥

सर्वमेहहरो धात्र्या रसः क्षौद्रनिशायुतः।
कषायस्त्रिफलादारुमुस्तकैरथवा कृतः ॥
त्रिफलादारुदार्व्यब्दक्काथः क्षौद्रेण मेहहा ॥ ६ ॥

आमलोंके रसमें शहद और हल्दीका चूर्ण मिलाकर सेवन करे तो सर्वप्रकार का प्रमेह नष्ट होता है अथवा त्रिफला, देवदारु और नागरमोथा इनके क्वाथमें शहद और हल्दीका चूर्ण डालकर पान करे किंवा हरड, बहेडा, आमला देवदारु, दारुहल्दी और नागरमोथा इनके क्वाथको मधु मिश्रितकर भक्षण करनेसे प्रमेह दूर होता है ॥ ६ ॥

त्रिफलालोहशिलाजतुपथ्याचूर्णं च लीढमेकैकम्।
मधुनाऽमरास्वरस इव सर्वान्मेहान्निवारयति ॥
पीतः सारो गुडूच्यास्तु मधुना तत्प्रमेहनुत् ॥ ७ ॥

त्रिफलेका चूर्ण लोहभस्म, शिलाजीत और हरडोंका चूर्ण इनमेंसे किसी एकको शहदमें मिलाकर चाटे अथवा केवल गिलोयका रस और मधु एकत्र मिलाकर सेवन करनेसे सर्वप्रकारके प्रमेहरोग निवृत्त होते हैं। गिलोयके सार (गूदा) को शहदमें मिलाकर पीतेही प्रमेह नष्ट होता है ॥ ७ ॥

शतावर्या रसं रोगी क्षीरेण सह यः पिबेत्।
प्रमेहा विंशतिस्तस्य क्षयं यान्ति न संशयः ॥ ८ ॥

शतावरके रस और दूधको एकत्र मिलाकर पान करे तो बीसों प्रकारके प्रमेह तत्काल नाश होते हैं। इसमें किञ्चिन्मात्र सन्देह नहीं है ॥ ८ ॥

आमदुग्धं समजलं यः पिबेत्प्रातरुत्थितः।
निस्संशयं शुक्रमेहः पुराणस्तस्य नश्यति ॥ ९ ॥

नित्यप्रति प्रातःकाल उठकर कच्चा दूध और शीतल जल समान भाग मिलाकर पान करनेसे पुराना शुक्रप्रमेहरोग निश्चय नष्ट होताहै ॥ ९ ॥

पलाशपुष्पतोलैकं सितायाश्चार्द्धतोलकम् ।
पिष्टं शीताम्भसा पीतं मेहं हन्ति न संशयः ॥ १० ॥

टेसूके फूल एक तोला और मिश्री ६ माशे इन दोनोंको शीतल जलमें पीसकर पीवे तो प्रमेह दूर होता है ॥ १० ॥

स्फाटिकं चूर्णमादाय नारिकेलोदरे क्षिपेत् ।
तत्फलं पङ्कमध्ये तु स्थापयेदेकरात्रकम् ॥ ११ ॥
प्रातरानीय सजलं चूर्णं पेयं प्रयत्नतः ।
अनेन चिरकालीनो मेहो नश्यति निश्चितम् ॥ १२ ॥

फिटकिरीके चूर्णको नारियलमें भरकर कीचडमें गाड देवे और एक रात्रितक गडा रहनेदेवे। फिर प्रातःसमय निकालकर उसमेंसे फिटकिरीके चूर्णको ले जलमें पीसकर पान करे। इससे बहुत पुराना प्रमेहरोग निश्चय नाशहो ॥ ११ ॥ १२ ॥

व्यायामजातमखिलं भजन्मेहान् व्यपोहति ।
पादत्रच्छत्ररहितो भिक्षाशी मुनिवद्यतः ॥ २३ ॥
योजनानां शतं गच्छेदधिकं वा निरन्तरम् ।
मेहाञ्जेतुं वने वापि नीवारामलकाशनः ॥ १४ ॥

व्यायाम (दण्ड-कसरत अथवा किसी प्रकारका परिश्रम) करनेसे सब प्रमेह दूर होते हैं । जूता, खडाऊँ और छत्रीको त्याग (अर्थात् नंगे पाँव नंगे शिर) मुनियोंके समान संयतेन्द्रिय होकर भिक्षा माँगकर भोजन करे और ४०० कोसतक अथवा इससे भी अधिक दूरतक निरन्तर भ्रमण करे एवं वनवासी होकर नीवार व आमलोंका भोजन कर निर्वाह करता हुआ प्रमेहोंको जीते अर्थात् इस प्रकारके कृत्य करनेसे प्रमेह शीघ्र नष्ट होवे हैं ॥ १३ ॥ १४ ॥

माक्षिकं धातुमप्येवं युञ्ज्यादस्याप्ययं गुणः ॥ १५ ॥

पूर्वोल्लिखित शिलाजीतके प्रयोगके नियमानुसारही शुद्ध की हुई सोनामाखीके चूर्णको सेवन करनेसे प्रमेहरोग शमन होता है। यह धातु भी शिलाजीतके समान गुणोंवाली है ॥ १५ ॥

फलत्रिकादि ।

फलत्रिकं दारुनिशां विशालां मुस्तां च निःक्वाथ्य

निशांशकल्कम् । पिबेत्कषायं मधुसंप्रयुक्तं सर्वप्रमेहेषु समुच्छ्रितेषु ॥ १६ ॥

हरड, बहेडा, आमला, दारुहल्दी, इन्द्रायन और नागरमोथा इनका यथाविधि क्वाथ बनालेवे । उसमें हल्दीका चूर्ण और शहद डालकर पीवे तो दारुण सर्व प्रमेहरोगोंमें शीघ्र लाभ होता है ॥ १६ ॥

विडङ्गादि ।

विडङ्गसर्जार्जुनकट्फलानां कदम्बलोध्राशनवृक्षकाणाम् । क्वाथश्च तोयेन हितो नराणां कफप्रमेहं विनिहन्ति तेषाम् १७

वायविडङ्ग, शालवृक्षकी छाल, अर्जुनवृक्षकी छाल, कायफल, कदम्बवृक्षकी छाल, लोध और पीतशाल इनका एकत्र क्वाथ बनाकर पीनेसे कफोत्पन्न प्रमेह रोग नष्ट होता है ॥ १७ ॥

मुस्तादि ।

मुस्ताफलत्रिकनिशासुरदारुमूर्वा इन्द्राख्यलोध्रसलिलेन कृतः कषायः । पाने हितः सकलमेहभवे गदे च मूत्रग्रहेषु सकलेषु नियोजनीयः ॥ १८ ॥

नागरमोथा, त्रिफला, हल्दी, देवदारु, मूर्वा, इन्द्रवारुणी और लोध इनको समान भाग लेकर यथानियम क्वाथ बनालेवे । इस क्वाथको सेवन करनेसे समस्त प्रमेह व सर्वप्रकारके मूत्रजनित विकार नाश होते हैं ॥ १८ ॥

शिलाजतुप्रयोग ।

शालसारादितोयेन भावितं यच्छिलाजतु ।
पिबेत्तेनैव संशुद्धदेहः पिष्टं यथाबलम् ॥ १९ ॥
जाङ्गलानां रसैः सार्द्धं तस्मिञ्जीर्णे च भोजनम् ।
कुर्यादेवं तुलां यावदुपयुञ्जीत मानवः ॥ २० ॥
मधुमेहं विहायाशु शर्करामश्मरीं तथा ।
वपुर्वर्णबलोपेतः शतं जीवत्यनामयः ॥ २१ ॥

शालसारादिगणकी औषधियोंके क्वाथसे शिलाजीतको भावना देवे. फिर धूपमें सुखाकर बारीक चूर्ण करलेवे । इस चूर्णको वमन विरेचनादिसे शुद्ध शरीरवाला रोगी अपनी अग्निके बलाबलको विचारकर उक्त शालसारादिगणके क्वाथमें मिलाकर सेवन करे । जब यह औषधि जीर्ण (हजम) होजाय तब जङ्गली पशुप-

स्त्रियोंके मांसरसके साथ भोजन करे। इसको प्रतिदिन प्रातःसमय एक एक तोला सेवन करे और जब सौ पल परिमाण औषधि भक्षण करचुके तब छोडदेवे। यह औषधि मधुमेहको छोडकर अन्य सर्वप्रकारके प्रमेहरोग, शर्करा और पथरीरोगको नष्ट करती है। इसका सेवन करनेवाला रोगी आरोग्य होकर और आयु, बल, वर्ण करके युक्त सौ वर्षपर्यन्त जीता है॥

कुशावलेह।

कुशः काशो वीरणश्च कृष्णेक्षुः खग्गडस्तथा।
एषां दशपलान्भागाञ्जलद्रोणे विपाचयेत्॥ २२॥
अष्टभागावशेषं तु कषायमवतारयेत्।
खण्डप्रस्थं समादाय लेहवत्साधु साधयेत्॥ २३॥
अवतार्य ततः पश्चाच्चूर्णानीमानि दापयेत्।
मधुकं कर्कटीबीजं कर्कोरु त्रपुषं तथा॥ २४॥
शुभामलकपत्राणि त्वगेला नागकेशरम्।
वरुणाऽमृता प्रियंगू प्रत्येकमक्षसम्मितम्॥ २५॥

कुशा, काँस, खस, कालीईख और खग्गड (तृण विशेष) इन सबकी मूलको चालीस चालीस तोले लेकर एक द्रोण जलमें पकावे। पकते पकते जब आठवाँ भाग जल शेष रहे तब उतारकर छानलेवे। फिर इस क्वाथमें एक प्रस्थ उत्तम खाँड डालकर विधिपूर्वक पाक करे। जब अवलेहकी समान होजाय तब चूल्हेपरसे उतारकर उसमें मुलहठी, ककडीके बीज, पेठेके बीज, खीरेके बीज, वंशलोचन, आमले, तेजपात, दारचीनी, नागकेशर, वरनाकी छाल, गिलोय और फूलप्रियंगू ये प्रत्येक दो दो तोले चूर्ण करके डालदेवे।। सबको एकत्र मिलाकर उत्तम चिकने पात्रमें भरकर रखदेवे॥ २२-२५॥

प्रमेहान्विंशतिं हन्ति मूत्राघातांस्तथाऽश्मरीम्।
वातिकान्पैत्तिकांश्चापि श्लेष्मिकान्सान्निपातिकान्॥
हन्त्यरोचकमत्युग्रं बलपुष्टिकरं परम्॥ २६॥

यह अवलेह नित्यप्रति उचित मात्रासे सेवन करनेसे बीसों प्रकारके प्रमेह, मूत्राघात, अश्मरी, वातज, पित्तज, कफात्मक और सन्निपातज विकार और अत्युग्र अरुचिको शीघ्र नष्ट करता है। एवं शरीरमें अत्यन्त बलकी वृद्धि तथा पुष्टि करता है॥ २६॥

शालसारादिलेह ।

शालसारादिवर्गस्य क्वाथे तु घनतां गते ।
दन्तीलोध्रशिवाकान्तलौहताभ्ररजः क्षिपेत् ॥
घनीभूतमदग्धं च प्राश्य मेहान्व्यपोहति ॥ २७ ॥

शालसारादिगणकी समस्त औषधियोंको चौगुने जलमें पकावे और चतुर्भाग जल अवशिष्ट रहनेपर उतारकर छानलेवे । फिर दोबारा इस क्वाथको पकावे और पकते २ जब अवलेहकी भाँति गाढा पडजाय तब चूल्हेसे नीचे उतारकर उसमें दन्तीमूल, लोध, हरड, कान्तलोहभस्म और अभ्रकभस्म इन औषधियोंका एकत्र मिलाहुआ चूर्ण शालसारादिवर्गकी औषधियोंके चतुर्थांशकी बराबर लेकर डालदेवे । जब अच्छे प्रकार पककर शीतल होजाय तब नियमानुसार इसका सेवन करे । इससे सर्वप्रकारके प्रमेह दूर होते हैं ॥ २७ ॥

वङ्गावलेह ।

वङ्गस्य भस्म द्विपलं लेहयेन्मधुना सह ।
ततो गुडसमं गन्धं भक्षयेत्कर्षमात्रकम् ॥ २८ ॥
गुडूचीसत्त्वमथवा शर्करासहितं तथा ।
सर्वमेहहरो ज्ञेयो वङ्गावलेह उत्तमः ॥ २९ ॥

वंगभस्म ८ तोले लेकर शहदमें मिलाकर चाटे । पश्चात् शुद्ध गन्धक और गुड एक एक तोला परिमाण एकत्र मिश्रित कर सेवन करे अथवा गिलोयके सत्त्वको खांडके साथ भक्षण करे तो यह वंगावलेह सर्वप्रकारके प्रमेहोंको नष्ट करता है ॥ २८ ॥ २९ ॥

विडंगादि लौह ।

विडङ्गत्रिफलामुस्तैः कणया नागरेण च ।
जीरकाभ्यां युतो हन्ति प्रमेहानतिदारुणान् ।
लौहो मूत्रविकारांश्च सर्वानेव विनाशयेत् ॥ ३० ॥

वायविडंग, त्रिफला, नागरमोथा, पीपल, सोंठ, जीरा और कालाजीरा इन सबको समान भाग ले एकत्र चूर्ण करलेवे और सब चूर्णकी बराबर भाग लोहभस्म मिलाकर खूब बारीक पीसलेवे । इसके सेवनसे समस्त दारुण प्रमेह और अन्यान्य सम्पूर्ण मूत्रविकार नाश होते हैं ॥ ३० ॥

मेहकालानलरस ।

भस्मसूतं मृतं वङ्गं तुल्यं क्षौद्रेण मर्दयेत् ।

द्विगुञ्जं भक्षयेन्नित्यं मेहं हन्ति चिरोत्थितम् ॥
गुञ्जामूलं पिबेच्चानु क्षीरैरेव प्रशाम्यति ॥ ३१ ॥

शुद्ध पारेकी भस्म और वङ्गभस्म पृथक् २ एक एक तोला लेकर शहदके साथ खरल करलेवे । इसमेंसे प्रतिदिन प्रातःकाल दो रत्तीभर भक्षण करे और ऊपरसे गुञ्जा (लताविशेष) की जडको पीसकर दूधमें मिलाकर पीवे तो बहुत दिनोंका पुराना प्रमेह शमन होता है ॥ ३१ ॥

पञ्चाननरस ।

सूतं गन्धं मृतं लौहं मृतमभ्रं समांशिकम् ।
सर्वेषां द्विगुणं वङ्गं मधुना मर्दयेद्दिनम् ॥ ३२ ॥
भक्षयेत्प्रातरुत्थाय शीततोयं पिबेदनु ।
प्रमेहान्विंशतिं हन्ति मूत्राघातं तथाऽश्मरीम् ॥
मूत्रकृच्छ्रं हरेदुग्रमयं पञ्चाननो रसः ॥ ३३ ॥

शुद्ध पारा, गन्धक, लोहभस्म और अभ्रकभस्म ये सब समान भाग और सबसे द्विगुनी वङ्गभस्म लेकर एकदिनतक शहदमें यथाविधि खरल करे । फिर इसको नित्यप्रति प्रातःकाल उठकर दो दो रत्तीप्रमाण खाय और ऊपरसे शीतल जल पान करे । यह पञ्चानन रस बीसों प्रकारके प्रमेह, मूत्राघात, अश्मरी और अत्युग्र मूत्रकृच्छ्ररोगको नष्ट करता है ॥ ३२ ॥ ३३ ॥

चन्द्रकला ।

सूताभ्रवङ्गायसभस्म सर्वमेतत्समानं परिभावयेत्तु ।
गुडूचिकाशाल्मलिकाकषायैर्निष्कार्द्धमानां मधुना ततश्च ।
बद्धा गुडीं चन्द्रकलेतिसंज्ञां मेहेषु सर्वेषु नियोजयेच्च ॥३४॥

रससिन्दूर, अभ्रक, वङ्ग और लोहभस्म इन सबको समान भाग लेकर गिलोय और सेमलकी जडके क्वाथमें भावना देवे । पश्चात् मधुके सहयोगसे खरल करके एक एक तोलेकी गोलियाँ बनालेवे । चन्द्रकलानामवाला यह रस सर्वप्रकारके प्रमेहोंमें प्रयोग करनेसे शीघ्र लाभ होता है ॥ ३४ ॥

मेहमुद्गरवटिका ।

रसाञ्जनं विडं दारु बिल्वगोक्षुरदाडिमम् ।
प्रत्येकं तोलकं देयं लौहचूर्णं तु तत्समम् ॥ ३५ ॥
पलैकं गुग्गुलुं दत्त्वा घृतेन वटिकां कुरु ।
प्रमेहान्विंशतिं हन्ति साध्यासाध्यमथापि वा ॥ ३६ ॥

मूत्रकृच्छ्रं तथा पाण्डुं धातुस्थं च ज्वरं जयेत् ।
हलीमकं रक्तपित्तं वातपित्तकफोद्भवम् ॥ ३७ ॥
ग्रहणीमामदोषं च मन्दाग्नित्वमरोचकम् ।
एतान्सर्वान्निहन्त्याशु वृक्षमिन्द्राशनिर्यथा ॥ ३८ ॥

रसौंत, बिडनमक, देवदारु, बेलगिरी, गोखुरूके बीज और पका हुआ अनार ये प्रत्येक एक एक तोला और इनके समस्त चूर्णकी बराबर लोहभस्म तथा गूगल ४ तोले लेवे । पुनः सबको एकत्र कूटपीसकर घृतके द्वारा खरल करके दो दो रत्तीकी गोलियाँ प्रस्तुत करे । तदनन्तर प्रत्यह प्रातःसमय एक एक गोली भक्षण करे तो साध्य व असाध्य बीसों प्रमेह, मूत्रकृच्छ्र, पाण्डु, धातुगत ज्वर, हलीमक, रक्तपित्त, वातज, पित्तज, कफजन्यरोग, संग्रहणी, आमवात, मन्दाग्नि और अरुचि ये सब रोग तत्काल नाश होते हैं ॥ ३५-३८ ॥

शुक्रमातृकावटी ।

गोक्षुरबीजं त्रिफला पत्रमेला रसाञ्जनम् ।
धान्यकं चविका जीरं तालीशं टङ्कदाडिमौ ॥ ३९ ॥
प्रत्येकार्द्धपलं दत्त्वा गुग्गुलोः कर्षमेव च ।
रसाभ्रगन्धलौहानां प्रत्येकं च पलं क्षिपेत् ॥ ४० ॥
सर्वमेकीकृतं वैद्यो दण्डयोगेन मर्दयेत् ।
घृतभाण्डे तु संस्थाप्य माषमेकं च भक्षयेत् ॥ ४१ ॥
अनुपानं प्रदातव्यं जातिभेदात्पृथक् पृथक् ।
दाडिमस्य रसेनैव च्छागदुग्धेन वाऽम्भसा ॥ ४२ ॥

गोखुरूके बीज, त्रिफला, तेजपात, इलायची, रसौंत, धनियाँ, चव्य, जीरा, तालीसपत्र, सुहागा और अनारदाना ये हर एक औषधि दो दो तोले, गूगल १ तोला, शुद्ध पारा ४ तोले, अभ्रक ४ तोले, शुद्ध गन्धक ४ तोले तथा लोहभस्म ४ तोले लेवे । सबको एकत्र करके जल डालकर लोहेके दण्डेसे अच्छे प्रकार खरल करे । फिर घीके चिकने बासनमें भरकर रख देवे । इसमेंसे हररोज प्रातःकाल एक एक माशा खावे । इसपर अनारका रस, बकरीका दूध और शीतल जल इन अनुपानोंको प्रमेहके दोषानुसार पृथक् पृथक् विचारकर देवे ॥ ३९-४२ ॥

प्रमेहान्विंशतिं हन्ति वातपित्तकफोद्भवान्।
द्वन्द्वजान्सन्निपातोत्थान् मूत्रकृच्छ्राश्मरीगदान्॥
बलवर्णाग्निजननी ज्वरदोषनिषूदनी॥ ४३॥

यह वटी वातके, पित्तके और कफके रोग अथवा द्विदोषज और त्रिदोषजन्य बीसों प्रकारके प्रमेह, मूत्रकृच्छ्र और अश्मरी आदि रोगोंको बहुत जल्द आराम करती है तथा ज्वरको नष्टकर बल कान्ति और उदराग्निको बढाती है॥ ४३॥

वेदविद्यावटी।

पारदाभ्रककान्तानां नागभस्म समं समम्।
दिनं ब्राह्मीरसैर्मर्द्य वालुकायन्त्रगं पुनः॥ ४४॥
उद्धृत्य चूर्णयेच्छ्लक्ष्णं जारिताभ्रं शिलाजतु।
ताप्यं मण्डूरवैक्रान्तं कासीसं तुल्यमेव च॥ ४५॥
सर्वं सर्वसमं चूर्णं कल्पयेच्च ततः पुनः।
मुस्तचन्दनपुन्नागनारिकेलस्य मूलकम्॥ ४६॥
कपित्थरजनीदार्वीचूर्णं सर्वसमं भवेत्।
जम्बीराणां द्रवैर्मर्द्य द्वियामं वटकीकृतम्॥ ४७॥
वेदविद्यावटी नाम्ना भक्षणात्सर्वमेहजित्।
मधु धात्रीरसं चानु क्षौद्रैर्वापि गुडूचिका॥ ४८॥

शुद्ध पारा, अभ्रक, कान्तलोह और शीशा इनकी भस्मको बराबर २ लेवे। फिर सबको ब्राह्मीके रसमें एक दिनभर उत्तम विधिसे खरल करके वालुकायन्त्रमें रखकर पकावे। जब पककर शीतल होजाय तब उसको निकालकर बारीक पीस-लेवे। तदनन्तर इस चूर्णके साथ अभ्रकभस्म, शिलाजीत, सोनामाखी, मण्डूरभस्म, वैक्रान्तमणिभस्म, और हीराकसीस इन सबको समान भाग लेकर एकत्र पीसकर मिलावे एवं नागरमोथा, लालचन्दन, पुन्नागवृक्षकी जड, नारियलकी जड, कैथ, हल्दी और दारुहल्दी इनके समानांश मिलित चूर्णको लेवे। पुनः सबको एकत्रकर जम्बीरीनींबूके स्वरसमें दो प्रहरतक उत्तम प्रकारसे खरलकर तीन तीन मासेकी गोली बनालेवे। इस वेदविद्यानामवाली वटीको प्रतिदिन प्रातःकाल आमलोंके रस और शहद अथवा गिलोयके रस एवं शहदमें मिलाकर सेवन करनेसे सर्वप्रकारके प्रमेह दूर होते हैं॥

वंगाष्टक ।

रसं गन्धं मृतं लौहं मृतरूप्यं च खर्परम् ।
मृताभ्रकं मृतं ताम्रं सर्वतुल्यं च वङ्गकम् ॥ ४९ ॥
पुटेद्गजपुटे विद्वान् स्वाङ्गशीतं समुद्धरेत् ।
रक्तिद्वयप्रमाणेन मधुना लेहयेन्नरम् ॥
निशाचूर्णं क्षौद्रयुतं पिबेद्धात्रीरसं त्वनु ॥ ५० ॥

शुद्ध पारा, गन्धक, लोहभस्म, खपरिया धातु, अभ्रकभस्म और ताँबेकी भस्म ये प्रत्येक समान भाग एवं वङ्गभस्म सबकी बराबर लेवे । इन सबको एकत्र खरल कर गजपुटमें स्थापन करके पकावे । जब स्वाङ्गशीतल होजाय तब निकालकर बारीक पीसलेवे । इस रसको प्रतिदिन सुबहके समय दो रत्ती प्रमाण मधुमें मिलाकर चाटे अथवा हल्दीके चूर्ण और शहदके साथ मिलाकर खाय, पीछेसे आमलों के रसको पीवे ॥ ४९ ॥ ५० ॥

वङ्गाष्टकमिदं ख्यातं महादेवप्रकाशितम् ।
प्रमेहान्विंशतिं हन्ति आमदोषं विषूचिकाम् ॥ ५१ ॥
विषमज्वरगुल्मार्शोमूत्रातीसारपित्तजित् ।
वीर्यवृद्धिं करोत्याशु सोमरोगनिबर्हणम् ॥ ५२ ॥

इस वङ्गाष्टकनामक रसको श्रीमहादेवजीने प्रकट कियाहै । यह बीसों प्रमेहोंको एवं आमवात, विषूचिका, विषमज्वर गुल्म, बवासीर, मूत्रविकार, अतिसार और पित्तजन्य रोगोंको शीघ्र जीतता है इसी प्रकार अत्यन्त वीर्यकी वृद्धि करता है और स्त्रियोंके सोमरोगको नष्ट करता है ॥ ५१ ॥ ५२ ॥

मेहवज्र ।

भस्म सूतं मृतं कान्तं लौहभस्म शिलाजतु ।
शुद्धताप्यं शिला व्योषं त्रिफला बिल्वजीरकम् ॥ ५३ ॥
कपित्थं रजनीचूर्णं भृङ्गराजेन भावयेत् ।
त्रिंशद्वारं विशोष्याथ लिह्याच्च मधुना त्विह ॥ ५४ ॥
निष्कमात्रं हरेन्मेहान्मूत्रकृच्छ्रं सुदारुणम् ।
महानिम्बस्य बीजं च षड्निष्कं पेषितं च यत् ॥ ५५ ॥
पलतण्डुलतोयेन घृतनिष्कद्वयेन च ।
एकीकृत्य पिबेच्चानु हन्ति मेहं चिरोत्थितम् ॥ ५६ ॥

शुद्ध पारेकी भस्म, कान्तलोहकी भस्म, शिलाजीत, सोनामाखी, मैनसिल, सोंठ, मिरच, पीपल, त्रिफला, बेलगिरी, जीरा, कैथ और हल्दी इन औषधियोंको समान भाग लेकर कूटपीसकर चूर्ण करलेवे। पश्चात् इस चूर्णको भाङ्गके रसमें तीस वार भावना देकर सुखा लेवे। तदनन्तर नित्यप्रति प्रातःकाल इस चूर्णको एक एक तोला परिमाण शहदमें मिलाकर सेवन करे। ऊपरसे बकायनके बीजोंका चूर्ण २४ माशे लेकर चार तोले चावलोंके धोवनमें पीसे। फिर इसमें ८ माशे गोघृत डालकर पान करे तो यह मेहवज्ररस बहुत पुराने प्रमेहों तथा दारुण मूत्रकृच्छ्रादि रोगोंको अल्पकालमें दूर करता है ॥ ९६ ॥

चन्द्रप्रभागुडिका ।

वेल्लव्योषफलत्रिकं त्रिलवणं द्विक्षारचव्यानल-
श्यामापिप्पलिमूलमुस्तकशठीमाक्षीकधातुत्वचः ।
षड्ग्रन्थामरदारुवारणकणाभूनिम्बदन्तीनिशा-
पत्रैलातिविषाः पिचुप्रतिमिता लौहस्य कर्षाष्टकम् ॥ ९७ ॥
त्वक्क्षीरी पलिका पुरादश पलान्यष्टौ शिलाजन्मनो
मानात्कर्षसमा कृतेति गुडिका संयोज्य सर्वं भिषक् ।
तत्रैव प्रतिवासरं सह घृतक्षौद्रेण लिह्यादिमां
तक्रं मस्तु च गोघृतं मधुरसं पश्चात्पिबेन्मात्रया ॥ ९८ ॥

वायविडङ्ग, सोंठ, मिरच, पीपल, त्रिफला, सेंधानमक, कालानमक, बिडनमक, जवाखार, सज्जी, चव्य, चीता, कालीसर, पीपलामूल, नागरमोथा, कचूर, सोनामाखी, दारचीनी, वच, देवदारु, गजपीपल, चिरायता, दन्ती, हल्दी, पत्रज, इलायची और अतीस ये प्रत्येक औषधि दो दो तोले और लोहभस्म १६ तोले, वंशलोचन ४ तोले, शुद्ध गूगल ४० तोले एवं शिलाजीत ३२ तोले लेवे। इन सबको एकत्र बारीक कूटपीसकर जलमें खरल करके दो दो तोलेकी गोलियाँ बनालेवे। इस वटीको प्रतिदिन प्रातःसमय घृत और शहदमें मिलाकर सेवन करे। इसपर मठा, दहीका तोड, गौका घी और मधु इनमेंसे किसी एकको उचित मात्रासे सेवन करे तो इससे प्रमेह और मूत्रकृच्छ्ररोग नष्ट होते हैं ॥ ९७ ॥ ९८ ॥

चन्द्रप्रभावटी ।

चन्द्रप्रभावचामुस्ताभूनिम्बसुरदारवः ।
हरिद्राऽतिविषा दार्वी पिप्पलीमूलचित्रकम् ॥ ९९ ॥

त्रिवृद्दन्ती पत्रकं च त्वगेला वंशलोचना ।
प्रत्येकं कर्षमानानि कुर्यादेतानि बुद्धिमान् ॥ ६० ॥
धान्यकं त्रिफला चव्यं विडङ्गं गजपिप्पली ।
सुवर्णमाक्षिकं व्योषं द्वौ क्षारौ लवणत्रयम् ॥ ६१ ॥
एतानि टंकमानानि संगृह्णीयात्पृथक् पृथक् ।
द्विकर्षं हतलौहं स्याच्चतुष्कर्षा सिता भवेत् ॥ ६२ ॥
शिलाजत्वष्टकर्षं स्यादष्टौ कर्षाश्च गुग्गुलोः ।
विधिना योजितैरेतैः कर्तव्या वटिका शुभा ॥ ६३ ॥

बावची, वच, नागरमोथा, चिरायता, देवदारु, हल्दी, अतीस, दारुहल्दी, पीपलामूल, चीता, निसोत, दन्ती, तेजपात, दारचीनी, इलायची और वंशलोचन ये प्रत्येक दो दो तोले एवं धनियाँ, त्रिफला, चव्य, वायविडङ्ग, गजपीपल, शुद्ध स्वर्णमाक्षिक, त्रिकुटा, सज्जी, जवाखार, सैंधानमक, विरियासञ्चरनमक और बिडनमक ये प्रत्येक चार २ मासे, लोहभस्म चार तोले, मिश्री ८ तोले, शिलाजीत १६ तोले और गूगल १६ तोले लेवे । इन सबको एकत्र कूट पीसकर अच्छे प्रकार खरल करके गोलियाँ बनालेवे ॥ ५९–६३ ॥

चन्द्रप्रभेति विख्याता सर्वरोगप्रणाशिनी ।
निहन्ति विंशतिं मेहान् कृच्छ्रमष्टविधं तथा ॥ ६४ ॥
चतस्रश्चाश्मरीस्तद्वन्मूत्राघातांस्त्रयोदश ।
अण्डवृद्धिं पाण्डुरोगं कामलां च हलीमकम् ॥ ६५ ॥
कासं श्वासं तथा कुष्ठमग्निमान्द्यमरोचकम् ।
वातपित्तकफव्याधीन् बल्या वृष्या रसायनी ॥ ६६ ॥
समाराध्य शिवं तस्मात्प्रयत्नाद्वटिकामिमाम् ।
प्राप्तवांश्चन्द्रमा यस्मात्तस्माच्चन्द्रप्रभा स्मृता ॥ ६७ ॥

चन्द्रप्रभानामसे प्रसिद्ध यह वटी सम्पूर्ण रोगोंको नाश करनेवाली है । एवं बीसों-प्रकारके प्रमेह, आठप्रकारके मूत्रकृच्छ्र, चार प्रकारकी पथरी, तेरह प्रकारके मूत्राघात अण्डकोषवृद्धि, पाण्डुरोग, कामला, हलीमक, खाँसी, श्वास, कोढ, मन्दाग्नि, अरुचि और वातज, पित्तज तथा कफजनित रोगोंको तत्काल नष्ट कर देती है । इसी प्रकार बलकारक, वीर्यवर्द्धक और अत्युत्तम रसायन है । इस वटीको शिवजीमहाराजकी आराधना करके चन्द्रमाने प्राप्त किया था इसकारण इसकी चन्द्रप्रभा नामसे प्रसिद्धि हुई ॥ ६४–६७ ॥

स्वर्णवंग ।

प्रक्षिपेद्भाजने वङ्गमायसे चापि मृन्मये ।
विद्रुते वह्नितापेन तस्मिंस्तन्मानकं रसम् ॥ ६८ ॥
क्षिप्त्वा संचूर्णयेत्तत्र नरसारं च गन्धकम् ।
तद्वासो मृदा लिप्त्वा काचकुप्यां निधाय च ॥६९॥
तत्सर्वं सिकतायन्त्रे पचेद्यामचतुष्टयम् ।
पाकात्सञ्जायते चित्रं कीर्णं हेमकणैरिव ॥ ७० ॥
रमणीयतरं स्वर्णवङ्गं नाम रसायनम् ।
बल्यं मेहहरं कान्तिमेधावीर्याग्निवर्द्धनम् ॥ ७१ ॥

किसी लोहके या मिट्टीके बर्त्तनमें बंग (राँग) को रखकर तीक्ष्ण अग्निमें गलावे । जब वह अच्छे प्रकार गलजाय तब निकालकर उसके बराबर शुद्ध पारा, पारेके बराबर शुद्ध गन्धक और गन्धककी बराबर नौसादर मिलाकर बारीक चूर्ण करलेवे । तदनन्तर इस चूर्णको बोतलमें भरकर और उसके ऊपर कपरमिट्टी करके वालुकायन्त्रमें रख चार प्रहरतक पकावे । पककर जब बोतलके अन्दर सुवर्णके कणोंके समान बिखरजाय तब यह स्वर्णवंगनामवाली अत्युत्तम रसायन तैयार होती है । यह सर्वप्रकारके प्रमेहोंको दूर करती है एवं अत्यन्त बलकारक, कान्तिजनक, मेधा वीर्य और उदराग्निको बढाती है ॥ ६८–७१ ॥

मेहकेशरी ।

मृतं वङ्गं सुवर्णं च कान्तलौहं च पारदम् ।
मुक्ता गुडत्वचं चैव सूक्ष्मैला पत्रकेशरम् ॥ ७२ ॥
समभागं विचूर्ण्याथ कन्यानीरेण भावयेत् ।
द्विमाषां वटिकां खादेद् दुग्धान्नं प्रपिबेत्ततः ॥ ७३ ॥

वङ्गभस्म, सुवर्णभस्म, कान्तलोहभस्म, शुद्ध पारदभस्म, मोतीभस्म, दारचीनी, छोटी इलायची, तेजपात और नागकेशर इनको समान भाग लेकर एकत्र बारीक चूर्ण करके घीग्वारके रसमें यथाविधि खरल करे । फिर दो दो माशेकी गोलियाँ बनालेवे । इसमेंसे प्रतिदिन प्रातःकाल एक एक गोली खाय और इसपर दूध भात भक्षण करे ॥ ७२ ॥ ७३ ॥

प्रमेहं नाशयेदाशु केसरी करिणं यथा ।
शुक्रप्रवाहं शमयेत्त्रिरात्रान्नात्र संशयः ॥ ७४ ॥

इसके सेवन करनेसे प्रमेह और वीर्य्यक्षीणतादि रोग तीन रातमें ही निस्सन्देह इस प्रकार नष्ट होजाते हैं, जैसे सिंह गजेन्द्रको नष्ट करदेता है ॥ ७४ ॥

मेहान्तकरस ।

रसगन्धकलौहं च तारं वङ्गं त्रिभागिकम् ।
अभ्रकस्य त्रयो भागा भागार्द्धेन सुवर्णकम् ॥ ७५ ॥
सर्वचूर्णसमं दद्यात्तालमूलीसुचूर्णितम् ।
नानारोगहरं श्रेष्ठं वातपित्तभवं महत् ॥
कान्तिपुष्टिकरं चैव रतिशक्तिविवर्द्धनम् ॥ ७६ ॥

शुद्ध पारा, गन्धक, लोहा, रूपा, वङ्ग और अभ्रक ये प्रत्येक तीन तीन तोले एवं स्वर्णभस्म ६ माशे और मुसलीका चूर्ण १८॥ तोले लेकर एकत्र पीसकर जलमें खरल करके तीन तीन माशेकी गोलियाँ बनालेवे। यह रस वात और पित्तसे हुए दुस्तर प्रमेहों तथा अनेक प्रकारकी उत्कट व्याधियोंको नाश करता है। इसी भाँति अत्यन्त पुष्टिकारक एवं कान्ति और रतिशक्तिकी वृद्धि करनेवाला ॥ ७५ ॥ ७६ ॥

सर्वेश्वररस ।

स्वर्णं रौप्यं मौक्तिकं च विशुद्धं च शिलाजतु ।
लौहमभ्रं तथा ताप्यं मधुयष्टी च पिप्पली ॥ ७७ ॥
मरिचं विश्वकं चेति सर्वमेकत्र कारयेत् ।
विमर्द्य प्रहरं यत्नात्कज्जलाकृतिसन्निभम् ॥ ७८ ॥
केशराजभृङ्गराजशक्रासनरसे पृथक् ।
प्रमेहं विविधं हन्ति मधुमेहं सुदुर्जयम् ॥ ७९ ॥
वातपित्तसमुद्भूतं तथा कफसमुद्भवम् ।
सर्वेश्वरो रसो नाम्ना प्रमेहकुलनाशकः ॥ ८० ॥

सुवर्ण, चाँदी, मोती, शुद्धशिलाजीत, लोहा, अभ्रक, सोनामाखी, मुलहठी, पीपल, काली मिरच और सोंठ इन सबको समान भाग लेवे फिर एकत्र पीसकर काले भाङ्गरे, सफेद भागरे और भाँगके रसमें क्रमानुसार पृथक् पृथक् एक एक प्रहरतक खूब खरल करे। जब घुटकर काजलकी समान वर्ण होजाय तब दो दो रत्तीकी गोलियाँ तैयार करलेवे। यह रस वातज, पित्तज, कफज एवं अन्यान्य दोषजात बीसों प्रकारके प्रमेह और दुर्जय मधुमेह रोगको मूलसहित नष्ट करता है। इसको सर्वेश्वररस कहते हैं ॥ ७७-८० ॥

वङ्गेश्वर रस १-२।

रसस्य भस्मना तुल्यं वङ्गभस्म प्रयोजयेत्।
अस्य माषद्वयं हन्ति मेहान्क्षौद्रसमन्वितम् ॥ ८१ ॥

१-शुद्ध पारेकी भस्म और वङ्गभस्म समान भाग लेकर एकत्र खरल कर लेवे। नित्यप्रति प्रातःसमय इसमेंसे दो माशे प्रमाण लेके शहदमें मिलाकर सेवन करनेसे सब प्रमेह नष्ट होते हैं ॥ ८१ ॥

वङ्गं कान्तं च गगनं हेमपुष्पं समं समम्।
कुमारीरसतो भाव्यं सप्तवारं भिषग्वरैः ॥ ८२ ॥
एष वङ्गेश्वरो नाम प्रमेहान्विंशतिं जयेत्।
मूत्रकृच्छ्रं सोमरोगं पाण्डुरोगं महाश्मरीम् ॥ ८३ ॥
रसायनमिदं श्रेष्ठं नागार्जुनविनिर्मितम् ॥ ८४ ॥

२-वंग, कान्तसारलोह, अभ्रक और नागकेशर इन सबको एक एक तोला लेकर घीग्वारके रसमें सातवार भावना देवे। फिर अच्छे प्रकार घोटकर तीन तीन मासेकी वटी प्रस्तुत करलेवे। यह मूत्रकृच्छ्र, सोमरोग, पाण्डु और अश्मरी-रोगको दूर करता है। इस सुन्दर रसायनको नागार्जुनमुनिने निर्माण किया है ॥ ८२-८४ ॥

बृहद्वङ्गेश्वररस १-२।

वङ्गभस्म रसं गन्धं रूप्यं कर्पूरमभ्रकम्।
कर्षं कर्षं मानमेषां सुताम्रि हेम मौक्तिकम् ॥
केशराजरसैर्भाव्यं द्विगुञ्जाफलमानतः ॥ ८५ ॥

१-वङ्गभस्म, शुद्ध पारेकी भस्म, शुद्ध गन्धक, रूपाभस्म, कपूर और अभ्रक ये प्रत्येक दो दो तोले, सुवर्णभस्म ६ माशे और मोतीभस्म ६ माशे लेवे। सबको एकत्रकर भाङ्गरेके रसमें खरल करके दो दो रत्तीकी गोलियाँ बनावे ॥ ८५ ॥

प्रमेहान्विंशतिं हन्ति साध्यासाध्यं न संशयः।
मूत्रकृच्छ्रं तथा पाण्डुं धातुस्थं च ज्वरं जयेत् ॥ ८६
हलीमकं रक्तपित्तं वातपित्तकफोद्भवम्।
ग्रहणीमामदोषं च मन्दाग्नित्वमरोचकम् ॥ ८७ ॥
एतान्सर्वान्निहन्त्याशु वृक्षमिन्द्राशनिर्यथा ॥ ८८ ॥

यह रस साध्य व असाध्य २० प्रकारके प्रमेह, मूत्रकृच्छ्र, पाण्डु, धातुगत ज्वर, हलीमक, रक्तपित्त, वात-पित्त और कफके रोग, संग्रहणी, आमवात, अग्निमान्द्य और अरुचि आदि सम्पूर्ण विकारोंको शीघ्र दूर करता है ॥ ८६–८८ ॥

सूतं गन्धं मृतं लोहं मृतमभ्रं समांशिकम् ।
हेम वङ्गं च मुक्ता च ताप्यमेषां समं समम् ॥ ८९ ॥
सर्वेषां चूर्णितं कृत्वा कन्यारसविमर्दितम् ।
गुञ्जाद्वयप्रमाणेन वटिकां कुरु यत्नतः ॥ ९० ॥

२–शुद्ध पारा, शुद्ध गन्धक, लोहा, अभ्रक, सुवर्ण, वङ्ग, मोती और सोनामाखी इन सबकी भस्म समान भाग लेकर एकत्र पीसकर घीग्वारके स्वरसमें यथाविधि खरल करे। तदनन्तर दो रत्ती प्रमाण गोलियाँ बनालेवे ॥ ८९ ॥ ९० ॥

बृहद्वङ्गेश्वरो ह्येष रक्तमूत्रे प्रशस्यते ।
बहुमूत्रं श्वेतमूत्रं मूत्रकृच्छ्रं तथैव च ॥ ९१ ॥
सर्वविधप्रमेहांस्तु नाशयेदविकल्पतः ।
अग्निवृद्धिं वयोवृद्धिं कान्तिवृद्धिं करोति च ॥ ९२ ॥
क्षयरोगं निहन्त्याशु कासं पञ्चविधं तथा ।
कुष्ठमष्टादशविधं पाण्डुरोगं हलीमकम् ॥ ९३ ॥
शूलं श्वासं ज्वरं हिक्कां मन्दाग्निमरोचकम् ।
क्रमेण शीलितो हन्ति वृक्षमिन्द्राशनिर्यथा ॥ ९४ ॥

यह बृहद्वङ्गेश्वरनामक रस रक्तगतमूत्रमें प्रयोग करनेसे विशेष लाभ होता है। एवं बहुमूत्रादि उपर्युल्लिखितसर्वप्रकारकेमूत्रविकार तथा अन्यान्य रोगोंको ऐसे नष्ट करता है जैसे कि इन्द्रका वज्र वृक्षोंके समूहको नष्ट करदेता है। इससे अग्निकी वृद्धि, आयुकी वृद्धि और शरीरमें कान्ति उत्पन्न होती है ॥ ९१–९४ ॥

हरिशङ्कररस ।

मृतं सूताभ्रकं तुल्यं धात्रीफलनिजद्रवैः ।
सप्ताहं भावयेत्खल्वे योगोऽयं हरिशङ्करः ॥
माषमात्रां वटीं खादेत्सर्वमेहप्रशान्तये ॥ ९५ ॥

रससिन्दूर और अभ्रकभस्म इन दोनोंको आमलोंके रसमें सातदिनतक भावना (खरल) देकर एकएक मासेकी गोलियाँ निर्माण करे। इस योगका नाम हरिशंकर है। इसके खानेसे सब प्रमेह शान्त होते हैं ॥ ९५ ॥

वृहद्धरिशंकररस ।

रसगन्धकलोहं च स्वर्णं वङ्गं च माक्षिकम् ।
समभागं तु संपिष्य वटिकां कारयेद्भिषक् ॥
सप्ताहमामलद्रावैर्भावितोऽयं रसेश्वरः ॥ ९६ ॥

शुद्ध पारा, गन्धक, लोहा, सोना, वङ्ग और सोनामाखी इनकी भस्मको समानांश लेवे । सबको आमलांके रसद्वारा एक सप्ताहपर्यन्त भावना देकर अच्छे प्रकार खरल करके एक एक माशा प्रमाण गोलियाँ बनालेवे ॥ ९६ ॥

हरिशङ्करनामाऽयं गहनानन्दभाषितः ।
प्रमेहान्विंशतिं हन्ति सत्यं सत्यं न संशयः ॥ ९७ ॥

इस योगका हरिशंकरनाम है और यह सम्पूर्ण रसोंका ईश्वर है । इसको गहनानन्दनाथने प्रकाशित किया है । यह बीसों प्रकारके प्रमेहोंको सन्देहरहित नष्ट करदेता है । यह बिलकुल सत्य है ॥ ९७ ॥

मेहकुञ्जरकेशरीरस ।

रसगन्धायसाभ्राणि नगवङ्गौ सुवर्णकम् ।
वज्रकं मौक्तिकं सर्वमेकीकृत्य विचूर्णयेत् ॥ ९८ ॥
शतावरीरसेनैव गोलकं शुष्कमातपे ।
बद्ध्वा शुष्कं समुद्धृत्य शरावे सुदृढे क्षिपेत् ॥ ९९ ॥
सन्धिलेपं मृदा कुर्याद्गर्तायां गोमयाग्निना ।
पुटेद्यामचतुःसङ्ख्यमुद्धृत्य स्वाङ्गशीतलम् ॥ १०० ॥
श्लक्ष्णखल्ले विनिक्षिप्य गोलं तु मर्दयेद्दृढम् ।
देवब्राह्मणपूजां च कृत्वा धृत्वाऽथ कूपिके ॥
खादेद्वल्लद्वयं प्रातः शीतं चानु पिबेज्जलम् ॥ १०१ ॥

शुद्ध पारा, शुद्ध गन्धक, लोहा, अभ्रक, शीशा, वङ्ग, सुवर्ण, हीरा और मोती इन सबकी भस्म समान भाग लेकर एकत्र पीसलेवे । फिर शतावरके रसमें सबको विधिपूर्वक खरल करके गोलासा बनाकर धूपमें सुखालेवे । जब खूब सूख जाय तब उस गोलेका सुदृढ दो शरावोंमें स्थापन करे और मिट्टीसे शरावोंके छिद्रोंको लेसकर गड्ढेमें रख उपलोंकी अग्निद्वारा ४ प्रहरतक मृदु पुटपाक करे । जब पककर स्वाङ्गशीतल होजाय तब उक्त गोलेको निकालकर लोहेके खरलमें रखकर उत्तम विधिसे घोटलेवे । तदुपरान्त प्रतिदिन प्रातःकाल देवता तथा ब्राह्मणोंको पूजनकर और कुछ

कुप्पे (कुप्पी) पर रखकर इस रसको दो दो रत्ती प्रमाण शीतल जलके साथ सेवन करे ॥ ९८-१०१ ॥

अष्टादश प्रमेहांश्च जयेन्मासोपयोगतः ।
तुष्टिं तेजो बलं वर्णं शुक्रवृद्धिं च दारुणाम् ॥ २ ॥
अग्नेर्बलं वितनुते मेहकुञ्जरकेसरी ।
दिव्यं रसायनं श्रेष्ठं नात्र कार्या विचारणा ॥ ३ ॥

एक महीनेतक नियमानुसार इसका सेवन करनेसे १८ प्रकारके प्रमेह दूर होते हैं। मनमें प्रसन्नता, तेज, बल, वर्ण और वीर्यकी अत्यन्त वृद्धि और जठराग्नि प्रबल होती है। यह दिव्य रसायन मेहरूपी हाथीको नष्ट करनेके लिये सिंहकी समान है ॥ १०२ ॥ १०३ ॥

अपूर्व मालिनीवसन्त ।

वैक्रान्तमभ्रं रवितार्प्यरौप्यवङ्गं प्रवालं रसभस्म लोहम् ।
सटङ्कणं कम्बुकभस्म सर्वं समांशकं सेव्यवरीहरिद्राः ॥ १०४ ॥
द्रवैर्विभाव्यं मुनिसंख्यया च मृगाङ्कजाशीतकरेण पश्चात् ।
वल्लप्रमाणो मधुपिप्पलीभिर्जीर्णज्वरे धातुगते नियोज्यः ॥
गुडूचिकासत्त्वसितायुतश्च सर्वप्रमेहेषु नियोजनीयः ॥ १०५ ॥
कृच्छ्राश्मरीं निहन्त्याशु मातुलुङ्गाग्निजैर्द्रवैः ।
रसो वसन्तनामाऽयमपूर्वो मालिनीपदः ॥ १०६ ॥

वैक्रान्तमणि, अभ्रक, ताँबा, सोनामाखी, चाँदी, वङ्ग, मोती, रससिन्दूर, लोहा, सुहागा और शङ्खभस्म इन सबको बराबर भाग लेवे। फिर एकत्र करके खस, शतावर और हल्दी इनके रसोंसे क्रमपूर्वक ७ दिनतक खरल करे। पश्चात् कस्तूरी और कपूरके जलमें खरल करके दो दो रत्तीकी गोलियाँ बनालेवे। इसको धातुस्थित जीर्णज्वरमें शहद और पीपलके चूर्णमें, सर्वप्रकारके प्रमेहोंमें गिलोयके सत्त्व और मिश्रीके साथ एवं मूत्रकृच्छ्र और अश्मरीरोगमें बिजौरेनींबूकी जडके क्वाथमें मिलाकर सेवन करे तो उक्त रोग और अन्यतर उत्कट व्याधियाँ तत्क्षण नष्ट होती हैं। यह अपूर्वमालिनीवसन्त नामवाला अत्युत्तम रस है ॥ १०४-१०६ ॥

बृहत्कामचूडामणिरस ।

मौक्तिकं माक्षिकं चैव स्वर्णभस्म पृथक् पृथक् ।
कर्पूरं जातिकोषं च जातीफललवङ्गकम् ॥ १०७ ॥

वङ्गभस्म तथा शाह्वं रूप्यं चापि तथाऽर्द्धकम् ।
चातुर्जातं च संग्राह्यं सर्वमेकत्र चूर्णितम् ॥ १०८ ॥
शतमूलीरसेनैव भावयेत्सप्तवारकम् ।
ततो गुञ्जाप्रमाणेन वटिका भिषजा कृता ॥ १०९ ॥
अनुपानविशेषेण रोगाकरविनाशिनी ।

मोती, स्वर्णमाक्षिक, सुवर्ण इनकी भस्म, कपूर, जावित्री, जायफल, लौंग, बङ्गभस्म ये प्रत्येक एक एक तोला एवं रूप्यभस्म, दारचीनी, इलायची, तेजपात और नागकेशर ये प्रत्येक छः छः माशे लेवे। फिर सबको एकत्र पीसकर शतावरके रसमें सातवार भावना देकर एक एक रत्तीकी गोलियाँ बनालेवे। इनमेंसे एक गोली प्रतिदिन प्रातःकाल अनुपानविशेषके साथ सेवन करनेसे समस्त रोगोंके समूह नष्ट होते हैं ॥ १०७-११० ॥

शीतं पयोऽनुपानं च कामिनीः कामयेच्छतम् ।
वीर्यहीनो भवेद्यस्तु यो वा स्यात्पतितध्वजः ॥
सोऽशीतिवार्षिको भूत्वा युवेव रमतेऽङ्गनाः ॥ ११
भेषजैर्विविधैः किं स्यादन्यैश्च शतसंख्यकैः ।
फलं न किञ्चित्तत्रास्ति केवलं गौरवंमुहुः ॥ १२ ॥
नातः परतरं किञ्चिदन्ति पुष्टिकरं च तत् ।
अतः सर्वप्रयत्नेन सेव्यो भूमिभुजा सदा ॥ १३ ॥

शीतल दूधके साथ इसको भक्षण करे तो सैकडों स्त्रियोंमें गमन कर सकता है। जो वीर्यहीन हैं या जिनकी ध्वजा भङ्ग होगई है वे पुरुष अस्सी वर्षके बूढे होकर भी इस रसके सेवनसे युवा पुरुषके समान असंख्य रमणियोंके साथ रमण कर सकते हैं। अन्यान्य नाना प्रकारकी सैंकडों औषधियोंसे सिवा गुरुताके और फल नहीं होता। इससे बढकर पुष्टिकरनेवाली उत्तम औषधि कोई नहीं है, इसलिये राजा, महाराजाओंको इसका सप्रयत्न सेवन करना चाहिये ॥ ११-१३ ॥

विशेषाद्ध्वजभङ्गं च मन्दाग्निं श्वयथुं तथा ।
रक्तोद्भवश्च नारीणां पानाद्दोषो विनश्यति ॥
प्रमेहं मूत्ररोगं च सप्ताहेन विनाशयेत् ॥ ११४ ॥

यह रस विशेषकर ध्वजभङ्ग, प्रमेह, मूत्रकृच्छ्र, मन्दाग्नि, सूजन और स्त्रियोंके रक्तोत्पन्न दोषोंको एक सप्ताहमेंही नाश करता है ॥ ११४ ॥

प्रमेहचिन्तामणि।

मृतसूताभ्रवङ्गं च स्वर्णं लौहं प्रकल्पयेत्।
मौक्तिकं च प्रवालं च माक्षिकं सममाहरेत् ॥ १५ ॥
कन्यानीरेण सम्मर्द्य द्विगुञ्जाफलमानतः।
छायाशुष्का वटी कार्या भक्षणीया प्रयत्नतः ॥ १६ ॥
प्रमेहान्विंशतिं हन्ति बहुमूत्रं च सोमकम्।
अश्मरीं मूत्रकृच्छ्रं च मूत्राघातं सुदारुणम् ॥
वृष्यो बलकरो हृद्यः शुक्रवृद्धिकरः परः ॥ ११७ ॥

पारद, अभ्रक, बङ्ग, सोना, लोहा, मोती, मूँगा और सोनामाखी इन सबकी भस्मको समान भाग लेकर घीग्वारके रसमें उत्तम विधिसे खरल करके दो दो रत्तीकी गोलियाँ बनावे। फिर छायामें सुखाकर रखलेवे। इसको यथानियम सेवन करनेसे बीसों प्रकारके प्रमेह, बहुमूत्र, सोमरोग, पथरी, मूत्रकृच्छ्र और दारुण मूत्राघातप्रभृति रोग शमन होते हैं। यह रस पुष्टिकारक, बलदायक, हृदयको हितकारी व वीर्य्यकी अत्यन्त वृद्धि करनेवाला है ॥ ११५-११७ ॥

शाल्मलीघृत।

शाल्मलीद्रवसंयुक्तं सर्पिश्छागीपयोऽन्वितम्।
अश्वगन्धां वरीं रास्नां मुसलीं विश्वभेषजम् ॥ १८ ॥
अनन्तां मधुकं द्राक्षां दत्त्वा च पालमानतः।
पचेन्मन्दाग्निना वैद्यः पात्रे मृत्परिनिर्मिते ॥ १९ ॥
प्रमेहान्निखिलान्हन्ति शुक्रमेहं विशेषतः।
क्लैब्यं धातुक्षयं शोषं कासं चैतद्वरं घृतम् ॥ १२० ॥

सेमलकी मुसलीका रस दो सेर, बकरीका घी दो सेर, बकरीका दूध दो सेर एवं असगन्ध, शतावर, रायसन, मुसली, सोंठ, अनन्तमूल, मुलहठी और दाख इनके चार चार तोले चूर्णको लेवे। सबको ८ सेर जलमें मन्द मन्द अग्निसे पकावे। पककर जब घृतमात्र शेष रहजाय तब उतारकर स्वच्छ मिट्टीके बर्त्तनमें भरकर रखदेवे। इस घृतको सेवन करनेसे सर्वप्रकारके प्रमेह विशेषकर शुक्रप्रमेह, नपुंसकता, धातुक्षीणता, शोष, खाँसी आदि विकार जाय ॥

दाडिमाद्यघृत।

दाडिमस्य तु बीजानि कृमिघ्नस्य च तण्डुलाः।
रजनी चविकाऽजाजी त्रिफला नागरं कणा ॥ १२१ ॥

त्रिकण्टकस्य बीजानि यमानी धान्यकं तथा।
वृक्षाम्लं चपला कोलं सिन्धूद्भवसमायुतम् ॥ २२ ॥
कल्कैरक्षसमैरेभिर्घृतप्रस्थं विपाचयेत्।
पाने भोज्ये च दातव्यं सर्वर्तुषु च मात्रया ॥ २३ ॥

अनारदाने, वायविडङ्ग, हल्दी, चव्य, कालाजीरा, त्रिफला, सोंठ, पीपल, गोखुरूके बीज, अजवायन, धनियाँ, विषांविल, पीपलामूल, बेर, और सेंधानमक इनका दो दो तोले कल्क एवं गोघृत १ प्रस्थ छे ८ सेर जलमें पकावे। जब अच्छे प्रकार पककर सिद्ध होजाय तब इस घृतको पान और भोजनमें उचित मात्रासे देवे। यह घृत सब ऋतुओंमें सेवन किया जाता है ॥ २१-२३ ॥

प्रमेहान्विंशतिविधान् मूत्राघातांस्तथाऽश्मरीम्।
कृच्छ्रं सुदारुणं चैव हन्यादेतन्न संशयः ॥ २४ ॥
विबन्धानाहशूलघ्नं कामलाज्वरनाशनम्।
दाडिमाद्यं घृतं नाम्ना अश्विभ्यां निर्म्मितं पुरा ॥ १२५ ॥

यह बीसों प्रकारके प्रमेह, मूत्राघात, मूत्रकृच्छ्र, पथरी, विबन्ध, आनाह, शूल, कामला और ज्वरादि रोगोंको निश्चय नाश करता है। इस दाडिमाद्यनामक घृतको अश्विनीकुमारोंने बनाया है ॥ १२४ ॥ १२५ ॥

बृहद्दाडिमाद्यघृत।

चतुःषष्टिपलं पक्वदाडिमस्य सुकुट्टितम्।
चतुर्गुणं जलं दत्त्वा चतुर्भागावशेषितम् ॥ २६ ॥
क्वाथेन वस्त्रपूतेन घृतप्रस्थं विपाचयेत्।
दाडिमं चविकाऽजाजी कृमिघ्नं रजनीद्वयम् ॥ २७ ॥
द्राक्षाखर्जूरखुआतखुरपलं गजपिप्पली।
अजमोदा महानिम्बं काकोली नागरं वचा ॥ २८ ॥
देवाह्वा चविका कुष्ठं काश्मरी मधुयष्टिका।
श्यामेन्द्रवारुणी मूर्वा शुभा शृङ्गी धनीयकम् ॥ २९ ॥
कुलत्थं च महामेदा निम्बश्च बृहतीद्वयम्।
हुण्डोरपलं वरा वाला समङ्गा सिन्धुवारकम् ॥
कल्कं चैषां युक्तियोगाद् ग्राह्यं हि परिभाषया ॥ १३० ॥

उत्तम पकेहुए अनारके ६४ पल बीजोंको कूटकर २५६ पल जलमें पकावे। पकते २ जब चौथाई भाग जल शेष रहजाय तब उतारकर छानलेवे। पुनः इस काथमें गोघृत ६४ तोले एवं अनारका छिलका, चव्य, कालाजीरा, वायविडङ्ग, हल्दी, दारुहल्दी, दाख, खजूर, ताडका माथा, नीलकमल, गजपीपल, अजमोद, बकायन, काकोली, सोंठ, बच, देवदारु, चव्य, कूठ, कुम्भेर, मुलहठी, श्यामालता, इन्द्रवारुणी, मूर्वा, वंशलोचन, काकडासिंगी, धनियाँ, कुलथी, महामेदा, नीमकी छाल, कटाई, कटेरी, दण्डोत्पल, त्रिफला, अडूसा, सातला और निर्गुण्डीकी जड इन सब औषधियोंके कल्कको समान भाग मिलाकर एक सेर तथा पाकके लिये जल आठ सेर डालदेवे। फिर सबको एकत्रकर उत्तम विधिसे घृतको सिद्ध करे ॥ २६-१३० ॥

प्रमेहं वातिकं हन्ति पैत्तिकं श्लैष्मिकं तथा ।
हृच्छूलं वस्तिजं शूलं मूत्राघातांस्त्रयोदश ॥ ३१ ॥
हिक्कां श्वासं च कासं च यक्ष्माणं सर्वरूपिणम् ।
स्वरक्षयमुरोरोगं रक्तपित्तमरोचकम् ॥ ३२ ॥
ये च प्रमेहजा रोगास्तान्सर्वान्नाशयत्यपि ।
दाडिमाद्यमिदं सर्वप्रमेहानां निषूदनम् ॥ ३३ ॥
अश्विभ्यां निर्मितं ह्येतत्प्रमेहकरिकेसरी ॥ १३४ ॥

यह दाडिमाद्यनामवाला घृत सर्वप्रकारके प्रमेहों और तज्जन्य उपद्रवों तथा उपर्युक्त सम्पूर्णरोगोंको शीघ्र नष्ट करता है। इसको अश्विनीकुमारोंने रचा है, यह प्रमेहरूपी गजको हनन करनेके लिये सिंहके समान है ॥ ३१-१३४ ॥

महादाडिमाद्यघृत ।

दाडिमस्य फलप्रस्थं प्रस्थं च यवतण्डुलम् ।
कुलत्थप्रस्थमादाय घृतप्रस्थं विपाचयेत् ॥ २५ ॥
शतावरीरसप्रस्थं गव्यदुग्धं च तत्समम् ।
कल्कः सार्द्धपिचुर्द्राक्षा खर्जूरं त्रिफला तथा ॥ २६ ॥
रेणुका चाष्टवर्गं च देवदारु निशाद्वयम् ।
बिम्बी कुष्ठकमेला च विदार्यतिबला तथा ॥
शिलात्वचक्षुशीरं च शुद्धं कृष्णाभ्रचूर्णकम् ॥ २७ ॥

अनारके दाने १ प्रस्थ, जौके चावल १ प्रस्थ और कुलथी १ प्रस्थ लेवे। सबको अठगुने जलमें पृथक् पृथक् पकाकर चतुर्भागावशिष्ट क्वाथको ग्रहण करे। उस

क्वाथके साथ घी १ प्रस्थ, शतावरका रस १ प्रस्थ, गौका दूध १ प्रस्थ एवं दाख, खजूर, त्रिफला, रेणुका, जीवकादि गणकी औषधियें, देवदारु, हल्दी, दारुहल्दी, कन्तूरी, कूठ, इलायची, विदारीकन्द, कंघी, शिलाजीत, दारचीनी, खस और शोधित कृष्णाभ्रककी भस्म इनके श्लक्ष्णतर कल्कको एक एक तोला मिलाकर मन्दमन्द अग्निसे अच्छे प्रकार घृतको पकावे ॥ ३५-३७

प्रमेहान्विंशतिं हन्ति मूत्राघातांस्त्रयोदश ।
अश्मरीं मूत्रकृच्छ्रं च रक्तपित्तं सुदारुणम् ॥ ३८ ॥
वातजं पित्तजं चैव श्लेष्मजं सान्निपातिकम् ।
बृंहणं च विशेषेण सर्वमेहहरं परम् ॥ ३९ ॥
अश्विभ्यां निर्मितं सिद्धं दाडिमाद्यमिदं महत् ॥ ४० ॥

यह महादाडिमाद्य घृत यथाविधि सिद्ध कर सेवन करनेसे २० प्रमेह, १३ मूत्राघात, अश्मरी, मूत्रकृच्छ्र, कठिनतर रक्तपित्त, वात पित्त कफ और सन्निपातसे उत्पन्न हुये अनेकों उपद्रव दूर होते हैं और वीर्यवृद्धि तथा पुष्टि होती है ॥

मेहमिहिरतैल ।

पञ्चमूल्यमृताधात्रीदाडिमानां तुलां पचेत् ।
जलद्रोणे स्थिते पादे तैलप्रस्थं विपाचयेत ॥ ४१ ॥
क्षीरं तैलसमं कल्कान् निम्बभूनिम्बगोक्षुरम् ।
दाडिमं रेणुकं बिल्वं दारु दार्वीं बलाहकम् ॥
त्रिफला तगरं द्राक्षा जम्ब्वाम्रवल्कलाभयम् ॥ ४२ ॥

पञ्चमूल, गिलोय, आमले और अनारदाना ये सब औषधें सौ पल लेकर ३२ सेर जलमें पकावे। जब पकते २ चौथाई भाग जल शेष रहजाय तब उतारकर वस्त्रमें छानलेवे। पश्चात् इस क्वाथमें तिलका तेल १ प्रस्थ, दूध १ प्रस्थ तथा कल्कार्थ नीमकी छाल, चिरायता, गोखुरू, अनारका बक्कल, रेणुका, बेलका गूदा, देवदारु, दारुहल्दी, नागरमोथा, त्रिफला, तगर, दाख, जामुनकी छाल, आमकी छाल और खस ये सब समान भाग मिश्रित आधसेर मिलाकर विधिपूर्वक तैलको सिद्ध करे ॥ ४१ ॥ ४२ ॥

नाम्नेदं मेहमिहिरं सर्वमूत्रामयाञ्जयेत ।
हस्तपादशिरोदाहं दौर्बल्यं कृशतां तथा ॥ ४३ ॥
क्षीणेन्द्रिया नष्टशुक्राः स्त्रीक्षीणाश्चापि ये नराः ।
तेषां वृष्यं च बल्यं च वयःस्थापनमेव च ॥ ४४ ॥

यह प्रमेहमिहिरनामक तैल सर्वप्रकारके मूत्रविकारोंको नष्ट करता है एवं हाथ, पाँव और शिरमें जलन, दुर्बलता, कृशता, इन्द्रियोंकी क्षीणता और वीर्यहीनताको दूर करता है जो पुरुष स्त्रियोंके साथ अधिक रमण करनेसे क्षीण होगये हैं उनके लिये यह तेल अत्यन्त वीर्यवर्द्धक, बलकारक, आयुको स्थापन करनेवाला है ४३-४४

प्रमेहमिहिरतैल।

शतपुष्पा देवकाष्ठं मुस्तकं च निशाद्वयम्।
मूर्वा कुष्ठं वाजिगन्धा चन्दनद्वयरेणुकम् ॥ ४५ ॥
कटुकी मधुकं रास्ना त्वगेला ब्रह्मयष्टिका।
चविका धान्यकं वत्सं पूतिकागुरुपत्रकम् ॥ ४६ ॥
त्रिफला नलिका बाला बला चातिबला तथा।
मञ्जिष्ठा सरलं पद्मं लोध्रं मधुरिका वचा ॥ ४७ ॥
अजाजी चोशिरं जाती वासा तगरपादुका।
एतेषां कार्षिकैर्भागैस्तैलप्रस्थं विपाचयेत ॥ ४८ ॥
शतावर्या रसं तुल्यं लाक्षारसचतुर्गुणम्।
मस्तु लाक्षारसैस्तुल्यं क्षीरं तुल्यं प्रदापयेत्॥
द्रव्यैरेतैः पचेत्तैलं गन्धं दत्त्वा यथाक्रमम् ॥ ४९ ॥

प्रथम सोया, देवदारु, नागरमोथा, हल्दी, दारुहल्दी, मूर्वा, कूठ, असगन्ध, श्वेतचन्दन, रक्तचन्दन, रेणुका, कुटकी, मुलहठी, रास्ना; दारचीनी, इलायची, भारङ्गी, चव्य, धनियाँ, इन्द्रजौ, पूतिकरञ्ज, अगर, पत्रज, त्रिफला, नली, सुगन्धवाला, खिरैंटी, कंघी, मंजीठ, धूपसरल, पद्माख, लोध, सौंफ, वच, कालाजीरा, खस; जायफल, अडूसेकी छाल और तगर इन सब ओषधियोंको दो दो तोले लेवे और खूब बारीक कूट पीसकर चूर्ण बनाकर रखलेवे। पश्चात् लाखको ४ प्रस्थ लेकर चौगुने जलमें पकावे। जब पकते पकते चौथाई हिस्सा जल बाकी रहजाय तब उतारकर छान लेवे। इस रसके साथ तिलका तेल १ प्रस्थ, शतावरका रस १ प्रस्थ, दहीका तोड ४ प्रस्थ, दूध १ प्रस्थ और उपर्युक्त चूर्ण मिलाकर उत्तम रीतिसे तैलको सिद्ध करे। जब यथाविधि पककर सिद्ध होजाय तब पवित्र पात्रमें रखदेवे॥ ४५-४९ ॥

एतत्तैलवरं श्रेष्ठमभ्यङ्गान्मारुतापहम्।
विषमाख्यान्ज्वरान्सर्वान्मेदोमज्जगतानपि ॥ १५० ॥

वातिकं पैत्तिकं चैव श्लैष्मिकं सान्निपातिकम्।
क्षीणेन्द्रिये तथा शस्तं ध्वजभङ्गे विशेषतः ॥ ५१ ॥
दद्यात्तैलं विशेषेण फलमस्य च कथ्यते।
दाहं पित्तं पिपासां च छर्दिं च मुखशोषणम् ॥ ५२ ॥
प्रमेहान् विंशतिं चैव नाशयेदविकल्पतः।
प्रमेहमिहिरं नाम्ना रतिनाथेन भाषितम् ॥ ५३ ॥

इस सर्वश्रेष्ठ तेलकी मालिश करनेसे वायुजनित समस्त उत्कट व्याधियाँ दूर होती हैं। एवमेव वातज, पित्तज, कफज और त्रिदोषज, मेदोगत, मज्जागत सर्वप्रकारके विषमज्वर नष्ट होते हैं। यह तेल नष्टेन्द्रिय और ध्वजभङ्ग रोगमें विशेषकर लाभदायक है। इसके सेवनसे दाह, पित्तविकार, तृषा, वमनेच्छा, मुखमें शोष तथा बीसों प्रकारके प्रमेह निश्चय नाश होजाते हैं। इस प्रमेहमिहिरनामक तेलको कामदेवने प्रकाशित किया है ॥ १५०-१५३ ॥

देवदार्वाद्यरिष्ट।

तुलार्द्धं देवदारु स्याद्वासायाः पलविंशतिः।
मञ्जिष्ठेन्द्रयवा दन्ती तगरं रजनीद्वयम् ॥ ५४ ॥
रास्ना कृमिघ्नं मुस्तं च शिरीषं खदिरार्जुनम्।
भागान्दशपलान्दद्याद्यमान्या वत्सकस्य च ॥ ५५ ॥
चन्दनस्य गुडूच्याश्च रोहिण्याश्चित्रकस्य च।
भागानष्टपलानेतानष्टद्रोणेऽम्भसः पचेत् ॥ ५६ ॥
द्रोणशेषे कषाये च शीतीभूते प्रदापयेत्।
धातक्याः षोडशपलं माक्षिकस्य तुलात्रयम् ॥ ५७ ॥
व्योषस्य द्विपलं दद्यात्त्रिजातकचतुःपलम्।
चतुःपलं प्रियङ्गोश्च द्विपलं नागकेशरात् ॥ ५८ ॥
सर्वाण्येतानि संचूर्ण्य घृतभाण्डे निधापयेत् ॥ ५९ ॥

देवदारु ५० पल विसौंटेकी छाल २० पल, मंजीठ, इन्द्रजौ, दन्ती, तगर, हल्दी, दारुहल्दी, रास्ना, वायविडङ्ग, नागरमोथा, शिरसकी छाल, खैर, अर्जुनवृक्षकी छाल, ये प्रत्येक दस दस पल, अजवायन, कुडेकी छाल, लालचन्दन, गिलोय, कुटकी और चीतेकी जड ये प्रत्येक आठ आठ पल लेवे। सबको एकत्र

कर ८ द्रोण जलमें पकावे । जब एक द्रोण जल शेष रहे तब उतारकर छानलेवे । जब शीतल होजाय तब उस क्वाथमें धायके फूल १६ पल, शहद ३०० पल, त्रिकुटा २ पल, त्रिजातकचूर्ण ४ पल, फूलप्रियंगु ४ पल और नागकेशर २ पल इनका खूब बारीक चूर्ण करके डालदेवे और एक उत्तम घीके चिकने बासनमें भरकर मुख बन्द करके गाडदेवे ॥ ५४–५९ ॥

मासादूर्ध्वं पिबेदेनं प्रमेहं हन्ति दुर्जयम् ।
वातरोगग्रहण्यर्शोमूत्रकृच्छ्राणि नाशयेत् ॥
देवदार्वादिकोऽरिष्टो दद्रूकुष्ठविनाशनः ॥ १६० ॥

फिर सवा महीनेके पीछे उसको निकालकर प्रतिदिन प्रातःकाल शुद्ध होकर उचित मात्रासे सेवन करे । यह देवदार्वाद्यरिष्ट दुर्जय प्रमेह, वातजरोग, संग्रहणी, बवासीर, मूत्रकृच्छ्र, दाद और कुष्ठादिरोगोंको शीघ्र नष्ट करता है ॥ ६० ॥

चन्दनासव ।

चन्दनं वालुकं मुस्तं गाम्भारीं नीलमुत्पलम् ।
प्रियङ्गुं पद्मकं लोध्रं मञ्जिष्ठां रक्तचन्दनम् ॥ ६१ ॥
पाठां किराततिक्तं च न्यग्रोधं पिप्पलं शठीम् ।
पर्पटं मधुकं रास्नां पटोलं काञ्चनारकम् ॥ ६२ ॥
आम्रत्वचं मोचरसं प्रत्येकं पलमात्रकम् ।
धातकीं षोडशपलां द्राक्षायाः पलविंशतिम् ॥ ६३ ॥
जलद्रोणद्वये क्षिप्त्वा शर्करायास्तुलां तथा ।
गुडस्यार्द्धतुलां चापि मासं भाण्डे निधापयेत् ॥ ६४ ॥
चन्दनासव इत्येष शुक्रमेहविनाशनः ।
बलपुष्टिकरो हृद्यो वह्निसन्दीपनः परः ॥ ६५ ॥

सफेद चन्दन, सुगन्धवाला, नागरमोथा, कुम्भेर, नीलकमल, फूलप्रियंगु, पद्माख, लोध, मँजीठ, लालचन्दन, पाढ, चिरायता, बडकी छाल, पीपलकी छाल, कचुर, पित्तपापडा, मुलहठी, रायसन, परवल, कचनारकी छाल, आमकी छाल और मोचरस (सेमलका गोंद) ये प्रत्येक चार चार तोले एवं धायके फूल १६ पल, दाख २० पल, शुद्ध खाँड १०० पल और गुड ५० पल लेवे । इन सबको दो द्रोण जलसे परिपूर्ण एक उत्तम पात्रमें भरदेवे और उसका मुँह बन्द करके गाडदेवे । इस प्रकार एक महीनेतक रखा रहनेदेवे । पश्चात् उसको निकालकर छानलेवे । इसको

चन्दनासव कहते हैं । यह शुक्रप्रमेहको नाश करता है । बल-पुष्टिकारक हृदयको हितकारी व अग्निदीपक है ॥ ६१-६५ ॥

प्रमेहमें पथ्य ।

प्राग्लङ्घनानि वमनानि विरेचनानि प्रोद्वर्त्तनानि शमनानि च दीपनानि । नीवारकङ्गुयववैणवकोरदूषश्यामाकजीर्णकुरुविन्दमुकुन्दकाश्च ॥ ६६ ॥ गोधूमशालिकलमाश्चिरजाः कुलत्था मुद्गाढकीचणयूषरसास्तिलाश्च । लाजाः पुरातनसुरा मधुवाट्यमण्डस्तक्रं च रासभजलं महिषीजलं च ॥६७॥ लट्वाकपोतशशतित्तिरिलावबर्हिभृङ्गैणवर्तकशुकादिजाङ्गलाश्च । शोभाञ्जनानि कुलकानि कठिल्लकानि कर्कोटकानि बृहतीफलतालकानि ॥ ६८ ॥ औदुम्बराणि लशुनानि नवीनमोचपत्तूगोक्षुरकमूषिकपर्णिशाकम् । मन्दारपत्रममृता त्रिफला कपित्थं जम्बूकशेरुकमलोत्पलकन्दबीजम् ॥ ६९ ॥ खर्ज्जूरलाङ्गलिकतालतरूत्तमाङ्गं व्योषं च तिन्दुकफलं खदिरः कलिङ्गः । तिक्तानि चापि सकलानि कषायकाणि हस्त्यश्ववाहनमतिभ्रमणं रवित्विट्॥ व्यायाम इत्यपि गणो भवति प्रकामं मित्र प्रमेहगदपीडितमानवानाम् ॥ १७० ॥

प्रमेहरोगमें प्रथम लङ्घन, वमन, विरेचन और उबटन करावे । पश्चात् रोगको शमन करनेवाली और अग्निको बढानेवाली औषधियाँ देवे । एवं नीवारधान्य, कंगुनीक चावल, जौ, बाँसीके चावल, कोदों, सामाधान्य, पुराने उड़द, सांठीके चावल, गेहूँ, शालिधान, कलमीधान, पुरानी कुलथी, मूँग, अरहर और चनोंका यूष इनका भोजन, तिल, खीलें, पुरानी मदिरा, शहद, भुने जौका मांड, मठा, गर्दभमूत्र, भैंसका मूत्र, गाँवकी चिड़ियें, कबूतर, खरगोश, तीतर, लवा, मोर, भौंरा, काला हिरन, बत्तक और तोता आदि जङ्गली जीवोंका मांसरस, सहिंजना, परवल, करेला, ककोड़ा, बृहतीके फल, ताडके फल, गूलर, लहसन, नवीन केलेकी फली, पतङ्गके पत्तोंका शाक, गोखुरू, मूषाकानीका शाक, फरहदके पत्ते, गिलोय, त्रिफला, कैथ, जामुन, कसेरू,

कमल और नीलकमलका कन्द (भसींडा), कमलगट्टा, खजूर, कलिहारी, ताडका माथा, त्रिकुटा तेन्दुके फल, खैर, इन्द्रजौ एवं सम्पूर्ण कडुवे और कषैले रसवाले पदार्थ, हाथी और घोडेपर सवार होकर भ्रमण करना, धूपका सेवन और व्यायाम (दण्ड—कसरत आदि परिश्रम) करना ये सब खाद्य, ओषधें तथा क्रियायें प्रमेहरोगियोंके विशेष हितकारी हैं ॥ ६६-१७० ॥

प्रमेहमें अपथ्य।

मूत्रवेगं धूमपानं स्वेदं शोणितमोक्षणम्।
सदाऽऽसनं दिवानिद्रां नवान्नानि दधीनि च ॥ ७१ ॥
आनूपमांसं निष्पावं पिष्टान्नानि च मैथुनम्।
सौवीरकं सुरां शुक्तं तैलं क्षीरं घृतं गुडम् ॥ ७२ ॥
तुम्बीं तालास्थिमज्जानं विरुद्धान्यशनानि च।
कूष्माण्डमिक्षुं दुष्टाम्बु स्वाद्वम्ललवणानि च ॥
अभिष्यन्दीनि यत्नेन प्रमेही परिवर्जयेत् ॥ १७३ ॥

मूत्रके वेगको रोकना, धूमपान, स्वेदप्रदान, रुधिर निकलवाना, हरवक्त बैठे रहना, दिनमें शयन करना, नये अन्न, दही, अनूपदेशके प्राणियोंका मांसरस, सेमकी फली, पिट्ठीके पदार्थ, मैथुन करना, सौवीरनामक काँजी, मद्य, सिरका, तेल, दूध, घी, गुड, लौकी, ताडकी गिरी, प्रकृतिविरु भोजन, पेठा, ईखका रस दूषित जल एवं मधुर, खट्टे, नमकीन और कफको बढानेवाले इत्यादि समस्त पदार्थोंको प्रमेहरोगी सप्रयत्न तत्काल त्यागदेवे। क्योंकि ये सब अत्यन्त हानिकर हैं ॥ ७१-१७३ ॥

इति भैषज्यरत्नावल्यां प्रमेहचिकित्सा ॥

सोमरोगकी चिकित्सा।

स्त्रीणामतिप्रसङ्गाद्वा शोकाद्वापि श्रमादपि।
आभिचारिकदोषाच्च गरदोषात्तथैव च ॥ १ ॥
आपः सर्वशरीरेभ्यः क्षुभ्यन्ति प्रस्रवन्ति च।
तस्मात्ताः प्रच्युताः स्थानान्मूत्रमार्गं व्रजन्ति च ॥
प्रसन्ना विमलाः शीता निर्गन्धा नीरुजः सिताः ॥२॥

अत्यन्त मैथुन, शोथ, अधिक परिश्रम, आभिचारिक (उच्चाटनादि) और विष-दोषादि कारणोंसे स्त्रियोंके सब शरीरमें स्थित जल क्षोभित होकर गिरते हैं और वे जल अपने स्थानसे हटकर मूत्रमार्गसे निकलते हैं। ये जल प्रसन्न, विमल, शीतल गन्धरहित, वेदनारहित और सफेद वर्णके होते हैं ॥ १ ॥ २ ॥

स्रवन्ति चातिमात्रं तु दौर्बल्यं गतिहीनता।
शिरसः शिथिलत्वं च मुखतालुविशोषणम् ॥ ३ ॥
सोमरोग इति ज्ञेयो देहे सोमक्षयान्नृणाम्।
सोऽतिक्रान्तः क्रमेणैव स्रवेन्मूत्रमभीक्ष्णम् ॥ ४ ॥
मूत्रातीसारमप्येवं तमाहुर्बलनाशनम्।
तेन तृष्णाभिभूताऽसौ जलं पिबति चाधिकम् ॥ ५ ॥

अधिक परिमाणमें जलस्राव होनेपर दुर्बलता, शक्तिक्षीणता, शिरमें शिथिलता, मुख और तालुमें शोष उत्पन्न होता है। सोमके क्षय होजानेसे स्त्रियोंके शरीरमें यह सोमरोग होता है। सोमरोगकी अधिकता होनेपर बारबार मूत्र आता है। इसको मूत्रातिसार भी कहते हैं। इस रोगमें बलनाश होजानेके कारण तृषा अधिक लगने से जल बहुत पियाजाता है ॥ ३-५ ॥

कदलीनां फलं पक्कं धात्रीफलरसो मधु।
शर्करापयसा पीतमपां धारणमुत्तमम् ॥ ६ ॥

केलेकी पकी फली, आमलोंका रस, शहद, खाँड और दूध इन सबोंको समभाग एकत्र मिलाकर सेवन करे तो सोमधातुका निकलना बन्द होजाताहै ॥ ६ ॥

कदलीनां फलं पक्कं विदारीं च शतावरीम्।
क्षीरेण पाययेत्प्रातरपां धारणमुत्तमम् ॥ ७ ॥

केलेकी पकी फली, विदारीकन्द और शतावर इनके चूर्णको समान भाग लेकर दूधके साथ पीवे तो स्त्रियोंका बहुमूत्ररोग नष्ट होजाता है ॥ ७ ॥

धात्रीफलस्य रसकं मधुना च पिबेत्सदा।
बहुमूत्रक्षयं कुर्यात्क्षारेण वासकस्य च ॥ ८ ॥

आमलोंके रसको शहदमें मिलाकर अथवा अडूसेके रसको जवाखारके साथ मिलाकर सेवन करनेसे बहुमूत्ररोग नाश होता है ॥ ८ ॥

तालकन्दं च तरुणं खर्जूरं कदलीफलम्।
पयसा पाययेत्प्रातर्मूत्रातीसारनाशनम् ॥ ९ ॥

कच्चे ताडकी जड, खरजूरकी जड और केलेकी पकी फली इनको बराबर २ लेकर दूधके साथ प्रतिदिन प्रातःकाल पान करे तो मूत्रातीसार दूर होय ॥ ९ ॥

माषचूर्णं समधुकं विदारी शर्करा मधु ।
पयसा पाययेत्प्रातः सोमरोगविनाशनम् ॥ १० ॥

उडदोंका चूर्ण, मुलहठीका चूर्ण, विदारीकन्दका चूर्ण, चीनी और शहद ये सब समानांश लेकर दूधके साथ प्रातःसमय पान करे तो सोमरोग शमन होता है ॥

बहुमूत्रं तथा चान्यान् रोगांश्चैव तदुद्भवान् ।
तृष्णाधिके प्रदातव्यं शृतशीतमिदं शुभम् ॥ ११ ॥
सारिवा मधुकं द्राक्षा दर्भः सरलचन्दने ।
पथ्या मधुकपुष्पं च सर्वं च समभागकम् ॥ १२ ॥
जले संस्थाप्य रजनीं पराह्णे वस्त्रगालितम् ।
प्रोक्तं गहननाथेन सद्यस्तृष्णाहरं परम् ॥ १३ ॥

बहुमूत्ररोगमें अन्यान्य उपद्रवोंके उत्पन्न होनेपर तृषा अधिक लगे तो सारिवा, मुलहठी, दाख, कुशा, धूपसरल, लालचन्दन, हरड और महुएके फूल इन सबको समान भाग मिश्रित दो तोले लेवे और रात्रिके समय मिट्टीके स्वच्छ पात्रमें कुछ थोडासा जल डालकर भिगो देवे। फिर अगले दिन प्रातःकाल वस्त्रमें छानकर इस शीतल जलको पीनेसे तृषाका वेग शीघ्र शान्त होता है। श्रीगहनानन्दनाथने ऐसा कहा है ॥ ११-१३ ॥

तारकेश्वररस ।

मृतं सूतं मृतं लौहं मृतं वङ्गाभ्रकं समम् ।
मर्दयेन्मधुना चैव रसोऽयं तारकेश्वरः ॥ १४ ॥
माषमात्रं लिहेत्क्षौद्रैर्बहुमूत्रप्रशान्तये ।
औदुम्बरं फलं पक्वं चूर्णितं मधुना लिहेत् ॥ १५ ॥

शुद्ध पारेकी भस्म, लोहभस्म, वंगभस्म और अभ्रकभस्म इनको समान भाग लेकर शहदमें खरल कर लेवे। इस प्रकार इस तारकेश्वररसको सिद्ध कर इसको एक एक माशा नित्यप्रति प्रातःसमय शहदमें मिलाकर सेवन करे और पीछेसे गूलरके पके फलोंके १ तोला चूर्णको शहदके साथ मिश्रितकर चाटे तो बहुमूत्ररोग नष्ट होता है ॥ १४ ॥ १५ ॥

गगनादिलौह ।

गगनं त्रिफला लौहं कुटजं कटुकत्रयम् ।
पारदं गन्धकं चैव विषटङ्कणसर्जिकाः ॥ १६ ॥
त्वगेला तेजपत्रं च वङ्गं जीरकयुग्मकम् ।
एतानि समभागानि श्लक्ष्णचूर्णानि कारयेत् ॥ १७ ॥
तदर्द्धं चित्रकं चूर्णं कार्षिकं मधुना लिहेत् ।
अवश्यं विनिहन्त्याशु मूत्रातीसारसोमकम् ॥ १८ ॥

अभ्रकभस्म, त्रिफला, लोहभस्म, कुडेकी छाल, सोंठ, मिरच, पीपल, शुद्ध पारेकी भस्म, शुद्ध गन्धक, शुद्ध मीठा तेलिया, सुहागा, सज्जी, दारचीनी, छोटी इलायची, तेजपात, वंगभस्म, जीरा और कालाजीरा ये प्रत्येक एक एक तोला लेकर एकत्र कूट पीसकर बारीक चूर्ण करलेवे और सब चूर्णसे आधा चीतेकी जडका चूर्ण मिलालेवे । प्रतिदिन इस चूर्णको एक कर्ष परिमाण शहदम मिलाकर चाटे तो मुत्रातीसार और सोमरोग अवश्यमेव दूर होता है ॥ १६-१८ ॥

सोमनाथरस ।

कर्षं जारितलौहं च तदर्द्धं रसगन्धकम् ।
एला पत्रं निशायुग्मं जम्बु वीरणगोक्षुरम् ॥ १९ ॥
विडङ्गं जीरकं पाठा धात्री दाडिमटङ्कणम् ।
चन्दनं गुग्गुलुर्लोध्रं शालार्जुनरसाञ्जनम् ॥
छागीदुग्धेन वटिकां कारयेद्दशरक्तिकाम् ॥ २० ॥

लोहेकी भस्म २ तोले, शुद्ध पारा और शुद्ध गन्धक एक एक तोला एवं छोटी इलायची, तेजपात, हल्दी, दारुहल्दी, जामुनकी छाल, खसका मूल, गोखुरू, वायविडंग, जीरा, पाढ, आमले, अनारदाना, सुहागा, चन्दन, गूगल, लोध, राल, अर्जुनछाल और रसौंत इन औषधियोंके चूर्णको समान भाग लेकर बकरीके दूधमें यथाविधि खरल करके दस दस रत्तीकी गोलियाँ बनालेवे ॥ १९ ॥ २० ॥

निर्मितो नित्यनाथेन सोमनाथरसस्त्वयम् ।
सोमरोगं बहुविधं प्रदरं हन्ति दुर्जयम् ॥ २१ ॥
योनिशूलं मेढ्रशूलं सर्वजं चिरकालजम् ।
बहुमूत्रं विशेषेण दुर्जयं हन्त्यसंशयम् ॥ २२ ॥

इस सोमनाथरसको महाराज नित्यनाथने निर्माण किया है। यह रस अनेक प्रकारके सोमरोग, दुर्जय प्रदर, योनिगतशूल, लिङ्गशूल तथा अन्य सर्वप्रकारके शूलः विशेषकर बहुत पुराने और दुस्तर बहुमूत्ररोगको शीघ्र नष्ट करता है ॥ २१ ॥ २२॥

बृहत्सोमनाथरस ।

हिङ्गुलसम्भवं सूतं पालिधारसमर्दितम् ।
रण्डाशोधितगन्धं च तेनैव कज्जलीकृतम् ॥ २३ ॥
तद्द्वयोर्द्विगुणं लोहं कन्यारसविमर्दितम् ।
अभ्रकं वङ्गकं रौप्यं खर्परं माक्षिकं तथा ॥ २४ ॥
सुवर्णं च समं सर्वं प्रत्येकं च रसार्द्धकम् ।
तत्सर्वं कन्यकाद्रावैर्मर्दयेद्द्रावयेत्ततः ॥ २५ ॥
भेकपर्णीरसेनैव गुञ्जाद्वयवटीं ततः ।
मधुना भक्षयेच्चापि सोमरोगनिवृत्तये ॥ २६ ॥

हिंगुलसे निकले हुए पारेकी फरहदके पत्तोंके स्वरसमें खरल करे और शुद्ध गन्धकको मूषाकानीके रसमें खरल करे। इन दोनोंको एक एक तोला लेकर कज्जली बनावे। तदनन्तर कज्जलीसे दुगुनी लोहभस्म ४ तोले मिलाकर घीग्वारके रससे घोटे। फिर इनमें अभ्रक, वंग, रूपा, खपरिया, सोनामखी और सुवर्ण इन सबकी भस्म पारेसे आधी आधी भाग मिलाकर घीग्वारके रससे खरल कर मण्डूकपर्णीके रसमें अच्छे प्रकार खरल करके दो दो रत्तीकी गोलियाँ बनालेवे। प्रतिदिन एक गोली शहदमें मिलाकर खाय तो सोमरोग शान्त होता है ॥ २३-२६ ॥

प्रमेहान्विंशतिं हन्ति बहुमूत्रं च सोमकम् ।
मूत्रातिसारं कृच्छ्रं च मूत्राघातं सुदारुणम् ॥ २८ ॥
बहुदोषं बहुविधंप्रमेहं मधुसंज्ञकम् ।
हन्ति मेहमिक्षुमेहं लालामेहं विनाशयेत् ॥ २८ ॥
वातिकं पैत्तिकं चैव श्लैष्मिकं सोमसंज्ञकम् ।
नाशयेद्बहुमूत्रं च प्रमेहमविकल्पतः ॥ २९ ॥

यह रस बीसों प्रमेह, बहुमूत्र, सोमरोग, मूत्रातीसार, मूत्रकृच्छ्र, मूत्राघात, अनेक उपद्रवोंसे युक्त नानाप्रकारके प्रमेह, मधुमेह, शर्करामेह, लालामेह, वातज, पित्तज और कफजन्य सोमरोगको निस्सन्देह नष्ट करता है ॥ २७-२९ ॥

सोमेश्वररस।

शालार्जुनकलोध्रं च कदम्बागुरुचन्दनम्।
अग्निमन्थं निशायुग्मं धात्रीदाडिमगोक्षुरम् ॥ २० ॥
जम्बूवीरणमूलं च भागमेषां पलार्द्धकम्।
रसगन्धकधान्याब्दमेलापत्रं तथाऽभ्रकम् ॥ २१ ॥
लौहं रसाञ्जनं पाठा विडङ्गं टङ्कजीरकम्।
प्रत्येकं शाणकं ग्राह्यं पलार्द्धं गुग्गुलोरपि ॥ २२ ॥
घृतेन वटिकां कृत्वा खादेत्षोडशरक्तिकाम्।
गहनानन्दनाथेन रसो यत्नेन निर्मितः ॥ २३ ॥

साल, कोहकी छाल, लोध, कदमकी छाल, अगर, रक्तचन्दन, अरणी, हल्दी, दारुहल्दी, आमले, अनारके छिल्के, गोखुरू, जामुनकी छाल और खसकी मूल ये प्रत्येक दो दो तोले एवं शुद्ध पारा, गन्धक, धनियाँ, नागरमोथा, इलायची, तेजपात, अभ्रक, लोहा, रसौंत, पाढ, वायविडङ्ग, सुहागा और जीरा ये प्रत्येक चार चार माशे और गूगल दो तोले लेवे। इन सबको एकत्र कूट पीसकर घृतमें खरल करके सोलह सोलह रत्तीकी गोलियाँ बनालेवे। नित्यप्रति सुबहको एक एक गोली खाय। श्रीमान् गहनानन्दनाथने इस रसको विस्तृत किया है ॥ २०-२३ ॥

सोमेश्वरो महातेजाः सोमरोगं निहन्त्यलम्।
एकजं द्वन्द्वजंचोग्रं सन्निपातसमुद्भवम् ॥ २४ ॥
उपद्रवसमायुक्तं चिरकालसमुद्भवम्।
मूत्राघातं मूत्रकृच्छ्रं कामलां च हलीमकम् ॥ २५ ॥
भगन्दरोपदंशौ च विविधान् पिडकान् व्रणान्।
विस्फोटार्बुदकण्डूश्च सर्वमेतद् विनाशयेत् ॥ २६ ॥
यकृत्प्लीहोदरं गुल्मशूलार्शःकासविद्रधिम्।
सोमरोगं निहन्त्याशु चिरकालानुबन्धिनम् ॥ २७ ॥
बलवर्णाग्निजननो ग्रहवैगुण्यनाशनः।
छागीदुग्धानुपानेन नारिकेलोदकेन वा ॥ २८ ॥
शीतेन पाकतैलेन यवयूषादियोगतः।
युक्त्या प्रयोज्यो भिषजा रसो दोषविदाह्ययम् ॥ २९ ॥

अत्यन्त तेजवान् यह सोमेश्वररस सोमरोग, एकदोषज, द्विदोषज, अत्युग्र सान्निपातिक और अनेक उपद्रवोंसे युक्त, बहुत पुराना मूत्राघात, मूत्रकृच्छ्र, कामला, हलीमक, भगन्दर, उपदंश, नाना प्रकारकी पीडाजनक व्रण, फोडे, अर्बुदरोग, कण्डू (खुजली), सर्वप्रकारके प्रमेह, यकृत, प्लीहा, उदररोग, गुल्म, शूल, अर्श, खाँसी, विद्रधि और चिरकालोत्पन्न सोमरोगादि कष्टोंको तत्क्षण नष्ट करता है तथा बल, कान्ति और जठराग्निको उत्पन्न करता है और इससे ग्रहपीडा भी दूर होती है । इसमें बकरीका दूध, नारियलका जल, पकाया हुआ शीतल तेल और जौका यूष प्रभृति अनुपानोंको दोषानुसार प्रयोग करे । यह रस सब दोषोंको नष्ट करनेवाला है ॥ ३४-३९ ॥

बहुमूत्रान्तकरस १-२ ।

रसश्च शाल्मलीमूलचूर्णं कदलिमूलजम् ।
उदुम्बरबीजचूर्णं लौहं वङ्गं च विद्रुमम् ॥ ४० ॥
मुक्ताहिफेनसारौ च प्रत्येकं समभागिकम् ।
मर्दयेन्मालती पुष्परसेन कुशलो भिषक् ॥ ४१ ॥
रक्तिद्वयमितां कुर्याद्वटिकामतिशोभनाम् ।
बहुमूत्रान्तको नाम रसः परमशोभनः ॥
मधुमेहं सोमरोगं हन्ति भास्वान् यथा तमः ॥ ४२ ॥

१-रससिन्दूर, सेमलकी मुसलीका चूर्ण, केलेकी मूलका चूर्ण, गूलरके बीजोंका चूर्ण, लोहा, वङ्ग, मूगा, मोती और अफीम ये प्रत्येक द्रव्य समान भाग लेवे । सबको एकत्र मालतीके फूलोंके स्वरसमें अच्छे प्रकार खरल करके दो दो रत्तीकी उत्तम गोलियाँ तैयार करलेवे । यह अत्यन्त सुन्दर बहुमूत्रान्तकनामवाला रस मधुमेह और सोमरोगको इस प्रकार नष्ट करता है, जिस प्रकार सूर्य अपनी प्रखर किरणोंसे अन्धेरेको दूर करदेता है ॥ ४०-४२ ॥

सिन्दूरं च तथा लौहं वङ्गाहिफेनसारकौ ।
उदुम्बरभवं बीजं बिल्वमूलं सुरप्रिया ॥ ४३ ॥
सर्वं समं जन्तुफलरसैः सम्मर्दितं भवेत् ।
रक्तिद्वयमितां खादेद्वटिकामनुपानतः ॥ ४४ ॥
दद्यादौदुम्बरफलरसं पथ्यविधिं शृणु ।
मांसप्रधानं भक्ष्यं च तथा गोधूमपिष्टकम् ।
बहुमूत्रान्तकरसो नाशयेदविकल्पतः ॥ ४५ ॥

२–रससिन्दूर, लोहभस्म, वङ्गभस्म, अफीम, गूलरके बीज, बेलमूलकी छाल और कवावचीनी इन सबको समान भाग लेकर और एकत्र पीसकर गूलरोंके रसमें विधिपूर्वक खरल करे, फिर दो दो रत्तीकी वटी प्रस्तुत करे। नित्यप्रति प्रातःकाल एक गोली खाय और ऊपरसे गूलरोंका रस तथा मधु एकत्र मिलाकर सेवन करे। इसपर मांसके साथ गेहूँकी रोटी भक्षण करे। यह रस सोमरोगको निश्चय दूर करता है ॥ ४३–४५ ॥

हेमनाथरस ।

सूतं गन्धं हेम ताप्यं प्रत्येकं कोलसम्मितम् ।
अयश्चन्द्रं प्रवालं च वङ्गं चार्द्धं विनिक्षिपेत् ॥ ४६ ॥
फणिफेनस्य तोयेन कदलीकुसुमेन च ।
उदुम्बररसेनापि सप्तधा परिमर्दयेत् ॥ ४७ ॥

शुद्ध पारा, शुद्ध गन्धक, सुवर्ण, सोनामाखी ये प्रत्येक एक एक तोला, लोहभस्म, कपूर, मूँगा और वङ्गभस्म ये प्रत्येक छः छः मासे लेवे। सबको एकत्र पीसकर अफीम, केले और गूलरके रसमें सातबार यथाक्रम खरल करे ॥ ४६ ॥ ४७ ॥

वल्लमात्रां वटीं खादेद्यथाव्याध्यनुपानतः ।
प्रमेहान्विंशतिं हन्ति बहुमूत्रं सुदारुणम् ॥ ४८ ॥
सोमरोगं क्षयं चैव श्वासं कासमुरःक्षतम् ।
हेमनाथरसो नाम्ना कृष्णात्रेयेण भाषितः ॥ ४९ ॥
"रसगन्धकयोः स्थाने षड्गुणो जारितो बलिः ।
प्रयोजितो भवेन्नूणां विशेषफलदायकः ॥"

पश्चात् दो रत्ती प्रमाण गोलियां बनावे। वातादि दोषोंके अनुसार अनुपानभेदसे प्रतिदिन एकएक गोली सेवन करे। यह बीसों प्रमेह, दारुण बहुमूत्र, सोमरोग, क्षय, खाँसी, श्वास और उरःक्षत इत्यादि सब रोगोंको नष्ट करता है। इस हेमनाथरसको कृष्णात्रेयमुनिने कहा है। "इसमें पारे और गन्धककी अपेक्षा यदि रससिन्दूर १ तोला डालदियाजाय तो विशेष लाभ होता है" ॥ ४८ ॥ ४९ ॥

मालतीकुसुमाकर ।

चन्द्रभागाः सुवर्णस्य कर्पूरं युग्मभागिकम् ।
वङ्गशीशकलोहानां भागत्रयमुदाहृतम् ॥ ५० ॥

अभ्रप्रवालमुक्तानां भागाश्चत्वार ईरिताः ।
गव्येन पयसा चैव कदलीपुष्पजै रसैः ॥ ९१ ॥
रसेनेक्षुसमुत्थेन तथा पद्मरसेन च ।
उदुम्बररसेनैव भावयेत्सप्तधा पृथक् ॥ ९२ ॥

सुवर्णभस्म १ तोला, कपूर २ तोले, वंग, शीशा और लोहभस्म तीन तीन तोले, अभ्रक, मूँगा और मोतीकी भस्म चार चार तोले लेकर सबको एकत्र पीसलेवे । फिर गोदुग्ध केलेका मोचा, ईखका रस, कमलका रस और गूलरोंका रस इन रसोंमें अलग अलग क्रमपूर्वक सातवार खरल करे ॥ ९०-९२ ॥

रक्तिद्वयमितो हन्ति मालतीकुसुमाकरः ।
रसः सर्वप्रमेहांश्च बहुमूत्रादिकं तथा ॥
सोमरोगांश्च संहन्ति भास्करस्तिमिरं यथा ॥ ९३ ॥

यह मालतीकुसुमाकर नामवाला रस दो रत्ती प्रमाण खानेसे सर्वप्रमेह, बहुमूत्ररोग और सोमरोगको दूर करता है ॥ ९३ ॥

वसन्तकुसुमाकररस ।

वैक्रान्तस्य च भागैकं द्विभाग हेमभस्मनः ।
अभ्रकस्य च भागौ द्वौ मुक्ताविद्रुमयोस्तथा ॥ ९४ ॥
वङ्गभस्म त्रिभागं स्याद्रसस्य भस्मनस्तथा ।
चत्वारोऽस्य च भागाश्च सर्वमेकत्र मर्दितम् ॥ ९५ ॥
जम्बीराद्भिश्च गोदुग्धैरुशीरैर्नववारिभिः ।
वृषद्रवैरिक्षुनीरैः सप्तधा भावयेत्पृथक् ॥ ९६ ॥

वैक्रान्तमणिकी भस्म १ तोला, सुवर्णभस्म, अभ्रक, मोती और मूँगाभस्म प्रत्येक दो दो तोले, वंगभस्म तीन तोले और पारेकी भस्म चार तोले लेवे । फिर सबको एकत्रकर जम्बीरीनीम्बूके रस, गौके दूध, खसकी मूलके रस, सोंठके स्वरस अडूसेके पत्तोंके रस और ईखके रसमें क्रमशः सातवार भावना देवे । तदनन्तर रसौतके रसमें भावना देकर दो दो रत्तीकी गोलियाँ निर्माण करे ॥ ९४-९६ ॥

भावितो रसराजः स्याद्वसन्तकुसुमाकरः ।
वल्लोऽस्य मधुना लीढः सोमरोगं क्षयं नयेत् ॥ ९७ ॥
ध्वजभङ्गं शुक्रमेहं मेहांश्च बहुमूत्रकम् ।
तृष्णां दाहं तालुशोथं नाशयेन्नात्र संशयः ॥ ९८ ॥

बल्यः पुष्टिकरो वृष्यः सर्वरोगनिबर्हणः ।
हन्ति जीर्णज्वरं श्वासं क्षयरोगं कृशाङ्गताम् ॥
नातः परतरं किञ्चिद्रसायनमिहेष्यते ॥ ५९ ॥

इस प्रकार सिद्ध किये हुए वसन्तकुसुमाकरनामक रसकी एक गोली प्रतिदिन प्रातःकाल शहदके साथ सेवन करे तो सोमरोग, ध्वजभंग, शुक्रप्रमेह, अन्यान्यप्रमेह बहुमूत्र, तृषा, दाह, तालुका सूखना, पुराना ज्वर, श्वास, क्षयरोग, और शरीरकी कृशताप्रभृति समस्त विकार नष्ट होते हैं एवं बलदायक, पुष्टिकारक, वीर्यवर्द्धक और व्याधियोंको क्षय करनेके लिये यह अत्युत्तम रसायन है ॥ ५७–५९ ॥

कस्तूरीमोदक ।

कस्तूरी वनिता क्षुद्रा त्रिफला जीरकद्वयम् ।
एलाबीजं त्वचं यष्टिमधुकं मिषिवालकम् ॥ ६० ॥
शतपुष्पोत्पलं धात्री मुस्तकं भद्रसञ्ज्ञकम् ।
कदलीनां फलं पक्वं खर्जूरं कृष्णकं तिलम् ॥ ६१ ॥
कोकिलाक्षस्य बीजं च माषमात्रं समं समम् ।
यावन्त्येतानि चूर्णानि द्विगुणा सितशर्करा ॥ ६२ ॥
धात्रीरसेन पयसा कूष्माण्डस्वरसेन च ।
विपचेत्पाकविद्वैद्यो मन्दमन्देन वह्निना ॥ ६३ ॥
अवतार्य सुशीते च यथालाभं विनिक्षिपेत् ।
अक्षमात्रां प्रयुञ्जीत सर्वमेहप्रशान्तये ॥ ६४ ॥

कस्तूरी, फूलप्रियंगु, कटेरी, त्रिफला, जीरा, कालाजीरा, छोटी इलायचीके दाने, दारचीनी, मुलहठी, सौंफ, सुगन्धवाला, सोआ, नीलकमल, धायके फूल, नागरमोथा, केलेकी पकी फली, खजूर, काले तिल और तालमखाने इन सबको अलग अलग एक एक माशा लेकर बारीक चूर्ण करलेवे। फिर सब चूर्णसे दुगुनी अत्युज्वल मिश्री तथा आमलोंका रस दूध और पेठेका रस ये तीनों सबसे चौगुने लेवे। इन औषधियोंको एकत्रकर मन्दमन्द अग्निसे पकावे। जब अच्छे प्रकार पाक समाप्त होजाय तब उतारकर शीतल होजानेपर एक एक तोलेके लड्डू बनालेवे। इनमेंसे प्रतिदिन प्रातःकाल एक लड्डू खावे तो सर्वप्रकारके प्रमेह शान्त होते हैं ॥ ६०–६४ ॥

वातिकं पैत्तिकं चैव श्लैष्मिकं सान्निपातिकम् ।
सोमरोगं बहुविधं मूत्रातीसारमुल्बणम् ॥ ६५ ॥
मूत्रकृच्छ्रं निहन्त्याशु मूत्राघातं तथाऽश्मरीम् ।
ग्रहणीं पाण्डुरोगं च कामलां कुम्भकामलाम् ॥ ६६ ॥
वृष्यो बलकरो हृद्यः शुक्रवृद्धिकरः परः ।
कस्तूरीमोदकश्चायं चरकेण च भाषितः ॥ ६७ ॥

एवं वातज, पित्तज, कफज और त्रिदोषज सोमरोग, अनेक प्रकारका मूत्रातीसार, दारुण मूत्रकृच्छ्र, मूत्राघात, पथरी, संग्रहणी, पाण्डु, कामला और कुम्भकामलादि विकार शीघ्र नष्ट होते हैं। यह मोदक बलकारी, हृदयको हितकारी, अत्यन्त वीर्यवृद्धिकारी और विशेष पुष्टिकर है। यह कस्तूरीमोदकयोग चरकमहाराजने कहा है ॥ ६५-६७ ॥

धात्रीघृत ।

विना कल्कं स्वल्पधात्रीघृतमेतन्निगद्यते ।
सर्वतुल्यं गुणैरेव पथ्यापथ्यं तदेव हि ॥ ६८ ॥

घृत, आमलोंका रस, पेठेका रस, शतावरका रस, तृणपञ्चमूलको काथ और गोदुग्ध इनको समान भाग लेकर उत्तम प्रकार घृतको सिद्ध करे। यह विना कल्कका घृत है, इसको स्वल्पधात्रीघृत कहते हैं, किन्तु गुणोंमें बृहद्धात्री घृतके समान है। इसपर पथ्य व अपथ्य सब वस्तुयें तदनुसारही हैं ॥ ६८ ॥

बृहद्धात्रीघृत ।

धात्रीफलरसप्रस्थं विदारीस्वरसं तथा ।
क्षीरस्यापि शतावर्याः प्रस्थं प्रस्थं रसस्य च ॥ ६९ ॥
तृणपञ्चरसप्रस्थं दत्त्वा प्रस्थं घृतस्य च ।
पचेन्मृद्वग्निना वैद्यः पाकं ज्ञात्वा विधानतः ॥ ७० ॥
एलालवङ्गत्रिफलाकपित्थफलमेव च ।
सजलं सरसं मांसी कदलीकन्दमेव च ॥ ७१ ॥
उत्पलस्य च कन्दानि कल्कं दत्त्वा विचक्षणः ।
ततः कल्कं परिस्राव्य चूर्णं दद्यात्पलं पलम् ॥ ७२ ॥
मधुकं त्रिवृतौ चैव क्षारकं वृद्धदारकम् ।
शर्करायाः पलान्यष्टौ मधुनश्च पलाष्टकम् ॥
चूर्णं दत्त्वा सुमथितं स्निग्धभाण्डे निधापयेत् ॥ ७३ ॥

आमलोंका रस १ प्रस्थ (६४ तोले), विदारीकन्दका रस १ प्रस्थ, दूध १ प्रस्थ, शतावरका रस १ प्रस्थ, तृणपञ्चमूलका रस १ प्रस्थ और गोघृत १ प्रस्थ लेवे। इन सबको एकत्र मिलाकर मन्दमन्द अग्निसे पकावे। जब पकते पकते पाक गाढा पडजाय तब उसमें इलायची, लौंग, त्रिफला, कैथ, सुगन्धवाला, धूपसरल, बालछड, पकी केलेकी फली और नीलकमलकी जड इन सब औषधियोंके समान भाग मिश्रित १ सेर कल्कको छानकर डाले और फिर पाक करे। जब उत्तम प्रकार पककर सिद्ध होजाय तब मुलहठी, निसोत, जवाखार, विधारा प्रत्येकका चूर्ण चार चार तोले, खाँड ८ पल तथा शहद ८ पल डालकर करछीसे चलाकर सबको एकमएक करलेवे। फिर घृतसे चिकने मिट्टीके बासनमें रखदेवे ॥ ६९–७३ ॥

सोमरोगं निहन्त्याशु तृष्णां दाहमरोचकम् ॥ ७४ ॥
मूत्राघातं मूत्रकृच्छ्रं नाशयेद्बहुमूत्रकम् ।
पित्तजान्विविधान्व्याधीन्वातजांश्च सुदारुणान् ॥ ७५ ॥
करोति शुक्रोपचयं बलवर्णकरं परम् ।
नानारूपविकारघ्नं विशेषाद्बहुमूत्रनुत् ॥ ७६ ॥

यह धात्रीघृत सोमरोग, तृषा, दाह, अरुचि, मूत्राघात, मूत्रकृच्छ्र, बहुमूत्र, पित्तजन्य अनेक रोग, दारुण वातसम्बन्धी विकार, अन्यान्य सर्वप्रकारके रोग, विशेषकर बहुमूत्ररोगको तत्काल विध्वंस करता है। वीर्य्यकी वृद्धि, बल और कान्तिको उत्पन्न करता है ॥ ७४–७६ ॥

कदल्यादिघृत।

कदलीकन्दनिर्यासे तत्प्रसूनतुलां पचेत् ।
चतुर्भागावशेषेऽस्मिन्घृतप्रस्थं विपाचयेत् ॥ ७७ ॥
चन्दनं सरलं मांसी कदली मूलकं तथा ।
एला लवङ्गत्रिफलाकपित्थफलमेव च ॥ ७८ ॥
औदकानि च कन्दानि न्यग्रोधादिगणस्तथा ।

---

१ न्यग्रोधादिगणो यथा—न्यग्रोधोदुम्बराश्वत्थपियालप्लक्षवेतसम् ।
आम्रो जम्बूद्वयं कोलं मधुकं तिन्दुकोऽर्जुनः ॥
तिलकः कटुको नीपो गर्दभाण्डोऽथ किंशुकः ॥

बड, गूलर, पीपल, चिरोजीका वृक्ष, पाखर, बेंत, आम, दोनों जामुन, बेर, महुआ, तेन्दु, अर्जुनवृक्ष, गढ़आइच, कुटकी, कदम, सिरस और ढाक।

कल्केनानेन संसिद्धं सोमरोगनिवारणम् ॥ ७९ ॥
मूत्ररोगानशेषांश्च प्रभूतान् शुक्रपिच्छिलान् ।
प्रमेहान्विंशतिं चैव मूत्राघातांस्त्रयोदश ॥ ८० ॥
बहुमूत्रं विशेषेण मूत्रकृच्छ्रं तथाऽश्मरीम् ।
पीतं घृतं निहन्त्याशु विष्णुचक्रमिवासुरान् ॥
कदल्यादिघृतं नाम विष्णुना परिकीर्तितम् ॥ ८१ ॥

केलेके १०० पल फूलोंको केलेके ६४ सेर रसमें पकावे । पकते पकते जब चौथाई भाग जल शेष रहजाय तब उतारकर छानलेवे । फिर गौका घी एक प्रस्थ, चन्दन, धूपसरल, वालछड, केलेकी जड, इलायची, लौंग, त्रिफला, कैथ, जलोत्पन्न कन्द् (कमलकन्द, कसेरू, नीलकमलकी जड, सिंघाडे, सालग आदि) और न्यग्रोधादिगणकी समस्त औषधियाँ लेवे । इन सबको दो दो तोले कूट पीसकर पूर्वोक्त क्वाथमें डालदेवे । और शनैः शनैः मृदु अग्नि द्वारा यथाविधि घृतको सिद्ध करे । इस घृतको प्रतिदिन नियमानुकूल सेवन करनेसे सोमरोग, सर्वप्रकारके मूत्रविकार, वीर्यकी पिच्छिलता, २० प्रमेह, १३ मूत्राघात, विशेषकर बहुमूत्र, मूत्रकृच्छ्र और अश्मरीआदिरोग तत्काल इस प्रकार नष्ट होते हैं, जिसप्रकार विष्णुभगवान्का सुदर्शनचक्र असुरदलको नाश करदेता है । यह कदल्यादिनामक घृत विष्णुभगवान्ने प्रकाशित किया है ॥ ७७-८१ ॥

इति भैषज्यरत्नावल्यां सोमरोगचिकित्सा ॥

मेदोरोगकी चिकित्सा ।

श्रमचिन्ताव्यवायाध्वक्षौद्रजागरणप्रियः ।
हन्त्यवश्यमतिस्थौल्यं यवश्यामाकभोजनैः ॥ १ ॥
अस्वप्नं च व्यवायं च व्यायामं चिन्तनानि च ।
स्थौल्यमिच्छन्परित्यक्तुं क्रमेणातिप्रवर्द्धयेत् ॥ २ ॥

परिश्रम, चिन्ता, स्त्रीसम्भोग, रास्ताचलना, शहदको पीना, रात्रिमें जागना, जौं और सामा अन्नका भोजन इन सब कृत्योंके करनेसे शरीरकी स्थूलता नष्ट होती है । जो मनुष्य स्थूलताको नष्ट करना चाहते हैं वे रात्रिमें जागना, मैथुन करना, व्यायाम (दंड-कसरत आदि), चिन्ता इनको दिन प्रतिदिन बढानेकी चेष्टा करे, १-२

प्रातर्मधुयुतं वारि सेवितं स्थौल्यनाशनम् ।
उष्णमन्नस्य मण्डं वा पिबन् कृशतनुर्भवेत् ॥ ३ ॥

प्रतिदिन प्रातःसमय शहदको जलमें मिलाकर पान करे तो स्थूलता नष्ट होती है अथवा उष्ण अन्नका माँड पीवे तो स्थूलता दूर होजाती है ॥ ३ ॥

सचव्यजीरकव्योषहिङ्गुसौवर्चलानलाः ।
मस्तुना सक्तवः पीता मेदोघ्ना वह्निदीपनाः ॥ ४ ॥

चव्य, जीरा, सोंठ, मिरच, पीपल, हींग, कालानमक और चीतेकी जड इनको समान भाग लेकर एकत्र पीस लेवे फिर इस चूर्णको १६ गुना जौके चूर्णमें मिलाकर दहीके तोडके साथ पान करनेसे स्थूलता नष्ट होती है और अग्नि प्रवृद्ध होती है॥४॥

विडङ्गनागरक्षारकान्तलौहरजो मधु ।
यवामलकचूर्णं तु प्रयोगः स्थौल्यनाशनः ॥ ५ ॥

वायविडङ्ग, सोंठ, जवाखार, कान्तलोहभस्म, जौ और आमले इन सब औषधियोंके चूर्णको एक एक तोला, किन्तु भस्म सबसे दुगुनी लेवे । फिर सबको एकत्र मधुके साथ मिलाकर चाटनेसे स्थूलता दूर होती है ॥ ५ ॥

बदरीपत्रकल्केन पेया काञ्जिकसाधिता ।
स्थौल्यनुत्स्यात्साग्निमन्थरसं वापि शिलाजतु ॥ ६ ॥

बेरीके पत्तोंको पीसकर काँजीमें पकाकर पेया बनावे । इसको पीनेसे स्थूलता नष्ट होती है।एवं शिलाजीतको अरणीके रसमें मिलाकर पीनेसे स्थूलपन दूर होता है।६॥

शिरीषलामज्जकहेमलोध्रैस्त्वग्दोषसंस्वेदहरः प्रघर्षः ।
पत्राम्बुलोहाभयचन्दनानि शरीरदौर्गन्ध्यहरः प्रदेहः ॥७॥

शिरसकी छाल, खस, नागकेशर और लोध इनके समान भाग मिले हुए चूर्णको शरीरपर मालिश करे तो त्वचाके दोष और अधिक पसीना निकलना बन्द होता है । तेजपात, सुगन्धवाला, अगर, खस, और चन्दन इनको समान भाग लेकर एकत्र खूबबारीक पीसकर मालिश करनेसे शरीरकी दुर्गन्ध दूर होय ॥ ७ ॥

वासादलरसो लेपाच्छङ्खचूर्णेन संयुतः ।
बिल्वपत्ररसो वापि गात्रदौर्गन्ध्यनाशनः ॥ ८ ॥

अडूसेके पत्तोंके रस अथवा बेलपत्रीके रसमें शंखभस्म मिलाकर शरीरपर लेप करनेसे देहकी दुर्गन्ध नष्ट होती है ॥ ८ ॥

हरीतकी लोध्रमरिष्टपत्रं चूतत्वचो दाडिमवल्कलं च।
एषोऽङ्गरागःकथितोऽङ्गनानां जङ्घाकषायश्च नराधिपानाम्॥९

हरड, लोध, नीमके पत्ते, आमकी छाल और अनारकी छाल इन सबको समान भाग लेकर दूधमें पीसलेवे। फिर इसका उबटन करे तो स्त्री और पुरुषोंके मेदजन्य दुर्गन्ध दूर होकर शरीर अत्यन्त कान्तिमान् होता है॥ ९॥

गोमूत्रपिष्टं विनिहन्ति कुष्ठं वर्णोज्ज्वलं गोपयसा च युक्तम्।
कक्षादिदौर्गन्ध्यहरं पयोभिः शस्तं वशीकृद्रजनीद्वयेन॥१०॥

हरितालको गोमूत्रमें पीसकर प्रलेप करनेसे कुष्ठरोग नष्ट हो, एवं गोदुग्धमें हरितालको पीसकर लेप करनेसे शरीरका वर्ण शोभायमान होता है और कोख आदि स्थानोंकी दुर्गन्ध दूर होती है। यदि गोदुग्धके साथ हरिताल और दारुहल्दी एकत्र घिसकर मस्तकपर तिलक लगावे तो स्त्री वशीभूत हो॥ १०॥

चिञ्चापत्रस्वरसं म्रक्षितकक्षादियोजितं जयति।
पुटितहरिद्रोद्वर्तनमचिराद्देहस्य दौर्गन्ध्यम्॥ ११॥

इमलीके पत्तोंका रस शरीरपर मालिश करके पश्चात् पुटद्वारा भस्म कीहुई हल्दीको उद्वर्त्तन करनेसे बगल, कुक्षि आदि स्थानोंकी बहुत पुरानी दुर्गन्ध शीघ्र नष्ट होती है॥ ११॥

दलजललघुमलयाभयविलेपनं हरति देहदौर्गन्ध्यम्।
विमलारनालसहितं पीतमिवालम्बुषाचूर्णम्॥ १२॥

तेजपात, सुगन्धवाला, अगर, श्वेत चन्दन और खस इनको समान भाग लेकर जलमें पीसकर लेप करे अथवा गोरखमुण्डीके चूर्णको निर्मल कांजीके साथ पान करे तो शरीरकी दुर्गन्ध दूर होती है॥ १२॥

व्योषाद्य सक्तुमयोग।

व्योषं विडङ्गशिग्रूणि त्रिफलां कटुरोहिणीम्।
बृहत्यौ द्वे हरिद्रे द्वे पाठामतिविषां स्थिराम्॥ १३॥
हिङ्गुकेबुकमूलानि यमानी धान्यचित्रकम्।
सौवर्चलमजाजीं च हबुषां चेति चूर्णयेत्॥ १४॥
चूर्णतैलघृतक्षौद्रभागाः स्युर्मानतः समाः।
सक्तूनां षोडशगुणो भागः सन्तर्पणं पिबेत्॥ १५॥

सोंठ, मिरच, पीपल, वायविडंग, सहिंजनेकी, जड, त्रिफला, कुटकी, कटाई, कटेरी, हल्दी, दारुहल्दी, पाढ, अतीस, शालपर्णी, हींग, केवुआकी जड, अजवायन, धनियाँ, चीता, कालानमक, कालाजीरा और हाऊबेर ये सब समान भाग लेकर एकत्र कूट पीसकर चूर्ण करलेवे। फिर तिलका तेल, घृत और शहद ये प्रत्येक समस्त चूर्णकी बराबर भाग और जाक सत्तू चूर्णसे १६ गुने लेवे। सबको एकत्र शीतल जलके साथ मिलाकर पान करे॥ १२-१५॥

प्रयोगात्तस्य शाम्यन्ति रोगाः सन्तर्पणोत्थिताः।
प्रमेहा मूढवाताश्च कुष्ठान्यर्शांसि कामलाः॥ १६॥
प्लीहा पाण्ड्वामयः शोथो मूत्रकृच्छ्रमरोचकः।
हृद्रोगा राजयक्ष्मा च कासः श्वासो गलग्रहः॥ १७॥
क्रिमयो ग्रहणीदोषः श्वैत्रः स्थौल्यमतीव च।
नराणां दीप्यते चाग्निः स्मृतिर्बुद्धिश्च वर्द्धते॥ १८॥

इसके सेवनसे बीसों प्रमेह, मूढवातरोग, कोढ, बवासीर, कामला, तिल्ली, पाण्डुरोग, सूजन, मूत्रकृच्छ्र, अरुचि, हृदयरोग, राजयक्ष्मा, खाँसी, श्वास, गलेकी पीडा, कृमिरोग, संग्रहणी, सफेद कुष्ठ और स्थूलतादिरोग शीघ्र नष्ट होते हैं तथा अग्निदीपन, स्मरणशक्ति और बुद्धि बढती है एवं अत्यन्त तृप्ति होती है॥ १६-१८॥

विडङ्गाद्यलौह।

विडङ्गत्रिफलामुस्तैः कणा नागरकेण च।
बिल्वचन्दनह्रीबेरं पाठोशीरं तथा बला॥ १९॥
एषां सर्वसमं लौहं जलेन वटिका शुभा।
अनुपानं प्रयोक्तव्यं लौहमष्टगुणं पयः॥ २०॥

वायविडंग, हरड, बहेडा, आमला, नागरमोथा, पीपल, सोंठ, बेलगिरी, चन्दन, सुगन्धवाला, पाढ, खस और खिरैंटी इनके चूर्णको एक एक तोला और सब चूर्णकी बराबर लोहभस्म लेवे। पश्चात् सबको एकत्र जलके साथ खरल करके दस दस रत्तीकी गोलियाँ बनालेवे। प्रतिदिन प्रातःकाल एक गोली खाय और ऊपरसे लोहभस्म एक तोला एवं दूध आठ तोले मिलाकर पीवे॥ १९॥ २०॥

सर्वमेदोहरं बल्यं कान्त्यायुर्बलवर्द्धनम्।
अग्निसन्दीपनकरं वाजीकरणमुत्तमम्॥ २१॥

सोमरोगं निहन्त्याशु भास्करस्तिमिरं यथा ।
विडङ्गाद्यमिदं लौहं सर्वरोगनिषूदनम् ॥ २२ ॥

इससे सर्वप्रकारके मेहरोग दूर होते हैं । यह विडंगाद्यलोह बल अवस्था और कान्तिको बढानेवाला अग्निको दीपन करनेवाला एवं अत्युत्तम वाजीकरण है । यह सोमरोग और अन्यान्य सर्वप्रकारके विकारोंको इस प्रकार नष्ट करदेता है, जिस प्रकार सूर्य अन्धकारके पुञ्जको छिन्नभिन्न करदेता है ॥ २१ ॥ २२ ॥

त्र्यूषणादिलौह ।

त्र्यूषणं विजया चव्यं चित्रकं विडमौद्भिदम् ।
वाकुची सैन्धवं चैव सौवर्चलसमन्वितम् ॥ २३ ॥
अयश्चूर्णेन संयुक्तं भक्षयेन्मधुसर्पिषा ।
स्थौल्यापकर्षणं श्रेष्ठं बलवर्णाग्निवर्द्धनम् ॥ २४ ॥
मेहघ्नं कुष्ठशमनं सर्वव्याधिहरं परम् ।
नाहारे यन्त्रणा कार्य्या न विहारे तथैव च ॥
त्र्यूषणाद्यमिदं लौहं रसायनवरोत्तमम् ॥ २५ ॥

सोंठ, पीपल, मिरच, भाँग, चव्य, चीता, विरियासञ्चरनोन, साँभरनोन, बाबची, सैंधानमक और कालानमक इन सबोंका चूर्ण समान भाग एवं समस्त चूर्णकी बराबर लोहभस्म मिलाकर एकत्र पीसलेवे । फिर इसको तीन रत्ती प्रमाण लेके शहद और घीमें मिलाकर भक्षण करे तो स्थूलताका ह्रास होता है तथा बल वर्ण और जठराग्निकी वृद्धि होती है । प्रमेह, कुष्ठ एवं अन्यान्य अनेक प्रकारके विकार दूर होते हैं । इसके सेवन करनेपर आहार विहारका कुछ परहेज नहीं करे । यह त्र्यूषणाद्यलोह सर्वोत्तम रसायन है ॥ २३-२५ ॥

लौहरसायन ।

गुग्गुलुस्तालमूली च त्रिफला खदिरं वृषम् ।
त्रिवृताऽलम्बुषा स्नुकू च निर्गुण्डी चित्रकं शठी ॥ २६ ॥
एषां दशपलान् भागांस्तोये पञ्चाढके पचेत् ।
पादशेषं ततः कृत्वा कषायमवतारयेत् ॥ २७ ॥
पलद्वादशकं देयं तीक्ष्णलौहस्य चूर्णितम् ।
पुराणसर्पिषः प्रस्थं शर्कराष्टपलानि च ॥ २८ ॥

पचेत्ताम्रमये पात्रे सुशीते चावतारिते ।
प्रस्थार्द्धं माक्षिकं देयं शिलाजतु पलद्वयम् ॥ २९ ॥
एलात्वचोः पलार्द्धं च विडङ्गानां पलद्वयम् ।
मरिचं चाञ्जनं कृष्णा द्विपलं त्रिफलान्वितम् ॥ ३० ॥
पलद्वयं तु कासीसं श्लक्ष्णचूर्णीकृतं बुधः ।
चूर्णं कृत्वाऽथ मथितं स्निग्धे भाण्डे निधापयेत् ॥ ३१ ॥
ततः संशुद्धदेहस्तु भक्षयेदक्षमात्रकम् ।
अनुपानं पिबेत्क्षीरं जाङ्गलानां रसं तथा ॥ ३२ ॥

पोटलीमें बँधीहुई गूगल, मुसली, त्रिफला, खैर, अडूसा, निसोत, गोरखमुण्डी थूहरका जड, निर्गुण्डी, चीता और कचूर इन औषधियोंको दस दस पल लेकर ४० सेर जलमें पकावे । पकते २ जब १० सेर जल शेष रहजाय तब उतारकर छान लेवे । फिर इस क्वाथमें अच्छे प्रकार पीसीहुई कान्तलोहकी भस्म ४८ तोले, पुराना घी ६४ तोले और चीनी ३२ तोले डालकर तांबेके पात्रमें यथाविधि पाक करे । जब पककर शीतल होजाय तब उतारकर उसमें शहद ३२ तोले, शिलाजीत ८ तोले, इलायची २ तोले, दारचीनी २ तोले, वायविडङ्ग ८ तोले, मिरच, रसौत, पीपल, हरड, बहेडा, आमला और कसीस ये प्रत्येक औषधि आठ आठ तोले लेकर खूब बारीक कूट पीसकर डालदेवे । फिर करछीसे चलाकर सबको एकमएक करके स्वच्छ घीके चिकने बर्तनमें भरकर रखदेवे । प्रथम वमन, विरेचनादिसे शरीर को शुद्ध करलेवे पश्चात् इसको नित्यप्रति प्रातःकाल दो दो तोलेकी मात्रासे भक्षण करे । इसपर दूध और जङ्गली जीवोंके मांसका रस अनुपान करे ॥ २६-३२ ॥

वातश्लेष्महरं श्रेष्ठं कुष्ठमेहज्वरापहम् ।
कामलां पाण्डुरोगं च श्वयथुं सभगन्दरम् ॥ ३३ ॥
मूर्च्छामोहविषोन्मादं गराणि विविधानि च ।
स्थूलानां कर्शनं श्रेष्ठं मेदुरे परमौषधम् ॥ ३४ ॥
कर्शयेच्चातिमात्रेण कुक्षिं पातालसन्निभम् ।
बल्यं रसायनं मेध्यं वाजीकरणमुत्तमम् ॥ ३५ ॥
श्रीकरं पुत्रजननं वलीपलितनाशनम् ।
नाश्नीयात्कदलीं कन्दं काञ्जिकं करमर्दकम् ॥
करीरं कारवेल्लं च षट् ककाराणि वर्जयेत् ॥ ३६ ॥

यह लोहरसायन वात-कफनाशक, कुष्ठ, प्रमेह और ज्वरको नाश करनेके लिये अत्युत्तम है। एवं कामला, पाण्डु, सूजन, भगन्दर, मुर्च्छा, मोह, विष, उन्माद और नाना प्रकारके विषदोषोंको हरता है। स्थूलपुरुषोंकी स्थूलताको कृश करनेवाली, मेदरोगकी परमोत्कृष्ट औषधि एवं उदरको अत्यन्त पतला करनेवाली है। अत्यन्त बलकारक, रसायन, मेधाजनक उत्तम वाजीकरण, लक्ष्मीजनक, पुत्रको उत्पन्न करनेवाली, वली (शरीरमें झुर्रियोंका पड़ना) और पलित (असमय बालोंका सफेद होना) इत्यादि रोगोंको नाश करती है। इस औषधिके सेवन करनेपर केला, कन्द (आलू, कौंदू आदि), कांजी, करौंदा, करीर (बाँसके अंकुर) और करेला इन छः ककारवाले पदार्थोंको त्याग देवे॥ ३२-३६॥

नवकगुग्गुलु।

व्योषाग्नित्रिफलामुस्तविडंगैर्गुग्गुलुं समम्।
खादन्सर्वाञ्जयेद् व्याधीन् मेदःश्लेष्मामवातजान्॥३७॥

सोंठ, मिरच, पीपल, चीता, हरड, बहेडा, आमला, नागरमोथा और वायविडङ्ग ये सब समान भाग और इन सबकी बराबर शुद्ध गूगल लेकर एकत्र चूर्ण करलेवे। इस चूर्णको सेवन करनेसे मेदरोग, कफ और आमवातजन्य सर्वप्रकारके रोग दूर होते हैं॥ ३७॥

अमृताद्यगुग्गुलु।

अमृतात्रुटिवेल्लवत्सकं कलिंगपथ्यामलकानि गुग्गुलुः।
क्रमवृद्धमिदं मधुप्लुतं पिडिकास्थौल्यभगन्दरं जयेत्॥३८॥

गिलोय १ तोला, छोटी इलायची २ तोले, वायविडङ्ग ३ तोले, कुड़ेकी छाल ४ तोले, इन्द्रजौ ५ तोले, हरड ६ तोले, आमले ७ तोले और शुद्ध गूगल ८ तोले इन सबको कूट पीसकर शहदमें मिलाकर चाटनेसे पिडिका, स्थूलता और भगन्दररोग नष्ट होते हैं॥ ३८॥

त्रिफलाद्यतैल।

त्रिफलातिविषामूर्वात्रिवृच्चित्रकवासकैः।
निम्बारग्वधषड्ग्रन्थासप्तपर्णनिशाद्वयैः॥ ३९॥
गुडूचीन्द्रसुरीकृष्णाकुष्ठसर्षपनागरैः।
तैलमेभिः शनैः पक्वं सुरसादिरसाप्लुतम॥ ४०॥

पानाभ्यञ्जनगण्डूषनस्यवस्तिषु योजयेत ।
स्थूलतालस्यकण्ड्वादीन् जयेत्कफकृतान गदान् ॥ ४१ ॥

त्रिफला, अतीस, मुर्वा, निसोत, चीता, अडूसा, नीमकी छाल, अमलतासकी छाल, वच, सतवन, हल्दी, दारुहल्दी, गिलोय, निर्गुण्डी, पीपल, कूठ, सरसों और सोंठ इनके समान भाग मिले एक सेर कल्कके द्वारा सुरसादिगणकी औषधियोंके काथमें तिलके तेलको यथाविधि धीरे धीरे सिद्ध करे। इस तेलको पान, अभ्यंग गण्डूष, नस्य और वस्तिकर्ममें प्रयोग करना चाहिये। यह तेल स्थूलता, आलस्य, खुजली आदिरोग एवं कफजनित सम्पूर्ण रोगोंको हरता है ॥

मेदोरोगमें पथ्य।

चिन्ता श्रमो जागरणं व्यवायः प्रोद्वर्त्तनं लङ्घनमात-
पश्च। हस्त्यश्वयानं भ्रमणं विरेकः प्रच्छर्दनं चाप्यपतर्प-
णानि ॥ ४२ ॥ पुरातना वैणवकोरदूषश्यामाकनीवार-
प्रियङ्गवश्च। यवाः कुलत्थाश्चणका मसूरा मुद्गास्तुवर्यो-
ऽपि मधूनि लाजाः ॥ ४३ ॥ कटूनि तिक्तानि कषाय-
काणि तक्रं सुरा चिङ्गटमत्स्य एव। दग्धानि वार्ताकु-
फलानि चापि फलत्रयं गुग्गुलु वायसश्च ॥४४॥ कटुत्रयं
सार्षपतैलमेला रूक्षाणि सर्वाणि च मुख्यतैलम्। पत्रोत्थ-
शाकोऽगुरुलेपनानि प्रतप्तनीराणि शिलाजतूनि ॥
प्राग्भोजनस्यापि च वारिपानं मेदोगदं पथ्यमिदं निहन्ति ॥

चिन्ता, अत्यन्त परिश्रम, रात्रिमें जागना, मैथुन, शरीरपर जोरसे उबटन करना, लङ्घन, धूपका सेवन, हाथी और घोडे आदिकी सवारीपर चढना, भ्रमण करना, जुलाब लेना, वमन और अपतर्पण करना, पुराने बाँसीके चावल, कोदों, सामा, नीवार और कँगुनीके चावल, जौ, कुलथी, चने, मसूर, मूँग, अरहर, शहद, खीलें, चरपरे, कडवे और कषायरसवाले पदार्थोंका भोजन, मट्ठा, मदिरा, चिङ्गटमत्स्य (मछली विशेष), बैंगनोंका भुर्ता, त्रिफला, गूगल, राल, त्रिकुटा, सरसोंका तेल, इलायची, सम्पूर्ण रूक्ष पदार्थ, तिलका तेल, पत्रशाक, अगरका लेप, उष्ण जलसे स्नान, पान, शिलाजीत सेवन और भोजन करनेसे पूर्व जलका पीना ये सब मेदोरोगमें हितकारक पदार्थ हैं। इनके सेवन करनेसे उक्त रोग शीघ्र नष्ट होता है ॥ ४२-४५ ॥

मेदोरोगमें अपथ्य।

स्नानं रसायनं शालीन् गोधूमान्सुखशीलताम्।
क्षीरेक्षुविकृतीर्माषाँल्लौहित्यं स्नेहनानि च ॥ ४६ ॥
मत्स्यं मांसं दिवानिद्रां स्रग्गन्धौ मधुराणि च।
भोजनस्य समग्रस्य पश्चात्पानं जलस्य च ॥ ४७ ॥
अतिमात्रं तूपचितो विशेषाद्वमनक्रियाम्।
स्वभावस्थत्वमन्विच्छन् मेदस्वी परिवर्जयेत् ॥ ४८ ॥

स्नान करना, रासायनिक औषधियोंका सेवन, शालिके चावल, गेहूँ, सुखपूर्वक उपभोग, दूधकी खीर, ईखके रसकी खीर, उड़द, लौहित्य (मसूर, सांठी आदिके चावल) द्रव्योंका आहार, स्नेह (घृत, तैलादिका पान, अभ्यंग आदि) क्रिया, मछली, मांसभक्षण, दिनमें सोना, मालाधारण करना, सुगन्धित द्रव्योंका सेवन, मधुररसंयुक्त पदार्थोंका भक्षण और समस्त भोजन करलेनेके बाद जलको पीना, अत्यन्त बढे हुए मेदमें विशेषकर वमन क्रिया स्वभावजन्य इच्छा शक्तिको पूर्ण न करना, इन सब द्रव्योंको मेदरोगी त्यागदेवे। क्योंकि ये सब उक्त रोगमें अपथ्य हैं ॥ ४६-४८ ॥

इति भैषज्यरत्नावल्यां मेदोरोगचिकित्सा ॥

उदररोगकी चिकित्सा।

सर्वमेवोदरं प्रायो दोषसंघातजं यतः।
अतो वातादिशमनी क्रिया सर्वत्र शस्यते ॥ १ ॥

प्रायः वात, पित्त और कफादि दोषोंके संग्रह होनेसे सर्वप्रकारके उदररोग उत्पन्न होते हैं, अतः सम्पूर्ण उदरविकारोंमें वातादि तीनों दोषोंको शमन करनेवाली क्रिया करनी चाहिये ॥ १ ॥

उदरे दोषसम्पूर्णे कुक्षौ मन्दो यतोऽनलः।
तस्माद्भोज्यानि योज्यानि दीपनानि लघूनि च ॥ २ ॥

उदररोगमें वातादिदोष रोगीकी कुक्षिमें प्राप्त होकर, अग्निको मन्द करते हैं। इस कारण रोगीको अग्निदीपक और हलके पदार्थ भोजन करनेके लिये देवे ॥ २ ॥

रक्तशालीन्यवान्मुद्गान् जाङ्गलांश्च मृगद्विजान् ।
पयोमूत्रासवारिष्टमधु सीधु च शीलयेत् ॥ ३ ॥

लालशालिके चावल, जौ, मूँग आदि अन्न, मृग और जंगली पशुपक्षियोंके मांसरस, दूध, गोमूत्र, आसव, अरिष्ट, मधु और सीधुनामक मद्यप्रभृति पदार्थ उदररोगीको भोजन करने चाहियें ॥ ३ ॥

दोषातिमात्रोपचयात् स्रोतोमार्गनिरोधनात् ।
सम्भवत्युदरं तस्मान्नित्यमेनं विरेचयेत् ॥
पाययेत्तैलमेरण्डं समूत्रं सपयोऽपि वा ॥ ४ ॥

वातादिदोषोंके अधिक सञ्चय होनेसे रक्तको बहानेवाले स्रोत बन्द होजाते हैं। इस कारण उदररोग उत्पन्न होते हैं। अतः रोगीको नित्यप्रति गोमूत्र अथवा दूध मिला हुआ अण्डीका तेल उचित मात्रासे पान कराकर दस्त करावे ॥ ४ ॥

वातोदरं बलवतः स्नेहस्वेदैरुपाचरेत् ।
स्निग्धाय स्वेदिताङ्गाय दद्यात्स्निग्धं विरेचनम् ॥ ५ ॥
हृते दोषे परिम्लानं वेष्टयेद्वाससोदरम् ।
यथाऽस्यानवकाशत्वाद्वायुर्नाध्मापयेत्पुनः ॥ ६ ॥

वातजनित उदररोगमें यदि रोगी बलवान् हो तो प्रथम उसको स्नेह (घृतादि) द्रव्य पान कराकर स्निग्ध करे। पश्चात् स्वेदक्रिया करके स्निग्ध (अण्डीका तेल आदि) विरेचन देवे। इस प्रकार करनेसे दोषोंके नष्ट होजानेपर जब पेट मुरझाजाय तब उसको वस्त्रसे लपेट देवे। अच्छे प्रकार बाँधनेसे उदर वायुद्वारा फिर नहीं फूल सकता ॥ ५ ॥ ६ ॥

विरिक्ते च यथादोषहरैः पेया शृता हिता ॥

विरेचन देनेके पश्चात् रोगीको वातादिदोषनाशक द्रव्योंके द्वारा पेया बनाकर देनेसे विशेष हित होता है ॥

वातोदरी पिबेत्तक्रं पिप्पलीलवणान्वितम् ।
शर्करामरिचोपेतं स्वादु पित्तोदरी पिबेत् ॥ ७ ॥
यमानीसैन्धवाजाजीव्योषयुक्तं कफोदरी ।
त्र्यूषणक्षारलवणैर्युक्तं तु निचयोदरी ॥ ८ ॥

वातजन्य उदररोगमें पीपल और सैंधानमकका चूर्ण मिलाकर तक्र पान करे। मिश्री और कालीमिरचके चूर्णसे युक्त मधुर तक्रको पित्तोदररोगी पीवे।

कफोदरवाला रोगी अजवायन, सेंधानमक, कालाजीरा, सोंठ, मिरच और पीपल इनके चूर्णको मिलाकर तक्र पान करे और त्रिदोषोत्पन्न उदररोगमें त्रिकुटा, जवाखार तथा सेंधानोन इनका चूर्ण डालकर तक्र पान करावे ॥ ७ ॥ ८ ॥

गौरवारोचकार्त्तानां समन्दाग्न्यतिसारिणाम् ।
तक्रं वातकफार्त्तानाममृतत्वाय कल्पते ॥ ९ ॥
वातोदरे पयोऽभ्यासो निरूहो दाशमूलिकः ।
सोदावर्त्ते वातघ्नाम्लशृतैरण्डानुवासनः ॥ १० ॥

शरीरमें भारीपन, अरुचि, मन्दाग्नि अतीसार आदि लक्षणोंसे आक्रान्त और वातकफसे पीडित रोगीको तक्रपान करना अमृतके समान उपकारी है । वातसे उत्पन्न उदररोगमें बल बढनेके लिये रोगीको दूध अधिक सेवन करावे । जब शरीर सबल होजाय तब दशमूलकी औषधियोंके काथद्वारा निरूहवस्ति प्रयोग करे । उदावर्त्तयुक्त वातोदरमें वातनाशक और कांजी आदि अम्लद्रव्योंसे पकाये हुए अण्डीके तेलकी अनुवासनवस्ति प्रदान करे ॥ ९ ॥ १० ॥

स्नुक्पयसा सह भाविततण्डुलचूर्णेन निर्मितः पूपः ।
उदरमुदारं हिंस्याद्योगोऽयं सप्तरात्रेण ॥ ११ ॥

थूहरके दूधमें चावलोंके चूर्णको पकाकर मालपुये बनावे । इन पुओंको सेवन करनेसे सातदिनमें ही अत्यन्त प्रबल उदररोग दूर होता है ॥ ११ ॥

सक्षीरं माहिषं मूत्रं निराहारः पिबेन्नरः ।
शाम्यत्यनेन जठरं सप्ताहादिति निश्चयः ॥ १२ ॥

प्रतिदिन प्रातःकाल समस्त अन्नजलादिका परित्याग करके भैंसके मूत्रको दूधमें मिलाकर पान करनेसे उदररोग एक सप्ताहमें निश्चय नाश होता है ॥ १२ ॥

मानमण्ड ।

पुराणं मानकं पिष्ट्वा द्विगुणीकृततण्डुलम् ।
साधितं क्षीरतोयाभ्यामभ्यसेत्पायसं तु तत् ॥ १३ ॥
हन्ति वातोदरं शोथं ग्रहणीं पाण्डुतामपि ।
सिद्धो भिषग्भिराख्यातः प्रयोगोऽयं निरत्ययः ॥ १४ ॥

पुराने मानकन्दका चूर्ण एक भाग और चावल दो भाग लेवे । दोनोंको एकत्र पीसकर समान भाग दूध और जलके द्वारा पकावे । इस प्रकार सिद्ध की हुई खीरको सेवन करनेसे वातज उदररोग, सूजन, संग्रहणी, पाण्डु आदि रोग नष्ट होते हैं । इस खीरके सेवनमें अन्य सर्वप्रकारके भोजन त्याग देवे ॥ १३ ॥ १४ ॥

सामुद्राद्यचूर्ण।

सामुद्रसौवर्चलसैन्धवानि क्षारं यमानीमजमोदकं च।
सपिप्पलीचित्रकशृङ्गवेरं हिङ्गुं विडं चेति समानि कुर्यात्॥१५
एतानि चूर्णानि घृतप्लुतानि भुञ्जीत पूर्वं कवले प्रशस्तम्।
वातोदरं गुल्ममजीर्णभक्तं वातास्रकोपं ग्रहणीं प्रदुष्टाम्॥
अर्शांसि दुष्टानि च पाण्डुरोगं भगन्दरं चापि निहन्ति सद्यः१६

समुद्रनमक, कालानमक, सेंधानमक, जवाखार, अजवायन, अजमोद, पीपल, चीता, सोंठ, हींग और विरियासञ्चरनमक इन सबको समान भाग लेकर बारीक चूर्ण करलेवे। इस चूर्णको घृतमें मिलाकर भोजनके पहले ग्रासमें खावे। यह चूर्ण वातोदर, गुल्म, अजीर्ण, वातरक्तका कोप, संग्रहणी, दुष्ट बवासीर, पाण्डु और भगन्दरप्रभृतिरोगोंको तत्काल दूर करता है॥ १५॥ १६॥

इच्छाभेदीरस १-२।

शुण्ठीमरिचसंयुक्तं रसगन्धकटङ्कणम्।
जैपालास्त्रिगुणाः प्रोक्ताः सर्वमेकत्र पेषयेत्॥ १७॥
इच्छाभेदी द्विगुञ्जा स्यात्सितया सह पाययेत्।
पिबेत्तु चुलकं यावत्तावद्वारान्विरेचयेत्॥
तक्रौदनं च दातव्यमिच्छाभेदी यथेच्छया॥ १८॥

१-सोंठ, मिरच, शुद्ध पारा, शुद्ध गन्धक और सुहागा ये प्रत्येक एकएक तोला एवं शुद्ध जमालगोटा ३ तोले लेवे। फिर सबको एकत्र जलमें खरल करके दो दो रत्तीकी गोलियाँ बनालेवे। इस रसकी एक गोली मिश्रीके साथ सेवन करे और ऊपरसे शीतल जल पीवे। इसपर जितने घूंट जल पीवेगा उतनी ही बार दस्त होंगे। जब उत्तम रूपसे दस्त होजाय तब यथारुचि मट्ठा मिलाहुआ अन्न भोजन करे॥ १७॥ १८॥

सूतं गन्धं च मरिचं टङ्कणं नागराभये।
जैपालबीजसंयुक्तं क्रमोत्तरगुणं भवेत्॥ १९॥
सर्वतुल्यो गुडो देय इच्छाभेदी स्वयं रसः।
द्वित्रिगुञ्जापरिमिता वटी कार्या विचक्षणैः॥ २०॥

२-शुद्ध पारा एक तोला, शुद्ध गन्धक दो तोले, काली मिरच ३ तोले सुहागा ४ तोले, सोंठ ५ तोले, हरड ६ तोले और जमालगोटा ७ तोले लेकर एकत्र

चूर्ण करलेवे । इस समस्त चूर्णकी बराबर भाग पुराना गुड मिलाके अच्छे प्रकार घोटकर दो या तीन रत्ती प्रमाण गोलियाँ बनालेवे । यह इच्छाभेदी रस है । यह भी पूर्वोक्त रसके समान गुणोंवाला है ॥ १९ ॥ २० ॥

शुद्धसूतस्य भागैकं गन्धकान्माषकत्रयम् ।
विभीतकस्य माषैकं धात्र्याश्चैव तु माषकम् ॥ २१ ॥
माषद्वयं च पिप्पल्याः शुण्ठीनां माषकत्रयम् ।
जैपालबीजमज्जाया गुडकं त्रिंशति तथा ॥ २२ ॥
अम्ललोणीरसैः पिष्ट्वा वटिकां कारयेद्भिषक् ।
कलायपरिमाणां तु भक्षयेद्रेचनार्थकम् ॥ २३ ॥
अम्ललोणीरसैः सार्द्धं तोयमुष्णं पिबेदनु ।
तावद्विरिच्यते वेगात् यावच्छीतं न सेवते ॥ २४ ॥

२–शुद्ध पारा एक मासा, शुद्ध गन्धक ३ मासे, बहेडा एक मासा, आमले एक मासा, पीपल दो मासे, सोंठ ३ मासे, जमालगोटेकी मींग और पुराना गुड बीस मासे लेवे । इन सबको एकत्र नोनियाके रसमें खरल करके मटरकी बराबर गोलियाँ बनालेवे । इनमेंसे एक गोली खाय और ऊपरसे नोनियाके रसके साथ उष्ण जल पान करे । इसपर जबतक शीतल जल न पिया जायगा तबतक बराबर दस्त होते रहेंगे ॥ २१–२४ ॥

भेदिनावटी ।

त्रिकण्टकस्नुकपयसा पिप्पल्या वटिका कृता ।
भेदनीया सिद्धिमता महागदनिषूदनी ॥ २५ ॥

गोखुरू और पीपल इनको समान भाग लेकर थूहरके दूधमें यथाविधि खरल करके दो दो रत्तीकी गोलियाँ बनावे । इसके सेवन करनेसे विरेचन होकर अति-प्रबल उदरादि रोग नष्ट होते हैं ॥ २५ ॥

नाराचरस ।

सूतं टङ्कणतुल्यांशं मरिचं सूततुल्यकम् ।
गन्धकं पिप्पली शुण्ठी द्वौ द्वौ भागौ विचूर्णयेत् ॥२६॥
सर्वतुल्यं क्षिपेद्दन्तीबीजं निस्तुषमेव च ।
द्विगुञ्जो रेचने सिद्धो नाराचोऽयं महारसः ॥
गुल्मप्लीहोदरं हन्ति पिबेत्तण्डुलवारिणा ॥ २७ ॥

शुद्ध पारा, सुहागा और कालीमिरच ये प्रत्येक एक एक भाग, शुद्ध गन्धक, पीपल और सोंठ ये प्रत्येक दो दो भाग तथा सबकी बराबर भूसीरहित जमालगोटा लेवे । फिर सबको एकत्र जलमें खरल करके दो दो रत्तीकी गोलियाँ बनालेवे । उसकी एक गोली चावलोंके धोवनके साथ सेवन करे तो उससे दस्त होकर गुल्म, प्लीहा और उदररोग दूर होते हैं । यह महानाराचरस विरेचनमें बाणकी समान तीक्ष्ण है ॥ २६ ॥ २७ ॥

जलोदरारिरस ।

पिप्पली मरिचं ताम्रं रजनीचूर्णसंयुतम् ।
स्नुहीक्षीरैर्दिनं मर्द्यं तुल्यं जैपालबीजकम् ॥
निष्कं खादेद्विरेकः स्यात्सद्यो हन्ति जलोदरम् ॥ २८ ॥

पीपल, कालीमिरच, ताम्रभस्म और हल्दीका चूर्ण इन सबोंको समान भाग लेकर थूहरके दूधमें एक दिनतक अच्छे प्रकार खरल करे । फिर सबकी बराबर जमालगोटा मिलाकर पीसलेवे । इस रसको चार माशे प्रमाण खाय तो दस्त होकर जलोदररोग शीघ्र नष्ट होता है ॥ २८ ॥

दस्तको बन्द करनेके उपाय ।

रेचनानां च सर्वेषां दध्यन्नं स्तम्भने हितम् ।
दिनान्ते च प्रदातव्यमन्नं वा मुद्गयूषकम् ॥ २९ ॥

यदि दस्तोंको बन्द करना हो तो दही और भातका भोजन करे । अर्थात् औषधिको सेवन करनेपर जब उत्तम प्रकारसे दस्त होजायँ तब सन्ध्याकालमें दही और भात अथवा मूँगके यूष और भातको भक्षण करे ॥ २९ ॥

वह्निरस ।

सूतस्य गन्धकस्याष्टौ रजनीत्रिफलाशिलाः ।
प्रत्येक च द्विभागः स्यात्त्रिवृज्जैपालचित्रकम् ॥ ३० ॥
प्रत्येक स्यात्त्रिभागं च व्योषं दन्तिकजीरकम् ।
प्रत्येक सप्तभागं स्यादेकीकृत्य विचूर्णयेत् ॥ ३१ ॥
जयन्तीस्नुकपयोभृङ्गवह्निवातारितैलकैः ।
प्रत्येकेन क्रमाद्भाव्य सप्तवारं पृथक् पृथक् ॥
महावह्निरसो नाम्ना निष्कमुष्णजलैः पिबेत् ॥ ३२ ॥

शुद्ध पारा तथा गन्धक प्रत्येक आठ आठ भाग, हल्दी, त्रिफला और मैनसिल प्रत्येक दो दो भाग, निसोत, जमालगोटा एवं चीता तीन तीन भाग,

त्रिकुटा, दन्ती, और जीरा ये प्रत्येक सात सात भाग लेकर एकत्र चूर्ण करलेवे। फिर इस चूर्णको जयन्तीके पत्तोंके रस, थूहरका दूध, भाङ्गरेके रस, चीतेकी जडके रस और अण्डीके तेलमें अलग अलग क्रमानुसार सातवार सात सात भावना देवे। तदनन्तर इसको चार माशे प्रमाण गरम जलके साथ सेवन करे ॥

विरेचनं भवेत्तेन तक्रयुक्तं ससैन्धवम् ॥ ३३ ॥
दिनान्ते दापयेत्पथ्यं वर्जयेच्छीतलं जलम् ।
सर्वोदरहरः प्रोक्तः श्लेष्मवातहरः परः ॥ ३४ ॥

इसके सेवनसे जब अच्छे प्रकार दस्त होजायँ तब शामके वक्त सैंधेनमकसे युक्त मट्ठे और भातका पथ्य देवे। इसपर शीतल जल पान न करे। यह रस सर्वप्रकारके उदररोग और कफ-वातजन्य रोगोंको दूर करता है ॥ ३३ ॥ ३४ ॥

चुलिकावटी ।

रसो गन्धो विषं तालं त्रिकटु त्रिफला तथा ।
टङ्कणं समभागं च जयपालं चतुर्गुणम् ॥ ३५ ॥
भृङ्गराजरसेनाथ केशराजरसेन वा ।
मधुना वटिका कार्य्या पञ्चगुञ्जामिता शुभा ॥ ३६ ॥

शुद्ध पारा, गन्धक, शुद्ध मीठातेलिया, हरिताल, त्रिकुटा, त्रिफला और सुहागा ये प्रत्येक समभाग और शुद्ध जमालगोटा सब द्रव्योंसे चौगुना लेवे। सबको एकत्रितकर भाङ्गरेके रस और शहदके साथ अथवा केशराज (काले भाँगरे) के रस और शहदके साथ उत्तम रीतिसे खरल करके पाँच पाँच रत्तीकी गोलियाँ तैयार करलेवे ॥ ३५ ॥ ३६ ॥

चुलिकाख्या वटी ख्याता शोथोदरविनाशिनी ।
कामलां पाण्डुरोगं च आमवातं हलीमकम् ।
हन्याद्भगन्दरं कुष्ठं प्लीहानं गुल्ममेव च ॥ ३७ ॥

इसका चुलिकावटी नाम है। यह सूजन, उदररोग, कामला, पाण्डु, आमवात, हलीमक, भगन्दर, कोढ, प्लीहा और गुल्म आदि रोगोंको नष्ट करती है ॥ ३७ ॥

श्रीवैद्यनाथादेशवटिका ।

त्रिकटुकपारदपथ्यासमभागं कानकं फलं द्विगुणम् ।
माषप्रमाणवटिका कार्या स्वरसेन चाम्ललोणस्य ॥ ३८ ॥

सोंठ, मिरच, पीपल, रससिन्दूर और हरड ये प्रत्येक समान भाग और दुगुना जमालगोटा लेवे। फिर सबको एकत्र चूर्णकर लोनियाके रसमें विधिपूर्वक खरल करके एकएक मासेकी गोलियाँ बनावे ॥ ३८ ॥

प्रबलजलोदरगुल्मज्वरपाण्ड्वामयविनाशिनी प्रोक्ता।
तिमिराणि पटलविद्रधिप्रबलोदावर्त्तशूलहारी ॥ ३९ ॥
कृमिकोठकुष्ठकण्डूपिडकाश्च निहन्ति रोगचयम्।
सिद्धगुडी प्रथिता भुवि श्रीवैद्यनाथपादाज्ञा ॥ ४० ॥

यह वटी प्रबलतर जलोदर, गुल्म, ज्वर, पाण्डु, तिमिर, पटल, विद्रधि, दुस्तर उदावर्त्त और शूलादि रोग एवं कृमिरोग, उदररोग, कुष्ठ, खुजली, पिडका प्रभृति समस्त रोगोंके समूहको शीघ्र नष्ट करती है। इसके सेवन करनेसे यदि ज्यादा दस्त होवें तो रोगीके हाथ पैर धुलाकर उसको दही और भातका थोडा भोजन करावे। यह श्रीवैद्यनाथ महाराजकी आज्ञासे निर्माण कीगई है, इसलिये इसको श्री वैद्यनाथादेशवटिका कहते हैं ॥ ३९ ॥ ४० ॥

अभयावटी।

अभया मरिचं कृष्णा टङ्कणं च समांशिकम्।
सर्वचूर्णसमं भागं दद्यात्कानकजं फलम् ॥ ४१ ॥
स्नुहीक्षीरेण संकुर्याद्वटीं स्विन्नकलायवत्।
वटीद्वयं शिवामेकां पिष्ट्वा तण्डुलवारिणा ॥
उष्णाद्भिरेचयेदेषा शीते स्वास्थ्यमुपैति च ॥ ४२ ॥

हरड, कालीमिरच, पीपल, और सुहागा ये सब समान भाग और सबके समान शुद्ध जमालगोटा, एकत्र मिलाकर पीसलेवे। फिर सबको थूहरके दूधमें अच्छे प्रकार खरल करके मटरकी बराबर गोलियाँ प्रस्तुत करे। इनमेंसे दो गोली और एक हरडको चावलोंके जलमें पीसकर खाय और ऊपरसे गरमजल पीवे तो इससे दस्त होते हैं। इसपर शीतलजल पीनेसे दस्त बन्द होजाते हैं ॥

जीर्णज्वरं प्लीहरोगं हन्त्यष्टावुदराणि च ॥ ४३ ॥
वातोदरे प्रशस्तेयं सर्वाजीर्णं व्यपोहति।
कामलां पाण्डुरोगं च तथैव कुम्भकामलाम् ॥ ४४ ॥

यह गोली पुराने ज्वर, तिल्ली, ८ प्रकारके उदररोग, वातोदर, सर्व प्रकारकी अजीर्णता, कामला, पाण्डु, कुम्भकामलादि रोगोंको दूर करती है ॥ ४३ ॥ ४४ ॥

शोथोदरारिलौहं ।

पुनर्नवामृतावह्निगवाक्षीमानशिग्रवः ।
सूर्यावर्त्तार्कमूलं च पृथगष्टपलं जले ॥ ४५ ॥
पादशेषे शृतं द्रोणे सुपूते वस्त्रगालिते ।
लौहचूर्णाष्टपलकं पचेदाज्यसमं भिषक् ॥ ४६ ॥
अर्कस्य द्विपलं क्षीरं स्नुहीक्षीरं चतुःपलम् ।
पलद्वयं कौशिकस्य गन्धकस्य पलं तथा ॥ ४७ ॥
पलार्द्धं पारदं सिद्धे वक्ष्यमाणं तु निक्षिपेत् ॥ ४८ ॥

पुनर्नवा, गिलोय, चीता, इन्द्रायण, मानकन्द, सहिंजना, हुलहुलकी जड और आककी जड इन औषधियोंको अलग २ आठ आठ पल लेकर एक द्रोण जलमें पकावे। जब पकते २ चौथाई भाग जल शेष रहजाय तब उतारकर छान लेवे। फिर इस क्वाथमें लोहेकी भस्म ८ पल, गौका घी ८ पल, आकका दूध २ पल, थूहरका दूध ४ पल, शुद्ध गूगल ८ तोले, शुद्ध गन्धक ४ तोले और यथाविधि शोधित पारा २ तोले डालकर ताँबेके पात्रमें उत्तम रूपसे पाक करे। जब पाक भलीभाँति पककर सिद्ध होजाय तब उतारकर शीतल होजानेपर उसमें निम्नोक्त औषधियोंके चूर्णको डालदेवे ॥ ४५-४८ ॥

जयपालं ताम्रमभ्रं शुद्धमत्र प्रदापयेत् ।
कंकुष्ठवह्निकन्दानां शरपुङ्खाद् घण्टकर्णकात् ॥
पलाशस्य च बीजानि कञ्चुकी तालमूलिका ॥ ४९ ॥
त्रिफलायाः कृमिरिपोस्त्रिवृद्दन्तीभवं तथा ।
सूर्यावर्त्तगवाक्ष्योश्च वर्षाभूर्वज्रवल्लिका ॥ ५० ॥
एषां लौहसमां मात्रां स्निग्धे भाण्डे निधापयेत् ।
अतोऽस्य भक्षयेन्मात्रामनुपानं च युक्तितः ॥ ५१ ॥

यथा-जमालगोटा, शुद्ध ताँबे और अभ्रककी भस्म, मुरदाशंख, चीतेकी जड, जिमीकन्द, शरपता, मोखावृक्ष, ढाकके बीज, क्षीरकंचुकी, मुसली, त्रिफला, वायविडङ्ग, निसोत, दन्तीकी जड, हुलहुल, इन्द्रायणकी जड, पुनर्नवा और हडसकरी ये प्रत्येक औषधि लोहेकी समान भाग लेकर बारीक कूट पीसकर अच्छेप्रकार मिलादेवे। फिर उत्तम घृतसे चिकने पात्रमें भरकर रखदेवे। पश्चात् प्रतिदिन प्रातःकाल उपयुक्त मात्रासे सेवन करे और देश, काल तथा दोषोंके बलाबलको विचारकर अनुपानकी कल्पना करे ॥ ४९-५१ ॥

हन्ति सर्वोदरं शीघ्रं नात्र कार्या विचारणा ।
ये च शोथाः सुदुर्वाराश्चिरकालानुबन्धिनः ॥ ९२ ॥
तान्सर्वान्नाशयत्याशु तमः सूर्योदये यथा ।
नातः परतरं किञ्चिच्छोथोदरविनाशनम् ॥ ९३ ॥
उदराणि पाण्डुरोगं कामलां च हलीमकम् ।
अर्शो भगन्दरं कुष्ठं ज्वरं गुल्मं च नाशयेत् ॥ ९४ ॥

यह सब उदररोगोंको तत्क्षण नाश करता है । जो पुराने और दुर्निवार्य्य शोथ हैं उन सबको यह औषधि इस प्रकार नष्ट करती है, जिस प्रकार सूर्य्यकी प्रखरतम किरणोंके उदय होनेपर अन्धकार नष्ट होजाता है । शोथ और उदररोगकी इससे उत्तम अन्य औषधि नहीं है । इससे पाण्डु, कामला, हलीमक, अर्श, भगन्दर, कुष्ठ, ज्वर और गुल्मादि सब विकार दूर होते हैं ॥ ९२–९४ ॥

वज्रक्षार ।

सामुद्रं सैन्धवं काचं यवक्षारं सुवर्चलम् ।
टङ्कणं स्वर्जिकाक्षारं तुल्यं सर्वं विचूर्णयेत् ॥ ९५ ॥
अर्कक्षीरैः स्नुहीक्षीरैरातपे भावयेत् त्र्यहम् ।
तेन लिप्त्वाऽर्कपत्रं च रुद्ध्वा चान्तःपुटे पचेत् ॥ ९६ ॥
तत्क्षारं चूर्णयेत्पश्चात् त्र्यूषणं त्रिफलारजः ।
जीरकं रजनी वह्निर्नवभागं समं समम् ॥ ९७ ॥
क्षारार्द्धमेव सर्वं च एकीकृत्य प्रयोजयेत् ।
वज्रक्षारमिदं सिद्धं स्वयं प्रोक्तं पिनाकिना ॥ ९८ ॥

समुद्रनोन, सैंधानोन, कचियानोन, जवाखार, कालानमक, सुहागा और सज्जी इन सबको समान भाग लेकर बारीक पीस लेवे । फिर इस चूर्णको धूपमें रखकर आकके दूध और थूहरके दूधमें तीन दिनतक भावना देवे । तदनन्तर गोलासा बनालेवे । और उसको आकके पत्तोंसे लपेट हांडीमें रखकर मुँह बन्द करदेवे और अन्तःपुटमें स्थापन कर उत्तम रूपसे पकावे । जब यथाविधि पककर शीतल होजाय तब उक्त गोलेको निकालकर चूर्ण करलेवे । उसमें सोंठ, मिरच, पीपल, त्रिफला, जीरा, हल्दी और चीता इनका समान भाग मिश्रित चूर्ण सब खारसे आधा भाग लेकर एकत्र मिलादेवे । इस प्रकार वज्रक्षार सिद्ध होता है । इसको शिवजी महाराजने कहा है ॥ ९५–९८ ॥

सर्वोदरेषु गुल्मेषु शूलदोषेषु योजयेत् ।
अग्निमान्द्येऽप्यजीर्णे च भक्ष्यं निष्कद्वयं द्वयम् ॥५९॥
वाताधिके जलं कोष्णं घृतं वा पैत्तिके हितम् ।
कफे गोमूत्रसंयुक्तमारनालं त्रिदोषजे ॥ ६० ॥

इसको समस्त उदररोग, गुल्म, शूल, मन्दाग्नि और अजीर्णादि रोगोंमें ४-४ माशेकी मात्रासे देवे तो उक्त सब विकार नष्ट होते हैं । अनुपान-वाताधिक्यमें गरम जल, पित्ताधिक्यमें घृत, कफाधिक्यमें गोमूत्र और त्रिदोषमें काँजीके साथ देवे ॥ ५९ ॥ ६०

बिन्दुघृत ।

अर्कक्षीरपले द्वे च स्नुहीक्षीरपलानि षट् ।
पथ्या काम्पिल्लकं श्यामा शम्याकं गिरिकर्णिका ॥६१॥
नीलिनी त्रिवृता दन्ती शंखिनी चित्रकं तथा ।
एतेषां पलिकैर्भागैर्घृतप्रस्थं विपाचयेत् ॥ ६२ ॥
अथास्य मलिने कोष्ठे बिन्दुमात्रं प्रदापयेत् ।
यावतोऽस्य पिबेद्बिन्दूंस्तावद्वारान् विरिच्यते ॥ ६३ ॥

आकका दूध ८ तोले, थूहरका दूध २४ तोले, हरड, कबीला, श्यामालता, अमलतास, सफेद अपराजिताकी जड, नीली, निसोत, दन्ती, शंखपुष्पी और चीता ये प्रत्येक औषधि चार चार तोले लेवे । इनके कल्कद्वारा गौके १ प्रस्थ घृतको अच्छे प्रकार पकावे । इसकी केवल एक बूँद लेकर मलिन कोष्ठवाले रोगीको देवे । इस घृतकी जितनी बूँदें पीवे उतनीही वार दस्त होंगे ॥ ६१-६३ ॥

कुष्ठगुल्ममुदावर्त्तं श्वयथुं सभगन्दरम् ।
शमयत्युदराण्यष्टौ वृक्षमिन्द्राशनिर्यथा ॥
एतद्बिन्दुघृतं नाम येनाभ्यक्तो विरिच्यते ॥ ६४ ॥

यह बिन्दुघृत कुष्ठ, गुल्म, उदावर्त्त, सूजन, भगन्दर और आठों प्रकारके उदररोगोंको शीघ्र शमन करता है । इस घृतको शरीरमें मालिश करनेसे भी दस्त हों ॥ ६४ ॥

महाबिन्दुघृत ।

स्नुहीक्षीरपले कल्के प्रस्थार्द्धं चैव सर्पिषः ।
काम्पिल्लकं पलं चैकं पलार्द्धं सैन्धवस्य च ॥ ६५ ॥

त्रिवृतायाः पलं चैकं कुडवं धात्रिकारसात्।
तोयप्रस्थेन विपचेच्छनैर्मृद्वग्निना भिषक् ॥ ६६ ॥

गौका घी ३२ तोले एवं थूहरका दूध ८ तोले, थूहरका कल्क ८ तोले कबीला ४ तोले, सैंधानमक २ तोले, निसोत ४ तोले, आमलोंका रस १ कुडव (१६ तोले) और पाकके लिये जल १ प्रस्थ लेवे। फिर सबको एकत्रकर मन्दमन्द अग्निद्वारा यथाविधि घृतको सिद्ध करे ॥ ६५ ॥ ६६ ॥

कर्षप्रमाणं दातव्यं जठरे प्लीहगुल्मयोः।
तथा कच्छपरोगेषु युञ्जीत मतिमान् भिषक् ॥ ६७ ॥
एतद् गुल्मान्सनिचयान् समुलान्सपरिग्रहान्।
भिन्दन्त्येष प्रयोगो हि वायुर्जलधरानिव ॥ ६८ ॥
पञ्चगुल्मवधार्थाय वज्रमुक्तं स्वयम्भुवा।
महाबिन्दुघृतं नाम सिद्धं सिद्धैश्च पूजितम् ॥ ६९ ॥

इस घृतमेंसे उदररोग, तिल्ली, गुल्म और कच्छपरोगवाले मनुष्योंको दो दो तोले प्रमाण देवे। यह घृत संपूर्ण उपद्रवोंसहित सर्वप्रकारके गुल्मोंको इस प्रकार समूल नष्ट करता है, जिस प्रकार वायु मेघोंके समूहको छिन्न भिन्न करदेता है। पांचों प्रकारके गुल्मोंको नाश करनेके लिये यह वज्रकी समान है ऐसा ब्रह्माजीने कहा है। यह महाबिंदुनामक घृत सिद्ध जनोंसे पूजनीय है ॥

नाराचघृत।

स्नुक्क्षीरदन्तीत्रिफलाविडङ्गसिंहीत्रिवृच्चित्रककल्कयुक्तम्। घृतं विपक्वं कुडवप्रमाणं तोयेन तस्याक्षमथार्द्धमक्षम् ॥ ७० ॥ पीत्वोष्णमम्भोऽनु पिबेद्विरिक्तः पेयां सुखोष्णां प्रपिबेद्विधिज्ञः। नाराचमेतज्जठरामयानां युक्त्योपयुक्तं शमनं प्रदिष्टम् ॥ ७१ ॥

थूहरका दूध, दन्तीमूल, त्रिफला, वायविडङ्ग, कटेरी, निसोत और चीतेकी जड इन सब औषधियोंको समान भाग लेकर कल्क बनालेवे। फिर इस कल्कके द्वारा १६ तोले घृतको पकावे। इस नाराचघृतको जलके साथ एक तोला अथवा दो तोले प्रमाण सेवन करे और ऊपरसे गरम जल पीवे। जब अच्छेप्रकार दस्त होजायें तब बुद्धिमान् पुरुष मन्दोष्ण पेयाको पान करे। युक्तिसे प्रयोग कियाहुआ यह नाराचघृत उदरके सम्पूर्ण रोगोंको नष्ट करदेता है ॥ ७० ॥ ७१ ॥

बृहन्नाराचघृत।

लोध्रचित्रकचव्यानि विडङ्गं त्रिफला त्रिवृत्।
शङ्खिन्यतिविषा व्योषमजमोदा निशाद्वयम् ॥ ७२ ॥
दन्ती च कार्षिकं सर्वं गोमूत्रस्य पलाष्टकम्।
चतुःपलं स्नुहीक्षीरं राजवृक्षफलं तथा ॥ ७३ ॥
एतैश्चतुर्गुणे तोये घृतप्रस्थं विपाचयेत्।
उदरं चोष्णवातं च गुल्मप्लीहभगन्दरान् ॥ ७४॥
निहन्त्यचिरयोगेन गृध्रसीं स्तम्भमूरुजम्।
बृहन्नाराचकं नाम घृतमेतद्यथाऽमृतम् ॥ ७५ ॥

लोध, चीता, चव्य, वायविडङ्ग, त्रिफला, निसोत, चोरपुष्पी, अतीस, त्रिकुटा, अजमोद, हल्दी, दारुहल्दी और दन्ती ये प्रत्येक दो दो तोले लेकर एकत्र कूट पीसकर कल्क बनालेवे। फिर यह कल्क एवं गोमूत्र ८ पल, थूहरका दूध ४ पल और अमलतासका गूदा ४ पल चौगुने जलमें डालकर एक प्रस्थ घृतको उत्तम विधिसे पकावे। इसके सेवन करनेसे उदररोग, उष्णवात, गुल्म, प्लीहा, भगन्दर, गृध्रसी और ऊरुस्तम्भादिरोग अल्प समयमें ही दूर होते हैं। यह बृहन्नाराचनामवाला घृत अमृतके समान गुणकारी है ॥ ७२–७५ ॥

उदररोगमें पथ्य।

विरेचनं लङ्घनमब्दसम्भवाः कुलत्थमुद्रारुणशालयो यवाः। मृगद्विजा जाङ्गलसंज्ञयाऽन्विता पेयासुरामाक्षिकसीधुमाधवाः ॥७६॥ तक्रं रसोनो रुबुतैलमार्द्रकं शालिञ्चशाकं कुलकं कठिल्लकम्। पुनर्नवा शिग्रुफलं हरीतकी ताम्बूलमेला यवशूकमायसम् ॥७७॥ अजागवोष्ट्रीमहिषीपयो जलं लघूनि तिक्तानि च दीपनान्यपि। वस्त्रेण संवेष्टनमत्रिकर्मतो विषप्रयोगोऽनुयुतो यथायथम्॥

विरेचन, लङ्घन, पुरानी कुलथी, मूँग, लालशालिके चावल, जौ एवं जङ्गली-पशु-पक्षियोंका मांसरस, पेया, मदिरा, शहद, सीधु, माधव (मद्यविशेष), मट्ठा, लहसन, अण्डीका तेल, अदरख, शालिञ्चशाक, परवल, करेला, पुनर्नवा, सहिंजनेकी फली, हरड, पान, इलायची, जवाखार, लोहा, बकरी गौ ऊँटनी और भैंसका, दूध एवं इन सबका मूत्र, हलके, कडुवे और पाचकद्रव्य, वस्त्रसे उदरको लपेटना

अग्निद्वारा सेंकना और विषप्रयोग इत्यादि क्रिया, आहार तथा औषधियों उदररोगमें दोषानुसार व्यवहार करनेसे विशेष उपकार होय ॥

उदररोगमें अपथ्य।

संस्नेहनं धूमपानं जलपानं शिराव्यधः।
छर्दिर्यानं दिवानिद्रां व्यायामं पिष्टवैकृतम् ॥ ७९ ॥
उदकानूपमांसानि पत्रशाकांस्तिलानपि।
उष्णानि च विदाहीनि लवणान्यशनानि च ॥ ८० ॥
शिम्बीधान्यं विरुद्धान्नं दुष्टनीरं गुरूणि च।
महेन्द्रगिरिजातानां सरितां सलिलानि च ॥ ८१ ॥
विष्टम्भीनि विशेषात्तु स्वेदं छिद्रसमुद्भवे।
वर्जयेदुदरव्याधौ वैद्यो रक्षन् निजं यशः ॥ ८२ ॥

स्नेहद्रव्योंका पान, धूमपान, अधिक जलपान, शिरावेध (फस्तखुलवाना) वमन करना, हाथी, घोडे आदिपर चढना, दिनमें शयन, कसरत करना, पिट्ठीके बने द्रव्य, जलमें रहनेवाले और अनूपदेशके जीवोंका मांस, पत्रवाले शाक, तिल, गरम, दाहकारक द्रव्य, नमक, शिम्बीधान्य (अडहर, मोठ आदि), प्रकृतिविरुद्ध और पचनेमें भारी पदार्थोंका भोजन, दूषित जल, हिमालयसे निकली हुई नदियोंका जल, अजीर्णकारक द्रव्य, (और विशेषकर छिद्र होजानेवाले उदररोगमें स्वेदक्रिया करना) इत्यादि सम्पूर्ण कृत्य, आहारादिकोंको त्याग देवे ॥ ७९-८२ ॥

इति भैषज्यरत्नावल्यामुदररोगचिकित्सा।

प्लीहा और यकृत्की चिकित्सा।

प्लीहोद्दिष्टां क्रियां सर्वां यकृन्नाशाय योजयेत्।

यकृत (जिगर) रोगमें प्लीहारोगोक्त विधिके अनुसार चिकित्सा करे।

तालपुष्पोद्भवः क्षारः सुगुडः प्लीहनाशनः ॥ १ ॥

ताडके फूलोंके खारको पुराने गुडमें मिलाकर भक्षण करनेसे प्लीहा (तिल्ली) रोग नष्ट होता है ॥ १ ॥

मूलं पिष्ट्वा चित्रकस्य कृत्वा तु वटिकात्रयम् ।
कदलीपक्वमध्येन भक्षणात्प्लीहनाशनम् ॥ २ ॥

चीतेकी छः मासे जडको जलमें पीसकर तीन गोलियाँ बनालेवे । इनमेंसे एक एक गोली पकीहुई केलेकी फलीमें रखकर तीन दिनतक सेवन करनेसे प्लीहा नाश होती है ॥ २ ॥

गुडेश्चित्रकमूलं वा रजन्यर्कदलं तथा ।
धातकीपुष्पचूर्णं वा प्रत्येकं प्लीहनाशनम् ॥ ३ ॥

चीतेकी जड, हल्दी, आकके पत्ते अथवा धायके फूलोंका चूर्ण इनमेंसे किसी एकको गुडके साथ खावे तो प्लीहा दूर होती है ॥ ३ ॥

रसेन जम्बीरफलस्य शङ्खनाभीरजः पीतमशेषमेव ।
कर्षप्रमाणं शमयेत्सशूलं प्लीहामयं कूर्मसमानमाशु ॥ ४ ॥

शंखनाभिके चूर्णको एक तोला प्रमाण लेकर जम्बीरी नींबूके रसके साथ पीनेसे शूलसहित कूर्मके समानवाली सर्वप्रकारकी प्लीहा शीघ्र नष्ट होय ॥ ४ ॥

दध्ना भुक्तवतो वामबाहुमध्ये शिरां भिषक् ।
विध्येत्प्लीहविनाशाय यकृन्नाशाय दक्षिणे ॥ ५ ॥
प्लीहानं मर्दयेद्गाढं दुष्टरक्तं प्रवर्त्तयेत् ॥ ६ ॥

प्लीहाको नष्ट करनेके लिये प्रथम रोगीको दहीसहित अन्न भक्षण करावे । पश्चात् बाँये हाथकी कूर्परसन्धिके बीचकी शिराको वेधे और यकृतको दूर करनेके लिये दहिने हाथकी शिराको वेधे । शिरावेध करके दूषित रक्तको निकालनेके लिये प्लीहा और यकृत् स्थानको जोरसे दबावे ॥ ५ ॥ ६ ॥

लशुनं पिप्पलीमूलमभयां चैव भक्षयेत् ।
पिबेद्गोमूत्रगण्डूषं प्लीहरोगनिवृत्तये ॥ ७ ॥

प्लीहारोगको निवारण करनेके लिये लहसन, पीपलामूल और हरड इनको समान भाग लेकर एकत्र पीसकर गोमूत्रके साथ पान करे ॥ ७ ॥

प्लीहजिच्छङ्खपुष्पायाः कल्कस्तक्रेण सेवितः ॥ ८ ॥

शंखपुष्पीकी जडको जलमें पीसकर मट्ठेमें मिलाकर पीवे तो प्लीहा दूर होय ८

यमानिकादिचूर्ण ।

यमानिका चित्रकयावशूकषड्ग्रन्थिदन्तीमगधोद्भवानाम् ।
प्लीहानमेतद्विनिहन्तिचूर्णमुष्णाम्बुना मस्तुसुरासवैर्वा ॥ ९ ॥

अजवायन, चीतेकी जड, जवाखार, पीपलामूल, दन्ती और पीपल इन औष-धियोंके समान भाग चूर्णको गरम जल, दहीका तोड, मदिरा अथवा आसवके साथ सेवन करनेसे प्लीहारोग नष्ट होता है ॥ ९ ॥

गुडूच्यादिचूर्ण ।

गुडूच्यतिविषा शुण्ठी भूनिम्बयवतिक्तकम् ।
मुस्ता कणा यवक्षारः कासीसं भ्रमरातिथिः ॥
एतेषां समभागेन चूर्णमेव विनिर्दिशेत् ॥ १० ॥
यकृत्प्लीहपाण्डुरोगमग्निमान्द्यमरोचकम् ।
ज्वरमष्टविधं हन्ति साध्यासाध्यमथापि वा ॥ ११ ॥
नानादोषोद्भवं चैव वारिदोषभवं तथा ।
विरुद्धभेषजभवं ज्वरमाशु व्यपोहति ॥ १२ ॥

गिलोय, अतीस, सोंठ, चिरायता, महातिक्तक, नागरमोथा, पीपल, जवाखार कसीस और चम्पावृक्षकी छाल इन सबको समान भाग ग्रहण करके एकत्र कूट पीसकर चूर्ण बनालेवे । इस चूर्णको उपयुक्त मात्रासे सेवन करनेपर यकृत, प्लीहा, पाण्डु, मन्दाग्नि, अरुचि, आठों प्रकारके ज्वर, साध्य व असाध्य अनेक दोषोंसे उत्पन्न हुए ज्वर, जलके दोषसे अथवा प्रकृतिविरुद्ध औषधि सेवन करनेसे उत्पन्न हुए ज्वरादि रोग तत्काल नाश होते हैं ॥ १०–१२ ॥

रोहीतकाद्यचूर्ण ।

रोहीतकं यवक्षारो भूनिम्बं कटुरोहिणी ।
मुस्तकं नरसारं च वीरा विश्वं सुचूर्णितम् ॥ १३ ॥
माषमात्रं ततः खादेच्छीततोयानुपानतः ।
यकृद्रोगं निहन्त्याशु भास्करस्तिमिरं यथा ॥ १४ ॥

रोहेडा वृक्षकी छाल, जवाखार, चिरायता, कुटकी, नागरमोथा, नौसादर, अतीस और सोंठ इनको समानांश लेकर उत्पन्न चूर्ण बनालेवे । फिर प्रतिदिन प्रातःकाल इस चूर्णको एक एक मासा शीतल जलके साथ खाय । यह चूर्ण यकृत्रोगको एकदम इस भाँति नष्ट कर देता है, जिस प्रकार सूर्य तमको ॥ १३ ॥ १४ ॥

मानकादिगुडिका ।

मानमार्गामृता वासा स्थिरा सैन्धवचित्रकम् ।
नागरं तालपुष्पं च प्रत्येकं च त्रिकार्षिकम् ॥ १५ ॥

विडसौवर्चलक्षारपिप्पल्यश्चापि कार्षिकाः ।
एतच्चूर्णीकृतं सर्वं गोमूत्रस्याढके पचेत् ॥ १६ ॥
सान्द्रीभूते गुडीः कुर्याद्दत्त्वा त्रिपलमाक्षिकम् ।
यकृत्प्लीहोदरहरो गुल्मार्शोग्रहणीहरः ॥
योगः परिकरो नाम्ना ह्यग्निसन्दीपनः परः ॥ १७ ॥

मानकन्द, चिरचिरेकी जडकी भस्म, गिलोय, अडूसेकी छाल, शालपर्णी, सेंधानमक, चीता, सोंठ और ताडके फूलोंका खार ये प्रत्येक तीन तीन तोले, विड नमक, कालानमक, जवाखार और पीपल ये प्रत्येक औषधि एकएक तोला लेवे । सबको एकत्र चूर्ण करके ८ सेरगोमूत्रमें पकावे । पकते २ जब गाढा होजाय तब उतारलेवे और शीतल होजानेपर १२ तोले शहद डालकर गोलियाँ बनालेवे । यह गुटिका यकृत प्लीहा, उदररोग गुल्म, अर्श और संग्रहणी आदि रोगोंको नाश करती है एवं अग्निको दीपन करती है ॥ १५–१७ ॥

वृहन्मानादिगुडिका ।

मानमार्गस्थिरावह्निस्तुहीनागरसैन्धवम् ।
तालरण्डं कृमिघ्नं च हबुषं चविका वचा ॥ १८ ॥
विडसौवर्चलक्षारपिप्पलीशरपुङ्खकम् ।
जीरकं पारिभद्रं च प्रत्येकं कर्षकद्वयम् ॥ १९ ॥
सार्द्धाढके गवां मूत्रे पचेत्सर्वं सुचूर्णितम् ।
सान्द्रीभूते क्षिपेदेषां चूर्णकं कर्षसंमितम् ॥ २० ॥
अजाजी त्र्यूषणं हिङ्गु यमानी पुष्करं शठी ।
त्रिवृद्दन्ती विशाला च दत्त्वा त्रिपलमाक्षिकम् ॥
खादेदग्निबलापेक्षी बुद्ध्या चानु पिबेन्नरः ॥ २१ ॥

पुराना मानकन्द, चिरचिरा, शालपर्णी, चीता, थूहरकी जड, सोंठ, सेंधानमक, ताडकी जटाओंकी भस्म, वायविडङ्ग, हाऊबेर, चव्य, वच, विडनमक, कालानमक, जवाखार, पीपल, शरफोंका, जीरा और फरहद इन औषधियोंके दो दो कर्ष बारीक पिसेहुए चूर्णको डेढ आढक गोमूत्रमें पकावे । पकते २ जब गाढा पडजाय तब निम्नलिखित औषधियोंके उत्तम प्रकारसे पीसे हुए एक एक कर्ष परिमाण चूर्णको डालदेवे । कालाजीरा, सोंठ, मिरच, पीपल, हींग, अजवायन, पोहकरमूल, कचूर,

निसोत, दन्ती और इन्द्रायणकी जड इनके चूर्णको डालकर उतार लेवे । पुनः शीतल होजानेपर १२ तोले शहद मिलादेवे । तदनंतर इसमेंसे प्रतिदिन प्रातःसमय अपनी अग्निका बलाबल विचारकर उपयुक्त परिमाणमें सेवन करे और दोषानुसार अनुपान प्रयोग करे ॥ १८–२१ ॥

यकृत्प्लीहोदरानाहगुल्मं पाण्डुं सकामलम् ॥ २२ ॥
कुक्षिशूलं च हृच्छूलं पार्श्वशूलमरोचकम् ।
शोथं च श्लीपदं हन्ति जीर्णं च विषमज्वरम् ॥ २३ ॥

इससे यकृत, प्लीहा, उदररोग अफारा, गुल्म, पाण्डु, कामला, कुक्षिशूल, हृदयशूल, पार्श्वशूल, अरुचि, सूजन, श्लीपद, जीर्णज्वर, और विषमज्वरादि विकार शीघ्र नष्ट होते हैं ॥ २२ ॥ २३ ॥

अर्कलवण ।

अर्कपत्रं सलवणमन्तर्धूमं दहेन्नरः ।
मस्तुना तत्पिबेत्क्षारं प्लीहगुल्मोदरापहम् ॥ २४ ॥

आकके पत्ते और सैंधानमक इनको समान भाग लेकर अन्तर्धूम (जिसमें धुआँ न निकले) पात्रमें दग्ध करे । फिर इस खारको दहिके तोडके साथ पान करे तो प्लीहा, गुल्म, और उदररोग दूर होते हैं ॥ २४ ॥

अभयालवण ।

पारिभद्रपलाशार्कस्नुह्यपामार्गचित्रकान् ।
वरुणाग्निमन्थवस्तुश्वदंष्ट्रा बृहतीद्वयम् ॥ २५ ॥
पूतिकास्फोतकुटजकोषातक्यः पुनर्नवा ।
समूलपत्रशाखाश्च क्षोदयित्वा उदूखले ॥ २६
तिलनालप्रदीताग्निसुदग्धं भस्म शीतलम् ।
क्षारप्रस्थं गृहीत्वा तु न्यसेत्पात्रे दृढे नवे ॥ २७ ॥
जलद्रोणे विपक्तव्यं ग्राह्यं पादावशेषितम् ।
पूर्ववत्क्षारकल्केन स्रावयित्वा विचक्षणः ॥ २८ ॥
प्रस्थमेकं च लवणं तदर्द्धां च हरीतकीम् ।
तुल्याम्बुभागं गोमूत्रं साधयेन्मृदुनाऽग्निना ॥ २९ ॥
किञ्चित्सबाष्पसान्द्रे च सम्यक् सिद्धेऽवतारिते ।

अजाजी त्र्यूषणं हिङ्गु यमानी पौष्करं शठी ॥
एतैरर्द्धपलैर्भागैश्चूर्णं कृत्वा प्रदापयेत् ॥ २० ॥

फरहदकी छाल, ढाककी छाल, आक, थूहर, चिरचिटा, चीतेकी जड, बरनाकी छाल, अरणी, बकवृक्षकी छाल, गोखुरू, कटाई, कटेरी, दुर्गन्धकरञ्ज, आस्फोतलता (कोरल इति महाराष्ट्रभाषा), कुडेकी छाल, कडवी तोरई और पुनर्नवा इन सबको पञ्चाङ्गसहित समान भाग लेकर ओखलीमें कूटलेवे । फिर एक हाँडीमें रख उसका मुँह बन्द करके तिलोंकी लकडियोंके द्वारा भस्म कर लेवे । जब शीतल होजाय तब उसमेंसे नितारकर १ प्रस्थ खारको ग्रहण कर एक द्रोण (३२ सेर) जलमें सुदृढ और नवीन पात्रमें भरकर पकावे । पकते पकते जब चौथाई भाग जल शेष रहजाय तब उतारकर छानलेवे । फिर पूर्वोक्त क्षारपाककी विधिके अनुसार इस जलको पकावे और इसमें सैंधानमक एक प्रस्थ, हरड ३२ तोले और गोमूत्र ८ सेर डालकर मन्द-मन्द अग्निद्वारा अच्छे प्रकारसे पकावे । जब पाक यथाविधि पककर तैयार होजाय तब उतार लेवे और भाफ उठतेहुए पाकमें कालाजीरा, त्रिकुटा, हींग, अजवायन, पोहकरमूल तथा कचूर इनके दो दो तोले चूर्णको खूब बारीक पीसकर मिलादेवे ॥

अभयालवणं नाम भक्षयेच्च यथाबलम् ॥ २१ ॥
व्याधिं संवीक्ष्य मतिमाननुपानं यथाहितम् ।
ये च कोष्ठगता रोगास्तान्निहन्ति न संशयः ॥ २२ ॥
यकृत्प्लीहोदरानाहगुल्माष्ठीलाग्निमान्द्यजित् ।
हन्याच्छिरोऽर्त्ति हृद्रोगं शर्कराश्मरिनाशनम् ॥ २३ ॥

रोगीके बलानुसार इस अभयालवणको भक्षण कराना चाहिये । एवं बुद्धिमान् वैद्य रोगको भलीभाँति विचारकर हितप्रद अनुपानकी कल्पना करे । यह अभयालवण कोष्ठस्थित रोगों तथा यकृत्, प्लीहा, उदररोग, आनाह, गुल्म, अष्ठीला, मन्दाग्नि, वमन, शिरोरोग, हृदयरोग, शर्करायुक्त प्रमेह और अश्मरीप्रभृति रोगोंको निस्सन्देह नष्ट करता है ॥ २१-२३ ॥

वर्द्धमानपिप्पली ।

क्रमवृद्ध्या दशाहानि दशपिप्पलकं दिनम् ।
वर्द्धयेत्पयसा सार्द्धं तथैवापनयेत्पुनः ॥ २४ ॥
जीर्णेऽजीर्णे च भुञ्जीत षष्टिकं क्षीरसर्पिषा ।
पिप्पलीनां सहस्रस्य प्रयोगोऽयं रसायनः ॥ २५ ॥

पहले दिन १० पीपल और दूसरे दिन २० इस क्रमसे दूधके साथ सेवन करता-हुआ दस दिनतक दस दस पीपलोंकी मात्रा बढाकर सौतक करलेवे । फिर इसी प्रकार प्रतिदिन दसदस पीपल घटाता जावे । एवं पूर्वोक्त नियमानुसार दूसरीबार प्रतिदिन दस दस पीपलोंकी वृद्धि करे । इसतरह न्यूनाधिकता करते करते एक हजारकी संख्या तक पीपलोंको सेवन करे ॥ ३४ ॥ ३५ ॥

दशपैप्पलिकः श्रेष्ठो मध्यमः षट् प्रकीर्त्तितः ।
यस्त्रिपिप्पलिपर्यन्तः प्रयोगः सोऽवरः स्मृतः ॥ ३६ ॥
बृंहणं वृष्यमायुष्यं प्लीहोदरविनाशनम् ।
वयसः स्थापनं मेध्यं पिप्पलीनां रसायनम् ॥
पञ्चपिप्पलिकं चापि दृश्यते वर्द्धमानकम् ॥ ३७ ॥

पीपल सेवन करनेकी विधि तीन प्रकारकी हैं । जैसे–प्रतिदिन १० पीपल सेवन करना उत्तम, प्रतिदिन छः पीपल सेवन करना मध्यम और प्रतिदिन तीन पीपल सेवन करना कनिष्ठ मात्राविधि है । यह प्रयोग रसायन, पुष्टिकारक, वीर्यवर्द्धक, आयुको स्थापन करनेवाला, मेधाजनक तथा प्लीहा और उदररोगको नष्ट करनेवाला है । किसी किसी आयुर्वेदिक ग्रंथोंमें प्रतिदिन पांच पांच पीपलोंको वृद्धिकरनेका नियम वर्णन किया है ॥ ३६ ॥ ३७ ॥

" पिष्टा च बलिभिः पेया श्रृता मध्यबलैर्नरैः ॥
शीतीकृत्य ह्रस्वबलैर्देहदोषामयान्युति ॥ "

" बलवान् रोगीको पीपलका चूर्ण, मध्यम अवस्थावाले रोगीको पीपलका क्वाथ और दुर्बल रोगीको पीपलका क्वाथ शीतल करके सेवन करावे । "

इसपर औषधिके जीर्ण होनेपर सांठीके चावल, दूध और घृतके साथ भक्षण करे । इसप्रकार वर्णन कियेहुए पीपलके प्रयोगको सेवन करनेकी प्रथा वर्त्तमानकालमें नहीं है, इसलिये एक रत्तीसे लेकर दो, तीन, चार, पाँच अथवा छःरत्ती परिमाणतक प्रतिदिन बढाकर दसदिनतक बढावे । फिर इसी क्रमसे घटाताजावे । इस तरह सेवन करनेसे अभीष्ट सिद्धि प्राप्त होती है ॥

गुडपिप्पली ।

तुलैकं गुडमादाय पिप्पलीं च तथैव च ।
हिङ्गु त्रिकटुकं मानं सैन्धवानां द्विकार्षिकम् ॥ ३८ ॥
चित्रकं च विडं चैव द्वौ क्षारौ शिखरी तथा ।

तालपुष्पं कोकिलाक्षं चिञ्चाक्षारं सफेनकम् ॥
स्नुहीक्षीरसमायुक्तं प्लीहज्वरविनाशनम् ॥ ३९ ॥

गुड १०० पल, पीपलका चूर्ण १०० पल, हींग, त्रिकुटा, मानकन्द, सेंधानमक प्रत्येक दो दो कर्ष, चीता, बिडनमक, जवाखार, सज्जी, चिरचिटेकी मूलकी भस्म, ताडके फूलोंकी भस्म, तालमखाना, इमलीका खार, समुद्रफेन और थूहरका दूध इन सबको दो दो कर्ष परिमाण लेकर कूटपीसकर पाँच पाँच रत्तीकी गोलियाँ बनालेवे । इसको सेवन करनेसे प्लीहा और ज्वर दूर होता है ॥ ३९ ॥

बृहद्गुडपिप्पली ।

विडङ्गं त्र्यूषणं कुष्ठं हिङ्गुलवणपञ्चकम् ।
त्रिक्षारं फेनकं वह्निं श्रेयसी चोपकुञ्चिका ॥ ४० ॥
तालपुष्पोद्भवं क्षारं नाड्यः कूष्माण्डकस्य च ।
अपामार्गस्य चिञ्चायाश्चूर्णानि चिक्कणानि च ॥ ४१ ॥
सर्वचूर्णसमं देयं चूर्णमत्र कणोद्भवम् ।
एतस्माद्द्विगुणाच्चूर्णात्पुराणो द्विगुणो गुडः ॥ ४२ ॥
मर्दयित्वा दृढे पात्रे मोदकानुपकल्पयेत ।
भक्षयेदुष्णतोयेन प्लीहानं हन्ति दुस्तरम् ॥ ४३ ॥
यकृतं पञ्चगुल्मं च उदरं सर्वरूपकम् ।
जीर्णज्वरं तथा शोथं कासं पञ्चविधं तथा ॥
अश्विभ्यां निर्मिता श्रेष्ठा बालानां गुडपिप्पली ॥ ४४ ॥

वायविडङ्ग, त्रिकुटा, कूठ, हींग, पाँचों नमक, जवाखार, सज्जी, सुहागा, समुद्रफेन, चीतेकी जड, गजपीपल, कालाजीरा, ताडके फूलोंकी भस्म, पेठेकी डंडी, चिरचिटेकी जडकी भस्म और इमलीकी छालकी भस्म इन सब औषधियोंका चूर्ण समान भाग और समस्त चूर्णके समान भाग पीपलका चूर्ण एवं सब चूर्णसे दुगुना पुराना गुड मिलाकर एकत्र दृढ पात्रमें उत्तम प्रकारसे खरल करके १ आना भरके लड्डू बनालेवे । प्रतिदिन प्रातःकाल गरम जलके साथ एक मोदक सेवन करे तो यह मोदक दुस्तर प्लीहा, यकृत्, पाँचों प्रकारके गुल्म, सर्वप्रकारके उदरविकार, जीर्णज्वर, शोथ और पाँचों प्रकारकी खाँसी इत्यादि रोगोंको शीघ्र नष्ट करती है । यह गुडपिप्पली बालकोंके लिये अत्यन्त हितकारी है । इसको अश्विनीकुमारोंने निर्माण किया है ॥ ४०–४४ ॥

रसराज।

गन्धकेन मृतं ताम्रं शुद्धगन्धकतुल्यकम्।
द्वयोः पादं शुद्धरसं मर्दयेच्छूरणद्रवैः॥
पुटेद्गजपुटे विद्वान् स्वाङ्गशीतं समुद्धरेत्॥ ४५॥

गन्धकद्वारा भस्म किया ताँबा १ तोला, शुद्ध गन्धक १ तोला शुद्ध पारा ६ मासे इन सबोंको जिमीकन्दके रसमें खरल करके गजपुटमें रख पुटपाक करे। जब पककर स्वाङ्गशीतल होजाय तब निकालकर चूर्ण करलेवे॥ ४५॥

गुञ्जाद्वयं लिहेत्क्षौद्रैः प्लीहगुल्मविनाशनम्।
यकृच्छूलं ज्वरं हन्ति कान्तपुष्टिविवर्द्धनः॥ ४६॥
रसराज इति ख्यातो रोगवारणकेसरी॥ ४७॥

इसको दो रत्तीभर शहदमें मिलाकर चाटे तो प्लीहा, गुल्म, यकृत्रोग, शूल और ज्वरादि विकार नष्ट होते हैं। यह रसराज रोगरूपी हाथीको नाश करनेके लिये सिंहके समान है तथा कान्तिवर्द्धक और पुष्टिकारक है॥ ४६॥ ४७॥

प्लीहान्तकरस।

हतशुल्वं च तारं च गगनायसमौक्तिकाः।
दरदं पुष्पकं सूतं गन्धकं नवमं तथा॥ ४८॥
गुग्गुलुस्त्रिकटू रास्ना तथा जैपालबीजकम्।
त्रिफला कटुका दन्ती देवदाली तु सैन्धवम्॥ ४९॥
त्रिवृता तु यवक्षारो वातारितैलमर्दितम्।
अष्टोदराणि पाण्डुत्वमानाहं विषमज्वरम्॥ ५०॥
अजीर्णं कफमामं च क्षयं च सर्वशूलकम्।
कासं श्वासं च शोथं च सर्वमाशु व्यपोहति॥
प्लीहान्तको रसो नाम प्लीहोदरविनाशनः॥ ५१॥

ताँबेकी भस्म, चाँदीकी भस्म, अभ्रकभस्म, लोहभस्म, मोतीकी भस्म, सिंगरफ, काँसीकी भस्म, शुद्ध पारा, शुद्ध गन्धक, शुद्ध गूगल, त्रिकुटा, रायसन, जमालगोटा त्रिफला, कुटकी, दन्ती, कडवी तोरई, सेंधानोंन, निसोत और जवाखार इन औषधियोंको समान भाग लेकर एकत्र कूट पीसकर अण्डीके तेलमें अच्छे प्रकार खरल करे। इस रसको प्रतिदिन दो रत्तीकी मात्रासे सेवन करे तो यह आठों प्रकारके उदररोग, पाण्डुरोग, अफारा, विषमज्वर, अजीर्ण, कफरोग, आमवात, क्षय, सब

शूलरोग, खाँसी, श्वास, सूजन प्लीहोदर एवं सर्व प्रकारके रोगोंको शीघ्र नष्ट करता है । इसका नाम प्लीहान्तक रस है ॥ ९१ ॥

वासुकीभूषणरस ।

सूतेन वङ्गं तु समं नियोज्य तत्तुल्यशुल्बेन च गन्धकेन ।
विमर्दयेदर्करसेन यामं मृदा च संलिप्य पुटं ददीत ॥ ९२ ॥
वासारसैस्तं परिभावयेच्च रसो भवेद्वासुकिभूषणोऽयम् ।
प्लीह्नश्च गुल्मस्य च शान्तयेऽस्य वल्लं प्रदद्याद्रसचूर्णयुक्तम् ॥९३॥

शुद्ध पारा, वङ्गभस्म, ताम्रभस्म और शुद्ध गन्धक इन द्रव्योंको समान भाग लेकर आकके पत्तोंके रसमें एक प्रहरतक यथाविधि खरल करे । फिर गोलासा बनाकर मूषायन्त्रमें रखे और मृत्तिकासे लहेसकर पुटपाक करे। जब शीतल होजाय तब निकालकर अडूसेके रसमें भावना देवे । इस प्रकार यह वासुकिभूषण नामवाला रस तैयार होता है । प्लीहा और गुल्मरोगको निवारण करनेके लिये इस रसकी दो रत्ती मात्राको सैंधनमकमें मिलाकर सेवन करावे ॥ ९२ ॥ ९३ ॥

विद्याधररस ।

गन्धकं तालकं ताप्यं मृतं ताम्रं मनःशिला ।
शुद्धसूतं च तुल्यांशं मर्दयेद्भावयेद्दिनम् ॥ ९४ ॥
पिप्पल्याश्च कषायेण वज्रीक्षीरेण भावयेत् ।
वल्लं च भक्षयेत्क्षौद्रैर्गुल्मप्लीहादिकं जयेत् ॥
रसो विद्याधरो नाम गोदुग्धं च पिबेदनु ॥ ९५ ॥

शुद्ध गन्धक, हरिताल, सोनामाखी, ताँबेकी भस्म, मैनसिल, और शुद्ध पारा ये सब औषधियाँ बराबर बराबर लेकर एकत्र खरल करे । फिर पीपलके क्वाथ और थूहरके दूधमें अलग अलग एक एक दिन भावना देवे । इस रसको दो रत्ती प्रमाण शहदके साथ मिलाकर भक्षण करे तो इससे गुल्म प्लीहा आदि दूर होवे हैं । इसका नाम विद्याधर रस है । इसके सेवन करनेपर गोदुग्ध पान करे ॥ ९४॥९५ ॥

लोकनाथरस १-२ ।

पारदं गन्धकं चैव समभागं विमर्दयेत् ।
मृताभ्रं रसतुल्यं च पुनस्तत्रैव मर्दयेत् ॥ ९६ ॥
रसत्रिगुणलोहं च लोहतुल्यं च ताम्रकम् ।
वराटिकाया भस्माथ पारदत्रिगुणं कुरु ॥ ९७ ॥

नागवल्लीरसेनैव मर्दयेद्यत्नतो भिषक् ।
पुटेद्गजपुटे विद्वान् स्वाङ्गशीतं समुद्धरेत् ॥ ५८ ॥
मधुना पिप्पलीचूर्णं सगुडां वा हरीतकीम् ।
अजाजीं वा गुडेनैव भक्षयेदनुपानतः ॥ ५९ ॥
यकृद्गुल्मोदरहरः प्लीहश्वयथुनाशनः ।
जीर्णज्वरं तथा पाण्डु कामलां च विनाशयेत् ॥
अग्निमान्द्यं च शमयेल्लोकनाथो रसोत्तमः ॥ ६० ॥

१–शुद्ध पारा, गन्धक और ताँबेकी भस्म ये सब समान भाग लेकर खरल कर लेवे। फिर इसमें पारेसे तिगुनी लोहेकी भस्म, ताम्रभस्म और कौडीकी भस्म एकत्र मिलाकर पानके रसमें खरल करके गजपुटमें रखकर फूँकदेवे । जब स्वाङ्गशीतल होजाय तब निकालकर पीसलेवे । इसको प्रतिदिन दो रत्ती प्रमाण खाय और ऊपरसे पीपलका चूर्ण, मधुके साथ या पुराना गुड़ और हरडका चूर्ण अथवा काले जीरेका चूर्ण गुडके साथ मिलाकर सेवन करे । यह रस यकृत्, गुल्म, उदर, प्लीहा, सूजन, पुराना बुखार, पाण्डु, कामला, मन्दाग्नि आदि विकारोंको नष्ट करता है । यह लोकनाथनामवाला रस सर्वोत्तम है ॥ ५६–६० ॥

रसगन्धौ समौ कृत्वा मर्दयेदर्द्धयामकम् ।
रसतुल्यं मृतं चाभ्रं द्विगुणं लोहताम्रकम् ॥ ६१ ॥
ताम्रस्य द्विगुणं भस्म कपर्दकसमुद्भवम् ।
नागवल्लीरसैर्यामं मर्दयेदतिनिर्जने ॥ ६२ ॥
ततो लघुपुटं दत्त्वा सुशीतं ग्राहयेत्तथा ।
द्विगुञ्जमार्द्रकद्रावैः खदिरत्वग्रसं पिबेत् ॥ ६३ ॥
यकृत्प्लीहोदरं शोथमग्निमान्द्यादिकं जयेत् ।
लोकनाथो रसो नाम सर्वज्वरविनाशनः ॥ ६४ ॥

२–शुद्ध पारा और शुद्ध गन्धक दोनोंको समान भाग लेकर अर्द्ध प्रहरतक खरल करे । फिर इसमें पारेकी बराबर अभ्रकभस्म एवं लोहे और ताँबेकी भस्म पारेसे दुगुनी और ताँबेकी भस्मसे दुगुनी कौडीकी भस्म मिलाकर पानके रसमे एक प्रहरतक खरल करके लघुपुटमें पकावे । जब स्वयं शीतल हो जाय तब निकालकर चूर्ण करलेवे । इस चूर्णको दो रत्ती भर लेकर अदरखके रसमें मिलाकर खावे और पीछेसे खैरके रसको पीवे तो यकृत् विकार,

प्लीहोदर, शोथ, मन्दाग्नि और सर्व प्रकारके ज्वर नाश होते हैं। इसका नाम लोकनाथ रस है ॥ ६१–६४ ॥

बृहल्लोकनाथरस ।

शुद्धसूतं द्विधा गन्धं खल्वे कुर्याच्च कज्जलम् ।
सूततुल्यं जारिताभ्रं मर्दयेत्कन्यकाम्बुना ॥ ६५ ॥
ततो द्विगुणितं दद्यात्ताम्रं लौहं प्रयत्नतः ।
सूताभ्रवगुणं देयं वराटीसम्भवं रजः ॥ ६६ ॥
काकमाचीरसेनैव सर्वं तद्गोलकीकृतम् ।
ततो गजपुटे पाच्यं स्वाङ्गशीतं समुद्धरेत् ॥ ६७ ॥

शुद्ध पारा १ तोला और शुद्ध गन्धक २ तोले दोनोंको एकत्रकर कज्जली बनावे। फिर उसमें अभ्रकभस्म १ तोला मिलाकर घीग्वारके रससे खरल करे। तदनन्तर ताँबे और लोहेकी भस्म दो दो तोले एवं कौडीकी भस्म ९ तोले मिलावे। सर्वोको मकोयके रसमें उत्तम प्रकार खरल करके गोला बनालेवे। पुनः इस गोलेको गजपुटमें स्थापन कर पकावे। जब पककर स्वाङ्गशीतल होजावे तब निकालकर बारीक चूर्ण करलेवे ॥ ६५–६७ ॥

शिवं सम्पूज्य यत्नेन द्विजातीन्परितोष्य च ।
भक्षयेदस्य चूर्णस्य द्विगुञ्जं मधुना सह ॥ ६८ ॥
प्लीहानमुग्रमामं च यकृतं सर्वरूपिणम् ।
जीर्णज्वरं तथा गुल्मं कामलां हन्ति दारुणाम् ॥ ६९ ॥

इसके उपरान्त प्रतिदिन प्रातःकाल शिवजी महाराजका पूजन कर और ब्राह्मणोंको दान मानादिसे प्रसन्नकर इस चूर्णको दो रत्तीप्रमाण शहदमें मिलाकर सेवन करे तो यह बृहल्लोकनाथरस प्लीहा, अत्युग्र आमवात, सर्वप्रकारके यकृद्रोग, जीर्णज्वर, गुल्म और दारुण कामलादि रोगोंको दूर करता है ॥ ६९ ॥

प्लीहारिरस ।

पारदं गन्धकं टङ्कं विषं व्योषं फलत्रयम् ।
तोलकस्य समोपेतं जैपालं च तदर्द्धकम् ॥ ७० ॥
किंशुकस्य रसेनैव माषमात्रं तु मर्दयेत् ।
गुञ्जामात्रां वटीं कृत्वा छायायां शोषयेत्ततः ॥ ७१ ॥

शुद्ध पारा, शुद्ध गन्धक, सुहागा, शुद्ध मीठातेलिया, सोंठ, मिरच, पीपल, हरड, बहेडा और आमला ये प्रत्येक औषधि एक एक तोला एवं शुद्ध जमालगोटा सबसे आधा भाग लेवे । फिर सबको एकत्र पीसकर ढाकके रसमें एकमासपर्य्यन्त खरल करे और एक एक रत्तीकी गोलियाँ बनाकर छायामें सुखालेवे ॥

वटिकैका प्रदातव्या शृङ्गवेररसेन च ।
गुदांकुरे गुल्मशूले प्लीहशोथे कफात्मके ॥ ७२ ॥
उदावर्त्ते वातशूले श्वासकासज्वरेषु च ।
रसः प्लीहारिनामाऽयं कोष्ठामयविनाशनः ॥
आमवातगदच्छेदी श्लेष्मामयविनाशनः ॥ ७३ ॥

इस रसकी प्रतिदिन एक २ गोली अदरखके रसके साथ सेवन करनेसे गुदांकुर, गुल्मशूल, प्लीहा, शोथ, कफजन्य उदावर्त्त, वातशूल, श्वास, खाँसी और ज्वरादि रोगोंमें शीघ्र आरोग्यता प्राप्त होती है । यह प्लीहारिनामकरस कोष्ठस्थित विकार, आमवात और कफोत्पन्न समस्त रोगोंको नष्ट करता है ॥ ७२ ॥ ७३ ॥

लौहमृत्युञ्जयरस ।

रसगन्धकलौहाभ्रं कुनटी मृतताम्रकम् ।
विषमुष्टिवराटं च तुत्थं शङ्खो रसाञ्जनम् ॥ ७४ ॥
जातीफलं च कटुकी द्विक्षारं कानकं तथा ।
हिङ्गु व्योषं सैन्धवं च प्रत्येकं सूततुल्यकम् ॥ ७५ ॥
श्लक्ष्णचूर्णीकृतं सर्वमेकत्र भावयेत्ततः ।
सूर्यावर्त्तरसेनैव बिल्वपत्ररसेन च ॥ ७६ ॥
सूर्यावर्त्तेन मतिमान् वटिकां कारयेत्ततः ।
प्लीहानं यकृतं गुल्ममष्ठीलां च विनाशयेत् ॥ ७७ ॥
अग्रमांसं तथा शोथं तथा सर्वोदराणि च ।
वातरक्तं च जठरमन्तर्विद्रधिमेव च ॥ ७८ ॥

शुद्ध पारा, गन्धक, लोहा, अभ्रक, मैनसिल, ताँबेकी भस्म, कुचला, कौडीकी भस्म, नीलाथोथा, शंखभस्म, रसौंत, जायफल, कुटकी, जवाखार, सज्जी, जमालगोटा, त्रिकुटा, हींग और सेंधानमक ये प्रत्येक एकएक तोला लेकर एकत्र कूट पीसलेवे । पश्चात् इस चूर्णको हुलहुल और बेलके पत्तोंके रसमें भावना देवे । फिर हुलहुलके रसद्वारा यथाविधि खरल करके दो दो रत्तीकी गोलियाँ

तैयार करलेवे । यह रस यथाविधि सेवन करनेपर प्लीहा, यकृत्, गुल्म, अष्ठील, अग्रमांस, सूजन, सर्व प्रकारके उदरसम्बन्धी रोग, वातरक्त, जठराग्नि और अन्तर्विद्रधि रोगको दूर करता है ॥ ७५-७८ ॥

रोहीतकलोह ।

रोहीतकसमायुक्तं त्रिकत्रययुतं त्वयः ।
प्लीहानमग्रमांसं च शोथं हन्ति न संशयः ॥ ७९ ॥

रोहेडेकी छाल, सोंठ, मिरच, पीपल, हरड, बहेडा, आमला, वायविडङ्ग, नागरमोथा और चीतेकी जड इन सबको समान भाग और सबको बराबर लोहभस्म मिलाकर शहदके साथ लोहेके पात्रमें खरल कर लेवे । यह लोह प्लीहा (तिल्ली), अग्रमांस तथा सूजनको सन्देहरहित नष्ट करता है ॥ ७९ ॥

चित्रकादिलोह ।

चित्रकं नागरं वासा गुडूची शालपर्णिका ।
तालपुष्पमपामार्गो मानकं कार्षिकत्रयम् ॥ ८० ॥
लौहमभ्रं कणा ताम्रं क्षारको लवणानि च ।
पृथक् कर्षांशमेतेषां चूर्णमेकत्र चिक्कणम् ॥ ८१ ॥
चतुःप्रस्थे गवां मूत्रे पचेन्मन्देन वह्निना ।
सिद्धशीतं समुद्धृत्य माक्षिकं द्विपलं क्षिपेत् ॥ ८२ ॥
चित्रकादिरयं लौहो गुल्मप्लीहोदरामयम् ।
यकृतं ग्रहणीं हन्ति शोथं मन्दानलं ज्वरम् ॥
कामलां पाण्डुरोगं च गुदभ्रंशं प्रवाहिकाम् ॥ ८३ ॥

चीतेकी जड, सोंठ, अडूसा, गिलोय, शालपर्णी, ताडके फूल, चिरचिटा और मानकन्द ये प्रत्येक तीन तीन कर्ष, लोहा, अभ्रकभस्म, पीपल, ताम्रभस्म, जवाखार और पाँचोंनमक इनको पृथक् पृथक् एकएक कर्ष लेकर बारीक चूर्ण करलेवे । इस चूर्णको चार प्रस्थ (२५६ तोले) गोमूत्रमें मन्द मन्द अग्निद्वारा पकावे । जब अच्छे प्रकार पककर सिद्ध होजाय तब उतारले और शीतल होजानेपर उसमें ८ तोले उत्तम शहद मिलादेवे । इसका नाम चित्रकादि लोह है । यह गुल्म, प्लीहा, उदरविकार, यकृत्, संग्रहणी, सूजन, अग्निकी मन्दता, ज्वर, कामला, पाण्डुरोग, गुदभ्रंश, प्रवाहिका इत्यादि व्याधियोंको नाशता है ॥

यकृत्प्लीहारिलौह।

हिङ्गुलसम्भवं सूतं गन्धकं लौहमभ्रकम्।
तुल्यं द्विगुणताम्रं तु शिला च रजनी तथा ॥ ८४ ॥
जयपालं टङ्कणं च शिलाजतु समं रसात्।
एतत्सर्वं समाहृत्य चूर्णीकृत्य विमिश्रयेत् ॥ ८५ ॥
दन्ती त्रिवृच्चित्रकं च निर्गुण्डी त्र्यूषणं तथा।
आर्द्रकं भृङ्गराजश्च रसैरेषां पृथक् पृथक् ॥
भावयित्वा वटीं कुर्याद्बदरास्थिमितां भिषक् ॥ ८६ ॥

सिंगरफसे निकलाहुआ पारा, शुद्ध गन्धक, लौहा, अभ्रक ये प्रत्येक एक एक तोला, ताँबा, मैनसिल और हल्दी ये प्रत्येक दो दो तोले, शुद्ध जमालगोटा, सुहागा और शिलाजीत ये प्रत्येक एक एक तोला लेवे। इन सबोंको एकत्रितकर बारीक चूर्ण करलेवे। अनन्तर इस चूर्णको दन्ती, निसोत, चीता, निर्गुण्डी, त्रिकुटा, अदरख और भाङ्गरा इनके रसमें अलग अलग भावना देकर बेरकी गुठलीकी समान गोलियाँ बनालेवे ॥ ८४–८६ ॥

प्लीहानं यकृतं चैव चिरकालानुबन्धिनम्।
एकजं द्वन्द्वजं चैव सर्वदोषभवं तथा ॥ ८७ ॥
हन्यादष्टोदरानाहज्वरं पाण्डुं च कामलाम्।
शोथं हलीमकं हन्ति मन्दाग्नित्वमरोचकम् ॥ ८८ ॥
यकृत्प्लीहारिनामेदं लौहं जगति दुर्लभम् ॥ ८९ ॥

इसकी प्रतिदिन १–१ गोली सेवन करे तो यह प्लीहा, यकृतरोग, बहुत पुरानी प्लीहा, एकदोषजन्य, द्विदोषजन्य या त्रिदोषोत्पन्न आठों प्रकारके उदररोग, अफारा, ज्वर, पाण्डु, कमलवाय, हलीमक, सूजन, मन्दाग्नि, अरुचि आदि रोगोंका विनाश करती है। यह यकृत्प्लीहारिनामक लौह संसारमें दुर्लभ है ॥ ८७–८९ ॥

यकृदारिलौह।

द्विकर्षं लौहचूर्णस्य गगनस्य पलार्द्धकम्।
कर्षं शुद्धं मृतं ताम्रं लिम्पाकाग्नित्वचः फलम् ॥ ९० ॥
मृगाजिनभस्मपलं सर्वमेकत्र कारयेत्।
नवगुञ्जाप्रमाणेन वटिकां कारयेद्भिषक् ॥ ९१ ॥

लोहभस्म दो कर्ष, अभ्रकभस्म दो तोले, ताँबेकी भस्म एक कर्ष, विहारी नींबूकी जडकी छाल ४ तोले और मृगछालाकी भस्म ४ तोले इन सबको एकत्र जलमें खरल करके नौ नौ रत्तीकी गोलियाँ बनालेवे ॥ ९० ॥ ९१ ॥

यकृत्प्लीहोदरं चैव कामलां च हलीमकम्।
कासं श्वासं ज्वरं हन्ति बलवर्णाग्निवर्द्धनम् ॥
यकृदरिनाम लौहं सर्वव्याधिनिषूदनम् ॥ ९२ ॥

यह यकृदरिनामक लौह यकृत, प्लीहा और उदरके रोग, एवं कामला, हलीमक, खाँसी, श्वास, ज्वर तथा अन्य सर्वप्रकारकी दुस्तर व्याधियोंको नष्ट करनेवाला और बल, वर्ण एवं जठराग्निको बढानेवाला है ॥ ९२ ॥

महामृत्युंजयलौह।

शुद्धं सूतं समं गन्धं जारिताभ्रं समं तथा।
गन्धस्य द्विगुणं लौहं मृतताम्रं चतुर्गुणम् ॥ ९३ ॥
द्विक्षारं सैन्धवविडं वराटीशंखभस्मकम्।
चित्रकं कुनटी तालं रामठं कटुकं तथा ॥ ९४ ॥
रोहीतं त्रिवृता चिश्चा विशाली धवलाङ्कठः।
अपामार्गं तालरण्डमल्लिका च निशाद्वयम् ॥ ९५ ॥
प्रियंगिवन्द्रयवं पथ्या चाजमोदा यमानिका।
तुत्थकं शरपुङ्खा च यकृन्मर्दो रसाञ्जनम् ॥ ९६ ॥
प्रत्येकं शाणमानेन भावयेदार्द्रके रसैः।
गुडूच्याः स्वरसेनापि मधुनः कुडवार्द्धकम् ॥ ९७ ॥
वटिकां कारयेद्वैद्यो गुञ्जाष्टप्रमितां पुनः ॥ ९८ ॥

शुद्ध पारा, शुद्ध गन्धक और अभ्रकभस्म ये प्रत्येक औषधि एकएक भाग, लोहभस्म दो भाग, ताम्रभस्म ४ भाग एवं जवाखार, सज्जी, सेंधानमक, विडनमक कौडीकी भस्म, शंखकी भस्म, चीता, मैनसिल, हरिताल, हींग, कुटकी, रोहिडावृक्षकी छाल, निसोत, इमलीकी भस्म, इन्द्रायनकी जड, सफेद ढेरा वृक्षकी छाल, चिरचिटेका खार, ताडकी जडका खार, अमलबेत, हलदी, दारुहलदी, फूलप्रियंगु, इन्द्रजौ, हरड, अजमोद, अजवायन, तूतिया, शरफोंका, रोहेडेकी छाल और रसौंत ये प्रत्येक चार चार माशे लेवे। फिर सबको एकत्र चूर्ण करके अदरख और गिलो-

यके रसमें उत्तम प्रकार खरल करे। तदनन्तर ८ तोले शहदमें खरल कर आठ आठ रत्तीकी गोलियाँ बनालेवे ॥ ९३-९८ ॥

भक्षयेत्प्रातरुत्थाय सर्वरोगकुलान्तकम्।
अनुपानं प्रदातव्यं बुद्ध्वा दोषानुसारतः ॥
प्लीहानं ज्वरमुग्रं च कासं च विषमज्वरम् ॥ ९९ ॥
आमवातं यकृच्छूलं श्वासमर्शः शिरोरुजम्।
गुल्मशोथोदरानाहमग्रमांसं यकृत्क्षयम् ॥ १०० ॥
सकामलं पाण्डुरोगमुदरं च सुदारुणम्।
रोगानीकविनाशाय केसरी करिणो यथा ॥ १०१ ॥
मृत्युञ्जयो महालोहः प्लीहगुल्मविनाशनः।
प्राणिनां तु हितार्थाय शम्भुना परिकीर्त्तितः ॥ १०२ ॥

प्रतिदिन प्रातःकाल इसमेंसे एक गोला खाय और पीछेसे दोषोंके बलाबलको विचारकर अनुपान सेवन करे। यह सम्पूर्ण रोगोंके समूहको नष्ट करता है एवं प्लीहा, अत्युग्र ज्वर, खाँसी, विषमज्वर, आमवात, यकृत्का शूल, श्वास, बवासीर, शिरःपीडा, गुल्म, शोथ, दारुण उदररोग, अफ़ारा, हृदयरोग, यकृत्, क्षय, कामला, पाण्डु और नानाप्रकारके उत्कट रोगसमूहरूपी हस्तीको नाश करनेके लिये मृगेन्द्रकी समान है। यह महालोह प्लीहा तथा मृत्युको जीतनेवाला और गुल्मको शीघ्र नष्ट करनेवाला है। समस्त प्राणियोंके सुखके लिये शिवजी महाराजने इस योगको कथन किया है ॥ ९९-१०२ ॥

सर्वेश्वरलौह।

शुद्धसूतं पलं गन्धं द्विपलं तु मृताभ्रकम्।
त्रिपलं मृतताम्रं च पलार्द्धं स्वर्णमाक्षिकम् ॥ १०३ ॥
जैपालं चित्रकं मानं शूरणं घण्टकर्णकम्।
ग्रन्थिकं त्रिफला व्योषं त्रिवृता खरमञ्जरी ॥ १०४ ॥
दण्डोत्पला वृश्चिकाली कुलिशं नागदन्तिका।
सूर्यावर्त्तं च सञ्चूर्ण्य कर्षमात्रं विमर्दयेत् ॥ १०५ ॥
आर्द्रकस्य रसेनैव चूर्णयित्वा पुनः क्षिपेत्।
त्रिपलं लौहचूर्णस्य ततः खादेच्छुभेऽहनि ॥ १०६ ॥

सम्पूज्य भास्करं विष्णुं गणनाथं द्विजोत्तमम् ।
माषमात्रं च मधुना कृत्वा शीतजलं पिबेत् ॥ १०७ ॥

शुद्ध पारा, शुद्ध गन्धक और अभ्रकभस्म प्रत्येक चार चार तोले, ताम्रभस्म १२ तोले, सोनामाखी २ तोले एवं जमालगोटा, चीता, मानकन्द, जिमीकन्द, घंटाकर्णक (क्षुद्रक्षुपविशेष), पीपलामूल, त्रिफला, त्रिकुटा, निसोत, चिरचिटा, श्वेतदण्डोत्पल, बिछुटीवृक्षकी जड, हडसंकरी, हाथीसुँडा और हुलहुल ये प्रत्येक दो दो तोले लेकर एकत्र चूर्ण करलेवे । प्रथम इस चूर्णको अदरखके रसमें अच्छे प्रकार खरल करले पश्चात् इसमें १२ तोले लोहेकी भस्म डालकर फिर खरल करे । तदनन्तर प्रतिदिन प्रातःकाल पवित्र होकर गणेश, सूर्य और विष्णुभगवान्को पूजकर तथा ब्राह्मणों को प्रसन्नकर इस लोहकी एक मासाप्रमाण मात्राको शहदमें मिलाकर सेवन करे और ऊपरसे शीतल जल पान करे ॥ १०२-१०७ ॥

चूर्णं सर्वेश्वरं नाम सर्वरोगहरं पिबेत् ।
कठोरप्लीहनाशाय गुल्मोदरहरं तथा ॥ १०८ ॥
कामलां पाण्डुमानाहं यकृत्कृमिकृतामयान् ।
विचर्चीमम्लपित्तं च कण्डूं कुष्ठं विनाशयेत् ॥ १०९ ॥
प्लीहानमस्रपित्तं चाप्यग्निमान्द्यं सुदुस्तरम् ।
श्रीकरं कान्तिजननं शुक्रायुर्बलवर्द्धनम् ११० ॥

यह सर्वेश्वरनामक लोह सर्वप्रकारके रोग, कठिनतर तिल्ली, गुल्म, उदरविकार, कामला, पाण्डु, आनाह, यकृत, कृमिरोग, विचर्चिका, अम्लपित्त, खुजली, कुष्ठ, प्लीहा, रक्तपित्त और दुस्तर मन्दाग्नि आदि व्याधियोंको नष्ट करनेवाला तथा शोभावर्द्धक, कान्त्युत्पादक, बल, वीर्य और आयुकी उन्नति करनेवाला है ॥१०८-११०॥

यकृत्प्लीहोदरहरलौह ।

लौहार्द्धमभ्रकं शुद्धं सूतमप्यर्द्धभागिकम् ।
त्रिगुणामयसश्चूर्णात् त्रिफलामभ्रकात्तथा ॥ ११ ॥
द्विरष्टं वारिणो भागमवशिष्टं तु कारयेत् ।
तेन चाष्टावशिष्टेन समेनाज्येन यत्नतः ॥ १२ ॥

रसेन बहुपुत्रायाः द्विगुणक्षीरसंयुतम् ।
लौहमय्या पचेद् दर्व्या पात्रे चायसि मृन्मये ॥ १३ ॥
अभ्रकं निहितं शुद्धं पारदं च सुमूर्च्छितम् ।
अयसोऽर्द्धमितं चूर्णमादौ पाके विनिक्षिपेत् ॥ १४ ॥

लोहा एक तोला, अभ्रकभस्म आधा तोला, शुद्ध रससिन्दूर अभ्रकसे आधा भाग और लोहेके चुर्ण तथा अभ्रकसे तिगुना त्रिफला लेवे। इन सबको एकत्र कर १६ गुने जलमें पकावे। पकते पकते जब अष्टम भाग रहजाय तब उतारकर छान लेवे। फिर इस क्वाथके साथ समान भाग गौका घी, शतावरका रस घीके बराबर और रससे दुगुना दूध मिलाकर विधिपूर्वक लोहेके या मिट्टीके पात्रमें करके मन्दमन्द अग्निसे पाक करे और लोहेकी करछीसे चलाता जाय ॥

कन्दं कपालिका चव्यं विडङ्गं सवृहद्दलम् ।
शरपुङ्खा च पाठा च चित्रकं समहौषधम् ॥ १५ ॥
लवणानि च सर्वाणि सक्षारं वृद्धदारकम् ।
दीप्यकं च तथा स्नूहीं लौहाभ्रकसमां क्षिपेत् ॥ १६ ॥

फिर इसमें जिमीकन्द, कपालिका (कन्दविशेष), चव्य, वायविडङ्ग, लोध, शरफोंका, पाढ, चीता, सोंठ, पाँचों नमक, जवाखार, विधारा, अजवायन और थूहर की जड इन सब औषधियोंको अलग अलग लोहे और अभ्रककी बराबर लेकर एकत्र मर्दन करके उपर्युक्त पाकमें डालकर उत्तम प्रकारसे पाक करे ॥ १५॥१६ ॥

प्लीहोदरयकृद्गुल्मान् हन्ति शस्त्राग्निभिर्विना ।
प्रयोज्योऽयं महावीर्यो लौहो लौहविदां वरैः ॥
प्लीहोदरविनाशाय दद्याद् द्वे द्वे पुटे पृथक् ॥ १७ ॥

इस प्रकार सिद्ध किया हुआ यह यकृत्प्लीहोदरहरनामक लोह सर्व प्रकारकी प्लीहा, उदररोग, यकृत्रोग और गुल्मादिरोगोंको विना शस्त्र व अग्निके नष्ट करता है। यह प्रयोग अत्यन्त वीर्यवान् और सर्व लोहोंमें उत्तम लोह है। इसमें औषधि सिद्ध होनेपर दो बार पुटपाक करलेवे तो प्लीहा और उदरविकार अवश्य शमन होते हैं ॥ १७ ॥

शङ्खद्रावरस ।

योगिनीभैरवाभ्यां च बलिमादौ प्रदापयेत् ।
पश्चाद्यन्त्रं प्रकर्त्तव्यमाहैवं परमेश्वरी ॥ १८ ॥

रसः शङ्खद्रवो नाम शम्भुदेवेन भाषितः ।
गुह्याद् गुह्यतमं गुह्यमिदानीं कथ्यते मया ॥ १९ ॥

इसको बनानेसे प्रथम योगिनी और भैरवोंको बलिदान देवे पश्चात् यन्त्र बनावें, ऐसा महाराणी पार्वतीने कहा है । यह शंखद्रावरस शिवजी महाराजका प्रकट किया हुआ है । यह रस गोप्य वस्तुओंमें भी अत्यन्त गोप्य है, अतः इसको गुप्त रखना चाहिये । अब मैं इस गुप्त रसका वर्णन करता हूँ ॥ १८ ॥ १९ ॥

शङ्खचूर्णं यवक्षारं सर्जिकाक्षारटङ्कणम् ।
समं च पञ्चलवणं स्फटिकारिर्निशादलः ॥ १२० ॥
काचकुप्यां ततः क्षिप्त्वा वारुणीयन्त्रमुद्धरेत् ।
यामार्द्ध द्रावयत्येव शङ्खशुक्तिवराटिकाः ॥ २१ ॥
अर्शांसि नाशयेत्षट् च मूत्रकृच्छ्राश्मरीस्तथा ।
उदराष्टविधं हन्ति गुल्मप्लीहोदराणि च ॥ २२ ॥
अजीर्णं नाशयेच्छीघ्रं ग्रहणीं च विषूचिकाम् ।
भुक्तशेषे च भोक्तव्यो माषमात्रो रसोत्तमः ॥ २३ ॥
क्षणमात्राद्भवेद्भस्म पुनर्भोजनमिच्छति ।
प्रत्यहं भोजनान्ते च संसेव्योऽयं रसोत्तमः ॥ २४ ॥
न रुजायां भयं क्वापि सत्यं सत्यं वदाम्यहम् ।
न देयं यस्य कस्यापि सदा गोप्यं च कारयेत ॥
रसः शङ्खद्रवो नाम वैद्यानामुपकारकः ॥ २५ ॥

शंखका चूर्ण, जवाखार, सज्जी, सुहागा, पाँचों नमक, फटकरी और नौसादर इन सबोंको समान भाग लेवे । फिर एकत्र कूट पीसकर इस चूर्णको काँचकी शीशीमें भरकर वारुणीयन्त्रमें द्रवीभूत करे । यह-शंख, सीपी और कौडीको आधे प्रहरमें ही गलादेता है । इसको भोजनके पश्चात् एक मासा प्रमाण सेवन करे तो तत्क्षण भोजन भस्म होजाता है और फिर भोजन करनेकी इच्छा उत्पन्न होती है । इससे छः प्रकारके अर्श, मूत्रकृच्छ्र, पथरी, ८ प्रकारके उदररोग, गुल्म, प्लीहोदर अजीर्ण, संग्रहणी और विषूचिका आदि रोग बहुत जल्द नष्ट होते हैं । इस उत्तम रसायणको प्रतिदिन प्रातःकाल और भोजनके पश्चात् सेवन करे । इसको सेवन करनेवाले मनुष्यको फिर कभी रोग आक्रमण नहीं करते, मैं बिलकुल सत्य

कहता हूँ। इस लिये यह रस हर किसीको नहीं देवे, सदैव गुप्त रखे। शंखद्राव-नामवाला यह रस वैद्योंको अत्यन्त उपकारक है॥ १२०—२५॥

शंखद्रावक।

अर्कः स्नुही तथा चिञ्चा तिलारग्वधचित्रकम्।
अपामार्गभस्म समं वस्त्रपूतं जलं हरेत्॥ २६॥
मृद्वग्निना पचेत्तत्तु तावल्लवणतां गतम्।
लवणेन समौ ग्राह्यौ द्वौ क्षारौ टङ्कणं तथा॥ २७॥
समुद्रफेनं गोदन्तं कासीसं सोरका तथा।
द्विगुणं पञ्चलवणं मातुलुङ्गरसेन च॥ २८॥
काचकुप्यां तु सप्ताहं वासयेदम्लयोगतः।
शङ्खचूर्णपलं दत्त्वा वारुणीयन्त्रमुद्धरेत्॥ २९॥
सर्वधातून् हरेच्छीघ्रं वराटीशङ्खकादिकान्।
रोगानामुदरादीनां सद्यो नाशकरः परः॥ १३०॥

आक, थूहर और इमलीकी छाल, तिल, अमलतास, चीतेकी जड और चिरचिटा सबकी भस्मको समान भाग लेकर जलमें घोललेवे। फिर वस्त्रमें छानकर जलको ग्रहण करे। पश्चात् इस जलको मन्द मन्द अग्निद्वारा पकावे। जब पकते पकते खारीपन आजाय तब जवाखार, सज्जी, सुहागा, समुद्रफेन, गोदन्ती, हरिताल, कसीस और सोरा ये सब समान भाग और पञ्च लवण सबसे दुगुने लेकर एकत्र कूट पीसकर काँचकी शीशीमें भरदेवे और ऊपरसे बिजौरे नींबूका रस डालदेवे। इस प्रकार खट्टे रसको मिश्रित करके एक सप्ताहतक रखा रहनेदेवे। फिर उसमें ४ तोले शंखका चूर्ण डालकर वारुणीयन्त्रके द्वारा अर्क खींचे। यह रस धातुगत सर्वदोष तथा उदरादि रोगोंको तत्काल नष्ट करता है और यह द्राव, शंख अथवा कौडी, सीपी आदिको शीघ्र द्रवीभूत करता है॥ १२६-१३०॥

महाशंखद्रावक।

चिञ्चाऽश्वत्थः स्नुही ह्यर्कोऽपामार्गश्च हि पञ्चमः।
पृथग् भस्मजलं कृत्वा तूद्धृत्य लवणानि च॥ ३१॥
टङ्कणं च यवक्षारं सर्जं लवणपञ्चकम्।
रामठं तालकं चैव लवङ्गं नरसारकः॥ ३२॥

जातीफलं च गोदन्तं ताप्यं गन्धरसं तथा ।
विषं समुद्रफेनं च सोरका स्फटिकारिका ॥ २३ ॥
शंखचूर्णं शंखनाभिचूर्णं पाषाणसम्भवम् ।
मनःशिला च कासीसं समभागं च कारयेत् ॥ २४ ॥
भावयेद्वेतसरसैः काचकुप्यां क्षिपेत्ततः ।
अत्र द्रवं च तद्दत्त्वा चोष्णस्थाने च धारयेत् ॥
वस्त्रेणाच्छादयेत्तावद्यावत्स्यात्सप्तवासरम् ॥ २५ ॥

इमली, पीपलवृक्ष, थूहर, आक और चिरचिटा इन पाँचोंकी छालकी भस्मोंको समान भाग लेकर पानीमें अलग २ घोलकर छान लेवे। फिर इन क्षारजलोंको मन्द मन्द अग्निसे पकावे। पकते २ जब खारद्रव्य बाकी रहजाय तब उतारलेवे। पश्चात् यह खार एवं पाँचों नमक, सुहागा, जवाखार, सज्जी, हींग, हरिताल, लौंग, नौसादर, जायफल, गोदन्ती, हरिताल, सोनामाखी, बोल, शुद्ध मीठा तेलिया, समुद्रफेन, सोरा, फटकरी, शंखचूर्ण, शंखनाभिचूर्ण, पाषाणभेदका चूर्ण, मैनसिल और हीराकसीस इन सबको समान भाग लेकर एकत्र बारीक चूर्ण करलेवे और फिर समस्त चूर्णको अम्लवेतके रसमें भावना देकर कपरौटी कीहुई काँचकी शीशीमें भरकर उष्ण स्थानमें रखदेवे और उसके मुखको अच्छेप्रकार वस्त्रसे ढककर ७ दिन-तक रखा रहनेदेवे ॥ २१-२५ ॥

पश्चान्मन्दाग्निना देयं वारुणीयन्त्रमुद्धरेत् ॥ २६ ॥
काचकुप्यां जलं दत्त्वा रक्षयेद्यत्नतः सुधीः ।
गुञ्जैकं पर्णखण्डेन प्रत्यहं भक्षयेन्नरः ॥ २७ ॥
कासं श्वासं क्षयं प्लीहमजीर्णं ग्रहणीगदम् ।
रक्तपित्तं क्षतं गुल्ममर्शांसि च विनाशयेत् ॥ २८ ॥
अश्मरीं मूत्रकृच्छ्रं च शूलमष्टविधं तथा ।
आमवातं वातरक्तं खञ्जवातं धनुस्तथा ॥ २९ ॥
उदरामयमामं च स्थूलतां कृमिकोष्ठताम् ।
वातपित्तकफान्सर्वान्नाशयेन्नात्र संशयः ॥ ३० ॥
भुक्त्वा च कण्ठपर्यन्तं गुञ्जैकं च रसं लिहेत् ।
तत्क्षणात्कारयेद्भस्म तृणराशिमिवानलः ॥ ३१ ॥

तदनन्तर वारुणीयन्त्रमें स्थापन कर धीरे धीरे मन्द मन्द अग्निद्वारा पाक कर द्रवीभूत करे अर्थात् अर्क खींचे । जब शीतल होजाय तब उस जलको काँचकी शीशीमें भरकर यत्नपूर्वक रक्खे। फिर प्रतिदिन प्रातःकाल इसको रत्तीभर मात्राको पानमें लगाकर सेवन करे । यह—खाँसी, श्वास, क्षय, प्लीहा, अजीर्ण, संग्रहणी, रक्तपित्त, क्षत, गुल्म, बवासीर, अश्मरी, मूत्रकृच्छ्र, आठों प्रकारके शूल, आमवात, वातरक्त, खञ्जवात, धनुस्तम्भ, उदररोग, स्थूलता, कृमिरोग, कोष्ठबद्धता, वात पित्त और कफजन्य रोग तथा अन्यान्य सर्वप्रकारके रोगोंको संशयरहित तत्काल नाश करता है । कण्ठपर्यन्त भोजन करके रत्तीभर इस रसको चाटलेवे तो उसी क्षण किया हुआ भोजन इस प्रकार भस्म होजाता है, जिस प्रकार तृणोंके समूहको अग्निकण भस्म कर देता है ॥ ३६–४१ ॥

यामार्द्धे द्रावयेत्सर्वं शंखशुक्तिवराटकान् ।
पूर्वोक्तविधिना तत्र दद्यान्निशि चतुष्पथे ॥ ४२ ॥
योगिनीभैरवाभ्यां च बलिं माषतिलान्वितम् ।
महाशंखद्रवो नाम्ना शम्भुदेवेन भाषितः ॥ ४३ ॥
गुह्याद् गुह्यतमं गोप्यं पुत्रस्यापि न कथ्यते ।
लोकानां कौतुकात्कर्त्ता प्रकाश्यो राजसन्निधौ ॥ ४४ ॥

यह रस शंख, शुक्ति और कौडियोंको अर्द्धप्रहरमें ही गलादेता है । इसको सेवन करनेसे पहले पूर्वोक्त विधिके अनुसार अर्द्धरात्रिमें चौहारेपर योगिनी और भैरवोंके लिये उड़द और तिलोंकी बलि देवे । इस महाशंखद्रावनामक रसको श्रीशिवजीमहाराजने निर्म्मित किया है । यह गुप्तवस्तुसे भी अत्यन्त गुप्त है, इसको पुत्रसे भी नहीं कहना चाहिये । सांसारिक जीवोंको आश्चर्यचकित करनेके लिये केवल राजाओंके सामने प्रकाशित करे ॥ ४२–४४ ॥

महाद्रावक १–२ ।

यवक्षारस्य भागौ द्वौ स्फटिकारेस्त्रयो मताः ।
एकीकृत्य प्रपिष्यापि मूत्रैर्वत्सतरीभवैः ॥ ४५ ॥
शुष्कं कृत्वा क्षिपेत्पात्रे सैसके वस्त्रलेपिते ।
अन्यसीसकपात्रं तु द्विमुखं मेलयेद् बुधः ॥ ४६ ॥
वृद्धवैद्योपदेशेन पचेत्पात्रस्थमौषधम् ।
ततः सान्निध्यसंस्थाप्यं रसः पात्रान्तरं लभेत् ॥ ४७ ॥
ततो रसं विनिष्कृष्य स्थापयेत्स्निग्धभाजने ॥ ४८ ॥

१–जवाखार २ भाग और फटकरी ३ भाग इन दोनोंको एकत्र बछियाके मूत्रमें पीसकर धूपमें सुखालेवे । फिर इस कल्कको कपरौटी कियेहुए शीशेके वर्त्तनमें भरदेवे और ऊपरसे दूसरा शीशेका ढकना ढककर दोनोंके मुखको मिलाकर सन्धिस्थानोंको अच्छे प्रकार बन्द करदेवे । पश्चात् नीचेके सीसेमें एक छिद्र करदेवे, फिर एक गढा खोदकर उसमें एक स्वच्छ पात्रको रखदेवे । उस पात्रके ऊपर उक्त दोनों शीशेके पात्रोंको स्थापन करे और ऊपरसे आग जलादेवे । तदनन्तर जब अग्निके सन्तापसे सीसेके पात्रके द्रव्य पिघलकर नीचेके पात्रमें चले जायँ तब उस रसको निकालकर चिकने बासनमें भरकर रखदेवे ॥ ४५–४८ ॥

लवङ्गेन सह खादेदथवा मृतताम्रकैः ।
प्लीहादिस्थूलरोगेषु दापयेद्रक्तिकां भिषक् ॥
दूरीकरोति रोगं च महाद्रावकसंज्ञकः ॥ ४९ ॥
श्वित्रे च दद्रुरोगे च प्रलेपं द्रावकस्य च ।
वह्निवज्ज्वलनं तस्य दधि दत्त्वा प्रलेपयेत् ॥ १५० ॥

इस रसकी प्रतिदिन प्रातःकाल एक रत्ती मात्राको लौङ्गके चूर्ण अथवा ताँबेकी भस्मके साथ सेवन करे तो इससे प्लीहा, स्थूलतादि दारुण रोग अल्पकालमेंही द्रव अर्थात् गलकर नष्ट होजाते हैं । यह रस अत्यन्त कठिनतम रोगोंको द्रवीभूत करता है । इसलिये इसको महाद्रावक कहते हैं । यदि लेप करनेपर जलन मालूम हो तो पहले दही मललेवे बादमें इसको लगावे ॥ ४९ ॥ ५० ॥

वृषश्चित्रमपामार्गश्चिञ्चा कूष्माण्डनाडिका ।
स्नुही तालस्य पुष्पं च वर्षाभूर्वेतसं तथा ॥ ५१ ॥
एतेषां क्षारमाहृत्य लिम्पाकस्वरसेन च ।
क्षालयित्वा क्षारतोयं वस्त्रपूतं च कारयेत् ॥ ५२ ॥
चण्डातपेन संशोष्य ग्राह्यं तद्लवणोचितम् ।
एतस्य द्विपलं ग्राह्यं यवक्षारपलद्वयम् ॥ ५३ ॥
स्फटिकारिपलं चैव नवसारपलं तथा ।
पलार्द्धं सैन्धवं ग्राह्यं टङ्कणं तोलकद्वयम् ॥ ५४ ॥
कासीसं तोलकं चैव मुद्राशंखं च तोलकम् ।
दारुमोचं कर्षकं च तोलं सामुद्रफेनकम् ॥ ५५ ॥

सर्वमेकत्र सञ्चूर्ण्य बकयन्त्रेण साधयेत्।
महाद्रावकमेतद्धि योज्यं च रसजारणे ॥ ५६ ॥
हन्ति गुल्मादिकान्रोगान् यकृत्प्लीहोदराणि च ॥ ५७ ॥

२-अडूसा, चीतेकी जड, चिरचिटा, इमली, पेठेकी डण्डी, थूहर, ताडके फूल, पुनर्नवा और बेंत इन सबकी भस्मको बराबर २ भाग लेकर जम्बीरीनींबूके रसमें घोलकर कपडेमें छानकर क्षारयुक्त जलको ग्रहण करे। फिर इस जलको तीक्ष्ण धूपमें सुखाकर इसके ८ तोले खारको लेवे। एवं जवाखार ८ तोले, फटकरी ४ तोले, नौसादर ४ तोले, सैंधानमक २ तोले, सुहागेकी खीलें २ तोले, कसीस १ तोला, मुद्राशंख, (अरथा) १ तोला, दारुमोच विष १ कर्ष और समुद्रफेन १ तोला लेवे। सबको एकत्र चूर्ण करके बकयन्त्रद्वारा चुवाकर अर्क ग्रहण करे। इस महाद्रावकको रसादिके जारणमें प्रयोग करे। यह गुल्म, यकृत, प्लीहा और उदरप्रभृति सम्पूर्ण विकारोंको नष्ट करता है ॥ १५१-५७ ॥

शुद्धं कांचनमाक्षिकं मृदुतरं कांस्याभिधं तत्तथा
सिन्धूत्थं विमलं रसाञ्जनवरं फेनः स्रवन्तीपतेः।
क्षारौ सर्जिकसाम्भलौ सुविमलौ भागास्त्वमीषां समाः
सप्तानां सदृशं तु टङ्कणमिहास्यार्द्धो नृसारः सितः ॥५८॥
तत्तुल्या स्फटिकारिका त्रिसदृशः शुक्ला यवस्याग्रजः
कासीसन्त्रितयं यवाग्रजसमं सञ्चूर्ण्य सर्वं न्यसेत्।
पात्रे काचमये मृदम्बरवृते यन्त्रे बकाख्ये भिषक्
ज्वालेन क्रमवर्द्धितान्यवहितोऽमीषां रसं पातयेत् ॥ ५९ ॥

३-शुद्ध सोनामाखी, कांस्यमाखी, सैंधानमक, रसौंत, समुद्रफेन, सज्जी और साँभलखार इन सातोंको समान भाग और सबके बराबर भाग सुहागा एवं सुहागेसे आधा भाग नौसादर और इतनीही फिटकिरी लेवे। फिर शुभ्रवर्णका जवाखार पूर्वोक्त तीनों वस्तुओंके समान, तीनों कसीस जवाखारके चूर्णके समान भाग लेवे। फिर सबोंको एकत्र अच्छे प्रकार कूटपीसकर चूर्ण बनालेवे। इस चूर्णको कपडमिट्टी की हुई काँचकी शीशीमें भरकर बकयन्त्रमें स्थापन करके अग्निके सन्तापसे द्रावको निकाले अर्थात् उक्त औषधोंका अर्क खींचे ॥ ५८ ॥ ५९ ॥

यो द्राग्भस्म वराटिकां प्रकुरुते सोऽयं महाद्रावकः
को वक्तुं प्रभवेदमुष्य नितरां सम्यग्गुणान्भूतले।

एतद्वल्लचतुष्टयं सह गिलेच्छुण्ठ्या लवङ्गेन वा ।
तत्पश्चात्परिभावितं बहुगुणं ताम्बूलकं भक्षयेत् ॥ १६० ॥

यह महाद्रावक रस कौडियोंको बहुत शीघ्र भस्म करदेता है । संसारमें इसके संपूर्ण गुणोंका वर्णन करनेको कोई भी समर्थ नहीं है । इसकी ८ माशे परिमाण मात्राको सोंठके चूर्ण अथवा लौंगके चूर्णके साथ मिलाकर सेवन करे । पश्चात् सुगन्धित द्रव्योंसे सुवासित नागरपान भक्षण करे ॥ १६० ॥

प्रासङ्ग्यात्कथयामि तान्छृणु गुणानस्यैव कांश्चित्परान्
निःशेषं विनिहन्त्यसौ चिरभवान्यष्टोदराणि ध्रुवम् ।
गुल्मं पाण्डु हलीमकं सुकठिनामष्ठीलिकां कामलां
मन्दाग्निं विषमाग्नितां बहुविधान् शोथांश्च शूलानपि ॥ ६१ ॥
सर्वांर्शांसि भगन्दरान्कृमिगदान्पञ्चैव कासांस्तथा
हिक्काश्लीपदकोषवृद्धिमरुचिव्याधिं महादारुणम् ।
नव्यं वा चिरजं ज्वरं बहुविधं छर्दिं कृमीन्विंशतिं
यक्ष्माणं चिरजामवात पिडिकातीसारविस्फोटकम् ॥ ६२ ॥
उन्मादं स्वरभेदमर्बुदमपि स्वेदं च हृत्पाणिजं
जिह्वास्तम्भगलग्रहं चिरभवं ग्रीवारुजामुल्बणाम् ।
नासाकर्णशिरोऽक्षिवक्त्रजगदान्क्षुद्रामयांश्चापरान्
हन्यादेव चिरोत्थितान्बहुविधानन्यांश्च रोगानपि ॥ ६३ ॥

प्रसङ्गसे इसके कुछ थोडेसे श्रेष्ठ गुणोंको कहता हूं उनको सुनो—यह रस बहुत पुराने आठों प्रकारके उदररोग, गुल्म, पाण्डु, हलीमक, कठिनतम अष्ठीला, कामला, मन्दाग्नि, विषमाग्नि, सर्वप्रकारके शोथ, शूल, बवासीर, भगन्दर, कृमिरोग, खाँसी, हिचकी, प्लीहा, श्लीपद, अण्डकोषवृद्धि, अरुचि, नया अथवा पुराना सर्व प्रकारका ज्वर, वमन, राजयक्ष्मा, आमवात, पिडिका, विसर्प, विस्फोटक, उन्माद, स्वरक्षय, अर्बुद, हृदय और हाथोंसे उत्पन्नहुआ स्वेदरोग, जीभका जकडना, गलग्रह, दारुण ग्रीवापीडा, नाक, कान, शिर, नेत्र और मुखके रोग, अन्य क्षुद्ररोग एवं नानाप्रकारके नये और पुराने सम्पूर्ण उत्कट विकारोंको तत्काल नष्ट करदेता है ॥ ६१-६३ ॥

एकः स्यादपरो हि टङ्कणमुखैर्द्रव्यैः परैः सप्तकै-
रन्यस्तु स्फटिकारिटङ्कणयवक्षाराग्रकासीसकैः ।

जानीयाद् गुरुतो विभागमनयोर्यन्त्रादिकं चापरं
निर्दिष्टास्त्रय एव भेषजवराः स्वल्पो महान्मध्यमः ॥ ६४ ॥
स्फटिकाद्यादिकासीसान्तचतुर्द्रव्यैः स्वल्पः ।
स्वर्णमाक्षिकादिकासीसत्रितयान्तैर्महान् ।
टङ्कणादिकासीसान्तैः सप्तभिर्द्रव्यैर्मध्यमः ॥

सोनामाखीसे लेकर कसीसतक औषधियोंका द्रव निकालना उत्तम महाद्राव कहलाता है। एवं सुहागेसे लेकर कसीसतक औषधोंका द्रव निकालना मध्यम द्राव और फटकरीसे लेकर कसीसपर्यन्त चार औषधोंका द्रव निकालना अल्पद्राव कहा-जाता है ॥ १६०-१६४ ॥

चित्रकघृत।

चित्रकस्य तुलाक्वाथे घृतप्रस्थं विपाचयेत् ।
आरनालं तद्द्विगुणं दधिमण्डं चतुर्गुणम् ॥ ६५ ॥
पञ्चकोलकतालीशक्षारैर्लवणसंयुतैः ।
द्विजीरकनिशायुग्मैर्मरिचं तत्र दापयेत् ॥ ६६ ॥

सौ पल चीतेके क्वाथमें ६४ तोले घृतको पकावे। फिर काँजी १२८ तोले, दहीका तोड २५६ तोले एवं पीपल, पीपलामूल, चव्य, चीता, सोंठ, तालीशपत्र, जवाखार, सैन्धानमक, जीरा, कालाजीरा, हल्दी, दारुहल्दी और मिरच इनके चूर्णको समान भाग लेकर उसमें डालकर उत्तम प्रकार घृतको सिद्ध करे ॥ ६५ ॥ ६६ ॥

प्लीहगुल्मोदराध्मानपाण्डुरोगारुचिज्वरान् ।
वस्तिहृत्पार्श्वकट्यूरुशूलोदावर्तपीनसान् ॥ ६७ ॥
हन्यात्पीतं तदर्शोऽघ्नं शोथघ्नं वह्निदीपनम् ।
बलवर्णकरं चापि भस्मकं च नियच्छति ॥ ६८ ॥

यह घृत यथाविधि सेवन करनेसे तिल्ली, गुल्म, उदररोग, अफरा, पाण्डु, अरुचि, ज्वर, वस्ति, हृदय, पसली, कमर और जंघाका शूल, उदावर्त्त, पीनस, बवासीर, सूजन और भस्मकादि रोगोंको शीघ्र दूर करता है तथा अग्निको बढाता और बल-वर्णको उत्पन्न करता है ॥ ६७ ॥ ६८ ॥

पिप्पलीघृत।

पिप्पलीकल्कसंयुक्तं घृतं क्षीरं चतुर्गुणम् ।
पचेत्प्लीहाग्निसादादियकृद्रोगहरं परम् ॥ ६९ ॥

पीपलका कल्क एक सेर, घृत एक सेर और दूध ४ सेर इनको एकत्र मिलाकर घृतको सिद्ध करे। यह प्लीहा, मन्दाग्नि, यकृत्‌रोगको नाश करता है ॥ ६९ ॥

चित्रकपिप्पलीघृत।

पिप्पलीचित्रकान्मूलं पिष्ट्वा सम्यग्विपाचयेत्।
घृतं चतुर्गुणं क्षीरं यकृत्प्लीहोदरापहम् ॥ १७० ॥

पीपल और चीतेकी जड समान भाग मिश्रित इनका चूर्ण एक सेर, घृत एक सेर और दूध ४ सेर लेवे। फिर सबको एकत्रकर उत्तम प्रकार घृतको पकावे। यह घृत यकृत, प्लीहा और उदरविकारको दूर करता है ॥ १७० ॥

रोहितकघृत।

रोहीतकत्वचः श्रेष्ठाः पलानां पञ्चविंशतिः।
कोलद्विप्रस्थसंयुक्तं कषायमुपकल्पयेत् ॥ ७१ ॥
पलिकैः पञ्चकोलैश्च तैः सर्वैश्चापि तुल्यया।
रोहीतकत्वचा पिष्टैर्घृतप्रस्थं विपाचयेत् ॥ ७२ ॥
प्लीहाभिवृद्धिं शमयेदेतदाशु प्रयोजितम्।
तथा गुल्मज्वरश्वासकृमिपाण्डुत्वकामलाः ॥ ७३ ॥

रोहेडा वृक्षकी छाल २५ पल और बडीबेरकी छाल २ प्रस्थ (१२८ तोले) लेकर चौगुने जलमें पकावे। चतुर्भागावशिष्ट जल रहनेपर उतारकर छान लेवे। फिर इस काढेमें पीपल, पीपलामूल, चव्य, चीता और सोंठ इनमेंसे प्रत्येकका चूर्ण चार चार तोले, रोहेडेकी छालका चूर्ण २० तोले और घृत ६४ तोले डालकर पकावे। यह रोहीतकघृत बढीहुई तिल्ली, गुल्म, ज्वर, श्वास, कृमि, पाण्डु और कामलाप्रभृति व्याधियोंको तत्काल शमन करता है ॥ ७१-७३ ॥

महारोहीतकघृत।

रोहितकात्पलशतं क्षोदयेद्बदराढकम्।
साधयित्वा जलद्रोणे चतुर्भागावशेषितम् ॥ ७४ ॥
घृतप्रस्थं समावाप्य छागीक्षीरं चतुर्गुणम्।
तस्मिन्दद्यादिमान्कल्कान्सर्वांस्तानक्षसंमितान् ॥ ७५ ॥
व्योषं फलत्रिकं हिङ्गु यमानी तुम्बुरुर्विडम्।
अजाजी कृष्णलवणं दाडिमं देवदारु च ॥ ७६ ॥
पुनर्नवा विशाला च यवक्षारं तु पौष्करम्।

विडङ्गं चित्रकं चैव हवुषा चविका वचा ॥
एभिर्घृतं विपक्वं तु स्थापयेद्भाजने शुभे ॥ ७७ ॥
पाययेत्त्रिपलां मात्रां व्याधिं बलमवेक्ष्य च ।
रसकेनाथयूषेण पयसा वापि भोजयेत् ॥ ७८ ॥

रोहेडेकी छाल १०० पल, बडीबेरीकी छाल ४ सेर इन दोनोंको कुचलकर ३२ सेर जलमें पकावे । जब चौथाई भाग जल शेष रहजाय तब उतारकर छानलेवे । फिर इसमें गोघृत ६४ तोले, बकरीका दूध २५६ तोले, कल्कके लिये त्रिकुटा, त्रिफला, हींग, अजवायन, धनियाँ, बिडनमक, कालाजीरा, कालानमक, अनार देवदारु, पुनर्नवा, इन्द्रायण, जवाखार, पोहकरमूल, वायविडङ्ग, चीता, हाऊवेर, चव्य और वच इन औषधियोंको दो दो तोले लेकर एकत्र चूर्ण करके डालदेवे फिर यथाविधि घृतको सिद्ध कर उत्तम पात्रमें भरकर रखदेवे । इस घृतको १२ तोले मात्राको सेवन करनेका ऋषियोंने निर्देश किया है, किन्तु वातादि दोषोंकी उल्बणता और रोगीके बलाबलको विचारकर इसकी उपयुक्त मात्राको सेवन करावे और रसवाले यूष अथवा दूधके साथ भोजन करावे ॥ ७४-७८ ॥

उपयुक्ते घृते ह्यस्मिन् व्याधीन्हन्यादिमान्बहून् ।
यकृत्प्लीहोदरं चैव प्लीहशूलं यकृत्तथा ॥ ७९ ॥
कुक्षिशूलं च हृच्छूलं पार्श्वशूलमरोचकम् ॥
विबद्धशूलं शमयेत्पाण्डुरोगं सकामलम् ॥ १८० ॥
हृद्यतीसारशूलघ्नं तन्द्राज्वरविनाशनम् ।
महारोहितकं नाम प्लीहानं हन्ति दारुणम् ॥ ८१ ॥

नियमपूर्वक इसका सेवन करे तो यह महारोहीतक नामवाला घृत यकृद्विकार, प्लीहोदर, प्लीहाशूल, कुक्षिशूल, हृदयशूल, पार्श्वशूल, अरुचि, विबद्धशूल, पाण्डुरोग, कामला, हृदयरोग, अतीसार, शूल, तन्द्रा, ज्वर, विशेषकर दारुण प्लीहा और अन्यान्य सर्व प्रकारके रोगोंको शीघ्र नष्ट करता है ॥

रोहीतकारिष्ट ।

रोहीतकतुलामेकां चतुर्द्रोणे जले पचेत् ।
पादशेषे रसे पूते शीते पलशतद्वयम् ॥ ८२ ॥
दद्याद् गुडस्य धातक्याः पलषोडशिका मता ।
पञ्चकोलं त्रिजातं च त्रिफलां च विनिक्षिपेत् ॥ ८३ ॥

चूर्णयित्वा पलांशेन ततो भाण्डे निधापयेत् ।
मासादूर्ध्वं च पिबतां सर्वोदररुजां जयेत् ॥ ८४ ॥
प्लीहगुल्मोदराष्ठीलाग्रहण्यर्शांसि कामलाम् ।
कुष्ठशोथारुचिहरो रोहीतारिष्टसंज्ञकः ॥ १८५ ॥

रोहेडा वृक्षकी १०० पल छालको लेकर चार द्रोण (१२८ सेर) जलमें पकावे । पकते पकते जब चौथाई भाग अर्थात् ३२ सेर जल शेष रहजाय तब उतारकर छानलेवे । फिर शीतल होजानेपर इस क्वाथमें गुड २०० पल, धायके फूल १६ पल, एवं पीपल, पीपलामूल, चव्य, चीता, सोंठ, दारचीनी, इलायची, तेजपात, हरड, बहेडा और आमला इन सब औषधियोंको चार चार तोले लेकर बारीक चूर्ण करके डालदेवे । पुनः इन सब द्रव्योंको एक उत्तम एवं नवीन पात्रमें भरदेवे और उस पात्रका मुख बन्द करके गाड देवे । इसको एक महीनेके बाद निकालकर उचित मात्रासे सेवन करे तो यह अरिष्ट उदरकेसब रोग, तिल्ली, गुल्मोदर, अष्ठीला, संग्रहणी, बवासीर, कामला, कोढ, सूजन, और अरुचिप्रभृति रोगोंको दूर करता है । इसका नाम रोहीतका है ॥ उदररोगके समानही प्लीहा, यकृद्रोगका पथ्य वा अपथ्य जानना ॥ ८२-१८५ ॥

इति भैषज्यरत्नावल्यां प्लीह-यकृच्चिकित्सा ।

शोथकी चिकित्सा ।

लङ्घनं पाचनं शोथे शिरःकायविरेचनम् ।
वमनं च यथासन्नं यथादोषं प्रकल्पयेत ॥ १ ॥
स्नेहोऽथ वातिके शोथे बद्धविट्के निरूहणम् ।
पयो घृतं पैत्तिके तु कफजे रूक्षणः क्रमः ॥ २ ॥

शोथरोगमें प्रथम लंघन, पाचन, नस्य, विरेचन और वमनादि क्रियाओंका वात पित्तादि दोषोंका बलाबल विचारकर प्रयोग करे । जैसे वातोत्पन्न शोथमें स्निग्धक्रिया, मलबद्ध रोगमें निरूहणवस्ति, पित्तजन्य शोथमें दूध और घृतपान एवं कफजनित शोथरोगमें रूक्षकर्म प्रयोग करने चाहिये ॥ १ ॥ २ ॥

अथामजं लंघनपाचनक्रमैर्विशोधनैरुल्बणदोषमादितः ।
शिरोगतं शीर्षविरेचनैरधो विरेचनैरूर्द्ध्वहरैस्तथोर्द्ध्वकम् ॥
उपाचरेत्स्नेहभवं विरूक्षणैः प्रकल्पयेत्स्नेहविधिं च रूक्षिते ३

आमजनित शोथमें लंघन और पाचन क्रिया करे। किन्तु दोषोंकी अधिकता होनेपर संशोधकद्रव्य प्रयोग करे। शिरोगतशोथमें नस्य प्रदान करे, शरीरके अधोभागस्थित शोथमें विरेचन और ऊर्ध्वभागस्थित शोथमें वमनक्रिया करे। तेल और घृतादि स्नेहद्रव्योंके सेवन करनेसे उत्पन्नहुए शोथमें रूक्षक्रिया करे। एवं रूक्षक्रिया द्वारा उत्पन्न शोथमें स्निग्ध क्रिया प्रयोग करे॥ ३॥

दशमूलं सदा शस्तं वातशोथे विशेषतः।
वातजे तैलमेरण्डं विड्ग्रहे पयसा पिबेत्॥ ४॥

वातजशोथमें दशमूलका काढा पीवे। विशेषकर उक्त रोगमें मलबद्धता होनेपर अण्डीके तेलको दूधमें डालकर पीवे॥ ४॥

गोमूत्रस्य प्रयोगो वा शीघ्रं श्वयथुनाशनः।
यवागुर्मानकन्दस्य प्रायशश्चातिशोथजित्॥ ५॥

गोमूत्रको सूजनवाले स्थानपर मलनेसे अथवा पान करनेसे सूजन तत्काल दूर होती है एवं पुराने मानकन्दकी यवागू सेवन करनेसे अत्यन्त प्रवृद्ध सूजन दूर होती है॥ ५॥

बिल्वपत्ररसं पातुं सोषणं श्वयथौ त्रिजे।
विट्संगे चैव दुर्नाम्नि विदध्यात्कामलासु च॥ ६॥

बेलपत्रोंके रसमें मिरचोंका चूर्ण डालकर पान करे तो त्रिदोषजन्य सूजन, कोष्ठबद्धता, बवासीर और कामलारोग नष्ट होते हैं॥ ६॥

भूनिम्बविश्वकल्कं जग्ध्वा पेयः पुनर्नवाक्वाथः।
अपहरति नियतमाशु शोथं सर्वाङ्गिकं नृणाम्॥ ७॥

चिरायता और सोंठ इनके कल्कको भक्षण कर ऊपरसे पुनर्नवेका क्वाथ पान करे। इससे सर्वशरीरगत शोथ शीघ्र दूर होता है॥ ७॥

शोथनुत्कोकिलाक्षस्य भस्म मूत्रेण वाऽम्भसा।

तालमखानेकी भस्मको, कफजन्य शोथमें गोमूत्रके साथ एवं पैत्तिक शोथमें जलके साथ पान करनेसे शोथरोग नष्ट होता है॥

स्थलपद्ममयं कल्कं पयसाऽऽलोड्य पाययेत्।
प्लीहामयहरं चैव सर्वाङ्गैकाङ्गशोथजित्॥ ८॥

स्थलकमल अथवा पुराने मानकन्दके कल्कको दूधमें मिलाकर पान करानेसे प्लीहारोग, सर्वाङ्गगत शोथ और एकाङ्गगत शोथ दूर होता है॥ ८॥

सिंहास्यादि।

सिंहास्यामृतभण्टाकीकाथं कृत्वा समाक्षिकम्।
पीत्वा शोथं जयेज्जन्तुः श्वासं कासं ज्वरं वमिम्॥ ९॥

ततः पिबेद्यथार्हं तु जयेद्विद्रधिमुत्थितम् ।
ऊरुस्तम्भाश्मरीमेहान् प्रत्यष्ठीलाभगन्दरान् ॥
गण्डमालां हनुस्तम्भं विडङ्गारिष्टसंज्ञकः ॥ ५३ ॥

एक मासानन्तर इसको निकालकर प्रतिदिन उचित मात्रासे सेवन करे तो यह विडङ्गनामक अरिष्ट विद्रधि, ऊरुस्तम्भ, पथरी, प्रमेह, प्रत्यष्ठीला, भगन्दर, गण्डमाला व्रण और हनुस्तम्भादि विकारोंको शीघ्र दूर करता है ॥ ५३ ॥

व्रणरोगमें पथ्य।

यवषष्टिकगोधूमा जाङ्गला मृगपक्षिणः।
विलेपी लाजमण्डश्च कटुतैलं घृतं मधु ॥ ५४ ॥
तिलं मसूरतुवरीमुद्गयूषाश्च शर्करा।
आषाढफलवार्त्ताकुकर्कोटकपटोलकम् ॥ ५५ ॥
कारवेल्लं निम्बपत्रं वेत्राग्रं बालमूलकम्।
सुनिषण्णकशालिञ्चतण्डुलीयकवास्तुकम् ॥ ५६ ॥
त्रिफला पनसं मोचं दाडिमं कटुकीफलम्।
जीवन्ती सैन्धवं द्राक्षा स्वादुतिक्तकषायकः ॥ ५७ ॥
समस्तमेतदन्नं तु स्निग्धमुष्णं द्रवोत्तरम्।
एषणं शमनं दाहः स्वेदनं बन्धनक्रिया ॥ ५८ ॥
व्रणावचूर्णनं लेपो धूपनं पत्रधारणम्।
उशीरबालव्यजनं चन्दनं तिललेपनम् ॥ ५९ ॥
एतत्पथ्यं नरैः सेव्यं यथावस्थं यथामलम्।
व्रणशोथे व्रणे सद्योव्रणे नाडीव्रणेऽपि च ॥ ६० ॥

व्रणके शोथ, व्रण, सद्योव्रण और नाडीव्रणमें—जौ, साठीके चावल, गेहूं, जङ्गली पशुपक्षियोंका मांस, विलेपी, खीलोंका मांड, सरसोंका तेल, घी, शहद, तिल, मसूर, अरहर और मूँगका यूष इनका आहार, खाँड, ढाकके बीज, बैंगन, ककोडे, परवल, करेला, नीमके पत्ते, बेंतकी कोपल, कच्चीमूली, शिरिआरीशाक, शालिञ्चशाक, चौलाईशाक, बथुआ, त्रिफला, कटहल, केलेका मोचा, अनार, कुटकी, जीवन्ती, सेंधानमक, दाख, मधुर, तीखे और कषैले रसवाले पदार्थ, स्निग्ध, गरम और पतले बने अन्न, एषण (लोहेकी सलाईसे नाडीगति देखना), शमनकारक औषधि, व्रणस्थानको अग्निसे दग्ध, स्वेदप्रदान, बन्धनक्रिया (व्रणपर वायु न लगे इस प्रकार बाँधना), व्रणपर ओषधियोंका चूर्ण, लेप, धूम और पत्तोंका लगाना, नवीन खसका बनाहुआ चँवर डुलाना, लाल चन्दन और तिलोंको पीसकर लेप करना ये सब हितकर पदार्थ अवस्था तथा दोषानुसार मनुष्योंको व्रणशोथ, व्रणरोग, सद्योव्रण और नाडीव्रणादि (नासूर) रोगोंमें सेवन करने चाहियें ॥ ५४–६० ॥

व्रणरोगमें अपथ्य।

नवानि धान्यानि तिलान्कलायान्माषान्कुलत्थान्कृशरान् हिमाम्भः। क्षीरेक्षुजातान्विविधान्विकारान्मद्यानि शाकानि च पत्रवन्ति ॥६१॥ अजाङ्गलं मांसमसात्म्यमन्नं विदाहि विष्टम्भि गुरूणि चापि। कट्वम्लशीतं लवणं व्यवायमायासमुच्चैः परिभाषणं च ॥ ६२ ॥ प्रियासमालोकनमह्नि निद्रां प्रजागरं चंक्रमणं नितान्तम्। सदास्थितिं प्रागधिरोपणं च नस्यानि ताम्बूलमजीर्णतां च ॥६३॥ प्रचण्डवातातपधूमवृष्टिरजोभयक्रोधवमिप्रहर्षान्। शोकं विरुद्धाशनमम्बुपानं तीक्ष्णोष्णरूक्षाणि विघट्टनं च ॥६४॥ कण्डूयनं काष्ठनखादितोदं निरन्नभावं विषमोपचारम्। वैद्यश्चिकित्सन्व्रणशोथरोगं व्रणं च सद्योव्रणमामयं च ॥ नाडीव्रणं चापि यशोऽभिलाषी विवर्जयेत्सन्ततमप्रमत्तः ॥६५॥

सब प्रकारके नये अन्न, तिल, मटर, उड़द, कुलथी, खिचड़ी, शीतल जल, भाँतिभाँतिके दूधके बने अथवा ईखके रसके बने पदार्थ, मदिरा, पत्तोंवाले शाक, जङ्गलभिन्न अन्यान्यदेशीय जीवोंका मांस, असात्म्य अन्न, दाहकारक, विष्टम्भकारक, गुरुपाकी; कडवे, खट्टे, शीतल और लवण (नमकीन, चरपरे) खाद्य पदार्थ, मैथुन, कसरत करना, जोरसे बोलना, सुन्दरी स्त्रियोंको देखना, दिनमें शयन, रात्रिमें जागरण और हरवक्त टहलना, फोडे फुन्सीको सर्वदा बैठालनेका प्रयत्न करना, व्रणको शुद्ध किये विना ही घावको भरनेवाली औषधि लगाना, नस्य लेना, पान खाना, अजीर्णकारक द्रव्योंका भक्षण, अत्यंत तीक्ष्ण वायु और तीव्रधूपका सेवन, धूम्रपान, वर्षाका जल, धूलि, भय, क्रोध, वमन, अत्यन्त हर्ष, शोक, अपने स्वभावके प्रतिकूल खान पान, तीखे, गरम, रूखे और पिसेहुए द्रव्योंका सेवन, लकडीसे अथवा नाखूनोंसे खुजलाना, लंघन और वैषम्य चिकित्सा करना इन सब अहितकर पदार्थों व क्रियाओंको व्रणशोथ, व्रणरोग, सद्योव्रण और नाडीव्रणादिरोगोंकी चिकित्सा करताहुआ यशको चाहनेवाला वैद्य तत्काल त्यागदेवे ॥ ६१-६५ ॥

इति भैषज्यरत्नावल्यां व्रणशोथचिकित्सा ॥

सद्योव्रणकी चिकित्सा ।

सद्यःक्षतव्रणं वैद्यः सशूलं परिषेचयेत् ।
यष्टीमधुकयुक्तेन किञ्चिदुष्णेन सर्पिषा ॥ १ ॥

सद्यःक्षत अर्थात् तत्कालके उत्पन्नहुए शूलसहित व्रणमें मुलहठीका चूर्ण मिलाकर मन्दोष्ण घृतसे सेचन करे ॥ १ ॥

अपामार्गस्य संसिक्तं पत्रोत्थेन रसेन तु ।
सद्योव्रणेषु रक्तं तु प्रवृत्तं परितिष्ठति ॥ २ ॥

सद्योव्रणमें चिरचिटेके पत्तोंका रस सिंचन करनेसे लोहू बहना बन्द होता है ॥ २ ॥

कर्पूरपूरितं बद्धं सघृतं संप्ररोहति ।
सद्यःशस्त्रक्षतं पुंसां व्यथापाकविवर्जितम् ॥ ३ ॥

तत्काल शस्त्रादिके लगनेसे उत्पन्नहुए व्रणमें सौवार धोयेहुए घृतके साथ कपूर मिलाकर भरदेवे और उसको बाँधदेवे तो इससे विशेष पीडा नहीं होती और घाव पकता नहीं है ॥ ३ ॥

शुनो जिह्वाकृतश्चूर्णः सद्यःक्षतविरोहणः ॥ ४ ॥

कुत्तेकी जीभको सुखाकर चूर्ण बनालेवे, उस चूर्णको भरनेसे सद्योव्रण भर जाता है ॥ ४ ॥

इतिसाप्ताहिकं कार्यः सद्योव्रणहितो विधिः ।
साप्ताहात्परतः कुर्याच्छारीरव्रणवत्क्रियाः ॥ ५ ॥

तत्कालजनित घावमें जो चिकित्साविधि कही गई है वे सब एक सप्ताहपर्यन्त करे । तदनन्तर शारीरिकव्रणकी समान चिकित्सा करनी चाहिये ॥ ५ ॥

अग्निदग्धव्रणकी चिकित्सा ।

पित्तविद्रधिवीसर्पशमनं लेपनादिकम् ।
अग्निदग्धव्रणे सम्यक् प्रयुञ्जीत चिकित्सकः ॥ ६ ॥

पित्तज विद्रधि और पित्तज विसर्प रोगनाशक प्रलेपादिकोंको अग्निसे जलेहुए व्रणपर यथाविधि प्रयुक्त करे ॥ ६ ॥

तिलं चैवाग्निना दग्धं यवभस्मसमन्वितम् ।
अग्निदग्धव्रणं नश्येदनेनैवानुलेपनात् ॥ ७ ॥

तिलोंकी भस्म और जौकी भस्म इन दोनोंको एकत्र मिलाकर लेप करनेसे अग्निद्वारा जलाहुआ व्रण सूख जाता है ॥ ७ ॥

तिलतैलैर्यवान्दग्ध्वा समं कृत्वा तु लेपयेत् ।
तेनैव लेपनादाशु वह्निदग्धः सुखी भवेत् ॥ ८ ॥

जौकी भस्म और तिलका तेल इन दोनोंके समान भागको एकत्र मिलाकर प्रलेप करनेसे अग्निसे जलाहुआ व्यक्ति शीघ्र आरोग्य होता है ॥ ८ ॥

सद्योदग्धं च मधुना लेपं कृत्वा भिषग्वरः ।
तत्पृष्ठे यवचूर्णेन लेपः स्याद्दाहशान्तये ॥ ९ ॥

जलेहुए व्रणपर तत्काल शहदका लेप करके ऊपरसे जौका चूर्ण बुरका देवे, इससे व्रणकी जलन दूर होती है ॥ ९ ॥

महिषीनवनीतेन क्षीरेण पेषयेत्तिलम् ।
तेन लेपेन दग्धाङ्गं सदाहं सुखमश्नुते ॥ १० ॥

तिलोंको भैंसके दूधमें पीसकर और भैंसके ही नैनीघीमें मिलाकर लेप करनेसे जलेहुए अङ्गकी दाह दूर होकर रोगी शीघ्र सुखभोग करता है ॥ १० ॥

महाराष्ट्रीजटालेपाद्दग्धपिष्टावचूर्णनम् ।
जीर्णगेहतृणाच्चूर्णं दग्धव्रणहरं परम् ॥ ११ ॥

जलपीपलकी जडको अथवा जलपीपलकी भुनीहुई पिट्ठीके चूर्णको किम्वा घरके पुराने फूंसकी भस्मको पीसकर लगानेसे अग्निदग्धक्षत तत्काल भरजाता है ॥११॥

कालीयफलताम्रास्थिहेमकालारसोत्तमैः ।
लेपः सगोमयरसः सवर्णीकरणः परः ॥ १२ ॥
चतुष्पदां हि लोमत्वक्खुरशृङ्गास्थिभस्मना ।
तैलाक्ता लेपिता भूमिर्भवेद्रोमवती पुनः ॥ १३ ॥

पीलाचन्दन, फूलप्रियंगु, आमकी गुठली, नागकेशर और मंजीठ इन औषधियोंके समान भाग मिश्रित रसोंमें गौके गोबरका रस मिलाकर लेप करनेसे घावके सूखजानेपर उसकी त्वचा समानवर्णवाली होजाती है । चौपाये जानवरोंके रोम, खाल, खुर, सींग और हड्डी इन सबोंकी भस्मोंको तिलके तेलमें मिलाकर मलनेसे शुष्कहुए व्रणके स्थानमें रोम उत्पन्न होते हैं । यदि इन पूर्वोक्त भस्मोंको यथाविधि लेप करे तो भूमिमें भी रोम उत्पन्न होजाते हैं; फिर घावकी कौन कहे ॥ १२ ॥ १३ ॥

अन्तर्दग्धकुठारको दहनजं लेपान्निहन्ति व्रणम्
अश्वत्थस्य विशुष्कवल्कलकृतं चूर्णं तथा गुण्डनात्॥१४॥

सफेद वनतुलसीको अन्तर्धूमपात्रमें भस्म करके अग्निद्वारा जले हुए व्रणपर लेप करनेसे अथवा पीपलकी सूखी छालको उस विधिके अनुसार भस्म करके बारीक पीसकर लेप करनेसे अग्निदग्धव्रण शीघ्र नष्ट होता है ॥ १४ ॥

अभ्यङ्गाद्विनिहन्ति तैलमखिलं गण्डूपदैः साधितं
पिष्ट्वा शाल्मलितूलकैर्जलगता लेपात्तथा वालुकाः ॥१५॥

केंचुओंको और तिलोंके तेलको एकत्र विधिपूर्वक पकाकर मालिश करनेसे अथवा सेमलकी रुईको जलमें पीसकर या जलकी रेणुकाको पीसकर लेप करनेसे अग्निसे जला हुआ घाव तत्काल शुष्क होता है ॥ १५ ॥

जीरकघृत।

जीरकपक्वं पश्चात् सिक्थकसर्ज्जरसमिश्रितं हरति।
घृतमभ्यङ्गात्पावकदग्धजदुःखं क्षणार्द्धेन ॥ १६ ॥

जीरेके कल्कको १ सेर लेकर ८ सेर जलमें पकावे। पकते पकते जब चौथाई भाग जल शेष रहजाय तब उतारकर छानलेवे। फिर उस क्काथमें मोम १६ तोले राल १६ तोले और घृत दो सेर डालकर विधिपूर्वक पकावे। इस घृतको लगानेसे जले हुए घावकी पीडा क्षणमात्रमें ही दूर होती है ॥ १६ ॥

पाटलीतैल।

सिद्धं कल्ककषायाभ्यां पाटल्याः कटुतैलकम्।
दग्धव्रणरुजास्रावदाहविस्फोटनाशनम् ॥ १७ ॥

पाटलके कल्क और क्काथद्वारा सिद्ध किया हुआ कडवा तेल, दग्धव्रणकी वेदना, रक्तका निकलना, जलन और भयंकर फोडोंको नष्ट करता है ॥ १७ ॥

मंजिष्ठाद्यतैल।

मञ्जिष्ठां चन्दनं मूर्वां पिष्ट्वा तैलं विपाचयेत्।
सर्वेषामग्निदग्धानामेतद्रोपणमिष्यते ॥ १८ ॥

मंजीठ, लालचन्दन और मूर्वा इनको समान भाग मिश्रित एक सेर लेकर एकत्र पीसलेवे। फिर इस कल्कके द्वारा उपर्युक्त विधिके अनुसार दो सेर सरसोंके तेलको सिद्ध करे। यह तेल सर्व प्रकारके अग्निसे जले हुए घावोंपर व्यवहार किया जाता है। सद्योव्रणरोगमें पथ्य और अपथ्य व्रणशोथरोगकी भाँति करना चाहिये ॥ १८ ॥

इति भैषज्यरत्नावल्यां सद्योव्रणचिकित्सा ॥

भग्नकी चिकित्सा।

आदौ भग्नं विदित्वा तु सेचयेच्छीतलाम्बुना।
पङ्केनालेपनं कार्यं बन्धनं च कुशान्वितम्॥
सुश्रुतोक्तं तु भग्नेषु वीक्ष्य बन्धनमाचरेत्॥ १॥

सुश्रुतमें कही हुई विधिके अनुसार भग्न (टूटे) स्थानको जानकर प्रथम उक्त स्थानमें शीतल जल सिञ्चन करे। पुनः कर्दमका लेप कर कुशादिसे बंधन करे अथवा उक्त ग्रन्थमें प्रतिपादित रीतिसे भग्नस्थानको भले प्रकार देखकर बंधन करना उचित है॥ १॥

अवनामितमुन्नह्येदुन्नतं चावपीडयेत्।
आञ्छेदतिक्षिप्तमध्ये गतं चोपरि वर्त्तयेत्॥ २॥
आलेपनार्थं मञ्जिष्ठां मधुका चाम्लपेषितम्।
शतधौतघृतोन्मिश्रं सौम्येष्वृतुषु मोक्षणम्॥ ३॥
कर्त्तव्यं स्यात्त्रिरात्राच्च तत्राग्नेयेषु जानता।
काले च समशीतोष्णे पञ्चरात्राद्विमोक्षयेत्॥ ४॥

भग्नस्थानकी टूटी हुई हड्डीको नीचे दबजानेपर ऊंचा करे और अधिक ऊंची होनेपर तत्क्षण नीचेको दबा देवे। हड्डीके ऊपरको हटजानेपर नीचेको दबावे और नीचेको झुकजानेपर उसे धीरे धीरे दबाकर ऊपरको खींचे और शनैः शनैः मलकर यथास्थानमें करदेवे मजीठ और मुलहठीको कॉजीमें पीसकर अथवा शालिधानके चावलोंको पीसकर सौबार धुले हुए घृतमें मिलाकर भग्नस्थानमें लेप करके बाँध-देवे। इस बंधनको हेमन्त और शीतकालमें ७ दिनके बाद, ग्रीष्मकालमें ३ दिनके बाद तथा वर्षा और शरत्कालमें ५ दिनके बाद खोले॥ २-४॥

न्यग्रोधादिकषायं च सुशीतं परिषेचने।
पञ्चमूलीविपक्वं तु क्षीरं दद्यात्सवेदने॥ ५॥
सुखोष्णमवतार्यं वा तत्र तैलं विजानता।
मांसं मांसरसः सर्पिः क्षीरं यूषं सतीनजः॥
बृंहणं चान्नपानं स्याद्देयं भग्नाय जानता॥ ६॥

न्यग्रोधादिगणकी औषधियोंके क्वाथको शीतल करके भग्नस्थानपर सेचन करे। भग्नस्थानमें पीडा होनेपर पञ्चमूलके काढेमें दूधको पकाकर शीतल करके सेचन करे और सुहाते सुहाते तेलकी मालिश कर सेंके। एवं मांस, मांसका रस, घी, दूध और मटरका यूष आदि बृंहण पदार्थ रोगीको भोजन करावे ॥ ५ ॥ ६ ॥

गृष्टिक्षीरं ससर्पिष्कं मधुरौषधसाधितम्।
शीतलं लाक्षया युक्तं प्रातर्भग्नः पिबेन्नरः ॥ ७ ॥
सघृतेनास्थिसंहारं लाक्षागोधूममर्जुनम्।
सन्धियुक्तेऽस्थिभग्ने च पिबेत्क्षीरेण मानवः ॥ ८ ॥

भग्नरोगी काकोल्यादिगणोक्त औषधियोंके साथ एकवारकी ब्याईहुई गौका दूध और घी मिलाकर सिद्ध कियाहुआ शीतल दूध अथवा लाखके चूर्णके साथ गौका घी मिलाकर प्रतिदिन प्रातःकाल पान करे। यदि सन्धिस्थानकी हड्डी टूटगई हो तो हडसंहारी, लाख, गेहूँ और अर्जुनवृक्षकी छालको समान भाग पीसकर घी और दूधमें मिलाकर पान करना चाहिये ॥ ७ ॥ ८ ॥

रसोनमधुलाक्षाज्यसिताकल्कं समश्नुताम्।
छिन्नभिन्नच्युतास्थ्नां च सन्धानमचिराद्भवेत् ॥ ९ ॥

लहसन शहद, लाख, घृत, और मिश्री इनके समान भाग कल्कको एकत्र कर भक्षण करनेसे कटी, टूटी व अपनेस्थानसे हटीहुई हड्डियां जुड जाती हैं ॥ ९ ॥

पीतवाराटिकाचूर्णं द्विगुञ्जं वा त्रिगुञ्जकम् ॥
अपक्वक्षीरपीतं स्यादस्थिभग्नप्ररोहणम् ॥ १० ॥

पीलीकौडीकी भस्मके दो या तीन रत्ती चूर्णको कच्चे दूधके साथ मिलाकर पीनेसे टूटीहुई हड्डी जुडती है ॥ १० ॥

क्षीरं सलाक्षामधुकं ससर्पिः स्याज्जीवनीयं च सुखावहं च।
भग्नः पिबेत्त्वक्पयसाऽर्जुनस्य गोधूमचूर्णं सघृतेन वाथ ॥ ११ ॥

दूध, लाख, मुलहठी, घी और जीवनीयगणकी औषधियों इन सबोंको एकत्र पकाकर सुखोष्ण पान करनेसे अथवा अर्जुनवृक्षकी छालके चूर्णको दूधके साथ पीनेसे किम्वा गेहूंके आटेको घीमें मिलाकर सेवन करनेसे भग्नरोगी शीघ्र आरोग्य होता है ॥ ११ ॥

सव्रणस्य तु भग्नस्य व्रणं सर्पिर्मधूत्तरैः।
प्रतिसार्यं कषायैश्च शेषं भग्नवदाचरेत् ॥ १२ ॥

भग्नं नैति यथा पाकं प्रयतेत तथा भिषक्।
वातव्याधिविनिर्दिष्टान् स्नेहानत्र प्रयोजयेत् ॥ १३ ॥

भग्नस्थानमें यदि व्रण होगया हो तो न्यग्रोधादिगणकी औषधोंके काढे या कल्कमें घी और शहद मिलाकर लेप करे, पश्चात् भग्नरोगकी समान चिकित्सा करे। टूटीहुई हड्डी जिसप्रकार पकने न पावे इसपर वैद्यको विशेष लक्ष्य रखना चाहिये। भग्नरोगमें वातव्याधिरोगोक्त स्नेहद्रव्य (घृत, तैलादि) प्रयोग करे ॥

लाक्षागुग्गुलु।

लाक्षास्थिसंहृत्ककुभाश्वगन्धाश्चूर्णीकृता नागबला पुरश्च। सम्भग्नमुक्तास्थिरुजो निहन्यादङ्गानि कुर्याद् कुलिशोपमानि ॥ १४ ॥

लाख, हडसंहारी, अर्जुनकी छाल, असगन्ध, गंगेरन और शुद्ध गूगल इनको समान भाग लेकर एकत्र चूर्ण करलेवे। इस चूर्णको खानेसे टूटी हुई हड्डीकी पीडा दूर होती है। अस्थि जुडकर अङ्ग वज्रके समान दृढ होय ॥ १४ ॥

आभागुग्गुलु।

आभाफलत्रिकैर्व्योषैः सर्वैरेभिः समीकृतः।
तुल्यो गुग्गुलुरायोज्यो भग्नसन्धिप्रसाधकः ॥ १५ ॥

बबूलकी छाल, हरड, बहेडा, आमला, सोंठ, मिरच और पीपल इन सबोंको समान भाग और सब औषधियोंकी बराबर भाग शुद्ध गूगल लेकर एकत्र बारीक पीसकर चूर्ण करलेवे। यह चूर्ण नियमानुकूल सेवन करनेपर टूटे हुए सन्धिस्थानोंको जोड देता है ॥ १५ ॥

गन्धतैल।

रात्रौ रात्रौ तिलान्कृष्णान् वासयेदस्थिरे जले।
दिवा दिवैवं संशोष्य क्षीरेण परिभावयेत् ॥ १६ ॥
तृतीयं सप्तरात्रं तु भावयेन्मधुकाम्बुना।
ततः क्षीरं पुनः पीतान्कुष्कान्सुक्ष्मान्विचूर्णयेत् ॥१७॥
काकोल्यादिं श्वदंष्ट्राह्वं मञ्जिष्ठां सारिवां तथा।
कुष्ठं सर्जरसं मांसीं सुरदारु सचन्दनम् ॥ १८ ॥
शतपुष्पां च सञ्चूर्ण्य तिलचूर्णानि योजयेत्।
पीडनार्थं च कर्तव्यं सर्वगन्धैः शृतं पयः ॥ १९ ॥

चतुर्गुणेन पयसा तत्तैलं पाचयेत्पुनः ।
एलामंशुमतीं पत्रं जीवन्तीं तुरगं तथा ॥ २० ॥
लोध्रं प्रपौण्डरीकं च तथा कालानुसारिवाम् ।
शैलेयकं क्षीरशुक्लामनन्तां समधूलिकाम् ॥ २१ ॥
पिष्ट्वा शृङ्गाटकं चैव प्रागुक्तान्यौषधानि च ।
एभिस्तद्विपचेत्तैलं शास्त्रविन्मृदुनाऽग्निना ॥ २२ ॥

काले तिलोंको एक स्वच्छ वस्त्रकी पोटलीमें बाँधकर प्रतिदिन रात्रिमें नदी आदिके बहतेहुए जलमें डुबोकर रक्खे और प्रतिदिन प्रातःकाल उनको जलमेंसे निकालकर धूपमें सुखाके गोदुग्धमें भावना देवे। इस प्रकार सात दिनतक भावना देवे। फिर पूर्वोक्त अवधितक दूधमें भावना देकर सुखालेवे। फिर उनको खूब बारीक पीसकर चूर्ण करलेवे। इस चूर्णके साथ काकोल्यादि गणकी औषधियों, गोखुरू, मंजीठ, सारिवा, कूठ, सफेदराल, बालछड, देवदारु, लालचन्दन और सोया इनको समानभाग लेकर चूर्ण करके मिलादेवे। तदनन्तर तेल निकालनेके लिये समस्त चूर्णको कोल्हूमें डालकर पेले और पेलते समय तेल निकालनेको जल न डाले, किन्तु सम्पूर्ण सुगन्धित पदार्थोंसे सिद्ध किये हुए जलको डालकर तेल निकाले। फिर उस तेलको चौगुने दूध एवं छोटी इलायची, शालपर्णी, तेजपत्र, जीवन्ती, असगन्ध, लोध, पुण्डरीक, तगर, भूरिछरीला, श्वेतविदारीकन्द, अनन्तमूल, मूर्वा, सिंघाडे और पूर्वोक्त काकोल्यादि गणकी औषधियों, इन सबोंके कल्कके साथ शास्त्रविधिको जाननेवाला वैद्य मन्दमन्द अग्निसे पकावे ॥ १६–२२ ॥

एतत्तैलं सदा पथ्यं भग्नानां सर्वकर्मसु ।
आक्षेपके पक्षघाते तालुशोषे तथाऽर्दिते ॥ २३ ॥
मन्यास्तम्भे शिरोरोगे कर्णशूले हनुग्रहे ।
बाधिर्ये तिमिरे चैव ये च स्त्रीषु क्षयं गताः ॥ २४ ॥
पथ्यं पाने तथाऽभ्यङ्गे नस्ये वस्तिषु भोजने ।
ग्रीवास्कन्धोरसां वृद्धिरनेनैवोपजायते ॥ २५ ॥
मुखं च पद्मप्रतिमं ससुगन्धिसमीरणम् ।
गन्धतैलमिदं नाम्ना सर्ववातविकारनुत् ॥ २६ ॥

राजार्हमेतत्कर्त्तव्यं राज्ञामेव विचक्षणैः।
तिलचूर्णसमं त्वत्र मिलितं चूर्णमिष्यते ॥ २७ ॥

यह तेल अस्थिभग्नवाले रोगियोंको सर्वदा पथ्य है। इसको सर्व प्रकारके कर्म्मोंमें प्रयोग करना चाहिये तथा आक्षेपकवात, पक्षवात, तालुशोष, अर्दितवात, मन्यास्तम्भ, शिरोरोग, कर्णशूल, हनुग्रह, बधिरता, तिमिररोग और अत्यधिक स्त्रीप्रसङ्गकरनेसे उत्पन्न हुई क्षीणतामें यह तेल विशेष हितकारी है। पान, अभ्यङ्ग, नस्य, वस्तिकर्म्म और भोजनमें इसको सेवन करे। इसके मर्दनसे, कन्धे और छातीकी वृद्धि होती है, मुख कमलकी समान कान्तिमान् और सुगन्धित श्वासयुक्त होजाता है। यह गन्धतेल सर्व प्रकारके वातविकारोंको नष्ट करता है। यह तेल राजाओंके योग्य है, अतः प्रतिभाशाली वैद्य इसको राजाओंके लिये ही बनावे। इसमें तिलोंके चूर्णके बराबर भाग सब चूर्ण लेने चाहिये ॥ २३-२७ ॥

भग्नरोगमें पथ्य।

शीताम्बुसेचनं पंकप्रदेहो बन्धनक्रिया।
शालिप्रियङ्गुगोधूमा यूषो मुद्गसतीनयोः ॥ २८ ॥
नवनीतं घृतं क्षीरं तैलं माषरसो मधु।
पटोलं लशुनं शिग्रुः पत्तूरो बालमूलकम् ॥ २९ ॥
द्राक्षा धात्री वज्रवल्ली लाक्षा पथ्यापि बृंहणम्।
तत्सर्वं भिषजा नित्यं देयं भग्नाय जानता ॥ ३० ॥

शीतल जल छिड़कना, कीचका लेप, पट्टी बाँधना, शालिधानोंके चावल, मालकांगनी और गेहूँका भोजन, मूँग और मटरका यूष, नैनी घी, दूध, तेल, उड़दोंका यूष, शहद, परवल, लहसन, सहिंजना, शान्तिशाक, कच्ची मूली, दाख, आँवले, हड़संहारबेल, लाख और पुष्टिकर सब द्रव्योंको सुयोग्य वैद्य भग्नअस्थिवाले रोगीके लिये प्रतिदिन विचारपूर्वक देवे। ये सब उक्तरोगमें विशेष हितप्रद हैं ॥ २८-३० ॥

भग्नरोगमें अपथ्य।

लवणं कटुकक्षारमम्लं मैथुनमातपम्।
व्यायामं च न सेवेत भग्नो रूक्षान्नमेव च ॥ ३१ ॥

भग्नास्थिवाला रोगी नमक, कड़वे, खारी और खट्टेरसवाले पदार्थ, स्त्रीसहवास, धूपका सेवन, कसरत एवं रूखेअन्नोंके भोजनको तत्काल त्याग देवे ॥ ३१ ॥

इति भैषज्यरत्नावल्यां भग्नचिकित्सा।

नाडीव्रणकी चिकित्सा ।

नाडीनां गतिमन्विष्य शस्त्रेणापाट्य कर्मवित् ।
सर्वव्रणक्रमं कुर्याच्छोधनं रोपणादिकम् ॥ १ ॥

नाडीव्रण (नासूर) की गतिको (अर्थात् राध कहाँतक फैली है) जानकर उस स्थानको शस्त्रसे चीरकर सम्पूर्ण राधआदिको निकाल देवे । फिर व्रणरोगमें कही हुई विधिके अनुसार सब प्रकारकी रोपण, शोधन आदि चिकित्सा करे ॥ १ ॥

नाडीं वातकृतां साधु पाटितां लेपयेद्भिषक् ।
प्रत्यक्पुष्पीफलयुतैस्तिलैः पिष्टैः प्रलेपयेत् ॥ २ ॥
पैत्तिकीं तिलमञ्जिष्ठानागदन्तीनिशायुगैः ।
श्लैष्मिकीं तिलयष्ट्याह्वनिकुम्भारिष्टसैन्धवैः ॥
शल्यजां तिलमध्वाज्यैर्लेपयेच्छिन्नशोधिताम् ॥ ३ ॥

वातजन्य नाडीव्रणको प्रथम शस्त्रसे उत्तम प्रकार चीरकर लेखन क्रिया करे । पश्चात् श्वेत चिरचिटेके बीज और तिलोंको एकत्र पीसकर लेप करे । पित्तज नाडीव्रणमें तिल, मंजीठ, हाथी सुण्डा लता, हल्दी और दारुहल्दी इनको पीसकर लेप करे । कफजनित नाडीव्रणमें तिल, मुलहठी जमालगोटेकी जड़, नीमके पत्ते और सैंधानमक इनको पीसकर लेप करे । शल्य (काँटा, शस्त्रादि) के विद्ध होनेसे उत्पन्न हुए नाडीव्रणको शस्त्रसे चीरकर शल्यको निकालकर व्रणके मार्गको शुद्ध करे । फिर तिल, शहद, घी, एकत्र पीसकर लेप करे ॥ २ ॥ ३ ॥

आरग्वधनिशाकालचूर्णाज्यक्षौद्रसंयुता ।
सूत्रवर्त्तिर्व्रणे योज्या शोधिनी गतिनाशिनी ॥ ४ ॥

अमलतासके पत्ते, हल्दी और काकादनीवृक्षकी छाल इन सबोंके १ तोला चूर्णमें घी दो तोले, शहद दो तोले और गोमूत्र ८ तोले डालकर एकत्र पकावे फिर इसमें सूतकी बत्तीको भिगोकर व्रणमें रक्खे । यह बत्ती व्रणको शुद्ध करनेवाली और राधकी गतिको नष्ट करनेवाली है ॥ ४ ॥

घोण्टाफलत्वङ्मदनात्फलानि
पूगस्य च त्वग्लवणं च मुख्यम् ।

स्नुह्यर्कदुग्धेन सहैव कल्को
वर्त्तीकृतो हन्त्यचिरेण नाडीम् ॥ ५ ॥

बनबेरकी छाल, मैनफल, सुपारीकी छाल और सेंधानमक इनके समान भाग चूर्णको थूहरके दूध और आकके दूधमें पीसकर कुछके गरम करके बत्ती बनालेवे। यह बत्ती व्रणमें रखनेसे नासूरको बहुत शीघ्र नष्ट करती है ॥ ५ ॥

वर्त्तीकृतं माक्षिकसंप्रयुक्तं नाडीप्रयुक्तं लवणोत्तमं वा ।
दुष्टव्रणे यद्विहितं च तैलं तत्सेव्यमानं गतिमाशु हन्ति ॥६॥

सेंधानोन और शहदको एकत्र अग्निमें पकाकर उससे सूतकी बत्ती बनाकर व्रणमें रखनेसे नाडीव्रण शुष्क होता है। दुष्टव्रणमें जो तेल कहे हैं उनको प्रयोग करनेसे राधकी गति शीघ्र नष्ट होती है ॥ ६ ॥

जात्यर्कशम्याककरञ्जदन्तीसिन्धूत्थसौवर्चलयावशूकैः ।
वर्त्तिः कृता हन्त्यचिरेण नाडीं स्नुक्क्षीरपिष्टा सहमाक्षिकेण॥

चमेलीके पत्ते, आककी जड, अमलतासके पत्ते, करञ्ज, दन्तीकी जड, सेंधानोन कालानोन और जवाखार इनको बराबर बराबर लेकर थूहरके दूध और शहदमें खरल करके बत्ती बनालेवे। इस बत्तीको व्रणमें प्रवेश करनेसे नासूररोग तत्काल नाश होता है ॥ ७ ॥

माहिषं दधि कोद्रवभक्तमिश्रितं हरति चिरविरूढाम् ।
भक्तं कङ्गुनिकाभवमतिदारुणां नाडीं शमयेत् ॥ ८ ॥

भैंसका दही, कोदोंका चूर्ण और मालकाँगुनीकी जडका चूर्ण इनको सेवन करनेसे चिरकालोत्पन्न दारुण नाडीव्रणरोग शीघ्र शमन होता है ॥ ८ ॥

कृशदुर्बलभीरूणां गतिर्मर्माश्रिता च या ।
क्षारसूत्रेण तां छिन्द्यान्न शस्त्रेण कदाचन ॥ ९ ॥

कृश, निर्बल और डरपोकरोगियोंके उत्पन्न हुए एवं मर्मस्थानोंमें उत्पन्नहुए नाडीव्रणको क्षारमें भीजे हुए डोरेसे फोडे, किन्तु शस्त्रसे कदापि नहीं चीरे ॥ ९ ॥

एषण्या गतिमन्विष्य क्षारसूत्रानुसारिणीम् ।
सूचीं विदध्याद्गत्यन्ते चोन्नाम्य चाशु निर्हरेत् ॥ १० ॥
सूत्रस्यान्तं समानीय गाढबन्धं समाचरेत् ।
ततः क्षीणबलं वीक्ष्य सूत्रमन्यत्प्रवेशयेत् ॥ ११ ॥

क्षाराक्तं मतिमान्वैद्यो यावन्न छिद्यते गतिः।
भगन्दरेऽप्येष विधिः कार्यो वैद्येन जानता ॥ १२ ॥

एषणी (लोहेकी सलाई) से नाडीव्रणकी गतिको जानकर क्षारसूत्र पिरोई हुई सुईको व्रणकी गतिके अन्तमें छेद देवे। फिर सुईको भीतरतक प्रवेश करके बाहर निकाल लेवे और सुईमेंसे डोरेको अलग करके उसके दोनों सिरोंको मिलाकर अच्छे प्रकार गाँठ देकर बाँध देवे। यदि इस क्षारसूत्रसे नाडीव्रणका मार्ग छिन्न न हो तो दूसरा क्षारसूत्र उल्लिखित विधिसे प्रवेश करे। जबतक नाडीकी गति छिन्न भिन्न न होवे तबतक इसी प्रकार बराबर क्षारसूत्र प्रविष्ट करता रहे। वैद्य इस विधिको भगंदररोगमें भी करे ॥ १०-१२ ॥

अर्बुदादिषु चोत्क्षिप्य मूले सूत्रं निधापयेत्।
सूचीभिर्यववक्त्राभिराचितं वा समन्ततः ॥
मूलं सूत्रेण बध्नीयाच्छिन्ने चोपचरेद् व्रणम् ॥ १३ ॥

अर्बुदादि रोगोंमें ग्रंथि रसौली आदिको ऊँचा करके उनकी जडमें क्षारसे भीगा हुआ डोरा बाँधे अथवा जौकी समान मुखवाली सुईसे चारों ओरको छेदकर उसकी मूलको क्षारसूत्रसे बाँध देवे। व्रणके छिदजानेपर व्रणरोगोक्त अन्यान्य चिकित्सा करे ॥ १३ ॥

गुणवतीवर्त्ति।

तुल्यं सर्वरसं लोध्रं सिन्दूरातिविषे निशा।
अक्षं कपित्थश्रीवासो गुग्गुलुर्घृततैलकैः ॥ १४ ॥
तुल्यांशं पेषयेत्पिण्डं तत्तुल्यं सिक्थकं भवेत्।
वर्त्तिर्गुणवती नाम जुष्टा शीतजलान्विता ॥ १५ ॥
दुःसाध्यव्रणगण्डेषु तथा नाडीव्रणेषु च।
शोधने रोपणे चैव स्वास्थ्यमुत्पादयत्यसौ ॥ १६ ॥

राल, लोध, सिंदूर, अतीस, हल्दी, तूतिया, कच्चा कैथ, तार्पीनका तेल और गूगल ये प्रत्येक एक एक तोला एवं मोम सब द्रव्योंके बराबर भाग लेवे। फिर इन सबोंको तेल और घृतके साथ कडाईमें डालकर पकाकर बत्ती बनालेवे। यह गुण-वतीनामवाली बत्ती दुःसाध्य व्रण और नासूरमें प्रलेप करनेसे व्रणको शुद्ध और शुष्क कर शीघ्र आरोग्यप्रदान करती है ॥ १४-१६ ॥

सप्तांगगुग्गुलु ।

गुग्गुलुस्त्रिफलाव्योषैः समांशैराज्ययोजितः ।
नाडीदुष्टव्रणशूलभगन्दरविनाशनः ॥ १७ ॥

हरड़, बहेडा, आमला, सोंठ, मिरच, पीपल ये सब समान भाग और शोधित गूगल सब द्रव्योंके बराबर लेकर एकत्र चूर्ण करलेवे । पुनः इस चूर्णको घीमें खरल करके गोलियां बनालेवे । प्रतिदिन एक एक गोलीको सेवन करनेसे नासूर, दुष्टव्रण, शूल, भगन्दर आदिरोग नष्ट होते हैं ॥ १७ ॥

श्यामाघृत ।

श्यामात्रिभण्डीत्रिफलासुसिद्धं हरिद्रया तिल्वकवृक्षकेण ।
घृतं सदुग्धं व्रणतर्पणेन हन्याद्गतिं कोष्ठगतापि या स्यात् १८

अनन्तमूल, निसोत, त्रिफला, हल्दी, लोध और कुडेकी छाल इनके समान भाग मिश्रित एक सेर कल्कके द्वारा दो सेर घृतको ८ सेर दूधमें पकावे । इस घृतसे नाडीव्रणको तृप्त करनेसे कोष्ठतक पहुँची हुई राधकी गति नष्ट होकर व्रण शीघ्र सूख जाता है ॥ १८ ॥

स्वर्जिकाद्यतैल ।

स्वर्जिकासिन्धुदन्त्यग्निरूपिकानलनीलिकाः ।
खरमञ्जरिबीजानि तैलं गोमूत्रपाचितम् ॥
दुष्टव्रणप्रशमनं कफनाडीव्रणापहम् ॥ १९ ॥

सज्जी, सैंधानमक, दन्ती, चीता, सफेद आक, नलमूल, नीलवृक्षकी जड और चिरचिटेके बीज इन सबोंके कल्क द्वारा तिलके तेलको गोमूत्रमें पकावे । यह तेल दुष्टव्रण और कफजन्य नाडीव्रणको दूर करता है ॥ १९ ॥

कुम्भीकाद्यतैल ।

कुम्भीकखर्जूरकपित्थबिल्ववनस्पतीनां च शलाटु-
कल्कैः । कृत्वा कषायं विपचेत्तु तैलमावाप्य मुस्ता-
सरलप्रियंगूः ॥ २० ॥ सौगन्धिकामोचरसाहि-पुष्प-
लोध्राणि दत्त्वा खलु धातकीं च । एतेन शल्यप्रभवा हि
नाडी रोहेद्व्रणो वै सुखमाशु चैव ॥ २१ ॥

पुन्नागवृक्षकी लता, खजूर, कैथ, बेल, बड और गूलर इन सबोंको कच्चे फलोंके द्वारा यथाविधि क्वाथ बनावे। फिर इस क्वाथमें तिलका तेल तथा

नागरमोथा, धूपसरल, फूलप्रियंगु. अनन्तमूल, मोचरस, नागकेशर, लोध चीता और धायके फूल इन सबोंको कल्क डालकर यथानियम तेलको सिद्ध करे। इस तेलको लगानेसे शल्योत्पन्न नाडीव्रण और नानाप्रकारके व्रण भरजाते हैं और रोगी शीघ्र सुखी होता है ॥ २० ॥ २१ ॥

भल्लातकाद्यतैल ।

भल्लातकार्कमरिचैर्लवणोत्तमेन सिद्धं विडङ्गरजनीद्वय-
चित्रकैश्च । स्यान्मार्कवस्य च रसेन निहन्ति तैलं नाडीं
कफानिलकृतामपचीं व्रणांश्च ॥ २२ ॥

भिलावे, आककी जड, कालीमिरच, सैंधानोन, वायविडङ्ग, हल्दी, दारुहल्दी और चीतेकी जड इनका समान भाग मिलाहुआ कल्क १ सेर, तिलका तेल ४ सेर और भाँगरेका रस १६ सेर लेवे। सबको एकत्रकर उत्तम रूपसे तेलको पकावे। यह तेल व्यवहार करनेसे कफज और वातज नाडीव्रण, अपचीरोग एवं सर्वप्रकारके व्रणोंको शीघ्र नष्ट करता है ॥ २२ ॥

निर्गुण्डीतैल ।

समूलपत्रां निर्गुण्डीं पीडयित्वा रसेन तु ।
तेन सिद्धं समं तैलं नाडीव्रणविशोधनम् ॥ २३ ॥
हितं पामापचीनां तु पानाभ्यञ्जननावनैः ।
विविधेषु च रोगेषु तथा सर्वव्रणेषु च ॥ २४ ॥

जड और पत्तोंसहित निसोतको कूटकर निकालाहुआ रस २ सेर और तिलका तेल २ सेर इन दोनोंको एकत्र पकाकर पान, मालिश अथवा नस्यग्रहण करनेसे सर्वप्रकारके नाडीव्रण (नासूर), खुजली, अपची, व्रणरोग और अन्यान्य विविध प्रकारके रोग तत्काल नाश होते हैं ॥ २३ ॥ २४ ॥

हंसपदीतैल ।

हंसपद्यरिष्टपत्रं जातीपत्रं ततो रसैः ।
तत्कल्कैश्च पचेत्तैलं नाडीव्रणविरोहणम् ॥ २५ ॥

हंसपदीके पत्ते, नीमके पत्ते और चमेलीके पत्ते इनका समान भाग मिश्रित क्वाथ १६ सेर एवं इन्हींका कल्क १ सेर लेवे। इनके द्वारा ४ सेर तिलके तेलको विधिपूर्वक सिद्ध करे। यह तेल नाडीव्रणको तत्काल सुखा देता है ॥ २५ ॥

नरास्थितैल ।

नरास्थितैललेपेन स्फुटितः शुष्यति व्रणः ॥ २६ ॥

मनुष्यके शिरकी हड्डीको पीसकर उसके द्वारा सिद्ध कियेहुए तेलको लगानेसे फूटा हुआ व्रण शीघ्र सूखता है ॥ २६ ॥

नाडीव्रणमें पथ्य और अपथ्य व्रणशोथकी समान करना चाहिये ॥

इति भैषज्यरत्नावल्यां नाडीव्रणचिकित्सा ।

भगन्दरकी चिकित्सा ।

गुदस्य श्वयथुं दृष्ट्वा विशोष्य शोधयेत्ततः ।
रक्तावसेचनं कार्यं यथा पाकं न गच्छति ॥ १ ॥

गुदाकी सूजनको देखकर तत्काल रोगीको लंघन कराकर सुखावे और दस्त कराकर शुद्ध करे । यदि इस प्रकार करनेसे सूजन कम न हो तो शोथस्थानमें जौंक लगवाकर रुधिरको निकलवावे । इस प्रकार करनेसे शोथ पकता नहीं है ॥ १ ॥

वटपत्रेष्टकाशुण्ठीगुडूच्यः सपुनर्नवाः ।
सुपिष्टाः पिडिकान्ते च लेपः शस्तो भगन्दरे ॥ २ ॥

बडके पत्ते, ईंट, सोंठ, गिलोय और पुनर्नवा इन सबोंको समान भाग लेके एकत्र पीसकर भगन्दरकी गूमडियें जहाँतक फैली हों वहाँतक लेप करना ॥ २ ॥

स्नुह्यर्कदुग्धदार्वीभिर्वर्तिं कृत्वा विचक्षणः ।
भगन्दरगतिं ज्ञात्वा पूरयेत्तां प्रयत्नतः ॥
एषा सर्वशरीरस्थां नाडीं हन्यान्न संशयः ॥ ३ ॥

थूहरका दूध, आकका दूध और दारुहल्दी इनको एकत्र पीसकर बत्ती बनाकर बहते हुए भगन्दरमें सप्रयत्न प्रवेश करे । यह बत्ती शरीरकी सम्पूर्ण नाडियोंके विकारोंको दूर करती है ॥ ३ ॥

तिलाभयाकुष्ठमरिष्टपत्रं निशे वचा लोध्रमगारधूमः ।
भगन्दरे नाड्युपदंशयोश्च दुष्टव्रणे शोधनरोपणोऽयम् ॥ ४ ॥

तिल, हरड, कूठ, नीमके पत्ते, हल्दी, दारुहल्दी, वच, लोध और गृहधूम इन सबको समान भाग लेकर एकत्र पीसलेवे । फिर इस चूर्णको भगन्दर, नाडीव्रण और उपदंशके दुष्ट व्रणोंपर लेप करनेसे उक्तव्रण शुद्ध होकर भरते हैं ॥ ४ ॥

त्रिफलारससंपिष्टबिडालास्थिप्रलेपनम् ।
भगन्दरं निहन्त्याशु दुष्टव्रणहरं परम् ॥ ५ ॥

त्रिफलाके काथमें बिलावकी हड्डीको घिसकर लेप करनेसे भगन्दरका दुष्टव्रण अल्पकालमें नष्ट होता है ॥ ५ ॥

भगन्दरं प्रत्यहं तु सुधौतं त्रिफलाम्बुना ॥ ६ ॥

प्रतिदिन त्रिफलेके काथसे भगन्दरको धोना चाहिये ॥ ६ ॥

खरास्रपक्वभूनागचूर्णलेपो भगन्दरम् ।
हन्ति दन्त्यग्न्यतिविषालेपस्तद्वच्छुनोऽस्थि वा ॥ ७ ॥

गधेके खूनमें केंचुओंके चूर्णको पकाकर लेप करनेसे भगन्दर रोग नष्ट होता है अथवा दन्तीकी जड, आककी जड और अतीस इनको एकत्र पीसकर लेप करें किम्वा कुत्तेकी हड्डीको त्रिफलेके काथमें घिसकर प्रलेप करे तो भगन्दर दूर होता है ॥ ७ ॥

शम्बूकस्य च मांसानि भक्षयेद्व्यञ्जनादिभिः ।
अजीर्णवर्जी मासेन मुच्यते स भगन्दरात् ॥ ८ ॥

जो अजीर्णकारक द्रव्योंको छोडकर अनेक प्रकारके व्यञ्जन और आहारके साथ शम्बूक (घोंघा) के मांसको एक महीनेतक भक्षण करे तो वह भगन्दररोगी भगन्दररोगसे मुक्त होता है ॥ ८ ॥

नारायणरस ।

दरदं पार्वतीपुष्पं कुनटी पुरुषो रसः ।
शोणितं गन्धको दैत्यः सैन्धवातिविषे चवी ॥ ९ ॥
शरपुङ्खा विडङ्गश्च यमानी गजपिप्पली ।
मरिचार्कौ च वरुणो धूनकं च हरितकी ॥
सम्मर्द्य कटुतैलेन गुडिकां कारयेद्भिषक् ॥ १० ॥

सिंगरफ, गोपीचन्दन, रसौंत, मैनसिल, सुवर्ण, शुद्ध पारा, ताँबा, शुद्ध गन्धक, लोहा, सेन्धानमक, अतीस, चव्य, शरफोंका, वायविडङ्ग, अजवायन, गजपीपल, कालीमिरच, आककी मूल, वरुणाकी जड, सफेद राल और हरड इन सब द्रव्योंको १-१ तोला ले सरसोंके तेलमें खरलकरके गोलियाँ बनालेवे ॥ १० ॥

नाडीव्रणं प्रदुष्टं च गण्डमालां विचर्चिकाम् ।
चिरदुष्टव्रणं दद्रुं पूतिकर्णं शिरोगदम् ॥ ११ ॥
हस्तपादपरिस्फोटं दुःसाध्यं च भगन्दरम् ।
एतान्रोगान्निहन्त्याशु गजेन्द्रमिव केसरी ॥ १२ ॥

यह औषधि नासूर, गण्डमाला, विचार्चिका, बहुत पुराना दुष्टव्रण, दाद, पूतिकर्ण, शिरोरोग, हाथ पैरके फोडे और दुःसाध्य भगन्दर इत्यादि रोगोंको तत्क्षण इस प्रकार नष्ट करती है जिस प्रकार मृगेन्द्र गजेन्द्रको नष्ट कर देता है ॥ ११ १२ ॥

चित्रविभाण्डक रस।

शुद्धसूतं द्विधा गन्धं कुमारीरसमर्दितम्।
त्र्यहान्ते गोलकं कृत्वा ताम्रं तेन प्रलेपयेत् ॥ १३ ॥
द्वयोः समं भस्म पूर्णभाण्डे रुद्ध्वा विपाचयेत्।
द्वियामान्ते समुद्धृत्य स्वाङ्गशीतं विचूर्णयेत् ॥
जम्बीरस्य द्रवैः पिष्ट्वा रुद्ध्वा सप्तपुटे पचेत् ॥ १४ ॥

शुद्ध पारा एक तोला और शुद्ध गन्धक दो तोले, इनको घीग्वारके रसमें तीन दिनतक खरल करके गोलासा बनाले, फिर उस गोलेसे तीन तोले शुद्ध ताँबेके पत्रको लीपे और इन दोनोंके बराबर भाग उपलोंकी राखको एक हाँडीमें भरकर ऊपरसे उक्त पत्रको रक्खे और उसके ऊपर फिर राख भरकर हाँडीके मुखको अच्छेप्रकार बन्द करके दो प्रहरतक तीव्र अग्निमें पकावे। जब पककर स्वाङ्गशीतल होजाय तब निकालकर चूर्ण करलेवे। पश्चात् इस चूर्णको जम्बीरीनीम्बूके रसमें पीसकर मूषायन्त्रमें रखकर सातबार पुटपाक करे ॥ १३ ॥ १४ ॥

गुञ्जैकं मधुनाऽऽज्येन लिह्याद्धन्ति भगन्दरम्।
मुषली लवणं चानु चारनालयुतं पिबेत् ॥ १५ ॥
कर्त्तव्यो मधुराहारो दिवास्वप्नं च मैथुनम् ॥
वर्जयेच्छीतलाहारं रसे चित्रविभाण्डके ॥ १६ ॥

इसकी एक एक रत्ती मात्राको मधु और घृतमें मिलाकर चाटनेसे भगन्दररोग नष्ट होता है। औषधि सेवन करनेके पीछे मुसली और सेंधानमकको काँजीमें पीसकर पान करे। इसपर मधुर पदार्थोंका भोजन करे। किन्तु दिनमें सोना, मैथुन करना और शीतल द्रव्योंका आहार करना त्यागदेवे ॥ १५ ॥ १६ ॥

ताम्रप्रयोग।

ताम्रपत्रं रविक्षीरे निर्गुण्डीस्वरसे तथा।
त्रिकण्टजे स्नुहिरसे ताम्रं दग्ध्वा क्षिपेत्त्रिधा ॥ १७ ॥
रसस्यार्द्धपलं शुद्धं गन्धकस्य पलं तथा।
कज्जल्यार्द्धेन जम्बीरप्लुतेन ताम्रतः पलम् ॥ १८ ॥

परिलिप्यान्धमूषायां दद्यात्पञ्च पुटाँल्लघून् ।
सम्मर्द्य मधुसर्पिभ्यां ततो रक्तिद्वयं लिहेत् ॥
भगन्दरे सर्वभवे कार्यं सर्वव्रणेषु च ॥ १९ ॥

चार तोले ताँबेके पत्रको आकके दूध, निर्गुण्डीके स्वरस, गोखुरूके क्वाथ और थूहरके दूधमें यथाक्रम तीन तीन वार भावना देकर तीन तीन वार अग्निमें भस्म करे। पश्चात् शुद्ध पारा दो तोले और शुद्धगन्धक चार तोले लेकर कज्जली बना कर तीन तोले जम्बीरीनींबूके रसमें खरल करलेवे। फिर पूर्वोक्त ताम्रपत्रको इस कज्जलीसे लिप्त करके अन्धमूषायन्त्रमें रख हलके हलके पाँच वार पुटदेवे। तदनन्तर उसको निकालकर शहद और घृतमें खरल करके प्रतिदिन प्रातःकाल दो रत्ती भर सेवन करे। इस प्रयोगको भगन्दर और सर्वप्रकारके व्रणोंमें सेवन करनेसे विशेष उपकार होता है ॥ १७-१९ ॥

नवकार्षिक गुग्गुलु ।

त्रिफलापुरकृष्णानां त्रिपञ्चैकांशयोजिता ।
गुडिका शोथगुल्मार्शोभगन्दरवतां हिता ॥ २० ॥

हरड, बहेडा और आमला ये प्रत्येक तीन तीन तोले, गूगल, पाँच तोले और पीपल एक तोला लेवे। पुनः सबको एकत्र खरल करके गोलियाँ बनालेवे। यह गोली सूजन, गुल्म, अर्श और भगन्दररोगवाले रोगियोंके लिये विशेष हितकारी है ॥ २० ॥

सप्तविंशतिकगुग्गुलु ।

त्रिकटु त्रिफला मुस्तविडङ्गामृतचित्रकम् ।
शठ्येला पिप्पलीमूलं हवुषा सुरदारु च ॥ २१ ॥
तुम्बुर्वरुष्करं चव्यं विशाला रजनीद्वयम् ।
विडसौवर्चलौ क्षारौ सैन्धवं गजपिप्पली ॥ २२ ॥
यावन्त्येतानि चूर्णानि तावद्द्विगुणगुग्गुलुः ।
कोलप्रमाणां गुटिकां भक्षयेन्मधुना सह ॥ २३ ॥

सोंठ, मिरच, पीपल, त्रिफला, नागरमोथा, बायविडङ्ग, गिलोय, चीता, कचूर, छोटी इलायची, पीपलामूल, हाऊबेर (अभावमें धनियाँ), देवदारु, धनियाँ, भिलावेका फल, चव्य, इंद्रायणकी जड, हल्दी; दारुहल्दी, विरियासञ्चरनमक, काला-

नमक, जवाखार, सज्जी, सैंधानमक और गजपीपल इन सम्पूर्ण औषधियोंका चूर्ण एक एक तोला और समस्त चूर्णसे दुगुनी गूगल लेवे। फिर सबोंको एकत्र उत्तम प्रकार खरल करके बेरकी बराबर गोलियाँ तैयार करलेवे। प्रतिदिन प्रातःकाल एक गोली मधुके साथ सेवन करे ॥ २१-२३ ॥

कासं श्वासं तथा शोथमर्शांसि च भगन्दरम्।
हृच्छूलं पार्श्वशूलं च कुक्षिवस्तिगुदे रुजम् ॥ २४ ॥
अश्मरीं मूत्रकृच्छ्रं च अन्त्रवृद्धिं तथा कृमिम्।
चिरज्वरोपसृष्टानां क्षयोपहतचेतसाम् ॥ २५ ॥
आनाहं च तथोन्मादं कुष्ठानि चोदराणि च।
नाडीं दुष्टव्रणान्सर्वान् प्रमेहं श्लीपदं तथा ॥
सप्तविंशतिको हन्ति सर्वरोगनिषूदनः ॥ २६ ॥

यह सप्तविंशतिकनामक गूगल खाँसी, श्वास, सूजन, बवासीर, भगन्दर, हृदयका शूल, पसलीका शूल, कुक्षि, वस्ति और गुदाके रोग, पथरी, मूत्रकृच्छ्र, अन्त्रवृद्धि, कृमिरोग एवं बहुत पुराने ज्वर, क्षयसे पीडित मनुष्योंके आनाह, उन्माद, कुष्ठ, उदररोग, नाडीव्रण, दुष्टव्रण, प्रमेह, श्लीपद तथा अन्यान्य सर्वप्रकारके विकारोंको तत्काल नष्ट करता है ॥ २४-२६ ॥

विष्यन्दनतैल।

चित्रकार्कत्रिवृत्पाठे मलपूहयमारकौ।
सुधां वचां लाङ्गलिकीं हरितालं सुवर्चिकाम् ॥
ज्योतिष्मतीं च संहृत्य तैलं धीरो विपाचयेत् ॥ २७ ॥

चीता, आक, निसोत इनकी जड, पाढ, गूलरकी जड, कनेरकी जड, थूहरकी जड, बच, कलिहारी, हरताल, सज्जी और मालकाङ्गनी इन सबोंको समान भाग लेकर कल्क बनावे और इसी कल्कके द्वारा चौगुने जलमें यथाविधि तिलके तेलको सिद्ध करे ॥ २७ ॥

एतद्विष्यन्दनं नाम तैलं दद्याद्भगन्दरे।
शोधनं रोपणं चैव सवर्णकरणं परम् ॥ २८ ॥

इस विष्यन्दननामवाले तेलको भगन्दर रोगमें व्यवहार करनेसे व्रण शुद्ध होकर शीघ्र भर जाता है और त्वचाका वर्ण अत्युत्तम होजाता है ॥ २८ ॥

करवीराद्यतैल।

करवीरनिशादन्तीलाङ्गलीलवणाग्निभिः।
मातुलुङ्गार्कवत्साह्वैः पचेत्तैलं भगन्दरे॥ २९॥

कनेरकी जड, हल्दी, दन्तीकी जड, कलिहारी, सैंधानमक, चीता, बिजौरे नींबूकी जड, आककी जड और कुडेकी छाल इनके समान भाग मिश्रित कल्कके साथ तेलको पकाकर लगानेसे भगन्दररोगमें अत्यन्त लाभ होता है॥ २९॥

निशाद्यतैल।

निशार्कक्षीरसिन्धवग्निपुराश्वहनवत्सकैः।
सिद्धमभ्यञ्जने तैलं भगन्दरविनाशनम्॥ ३०॥

हल्दी, आकका दूध, सैंधानोन, चीता, गूगल, कनेरकी जड और कुडेकी छाल इन सबोंका कल्क समान रूपसे मिलाहुआ एक सेर, जल आठ सेर और तिलका तेल दो सेर लेकर सबको एकत्रकर विधिपूर्वक पकावे। इस तेलको लगानेसे भगन्दररोग शीघ्र नष्ट होता है॥ २९॥

सैन्धवाद्यतैल।

सैन्धवं चित्रकं दन्ती पलाशं चेन्द्रवारुणी।
गोमूत्रेऽष्टगुणे पक्त्वा ग्राह्यमष्टावशेषितम्॥ ३१॥
क्वाथपादं पचेत्तैलं कल्कः कृष्णायसं मृतम्।
पचेत्तैलावशेषं च तेन लेप्यं भगन्दरम्॥
असाध्यं साधयत्याशु पक्वं कृमिकुलान्वितम्॥ ३२॥

सैंधानमक, चीता, दन्तीकी जड, ढाक और इन्द्रायणकी जड इनको समान भाग लेकर अठगुने गोमूत्रमें पकावे। जब पकते पकते आठवाँ भाग शेष रहजाय तब उतारकर छानलेवे। फिर इसमें काथसे चौथाई भाग तिलका तेल और कल्कके लिये कृष्णलोहकी भस्म ८ तोले मिलाकर तेलको पकावे। जब तेलमात्र शेष रहजाय तब उतारलेवे। इस तेलको लगानेसे कृमियुक्त और असाध्य भगन्दररोग तत्काल नाश होता है। ३१॥ ३२॥

भगन्दररोगमें पथ्य।

आमे संशोधनं लेपो लंघनं रक्तमोक्षणम्।
पक्वे पुनः शस्त्रवह्निक्षारकर्म यथाविधि॥ ३३॥

सर्वेऽपि शालयो मुद्गा विलेपी जाङ्गलोरसः ।
पटोलं शिग्रुवेत्राग्रं पत्तुरो बालमूलकम् ॥ ३४ ॥
तिलसर्षपयोस्तैलं तिक्तवर्गो घृतं मधु ।
एतत्पथ्यं यथादोषं नरैः सेव्यं भगन्दरे ॥ ३५ ॥

भगन्दररोगकी अपक (कच्ची) अवस्थामें संशोधन, औषधियोंका लेप, लंघन और रुधिरका निकलवाना आदि कर्म हितकर हैं। और भगन्दरके पकजानेपर शस्त्रक्रिया, अग्निदग्ध एवं क्षारादिकर्म विधिपूर्वक करे । पक और अपक दोनों अवस्थाओंमें शालिधानके चावल, मूंग, विलेपी, जंगली पशु पक्षियोंका मांसरस, परवल, सहिंजना, बेतकी कोंपल, शान्तिशाक, कच्चीमूली, तिल और सरसोंका तेल, तिक्तवर्ग, घृत और शहद इन सब पथ्य वस्तुओंको दोषानुसार सेवन करना चाहिये ॥ ३३–३५ ॥

भगन्दररोगमें अपथ्य ।

विरुद्धान्यन्नपानानि विषमाशनमातपम् ।
व्यायामं मैथुनं युद्धं पृष्ठयानं गुरूणि च ॥
संवत्सरं परिहरेदपि रूढव्रणो नरः ॥ ३६ ॥

स्वभावविरुद्ध अन्नपान और विषम भोजन, धूपका सेवन, कसरत, मैथुन, युद्ध, घोडे, ऊँट, हाथी आदिकी सवारी करना, बोझ उठाना और गुरुपाकी द्रव्योंका सेवन इन सबोंको भगन्दर रोगी व्रणके भरजानेपर भी एक वर्षतक सेवन नहीं करे ॥ ३६ ॥

इति भैषज्यरत्नावल्यां भगन्दररोगकी चिकित्सा ।

उपदंशकी चिकित्सा ।

स्निग्धस्विन्नशरीरस्य ध्वजमध्ये शिराव्यधः ।
जलौकापातनं वा स्यादूर्द्धाधः शोधनं तथा ॥ १ ॥
सद्यो निर्जितदोषस्य रुक्शोथावुपशाम्यतः ।
पाको रक्ष्यः प्रयत्नेन शिश्नक्षयकरो हि सः ॥ २ ॥

उपदंश (गरमी) रोगमें प्रथम रोगीको स्निग्ध द्रव्य पान कराकर स्वेदित करे । पश्चात् लिंगकी बीचकी शिराको वेधे अथवा जौंक लगवाकर रक्तमोक्षण

करावे । फिर वमन कराकर ऊपरसे और दस्त करवाकर नीचेसे शरीरकी शुद्धि करे । इस प्रकार करनेसे दोषोंकी शान्ति होजानेपर रोगीकी पीडा और सूजन तत्काल नष्ट होती है । लिङ्गकी सूजन जिस प्रकार पके नहीं इसका विशेष यत्न करना चाहिये क्योंकि पकजानेपर लिङ्गेन्द्रियका नाश होजाता है ॥ १ ॥ २ ॥

त्रिफलायाः कषायेण भृङ्गराजरसेन वा ।
व्रणप्रक्षालनं कुर्यादुपदंशप्रशान्तये ॥ ३ ॥

त्रिफलेके काढेसे अथवा भाँगरेके रससे प्रतिदिन उपदंशके व्रणोंको धोवे तो उपदंशरोग शमन होता है ॥ ३ ॥

दहेत्कटाहे त्रिफलां समां समधुसंयुताम् ।
उपदंशे प्रलेपोऽयं सद्यो रोपयति व्रणम् ॥ ४ ॥

लोहेकी कडाईमें समान भागसे मिलेहुए त्रिफलेको भुनलेवे, फिर शहदमें पीसकर उपदंशपर लेप करे तो शीघ्र व्रण भरजाते हैं । किसी ऋषिका ऐसा मत है कि, समान भाग त्रिफलेको नवीन हाँडीमें रखकर सकोरेसे उसके मुखको अच्छे प्रकार बन्दकरके मिश्रितकरके अग्निमें भस्म करलेवे । पश्चात् उस भस्मको शहदमें मिलाकर उपदंशपर लेप करे तो तत्काल व्रण शुष्क होते हैं ॥

रसाञ्जनं शिरीषेण पथ्यया वा समन्वितम् ।
सक्षौद्रं वा प्रलेपोऽयं सर्वलिङ्गगदापहः ॥ ५ ॥

रसौतको सिरसकी छाल अथवा हरडके साथ शहदमें पीसकर व्रणपर लेप करे । किंवा रसौतको शहदमें मिलाकर प्रलेप करे तो सर्वप्रकारके उपदंशविकार दूर होवें हैं ॥ ५ ॥

बब्बोलदलचूर्णेन उपदंशहरं परम् ।
गुण्डनं न्रस्थिचूर्णेन दाडिमत्वग्भवेन वा ॥ ६ ॥
लेपः पूगफलेनाश्वमारमूलेन वा तथा ।
सेवेन्नित्यं यवान्नं च पानीयं कौपमेव च ॥ ७ ॥

बबूरके पत्तोंका चूर्ण अथवा अनारकी छालका चूर्ण किंवा मनुष्यकी हड्डीका चूर्ण व्रणपर लगानेसे उपदंशरोग शीघ्र नष्ट होता है । सुपारीको जलमें घिसकर अथवा कनेरकी छालको पीसकर लेप करे तो उपदंशके व्रण शुष्क होते हैं । उपदंशरोगीको प्रतिदिन जौका भोजन और कुएँका जल सेवन करना चाहिये, इससे

लिङ्गरोग शीघ्र शान्त होता है ॥ ६ ॥ ७ ॥

जयाजात्यश्वमारार्कशम्याकानां दलैः पृथक् ।
कृतं प्रक्षालने क्वाथं मेढ्रपाके प्रयोजयेत् ॥ ८ ॥

उपदंशमें लिङ्गके पकजानेपर जयन्ती, चमेली, कनेर, आक और अमलतास इनके पत्तोंका अलग अलग क्वाथ बनाकर व्रणोंको धोवे ॥ ८ ॥

धूप ।

बदरार्कमपामार्गस्तथा ब्राह्मणयष्टिका ।
हिङ्गुलं च समं चैषां भागं कृत्वा तु धूपनम् ॥
दोषजं कर्मजं हन्यादुपदंशादिकं व्रणम् ॥ ९ ॥

बड़ीबेरकी छाल, आक, चिरचिटा, भारङ्गी और सिंगरफ इन सबोंको समान भाग लेकर एकत्र पीसकर धूनी देवे । इससे दोषज और कर्मज दोनों प्रकारके उपदंशोंके व्रण नष्ट होते हैं ॥ ९ ॥

धूप ।

रसं वङ्गं च खदिरं हरीतक्याश्च भस्मकम् ।
कोमलं कदलीभस्म गुवाकफलभस्म च ॥ १० ॥
एतत्तोलकमानं स्याद्धिङ्गुलं हरितालकम् ।
गन्धकं तुत्थकं चापि पद्मकं सरलं तथा ॥ ११ ॥
द्वे चन्दने देवदारु वकमं काष्ठमेव च ।
तथा केशरकाष्ठं च माषमानं प्रकल्पयेत् ॥ १२ ॥
एकीकृत्य च सञ्चूर्ण्य सर्वं चाङ्गेरिकाद्रवैः ।
तुलसीपत्रजरसैः पुरातनगुडेन च ॥ १३ ॥
घृतेन सह षट् कार्या वटिका मन्त्ररक्षिताः ॥ १४ ॥

शुद्ध पारा, वङ्ग, सफेद खैर, हरडकी, भस्म; कोमल केलेकी भस्म और सुपारीकी भस्म ये प्रत्येक एक एक तोला, सिंगरफ, हरिताल, शुद्ध गन्धक, तूतिया, पद्माख, धूपसरल, लालचन्दन, सफेद चन्दन, देवदारु, अगस्तिया और नागकेशर ये प्रत्येक एक एक माशा लेवे । फिर सबोंको एकत्र पीसकर लोहेके पात्रमें नोनियाघासके रस और तुलसीके रसको डालकर लोहेके डंडेसे खरल कर पुराने गुड और घृतमें मर्दन करके छः गोलियाँ बनालेवे ॥ १०—१४ ॥

वेदनायामुत्कटायां चतसः शुक्लवाससा ।
वेष्टयित्वा च निर्धूमाङ्गारोपरि च दापयेत् ॥
तं धूमं परिगृह्णीयान्नरो वस्त्रादिवेष्टितः ॥ १५ ॥
मुखनासाकर्णबहिर्निश्वासस्य निरोधतः ।
स्वेदे जातेऽस्य नैरुज्यं सायंप्रातर्दिनत्रयम् ॥
मासमात्रं तु पथ्याशी शाकाम्लदधिवर्ज्जनम् ॥ १६ ॥
गुर्वन्नपायसादीनि अपथ्यानि विवर्ज्जयेत् ।
दिनत्रये व्यतीते तु स्नानमुष्णाम्बुना चरेत् ॥ १७ ॥

तदनन्तर उपदंशमें दारुण पीडा होनेपर रोगी चारोंओरसे सफेद कपडेसे शरीरको ढककर तथा वस्त्रके मध्य सिकोरे आदिमें धूमरहित अग्निके अँगारेको रख उसमें एक गोली डालकर धूमपान करे । किन्तु रोगीको मुख, नासिका और कान वस्त्रसे खुले रखने चाहिये । यदि रोगकी अधिक प्रबलता हो तो दो अथवा चार गोलियोंको डालकर धूमपान करे । इस प्रकार प्रातः और सन्ध्यासमय तीन दिन तक धूमपान करे । धूमग्रहण करनेपर जो पसीना निकले उसको सूखे कपडेसे भीतरही भीतर पोंछलेवे । इसपर एक महीनेतक पथ्यद्रव्योंका भोजन करे और शाक, खटाई, दही, गुरुपाकी अन्न और खीर आदि अपथ्य पदार्थोंको त्यागदेवे । तीन दिनके पश्चात् गरम जलमें स्नान करे ॥ १५–१७ ॥

एवं धूमे कृते शान्ता व्रणाश्च पिडका अपि ।
तथा शोथश्चामवातः खञ्जता पङ्गुतापि च ॥
कुष्ठोपदंशशान्त्यर्थं भैरवेण प्रकीर्त्तितः ॥ १८ ॥

इस भाँति धूमपान करनेसे उपदंशके व्रण, पिडिका, सूजन, आमवात, खञ्जता, पंगुता, कुष्ठ और उपदंश प्रभृति सम्पूर्ण विकार बहुत शीघ्र नष्ट होते हैं । इस योगको भैरवाचार्यने निर्माण किया है ॥ १८ ॥

लेप ।

विषतिन्दुं लोहपात्रे मलयेन्निम्बुकद्रवैः ।
घर्षेत्कृष्णसुधामूलं प्रत्येकं माक्षिकं दृढम् ॥ १९ ॥
तुत्थं तदनु सूतं च लोहदण्डेन तद्युतम् ।
सर्वं तदेकतां यातं तेन लिङ्गं प्रलेपयेत् ॥ २० ॥

लेपे शुष्के पुनर्लेपं दद्याच्छुष्के पुनस्तथा ।
शुष्कं न स्रंसयेल्लेपं शुष्कस्योपरि दापयेत् ॥ २१ ॥

मलयुक्त लोहेके पात्रमें कागजीनींबूके रसद्वारा कुचले, थूहरकी जड, सोनामाखी धतिया और पारेको एक एक माशा लेकर यथाक्रम लोहेके डंडेसे खरल करे । जब ये सब औषधियाँ एकरूप होजावे तब लिंगपर लेप करे । लेपके सूखजानेपर दूसरा लेप करे । फिर जब वह भी सूखजाय तब उस सूखे हुएपरही और लेप करे । सूखे हुए लेपको छुडावे नहीं, किन्तु उसीपर बार बार लेप करता रहै ॥ १९-२१ ॥

भैरवरस ।

शुद्धसूतं ग्रहीतव्यं रक्तिकाशतमात्रकम् ।
त्रिगुणां शर्करां लौहे निम्बदण्डेन मर्दयेत् ॥ २२ ॥
याममात्रं तत्र दद्याच्छ्वेतं खदिरचूर्णकम् ।
सूततुल्यं ततः कुर्यान्मर्दनात्कज्जलोपमम् ॥ २३ ॥
विंशतिर्वटिकाः कार्य्याः स्थाप्या गोधूमचूर्णके ।
निःशेषं निःसृता ज्ञात्वा पिडकास्ताः कलेवरे ॥ २४ ॥
भैरवं देवमभ्यर्च्य बलिं तस्मै प्रदाय च ।
विधाय योगिनीपूजां दुर्गामभ्यर्च्य यत्नतः ॥ २५ ॥
वटिकास्ताः प्रयोक्तव्या भिषजा जानता क्रियाम् ।
दिवसत्रितयं दद्यात्तिस्रस्तिस्रो विजानता ॥ २६ ॥
चतुर्थाच्च समारभ्य एकामेकां प्रयोजयेत् ।
एवं चतुर्दशदिनैर्नीरोगो जायते नरः ॥ २७ ॥
पथ्यं शर्करया सार्द्धमुष्णान्नं घृतगन्धि च ।
कुर्यात्साकांक्षमुत्थानं सकृद्भोजनमिष्यते ॥ २८ ॥
जलपानं जलस्पर्शं न कदाचन कारयेत् ।
दुःसहायां तु तृष्णायामिक्षुदाडिमकादिकम् ॥ २९ ॥
शौचमुष्णाम्बुना कार्य्यं वाससा प्रोञ्छनं द्रुतम् ।
वातातपाग्निसम्पर्कं दूरतः परिवर्जयेत् ॥ ३० ॥

शुद्ध किया हुआ पारा १०० रत्ती और शुद्ध खाँड ३०० रत्ती दोनोंको लोहेके पात्रमें एकत्रकर नीमके डंडेसे एक प्रहरतक अच्छे प्रकार घोटे। फिर उसमें १०० रत्ती सफेद खैरका चूर्ण डालकर घोटे। जब घुटते घुटते कज्जलकी समान बारीक होजाय तब उसकी बीस गोलियाँ बनाकर गेहूंके आटेमें रखदेवे। जब शरीरमें उपदंशके विषद्वारा सब फुन्सियाँ निकलीहुई मालूम हों तब प्रथम भैरवदेवको पूजकर और उनके लिये बलि देकर तथा योगिनी और दुर्गाका विधिपूर्वक पूजन करके पश्चात् उक्तगोलियोंको सुवैद्य यत्नके साथ प्रयोग करे। तीन दिनतक नित्य तीन तीन गोली देवे और चौथे दिनसे एक एक गोली देवे। इस प्रकार १४ दिन तक इन गोलियोंको सेवन करानेसे रोगी शीघ्रही आरोग्य होता है। इसपर खाँडके साथ थोडा घृत मिलाकर अपक्वका अन्न और सुगन्धियुक्तद्रव्योंका पथ्य देवे। जब इच्छा हो तब उठे बैठे और एकवार भोजन करे। शीतल जलपान और शीतल जलका स्पर्शतक कदापि नहीं करना चाहिये। यदि अधिक तृषा मालूम हो तो ईख और अनारका रस पान करे। शौचके समय उष्णजलसे शुद्धि करे और तत्काल सूखे अँगोछेसे पोंछडाले। शीतलवायु, धूप और अग्नि इनके सम्पर्कको दूर हीसे त्याग देवे ॥ ३० ॥

मेघागमे च शीते वा कार्यमेतद्विजानता।
मुखरोगे तु सञ्जाते मुखरोगहरी क्रिया ॥ ३१ ॥
श्रमाध्वभाराध्ययनस्वप्नालस्यं विवर्जयेत्।
ताम्बूलं भक्षयेन्नित्यं कर्पूरादिसुवासितम् ॥ ३२ ॥
क्रिया श्लेष्महरी युक्ता वातपित्ताविरोधिनी।
लवणं वर्जयेदम्लं दिवानिद्रां तथैव च ॥ ३३ ॥
रात्रौ जागरणं चैव स्त्रीमुखालोकनं तथा।
सप्ताहद्वयमुत्क्रम्य स्नानमुष्णाम्बुना चरेत् ॥ ३४ ॥
पथ्यं कुर्याद्धितमिदं जाङ्गलानां रसादिभिः।
व्यायामाद्यं वर्जनीयं यावन्न प्रकृतिर्भवेत् ॥ ३५ ॥

वर्षा होनेपर अथवा शीतकालमें उपर्युक्त औषधि और धूपादि वस्तुओंको विधिपूर्वक सेवन करे। इस औषधिके सेवन करनेसे यदि मुख पकजाय तो मुखरोगको हरनेवाली चिकित्सा करना श्रेष्ठ है। उपदंशरोगी परिश्रम करना, मार्गमें चलना, बोझ उठाना, पढना, दिनमें सोना और आलस्य इनको त्याग देवे। एवं कपूरादि सुगन्धिवाले द्रव्योंसे सुवासित ताम्बूलको प्रतिदिन भक्षण करे। इस औषधिको

सेवन करनेके अनन्तर कफनाशक और वात पित्तकी मिलीहुई क्रिया करे । नमक, खटाई, दिनमें सोना, रात्रिमें जागना और स्त्री प्रसंग करना तत्क्षण परित्याग कर-देवे । उक्त प्रकारसे १४ दिनतक औषधि सेवनके पश्चात् गरमजलसे स्नानकरना और जङ्गलीजीवोंके मांसरसके साथ पथ्य अन्नोंका भोजन करना हितकारी है । जबतक रोगीकी पहले जैसी अवस्थान होजाय तबतक व्यायामादि परिश्रमजन्य कार्य नहीं करने चाहिये ॥ ३५ ॥

एवं कृतविधानं तु यः करोत्येतदौषधम् ।
स एव पापरोगस्य पारं याति जितेन्द्रियः ॥ ३६ ॥
पिडका विलयं यान्ति बलं तेजश्च वर्द्धते ।
रुजा च प्रशमं याति ग्रन्थि शोथश्च शाम्यति ॥ ३७ ॥
अस्थांभवति दार्ढ्यं च आमवातश्च शाम्यति ।
भैरवेन समाख्यातो रसोऽयं भैरवः स्वयम् ॥ ३८ ॥

जो जितेन्द्रिय रोगी इस निर्दिष्ट रीतिके अनुसार रहता हुआ औषधि सेवन करता है वहही इस पापरोगको जीतकर सुखी होता है । इस औषधिसे उपदंशकी पिडिकायें नाश होती हैं और बल तथा तेज बढता है । एवं अन्यान्य सब रोग शान्त होजाते हैं, ग्रन्थि और सूजन नष्ट होती हैं, हड्डियें अत्यन्त दृढ होती हैं और आमवातरोग शान्त होता है । इसको भैरवजीने कहा है इससे यह रस भैरवनामसे प्रसिद्ध है ॥ ३६-३८ ॥

रसगुग्गुलु ।

ग्राह्यः पातनयन्त्रेण शुद्धश्चन्द्रसमो रसः ।
रक्तिकाशतमेतस्य शर्करा त्रिगुणा भवेत् ॥ ३९ ॥
ततश्चतुर्गुणो ग्राह्यो गुग्गुलुर्महिषाक्षकः ।
घृतं रससमं दद्यान्मर्दयेच्च प्रयत्नतः ॥ ४० ॥
विंशतिर्वटिकाः कार्यास्तिस्रस्तिस्रो दिनत्रयम् ।
एकादश दिनैरन्या देया एकादशैव ताम् ॥
सप्ताहद्वयमेवं च कारयेद्भिषजां वरः ॥ ४१ ॥

पातनयन्त्रमें शुद्ध किया हुआ पारा १०० रत्ती, चीनी ३०० रत्ती, शुद्ध भैंसिया गूगल ४०० रत्ती और घृत १०० रत्ती लेवे । फिर सर्वोको एकत्र लोहेके पात्रमें

लोहेके डंडेसे उत्तम प्रकार खरल करके २० गोलियाँ बनालेवे। इन गोलियोंके सेवन करनेकी विधि इसप्रकार है-प्रथम तीन दिनतक तीन तीन गोलियाँ भक्षण करे, फिर चौथे दिनसे ११ दिनतक एक एक गोली खावे, इसप्रकार १४ दिनमें यह समस्त औषधि रोगीको सेवन करानी चाहिये ॥ ३९-४१ ॥

लवणं वर्जयेदम्भः पादार्द्धांशनमिष्यते ।
दिनद्वये व्यतीते तु पादोनं पथ्यमाचरेत् ॥ ४२ ॥
मसूरसूपं सगुडं व्यञ्जनं चाथ कल्पयेत् ।
पुनर्नवा पटोलानि तिक्तपत्री च गोक्षुरम् ॥ ४३ ॥
पुटपत्री कोकिलाक्षं शाकार्थे घृतभर्जितम् ।
शर्करा लवणस्थाने वेसवारे धनीयकम् ॥ ४४॥
लवङ्गाजाजिहिङ्गूनि धान्यकं जीरकाणि च ।
पाकार्थे सम्प्रदातव्यं संस्कारार्थं भिषग्वरैः ॥ ४५ ॥

इसपर लवण और जलको त्यागकर वक्ष्यमाण विधिसे आहार करे। पहले दिन खुराकसे चौथाई, दूसरे दिन आधा और दोदिनके पश्चात् पौन पौन भाग भोजन करे। गुडके साथ व्यञ्जन और मसूरकी दालका यूष पथ्य है। शाकोंमें घीमें भुने-हुए पुनर्नवे, परवल, ककोडे, गोखरू, पुटपत्री और तालमखानेको खाना श्रेष्ठ है। शाकमें नमककी जगह खाँड और मसालेकी जगह धनियाँ डाले। पाकको सुगन्धित करनेके लिये लौंग, कालाजीरा, हींग, धनियाँ और जीरेको एकत्र पीस-कर डाले ॥ ४२-४५ ॥

भैरवस्य रसस्यान्याः क्रिया अत्र प्रयोजयेत् ।
रसगुग्गुलुरेवं हि सर्वाञ्जित्वाऽऽमयानयम् ॥ ४६ ॥
कुष्ठोपदंशनामानं व्रणं वातादिसंयुतम् ।
कामदेवप्रतीकाशश्चिरजीवी भवेन्नरः ॥ ४७ ॥

इसमें अन्य सर्व क्रियायें भैरवरसकी समान करे। इस प्रकार व्यवहार किया हुआ यह रसगूगल सर्वप्रकारके रोगोंको नष्टकर उपदंश, कुष्ठ तथा वातादि युक्त रोगोंके व्रणोंको शीघ्र सुखाता है। इसके सेवन करनेसे शरीर कामदेवकी समान कान्तिमान् होता है और वह मनुष्य बहुत कालतक जीता है ॥ ४६ ॥ ४७ ॥

सारिवाद्यवलेह ।

सारिवायाः पलशतं जलद्रोणे विपाचयेत् ।
तस्मिन्पादावशेषे तु गुडूची शतमूलिका ॥ ४८ ॥

विदारी जीवनी त्रिवृत्कटुकी त्रिफला तथा ।
क्षुद्रैला त्रायमाणा च प्रत्येकार्द्धपलं मितम् ॥ ४९ ॥
सुपिष्टं निक्षिपेत्तत्र शीते मधुपलाष्टकम् ।
क्षीरानुपानयोगेन पिबेत्तोलकसम्मितम् ॥ ५० ॥

अनन्तमूलको १०० पल लेकर ३२ सेर जलमें पकावे । पकते पकते जब ८ सेर जल शेष रहजाय तब उतारकर छानलेवे । फिर उस क्वाथमें गिलोय, शतावर, विदारीकन्द, जीवनीयगणकी समस्त औषधियाँ, निसोत, कुटकी, त्रिफला, छोटी इलायची और त्रायमाणा इनके दो दो तोले चूर्णको खूब बारीक पीसकर डालदेवे और उत्तम प्रकार पकावे । जब पककर गाढा होजाय तब उतारले और शीतल होजानेपर आठ पल शहद मिलादेवे । इसको प्रतिदिन प्रातःकाल एक तोला प्रमाण गोदुग्धके साथ सेवन करे ॥ ४८–५० ॥

प्रमेहाश्चोपदंशश्च मूत्रकृच्छ्रं च पीडिकाः ।
नश्यन्ति त्वपरे रोगा रक्तदुष्टा भवन्ति ये ॥ ५१ ॥
पारदाद्विकृतिश्चापि सन्देहो नात्र कश्चन ।
मुक्तश्च सर्वरोगेभ्यो बलवर्णाग्निसंयुतः ॥
मानवः सिद्धकामोऽस्माच्छीघ्रं भवति निश्चितम् ॥५२॥

इससे बीसोंप्रकारके प्रमेह, उपदंश, मूत्रकृच्छ्र, फुन्सियें एवं अन्यान्य दूषित रक्तसे होनेवाले रोग शीघ्र नष्ट होते हैं । इसके सेवनसे पारेके खानेसे उत्पन्न हुए विकारभी निस्सन्देह दूर होते हैं । इसको सेवन करनेवाला पुरुष सम्पूर्ण रोगोंसे मुक्त होकर बल, वर्णयुक्त और अत्यन्त प्रदीप्त अग्निवाला होता है । एवं शीघ्रही इष्टसिद्धिको प्राप्त करता है ॥ ५१ ॥ ५२ ॥

रसशेखर ।

पारदं चाहिफेनं च द्विर्द्वादश च रक्तिकम् ।
आयसे निम्बकाष्ठेन मर्दयेत्तुलसीरसैः ॥ ५३ ॥
तस्मिन्सम्मूर्च्छिते दद्याद्दरदं रससम्मितम् ।
मर्दयेच्च तुलस्यैव ततश्चैतानि दापयेत् ॥ ५४ ॥
जातीकोषफले चैव पारसीययमानिकाम् ।
आकारकरभं चैव द्वात्रिंशद्रक्तिकां प्रति ॥ ५५ ॥

मर्दयेत्तुलसीतोयैरेतेषां द्विगुणं शुभम् ।
दद्यात्खदिरसत्त्वं च वटिका चणकप्रभा ॥ ९६ ॥

पारा २ रत्ती और अफीम १२ रत्ती लेकर दोनोंको लोहेके बर्त्तनमें नीमके डंडेसे तुलसीका रस डालकर घोटे । जब पारा मूर्च्छित होजाय तब उसमें दो रत्ती सिंगरफ मिलाकर तुलसीके ही रससे दुबारा खरल करे । फिर जावित्री, जायफल, खुरासानी अजवायन और अकरकरा ये प्रत्येक बत्तीस बत्तीस रत्ती और सबोंसे दुगुना उत्तम प्रकारका खैरसार डालकर तुलसीके रसमें यथाविधि खरल करके चनेकी बराबर गोलियाँ बनालेवे ॥ ९२-९६ ॥

सायं शुभे प्रयोज्ये च लवणाम्लं च वर्जयेत् ।
गलत्कुष्ठं तथा स्फोटान्दुष्टान् गर्दभिकामपि ॥ ९७ ॥
ये स्युर्व्रणा नृणामन्ये उपदंशपुरःसराः ।
तान् सर्वान्नाशयत्याशु सिद्धोऽयं रसशेखरः ॥ ९८ ॥

इसमेंसे प्रतिदिन सायङ्कालमें दो दो गोली खाय, नमक और खटाईका त्याग करे, यह रसशेखरनामक सिद्धरस गलत्कुष्ठ, दुष्ट स्फोटक, मर्दभिका, उपदंशके व्रण और अन्य सर्वप्रकारके व्रणोंको तत्काल नाश करता है ॥ ९७ ॥ ९८ ॥

करञ्जाद्यघृत ।

करञ्जनिम्बार्जुनशालजम्बूवटादिभिः कल्ककषायसिद्धम् ।
सर्पिर्निहन्यादुपदंशदोषं सदाहपाकं स्रुतिरागयुक्तम् ॥९९॥

करञ्जकी जड, नीम, अर्जुन, शालवृक्ष, जामुन, बड, गूलर, पीपल, पिलखन और बेंत इन सबोंकी छालके कल्क और काथके द्वारा सिद्ध किये हुए घृतको सेवन करनेसे दाह, पाक और राधका स्राव होना आदि दोषोंसहित उपदंशरोग नष्ट होता है ॥ ९९ ॥

भूनिम्बाद्यघृत ।

भूनिम्बनिम्बत्रिफलापटोलकरञ्जजातीखदिरासनानाम् ।
सतोयकल्कैर्घृतमाशु पक्वं सर्वोपदंशापहरं प्रदिष्टम् ॥६०॥

चिरायता, नीम, त्रिफला, परवल, करंजुआ, जावित्री, खैर और आसना इनके काथ और कल्कके साथ विधिपूर्वक घृतको पकावे । यह घृत नियमानुसार सेवन करनेपर सर्वप्रकारके उपदंशों (आतशक) को बहुत शीघ्र हरता है ॥ ६० ॥

अनन्ताद्यघृत।

अनन्तामलकीद्राक्षाः काकोलीयुगलं वरीम्।
एलाद्वयं विदारीं च मधुकं मधुकं सुराम्॥ ६१॥
त्रिफलां स्वर्णपर्णां च बीजं गोक्षुरसम्भवम्।
दशमूलं तालमूलीं त्रिवृतामिन्द्रवारुणीम्॥ ६२॥
नीलिनं शूकशिम्ब्याश्च बीजं कर्षप्रमाणतः।
कल्कीकृत्य पचेत्प्रस्थे सर्पिषः सारिवाम्भसा॥ ६३॥
घृतमेतदनन्ताद्यमुपदंशविनाशनम्।
रसायनं परं वृष्यमस्रदोषनिषूदनम्॥ ६४॥

प्रथम ४ सेर अनन्तमूलको लेकर ३२ सेर जलमें पकावे। जब पकते २ आठ सेर जल शेष रहे तब उतारकर छान लेवे। फिर कल्कके लिये अनन्तमूल, आमले, दाख, काकोली, क्षीरकाकोली, शतावर, छोटी इलायची, बडी इलायची, विदारी कन्द, मुलहठी, महुआ, कपूरकचरी, त्रिफला, सनाय, गोखुरूके बीज, दशमूलकी सब औषधियाँ, मुसली, निसोथ, इन्द्रायन, नीलवृक्षकी जड और कौंछके बीज इन सब औषधियोंको एक एक कर्ष लेवे और सबोंको एकत्र कूटपीसकर कल्क बनाले। पश्चात् इस कल्क और उपर्य्युक्त क्वाथके द्वारा एक प्रस्थ गोघृतको उत्तम प्रकार पकावे। इस अनन्ताद्य घृतको सेवन करनेसे उपदंशका और तज्जन्य दूषित रक्तका तत्काल नाश होता है। यह घृत अत्यन्त बल, वीर्यवर्धक और परमरसायन औषधं है॥ ६१-६४॥

आगारधूमाद्यतैल।

आगारधूमो रजनी सुराकिण्वं च तैस्त्रिभिः।
भागोत्तरैः पचेत्तैलं कण्डूशोथरुजापहम्॥
शोधनं रोपणं चैव सवर्णकरणं तथा॥ ६५॥

घरका धुआ एक पल, हल्दी दो पल और मदिराका मैल तीन पल लेवे। इन सबोंके द्वारा एक प्रस्थ तिलके तैलको विधिपूर्वक पकावे। यह तैल खुजली सूजनको दूर करता है एवं उपदंशके व्रणोंकी राधादिको निकालकर उनको शुष्क कर त्वचाको सुन्दरवर्णवाली बनाता है॥ ६५॥

उपदंशरोगमें पथ्य।

छर्दिर्विरेको ध्वजमध्यनाडीवेधो जलौकःपरिपातनं च।
सेकः प्रलेपो यवशालयश्च धन्वामिषं मुद्गरसो घृतानि॥

कठिल्लकं शिग्रुफलं पटोलं शालिञ्चशाकं नवमूलकं च।
तिक्तं कषायं मधु कूपवारि तैलं च हन्यादुपदंशरोगम् ६७

वमन, विरेचन, लिङ्गके बीचकी शिराको छेदना, जौंक लगवाना, सेचन, सेंक और लेप करना, जौ, शालिधान, धन्वदेशके पशु पक्षियोंका मांस, मूँगका यूष, घृत, करेला, सहिंजनेकी फली, परवल, शालिञ्चशाक, कच्ची मूली, तीखे और कषैले-रसवाले पदार्थ, शहद, कुएका जल तथा तेल ये सब उपदंशरोगमें हितकारी हैं। इनके सेवनसे उक्तरोग शीघ्र नष्ट होता है ॥ ६६ ॥ ६७ ॥

उपदंशरोगमें अपथ्य।

दिवानिद्रां मूत्रवेगं गुर्वन्नं मैथुनं गुडम्।
आयासमम्लं तक्रं च वर्जयेदुपदंशवान् ॥ ६८ ॥

उपदंशरोगी दिनमें सोना, मूत्रके वेगको रोकना, भारीअन्न और गुड खाना, मैथुन, कसरत करना, खटाई या खट्टे द्रव्य और मठेका सेवन करना त्यागदेवें। क्योंकि ये सब इसरोगमें विशेष अनिष्टकर हैं ॥ ६८ ॥

इति भैषज्यरत्नावल्याम् उपदंशचिकित्सा।

शूकदोषकी चिकित्सा।

हितं च सर्पिषः पानं पथ्यं चापि विरेचनम्।
हितः शोणितमोक्षश्च यच्चापि लघु भोजनम् ॥ १ ॥

शूकदोषमें औषधियों द्वारा पकाये हुए घृतको पीना, जुलाबलेना, रक्तमोक्षण (फस्त खुलवाना) और हलका भोजन करना विशेष हितकारी है ॥ १ ॥

सर्षपीं लिखितां सूक्ष्मैः कषायैरवचूर्णयेत्।
तैरेवाभ्यञ्जनं तैलं साधयेद्व्रणरोपणम् ॥ २ ॥
क्रियेयमधिमन्थेऽपि रक्तं स्राव्यं तथोभयोः।
अष्ठीलायां हृते रक्ते श्लेष्मग्रन्थिवदाचरेत् ॥ ३ ॥

शूकदोषरोगमें सर्षपिकानामक पिडिकाको सिहोडे आदिके पत्तोंसे मर्दनकर ढाक, मंजीठ, पीपल, वडआदि कषायद्रव्योंके चूर्णसे घावको भरे और उपर्युक्त कषायवृक्षोंकी छालके क्वाथ तथा कल्कद्वारा पकायेहुए तैलको लगावे तो व्रण शीघ्र सूख जाता है। यह क्रिया अधिमन्थरोगमें भी करे। सर्षपी और अधिमन्थ इन

दोनों रोगोंमें रक्तमोक्षण कराना विशेष उपयोगी है। अष्ठीला रोगमें फस्त-खुलवाकर कफज ग्रन्थिरोगमें कहीहुई विधिके अनुसार चिकित्सा करनी चाहिये ॥ २ ॥ ३ ॥

कुम्भिकायां हरेद्रक्तं पक्वायां शोधिते व्रणे।
तिन्दुकत्रिफलालोध्रैर्लेपस्तैलं च रोपणम् ॥ ४ ॥

पकी हुई कुम्भिकामें रक्तमोक्षण करे और राधआदिको निकालकर व्रणको शुद्ध करे। फिर तेंदू, त्रिफला, लोध इन सबोंको एकत्र पीसकर लेप करे अथवा उक्त द्रव्योंके कल्कद्वारा तेलको पकाकर लगावे। इससे व्रण शीघ्र भरता है ॥ ४ ॥

अलज्यां क्रूररक्तायामयमेव क्रियाक्रमः।
स्वेदयेद् ग्रथितं स्निग्धं नाडीस्वेदेन बुद्धिमान् ॥
सुखोष्णैरुपनाहैश्च सुस्निग्धैरुपनाहयेत् ॥ ५ ॥

अलजीरोगमें रक्त दूषित हो तो कुम्भिकाके समान उसकी चिकित्सा करनी चाहिये। ग्रथित नामक शूकदोषमें स्निग्धद्रव्योंसे रोगीको स्निग्धकर नाडीमें स्वेद प्रदान करके स्निग्ध और सुखोष्ण प्रलेप करे ॥ ५ ॥

उत्तमाख्यां तु पिडकां सञ्छिद्य बडिशोद्धृताम्।
कल्कैश्चूर्णैः कषायाणां क्षौद्रयुक्तैरुपाचरेत् ॥ ६ ॥

मृत्पात्रे लौहपात्रे च शनैर्मृद्वग्निना पचेत् ॥ ८८ ॥

मिरच, निसोत, दन्तीकी जड, आकका दूध, गोबरका रस, देवदारु, हल्दी, दारुहल्दी, बालछड, कूठ, चन्दन, इन्द्रायन, कनेर, हरिताल, मैनसिल, चीता, कलिहारी, वायविडङ्ग, चकवडके बीज, सिरसकी छाल, कुडेकी छाल, नीमकी

छाल, सतौनेकी छाल, थूहरका दूध, गिलोय, अमलतास, करञ्ज, नागरमोथा, खैर, पीपल, वच और मालकांगुनी ये औषधियाँ पृथक् पृथक् चार चार तोले और मीठा तेलिया ८ तोले, कडवा तेल १ आढक और गोमूत्र ४ आढक परिमाण लेवे। प्रथम पूर्वोक्त औषधियोंका कल्क बनालेवे फिर सबोंको यथाविधि एकत्रकर मिट्टीके अथवा लोहेके पात्रमें मन्द मन्द अग्निद्वारा तेलको सिद्ध करे ॥ ८९–८८ ॥

पक्त्वा तैलवरं ह्येतन्म्रक्षयेत्कुष्ठकान् व्रणान्।
पामाविचर्चिकादद्रुकण्डूविस्फोटकानि च ॥ ८९ ॥
वलयः पलितं छाया नीली व्यङ्गस्तथैव च।
अभ्यङ्गेन प्रणश्यन्ति सौकुमार्यं च जायते ॥ १९० ॥
प्रथमे वयसि स्त्रीणां यासां नस्यश्च दीयते।
परामपि जरां प्राप्य न स्तना यान्ति नम्रताम् ॥ ९१ ॥
बलीवर्दस्तुरङ्गो वा गजो वायुनिपीडितः।
एभिरभ्यञ्जनैर्गाढं भवेन्मारुतविक्रमः ॥ ९२ ॥

उत्तम प्रकारसे पकाकर सिद्ध किये हुए इस तेलको कुष्ठके व्रणोंपर लगावे तो कुष्ठव्रण शीघ्र नष्ट होते हैं। यह तेल पामा, विचर्चिका, दाद, कण्डू, विस्फोटक, बली, पलित, छाया, नीली और व्यङ्ग इन सब रोगोंको अभ्यंगमात्रसेही नष्ट कर देताहै तथा सुकुमारताको उत्पन्न करताहै। जिन स्त्रियोंकी बाल्यावस्थामेंही इस तेलको नास दिया जाताहै उनके अत्यन्त वृद्धताको प्राप्त होनेपर भी स्तन नम्रताको प्राप्त नहीं होते। यदि बैल, घोडा अथवा हाथी वायुरोगसे पीडित हों तो उनके अंगोंपर इस तेलका गाढा गाढा लेप करे तो वे वायुके वेगके समान पराक्रमी होजाते हैं ॥ ८९–१९२ ॥

सोमराजीतैल।

सोमराजी हरिद्रे द्वे सर्षपाः कुष्ठमेव च।
करञ्जैडगजाबीजं पत्राण्यारग्वधस्य च ॥ ९३ ॥
विपचेत्सार्षपं तैलं नाडीदुष्टव्रणापहम्।
अनेनाशु प्रशाम्यन्तिकुष्ठान्यष्टादशैव तु ॥ ९४ ॥
नीलिका पिडिका व्यङ्गा गम्भीरं वातशोणितम्।
कण्डूकच्छूप्रशमनं दद्रुपामानिवारणम् ॥ ९५ ॥

बापची, हल्दी, दारुहल्दी, सफेद सरसों, कूठ, करञ्ज, चकवडके बीज, और अमलतासके पत्ते इन औषधियोंके समान भाग मिश्रित कल्कके द्वारा सरसोंके तेलको पकावे। यह तेल मर्दन करनेसे नासूरको शीघ्र दूर करता है तथा अठारह प्रकारके कुष्ठ, नीलिका, पिडिका, व्यंग, गम्भीर वातरक्त, कण्डू, कच्छू, दद्रु और पामा इत्यादिरोग इस तेलके लगानेसे तत्काल नष्ट होते हैं॥

बृहत्सोमराजीतैल।

सोमराजीतुलाक्काथे तथा दद्रुहणस्य च।
गोमूत्रस्य तथा पात्रे कल्कं दत्त्वा विचक्षणः॥ ९६॥
विपचेत्कार्षिकैर्भागैःप्रस्थं तैलं तु सार्षपम्।
चित्रकं लाङ्गलाख्या च नागरं कुष्ठमेव च॥ ९७॥
हरिद्रा नक्तमालं च हरितालं मनःशिला।
आस्फोतार्ककरवीरं सप्तपर्णं च गोमयम्॥ ९८॥
खदिरो निम्बपत्रं च मरिचं कासमर्दकम्।
एतानि श्लक्ष्णपिष्टानि कल्कंदत्त्वा विचक्षणः॥ ९९॥

बापचीका क्वाथ १०० पल, चकवडके बीजोंका क्वाथ १०० पल, गोमूत्र ३२ सेर, सरसोंका तेल ६४ तोले और चीता, कलिहारी, सोंठ, कूठ, हल्दी, करञ्ज, हरिताल, मैनसिल, आस्फोत (लता विशेष), आककी जड, सफेद कनेरकी जड, सतौनेकी छाल, गोबरका रस, खैर, नीमके पत्ते, मिरच और कसौंदी इनको दो दो तोले लेकर खूब बारीक पीसकर कल्क बनावे। फिर सबोंको एकत्र मिलाकर अच्छेप्रकार तेलको पकावे॥ ९६-९९॥

हन्ति सर्वाणि कुष्ठानि कृमिदुष्टव्रणानि च॥ २००॥
किटिभं दद्रुजातं च गात्रवैवर्ण्यमेव च।
विशीर्णचर्ममांसादिदृढीकरणमुत्तमम्।
पाण्डुरोगं तथा कण्डूं विसर्पं हन्ति दारुणम्।
ये चान्ये त्वग्गता रोगास्तांस्तु शीघ्रं व्यपोहति॥ १॥

यह यथाविधि सेवन करनेसे सर्वप्रकारके कुष्ठ, कृमिराग, दुष्टव्रण, किटिभकुष्ठ, दद्रुकुष्ठ, शरीरकी विवर्णता, त्वचाका फटना, पाण्डुरोग, कण्डू और दारुण विसर्प इत्यादि रोगोंको शीघ्र नष्ट करताहै और अन्यान्य जितने त्वचासम्बन्धी रोग हैं उन

सबोंको तत्काल नाश करता है एवं मांसादि धातुओंको अत्यन्त दृढ़ करता है ॥ २०० ॥ २०१ ॥

विषतैल ।

नक्तमालं हरिद्रे द्वे अर्कं तगरमेव च ।
करवीरं वचा कुष्ठमास्फोता रक्तचन्दनम् ॥ २ ॥
मालतीसिन्दुवारं च मञ्जिष्ठा सप्तपर्णकम् ।
एषामर्द्धपलान्भागान्विषस्य द्विपलं तथा ॥
चतुर्गुणे गवां मूत्रे तैलप्रस्थं विपाचयेत् ॥ ३ ॥
श्वित्रविस्फोटकिटिभकीटलूताविचर्चिकाः ।
कण्डूकच्छूविकाराश्च ये व्रणा विषदूषिताः ॥ ४ ॥
ते सर्वे नाशमायान्ति तमः सूर्योदये यथा ।
विषतैलमिदं नाम्ना सर्वव्रणविशोधनम् ॥ ५ ॥

करंजुआ, हल्दी, दारुहल्दी आकका दूध, तगर, कनेरकी जड, वच कूठ, आस्फोतानामक लता, लालचन्दन, चमेलीके पत्ते, सिह्माल्ट, मंजीठ, सतौना इन सबोंको दो दो तोले और मीठा तेलिया ८ तोले लेकर एकत्र पीस लेवे । फिर इस कल्कके द्वारा एक प्रस्थ तैलको चौगुने गोमूत्रमें विधिपूर्वक मिलाकर पकावे । इस तैलको लगानेसे श्वेतकुष्ठ, विस्फोटक, किटिभ, कीटरोग, लूतादोष, विचर्चिका, कण्डू, कच्छूआदि विकार और विषदूषित व्रण यह सब रोग इस प्रकार शीघ्र नाशको प्राप्त होते हैं; जिस प्रकार सूर्योदयके समय अन्धकारसमूह तत्काल छिन्न-भिन्न होजाता है । यह विषतैल विशेषकर सर्व प्रकारके व्रणोंको शुद्ध करनेवाला है ॥ २-५ ॥

श्वित्रपञ्चाननतैल ।

एरण्डतुलसीबीजं वागुजी चक्रमर्दकम् ।
तिक्तकोषातकीबीजं कृष्णाङ्कोटस्य बीजकम् ॥ ६ ॥
कल्कं दत्त्वा शिलाकाशी पथ्या कुष्ठं विडङ्गकम् ।
गोमूत्रदधिदुग्धैश्च पचेदप्याजमूत्रकैः ॥ ७ ॥
कटुतैलं च तल्लेपादीषद् घृष्ट्वा विलेपनैः ।
पञ्चाननमिदं तैलं श्वेतकुष्ठकुलापहम् ॥ ८ ॥

अण्डीके बीज, तुलसीके बीज, बापची, चकवड, कडवी तोरईके बीज, पीपल, ढेरावृक्षके बीज, मैनासिल, हीराकसीस, हरड, कूठ और वायविडंग ये सब औषधियों समान भाग मिलित एक सेर लेकर एकत्र पीसकर कल्क बनालेवे। फिर यह कल्क एवं गोमूत्र, दहीका तोड, गौका दूध, बकरेका मूत्र और कडवा तेल ये प्रत्येक चार चार सेर, सबोंको एकत्र मिलाकर उत्तम प्रकार पकावे। श्वेतकुष्ठपर प्रथम खुजलाकर पश्चात् इस तेलको मर्दन करे तो श्वेतकुष्ठरोग समूल नष्ट होजाता है और त्वचाका वर्ण पूर्ववत् अत्यन्त सुन्दर हो जाता है॥ २०६-२०८॥

आरग्वधाद्यतैल।

आरग्वधं धवं कुष्ठं हरितालंमनःशिला।
रजनीद्वयसंयुक्तं पचेत्तैलं विधानवित्॥
एतेनाभ्यञ्जनादेव क्षिप्रं श्वित्रं विनश्यति॥ ९॥

अमलतासके बीज, धौंवृक्षकी छाल, कूठ, हरिताल, मैनशिल, हल्दी, दारुहल्दी इन औषधियोंके समान भाग मिश्रित १ सेर कल्कके द्वारा १ प्रस्थ तेलको यथा-विधि पकावे। इस तेलके मर्दन करनेसेही श्वेतकुष्ठ नष्ट होता है॥ २०९॥

वासारुद्रतैल।

त्रिफला निम्बभण्टाकी बृहत्यौ सपुनर्नवे।
हरिद्रे वृषनिर्गुण्ड्यौ पटोलकनकाह्वयौ॥ २१०॥
हरितालं शिलाकुष्ठौ लाङ्गलीदाडिमाह्वयौ।
अपामार्गौ विषं चैव जयन्ती पूतिकट्फलौ॥ ११॥
एषां कर्षद्वयैः कल्कैस्तैलप्रस्थं विपाचयेत्।
चतुर्गुणे गुडूच्याश्च रसे वैद्यः समाहितः॥ १२॥
चतुर्गुणं तु गोक्षीरं वृषपत्ररसं तथा।
दत्त्वाऽवतारयेद्वैद्यो रुद्रमन्त्रं समाजपेत्॥ १२॥

हरड, बहेडा, आमला, नीमकी छाल, मुसली, कटाई, कटेरी, श्वेतपुनर्नवा, लालपुनर्नवा, हल्दी, दारुहल्दी, अडूसा, निर्गुण्डी, परवल, धतूरेकी जड, हरिताल, मैनसिल, कूठ, कलिहारी, अनार, चिरचिटा, मीठा विष जयन्ती, दुर्गन्धकरञ्ज और कायफल इन सबोंको दो दो तोले लेकर एकत्र कल्क बनावे। इस कल्कके साथ तिलका तेल १ प्रस्थ, गिलोयका रस ४ प्रस्थ, अडूसेके पत्तोंका रस ४ प्रस्थ

और गौका दूध ४ प्रस्थ मिलाकर तेलको पकावे । जब उत्तम प्रकार पककर सिद्ध होजाय तब उतार लेवे और यथाशक्ति शिवजीके मन्त्रका जप करे । पश्चात् इस तेलको प्रतिदिन नियमबद्ध होकर सेवन करे ॥

दद्रुं कुष्ठं दुष्टव्रणं विसर्पं विद्रधिं तथा ।
नाडीव्रणं व्रणं घोरं वातरक्तं सुदुर्जयम् ॥ १४ ॥
सन्निपातज्वरं चैव शिरोरोगं सुदारुणम् ।
शोथं च गलगण्डं च श्लीपदं त्वर्बुदं तथा ॥ १५ ॥
वातरोगानशेषांश्च अन्त्रवृद्धिं सुदारुणाम् ।
पीनसश्वासकासं च सुदारुणभगन्दरम् ॥ १६ ॥
उपदंशं महाघोरं चक्षुःशूलं च नाशयेत् ।
चर्मोत्थान्सर्वरोगांश्च तैलमेतद्विनाशयेत्
रुद्रतैलमिदं नाम्ना स्वयं रुद्रेण भाषितम् ॥ १७ ॥

यह तैल दाद, कोढ, दुष्टव्रण, विसर्प, विद्रधि, नासूर, भयङ्कर व्रण; दुर्जय वातरक्त, सन्निपातज्वर, शिरोरोग, सूजन, गलगण्डरोग, श्लीपद, अर्बुद, वातजन्य सब रोग, दारुण अन्त्रवृद्धि, पीनस, श्वास, खाँसी, दारुण भगन्दर, अत्यन्त कठिन उपदंश और नेत्रोंकी पीडाप्रभृति उत्कट व्याधियोंको शीघ्र नष्ट करता है । यह तैल चर्ममें उत्पन्न होनेवाले सम्पूर्ण विकारोंको अल्पकालमें ही नाश करदेता है । इस तेलको स्वयं शिवजी महाराजने वर्णन किया है, इसलिये इसको रुद्रतैल कहते हैं ॥ २१४-२१७ ॥

कन्दर्पसारतैल ।

सप्तपर्णस्तथा काली गुडूची पिचुमर्दकम् ।
शिरीषं च महातिक्ता जया तुम्बी मृगादनी ॥ १८ ॥
निशा दशपलान्भागाञ्जलद्रोणे विपाचयेत् ।
तैलप्रस्थं समादाय गोमूत्रं च चतुर्गुणम् ॥ १९ ॥
आरग्वधो भृङ्गराजो जयाधुस्तूररात्रयः ।
ऐन्द्रासनाग्निः खर्जूरं गोमयार्कस्नुहीच्छदम् ॥ २२० ॥
तैलतुल्यं प्रदातव्यं स्वरसं च पृथक् पृथक् ।
महाकालवचाब्राह्मीतुम्ब्यग्निगृहपुत्रिकाः ॥ २१ ॥

कुचेला कुलको रात्रिर्मेघनामा च ग्रन्थिका ।
शम्याकमर्कक्षीरं च कासुन्देश्वरमूलकम् ॥ २२ ॥
आचजिङ्गी महातिक्ता विशालाच्छविपत्रकम् ।
पूतिकास्फोतमूर्वा च सप्तपर्णशिरीषकम् ॥ २३ ॥
कुटजं पिचुमर्दश्च महानिम्बं तथैव च ।
गुडूची चन्द्ररेखा च सोमराट् चक्रमर्दकम् ॥ २४ ॥
तुम्बुरुर्भृङ्गयष्ट्याह्वकन्दं कटुकरोहिणी ।
शठी दार्वी त्रिवृत्पद्मग्रन्थिकागुरुपुष्करम् ॥ २५ ॥
कर्पूरं कटफलं मांसी सुरैलाटरुषाभयम् ।
एतेषां कार्षिकैः कल्कैर्नाम्ना कन्दर्प उच्यते ॥ २६ ॥

सतौनेकी छाल, पीला चन्दन, गिलोय, नीमकी छाल, सिरसकी छाल, बकायन, जयन्ती, कडवीतोंबी, सेंधिनी और हल्दी इनको चालीस चालीस तोले लेकर बत्तीस सेर जलमें पकावे । जब पकते पकते चौथाई भाग जल शेष रहजाय तब उतारकर छान लेवे । फिर इस काथमें सरसोंका तेल एक प्रस्थ, गोमूत्र चार प्रस्थ, अमलतास, भाङ्गरा, जयन्ती, धतूरा, हल्दी, भाँग, चीता, खजूर, गोबरका रस, आक और थूहर इन सबोंके पत्तोंका रस एक एक प्रस्थ तथा कल्कके लिये महाकाल (लताविशेष), बच, ब्राह्मी, कडवीतोंबी, चीतेकी जड, घीग्वार, कुचला, परवल, हल्दी, नागरमोथा, पीपलामूल, अमलतासका गूदा, आकका दूध, कसौंदी, कलिहारीकी जड, रक्तनद्रुम (पुष्पवृक्ष विशेष), मजीठ, पाढ, इन्द्रायनकी जड, बिलुआके पत्ते, करञ्जकी जड, आस्फोतनामकी लता, मूर्वाकी जड, सतवनकी छाल, सिरसकी छाल, कुडेकी छाल, नीमकी छाल, बकायनकी छाल, गिलोय, बापचीके बीज, चकवडके बीज, धनियाँ, भाँगरा, मुलहठी, जिमीकन्द, कुटकी, कचूर, दारुहल्दी, निसोत, पद्माख, गठिवन, अगर, पोहकरमूल, कपूर, कायफल, बालछड, कपूरकचरी, इलायची, अडूसेकी छाल और खस इन औषधियोंको दो दो तोले, परन्तु सोमराजीके बीज चार तोले लेवे और सबोंको एकत्र कूटपीसकर, यथाविधिसे मिलाकर तेलको पकावे । इस प्रकार सिद्ध किये हुए तेलको कन्दर्पतैल कहते हैं ॥

अष्टादशविधं कुष्ठं ग्रन्थिमज्जगतं तथा ।
हस्तपादाङ्गुलीसन्धिगलितं सर्वसंधिषु ॥ २७ ॥

यस्य गात्रे भविष्यन्ति मांसानि चाधिकानि च।
नासाकर्णस्य वैकल्यं भेकाकारवपुस्त्वचम् ॥ २८ ॥
श्वेतं रक्तं तथा कुष्ठं नानावर्णं विपादिकाम्।
श्वित्रं चतुर्विधं चैव वातशोणितमेव च ॥ २९ ॥
कापालं कृमिजं कुष्ठं कण्डूं दद्रुं विचर्चिकाम्।
पामाविस्फोटकानीलीकृमिवृद्धिं तथैव च ॥ २३० ॥
कीटकुष्ठमसूरीश्च किटिभं रक्तमण्डलम्।
कुष्ठमौदुम्बरं पद्मं महापद्मं तथैव च ॥ ३१ ॥
गलगण्डार्बुदं हन्याद्गण्डमालां भगन्दरम्।
वातजं पित्तजं चैव श्लेष्मजं सान्निपातिकम् ॥
एकोल्बणं द्व्युल्बणं च कुष्ठं हन्यान्न संशयः ॥ ३२ ॥

यह तैल अठारहों प्रकारके कोढ, ग्रन्थि और मज्जागत कुष्ठ, हाथ, पैर, अंगुली और सन्धियोंका गलजाना, शरीरके किसी अङ्गमें मांस अधिक बढजाना, नाक और कानोंकी विकलता, मेंडककी समान त्वचाका होजाना, श्वेत अथवा लालकुष्ठ, अनेक वर्णका कुष्ठ, विपादिका, चार प्रकारका सफेदकुष्ठ, वातरक्त, कापाल और कृमिजनितकुष्ठ, कण्डू, दद्रु, विचर्चिका, पामा, विस्फोटक, कृमिवृद्धि कीट, मसूरिका, किटिभ, रक्तमण्डल, औदुम्बर कुष्ठ, पद्म, महापद्म कुष्ठ, गलगण्ड, अर्बुद, गण्डमाला, भगन्दर, वातजकुष्ठ, पित्तजश्लैष्मिककुष्ठ, त्रिदोषजकुष्ठ, एकोल्बणकुष्ठ द्व्युल्बणकुष्ठ इत्यादि सर्वप्रकारके कुष्ठोंको निश्चय नष्ट करदेता है ॥ २२७-२३२ ॥

खदिरारिष्ट।

खदिरस्य तुलार्द्धं तु देवदारु च तत्समम्।
वाकुची द्वादशपला दार्वी स्यात्पलविंशतिः ॥२३॥
त्रिफलाविंशतिपलान्यष्टद्रोणेऽम्भसः पचेत्।
कषाये द्रोणशेषे च पूते शीते विनिक्षिपेत् ॥ २४ ॥
तुलाद्वयं माक्षिकस्य तुलैका शर्करा तथा।
धातक्या विंशतिपलं कक्कोलं नागकेशरम् ॥ २५ ॥
जातीफलं लवङ्गैला त्वक्पत्राणि पृथक् पृथक्।
पलोन्मितानि कृष्णाया दद्यात्पलचतुष्टयम् ॥
घृतभाण्डे विनिक्षिप्य मासादूर्ध्वं पिबेत्ततः ॥ २६ ॥

महाकुष्ठानि हृद्रोगं पाण्डुरोगार्बुदं तथा ।
गुल्मं ग्रन्थिकृमीन्कासं तथा प्लीहोदरं जयेत् ॥ ३७ ॥
एष वै खदिरारिष्टः सर्वकुष्ठविनाशनः ॥ ३८ ॥

खैर ५० पल, देवदारु ५० पल, बावची १२ पल, दारुहल्दी २० पल और त्रिफला २० पल सबोंको एकत्र कूटकर आठ द्रोण जलमें पकावे । जब पकते पकते एक द्रोण जल बाकी रहजाय तब उतारकर छानलेवे । फिर शीतल होजानेपर इस क्वाथमें शहद २०० पल, खाँड १०० पल, धायके फूल २० पल, शीतलचीनी, नागकेशर, जायफल, लौंग, इलायची, दारचीनी और तेजपात ये प्रत्येक चार चार तोले तथा पीपल १६ तोले इन औषधियोंको बारीक कूटपीसकर डालदेवे । पश्चात् सबोंको विधिपूर्वक एकत्र मिलाकर घीके चिकने बर्त्तनमें भरकर और उसका मुख बन्दकरके एक महीनेतक रखा रहनेदेवे । एक महीनेके अनन्तर इसमेंसे प्रतिदिन बलानुसार उचितमात्रासे सेवन करे । इसके सेवनसे अत्यन्त भयङ्कर सम्पूर्ण कुष्ठरोग तथा हृदयरोगें, पाण्डुरोग, अर्बुद, गुल्म, ग्रन्थि, कृमि, खाँसी, तिल्ली, उदरविकार आदिरोग शीघ्र दूर होते हैं । यह खदिरारिष्ट सर्वप्रकारके कुष्ठोंको विनासन्देह नष्ट करनेवाला है ॥ ३७ ॥ ३८ ॥

कुष्ठरोगमें पथ्य ।

पक्षात्पक्षाच्छर्दनानि मासान्मासाद्विरेचनम् ।
नस्यं त्र्यहात्त्र्यहान्मासि षण्ठे षण्ठेऽस्रमोक्षणम् ॥ ३९ ॥
सर्पिर्लेपश्चिरोत्पन्ना यवगोधूमशालयः ।
मुद्गाढकीमसूराश्च माक्षिकं जाङ्गलामिषम् ॥ २४० ॥
आषाढफलवेत्राग्रं पटोलं बृहतीफलम् ।
काकमाची निम्बपत्रं लशुनं हिलमोचिका ॥ ४१ ॥
पुनर्नवा मेषशृङ्गी चक्रमर्ददलानि च ।
भल्लातकं पक्वतालं खदिरश्चित्रको वरा ॥ ४२ ॥
जातीफलं नागपुष्पं कुंकुमं प्रतनं हविः ।
कोषातकी करञ्जोऽपि तिलसर्षपनिम्बजम् ॥ ४३ ॥
तैलं तथेङ्गुदोत्थं च लघून्यन्यानि यानि च ।
स्वेदाः सरलदेवाह्वशिंशपागुरुसम्भवाः ॥ ४४ ॥

मूत्राणि गोखरोष्ट्राश्वमहिषीजनितानि च।
कस्तूरिकागन्धसारस्तिक्तानि क्षारकर्म च ॥
यथादोषं समस्तानि पथ्यान्येतानि कुष्ठिनाम्।

कुष्ठरोगमें एक एक पक्ष पीछे वमन, एक एक महीने पीछे विरेचन (जुल्लाब) देवे, तीन तीन महीने बीते नस्य और छः छः महीनेके अन्तरसे रक्तमोक्षण (फस्तखुलवाना) करावे। घीका लेप करे एवं पुराने जौ, गेहूं, शालिचावल, मूंग अरहर, मसूर इनका भोजन, शहद, जंगली जीवोंका मांस ढकपत्ता, बेतकी कोंपल, परवल, बडी कटेरीके फल, मकोय, नीमके पत्ते, लहसन, हुलहुलका शाक, पुनर्नवा मेढासिंगी, चकवडके पत्ते, भिलावे, पके ताडके फल, खैर, चीता त्रिफला, जायफल, नागकेशर, केशर, पुराना घी, तोरई, करञ्ज, तिल, सरसों, नीम और हिंगोट इनका तेल, हलके पदार्थ, धूपसरल, देवदारु, शीशम और अगर इनका तेल, गौ, गधा, ऊँट, घोडा और भैंस इन सबोंके मूत्र, कस्तूरी, सफेदचन्दन, तीखेरसवाले द्रव्य और क्षारकर्म ये सब दोषानुसार सेवन करनेसे कुष्ठरोगियोंके लिये हितकारी है ॥ ३९-२४५ ॥

कुष्ठरोगमें अपथ्य।

पापानि कर्माणि कृतघ्नभावं निन्दां गुरूणां गुरुधर्षणं च।
विरुद्धपानाशनमह्नि निद्रां चण्डांशुतापं विषमाशनं च ॥ ४६ ॥
स्वेदं रतं वेगनिरोधमिक्षुं व्यायाममम्लानि तिलांश्च माषान्।
द्रवान्नगुर्वन्ननवान्नभुक्तं विदाहि विष्टंभि च मूलकानि ॥ ४७ ॥
सह्याद्रिविन्ध्याद्रिसमुद्भवानां तरङ्गिणीनामुदकानि चापि।
आनूपमांसं दधिदुग्धमद्यं गुडं च कुष्ठामयिनस्त्यजेयुः ॥४८॥

पापकर्म, कृतघ्नता, गुरुओंकी निन्दा, गुरुजनोंका तिरस्कार करना, स्वभाव-विरुद्ध भोजन-पान करना, दिनमें सोना, प्रचण्ड धूपका सेवन, विषम भोजन, स्वेद-देना, स्त्रीप्रसंग, मल-मूत्रादिके वेगको रोकना, ईखके रसका पान, कसरत करना, खट्टे पदार्थ, तिल, उडद, पतले पदार्थ, दुष्पाच्य अन्न, नये नाजोंका भोजन, दाह-कारक-विबन्धकारक द्रव्य, मूली, सह्याचल और विन्ध्याचलसे निकली हुई नदियोंका जल, अनूपदेशजात जीवोंका मांस, दही दूध, मदिरा और गुड ये सब अपथ्य पदार्थ कुष्ठरोगियोंको त्याग देना चाहिये ॥ ४६-२४८ ॥

इति भैषज्यरत्नावल्यां कुष्ठरोगचिकित्सा ॥

शीतपित्त उदर्द और कोठरोगकी चिकित्सा ।

अभ्यङ्गः कटुतैलेन सेकश्चोष्णाम्बुभिस्तथा ।
उदर्दे वमनं कार्यं पटोलारिष्टवारिणा ॥ १ ॥
त्रिफलापुरकृष्णाभिर्विरेकश्चात्र शस्यते ।
अमृतादिं विसर्पोक्तं भिषगत्र प्रयोजयेत् ॥ २ ॥

उदर्दरोगमें सरसोंके तेलकी मालिशकर गरम जलसे सेंक करे, फिर पटोलपत्र और नीमकी छालके काढेमें मैनफलका चूर्ण डालकर रोगीको पान कराकर वमन करावे। पश्चात् हरड, बहेडा, आमला, गूगल और पीपल इनके क्वाथद्वारा विरेचन (जुलाब) करावे । इस रोगमें विसर्परोगाधिकारमें कहा हुआ अमृतादिक्वाथ पान करानेसे विशेष लाभ होता है ॥ १ ॥ २ ॥

सगुडं दीप्यकं यस्तु खादेत्पथ्यान्नभुङ्नरः ।
तस्य नश्यति सप्ताहादुदर्दः सर्वदेहगः ॥ ३ ॥

पथ्य द्रव्योंका भोजन करनेवाला मनुष्य यदि पुराना गुड और अजवायन इन दोनोंको एकत्र मर्दनकर सात दिनतक खाय तो उसका सर्वशरीरगत उदर्दरोग नष्ट होता है ॥ ३ ॥

दूर्वानिशायुते लेपः कण्डूपामाविनाशनः ।
कृमिदद्रुहरश्चैव शीतपित्तापहः स्मृतः ॥
क्षारसैन्धवतैलेन गात्राभ्यङ्गं प्रकारयेत् ॥ ४ ॥

दूब और हल्दीको एकत्र पीसकर लेप करनेसे कण्डू (खुश्क खुजली) और पामा (तर खुजली) नष्ट होती है। जवाखार और सेंधेनमकको तिलके तेलमें मिलाकर मालिश करनेसे कृमि, दद्रुकुष्ठ और शीतपित्तरोग दूर होता है ॥ ४ ॥

अग्निमन्थभवं मूलं पिष्टं पीतं च सर्पिषा ।
शीतपित्तोदर्दकोठान् सप्ताहादेव नाशयेत् ॥ ५ ॥

अरणीकी जडको पीसकर घीमें मिलाकर पान करे तो शीतपित्त, उदर्द और कोठरोग सात दिनमें ही नाश होजाते हैं ॥ ५ ॥

कुष्ठोक्तं च क्रमं कुर्यादम्लपित्तघ्नमेव च ।
उदर्दोक्तां क्रियां सर्वां कोठरोगे समासतः ।
सर्पिः पीत्वा महातिक्तं कार्यं रक्तस्य मोक्षणम् ॥ ६ ॥

इस रोगमें कुष्ठरोगोक्त चिकित्सा और अम्लपित्तनाशक औषधियोंका सेवन करे । एवं उदर्दरोगमें कही हुई चिकित्साके अनुसार कोठरोगकी चिकित्सा करे । कोठरोगमें महातिक्तघृतका पान और रक्तमोक्षण करना उपयोगी है ॥ ६ ॥

कर्षं गव्यघृतस्यापि कर्षार्द्धं मरिचस्य च ।
एकीकृत्य पिबेत्प्रातः शीतपित्तविनाशनः ॥ ७ ॥

छः मासे काली मिरचोंको छः मासे गौके घीमें मिलाकर प्रतिदिन प्रातःकाल सेवन करनेसे शीतपित्तरोग नष्ट होता है ॥ ७ ॥

हरिद्राखण्ड ।

हरिद्रायाः पलान्यष्टौ षट्पलं हविषस्तथा ।
क्षीराढकेन संयुक्तं खण्डस्यार्द्धतुलां तथा ॥ ८ ॥
पचेन्मृद्वग्निना वैद्यो भाजने मृन्मये दृढे ।
कटुत्रिकं त्रिजातं च कृमिघ्नं त्रिवृता तथा ॥ ९ ॥
त्रिफला केशरं मुस्तं लौहं प्रति पलं पलम् ।
सञ्चूर्ण्यप्रक्षिपेत्तत्र कर्षमेकं तु भक्षयेत् ॥ १० ॥
कण्डूविस्फोटदद्रूणां नाशनं परमौषधम् ।
प्रतप्तकाञ्चनाभासो देहो भवति नान्यथा ॥ ११ ॥
शीतपित्तोदर्दकोठान् सप्ताहादेव नाशयेत् ।
हरिद्रानामकः खण्डः कण्डूनां परमौषधम् ॥ १२ ॥

हलदीका चूर्ण ३२ तोले, गोघृत २४ तोले, गोदुग्ध ८ सेर और चीनी ५० पल इन सबोंको एकत्र मिलाकर स्वच्छ और दृढ मिट्टीके बर्तनमें मन्द मन्द अग्निसे पकावे । फिर उसमें सोंठ, मिरच, पीपल, दारचीनी, इलायची, तेजपात, वायविडङ्ग, निसोत, हरड, बहेडा, आमला, नागकेशर, नागरमोथा और लोहभस्म ये प्रत्येक औषधि चार चार तोले लेवे और सबोंको बारीक पीसकर मिला देवे । इसको प्रतिदिन एक एक तोला प्रमाण सेवन करनेसे कण्डू, विस्फोटक और दद्रु रोगोंका शीघ्र नाश होता है तथा शरीर तपे हुए सुवर्णकी

समान अत्यन्त देदीप्यमान होजाता है। यह औषधि शीतपित्त, उदर्द और कोठरोगोंको सात दिनमें ही नष्ट करदेता है। इसको हरिद्राखण्ड कहते हैं। यह हरिद्राखण्ड खुजलीरोगकी अत्युत्तम औषधि है ॥ ८-१२ ॥

बृहद्धरिद्राखण्ड।

निशाचूर्णस्य कुडवं त्रिवृत्पलचतुष्टयम्।
अभया तत्समा देया सार्द्धप्रस्थद्वयी सिता ॥ १३ ॥
दार्वीं मुस्ता यमान्यौ द्वे चित्रकं कटुरोहिणी।
अजाजी पिप्पली शुण्ठी त्रिजातं कृमिकण्टकम् ॥ १४ ॥
अमृता वासकं कुष्ठं त्रिफला चव्यधान्यकम्।
मृतलोहं मृताभ्रं च प्रत्येकं कोलसंमितम् ॥ १५ ॥
पचेन्मृद्वग्निना वैद्यो भाजने मृन्मये नवे।
कर्षार्द्धं च ततः खादेदुष्णतोयानुपानतः ॥ १६ ॥
शीतपित्तोदर्दकोठकण्डूपामाविचर्चिकाः।
जीर्णज्वरकृमीन्पाण्डुशोथादींश्च विनाशयेत् ॥ १७ ॥

हल्दीका चूर्ण १६ तोले, निसोत १६ तोले, हरड १६ तोले, मिश्री १६० तोले, दारुहल्दी, नागरमोथा, अजवायन, अजमोद, चीता, कुटकी, कालाजीरा, पीपल, सोंठ, दारचीनी, इलायची, तेजपात, वायविडङ्ग, गिलोय, अडूसा, कूठ, त्रिफला, चव्य, धनियाँ, लोहभस्म और अभ्रकभस्म ये प्रत्येक एकएक तोला लेवे। फिर सबोंको एकत्र कूटपीसकर यथाविधिसे मिलाकर मिट्टीके नये और उत्तमप्रकारसे दृढ पात्रमें पाक करे। प्रतिदिन प्रातःकाल इसमेंसे छः छः माशे लेकर मन्दोष्ण जलके साथ भक्षण करे तो यह बृहद्धरिद्राखण्डावलेह शीतपित्त (पित्ती), उदर्द, कोठ, कण्डू, पामा, विचर्चिका, जीर्णज्वर, कृमिरोग, पाण्डु और शोथप्रभृति रोगोंको बहुत शीघ्र नष्ट करता है ॥

शीतपित्तोदर्दकोठरोगोंमें पथ्य।

छर्दिर्विरेचनं लेपोऽसृङ्मोक्षो जीर्णशालयः।
जाङ्गलैरामिषैर्मुद्गैः कुलत्थैर्वा कृता रसा ॥ १८ ॥
कर्कोटकं कारवेल्लंशिग्रुमूलकपोतिकाः।
शालिञ्चशाकं वेत्राग्रं दाडिमं त्रिफला मधु ॥ १९ ॥

कटुतैलं तप्तनीरं पित्तश्लेष्महराणि च।
कटुतिक्तकषायाणि सर्वाणीति गणः सखा॥
शीतपित्तोदर्दकोठरोगिणां स्याद्यथाबलम्॥ २०॥

वमन, विरेचन, प्रलेप और रक्तमोक्षण कराना, पुराने शालिचावल, जङ्गली पशु-पक्षियोंका मांसरस, मूँगका यूष, कुलथीका यूष, ककोडे, करेले, सहिंजनेकी फली, मूली, पोईका शाक, शालिञ्चशाक, बेंतकी कोंपल, अनार, त्रिफला, मधु, सरसोंका तेल, गरमजल, कफ-पित्तनाशक द्रव्य और समस्त कडवे तीखे तथा कषायरसवाले पदार्थ ये सब शीतपित्त, उदर्द और कोठरोगवाले व्यक्तियोंको दोषानुसार सेवन करनेसे सुखावह कहेगये हैं॥ १८-२०॥

शीतपित्त, उदर्द और कोठरोगोंमें अपथ्य।

क्षीरेक्षुजाता विविधा विकारा मत्स्योदकानूपभवामिषाणि।
नवीनमद्यं वमिवेगरोधः प्राग्दक्षिणाशापवनोऽह्नि निद्रा॥ २१॥
स्नानं विरुद्धाशनमातपश्च स्निग्धं तथाऽम्लं मधुरं कषायम्।
गुर्वन्नपानानि च शीतपित्तकोठामयोदर्दवतां विषाणि॥ २२॥

दूधके बने द्रव्य (दही, मलाई), ईखके रससे बने (गुडादि) नानाप्रकारके द्रव्य, मछली, जलचर और अनूपदेशवासी जीवोंका मांस, नईमदिरा, वमन (के) के वेगको रोकना, पूर्वदिशा और दक्षिणदिशाकी वायुका सेवन, दिनमें शयन, स्नान, विरुद्धभोजन, धूपका सेवन, चिकने, खट्टे, मीठे और कषैले पदार्थ, गुरुपाकी अन्न-पान ये सब वस्तुएँ शीतपित्त, कोठ और उदर्द, रोगाक्रान्त मनुष्योंको विषके समान अहितकर हैं॥ २१॥ २२॥

इति भैषज्यरत्नावल्यां शीतपित्तोदर्दकोठरोगचिकित्सा॥

अम्लपित्तकी चिकित्सा।

वान्तिं कृत्वाऽम्लपित्ते तु विरेकं मृदु कारयेत्।
सम्यग्वान्तविरिक्तस्य सुस्निग्धस्यानुवासनम्॥ १॥

अम्लपित्तरोगमें वमन और मृदु विरेचन करावे। जब उक्तक्रियाओंके द्वारा शरीरकी अच्छे प्रकार शुद्धि होजाय तब रोगीको स्निग्धद्रव्य पान कराकर अनुवासनवस्ति लगावे॥ १॥

आस्थापनं चिरोद्भूते देयं दोषाद्यपेक्षया ।
क्रियाशुद्धस्य शमनं ह्यनुबन्धव्यपेक्षया ॥
दोषसंसर्गजे कार्या भेषजाहारकल्पना ॥ २ ॥

पुराने अम्लपित्तरोगमें दोषोंको विचारकर निरूहणवस्ति प्रयोग करना उपयोगी है । अम्लपित्तमें मिलेहुए दोषोंका प्रकोप होनेपर उपर्युक्त विधिके अनुसार रोगीको शुद्धकर दोषोंको शमन करनेवाली औषध और आहारकी कल्पना करे ॥ २ ॥

ऊर्ध्वगं वमनैर्धीमानधोगं रेचनैर्हरेत् ।
अम्लपित्ते तु वमनं पटोलारिष्टपत्रकैः ॥ ३ ॥
कारयेन्मदनक्षौद्रसिन्धुयुक्तैः कफोल्बणे ।
विरेचनं त्रिवृच्चूर्णं मधुधात्रीफलद्रवैः ॥ ४ ॥

ऊर्ध्वगत अम्लपित्तमें वमन और अधोगत अम्लपित्तमें विरेचन कराना श्रेष्ठ है, कफप्रधान अम्लपित्तरोगमें परवलके पत्ते, नीमके पत्ते, मैनफल, शहद, सैन्धानमक इनका क्वाथ पान कराकर रोगीको वमन करावे एवं आमलोंके क्वाथमें शहद और निसोतका चूर्ण डालकर रोगीको पान कराकर दस्त करावे ॥ ३ ॥ ४ ॥

तिक्तभूयिष्ठमाहारं पानं चापि प्रकल्पयेत् ।
यवगोधूमविकृतितीक्ष्णसंस्कारवर्जिताः ॥
यथास्वं लाजसक्तून्वा सितामधुयुतान्पिबेत् ॥ ५ ॥

अम्लपित्तरोगमें कडवेरसवाले द्रव्योंके साथ आहार और पान मिश्रित करके देवे । एवं मिष्ट पदार्थोंके साथ जौ और गेहूँके बनाये हुए खाद्यपदार्थ देवे, किन्तु उनके साथ नमक, लालमिरच और खटाई आदि तीक्ष्णद्रव्य मिलाकर सेवन न करे । अम्लपित्तरोगी मिश्री और शहद मिलाकर खीलोंके सत्तुओंको यथेच्छरूपसे पान करे ॥ ५ ॥

निस्तुषयववृषधात्रीक्वाथस्त्रिसुगन्धिमधुयुतः पीतः ।
हन्त्यम्लपित्तमचिराद् यदि भुक्तं मुद्गयूषेण ॥ ६ ॥

भुसीरहित जौ, अडूसेके पत्ते और आमले इनके क्वाथमें दारचीनी, इलायची और तेजपात इनका चूर्ण एवं शहद मिलाकर पान करे और मूँगके यूषका पथ्य करे तो अम्लपित्तरोग शीघ्र नष्ट होता है ॥ ६ ॥

कफपित्तवमिकण्डूज्वरविस्फोटदाहहा ।
पाचनो दीपनः क्वाथः शृङ्गवेरपटोलयोः ॥ ७ ॥

अदरख,परवल इनका सुखोष्ण क्वाथ पान करनेसे कफ-पित्तजन्य वमन, खुजली, ज्वर, विस्फोट दाहादिरोग नष्ट होते हैं। यह क्वाथ पाचन, दीपन है ॥ ७ ॥

पटोलं नागरं धान्यं क्वाथयित्वा जलं पिबेत् ।
कण्डूपामार्त्तिशूलघ्नं कफपित्ताग्निमान्द्यजित् ॥ ८ ॥

पटोलपात, सोंठ और धनियाँ इनका क्वाथ बनाकर पान करनेसे कण्डू, पामा, शूल, कफ, पित्तजन्य रोग और मन्दाग्निप्रभृति विकार दूर होते हैं ॥ ८ ॥

पटोलविश्वामृतरोहिणीकृतं जलं पिबेत्पित्तकफाश्रयेषु ।
शूलभ्रमारोचकवह्निमान्द्यदाहज्वरच्छर्दिनिवारणं तत् ॥ ९ ॥

परवल, सोंठ, गिलोय और कुटकी इनका यथाविधि क्वाथ बनाकर पान करे तो पित्तकफोत्पन्न अम्लपित्त एवं शूल, भ्रम, अरुचि, मन्दाग्नि, दाह, ज्वर और वमनरोग शान्त होते हैं ॥ ९ ॥

यवकृष्णापटोलानां क्वाथं क्षौद्रयुतं पिबेत् ।
नाशयेदम्लपित्तं चारुचिं च वमनं तथा ॥ १० ॥

जौ, पीपल और परवल इनका एकत्र क्वाथ बनाकर उसमें शहद डालकर पान करनेसे अम्लपित्त, अरुचि और वमन नष्ट होती है ॥ १० ॥

छिन्नाखदिरयष्ट्याह्वदार्व्यम्भो मृदुना पिबेत् ।
सद्राक्षामभयां खादेत्सक्षौद्रां सगुडां च ताम् ॥ ११ ॥

गिलोय, खैर, मुलहठी और दारुहल्दी इनके मंदोष्ण क्वाथमें मधु मिश्रित कर पान करे। दाख और हरडको एकत्र पीसकर सेवन करे अथवा हरडोंके चूर्णमें शहद मिलाकर किम्वा पुराना गुड मिलाकर सेवन करे। इसके सेवनसे अम्लपित्त दूर होता है ॥ ११ ॥

छिन्नोद्भवानिम्बपटोलपत्रं फलत्रिकं सुक्वथितं सुशीतम् ।
क्षौद्रान्वितं पीतमनेकरूपं सुदारुणं हन्ति तदम्लपित्तम् ॥१२॥

गिलोय, नीमकी छाल, पटोलपात, हरड, बहेडा, आमला इनका उत्तम प्रकारसे क्वाथ बनावे। फिर शीतल होजानेपर उसमें शहद मिलाकर पान करे तो यह अनेक प्रकारके दारुण अम्लपित्तरोगको नष्ट करता है ॥ १२ ॥

हिंगु च कतकफलान्यपि चिञ्चायास्त्वग् घृतं च पुटदग्धम् ।
शमयति तदम्लपित्तमम्लभुजो यथोत्तरं द्विगुणम् ॥ १३ ॥

हींग १ तोला, निर्मलीके फल दो तोले, इमलीकी छाल ४ तोले और घी ८ तोले इन सबोंको एकत्र अन्तर्धूमअग्निमें पुटपाककी रीतिसे पकाकर उष्णजलके साथ सेवन करे और इसपर खट्टे रसवाले पदार्थ भक्षण करे तो अम्लपित्तरोग शमन होता है ॥ १३ ॥

कान्तपात्रे वराकल्को व्युषितोऽभ्यासयोगतः ।
सिताक्षौद्रसमायुक्तः कफपित्तहरः स्मृतः ॥ १४ ॥

लोहपात्रमें हरड, बहेडा और आमला इनके समान भाग मिश्रित रातभर रखे-हुए बासी कल्कको मिश्री और शहदके साथ मिलाकर सेवन करनेसे कफपित्तजन्य अम्लपित्त विकार नष्ट होता है ॥ १४ ॥

वासाघृतं तिक्तघृतं पिप्पलीघृतमेव च ।
अम्लपित्ते प्रयोक्तव्यं खण्डकूष्माण्डकं तथा ॥ १५ ॥
पक्तिशूलापहा योगस्तथा खण्डामलक्यपि ।
पिप्पली मधुसंयुक्ता अम्लपित्तविनाशिनी ॥
जम्बीरस्वरसः पीतः सायं हन्त्यम्लपित्तकम् ॥ १६ ॥

अम्लपित्तरोगमें वासाघृत, तिक्तघृत, पिप्पलीघृत, खण्डकूष्माण्डक, खण्डामलकी और परिणाम शूलनाशक योग प्रयोग करने चाहिये। पीपलके चूर्णको शहदमें मिलाकर चाटनेसे अथवा सायंकालमें चीनी मिश्रित जम्बीरीनींबूका रस पान कर-नेसे अम्लपित्तरोग नाश होता है ॥ १५ ॥ १६ ॥

दशांग।

वासामृतापर्पटकनिम्बभूनिम्बमार्कवैः ।
त्रिफलाकूलकैः क्वाथः सक्षौद्रश्चाम्लपित्तहा ॥ १७ ॥

अडूसेकी छाल, गिलोय, पित्तपापडा, नीमकी छाल, चिरायता, भाँगरा, त्रिफला और परवल इनके काढेको शहद मिलाकर सेवन करनेसे अम्लपित्त नष्ट होता है ॥ १७ ॥

पञ्चनिम्बादिचूर्ण।

एकोंऽशः पञ्चनिम्बानां द्विगुणो वृद्धदारकः ।
सक्तुर्दशगुणो देयः शर्करामधुरीकृतः ॥ १८ ॥

शीतेन वारिणा पीतं शूलं पित्तकफोच्छ्रितम् ।
निहन्ति चूर्णं सक्षौद्रमम्लपित्तं सुदारुणम् ॥ १९ ॥

नीमकी छाल, पत्ते, फल, फूल और मूल ये सब एक २ तोला, विधारा दो तोले और जौंके सत्तु १० तोले, इनमें कुछ खाँड मिलाकर इनको मधुर बनालेवे । फिर इस चूर्णको मधुर मिश्रितकर शीतल जलके साथ दो तोले प्रमाण सेवन करे । यह चूर्ण पित्त-कफोद्भवशूल और दारुण अम्लपित्तको नष्ट करता है ॥

अविपत्तिकरचूर्ण ।

त्रिकटु त्रिफला मुस्तं विडं चैव विडङ्गकम् ।
एलापत्रं च चूर्णानि समभागानि कारयेत् ॥ २० ॥
सर्वमेकीकृतं यावल्लवङ्गं तत्समं भवेत् ।
सर्वचूर्णं द्विगुणितं त्रिवृच्चूर्णं प्रदापयेत् ॥ २१ ॥
सर्वमेकीकृतं यावत्तावच्छर्करयाऽन्वितम् ।
भोजनादौ तथा मध्ये खादेन्माषाष्टकं शुभम् ॥ २२ ॥

सोंठ, पीपल, मिरच, हरड, आमला, बहेडा, नागरमोथा, बिरियासञ्चरनोन, वायविडङ्ग, इलायची और तेजपात इनको समान भाग लेकर एकत्र चूर्ण कर लेवे । फिर इस चूर्णके बराबर भाग लौंगका चूर्ण एवं सबसे दुगुना निसोतका चूर्ण और जितना इन सब औषधियोंका चूर्ण हो उतनी खाँड मिलाकर सबोंको एकमएक करलेवे । इस चूर्णको आठ आठ माशेकी मात्रासे प्रतिदिन भोजनके आदि और मध्यमें सेवन करे, ऊपरसे शीतल जल अथवा नारियलका जल पान करे ॥ २०-२२ ॥

अम्लपित्तं निहन्त्याशु विबन्धं मलमूत्रयोः ।
अग्निमान्द्यभवान्रोगान् नाशयेदविकल्पतः ॥ २३ ॥
प्रमेहान्विंशतिं चैव सर्वदुर्नामनाशनम् ।
अविपत्तिकरं चूर्णमगस्त्यविहितं शुभम् ॥ २४ ॥

यह चूर्ण अम्लपित्त, मल मूत्रका विबन्ध, मन्दाग्निसे उत्पन्न होनेवाले रोग, बीसोंप्रकारके प्रमेह और सर्वप्रकारके बवासीरादि रोगोंको तत्काल नष्ट करता है । इस अविपत्तिकरनामक उत्तम चूर्णको अगस्त्यजीने विधान किया है ॥ २३ ॥ २४ ॥

लीलाविलास ।

रसो बलिर्व्योम रविश्च लौहं धात्र्यक्षनीरैस्त्रिदिनं विमर्द्य ।
तदल्पघृष्टं मृदु मार्कवेण संमर्दयेदस्य हि वल्लयुग्मम् ॥ २५ ॥

हन्त्यम्लपित्तं विविधप्रकारं लीलाविलासो रसराज एषः ।
छर्दिं सशूलं हृदयस्य दाहं निवारयेदेव न संशयोऽत्र ॥
दुग्धं सकूष्माण्डरसं सधात्रीफलं समेतं ससितं भवेद्वा ॥ २६ ॥

पारा, गन्धक, अभ्रक, ताँबा और लोहा इनकी भस्मको एक एक तोला लेके फिर सबोंको एकत्र मिलाकर आमले और बहेडेके रस (अभावमें काथ) में पृथक् पृथक् तीन दिनतक खरलकर कुछ थोडी देरतक भाँगरेके रसमें खरल करे पश्चात् इस रसको प्रतिदिन प्रातःकाल दो दो रत्तीप्रमाण सेवन करे और ऊपरसे दूध, पेठेका रस, आमलोंका रस अथवा चीनी पडाहुआ नारियलका जल पान करे । यह लीलाविलास सम्पूर्ण रसोंका राजा है । यह नानाप्रकारके अम्लपित्त, वमन, शूल और हृदयकी दाहादि रोगोंको बहुत शीघ्र नष्ट करता है इसमें कुछभी सन्देह नहीं है ॥ २५ ॥ २६ ॥

अम्लपित्तान्तकरस ।

मृतसूतार्कलौहानां तुल्यां पथ्यां विमर्दयेत ।
माषमात्रं लिहेत्क्षौद्रैरम्लपित्तप्रशान्तये ॥ २७ ॥

रससिंदूर, ताँबा और लोहा ये प्रत्येक एक एक तोला और इनके बराबर भाग हरड लेकर सबोंको यथाविधि एकत्र मिलाकर पीसलेवे । पश्चात् इसको एक एक माशा प्रमाण शहदमें मिलाकर चाटनेसे अम्लपित्त शान्त होता है ॥ २७ ॥

भास्करामृताभ्र ।

वासामृताकेशराजः पर्पटी निम्बभृङ्गके ।
मुण्डीरं बृहती मुस्तं वाट्यालकशतावरी ॥ २८ ॥
एषां सत्त्वैः पलोन्मानैर्मर्दितं विमलाभ्रकम् ।
सहस्रपुटितं तत्र शतावर्या रसं क्षिपेत् ॥
वारद्वादशकं दत्त्वा वटिकां कारयेद्भिषक् ॥ २९ ॥

अडूसा, गिलोय, काला भाँगरा, पित्तपापडा, नीमकी छाल, भाँगरा, सफेद पुनर्नवा, बडी कटेरी, नागरमोथा, खिरैंटी और शतावर इनके चार चार तोले सत्त्वको निकाले और उससे एक हजार बार फूँकीहुई निर्मल अभ्रकको खरल करे । फिर उसमें बारह बार शतावरका रस डालकर उत्तम प्रकारसे खरल करके गोलियाँ बनालेवे ॥ २८ ॥ २९ ॥

भास्करामृतनामेदमम्लपित्तं नियच्छति ।
शूलमन्नद्रवं शूलंशूलं च परिणामजम् ॥ ३० ॥
छर्दिं हृल्लासमरुचिं तृष्णां कासं च दुर्जयम् ।
हृद्रहं कामलां रक्तपित्तं यक्ष्माणमेव च ॥ ३१ ॥
दाहं शोथं भ्रमं तन्द्रां विस्फोटं कुष्ठमेव च ॥
श्वासं मूर्च्छां च मन्दाग्निं यकृत्प्लीहोदरं तथा ॥ ३२ ॥

यह भास्करामृतनामक अभ्रक अम्लपित्त, अन्नद्रवभवशूल, शूल, परिणामशूल, वमन, हृल्लास; अरुचि, तृषा, दुर्जय खाँसी, हृदयरोग, कामला, रक्तपित्त, राजयक्ष्मा, दाह, शोथ, भ्रम, तन्द्रा, विस्फोट, कुष्ठ, श्वास, मूर्च्छा, मन्दाग्नि, यकृत्, प्लीहा और उदररोग इन रोगोंको नष्ट करता है ॥ ३०-३२ ॥

सर्वतोभद्रलौह ।

लौहं चूर्णं मृतं ताम्रमभ्रकं च पलं पलम् ।
शुद्धसूतं च कर्षैकं गन्धकार्द्धपलं तथा ॥ ३३ ॥
माक्षिकस्य विशुद्धस्य कर्षं शुद्धा शिला परा ।
सार्द्धकर्षं विशुद्धं चशिलाजतु तथा परम् ॥ ३४ ॥
गुग्गुलोश्चापि कर्षैकं शाणमानं परस्य च ।
चूर्णं विडङ्गभल्लातवह्निश्वेतार्कमूलजम् ॥ ३५ ॥
करिकर्णं पलाशं च तालमूली पुनर्नवा ।
घनामृता नागबला चक्रमर्दकमुण्डिरी ॥ ३६ ॥
भृङ्गकेशशतावर्यौ वृद्धदारं फलत्रिकम् ।
त्रिकटुश्चापि सर्वेषां प्रत्येकं च ॒नयेद्भिषक् ॥ ३७ ॥
सर्वमेकत्र सम्मर्द्य घृतेन मधुना सह ।
स्निग्धभाण्डे विनिक्षिप्य ततः कुर्याद्विधानवित् ॥ ३८

लोहे, ताँबे और अभ्रककी भस्म चार चार तोले, शुद्ध पारा एक तोला, शुद्धगन्धक दो तोले, शुद्ध सोनामखी एक तोला, शुद्ध मैनसिल एक तोला, शुद्ध शिलाजीत डेढ तोला, शुद्ध गूगल एक तोला, एवं वायविडंग, भिलावे, चीतेकी जड, सफेद आककी जड, हस्तिकर्ण, पलाशकी छाल, मुसली, सोंठ, नागरमोथा, गिलोय, गंगरेन, चकवड, गोरखमुण्डी, सफेदभाँगरा, काला-

भाँगरा, शतावर, विधारा, त्रिफला और त्रिकुटा इन औषधियोंको अलग अलग चार चार मासे लेवे । फिर सबोंको घी और शहद्के साथ एकत्र मर्दन करके घीके चिकने बासनमें भरकर रखदेवे ॥ ३३-३८ ॥

माषकादिक्रमेणैव लौहं सर्वरसायनम् ।
अम्लपित्तं जयेच्छीघ्रं सर्वोपद्रवसंयुतम् ॥ ३९ ॥
तद्वदर्शांसि सर्वाणि सर्वमेव भगन्दरम् ।
पंक्तिशूलं च शूलं च तथाऽऽमं कुक्षिसंभवम् ॥ ४० ॥
वातरक्तं तथा कुष्ठं पाण्डुरोगं हलीमकम् ।
आमवातं तथा शोथमग्निमाद्यं सुदुस्तरम् ॥ ४१ ॥
कामलां वातगुल्मं च पिडिकागरगृध्रसीः ।
कासश्वासारुचिहरं वृष्यमेतद्विशेषतः ॥ ४२ ॥
सर्वव्याधिहरं प्रोक्तं यथेष्टाहारसेविनः ।
यक्ष्माणं रक्तपित्तं च वातरोगं विनाशयेत् ।
संज्ञया सर्वतोभद्रलौहो रसवरः स्मृतः ॥ ४३ ॥

इसमेंसे प्रतिदिन चार रत्तीसे प्रारम्भ कर एक माशेतक मात्राको बढाताहुआ सेवन करे तो यह रसायन सम्पूर्ण उपद्रवोंसे युक्त अम्लपित्तरोगको तत्काल नष्ट करती है । तथा सर्वप्रकारकी बवासीर, भगन्दर, पंक्तिशूल, आमशूल, कुक्षिगत-शूल, वातरक्त, कुष्ठ, पाण्डुरोग, हलीमक, आमवात, सूजन, मन्दाग्नि, कामला, वातगुल्म, पिडका, विषजरोग, गृध्रसी, खाँसी, श्वास, अरुचि और अन्यान्य सर्व प्रकारके विकारोंको दूर करती है । विशेषकर बल, वीर्यको बढाती एवं पुष्टि करती है । इसपर स्वेच्छापूर्वक आहार विहार करना चाहिये । यह औषधि राजयक्ष्मा-रक्तपित्त और वातरोगको नष्ट करती है । इस उत्तम रसायनको सर्वतोभद्रलोह कहते हैं ॥ ३९-४३ ॥

पानीयभक्तवटिका ।

त्र्यूषणं त्रिफला मुस्तं त्रिवृता चित्रकं तथा ।
प्रत्येकं कार्षिकं दद्यात्सूतगन्धौ तदर्द्धकौ ॥ ४४ ॥
लौहाभ्रकविडंगानां दद्यात्कर्षद्वयं तथा ।
त्रिफलायाः कषायेण गुटीं कुर्याद्‌ विधानतः ॥ ४५ ॥

सोंठ, मिरच, पीपल, हरड, बहेडा, आमला, नागरमोथा, निसोत, चीता, ये प्रत्येक दो दो तोले, शोधित पारा और गन्धक एक एक तोला, लोहभस्म, अभ्रकभस्म और वायविडङ्ग प्रत्येक चार चार तोले लेवे। इन सबोंको एकत्र त्रिफलेके क्वाथमें उत्तम प्रकार खरल करके चार चार रत्तीकी गोलियाँ बनालेवे॥

तदेकां भक्षयेत्प्रातर्भक्तवारि पिबेदनु।
हन्ति शूलं त्रिदोषोत्थमम्लपित्तं विशेषतः॥ ४६॥
हृच्छूलं पार्श्वशूलं च कुक्षिवस्तिगुदे रुजम्।
श्वासं कासं तथा कुष्ठं ग्रहणीदोषनाशिनी॥ ४७॥

पश्चात् प्रतिदिन प्रातःकाल एक एक गोली भक्षणकर ऊपरसे काँजी पान करे। यह गोलियाँ त्रिदोषजन्य शूल, विशेषकर अम्लपित्त, हृदयशूल, पार्श्वशूल, कुक्षि और बस्तिगत शूल, गुदाके रोग, श्वास, खांसी, कुष्ठ और संग्रहणी आदि रोगोंको शीघ्र नष्ट करती हैं॥ ४६॥ ४७॥

पञ्चाननगुटिका।

शुद्धसूतं पलार्द्धं च तत्समं शुद्धगन्धकम्।
तयोस्तुल्यं ताम्रपत्रं लिप्त्वा मूषोदरे क्षिपेत्॥ ४८॥
आच्छाद्य पञ्चलवणैर्लिप्त्वा गजपुटे पचेत्।
सिद्धं ताम्रं समादाय पलमेकं विचूर्णयेत्॥ ४९॥
पारदस्य पलं चैकं गन्धकस्य पलं तथा।
पुटदग्धस्य लोहस्य गगनस्य पलं पलम्॥ ५०॥
यमानी शतपुष्पा च त्रिकटु त्रिफलानि च।
त्रिवृता चविका दन्ती शिखरी जीरकद्वयम्॥ ५१॥
एतेषां पलिकैर्भागैर्घण्टकर्णकमानकम्।
ग्रन्थिकं चित्रकं चैव कुलिशानां पलार्द्धकम्॥
आर्द्रकस्वरसैः पिष्ट्वा गुटिकां माषसम्मिताम्॥ ५२॥

शुद्ध पारा और शुद्ध गन्धक दो दो तोले लेकर दोनोंकी कज्जली बनाले फिर उस कज्जलीसे चार तोले ताँबेके पत्रको लहेसकर मूषायन्त्रमें रक्खे और उसके मुँहको पाँचों नमकोंके द्वारा लहेसकर गजपुटमें स्थापन करके पकावे। इस प्रकार भस्म कियाहुआ ताँबा चार तोले तथा पारा गन्धक पुटदग्ध लोह अभ्रक अजवायन, सोया, त्रिकुटा, त्रिफला, निसोत, चव्य, दन्ती, चिरचिटा, जीरा, काला-

जीरा ये प्रत्येक चार चार तोले एवं घण्टावृक्ष, मानकन्द, पीपलामूल, चीता और हडसंकरी इनको दो दो तोले लेवे। सबोंको एकत्र अदरखके रसके साथ अच्छे प्रकार खरल करके एक एक माशेकी गोलियाँ बनाकर प्रतिदिन एक एक गोली सेवन करे ॥ ४८–५२ ॥

पञ्चाननगुटी ख्याता सर्वरोगविनाशिनी ।
अम्लपित्तमहाव्याधिनाशिनी च रसायनी ॥ ५३ ॥
महाग्निकारिका चैषा परिणामव्यथापहा ।
शोथपाण्ड्वामयानाहप्लीहगुल्मोदरापहा ॥ ॥ ५४ ॥
गुरुवृष्यान्नपानानि पयो मांसरसो हिताः ॥ ५५ ॥

यह पञ्चाननगुटिका सर्वप्रकारके रोगोंको नष्ट करनेवाली है। भयंकर अम्लपित्त, मन्दाग्नि, सूजन, पाण्डु, आनाह, प्लीहा, गुल्म, उदररोग और परिणाम शूल इन सम्पूर्ण रोगोंको यह वटी तत्काल दूर करती है। यह जठराग्निको अत्यन्त दीपन करनेवाली और परम रसायन है। इसपर भारी वीर्यवर्द्धक पदार्थ दूध और मांसरस इनका भोजन हितकर है ॥ ५३–५५ ॥

लघुक्षुधावतीगुटिका १–२ ।

रसगन्धकमभ्राणि यमानी त्र्यूषणं तथा ।
त्रिफला शतपुष्पा च चविका जीरकद्वयम् ॥ ५६ ॥
पुनर्नवा वचा दन्ती त्रिवृता घण्टकर्णकम् ।
दण्डोत्पला सारिवे द्वे चाक्षमात्राणि कारयेत् ॥ ५७ ॥
मण्डूरं द्विगुणं दत्त्वा पेषणीयं प्रयत्नतः ।
स्वरसेनार्द्रकस्यैता आलोड्य गुडिकां कुरु ॥ ५८ ॥

१–शुद्ध किया पारा, गन्धक, अभ्रक, अजवायन, सोंठ, मिरच, पीपल, हरड, बहेडा, आमला, सोंफ, चव्य, जीरा, कालाजीरा, पुनर्नवा, वच, दन्ती, निसोत, घण्टाकर्णकी जड, सफेद दण्डोत्पलकी जड, उसवा, अनन्तमूल प्रत्येक दो दो तोले और मण्डूर चार तोले लेकर सबोंको एकत्र पीसलेवे। फिर अदरखके रसके साथ खरल करके एक एक रत्तीकी गोलियाँ बनालेवे ॥ ५६–५८ ॥

प्रत्यहं भक्षयेदेकां भक्तवारि पिबेदनु ।
वटी क्षुधावती नाम्ना चाम्लपित्तविनाशिनी ॥ ५९ ॥

अग्निं च कुरुते दीप्तं तेजोवृद्धिं बलं तथा।
प्लीहानं श्वासमानाहमामवातं विनाशयेत् ॥ ६० ॥
परिणामभवं शूलं कासं पञ्चविधं तथा।
जगतस्तु हितार्थाय वाग्भटेन प्रकीर्त्तिता ॥ ६१ ॥

प्रतिदिन प्रातःकाल एक गोली खाय ऊपरसे काँजीको पीवे। यह क्षुधावतीनामवाली वटी अम्लपित्तको नष्ट कर अग्निको दीपनकर तेज और बलको बढाती है। तिल्ली, श्वास, अफरा, आमवात, परिणामजन्य शूल और पाँचों प्रकारकी खाँसीको शीघ्र दूर करती है। श्रीवाग्भटाचार्यने जीवोंको हितके लिये इसको निर्माण किया है ॥ ५९–६१ ॥

रसायोगन्धकाभ्राणि त्र्यूषणं त्रिफला वचा।
यमानी शतपुष्पा च चविका जीरकद्वयम् ॥ ६२ ॥
प्रत्येकं पलमेषां तु घण्टकर्णः पुनर्नवा।
माणकं ग्रन्थिकं चेन्द्रं केशराजः सुदर्शनी ॥ ६३ ॥
दण्डोत्पला त्रिवृद्दन्ती जामातृ रक्तचन्दनम्।
भृङ्गापामार्गकुलका मण्डूकं च पलार्द्धकम् ॥
आर्द्रकस्वरसेनाथ गुटिकां संप्रकल्पयेत् ॥ ६४ ॥

२–शुद्ध पारा, लोहा, शुद्ध गन्धक, अभ्रक, त्रिकुटा, त्रिफला, वच, अजवायन, सौंफ, चव्य, जीरा, कालाजीरा ये प्रत्येक चार चार तोले तथा घण्टाकर्णकी जड, सोंठी, मानकन्द, पीपलामूल, इन्द्रजौ, कालाभाँगरा, सुदर्शनवृक्षकी लता, सफेद दण्डोत्पल, निसोत, दन्तीकी जड, हुलहुलकी जड, लालचन्दन, भाँगरा, चिरचिटा, पटोलपत्र और पीलेफूलवाली मुण्डी इनको दो दो तोले लेवे। फिर सबोंको एकत्र अदरखके रसके साथ उत्तम प्रकार खरलकर बेरकी गुठलीके बराबर गोलियाँ बनालेवे। ६२–६४ ॥

बदरास्थिसमां चैकां भक्षयित्वा पिबेदनु।
वारि भक्तजलं चैव प्रातरुत्थाय मानवः ॥ ६५ ॥
वटी क्षुधावती नाम्ना सर्वाजीर्णविनाशिनी।
अग्निं च कुरुते दीप्तं भस्मकं च नियच्छति ॥ ६६ ॥

अम्लपित्तं च शूलं च परिणामकृतं च यत् ।
तत्सर्वं शमयत्याशु भास्करस्तिमिरं यथा ॥ ६७ ॥
मधुरं वर्जयेदत्र विशेषात्क्षीरशर्करे ॥ ६८ ॥

प्रत्येकदिन प्रातःसमय एक गोली खाकर ऊपरसे काँजीको पीवे । यह क्षुधावती सर्वप्रकारके अजीर्णोंको नष्ट करती है तथा जठराग्निको दीपन और भस्मक रोगको दूर करती है एवं अम्लपित्त, शूल और परिणामशूल इन सबोंको शीघ्र शमन करती है। सेवन करते समय मिष्टपदार्थ विशेषकर दूध खाँड इनको त्याग देवे ॥ ६५-६८ ॥

बृहत्क्षुधावतीगुटिका ।

गगनाद् द्विपलं चूर्णं लौहस्य पलमात्रकम् ।
लौहकिट्टपलार्द्धं च सर्वमेकत्र संस्थितम् ॥ ६९ ॥
मण्डूकपर्णीवशिरतालमूलीरसैस्तथा ।
भृङ्गवेरीकेशराजकालमारिषजैरथ ॥
त्रिफलाभद्रमुस्ता त्रिःस्थालीपाकाद्विचूर्णयेत् ॥ ७० ॥

अभ्रकभस्म ८ तोले, लोहभस्म ४ तोले और लोहेका मैल २ तोले इनको एकत्र मिलाकर मण्डूकपर्णी, सफेद हुलहुल और मुसली इनके मिलेहुए ३२ तोले रसके साथ प्रथम स्थालीपाक करे। फिर भाङ्गरा, शतावर, कालाभाँगरा, नाडीका शाक और मरसेका शाक इनके ३२ तोले रसमें द्वितीय स्थालीपाक करे। पश्चात् त्रिफलेके काथ और नागरमोथेके मिलेहुए ३२ तोले रसमें तृतीय स्थालीपाक कर औषधिका चूर्ण करलेवे ॥ ६९ ॥ ७० ॥

रसगन्धकयोः कर्षं प्रत्येकं ग्राह्यमेकतः ॥ ७१ ॥
मसृणे तच्छिलाखल्ले यत्नतः कज्जलीकृतम् ।
वचा चव्यं यमानी च जीरके शतपुष्पिका ॥ ७२ ॥
व्योषं मुस्तं विडङ्गं च ग्रन्थिकं खरमञ्जरी ।
त्रिवता चित्रको दन्ती सूर्यावर्त्तः सितस्तथा ॥ ७३ ॥
भृङ्गमानककन्दाश्च घण्टकर्णक एव च ।
दण्डोत्पला केशराजकालीककर्कोटकोऽपि च ॥ ७४ ॥

एषामर्द्धपलं ग्राह्यं पटघृष्टं सुचूर्णितम् ।
प्रत्येकं त्रिफलायाश्च पलार्द्धं पलमेव च ॥ ७५ ॥
एतत्सर्वं समालोड्य लौहपात्रे च भावयेत् ।
आतपे दण्डसंघृष्टमार्द्रकस्य रसैस्त्रिधा ॥ ७६ ॥
तद्रसेन शिलापिष्टां गुडिकां कारयेद्भिषक् ।
बदरास्थिमितां शुष्कां सुनिगुप्तां निधापयेत् ॥ ७७ ॥

तदनन्तर पारा और गन्धक इनको एक एक कर्ष लेकर यथाविधि एकत्र कज्जलीकर उपर्युक्त चूर्णमें मिलादेवे । फिर बच, चव्य, अजवायन, जीरा, कालाजीरा, सोंफ, सोंठ, मिरच, पीपल, नागरमोथा, वायविडङ्ग, पीपलामूल, चिरचिटेकी जड़, निसोत, चीता, दन्ती, सफेद हुलहुलकी जड़, भाँगरा, मानकन्द, भिमीकन्द, घण्टाकर्ण वृक्ष, दण्डोत्पल, कुकुरभाङ्गरा, पीलेचन्दनकी जड और काकड़ासिंगी इन औषधियोंको अलग २ दो दो तोले लेकर सबोंको एकत्र कूट पीसकर चूर्ण बनालेवे । हरड़, बहेड़ा और आमलेका चूर्ण छः छः तोले इन सबको एकत्रितकर लोहेके पात्रमें धूपमें रखकर अदरखके रसद्वारा तीन बार भावना देवे, फिर उक्त रसमेंही उत्तमप्रकार खरलकर बेरकी गुठलीके बराबर गोलियाँ बनाकर सुखाकर शुद्ध पात्रमें भरकर रखदेवे ॥ ७१-७७ ॥

तत्प्रातर्भोजनादौ च सेवितं गुडिकात्रयम् ।
अम्लोदकानुपानं तु हितं मधुरवर्जितम् ॥ ७८ ॥
दुग्धं च नारिकेलं च वर्जनीयं विशेषतः ।
भोज्यं यथेष्टमिष्टं च वारिभक्ताम्लकाञ्जिकम् ॥ ७९ ॥
हन्त्यम्लपित्तं विविधं शूलं च परिणामजम् ।
पाण्डुरोगं च गुल्मं च शोथोदरगुदामयान् ॥८०॥
यक्ष्माणं पंचकासं च मंदाग्नित्वमरोचकम् ।
प्लीहानं श्वासमानाहमामवातं स्वरामयम् ॥
गुडी क्षुधावती सेयं विख्याता रोगनाशिनी ॥ ८१ ॥

इनमेंसे प्रतिदिन प्रातःकाल भोजन करनेसे पहले तीन तीन गोलियाँ सेवन कर और ऊपरसे काँजीको पान करे । इसपर मिष्टपदार्थोंका भोजन, दूध और नारियलका जल सेवन करना त्यागदेना चाहिये तथा चावलोंका जल, खट्टे पदार्थ और काँजी इनका यथेष्ट भोजन करे । यह गुटिका अनेकप्रकारके अम्ल-

पित्त, शूल, परिणामशूल, पाण्डु, गुल्म, शोथ, उदर और गुदाके रोग, यक्ष्मा, ५ प्रकारकी खाँसी, मन्दाग्नि, अरुचि, तिल्ली, श्वास, अफारा, आमवात और स्वर- भङ्गप्रभृति रोगोंको नष्ट करती है । इसको क्षुधावती गुटिका कहते हैं । यह सर्व- प्रकारके रोगोंको नाश करनेवाली है ॥ ७८-८१ ॥

खण्डकूष्माण्डकावलेह ।

कूष्माण्डकरसो ग्राह्यः पलानां शतमात्रकम् ।
रसतुल्यं गवां क्षीरं धात्रीचूर्णं पलाष्टकम् ॥ ८२ ॥
धात्रीतुल्या सिता योज्या गव्यमाज्यं पलद्वयम् ।
मन्दाग्निना पचेत्सर्वं यावद्भवति पिण्डितम् ॥ ८३ ॥
पलार्द्धं पलमेकं वा प्रत्यहं भक्षयेदिदम् ।
खण्डकूष्माण्डकं ख्यातमम्लपित्तापहं परम् ॥ ८४ ॥

पेठेका रस १०० पल, गौका दूध १०० पल, आमलोंका चूर्ण ३२ तोले, मिश्री ३२ तोले और गौका घी ८ तोले इन सबको एकत्र मिलाकर मन्द मन्द अग्निसे पकावे । जब पकते पकते गाढा होजाय तब उतारलेवे । इस अवलेहको प्रतिदिन प्रातःसमय दो दो तोले प्रमाण सेवन करे । यह खण्डकूष्माण्डनामक अव- लेह अम्लपित्तको शीघ्र नष्ट करता है ॥ ८२-८४ ॥

अम्लपित्तान्तकमोदक ।

नागरस्य कणायाश्च पलान्यष्टौ प्रदापयेत् ।
गुवाकस्य पलान्यष्टौ सर्वमेकत्र कारयेत् ॥ ८५ ॥
घृतं क्षीरं ततः पश्चात् प्रस्थं प्रस्थं प्रदापयेत् ।
लवङ्गं केशरं कुष्ठं यमानी कारवी वचा ॥ ८६ ॥
चन्दनं मधुकं रास्ना देवदारु फलत्रिकम् ।
पत्रमेला वराङ्गं च सैन्धवं हबुषं शठी ॥ ८७ ॥
मदनं कट्फलं मांसी गगनं वङ्गरूप्यकम् ।
तालीशं पद्मकं मूर्वा समङ्गा वंशलोचना ॥ ८८ ॥
ग्रन्थिकं शतपुष्पा च शतमूली कुरण्टकम् ।
जातीफलं जातिकोषं कक्कोलमम्बुदं कणा ॥ ८९ ॥

कर्पूरं च विडङ्गं च अजमोदा बलाऽमृता।
मर्कटी क्षुरबीजं च चन्दनं देवताडकम् ॥ ९० ॥
लौहं कांस्यं प्रदातव्यं कर्षमात्रं भिषग्विदा।
अन्यत्सर्वं कर्षमात्रं कर्षार्द्धं स्वर्णभस्मकम् ॥ ९१ ॥
चतुर्धातुविधानेन मारितं ग्राहयेत्सुधीः।
अम्लपित्तान्तको ह्येष मोदको मुनिभाषितः ॥ ९२ ॥

सोंठ, पीपल और सुपारी इनका चूर्ण पचीस पचीस तोले, घी और दूध एक एक प्रस्थ इन सबोंको एकत्र मिलाकर पकावे। जब पकते पकते अवलेहकी समान गाढा होजाय तब उसमें लौंग, केशर, कूठ, अजवायन, कालाजीरा, बच, लालचन्दन, मुलहठी, रायसन, देवदारु, त्रिफला, पत्रज, इलायची, दारचीनी, सैंधानमक, धनियाँ, कचूर, मैनफल, कायफल, बालछड, अभ्रकभस्म, वंगभस्म, रौप्यभस्म, तालीशपत्र, पद्माख, मूर्वा, वराहक्रान्ता, वंशलोचन, पीपलामूल, सौंफ, शतावर, पीलीकटसरैया, जायफल, जावित्री, शीतलचीनी, नागरमोथा, पीपल, कपूर, वायविडंग, अजमोद, खिरैंटी, गिलोय, कौंछके बीज, तालमखाना, सफेदचन्दन, देवताड, लोहकी भस्म और कांसका भस्म ये प्रत्येक औषधि एक एक तोला और चतुर्धातुविधिसे जारित सुवर्णभस्म छः मासे इन सबको एकत्र खूब बारीक पीसकर मिलादेवे, फिर करछीसे एकमएक करके मोदक बनालेवे। प्रतिदिन प्रातःकाल उचित मात्रासे सेवन करे ॥ ८९–९२ ॥

वान्तिं मूर्च्छां च दाहं च कासं श्वासं भ्रमं तथा।
वातजं पित्तजं चैव कफजं सान्निपातिकम् ॥ ९३ ॥
सर्वरोगं निहन्त्याशु प्रमेहं सूतिकागदम्।
शूलं च वह्निमान्द्यं च मूत्रकृच्छ्रं गलग्रहम् ॥ ९४ ॥

यह अम्लपित्तान्तक मोदक वमन, मूर्च्छा, दाह, श्वास, खाँसी, भ्रम, वातज, पित्तज, कफज और सन्निपातज सर्वरोग, प्रमेह, सूतिकारोग, शूल, मन्दाग्नि, मूत्रकृच्छ्र, गलग्रह इत्यादि विकारोंको शीघ्र नष्ट करता है ॥ ९३ ॥ ९४ ॥

सौभाग्यशुण्ठीमोदक।

त्रिकटु त्रिफला भृङ्गजीरकद्वयधान्यकम्।
कुष्ठाजमोदा लौहाभ्रं शृङ्गी कट्फलमुस्तकम् ॥ ९५ ॥

एला जातीफलं मांसी पत्रं तालीशकेशरम् ।
गन्धमात्रा शठी यष्टिलवङ्गं रक्तचन्दनम् ॥ ९६ ॥
एतानि समभागानि शुण्ठीचूर्णं तु तत्समम् ।
सिता द्विगुणिता तत्र गव्यक्षीरं चतुर्गुणम् ॥ ९७ ॥
तोलप्रमाणं दातव्यं दुग्धेनापि जलेन वा ।
अम्लपित्तं निहन्त्येतदरोचकनिषूदनम् ॥ ९८ ॥
शूलहृद्रोगशमनं कण्ठदाहं नियच्छति ।
हृद्दाहं च शिरःशूलं मन्दाग्नित्वं विनाशयेत ॥ ९९ ॥
हृच्छूलं पार्श्वकुक्षिस्थवस्तिशूलं गुदे रुजम् ।
बलपुष्टिकरं चैव वशीकरणमुत्तमम् ॥ १०० ॥
विशेषादम्लपित्तं च मूत्रकृच्छ्रं ज्वरं भ्रमम् ।
निहन्ति नात्र सन्देहो भास्करस्तिमिरं यथा ॥ १ ॥

सोंठ, मिरच, पीपल, हरड, बहेडा, आमला, दारचीनी, जीरा, कालाजीरा, धनियाँ, कूठ, अजमोद, लोहा, अभ्रक, काकडासिंगी, कायफल, नागरमोथा, इलायची, जायफल, बालछड, तेजपात, तालीसपत्र, नागकेशर, गन्धमात्रा, (एक प्रकारका सुगन्धिद्रव्य), कचूर, मुलहठी, लौंग और लालचन्दन, इन औषधियोंके चूर्णको समान भाग और सब चूर्णके बराबर भाग सोंठका चूर्ण लेवे, फिर समस्त चूर्णसे दुगुनी मिश्री और गौका दूध सबसे चौगुना भाग लेकर सबोंको एकत्र मिलाकर विधिपूर्वक पाक करे। जब पाक पूर्ण होजाय तब एक एक तोलेके लड्डू बनालेवे। पश्चात् एक मोदक प्रतिदिन दूधके अथवा जलके साथ खानेसे अम्लपित्त, अरुचि, शूल, हृदयरोग, कण्ठदाह, हृदयकी दाह, शिरदर्द, मन्दाग्नि, हृदय, पसली, कुक्षि और वस्तिगत शूल, गुदाके रोग, मूत्रकृच्छ्र, ज्वर, भ्रमादि रोग विशेषकर अम्लपित्तरोग निश्चय नष्ट होते हैं। यह मोदक बल, पुष्टिकारक और उत्तम वशीकरण औषधि है ॥ ९९-२०१ ॥

सितामण्डूर ।

धमनविधिविशुद्धं गोजले सप्तवारान्
तरणिकिरणशुष्कं श्लक्ष्णमण्डूरचूर्णम् ।
विमलकवलमेकं पञ्चसंख्यं सितायाः ।
अथवघृतपलार्द्धौ द्व्यष्टकं गव्यदुग्धम् ॥ २ ॥

मृदुदहनशिखाभिर्मन्दमन्दं कटाहे
विगतसलिलशेषं पाचयेत्पाकविज्ञः।
वितरितगुडपाके किञ्चिदुष्णेऽवतीर्णे
दृषदि दृढमभीक्ष्णं चूर्णितं देयमाशु ॥ ३ ॥
त्रिकटुकमधुकैलायासवैडङ्गसारं
त्रिफलगदलवङ्गं कर्षमेकैकशश्च।
तदनु शिशिरकाले द्वे पले माक्षिकस्य
तदनु पटनिघृष्टं गालितं संप्रदद्यात् ॥ ४ ॥

चार तोले मण्डूरको धमनविधिसे सात बार गोमूत्रमें शुद्ध कर तीक्ष्ण, धूपमें सुखाकर चूर्ण करलेवे। फिर मिश्री २० तोले, पुराना घी ३२ तोले और गौका दूध ६४ तोले इन सबको कढाईमें डालकर मन्दमन्द अग्निसे पकावे। जब पकते पकते गुडके पाकके समान गाढा पडजाय तब नीचे उतारकर उस मन्दोष्ण पाकमें सोंठ, मिरच, पीपल, मुलहठी, इलायची, जवासा, वायविडङ्ग, त्रिफला, कूठ और लौंग इनको एक एक तोला लेकर पत्थरपर खूब बारीक पीसकर मिलादेवे। जब शीतल होजाय तब इसको ८ तोले शहदको कपडेमें छानकर उसीमें मिलाकर शुभ तिथि और शुभदिनमें भोजन करनेसे पहले सेवन करे ॥ २–४ ॥

शुभतिथिदिवसादौ भोजनादौ निषेव्यं
प्रथमदिवसमेकं शाणमानं तदूर्ध्वम्।
अहरहरनुवृद्ध्या यावदक्षं प्रयोज्यं
हिमकररुचिशीतं गव्यदुग्धं च पेयम् ॥ ५ ॥
नियतमयमसाध्यानम्लपित्तोत्थशूलान्
वमिनिवहसदाहानाहमोहप्रमेहान्।
विविधरुधिररोगान् पित्तयुक्तानशेषा-
नपहरति सिताख्यो दिव्यमण्डूरयोगः ॥ ६ ॥

इसको प्रथम दिन ४ माशे और पश्चात् प्रतिदिन मात्राकी वृद्धि करतेहुए दो तोलेतक सेवन करे और ऊपरसे शीतल गोदुग्ध पान करे। यह दिव्य मण्डूर निरन्तर सेवन करनेपर असाध्य अम्लपित्त, तज्जन्यशूल, वमन, विदाही,

दाह, आनाह, मोह, प्रमेह, अनेक प्रकारके रुधिरविकार और पित्तजनित सम्पूर्ण रोगोंको तत्काल नष्ट करता है । इसको सितामण्डूर कहते हैं ॥ ५ ॥ ६ ॥

शुण्ठीखण्ड ।

शुण्ठीचूर्णस्य कुडवं खण्डप्रस्थं समाचरेत् ।
दत्त्वा द्विकुडवं सर्पिः क्षीरप्रस्थद्वये पचेत् ॥ १०७ ॥
लेह्येऽवतारिते दद्याद्धात्रीधान्यकमुस्तकम् ।
अजाजी पिप्पली वांशी त्रिजातं कारवी शिवा ॥१०८॥
त्रिशाणं मरिचं नागं षण्माषं तु पृथक् पृथक् ।
पलत्रयं च मधुनः शीतीभूते प्रदापयेत् ॥ १०९ ॥
ततो मात्रां प्रयुञ्जीत अम्लपित्तनिवृत्तये ।
शूलहृद्रोगवमनैरामवातैश्च पीडितः ॥ ११० ॥

सोंठका चूर्ण १६ तोले, खाँड ६४ तोले, घी ३२ तोले और दूध १२८ तोले इन सबको एकत्रकर विधिपूर्वक पकावे । जब पकते पकते लेहके समान होजाय तब चूल्हेसे उतारकर उसमें आमले, धनियाँ, नागरमोथा, जीरा, पीपल, वंशलोचन, दारचीनी, इलायची, तेजपात, कालाजीरा, और हरड ये प्रत्येक औषधि एक एक तोला एवं कालीमिरच और नागकेशर इनको छः छः मासे लेकर खुब महीन पीस-कर डालदेवे और पाकके शीतल होजानेपर १२ तोले शहद डालकर सबको अच्छे प्रकार मिलादेवे । इसकी प्रतिदिन युक्तियुक्त मात्राको सेवन करनेसे अम्लपित्त, शूल हृदयरोग, वमन और आमवातरोग जाता है ॥ १०७-११० ॥

पिप्पलीखण्ड ।

कणाचूर्णस्य कुडवं षट्पलं हविषस्तथा ।
शतावरीरसस्याष्टौ पलान्यत्र प्रदापयेत् ॥ १११ ॥
खण्डप्रस्थं समादाय क्षीरप्रस्थद्वये पचेत् ।
त्रिजातमुस्तधन्याकशुण्ठीवांशीद्विजीरकम् ॥ १२ ॥
अभयाऽऽमलकं चैव चूर्णं द्वादशमाषकम् ।
तदर्द्धं मरिचं नागं सारं खदिरमेव च ॥
पलत्रयं च मधुनः शीतीभूते प्रदापयेत् ॥ १२ ॥

पीपलका चूर्ण १६ तोले घी २४ तोले, शतावरका रस ३२ तोले, खाँड ६४ तोले और दूध १२८ तोले लेकर सबको एकत्र पकावे। जब पाक सिद्ध होजाय तब दारचीनी, इलायची, तेजपात, नागरमोथा, धनियाँ, सोंठ, वंशलोचन, जीरा, कालाजीरा, हरड, आमले इनका चूर्ण एक एक तोला, मिरच, नागकेशर और खैरसार ये छः छः मासे इन सबको एकत्र कूटपीसकर डालदेवे एवं शीतल होनेपर १२ तोले शहद मिलादेवे ॥ १११-१३ ॥

ततो मात्रां प्रयुञ्जीत अम्लपित्तनिवृत्तये ॥ १४ ॥
शूलारोचकहृल्लासच्छर्दिपित्ताम्लशूलनुत् ।
अग्निसन्दीपनो हृद्यः खण्डपिप्पलिको मतः ॥ १५ ॥

फिर अम्लपित्तकी निवृत्तिके लिये उचितमात्रासे सेवन करे। इससे शूल, अरुचि, हृल्लास, वमन, अम्लपित्त और शूलरोग नष्ट होते हैं। यह पिप्पलीखण्ड जठराग्निको दीपन करनेवाला और हृदयको हितकारी है ॥ ११४ ॥ १५ ॥

बृहत्पिप्पलीखण्ड ।

पिप्पल्याः कुडवं चूर्णं घृतस्य कुडवद्वयम् ।
पलषोडशिकं खण्डाद्रसे वर्य्याः पलाष्टके ॥ १६ ॥
पलषोडशिके चैव आमलक्या रसस्य च ।
क्षीरप्रस्थद्वये साध्यं लेहीभूते ततः क्षिपेत् ॥ १७ ॥
त्रिजातकाभयाजाजी धन्याकं मुस्तकं शुभा ।
धात्री च कार्षिकं चूर्णं कर्षार्द्धं चापि जीरकम् ॥ १८ ॥
कुष्ठं नागरकं नागं सिद्धशीतेऽवचूर्णितम् ।
जातीफलं समरिचं मधुनश्च पलद्वयम् ॥ १९ ॥

पीपलका चूर्ण १६ तोले, घी ३२ तोले, चीनी ६४ तोले, शतावरका रस ३२ तोले और आमलोंका रस ६४ तोले इनको दो प्रस्थ गोदुग्धमें उत्तमप्रकार पकावे। जब पाक पकते पकते लेहके समान होजाय तब उसमें त्रिजातक, हरड, कालाजीरा, धनियाँ, नागरमोथा, वंशलोचन, और आमले इनका चूर्ण एक एक तोला एवं जीरा, कूठ, सोंठ, नागकेशर, जायफल और मिरच इनको छः छः मासे लेकर, सबोंको एकत्र बारीक पीसकर डालदेवे और शीतल होनेपर ८ तोले मध डालकर सबको एकमएक करलेवे ॥ १६-१९ ॥

उपयुञ्ज्यात्ततो धीमानम्लपित्तनिवृत्तये ।
हृल्लासारोचकच्छर्दिश्वासकासक्षयापहम् ॥
अग्निसन्दीपनं हृद्यं पिप्पलीखण्डसंज्ञितम् ॥ १२० ॥

तदुपरान्त बुद्धिमान् पुरुष अम्लपित्तरोगकी शान्तिके लिये अग्निका बलाबल विचारकर इसको उपयुक्त मात्रासे सेवन करे। इसके सेवनसे उबकाई आना, अरुचि, वमन, श्वास, खाँसी, क्षयप्रभृति विकार दूर होते हैं। यह बृहत्पिप्पलीनामक खण्ड अत्यन्त अग्निदीपक और हृदयको हितकारी है ॥ १२० ॥

जीरकाद्यघृत ।

पिष्ट्वाऽजाजीं सधन्याकं घृतप्रस्थंविपाचयेत् ।
कफपित्तारुचिहरं मन्दानलवमिं जयेत् ॥ २१ ॥

घी एक प्रस्थ, कल्कके लिये कालाजीरा और धनियाँ इनको पीसकर कल्क करलेवे। फिर इस कल्कके द्वारा विधिपूर्वक घृतको पकावे। यह जीरकाद्यघृत कफ, पित्त, अरुचि, मन्दाग्नि और वमनको दूर करता है ॥ २१ ॥

शतावरीघृत ।

शतावरीमूलकल्कं घृतप्रस्थं पयः समम् ।
पचेन्मृद्वग्निना सम्यक् क्षीरं दत्त्वा चतुर्गुणम् ॥ २२ ॥

शतावरकी जडका कल्क चार प्रस्थ, घी एक प्रस्थ और दूध चार प्रस्थ सबोंको मिलाकर यथाविधिसे मन्द मन्द अग्निद्वारा घृतको सिद्ध करे ॥ २२ ॥

नाशयेदम्लपित्तं च वातपित्तोद्भवान् गदान् ।
रक्तपित्तं तृषां मूर्च्छां श्वासं सन्तापमेव च ॥ २३ ॥

यह घृत अम्लपित्त, वात और पित्तसे उत्पन्न रोग, रक्तपित्त, प्यास, मूर्च्छा, श्वास और सन्तापको हरता है ॥ २३ ॥

नारायणघृत ।

जलैर्दशगुणैः क्वाथ्यंपिप्पलीपलषोडश ।
पादशेषं हरेत्क्वाथं क्वाथ्यतुल्यं घृतं पचेत् ॥ २४ ॥
रसप्रस्थं गुडूच्याश्च धात्र्याः षष्टिपलं रसम् ।
द्राक्षा धात्री पटोलं च विश्वं च कटुका वचा ॥
पलप्रमाणं कल्कं च दत्त्वा सर्पिःसमुद्धरेत् ॥ २५ ॥

६४ तोले पीपलोंको दसगुन जलमें पकावे । जब पकते पकते चौथाई भाग जल शेष रहजाय तब उतारकर छानलेवे । फिर उस क्वाथकी बराबर घृत, गिलोयका रस १ प्रस्थ, आमलोंका रस ६० पल एवं दाख, आँवले, परवल, सोंठ, कुटकी और वच इन सबका चार चार तोले कल्क लेकर एकत्रित करके उत्तम विधिसे घृतको सिद्ध करे ॥ २४ ॥ २५ ॥

अम्लपित्तहरं खादेद्दाहच्छर्दिनिवारणम् ।
असाध्यं साधयेत्सद्यो नाम्ना नारायणं घृतम् ॥ २६ ॥

इस घृतको सेवन करनेसे अम्लपित्त, दाह और वमन होना दूर होती है । यह नारायणनामवाला घृत असाध्यरोगको भी तत्काल नष्ट करता है ॥ २६ ॥

अम्लपित्तरोगमें पथ्य ।

ऊर्ध्वगे वमनं पूर्वमधोगे तु विरेचनम् ।
सर्वत्र शस्यते पश्चान्निरूहश्चापि शालयः ॥ २७ ॥
यवगोधूममुद्गाश्च पुराणो जाङ्गलो रसः ।
जलानि तप्तशीतानि शर्करामधुसक्तवः ॥ २८ ॥
कर्कोटकं कारवेल्लं पटोलं हिलमोचिका ।
वेत्राग्रं वृद्धकूष्माण्डं रम्भापुष्पं च वास्तुकम् ॥ २९ ॥
कपित्थं दाडिमं धात्री तिक्तानि सकलानि च ।
अम्लपित्तामये नित्यं सेवितव्यानि मानवैः ॥ १२० ॥

ऊर्ध्वगत अम्लपित्तरोगमें प्रथम वमन और अधोगत अम्लपित्तमें विरेचन कराकर पश्चात् दोनों प्रकारके अम्लपित्तमें निरूहबस्तिका प्रयोग करना चाहिये । पुराने शालिचावल जौ गेहूँ मूँग जाङ्गलजातप्राणियोंका मांसरस औटाकर शीतल कियाहुआ जल सोंठ और शहद मिलेहुए सत्तू बेल करेला परवल हुलहुलका शाक बेंतकी कोंपल पकापेठा केलेका मोचा बथुआ कैथ अनार आमले और सर्व प्रकारके तिक्तरसयुक्त पदार्थ; ये सब अम्लपित्तरोगमें प्रतिदिन सेवन करनें चाहिये ॥ २७–१२० ॥

अम्लपित्तरोगमें अपथ्य ।

नवान्नानि विरुद्धानि कफपित्तकराणि च ।
वमिवेगं तिलान्माषान् कुलत्थांस्तैलभक्षणम् ॥ १२१ ॥
अविदुग्धं च धान्याम्लं लवणाम्लकटूनि च ।
गुर्वन्नं दधि मद्यं च वर्जयेदम्लपित्तवान् ॥ १२२ ॥

अम्लपित्तवाला रोगी नवीन अन्न स्वभावविरुद्ध और कफपित्तकारक द्रव्योंका भोजन वमनादिके वेगको रोकना तिल उडद कुलथी तेल भेडका दूध कांजी नमकीन द्रव्य खट्टे चरपरे और गुरुपाकी द्रव्य दही और मद्य इन सब पदार्थोंको तत्काल छोडदेवे ॥ १२१ ॥ १२२ ॥

इति भैषज्यरत्नावल्यां अम्लपित्तचिकित्सा ।

विसर्पकी चिकित्सा ।

विरेकवमनालेपसेचनासृग्विमोक्षणैः ।
उपाचरेद्यथादोषं विसर्पानविदाहिभिः ॥ १ ॥

विसर्परोगमें विरेचन, वमन, प्रलेप, सेचन, रक्तमोक्षण और जो दाहकारक न हों ऐसे उपचार दोषानुसार प्रयोग करने चाहिये ॥ १ ॥

पटोलपिचुमन्दाभ्यां पिप्पल्या मदनेन च ।
विसर्पे वमनं शस्तं तथैवेन्द्रयवैः सह ॥ २ ॥

पटोलपत्र और नीमकी छालके काथके साथ पीपल और मैनफलका चूर्ण तथा इन्द्रजौका चूर्ण मिलाकर विसर्परोगमें वमन होनेके लिये देवे ॥ २ ॥

त्रिफलारससंयुक्तं सर्पिस्त्रिवृतया सह ।
प्रयोक्तव्यं विरेकार्थं विसर्पज्वरशान्तये ॥
रसमामलकानां वा घृतमिश्रं प्रदापयेत् ॥ ३ ॥

विसर्पज्वरकी निवृत्तिके लिये त्रिफलेके काथमें घी और निसोतका चूर्ण डालकर विरेचनार्थ प्रदान करे अथवा आमलोंके स्वरसमें घी डालकर देवे तो इससे दस्त होकर विसर्परोग नष्ट होता है ॥ ३ ॥

मुस्तारिष्टपटोलानां क्वाथः सर्वविसर्पनुत् ।
धात्रीपटोलमुद्गानामथवा घृतसंप्लुतम् ॥ ४ ॥

नागरमोथा, नीमकी छाल और पटोलपातका काथ अथवा आमले, परवल और मूंग इनका काथ घृत मिलाकर सेवन करनेसे विसर्प रोग जाय ॥ ४ ॥

अमृतादि ।

अमृतवृषपटोलं मुस्तकं सप्तपर्णं खदिरमसितवेत्रं

निम्बपत्रं हरिद्रे। विविधविधविसर्पान् कुष्ठविस्फोट-
कण्डूरपनयति मसूरीं शीतपित्तं ज्वरं च ॥ ५ ॥

गिलोय, अडूसा, पटोलपत्र, नागरमोथा, सतवन, खैर, सारिवा, नीमके पत्ते, हल्दी और दारुहल्दी इनका विधिपूर्वक क्वाथ बनाकर पान करनेसे नानाप्रकारके विसर्परोग, कोढ, विस्फोटक, खुजली, मसूरी, शीतपित्त और ज्वर इत्यादि रोग दूर होते हैं ॥ ५ ॥

नवकषाय-गुग्गुलु।

अमृतवृषपटोलं निम्बवल्कैरुपेतं त्रिफलखदिरसारं
व्याधिघातं च तुल्यम्। क्वथितमिदमशेषं गुग्गुलोर्भाग-
युक्तं जयति विषविसर्पान्कुष्ठमष्टादशाख्यम् ॥ ६ ॥

गिलोय, अडूसेकी छाल, परवल, नीमकी छाल, हरड, बहेडा, आमला, खैरसार और अमलतासका गूदा इनको समान भाग लेकर क्वाथ बनावे। उस क्वाथमें एक तोला शुद्ध गूगल डालकर पान करे तो यह क्वाथ विषजन्य विसर्प, १८ प्रकारके कोढ तथा अन्य समस्त विकारोंको शीघ्र जीतता है ॥ ६ ॥

कालाग्निरुद्ररस।

सूताभ्रकान्तलोहानां भस्म गंधकमाक्षिकम्।
वन्यकर्कोटकद्रावैस्तुल्यं मर्द्यं दिनावधि ॥ ७ ॥
वन्यकर्कोटिकाकन्दे क्षिप्त्वा लिप्त्वा मृदा बहिः।
भूधराख्ये पुटे पश्चाद्दिनैकं तद्विपाचयेत् ॥ ८ ॥
दशमांशं विषं योज्यं माषमात्रं तु भक्षयेत्।
रसः कालाग्निरुद्रोऽयं दशाहेन विसर्पनुत् ॥
पिप्पलीमधुसंयुक्तमनुपानं प्रकल्पयेत् ॥ ९ ॥

शुद्ध पारा, अभ्रक, कान्तलोहभस्म, शुद्ध गन्धक और सोनामाखी इनको समान भाग लेकर वनककोडेके रसमें एक दिनतक खरलकर वनककोडेके कन्दमें रक्खे और ऊपर मिट्टीसे लहेसकर भूधरयन्त्रमें एक दिनतक पुटपाक करे। जब पककर शीतल होजाय तब सम्पूर्ण औषधिके दशभागकी बराबर विष मिलाकर एकत्र पीसलेवे। फिर प्रतिदिन प्रातःकाल इसको एक मासा प्रमाण लेकर पीपलके चूर्ण और शहदमें मिलाकर भक्षण करे तो यह कालाग्निरुद्ररस दस दिनमें ही विसर्परोगको नष्ट करता है ॥ ७-९ ॥

वृषखदिरपटोलपत्रनिम्बत्वगमृतामलकीकषायकल्कैः ।
घृतमभिनवमेतदाशु पक्वं जयति विसर्पगदान्सकुष्ठगुल्मान् ॥

अडूसा, खैर, पटोलपात, नीमकी छाल, गिलोय और आमले इनके क्वाथ और कल्कके साथ शुद्ध और नवीन गोघृतको विधिपूर्वक पकावे । यह घृत विसर्प, कुष्ठ और गुल्मरोगको तत्काल शान्त करता है ॥ १० ॥

करञ्जतैल ।

करञ्जसप्तच्छदलाङ्गलीकस्नुह्यर्कदुग्धानलभृङ्गराजैः ।
तैलं निशामूत्रविषैर्विपक्वं विसर्पविस्फोटविचर्चिकाघ्नम् ॥ ११ ॥

करंजुआ, सतौना, कलिहारी, थूहरका दूध, आकका दूध, चीतेकी जड और भाँगरा इनके क्वाथमें हलदीका कल्क, गोमूत्र और विष डालकर तिलके तेलको पकावे । यह तेल विसर्प विस्फोटक और विचर्चिका रोगको नष्ट करता है ॥ ११ ॥

विसर्परोगमें पथ्य ।

विरेको वमनं लेपो लङ्घनं रक्तमोक्षणम् ।
पुराणा यवगोधुमकङ्गुषष्टिकशालयः ॥ १२ ॥
मुद्गा मसूराश्चणकास्तुवर्यो जाङ्गलो रसः ।
नवनीतं घृतं द्राक्षा दाडिमं कारवेल्लकम् ॥ १३ ॥
वेत्राग्रं कुलकं धात्री खदिरो नागकेशरः ।
लाक्षा शिरीषः कर्पूरं चन्दनं तिललेपनम् ॥ १४ ॥
ह्रीबेरकं मुस्तकं च तिक्तानि सकलानि च ।
यथादोषमिदं पथ्यं सेवितव्यं विसर्पिभिः ॥ १५ ॥

विरेचन, वमन, लेप, लंघन और रक्तमोक्षण करना, पुराने जौ, गेहूँ, मालकाङ्गनी, सौंठी और शालिके चावल मूँग, मसूर, चने, अडहर, जंगली जीवोंको मांसरस, नैनी घी, दाख, अनार, करेला, बेंतके अंकुर, पटोलपत्र, आमले, खैर, नागकेशर, लाख, सिरस, कपूर, चन्दन, शरीरपर तेलकी मालिश, सुगन्धवाला, नागरमोथा और कडवे पदार्थ ये सब दोषानुसार सेवन करनेसे विसर्प रोगियोंको हितकारी हैं ॥ १२–१५ ॥

विसर्परोगमें अपथ्य ।

व्यायाममह्नि शयनं सुरतं प्रवातं क्रोधं शुचं वमन-

वेगमसूयनं च । शाकं विरुद्धमशनं दधि कूर्चिकां च सौवीरमासवमनेकविधं किलाटम् ॥ १६ ॥ गुर्वन्नपानमखिलं लशुनं कुलत्थान् माषांस्तिलान्सकलमांसमजाङ्गलं चास्वेदं विदाहि लवणाम्लकटूनि मद्यान्यर्कप्रभामपि विसर्पगदी त्यजेत्तु ॥ १७ ॥

कसरत करना दिनमें सोना स्त्रीसङ्ग प्रबलवायु या पुर्वाई हवाका सेवन क्रोध शोक करना वमनके वेगको रोकना ईर्ष्या करना शाक विरुद्ध भोजन दही कूचिका (जो पदार्थ दही और दूधको औटाकर बनाये जाते हैं) काँजी अनेक प्रकारके आसव किलाट (फटे दूधका मावा) सर्वप्रकारके गुरुपाकी अन्न और पानीयद्रव्य लहसुन कुलथी उड़द तिल जङ्गलीजीवोंके मांसके अतिरिक्त अन्य सर्वप्रकारके मांस स्वेद लानेवाले दाहकारक द्रव्य लवण खटाई और कड़वे द्रव्य मदिरा तथा धूप इनको विसर्परोगी शीघ्र त्याग देवे ॥ १६ ॥ १७ ॥

इति भैषज्यरत्नावल्याम् विसर्पचिकित्सा ॥

विस्फोट-चिकित्सा ।

विस्फोटे लङ्घनं कार्यं वमनं पथ्यभोजनम् ।
यथादोषबलं वीक्ष्य युक्तियुक्तं विरेचनम् ॥ १ ॥

विस्फोटरोगमें दोषोंका बलाबल विचारकर लंघन वमन पथ्यभोजन और विरेचन करना युक्तियुक्त कहा है ॥ १ ॥

पटोलामृतभूनिम्बवासकारिष्टपर्पटैः ।
खदिराब्दयुतैः क्वाथो विस्फोटार्त्तिज्वरापहः ॥ २ ॥

पटोलपत्र, गिलोय, चिरायता, अडूसेकी छाल, नीमकी छाल, पित्तपापड़ा, खैर और नागरमोथा इनका क्वाथ बनाकर पान करनेसे विस्फोट (एक प्रकारका विषैलाफोड़ा) की पीड़ा और ज्वर दूर होता है ॥ २ ॥

पटोलत्रिफलारिष्टगुडूचीमुस्तचन्दनैः ।
समूर्वा रोहिणी पाठा रजनी सदुरालभा ॥ ३ ॥
कषायं पाययेदेतच्छ्लेष्मपित्तज्वरापहम् ।
कण्डूत्वग्दोषविस्फोटविषवीसर्पनाशनम् ॥ ४ ॥

परवल, त्रिफला, नीमकी छाल, गिलोय, नागरमोथा, लालचन्दन, मूर्वा, कुटकी, पाढ, हल्दी और धमासा इनका क्वाथ बनाकर पान करावे तो यह क्वाथ कफपित्तजन्य ज्वर, खुजली, त्वचाके विकार, विस्फोटक और विसर्प रोगको नष्ट करता है ॥ ३ ॥ ४ ॥

व्रणारिगुग्गुल।

पलं कृष्णा पुरः पञ्च त्रिफला त्रिपलं भवेत्।
भस्मसूतपलं चास्य कर्षः सर्वव्रणापहः ॥ ५ ॥

पीपल ४ तोले, गूगल २१ तोले, हरड बहेडा, आमला प्रत्येक चार चार तोलें और रससिन्दूर ४ तोले इन सबोंको एकत्रकर उत्तमप्रकार खरल करलेवे। इसको उपयुक्त मात्रासे सेवन करे तो यह सर्वप्रकारके व्रणोंको दूर करता है ॥ ५ ॥

पञ्चतिक्तकघृत।

पटोलसप्तच्छदनिम्बवासफलत्रिकच्छिन्नरुहाविपक्वम्।
तत्पंचतिक्तं घृतमाशु हन्ति त्रिदोषविस्फोटविसर्पकण्डूः ॥६॥

पटोलपत्र, सतौना, निम्बछाल, अडूसा और गिलोय इनके क्वाथ तथा त्रिफलाके कल्कद्वारा यथाविधि घृतको पकावे। यह पञ्चतिक्तकघृत यथानियम पान करे तो यह त्रिदोषोत्पन्नविसर्प, विस्फोटक और खुजलीको तत्काल नाश करता है ॥

विस्फोटरोगमें पथ्य।

विरेचनच्छर्दनलेपलङ्घनं पुरातनाः षष्टिकशालयो यवाः। मुद्गा मसुराश्चणका मुकुष्टका धन्वामिषं गव्यघृतं कठिल्लकम्॥७॥ वेत्राग्रमाषाढफलं पटोलकं ज्योतिष्मती निम्बदलानि चन्दनम्। तैलं सिताभ्रं तिललेपनं घनं बालं च विस्फोटगदं विनाशयेत् ॥ ८ ॥

जुलाब देना, वमन कराना, लेप करना, लंघन, पुराने सांठी और शालिके चावल, जौ, मूँग, मसूर, चने, मोठ, मरुदेशजन्य जीवोंका मांसरस, गौका घी, करेला, बेंतकी कोंपल, ढाकके बीज, परवल, मालकांगनी, नीमके पत्ते, लालचन्दन, तेल, कपूर, तेलकी मालिश, नागरमोथा और सुगन्धवाला ये सब पदार्थ विस्फोटरोगको नष्ट करनेवाले हैं, इसलिये उक्तरोगीको ये सब सेवन करने चाहिये ॥७॥ ८॥

विस्फोटरोगमें अपथ्य।

स्वेदं व्यवायं व्यायामं क्रोधं गुर्वन्नमातपम्।
वमिवेगं पत्रशाकं प्रवातं स्वपनं दिवा ॥ ९ ॥
ग्राम्योदकानूपमांसं विरुद्धान्यशनानि च।
तिलान्यवान्कुलत्थांश्च लवणाम्लकटूनि च ॥
विदाहि रूक्षमुष्णं च विस्फोटी परिवर्जयेत् ॥ १० ॥

पसीना निकलना, मैथुन, कसरत और क्रोधकरना, दुष्पाच्य अन्न, धूपका सेवन, वमनके वेगका रोध, पत्तोंवाले शाक, अत्यन्ततीक्ष्ण वायुका सेवन, दिनको सोना, ग्रामीण जीव, जलचर और अनूपदेशके प्राणियोंका मांस विरुद्ध खान पान, तिल, जौ, कुलथी, नमक, खट्टे और चरपरे, दाहकारी, रूखे और गरम ये सब पदार्थ विस्फोटवाला रोगी बहुत शीघ्र छोड देवे ॥ ९ ॥ १० ॥

इति भैषज्यरत्नावल्यां विस्फोटचिकित्सा।

मसूरिकाकी चिकित्सा।

चैत्रासितभूतदिने रक्तपताकान्विता स्नुहिभवेन।
धवलितकलशे न्यस्ता पापरोगं दूरतो धत्ते ॥ १ ॥

चैत्रमासके कृष्णपक्षकी चतुर्दशीके दिन शुभ्रवर्णवाले कलसेके ऊपर लालरंगके वस्त्रसे बनाई हुई थूहरके वृक्षकी शाखाकी पताका स्थापन करनेसे मसूरिका (वसन्त) रोग दूर भाग जाता है ॥ १ ॥

नारीणां वामपार्श्वस्थं नराणामपसव्यगम्।
पापरोगभयं दूरात् शिवास्थि विनिवारयेत् ॥ २ ॥

स्त्रियोंकी बाई पसलीमें और पुरुषोंके दहिनी पसलीपर हरडका बीज (किसीके मतमें गीदडकी हड्डी) धारण करनेसे पापरोग समूल जाता रहता है ॥

ज्वरे जाते स्पृशेन्नाम्बु तिष्ठेन्निर्वातवेश्मनि।
प्रक्षयेद्विजयाचूर्णैर्गात्रं वस्त्रेण बन्धयेत् ॥ ३ ॥

मसूरिकारोगमें ज्वर उत्पन्न होनेपर जलका स्पर्श न करे और वातरहित स्थानमें निवास करे। भाँगके चूर्णको शरीरमें मलकर वस्त्रसे ढकदेवे ॥ ३ ॥

रुद्राक्षं मरिचैर्युक्तं पीतं पर्युषिताम्भसा।
ऽग्रहात्पापरुजं हन्ति दृष्टं वारसहस्रशः ॥ ४ ॥

रुद्राक्ष और कालीमिरचके चूर्णको बासीजलके साथ पान करनेसे तीन दिनमेंही पापरोग (मसूरिका) नष्ट होता है। यह हजारों बार अनुभव कर देखागया है ॥ ४ ॥

सर्वासां वमनं पथ्यं पटोलारिष्टवत्सकैः ।
कषायैश्च वचावत्सयष्टयाह्वफलकल्कितैः ॥ ५ ॥

सर्वप्रकारकी मसूरिकामें पटोलपात, नीमके पत्ते और इन्द्रजौ इनके क्वाथमें वच, इन्द्रजौ, मुलहठी और मैनफलका चूर्ण डालकर वमन कराना हितकर है ॥५॥

सक्षौद्रं पाययेद्ब्राह्म्या रसं वा हैलमोचिकम् ।
वान्तस्य रेचनं देयं शमनं चाबले नरे ॥ ६ ॥

ब्राह्मीके रस अथवा हुलहुलके रसमें शहद मिलाकर पान कराकर वमन करावे, पश्चात् विरेचन करावे। किन्तु दुर्बलरोगीको शमनकारक औषधि देना ॥ ६ ॥

सुषवीपत्रनिर्यासं हरिद्राचूर्णसंयुतम् ।
रोमान्तीज्वरविस्फोटमसूरीशान्तये पिबेत् ॥ ७ ॥

करेलेके पत्तोंके स्वरसमें हल्दीका चूर्ण डालकर पान करे तो रोमान्ती (जिससे रोम खडे होजायँ) ज्वर, विस्फोट और मसूरिकारोग शान्त होते हैं ॥ ७ ॥

उष्ट्रकण्टकमूलं वाप्यनन्तामूलमेव वा ।
विधिगृहीतं ज्येष्ठाम्बु पीतं हन्ति मसूरिकाम् ॥ ८ ॥

ऊँटकटेलीकी जड अथवा अनन्तमूलको चावलोंके जलमें पीसकर पान करनेसे मसूरिकारोग नष्ट होता है ॥ ८ ॥

तद्वच्छृगालकण्टकमूलं च व्युषिताम्भसा ।
निशाचिञ्चाच्छदे शीतवारिपीते तथैव च ॥
व्युषिताम्बुना मरिचं पिबेत्पीतकपर्दकम् ॥ ९ ॥

शृगालकटेरीकी जडको बासीपानीके साथ पीसकर अथवा हल्दी और इमलीके पत्तोंको शीतलजलमें पीसकर किम्वा कालीमिरच और पीली कौडीके चूर्णको बासी जलके साथ पान करनेसे मसूरिका रोग दूर होता है ॥ ९ ॥

यावत्संख्या मसूर्यङ्गे तावद्भिः शैलुजैर्दलैः ।
छिन्नैरातुरनाम्ना तु गुडिकेति न वर्द्धते ॥ १० ॥

रोगीके शरीरपर मसूरिकाके जितने दाने हों उतने ही लिसौडेके पत्ते लावे रोगीके नामके अक्षरोंकी संख्याके अनुसार उनमेंसे प्रत्येकके उतनेही टुकडे करलेवे। इस प्रकार करनेसे मसूरिकाकी संख्या वृद्धिगत नहीं होती ॥ १० ॥

व्युषितं वारि सक्षौद्रं पीतं दाहगुडीहरम् ॥ ११ ॥

बासीजल और शहद एकत्र मिलाकर पीनेसे मसूरिकाकी दाह और गुमडियें दूर होती हैं ॥ ११ ॥

तर्पणं वातजायां प्राक् लाजचूर्णैः सशर्करैः ।
भोजनं तिक्तयूषैश्च प्रतुदानां रसेन वा ॥ १२ ॥

वातज मसूरिकामें प्रथम खीलोंके चूर्णमें खाँड मिलाकर तृप्तिके लिये देवे। तथा कडवेद्रव्योंके यूष और प्रतुद (जो पृथ्वी खुरच खुरच कर या चोंचोंसे वितरित-कर खाते हैं) पक्षियोंके मांसरसके साथ भोजन करावे ॥ १२ ॥

सौवीरेण तु संपिष्टं मातुलुङ्गस्य केशरम् ॥
प्रलेपात्पातयन्त्याशु दाहं चाशु नियच्छति ॥ १३ ॥

बिजौरेनींबूकी केशरको काँजीमें पीसकर लेप करनेसे मसूरिकारोग और उसकी दाह शीघ्र नष्ट होती है ॥ १३ ॥

पाददाहं प्रकुरुते पिडका पादसम्भवा ।
तत्र सेकं प्रशंसन्ति बहुशस्तण्डुलाम्बुना ॥ १४ ॥

पैरोंमें मसूरिकाकी गुमडियें उत्पन्न होनेसे पैरोंमें दाह होती है उसको दूर करनेके लिये चावलोंके पानीसे बारबार सेंकना चाहिये ॥ १४ ॥

पाककाले तु सर्वास्ता विशोषयति मारुतः ।
तस्मात्संबृंहणं कार्यं न तु पथ्यं विशोषणम् ॥ १५ ॥

मसूरिकाके पकनेके समय वायु उसकी गुमडियोंको सुखा देता है। उस समय वायु शमन करनेके लिये रोगीको पौष्टिक आहार देवे। पथ्य द्रव्य और शोषण क्रिया नहीं करे ॥ १५ ॥

गुडूचीं मधुकं द्राक्षां मोरटं डिमैः सह ।
पाककाले तु दातव्यं भेषजं गुडसंयुतम् ॥
तेन पाकं व्रजत्याशु न च वायुः प्रकुप्यति ॥ १६ ॥

मसूरिकाके पकते समय गिलोय, मुलहठी, दाख, ईखकी जड और अनारदाना इन औषधियोंके क्वाथमें गुड डालकर पान करावे। इससे मसूरिका शीघ्र पकजाती है और वायु कुपित नहीं होता ॥ १६ ॥

लिहेद्वा बादरं चूर्णं पाचनार्थं गुडेन तु ।
अनेनाशु विपच्यन्ते वातपित्तकफात्मिकाः ॥ १७ ॥

बेरकी गुठलीकी मींगके चूर्णको गुडके साथ मिलाकर पाचनके लिये भक्षण करे। इससे त्रिदोषजनित मसूरिका बहुत जल्द पकती है ॥ १७ ॥

शूलाध्मानपरीतस्य कम्पमानस्य वायुना ।
धन्वमांसरसाः शस्ता ईषत्सैन्धवसंयुताः ॥ १८ ॥

यदि वायुके कुपित होनेके कारण शूल, उदरमें अफारा और कम्प हो तो रोगीको कुछ थोडासा सैंधानमक डालकर मरुदेशके पशु पक्षियोंका मांसरस भोजन करावे ॥ १८ ॥

पिबेदम्भस्तप्तशीतं भावितं खदिराशनैः ।
शौचे वारि प्रयुञ्जीत गायत्रीबहुवारजम् ॥१९॥

खैर १ तोला और विजयसार १ तोला इन दोनोंको २ सेर जलमें औटावे। जब औटते औटते एक सेर जल शेष रहजाय तब उतारकर छान लेवे। फिर शीतलकर प्यास लगनेपर इस जलको पीवे शौचके लिये खैर तथा कीकडके पत्तोंके द्वारा उल्लिखित विधिके अनुसार जल पकाकर शीतल करके प्रयोग करे ॥ १९ ॥

जातीफलं समञ्जिष्ठं दार्वी पूगफलं शमी ।
धात्रीपत्रं समधुकं क्वथितं मधुसंयुतम् ॥
मुखरोगे कण्ठरोगे गण्डूषार्थं प्रशस्यते ॥ २० ॥

जायफल, मजीठ, दारुहलदी, सुपारी, सेमलकी छाल, आमले और मुलहठी इनके क्वाथमें शहद डालकर मुखरोग और कण्ठरोगमें गण्डूष धारण करे ॥ २० ॥

अक्ष्णोः सेकं प्रशंसन्ति गवेधुमधुकाम्बुना ॥ २१ ॥

गरहेडुआ और मुलहठीको जलमें पीसकर कपडेमें बांधकर रस निचोड लेवे। फिर कुछ गरम कर उससे मसूरिका रोगीकी आँखोंको सेके ॥ २१ ॥

पञ्चवल्कलचूर्णेन क्लेदिनीमवचूर्णयेत् ।
भस्मना केचिदिच्छन्ति केचिद्गोमयरेणुना ॥ २२ ॥

गीली मसूरिकाकी फुन्सियोंपर पञ्चवल्कल (बड, गूलर, पीपल, पाखर और बेंतकी छाल) के चूर्णको बुरकना चाहिये अथवा उपलोंकी राख या उपलोंका चूरा छिडकनेसे भी उपकार होता है ॥ २२ ॥

कृमिपातभयाच्चापि धूपयेत्सरलादिभिः ।
वेदनादाहशान्त्यर्थं सुतानां च विशुद्धये ॥ २३ ॥

सगुग्गुलुं वराक्वाथं युञ्ज्याद्वा खदिराष्टकम् ।
कृष्णाभयारजो लिह्यान्मधुना कण्ठशुद्धये ॥
तथाऽष्टाङ्गावलेहश्च कवलश्चार्द्रकादिभिः ॥ २४ ॥

कीडे पडनेके भयसे सरलवृक्षकी धूप देवे तो इससे कीडे उत्पन्न नहीं होते। एवं मसूरिकाकी पीडा और दाहकी शान्तिके लिये तथा क्षत (फुन्सियों) के झिरनेकी शुद्धिके लिये त्रिफलेके क्वाथको शुद्ध गूगलमें मिलाकर सेवन करे। अथवा खदिराष्टक क्वाथको पान करे या पीपल और हरडके चूर्णको शहदमें मिलाकर कण्ठकी शुद्धिके लिये चाटे तथा अष्टाङ्गावलेहके खानेसे और अदरख आदिका कवल धारण करनेसे भी कण्ठकी शुद्धि होती है ॥ २३ ॥ २४ ॥

पञ्चतिक्तं प्रयुञ्जीत पानाभ्यञ्जनभोजनैः ।
कुर्याद् व्रणविधानं च तैलादीन्वर्जयेच्चिरम् ॥ २५ ॥

पान, अभ्यङ्ग और भोजनके वास्ते कुष्ठाधिकारोक्त पञ्चतिक्त घृत प्रयोग करे और व्रणरोगकी विधिके अनुसार चिकित्सा करे। इस रोगमें तैलादि द्रव्य सर्वथा त्याज्य हैं ॥ २५ ॥

घण्टाकर्णं शिवं गौरीं विष्णुं विप्रं च पूजजेत् ।
आचरेज्जपहोमादीन्व्रतं रोगनिवृत्तये ॥ २६ ॥

इस रोगमें घण्टाकर्ण, शिव, पार्वती, विष्णु भगवान् और ब्राह्मणोंको पूजे। एवं जप, होमादि अनुष्ठान और मसूरिकारोगकी शान्तिके लिये व्रतादि करे ॥ २६ ॥

अगदानि विषघ्नानि रत्नानि विविधानि च ।
धारयेद्वाचयेच्चापि वैनतेयस्य संहिताम् ॥ २७ ॥

तदनन्तर रोगनाशक और विषहरण भाँतिभाँतिके रत्नोंको धारण करें और गरुडपुराणका पाठ करे ॥ २७ ॥

तेषु दुष्टव्रणेष्वेव जलौकाभिर्हरेदसृक् ।
व्रणशोथहरं योगमाचरेत्तत्प्रशान्तये ॥ २८ ॥

दुष्टव्रण होजानेपर जौंक लगवाकर रुधिर निकलवावे और व्रणकी सूजनको दूर करनेके लिये शोथनाशक चिकित्सा करे ॥ २८ ॥

विषघ्नैः सिद्धमन्त्रैश्च प्रमृज्याच्च पुनः पुनः ।
भक्त्या पठेत्पाठयेच्च शीतलायाः स्तवं शुभम् ॥ २९ ॥

विषको हरण करनेवाले सिद्धमन्त्रोंसे बारबार मार्जन करे और श्रद्धाभक्तिसे शीतलाके शुभ स्तोत्रको स्वयं पढे तथा दूसरोंसे पढावे ॥ २९ ॥

पटोलादि।

पटोलकुण्डलीमुस्तवृषधन्वयवासकैः।
भूनिम्बनिम्बकटुकापर्पटैश्च शृतं जलम् ॥ २० ॥
मसूरीं शमयेदामां पक्वां चैव विशोषयेत्।
नातः परतरं किञ्चिद्विस्फोटज्वरशान्तये॥ २१ ॥

पटोलपत्र, गिलोय, नागरमोथा, अडूसा, धमासा, चिरायता, नीमकी छाल, कुटकी और पित्तपापडा इनके द्वारा औटाकर शीतल कियाहुआ जल पान करनेसे अपक्क मसूरिका शमन और पकीहुई मसूरिका शुष्क होती हैं। विस्फोट और ज्वरको नष्ट करनेके लिये इससे बढकर कोई औषधि नहीं है ॥ २० ॥ २१ ॥

अमृतादि।

अमृतादिकषायश्च विसर्पोक्तं प्रयोजयेत् ॥ २२ ॥

इसमें विसर्परोगमें कहाहुआ अमृतादिकाथ भी सेवन कराना चाहिये ॥ २२ ॥

इन्दुकलावटिका।

शिलाजत्वयसी हेम सम्मर्द्यार्जकवारिणा।
गुञ्जामात्रां वटीं कृत्वा कुर्याच्छायाविशोषिताम् ॥ २३ ॥
मसूरिकायां विस्फोटे ज्वरे लोहितसंज्ञके।
एकैकां दापयेदासां सर्वव्रणगदेषु च ॥ २४ ॥

शिलाजीत, लोहभस्म और स्वर्णभस्म इनको समान भाग लेकर वनतुलसीके रसमें अच्छे प्रकार खरल करके एक एक रत्तीकी गोलियाँ बनाकर छायामें सुखा-लेवे। इनमेंसे मसूरिका, विस्फोट, ज्वर, रक्तविकार और सर्वप्रकारके व्रणरोगोंमें एक एक गोली देवे। इसके सेवनसे उक्तरोग शीघ्र नष्ट होते हैं ॥ २३ ॥ २४ ॥

मसूरिकारोगमें पथ्य।

पूर्वं लङ्घनवान्तिरेचनशिरावेधाश्शशाङ्कोज्ज्वला
जीर्णाष्षष्टिकशालयोऽपि चणका मुद्गा मसूरा यवाः।
सर्वेऽपि प्रतुदाः कपोतचटका दात्यूहकोञ्चादयो
जीवञ्जीवशुकादयोऽपि कुलकं कार्वेल्लमाषाढकम् ॥१६॥
कर्कोटं कदलं च शिग्रुरुचकं द्राक्षाफलं दाडिमं
मेध्यं बृंहणमन्नपानमखिलं कोलानि माषो रसः।

अक्ष्णोः सेकविधौ गवेधुमधुकोद्भूतं सुशीतोदकं
शम्बूकोदरकोषनीरमपि वा कर्पूरचूर्णानि वा ॥ २६ ॥

मसूरिका रोगमें प्रथम लंघन, वमन, विरेचन, शिरावेध कराना (फस्तखुलवाना) चाहिये। पश्चात् निर्मल चन्द्रमाकी कान्तिके समान उज्ज्वल पुराने साँठी और शालिधानोंके चावल, चने, मूँग, मसूर, जौ तथा कबूतर, चिडिया, दात्यूह (पक्षि-विशेष) अथवा पपैहा, कुररपक्षी, चकोर, तोता और अन्य सर्व प्रकारके प्रतुद (चोंचसे फोड़कर खानेवाले, कौआ, मोर, श्येनादि) पक्षियोंका मांस, पटोलपात, करेला, ढाकके बीज, ककोडा, कच्चा केला, सहिंजना, बिजौरानीम्बू, दाख, अनार, पवित्र और पुष्टिकर अन्नपान, पकेहुए सूखे बेर और उडदोंका यूष इनका भोजन एवं गवेधु (तृणधान्यविशेष) और मुलहठीके द्वारा सिद्ध कियेहुए शीतल जलसे अथवा घोंघेके भीतरके जलसे आँखोंपर सेंक करना या कपूरका चूर्ण मिलाकर जलसे छींटे देने चाहिये ॥ २५ ॥ २६ ॥

पक्वे मुद्गरसोऽपि जाङ्गलरसः शालिञ्चशाकं घृतं
निर्गुण्डीदलयक्षधूपविहितो धूपो मुहुर्मुक्तितः।
शश्वद्गोमयभस्मगुग्गुलुमथो शुष्के शिलापिष्टयो-
रालेपः पिचुमर्दपत्रनिशयोः शेषे व्रणोक्ताः क्रियाः ॥२७॥
इत्थं सर्वदशाविभागविहितं पथ्यं यथादोषतः
संयुक्तं मुदमाननोति नितरां नृणां मसूरीगदे ॥ २८ ॥

पकीहुई मसूरिकामें मूँगका रस, जङ्गलीजीवोंका मांसरस, शान्तिशाक, घृत, सिंहालुक पत्ते और राल इनका धूप बनाकर विधिपूर्वक धूनी देवे, शरीरपर निरन्तर उपलोंकी राख और गूगलको सूखी शिलपर पीसकर मर्दन करे। मसूरिकाकी फुन्सि-योंके सूखजानेपर नीमके सूखे पत्ते और कच्ची हलदीको पीसकर लेप करे, पश्चात् व्रणरोगोक्त चिकित्सा करे। इस प्रकार सब अवस्थाओंके विभागमें विधानकियेहुए पथ्यको यथादोषानुसार सेवन करनेसे मसूरिकायुक्त रोगियोंको आरोग्यरूपी आनन्दलाभ होता है ॥ २७ ॥ २८ ॥

मसूरिकारोगमें अपथ्य।

रतिं स्वेदं श्रमं तैलं गुर्वन्नं क्रोधमातपम्।
दुष्टाम्बु दुष्टपवनं विरुद्धान्यशनानि च ॥ २९ ॥

निष्पावमालुकं शाकं लवणं विषमाशनम्।
कट्वम्लं वेगरोधं च मसुरीगदवांस्त्यजेत् ॥ ४० ॥

मसूरीरोगवाला मनुष्य मैथुन, स्वेदक्रिया, परिश्रम, तेल, भारी अन्नोंका सेवन, क्रोध, धूपका सेवन, दूषितजल, दूषितवायु, विरुद्धभोजन, सेमकी फली, आलू, शाक, नमक, विषम आहार, चरपरे और खट्टे द्रव्य एवं मलमूत्रादिके वेगको रोकना इन सबको तत्काल त्यागदेवे ॥ ३९ ॥ ४० ॥

इति भैषज्यरत्नावल्यां मसूरिकाचिकित्सा।

क्षुद्ररोगोंकी चिकित्सा।

अजगल्लिका-चिकित्सा।

तत्राजगल्लिकामामां जलौकाभिरुपाचरेत्।
शुक्तिसौराष्ट्रिकाक्षारकल्कैश्चालेपयेन्मुहुः ॥१॥

प्रथम अपक्वअजगल्लिकाके रुधिरको जौंक लगवाकर निकलवादे, पश्चात् सीप, सोरठदेशकी मिट्टी और जवाखार इनको एकत्र पीसकर वारवार लेपकरे ॥ १ ॥

नवीनकण्टकार्याश्च कण्टकैर्वेधमात्रतः।
किमाश्चर्यं विपच्याशु प्रशाम्यन्त्यजगल्लिकाः ॥ २ ॥

नवीन कटेरीके काँटोंके द्वारा अजगल्लिकाको विद्धकरनेसे वह शीघ्र ही पच कर नष्ट होजाती है ॥ २ ॥

वृषमूलविशालाभ्यां लेपो हन्त्यजगल्लिकाम्।
कठिनां क्षारयोगैश्च द्रावयेदजगल्लिकाम् ॥ ३ ॥

अडूसेकी जड और इन्द्रायणकी जडकी छाल इन दोनोंको एकत्र पीसकर लेप करनेसे अजगल्लिकारोग दूर होता है। यदि अजगल्लिका अत्यन्त कठिन हो तो उसको क्षारादि औषधियोंके द्वारा नर्म करे ॥ ३ ॥

अनुशयी विवृतेन्द्रविद्धादि रोगोंकी चिकित्सा।

श्लेष्मविद्रधिकल्पेन जयेदनुशयीं भिषक्।
विवृतामिन्द्रविद्धां च गर्दभीं जालगर्दभम् ॥ ४ ॥

इरिवेल्लिं गन्धमालां जयेत्पित्तविसर्पवत् ।
मधुरौषधिसिद्धेन सर्पिषा शमयेद्व्रणम् ॥ ५ ॥

अनुशयी नामक क्षुद्ररोगकी कफजविद्रधिकी चिकित्साके समान चिकित्सा करनी चाहिये। विवृता, इन्द्रविद्धा, गर्दभी, जालगर्दभ, इरिवेल्लिका और गन्धमाला आदि रोगोंकी पित्तजविसर्पकी समान चिकित्सा करनी चाहिये। मधुरौषधि अर्थात् काकोल्यादिगणकी औषधियोंके साथ घृतको पकाकर व्रणकी चिकित्सा करनी चाहिये ॥ ४ ॥ ५ ॥

विदारिका पनसिकादि-क्षुद्र-रोगोंकी चिकित्सा।

रक्तावसेकैर्बहुभिः स्वेदनैरपतर्पणैः ।
जयेद्विदारिकां लेपैः शिग्रुदेवद्रुमोद्भवैः ॥ ६ ॥
पनसिकां कच्छपिकामनेन विधिना भिषक् ।
अन्त्रालजीं कच्छपिकां तथा पाषाणगर्दभम् ॥
साधयेत्कठिनानन्याञ्शोथान्दोषसमुद्भवान् ॥ ७ ॥

प्रथम विदारिका, पनसिका और कच्छपिका नामक क्षुद्ररोगकी चिकित्सा अधिक रक्तमोक्षण, स्वेदन और अपतर्पणादि क्रियाओंके द्वारा करनी चाहियें पश्चात् सहिंजनेकी छाल और देवदारुको एकत्र पीसकर लेप करना चाहिये। शोथयुक्त अन्त्रालजी, कच्छपिका और पाषाणगर्दभरोगकी भी चिकित्सा इसी विधिसे करनी चाहिये ॥ ६ ॥ ७ ॥

पाषाणगर्दभकी चिकित्सा।

सुरदारुशिलाकुष्ठैः स्वेदयित्वा प्रलेपयेत् ।
कफमारुतशोथघ्नो लेपः पाषाणगर्दभे ॥ ८ ॥

पाषाणगर्दभरोगमें प्रथम स्वेदन करके पश्चात् देवदारु, मैनसिल और कूठ इन औषधियोंको एकत्र पीसकर गरम करके लेप करे। यह लेप कफ, वात और शोथको नष्ट करता है ॥ ८ ॥

वल्मीकरोगकी चिकित्सा।

शस्त्रेणोद्धृतवल्मीकं क्षाराग्निभ्यां प्रसाधयेत् ।
मनःशिलालभल्लातसूक्ष्मैलागुरुचन्दनैः ॥ ९ ॥

जातीपल्लवकल्कैश्च निम्बतैलं विपाचयेत् ।
वल्मीकं नाशयेत्तद्धि बहुच्छिद्रं बहुद्रवम् ॥ १० ॥
सशोथं व्रणगन्धं च प्रवृद्धं मर्मसु स्थितम् ।
हस्तपादस्थितं चापि वल्मीकं परिवर्जयेत् ॥ ११ ॥

वल्मीकरोगको शस्त्रके द्वारा काटकर क्षार और अग्निका प्रयोग करे। मैनसिल, भिलावा, हरिताल, छोटी इलायची, अगर, चन्दन और चमेलीके पत्ते इन औषधियोंके कल्कद्वारा नीमके तेलको पकाकर व्रणस्थानमें लेप करे। इस तेलको मर्दन करनेसे बहुत छिद्र और बहुत पीववाला वल्मीकरोग नष्ट होता है। शोथयुक्त, जिसमें व्रणके समान गन्ध आती हो, अत्यन्त बढाहुआ, मर्मस्थानोंमें उत्पन्न हुआ और हाथपावोंमें उत्पन्न हुआ वल्मीकरोग असाध्य है, इसलिये इनकी चिकित्सा नहीं करनी चाहिये ॥ ९–११ ॥

पाददारी (बिवाई की) चिकित्सा ।

पाददारिषु च शिरां वेधयेत्तलशोधिनीम् ॥ १२ ॥
स्नेहस्वेदोपपन्नौ तु पादौ चालेपयेन्मुहुः ॥
मधूच्छिष्टवसामज्जघृतक्षारैर्विमिश्रितैः ॥ १३ ॥

पाददारीरोगमें प्रथम पैरके तलुएँकी शिराको विद्ध करके रक्त निकलवावे। पश्चात् स्निग्धस्वेद देकर मोम, चर्बी, मज्जा, घृत और क्षार इनका प्रलेप करे ॥ १३ ॥

गुडलवणघृतं चेत्तिन्तिडीयुक्तमेतद्
द्विगुणमिह विदध्यान्मूत्रमेकत्र कृत्वा ।
दिनकतिचिदथेदं किञ्चिदाशोष्य लेपात्
स्फुटितपदतलं स्यात्पद्मपत्राभमाशु ॥ १४ ॥

गुड, सेंधानमक, घी और इमलीकी छाल ये प्रत्येक एकएक तोला और गोमूत्र ४ तोले लेकर सबको एकत्र पीसकर धूपमें सुखालेवे। फिर स्फुटित पद–तल (बिवाई) पर इसका लेप करे तो इससे पैरके तलुएं कमलके पत्रके समान कान्तियुक्त और कोमल होजाते हैं ॥ १४ ॥

सर्ज्जाख्यसिन्धूद्भवयोश्चूर्णं मधुघृताप्लुतम् ।
निर्मथ्य कटुतैलाक्तं हितं पादप्रमार्ज्जनम् ॥ १५ ॥

राल और सेंधेनमकके चूर्णको शहद, घृत और कडवे तेलमें मिलाकर बिवाईपर मर्दन करना हितकारी है ॥ १५ ॥

उपोदिकाक्षारतैल।

उपोदिकासर्षपनिम्बमोचकर्कारुकैर्वारुकभस्मतोये।
तैलं विपक्वं लवणांशयुक्तं यत्पाददारीं विनिहन्ति शीघ्रम् ॥१६॥

पोईका शाक, सफेदसरसों, नीमकी छाल, केलेका मोचा, पीले पेठे और ककोडेका डंठल इन सबको समान भाग लेकर अन्तर्धूमकी विधिसे दग्ध करके भस्म करलेवे। फिर भस्मके द्वारा क्षारजलको निकाललेवे। इस प्रकार निकालेहुए आठ सेर जलमें एक सेर सैंधानमक और दो सेर तिलका तेल डालकर तेलको सिद्ध करे। यह तेल पाददारीरोगको शीघ्र नष्ट करता है ॥ १६ ॥

अलसकी चिकित्सा।

अलसेऽम्लैश्चिरं सिक्तौ चरणौ परिलेपयेत्।
पटोलारिष्टकासीसत्रिफलाभिर्मुहुर्मुहुः ॥ १७ ॥

अलसरोगमें दोनों पैरोंको काँजीमें कुछदेरतक भिगोये रक्खे, पश्चात् पटोलपत्र, नीमकी छाल, कसीस और त्रिफला इनको समान भाग लेकर एकत्र पीसकर बारम्बार लेप करे ॥ १७ ॥

करञ्जबीजं रजनी कासीसं मधुकं मधु।
रोचना हरितालं च लेपोऽयमलसे हितः ॥ १८ ॥

करञ्जके बीज, हल्दी, हीरा कसीस, मुलहठी, शहद, गोरोचन और हरताल इनको बराबर भाग लेकर बारीक पीसकर लेप करना अलसरोगमें हितकर है ॥ १८ ॥

लाक्षाभयारसालेपः कार्यं रक्तस्य मोक्षणम्।
बृहतीरससिद्धेन तैलेनाभ्यज्य बुद्धिमान् ॥
शिलारोचनकासीसचूर्णैर्वा प्रतिसारयेत् ॥ १९ ॥

अलसरोगमें लाख, हरड और गन्धरस इनको एकत्र पीसकर लेप करे और रुधिर निकलवावे। फिर बडीकटेरीके रसमें कडवे तेलको पकाकर मालिश करे, एवं उक्ततेलके साथ मैनसिल, गोरोचन और कसीसके चूर्णको मिलाकर लगावे। इससे अलस रोग नष्ट होता है ॥ १९ ॥

कदरकी चिकित्सा।

दहेत्कदरमुद्धृत्य तैलेन दहनेन वा ॥ २० ॥

कदर (पैरोंमें कङ्कड या काँटेके लगनेसे बेरके समान ऊँची गाँठ होजाती है, उसको कदर कहते हैं) काटकर गरम तेलसे या अग्निसे दग्धकर देवे ॥ २० ॥

चिप्पकी चिकित्सा।

चिप्पमुष्णाम्बुना स्विन्नमुत्कृत्याभ्यज्य तं व्रणम्।
दत्त्वा सर्जरसं चूर्णं बद्ध्वा व्रणवदाचरेत् ॥ २१ ॥

चिप्परोगमें प्रथम उष्णजलसे स्वेदन कर अस्त्रक्रिया करे, पश्चात् तेलको लगाकर उसपर रालका चूर्ण बुरका देवे और व्रणको अच्छे प्रकार बाँधदेवे। इसमें रोगीको व्रणरोगकी समान पथ्य देवे और उसीके समान अन्य उपचार करे ॥ २१ ॥

स्वरसेन हरिद्रायाः पात्रे कृष्णायसेऽभयाम्।
घृष्ट्वा तज्जेन कल्केन लिम्पेच्चिप्पं मुहुर्मुहुः ॥ २२ ॥

लोहेके बर्त्तनमें हल्दीके स्वरसके साथ हरडको घिसकर उससे चिप्पपर बारबार लेप करे ॥ २२ ॥

अङ्गुलीवेष्टककी चिकित्सा।

काश्मर्याः सप्तभिः पत्रैः कोमलैः परिवेष्टितः।
अङ्गुलीवेष्टकः पुंसो ध्रुवमाशु व्यपोहति ॥ २३ ॥

कुम्भेरके कोमल सात पत्तोंको बाँधनेसे मनुष्यके अंगुलिवेष्टक नामवाला रोग तत्काल नष्ट होता है ॥ २३ ॥

पद्मिनीकण्टककी चिकित्सा।

निम्बोदकेन वमनं पद्मिनीकण्टके हितम्।
निम्बोदककृतं सर्पिः सक्षौद्रं पानमिष्यते ॥ २४ ॥

पद्मिनीकण्टकरोगमें प्रथम नीमकी छालके काथको पान कराकर वमन कराना, पश्चात् उक्त काथके साथ घृत पकाकर उसमें शहद मिलाकर पान कराना अतीव हितकारी है ॥ २४ ॥

पद्मनालकृतक्षारं पद्मिनीं हन्ति लेपनात्।
निम्बारग्वधकल्कैर्वा मुहुरुद्वर्त्तनं हितम् ॥ २५ ॥

कमलनालको भस्म करके उसके क्षारका लेप करनेसे अथवा नीमकी छाल, अमलतासके पत्तोंको एकत्र पीसकर बारबारमलनेसे पद्मिनीकण्टकरोग जाता है ॥ २५ ॥

जालगर्दभकी चिकित्सा।

नीलीपटोलमूलाभ्यां साज्याभ्यां लेपनं हितम्।
जालगर्दभरोगे तु सद्यो हन्ति च वेदनाम् ॥ २६ ॥

जालगर्दभरोगमें नीलवृक्ष और पटोलपातकी जडको एकत्र पीसकर घृतमें मिलाकर लेप करनेसे उक्त रोगकी पीडा तत्काल शान्त होती है ॥ २६ ॥

अहिपूतनककी चिकित्सा।

अहिपूतनके धात्र्याः पूर्वं स्तन्यं विशोधयेत्।
त्रिफलाखदिरक्वाथैर्व्रणानां धावनं सदा ॥ २७ ॥

अहिपूतनकरोगमें प्रथम प्रसूताखीके स्तन्य (दूध) को शुद्ध करे, पश्चात् त्रिफला और खैर इनके काढेसे निरन्तर व्रणोंको धोवे ॥ २७ ॥

करञ्जत्रिफलातिक्तैः सर्पिः सिद्धं शिशोर्हितम्।
रसाञ्जनं विशेषेण पानालेपनयोर्हितम् ॥ २८ ॥

करञ्जकी छाल, त्रिफला और पटोलपात इनके द्वारा उत्तम प्रकार घृतको सिद्ध कर बालकको पिलाना हितकर है। एवं रसौंतके चूर्णको सेवन कराना और अहिपूतनकरोगके व्रणोंपर लगाना विशेष उपयोगी है ॥ २८ ॥

गुदभ्रंशकी चिकित्सा।

गुदभ्रंशे गुदं स्नेहैरभ्यज्याशु प्रवेशयेत्।
प्रविष्टे स्वेदयेच्चापि बद्धं गोस्फणया भृशम् ॥ २९ ॥

गुदभ्रंश (काँछका बाहर निकलना) रोगमें गुदाको तेलसे मलकर शीघ्रही भीतरको प्रवेश करदेवे। जब वह प्रवेश होजाय तब स्वेद देवे और गोस्फणनामक बन्धनसे अच्छे प्रकार बाँधदेवे ॥ २९ ॥

कोमलं पद्मिनीपत्रं यः खादेच्छर्करान्वितम्।
एतन्निश्चित्य निर्दिष्टं न तस्य गुदनिर्गमः ॥ ३० ॥

जो कमलिनीके कोमल पत्तोंको खाँडमें मिलाकर भक्षण करे तो उसके गुदाका बाहर निकलना निस्सन्देह बन्द होता है ॥ ३० ॥

वृक्षाम्लानलचाङ्गेरीविश्वपाठायवाग्रजम्।
तक्रेण शीलयेत्पायुभ्रंशार्तोऽनलदीपनम् ॥ ३१ ॥

इमली, चीता, चूक, सोंठ, पाढ और जवाखार इन सबको समान भाग लेकर एकत्र पीसकर मट्ठेके साथ पान करे तो इससे गुदभ्रंशरोग दूर होता है और अग्नि दीपन होती है ॥ ३१ ॥

गुदं च गव्यवसया म्रक्षयेदविशङ्कितः।
दुष्प्रवेशो गुदभ्रंशो विशत्याशु न संशयः ॥ ३२ ॥

काँछके बाहर निकल आनेपर गौकी चर्बीसे गुदाको निश्शंक होकर मले, फिर उसको भीतर प्रवेश करदेवे तो गुदभ्रंशरोग तत्काल नष्ट होता है ॥ ३२ ॥

मूषिकाणां वसाभिर्वा गुदे सम्यक् प्रलेपनम्।
स्विन्नमूषिकमांसेन अथवा स्वेदयेद् गुदम् ॥ ३३ ॥

चुहियोंकी चर्बीसे गुदापर अच्छेप्रकार मालिश करे अथवा मूसोंके मांसको पकाकर उसके द्वारा स्वेद देकर गुदाको भीतर प्रविष्ट करदेवे ॥ ३३ ॥

चाङ्गेरीघृत।

चाङ्गेरीकोलदध्यम्लनागरक्षारसंयुतम्।
घृतमुत्क्कथितं पेयं गुदभ्रंशरुजापहम् ॥
शुण्ठीक्षारावत्र कल्को शिष्टस्तु द्रवमिष्यते ॥ ३४ ॥

अम्लनोनियाका रस, सूखे बेरोंका क्वाथ और खट्टा दही ये समान भाग मिश्रित ८ सेर, सोंठ और जवाखार इनका कल्क १ सेर तथा घृत दो सेर लेवे। सबको एकत्रकर विधिपूर्वक घृतको सिद्ध करे। इस घृतको पान करनेसे गुदभ्रंश-रोग दूर होता है ॥ ३४ ॥

मूषिकाद्यतैल।

क्षीरे महत्पञ्चमूलं मूषिकामन्त्रवर्जिताम्।
पक्त्वा तस्मिन्पचेत्तैलं वातघ्नौषधसंयुतम् ॥
गुदभ्रंशमिदं तैलं पानाभ्यङ्गात्प्रसाधयेत् ॥ ३५ ॥

दूधमें बेल, शोनापाठा, कुम्मेर पाढर और अरणी इनकी छाल समान भाग तथा आँतों रहित चूहेका मांस डालकर पकावे। जब पकते पकते केवल दूध शेष रहजाय तब उसमें वातनाशक औषधियें डालकर तिलके तैलको पकावे। इस तैलको पीनेसे और मालिश करनेसे गुदभ्रंशरोग दूर होता है ॥ ३५ ॥

चर्मकील-जतुमणिआदिकी चिकित्सा।

चर्मकीलं जतुमणिं मशकांस्तिलकालकान्।
उद्धृत्य शस्त्रेण दहेत्क्षाराग्निभ्यामशेषतः ॥ ३६ ॥

चर्मकील, जतुमणि, मशक और तिलकालकादि क्षुद्ररोगोंको शस्त्रसे काटकर क्षार और अग्निके द्वारा दग्ध करना चाहिये ॥ ३६ ॥

रुबुनालस्य चूर्णेन घर्षो मशकनाशनः।
निर्मोकभस्मघर्षाद्वा मशः शान्ति व्रजेद ध्रुवम् ॥ ३७ ॥

अण्डकी नालके द्वारा शंखके चूर्णको लेकर घर्षण करे अथवा सर्पकी केंचुलीकी भस्मको घर्षण करे तो इससे मशक (मसा) रोग बहुत शीघ्र नष्ट होता है ॥ ३७॥

युवानपिडका-न्यच्छादिकी चिकित्सा।

युवानपिडकान्यच्छनीलिकाव्यङ्गशर्कराः।
शिराव्यधैः प्रलेपैश्च जयेदभ्याञ्जनैस्तथा ॥ ३८ ॥

युवानपिडका, न्यच्छ, नीलिका, व्यङ्ग और शर्करा इन रोगोंमें प्रथम शिरावेध (फस्तखुलवाना), फिर लेप और तेलादिकी मालिश करना हितकारी है ॥ ३८ ॥

लोध्रधान्यवचालेपस्तारुण्यपिडकापहः।
तद्वद्रोरोचनायुक्तं मरिचं मुखलेपनम् ॥
वमनं च निहन्त्याशु पिडकां यौवनोद्भवाम् ॥ ३९ ॥

लोध, धनियाँ और वच इनको एकत्र पीसकर लेप करे अथवा गोरोचन और कालीमिरच इन दोनोंको एकत्र पीसकर मुखपर लेप कर वमन करावे तो इससे युवावस्थामें उत्पन्नहुई पिडिकायें (मुहासे) तत्काल नष्ट होती हैं ॥ २९ ॥

व्यङ्गेषु चार्जुनत्वग् वा मञ्जिष्ठा वा समाक्षिका।
लेपः सनवनीता वा श्वेताश्वखुरजा मसी ॥ ४० ॥

व्यङ्गरोगमें अर्जुनकी छाल, मजीठ, श्वेत अपराजिता इनका चूर्ण अथवा सफेद घोडेकी खुरकी भस्म इनमेंसे किसी एकको शहद और नैनीघीमें मिलाकर लेप करे तो व्यङ्गरोग दूर होता है ॥ ४० ॥

रक्तचन्दनमञ्जिष्ठाकुष्ठलोध्रप्रियङ्गवः।
वटाङ्कुरा मसूराश्च व्यङ्गघ्ना मुखकान्तिदाः ॥ ४१ ॥

लाल चन्दन, मजीठ, कूठ, लोध, फूलप्रियंगु, बडके अंकुर और मसूरकी दाल ये सब द्रव्य एकत्र पीसकर लेप करनेसे व्यंगरोगको नष्ट करते हैं और मुखकी शोभाको बढाते हैं ॥ ४१ ॥

व्यङ्गानां लेपनं शस्तं रुधिरेण शशस्य च ॥

खरगोशके रुधिरका लेप करनेसे सब व्यंगरोगोंका नाश होता है ॥

केवलात्पयसा पिष्ट्वा तीक्ष्णाञ्छाल्मलिकण्टकान्।
आलिप्तं त्र्यहमेतेन भवेत्पद्मोपमं मुखम् ॥ ४२ ॥

एकमात्र सेमलके काँटोंको दूधके साथ पीसकर लेप करनेसे तीन दिनमें ही मुख कमलकी समान सुन्दर होजाता है ॥ ४२ ॥

मसूरैः सर्पिषा भृष्टैर्लिप्तमास्यं पयोऽन्वितैः ।
सप्तरात्राद्भवेत्सत्यं पुण्डरीकदलप्रभम् ॥ ४३ ॥

मसूरकी दालको घृतमें भूनकर और दूधमें पीसकर लेप करनेसे सात दिनमें मुख कमलपत्रकी कान्तियुक्त होजाता है। यह बिल्कुल सत्य है ॥ ४३ ॥

मातुलुङ्गजटा सर्पिः शिला गोशकृतो रसः ।
मुखकान्तिकरो लेपः पिडकातिलकालजित् ॥ ४४ ॥

बिजौरेनींबूकी जड, घी, मैनसिल, गोबरका रस इन सबका लेप पिडका और तिलकालकरोगको जीतता है तथा मुखकी कान्तिको उज्ज्वल बनाता है ॥ ४४ ॥

नवनीतगुडक्षौद्रकोलमज्जप्रलेपनम् ।
व्यङ्गजिद्वरुणत्वग्वा छागक्षीरप्रपेषिता ॥ ४५ ॥

नैनीघी, गुड शहद और बेरकी गुठलीकी मींग इनको एकत्र पीसकर लेप करे अथवा बरनाकी छालको बकरीके दूधमें पीसकर लेप करे, यह लेप व्यङ्ग रोगको हरनेवाला है ॥ ४५ ॥

जातीफलकल्कलेपो नीलीव्यङ्गादिनाशनः ।
सायं च कटुतैलेनाभ्यङ्गो वक्त्रप्रसाधनः ॥ ४६ ॥

जायफलको पीसकर लेप करनेसे नाली और व्यङ्गादिरोग नाश होते हैं। सन्ध्यासमय सरसोंके तेलकी मुखपर मालिश करनेसे मुख उज्ज्वल और कान्तियुक्त होता है ॥ ४६ ॥

कालीयकोत्पलामयदधिसरबदरास्थिमध्यफलिनीभिः ।
लिप्तं भवति हि वदनं शशिप्रभं सप्तरात्रेण ॥ ४७ ॥

सुगन्धितकाष्ठ अथवा दारुहल्दी, कमल, कूठ, दहीका तोड, बेरकी गुठलीकी मींग और फूलप्रियंगु इन सबको समान भाग लेकर एकत्र पीसकर लेप करे तो सात दिनमें ही मुख चन्द्रमण्डलके समान शोभायमान होता है ॥ ४७ ॥

तुषरहितमसृणयवचूर्णसमयष्टिमधुकलोध्रलेपेन ।
भवति मुखं परिनिर्जितचामीकरचारुसौभाग्यम् ॥ ४८ ॥

भूसीरहित जौका चूर्ण, मुलहठी और लोध इनको बराबर भाग लेकर एकत्र पीसकर लेप करनेसे मुखकी पिडिकायें दूर होकर मुख सुवर्णके समान अत्यन्त मनोहर और सुभग होजाता है ॥ ४८ ॥

रक्षोघ्नशर्वरीद्वयमञ्जिष्ठागैरिकाज्यबस्तपयः ।
सिद्धेन लिप्तमाननमुद्यद्रविबिम्बवद् भाति ॥ ४९ ॥

सफेद सरसों, हल्दी, दारुहल्दी, मंजीठ, गेरू, घी और बकरीका दूध इन सबको समानांश ले एकत्र कूट पीसकर लेप करे तो मुख चन्द्रबिम्बके समान निर्मल कान्तिपूर्ण होता है ॥ ४९ ॥

परिणतदधिशरपुङ्खैः कुवलयदलकुष्ठचन्दनोशीरैः ।
मुखकमलकान्तिकारी भ्रुकुटीतिलकालकाञ्जयति ॥ ५० ॥

सरफोंका, कमलपत्र, कूठ, लालचन्दन और खस इन सबको दहीके तोडमें पीसकर लेप करे। यह लेप मुखको कमलपत्रके समान सुशोभित करता है और भ्रुकुटिजन्य तथा तिलकालकरोगको जीतता है ॥ ५० ॥

वर्णकघृत।

मधुकं चन्दनं कङ्गु सर्षपं पद्मकं तथा ।
कालीयकं हरिद्रा च लोध्रमेभिश्च कल्कितैः ॥ ५१ ॥
विपचेद्धि घृतं वैद्यस्तत्पक्वं वस्त्रगालितम् ।
पादांशं कुङ्कुमं सिक्थं क्षिप्त्वा मन्दानले पचेत् ॥ ५२ ॥
तत्सिद्धं शिशिरे नीरे प्रक्षिप्याकर्षयेत्ततः ।
तदेतद्वर्णकं नाम घृतं वक्त्रप्रसादनम् ॥ ५३ ॥
अनेनाभ्यासलिप्तं हि वलीभूतमपि क्रमात् ।
निष्कलङ्केन्दुबिम्बाभं स्याद्विलासवतीमुखम् ॥ ५४ ॥

मुलहठी, लालचन्दन, मालकाङ्गनी, सरसों, पद्माख, कालाचन्दन, हल्दी और लोध इन सबका कल्क आधसेर, घी दो सेर और पाकके लिये जल ८ सेर लेवे। सबको एकत्र मिलाकर यथाविधि घृतको पकावे। जब पकते पकते चौथाई भाग जल शेष रहजाय तब उतारकर वस्त्रमें छानलेवे। फिर उसमें केशर आठ तोले और मोम आठ तोले डालकर दुबारा मन्दमन्द अग्निपर पकावे। जब पकते पकते जल बिलकुल न रहे तब उस घृतपात्रको उतारकर शीतल जलमें रखकर ठंढा करे। इस प्रकार यह वर्णक नामवाला घृत सिद्ध होता है। इसको मुखमें लगानेसे मुखमें प्रसन्नता होती है और वली (झुर्रियोंका पडना) रोग दूर होता है। एवं विलासिनी स्त्रियोंका मुख निर्मल चन्द्रमाकी समान कान्तियुक्त होता है ॥ ५१-५४ ॥

द्विहरिद्राद्यतैल।

हरिद्राद्वययष्ट्याह्वकालीयककुचन्दनैः ।
प्रपौण्डरीकमञ्जिष्ठापद्मपद्मककुङ्कुमैः ॥ ५५ ॥

कपित्थतिन्दुकप्लक्षवटपत्रैः पयोन्वितैः ।
लेपयेत्कल्कितैरेभिस्तैलं चाभ्यञ्जनं चरेत् ॥ ५६ ॥
विप्लवं नीलिकाव्यङ्गांस्तिलकान्मुखदूषिकान् ।
नित्यसेवी जयेत्क्षिप्रं मुखं कुर्यान्मनोरमम् ॥ ५७ ॥

हल्दी, दारुहल्दी, मुलहठी, पीलाचन्दन, लालचन्दन, पुण्डरिया, मंजीठ, कमल पत्र, पद्माख, केशर, कैथकेपत्ते, तेंदुके पत्ते, पाखर और बडके पत्ते इनके समान भाग मिश्रित कल्कके द्वारा तिलके तेलको उत्तम प्रकार सिद्ध कर मालिश करे। यह तेल नीलिका, व्यंग तिलकालक और मुखके सब विकारोंको नष्ट करता है। इसको निरन्तर सेवन करनेसे मुख अत्यन्त मनोहर होता है ॥ ५५-५७ ॥

कुंकुमाद्यतैल ।

कुंकुमं किंशुकं लाक्षा मञ्जिष्ठा रक्तचन्दनम् ।
कालीयकं पद्मकं च मातुलुङ्गं सकेशरम् ॥ ५८ ॥
कुसुम्भं मधुयष्टी च फलिनी मदयन्तिका ।
निशे द्वे रोचना पद्ममुत्पलंच मनःशिला ॥ ५९ ॥
काकोल्यादिसमायुक्तैरेतैरक्षसमैर्भिषक् ।
लाक्षारसपयोभ्यां च तैलप्रस्थं विपाचयेत् ॥ ६० ॥
कुंकुमाद्यमिदं तैलमभ्यङ्गात्काञ्चनोपमम् ।
करोति वदनं सद्यः पुष्टिलावण्यकान्तिकम् ॥
सौभाग्यलक्ष्मीजननं वशीकरणमुत्तमम् ॥ ६१ ॥

टेसूके फूल, लाख, मंजीठ, लालचन्दन, पीलाचन्दन, पद्माख, बिजौरेनींबूकी जड, बिजौरे नींबूकी केशर, कसुमके फूल, मुलहठी, फूल प्रियंगु, मदयन्तिका (मल्लिका विशेष), हल्दी, दारुहल्दी, गोरोचन, नीलकमल, मैनसिल और काकोल्यादिगणकी समस्त औषधियाँ इन प्रत्येकको दो दो तोले लेकर एकत्र कूटपीसकर कल्क बनालेवे। इस कल्कको लाखके ४ सेर रस और चार सेर दूधके साथ मिलाकर एक प्रस्थ तिलके तेलको उत्तम प्रकार पकावे। जब पाक सिद्ध होजाय तब उसमें दो तोले नागकेशर मिलादेवे। यह कुंकुमाद्य तेल निरन्तर मालिश करनेसे मुखको सुवर्णकी समान कान्तिमान्, पुष्ट और रूपलावण्यतासे युक्त बना-देता है एवं सौभाग्य और लक्ष्मीकी वृद्धि करता है। यह उत्तम वशीकरण योग है ॥ ५८-६१ ॥

अरुंषिकाकी चिकित्सा।

अरुंषिकायां रुधिरेऽवसिक्ते शिराव्यधेनाथ जलौकसा वा।
निम्बाम्बुसिक्ते शिरसि प्रलेपो देयोऽश्ववर्चोरससैन्धवाभ्याम् ॥

अरुंषिकारोगमें प्रथम शिरा वेधकर या जौंकद्वारा रुधिरका निकलवाना, पश्चात् नीमकी छालके क्वाथके काथसे शिरको सिंचनकर घोडेकी लीदके रस और सेन्धे-नमकको एकत्र मिलाकर लेप करना हितकारी है ॥ ६२ ॥

पुराणमथ पिण्याकं पुरीषं कुक्कुटस्य वा।
मूत्रपिष्टः प्रलेपोऽयं शीघ्रं हन्यादरुंषिकाम् ॥
अरुंषिघ्नं भृष्टकुष्ठचूर्णं तैलेन संयुतम् ॥ ६३ ॥

तिलकी पुरानी खल अथवा मुर्गेकी विष्ठाको गोमूत्रमें पीसकर लेप करे। या कूठकी भस्मको तिलके तेलमें मिलाकर लगानेसे अरुंषिका दूर होती है ॥ ६३ ॥

त्रिफलाद्यतैल।

त्रिफलायोरजोयष्टिमार्कवोत्पलशारिवैः।
ससैन्धवैः पचेत्तैलमभ्यङ्गोऽरुंषिकां जयेत् ॥ ६४ ॥

त्रिफला, लोहभस्म, मुलहठी, भाँगरा, नीलकमल, अनन्तमूल और सैंधानमक इनके कल्कद्वारा विधिपूर्वक तेलको सिद्ध कर मालिश करनेसे अरुंषिकारोग दूर होता है ॥ ६४ ॥

दारुणककी चिकित्सा।

दारुणे तु शिरां विध्यात्स्निग्धां स्विन्नां ललाटजाम्।
अवपीडाशिरोवस्तीनभ्यङ्गांश्चावचारयेत् ॥ ६५ ॥

दारुणकरोगमें मस्तककी शिराको स्निग्ध स्वेद देकर छेदन करे। इस रोगमें नस्य, शिरोवस्ति और तैलादिकी मालिश सर्वदा करनी चाहिये ॥ ६५ ॥

कोद्रवाणां तृणक्षारपानीयं परिधावने।
कार्यो दारुणके मूर्ध्नि प्रलेपो मधुसंयुतः ॥ ६६ ॥

कोदोंकी भूसीके क्षारजलसे मस्तकको सिञ्चन करे और उक्त क्षारको शहदमें मिलाकर शिरपर लेप करे। इससे अरुंषिकारोग दूर होता है ॥ ६६ ॥

पियालबीजमधुककुष्ठमाषैः ससैन्धवैः।
काञ्जिकस्थास्त्रिसप्ताहं माषा दारुणकापहाः ॥ ६७ ॥

चिरौंजी, मुलहठी, कूठ, उडद और सैंधानमक इनको समान भाग लेकर एकत्र पीसकर शहदमें मिलाकर लेप करे या उक्त औषधोंको २१ दिनतक उडदोंकी काँजीमें भिजोकर फिर पीसकर लेप करे तो दारुणकरोग शीघ्र नष्ट होता है ६७

सहनीलोत्पलकेशरयष्टिमधुतिलैः सदृशमामलकम् ।
चिरजातमपि च शीर्षे दारुणकरोगं शमं नयति ॥ ६८ ॥

नीलेकमलकी केशर, मुलहठी, तिल और आमले इनको समभाग लेकर एकत्र पीसकर शिरपर लेप करे तो इससे बहुत पुराना दारुणकरोगभी शान्त होता है ॥

इन्द्रलुप्तकी चिकित्सा ।

इन्द्रलुप्ते शिरां विद्ध्वा शिलाकासीसतुत्थकैः ॥
परितो लेपयेत्कल्कैस्तैलं चाभ्यञ्जने हितम् ॥
कुटन्नटशिखोजातीकरञ्जकरवीरजैः ॥ ६९ ॥

इन्द्रलुप्तरोगमें शिराको वेधकर (फस्त खुलवाकर) मैनसिल, कसीस और तूतिया इनको समानभाग लेकर एकत्र पीसकर लेप करे । अथवा नागरमोथर, चीतेकी जड, चमेलीके फूल, करञ्जकी छाल और सफेद कनेरकी जड इन सबको एकत्र कूट पीसकर लेप करे । इसमें तेलकी मालिश करना हितकर है ॥ ६९ ॥

अवगाढपदं चैव प्रच्छयित्वा पुनः पुनः ।
गुञ्जाफलैश्चिरं लिम्पेत्केशभूमिं समन्ततः ॥ ७० ॥

पहले इन्द्रलुप्तको सुईसे छेदन करे, पश्चात् चोंटलियोंको जलमें अच्छे प्रकारसे पीसकर बार बार बालोंकी जगह लेप करे । इससे बाल उगआते हैं ॥ ७० ॥

हस्तिदन्तमसीं कृत्वा मुख्यं चैव रसाञ्जनम् ।
लोमान्यनेन जायन्ते नृणां पाणितलेष्वपि ॥ ७१ ॥

हाथीके दाँतकी भस्म करके उसको रसौतके चूर्ण और जलमें मिलाकर लेप करे । जब इससे मनुष्योंकी हथेलीमेंभी रोम उत्पन्न होजाते हैं तब अन्य स्थानका तो कहनाही क्या ? ॥ ७१ ॥

हस्तिदन्तमसीं कृत्वा तैलेन सह योजयेत् ।
हस्तेष्वपि प्रजायन्ते केशा नास्त्यत्र संशयः ॥ ७२ ॥

हाथीदांतकी भस्मको तिलके तेलमें मिलाकर लेप करनेसे इन्द्रलुप्तरोग नष्ट होकर बाल निकल आते हैं । इसके प्रयोगसे हाथोंमेंभी बाल उत्पन्न होजाते हैं, इसमें कुछभी सन्देह नहीं है ॥ ७२ ॥

भल्लातकबृहतीफलगुञ्जामूलफलेभ्यस्त्वेकेन।
मधुसहितेन विलिप्तं क्षुरपतिलुप्तं शमं याति ॥ ७३ ॥

मिलावे, बडीकटेरीके फल, चोंटली और चोंटलीकी जड इनमेंसे किसीएकको शहदके साथ मर्दनकर लेप करे तो इन्द्रलुप्तरोग शमन होता है ॥ ७३ ॥

बृहतीफलरसपिष्टं गुञ्जाफलमिन्द्रलुप्तस्य।
कनकफलनिघृष्टस्य सतोयं दातव्यं प्रच्छितस्य सदा॥७४

पकीहुई बडी कटेरीके फलके रसमें चोंटलीको अथवा चोंटलीकी जडको पीसकर शिरावेध कियेहुए इन्द्रलुप्तवाले स्थानपर धतूरेके फल अथवा गूलर आदिके कैडे पत्तोंसे घर्षण करके लेप करना चाहिये ॥ ७४ ॥

घृष्टस्य कर्कशैः पत्रैरिन्द्रलुप्तस्य गुण्डनम्।
चूर्णितैर्मरिचैः कार्यमिन्द्रलुप्तविनाशनम् ॥ ७५ ॥

इन्द्रलुप्तके स्थानको गूलर आदिके करे पत्तोंसे घिसकर उसपर काली मिरचोंके चूर्णको बुरकादेनेसे इन्द्रलुप्तरोग नष्ट होता है ॥ ७५ ॥

छागक्षीररसाञ्जनपुटदग्धगजदन्तमसीलिप्ताः।
जायन्ते सप्तदिनात्खल्यामपि कुञ्चिताश्चिकुराः ॥ ७६ ॥

रसौत और पुटपाक द्वारा भस्म कीहुई हाथीदाँतकी स्याही, इन दोनोंको बकरीके दूधमें पीसकर लेप करे तो सात दिनमें इन्द्रलुप्त नष्ट होकर बाल निकल आते हैं ॥ ७६ ॥

मधुकेन्दीवरमूर्वातिलाज्यगोक्षीरभृङ्गलेपेन।
अचिराद्भवन्ति केशा घनदृढमूलायतानृजवः ॥ ७७ ॥

मुलैठी, नीलकमल, मूर्वा, कालेतिल और भाँगरा इनको गौके दूधमें पीसकर घीमें मिलाकर लेप करनेसे घने, मजबूत और घुंघुरवाले बाल बहुत शीघ्र उत्पन्न होते हैं ॥ ७७ ॥

केशरञ्जकयोग।

त्रिफला नीलिनीपत्रं लौहं भृङ्गरजः समम्।
अविमूत्रेण संयुक्तं कृष्णीकरणमुत्तमम् ॥ ७८ ॥

हरड, बहेडा, आमला, नीलवृक्षके पत्ते, लोहभस्म और भाँगरा इन सबको समान भाग लेकर भेडके मूत्रमें मिलाकर शिरपर लेप करनेसे बाल काले होते हैं ॥

धात्र्याम्रमज्जलेपात्स्यात्स्थिरता स्निग्धकेशता ॥ ७९ ॥

आमले और कच्चे आमका गूदा इनको एकत्र पीसकर लेप करनेसे बाल काले मजबूत और चिकने होजाते हैं ॥ ७९ ॥

त्रिफलाचूर्णसंयुक्तं लौहचूर्णं विनिक्षिपेत् ।
ईषत्पक्के नारिकेले भृङ्गराजरसान्विते ॥ ८० ॥
मासमेकं तु निक्षिप्य सम्यग्गर्त्तात्समुद्धरेत् ।
ततः शिरो मुण्डयित्वा लेपं दत्त्वा भिषग्वरः ॥ ८१ ॥
संवेष्ट्य कदलीपत्रैर्मोचयेत्सप्तमे दिने ।
क्षालयेत्त्रिफलाक्वाथैः क्षीरमांसरसाशनः ॥
कपालरञ्जनं चैतत्कृष्णीकरणमुत्तमम् ॥ ८२ ॥

हरड, बहेडा, आमला और लोहचूर्ण इनको समान भाग लेकर एकत्र पीसकर भांगरेके रसमें डालकर कुछ थोडे पकेहुए नारियलमें भरदेवे फिर उसको एक महीनेतक रक्खा रहनेदेवे । पश्चात् शिरको मुँडवाकर उक्त औषधिका लेप करके केलेके कोमल पत्ते बाँधदेवे । फिर उनको सातवें दिन खोलकर त्रिफलेके क्वाथसें शिरको धोवे । इस औषधिका व्यवहार करते समय सात दिनतक दूध और मांस-रसका भोजन करे । यह प्रयोग शिरके सफेद बालोंको काला करनेके लिये सर्वोत्तम है ॥ ८०-८२ ॥

उत्पलं पयसा सार्द्धं मासं भूमौ निधापयेत् ।
केशानां स्नेहनं कृष्णीकरणं च विधीयते ॥ ८३ ॥

नीले कमलको दूधके साथ पीसकर लोहेके बर्त्तनमें भरकर भूमिमें गाडदेवे । फिर एक महीने पीछे निकालकर उसको शिरपर मले तो इससे बाल काले और चिकने होजाते हैं ॥ ८३ ॥

भृङ्गपुष्पं जवापुष्पं मेषदुग्धप्रपेषितम् ।
तेनैवालोडितं लौहपात्रस्थं भूम्यधःकृतम् ॥ ८४ ॥
सप्ताहादुद्धृतं पश्चाद्भृङ्गराजरसेन तु ।
आलोड्याभ्यज्य च शिरो वेष्टयित्वा वसेन्निशाम् ॥८५॥
प्रातस्तु क्षालनं कार्यमेवं स्यान्मूर्द्धरञ्जनम् ।
एवं सिन्दूरबालामशङ्खभृङ्गरसैः क्रिया ॥ ८६ ॥

भाँगरेके फूल और जवापुष्प इन दोनोंको भेडके दूधमें खरल करके फिर भेडके दूधमें मिलाकर लोहेके पात्रमें भरकर पृथ्वीमें गाड देवे। फिर एक सप्ताहके अनन्तर उसको निकालकर भाँगरेके रसके साथ मिलाकर रात्रिके समय शिरपर मालिश कर केलेके कोमल पत्तोंको बाँधदेवे। पश्चात् प्रातःकाल पत्तोंको खोलकर त्रिफलेके काथसे शिरको प्रक्षालन करे। इससे सम्पूर्ण केश कृष्णवर्ण होजाते हैं। इसी प्रकार सिन्दूर, कच्चे आमकी गुठलीकी मींग और शंखचूर्ण इनको भाँगरेके रसमें मिलाकर लेप करनेसे भी बाल काले होजाते हैं॥

रसाञ्जनं शङ्खचूर्णकाञ्जिकरससंयुक्तं हिसीसकं घृष्ट्वा।
लेपात्कचानकंदलावनद्धान शुभ्रान्करोति हि नीलतरान्॥ ८७॥

रसौत और शंखचूर्ण दोनोंको सीसेके पात्रमें काँजीके साथ घोटकर बालोंपर लेप करे और आकके पत्तोंको बाँधदेवे। यह योग सफेदबालोंको अत्यन्त कृष्ण-वर्णके करदेता है॥ ८७॥

लौहमलामलककल्कैः सजवाकुसुमैर्नरः सदा स्नायी।
पलितानीह न पश्यति गङ्गास्नायीव नरकाणि॥ ८८॥

मण्डूर, आमले और गुडहलके फूल इनको एकत्र पीसकर प्रतिदिन प्रातःसमय स्नान करके मस्तकपर लेप करे। इससे पलितरोग (बालोंका असमय पकना) इस प्रकार नष्ट होजाता है, जिस प्रकार गङ्गामें स्नान करनेवाला मनुष्य पाप दूर होजानेसे नरकको नहीं जाता है॥ ८८॥

निम्बस्य बीजानिहि भावितानिभृङ्गस्य तोयेन तथा-
ऽसनस्य। तैलं तु तेषांविनिहन्ति नस्याद्दुग्धान्नभोक्तुः
पलितं समूलम्॥ ८९॥

नीमके बीजोंको विजयसारके क्वाथ और भाँगरेके रसमें यथाविधि सात दिनतक भावना देकर उनको निचोडकर तेल निकाललेवे। फिर इस तेलको नस्यद्वारा प्रयोग करे तो पलितरोग समूल नष्ट होजाता है। किन्तु, इसपर दूध और भातका भोजन करता रहे॥ ८९॥

निम्बस्य तैलं प्रकृतिस्थमेव नस्तो निषिक्तं विधिना यथावत्।
मासेन गोरक्षीभुजो नरस्य जराप्रभूतं पलितं निहन्ति॥ ९०॥

निरन्तर गौके दूधको पान करता हुआ मनुष्य यदि एक महीनेतक प्रकृतिस्थित नीमके तेलको विधिपूर्वक निकालकर नस्यद्वारा व्यवहार करे तो उसके प्रकृतिके अनुसार वृद्धावस्थाके प्रारम्भमें उत्पन्न हुआभी पलितरोग नष्ट होता है॥

काञ्जिकपिष्टशेलुफलमञ्जनि सच्छिद्रलोहगे।
यदर्कतापात्पतति तैलं तन्नस्यम्रक्षणात् ॥ ९१ ॥
केशा नीलालिसंकाशाः सद्यः स्निग्धा भवन्ति च।
नयनश्रवणग्रीवादन्तरोगांश्च हन्त्यदः ॥ ९२ ॥

लिसौढेकी मींगको कॉंजीमें पीसकर लोहेकी छलनीमें करके धूपमें रक्खे धूपकी तेजीसे छलनीमें जो तेल नीचे गिरताजाय उसको दूसरे पात्रमें ग्रहण करता जाय। फिर इस तेलको नस्यद्वारा और शिरपर मर्दनकर प्रयोग करे। इससे सफेदबाल भौरोंकी पंक्तिके समान तत्काल काले और चिकने होजाते हैं। यह तेल, नेत्र, श्रवण गर्दन और दांतोंके रोगोंको नष्ट करता है ॥ ९२ ॥

भृङ्गराजघृत।

भृङ्गराजरसे पक्वं शिखिपित्तेन कल्कितम्।
घृतं नस्येन पलितं हन्यात्सप्ताहयोगतः ॥ ९३ ॥

भाँगरेके रसमें मोरके पित्तका कल्क डालकर घृतको पकावे इस घृतका सात दिनतक नस्य लेनेसे पलितरोग नष्ट होता है ॥ ९३ ॥

महाभृङ्गराजतैल।

आनूपदेशसम्भूतं गृहीत्वा मार्कवं शुभम्।
सुधौतं जर्जरीकृत्य स्वरसं तस्य चाहरेत् ॥ ९४ ॥
चतुर्गुणेन तेनैव तैलप्रस्थं विपाचयेत्।
एभिर्द्रव्यैः क्षीरपिष्टैः संयोज्य मतिमान् भिषक् ॥९५॥
मञ्जिष्ठा पद्मकं लोध्रं चन्दनं गैरिकं बला।
रजन्यौ केशरं चैव प्रियङ्गु मधुयष्टिका ॥ ९६ ॥
प्रपौण्डरीकं गोपी च पलिकान्यत्र दापयेत्।
सम्यक्पक्वं ततो ज्ञात्वा शुभे भाण्डे निधापयेत् ॥ ९७ ॥
केशपाते शिरोदुष्टे मन्यास्तम्भे गलग्रहे।
शिरःकर्णाक्षिरोगेषु नस्येऽभ्यङ्गे च योजयेत् ॥ ९८ ॥
कुञ्चिताग्रानतिस्निग्धान् कचान्कुर्याद्दृढांस्तथा।
खालित्यमिन्द्रलुप्तं च तैलमेतद् व्यपोहति ॥ ९९ ॥

अनूपदेश (खादर) में उत्पन्न हुए भाँगरेको लाकर जलसे धोकर, कुचलकर उसका रस निकाले। फिर १ आढक परिमाण उक्तरसके साथ एक प्रस्थ तिल

तेलको पकावे । पकते समय उसमें दूधमें पीसेहुए मंजीठ, पद्माख, लोध, चन्दन, गेरू, खिरैंटी, हल्दी, दारुहल्दी, नागकेशर, फूलप्रियंगु, मुलहठी, पुण्डरिया और अनन्तमूल इन औषधियोंके कल्कको डाल देवे । जब पाक अच्छे प्रकार सिद्ध होजाय तब उतारकर स्वच्छपात्रमें भरकर रख देवे । इस तेलको बालोंका गिरना, शिरोरोग, मन्यास्तम्भ, गलग्रह, शिर, कान और नेत्ररोगमें नस्य और अभ्यङ्गद्वारा प्रयोग करे । यह तेल बालोंको घुँघुरवाले, अत्यन्त स्निग्ध घने बनाता है तथा खालित्य और इन्द्रलुप्तरोगको शीघ्र नष्ट करता है ॥ ९४-९९ ॥

आदित्यपाकगुडूचीतैल ।

वटावरोहकेशिन्योश्चूर्णेनादित्यपाचितम् ।
गुडूचीस्वरसे तैलमभ्यङ्गात्केशरोपणम् ॥ १०० ॥

गिलोयके स्वरसमें बडकी डाढी और बालछडका चूर्ण डालकर धूपमें रखकर उत्तमप्रकार तेलको पकावे । इस तेलकी मालिश करनेसे केश उत्पन्न होते हैं ॥

चन्दनाद्यतैल ।

चन्दनं मधुकं मूर्वा त्रिफला नीलमुत्पलम् ।
कान्ता वटावरोहश्च गुडूची बिसमेव च ॥ १०१ ॥
लौहचूर्णं तथा केशी शारिवे द्वे तथैव च ।
मार्कवस्वरसेनैव तैलं मृद्वग्निना पचेत् ॥ १०२ ॥
शिरस्युपचिताः केशा जायन्ते घनकुञ्चिताः ।
स्निग्धाश्च दृढमूलाश्च तथा भ्रमरसन्निभाः ॥
नस्येनाकालपलितं निहन्यात्तैलमुत्तमम् ॥ १०३ ॥

भाँगरेके रसमें रक्तचन्दन, मुलहठी, मूर्वा, त्रिफला, नीलकमल, फूलप्रियंगु, बडकी कोंपल, गिलोय, भसींडा, लौहचूर्ण, भूतकेशी, उसवा और अनन्तमूल इनका समानभाग मिश्रित चूर्ण एवं तिलका तेल डालकर मन्दमन्द अग्निसे पकावे । इस तेलको शिरपर मलनेसे अत्यन्त घने और घुँघुरवाले बाल उत्पन्न होते हैं । एवं स्निग्ध दृढमूलवाले और भौंरेके समान काले होते हैं । इस तेलको सूँघनेसे असमय बालोंका पकना नष्ट होता है ॥ १०१-१०३ ॥

महानीलतैल ।

आदित्यवल्या मूलानि कृष्णशैरीयकस्य च ।
सुरस्य चैव पत्राणि फलं कृष्णशणस्य च ॥ १ ॥

मार्कवः काकमाची च मधुकं देवदारु च ।
पृथक् दशपलांशानि पिप्पल्यस्त्रिफलाञ्जनम् ॥ ५ ॥
प्रपौण्डरीकं मञ्जिष्ठा लोध्रं कृष्णागुरूत्पलम् ।
आम्रास्थि कर्दमः कृष्णो मृणाली रक्तचन्दनम् ॥ ६ ॥
नीली भल्लातकास्थीनि कासीसं मदयन्तिका ।
सोमराज्यसनं शस्त्रं कृष्णौ पिण्डीतचित्रकौ ॥७॥
पुष्पाण्यर्जुनकाश्मर्योराम्रजम्बुफलानि च ।
पृथक् पञ्चपलैर्भागैः सुपिष्टैराढकं पचेत् ॥ ८ ॥
वैभीतकस्य तैलस्य धात्रीरसचतुर्गुणम् ।
कुर्यादादित्यपाकं वा यावच्छुष्को भवेद्रसः ॥ ९ ॥
लोहपात्रे ततः पूतं संशुद्धमुपयोजयेत् ।
पाने नस्ये क्रियायां च शिरोऽभ्यङ्गे तथैव च ॥ ११० ॥
एतच्चक्षुष्यमायुष्यं शिरसः सर्वरोगनुत् ।
महानीलमितिख्यातं पलितघ्नमनुत्तमम् ॥ ११ ॥

सूर्यावर्त्त (हुलहुल) की जड, नीलापियावाँसा, वनतुलसी, कालीसनक फल, भाँगरा, मकोय, मुलहठी, देवदारु ये प्रत्येक औषधि दसदस पल, पीपल, त्रिफला, रसौंत, पुण्डरिया, मंजीठ, लोध, कालीअगर, नीलोत्पल, आमकी गुठली, कमलिनीकी जडकी कीचड, कमलनाल, लालचन्दन, नील, भिलावेकी मींग, कसीस, मोतिया, बावची, विजयसार, लोहचूर्ण, कृष्णचूडा (पुष्पवृक्ष विशेष), मैनफलकी छाल, चीतेकी जड, अर्जुन और कुम्भेरके फूल आम और जामुनके फल इन सबको पृथक् पृथक् पांच २ पल लेकर खुब बारीक कूट पीसकर चूर्ण करलेवे । बहेडेका तेल १ आढक और आमलोंका रस ४ आढक परिमाण सबोंको यथाविधि मिलाकर जबतक रस न सुखजाय तबतक सूर्य्य तापद्वारा पाक करे । फिर उत्तम प्रकार सिद्ध होजानेपर उस तेलको वस्त्रमें छानकर लोहेके पात्रमें भरकर रखदेवे । इस तेलको पान, नस्य और शिरोमर्दनद्वारा प्रयोग करे । यह तेल नेत्रोंको हितकारी, आयुवर्द्धक और शिरके सम्पूर्णरोगोंको नष्ट करनेवाला है । यह महानील तेल पलितरोगको नष्ट करनेके लिये सर्वोत्तम है ॥ १०४–१११ ॥

कच्छू और अहिपूतनककी चिकित्सा।

कासीसरोचनातुत्थहरितालरसाञ्जनैः।
अम्लपिष्टैः प्रलेपोऽयं वृषकच्छ्वहिपूतयोः ॥ १२ ॥

हीराकसीस, गोरोचन, तूतिया, हरिताल और रसौत इनको समानभाग लेकर काँजीमें पीसकर लेप करे। यह लेप वृषण कच्छू और अहिपूतनक रोगको नष्ट करता है ॥ १२ ॥

पटोलपत्रत्रिफलारसाञ्जनविपाचितम् ॥ १३ ॥

पटोलपात, हरड, बहेडा, आमला और रसौत इनके द्वारा घृतको यथाविधि सिद्धकर पान करनेसे अहिपूतन रोग दूर होता है ॥ १३ ॥

शूकरदंष्ट्रकी चिकित्सा।

रजनीमार्कवमूलं पिष्टं शीतेन वारिणा तुल्यम्।
हन्ति विसर्पं लेपाद्वराहदशनाह्वयं घोरम् ॥ १४ ॥

हल्दी और भौंगरेकी जड इन दोनोंको बराबर भाग लेकर शीतल जलमें पीसकर लेप करनेसे अत्यन्त घोर शूकरदंष्ट्र और विसर्परोग नष्ट होता है ॥ १४ ॥

नाडीचबीजकल्कः पीतो गव्येन सर्पिषा प्रातः।
शमयति शूकरदंष्ट्रं सदाहपाकज्वरं घोरम् ॥ १५ ॥

नारीशाकके बीजोंको पीसकर प्रातःकाल गौके घीमें मिलाकर सेवन करे। इससे दाह और पाकज्वरसहित भयङ्कर शूकरदंष्ट्रोग शमन होता है ॥ १५ ॥

विसर्पोक्तप्रतीकारः कार्यः शूकरदंष्ट्रके ॥ १६ ॥

शूकरदंष्ट्ररोगमें विसर्परोगकी चिकित्साके अनुसार चिकित्सा करे ॥ १६ ॥

शय्यामूत्रकी चिकित्सा।

कृतमूत्रार्द्रभूभागमृदमाकृष्य खोलके।
संभर्ज्य मधुसर्पिर्भ्यां लेहयेन्मूत्रितं जनम् ॥
शय्यायां मूत्ररोधः स्यान्मूत्रितस्य न संशयः ॥ ११७ ॥

जो मनुष्य खाटपर मूते रहताहो उसको जहाँ उसने पेशाब कियाहो उसी खाटके नीचेकी गीली मिट्टीको खुरचकर खोलमें भूनकर शहद और घीमें मिलाकर चटावे। इससे खाटपर मूतना निस्सन्देह बन्द होता है ॥ ११७ ॥

इति भैषज्यरत्नावल्यां क्षुद्ररोग चिकित्सा॥

मुखरोगकी चिकित्सा ।

ओष्ठगत-मुखरोगकी चिकित्सा ।

ओष्ठप्रकोपे वातोत्थे शाल्वणेनोपनाहनम् ।
मस्तिष्के चैव नस्ये च तैलं वातहरैः शृतम् ॥
स्वेदोऽभ्यङ्गः स्नेहपानं रसायनमिहेष्यते ॥ १ ॥

वातजन्य ओष्ठरोगमें मृदु प्रलेप एवं वातनाशक औषधियोंके द्वारा बनाये हुए तेलसे शिरमें वस्ति और नस्य देवे । तथा सेंक, तैलादिका मर्दन, स्नेहपान और रसायन क्रिया करे ॥ १ ॥

वेधं शिराणां वमनं विरेकं तिक्तस्य पानं रसभोजनं च ।
शीताम्प्रलेपान्परिषेचनं च पित्तोपसृष्टेष्वधिकेषु कुर्यात् ॥ २ ॥

पित्तज ओष्ठरोगमें ओष्ठकी शिराको वेधकर रक्तमोक्षण तथा वमन, विरेचन कराकर तिक्तघृतका पान और तिक्तरसमिश्रित पदार्थोंका भोजन करावे । शीतल पदार्थोंको प्रलेप और सेचनद्वारा प्रयोग करे ॥ २ ॥

शिरोविरेचनं धूमः स्वेदः कवलधारणम् ।
हृते रक्ते प्रयोक्तव्यमोष्ठकोपे कफात्मके ॥ ३ ॥

कफजनित ओष्ठरोगमें ओष्ठकी समीपवर्त्तिनी शिराको वेधकर रुधिर निकलवावे । फिर नस्य, धूम, सेंक और कफनाशक द्रव्योंका कवल धारण करे ॥ ३ ॥

त्रिकटुः सर्जिकाक्षारः क्षारश्च यावशूकजः ।
क्षौद्रयुक्तं विधातव्यमेतच्च प्रतिसारणम् ॥ ४ ॥

सोंठ, मिरच, पीपल, सज्जी और जवाखार इनको समान भाग लेकर शहदमें मिलाकर पीडास्थानपर घर्षण करे ॥ ४ ॥

पित्तरक्ताभिघातोत्थाञ्जलौकाभिरुपाचरेत् ।
पित्तविद्रधिवच्चापि क्रियां कुर्यादशेषतः ॥ ५ ॥

रक्तपित्त और अभिघातसे उत्पन्नहुए ओष्ठरोगमें जोंक लगवाकर किञ्चित् रुधिर निकलवावे और शेषक्रिया पित्तजविद्रधिरोगके समान करे ॥ ५ ॥

दन्तगत-मुखरोगकी चिकित्सा।

चलदन्तस्थिरकरं कुर्याद्वकुलचर्वणम् ।
आर्त्तगलदलक्वाथगण्डूषो दन्तचालनुत् ॥
दन्तचाले हितं श्रेष्ठं तिलोग्राचर्वणं सदा ॥ ६ ॥

जिसके दाँत हिलते हों तो वह मौलसिरीके फल चर्वण करे अथवा नीलीकटसरैयाके पत्तोंका क्वाथ बनाकर उसका गण्डूष धारण करे। इससे दाँतोंका हिलना बन्द होजाता है। दाँतोंके हिलनेपर तिल और वच इन दोनोंको एकत्र मिलाकर निरन्तर चर्वण करना हितकारी है ॥ ६ ॥

दन्तपुप्पुटके कार्यं तरुणे रक्तमोक्षणम् ।
सपञ्चलवणः क्षारः सक्षौद्रः प्रतिसारणम् ॥ ७ ॥

नवीन दन्तपुप्पुटरोगमें रक्तमोक्षण करावे, फिर पाँचों नमक और जवाखार इनको पीसकर शहदमें मिलाकर दन्तमार्जन करे ॥ ७ ॥

दन्तानां तोदहर्षे च वातघ्नाः कवला हिताः ॥

गरम तेल, घी और स्नेहयुक्त दशमूलका क्वाथ इनके द्वारा कवल धारण करनेसे दाँतोंकी पीडा और दन्तहर्षरोग दूर होता है ॥

माक्षिकं पिप्पली सर्पिर्मिश्रितं धारयेन्मुखे ।
दन्तशूलहरं प्रोक्तं प्रधानमिदमौषधम् ॥ ८ ॥

पीपलके चूर्णको ६ माशे लेकर एक तोले घी और दो तोले शहदमें मिलाकर मुखमें धारण करे। यह औषधि दन्तशूलको हरनेके लिये सर्वप्रधान है ॥ ८ ॥

विस्राविते दन्तवेष्टे व्रणं तु प्रतिसारयेत् ।
लोध्रपत्तुङ्गमधुकलाक्षाचूर्णैर्मधूत्तरैः ॥
गण्डूषे क्षीरिणो योज्याः सक्षौद्रघृतशर्कराः ॥ ९ ॥

दन्तवेष्टरोगमें जोंक आदिके द्वारा रक्तमोक्षण कराकर लोध, लालचन्दन, मुलहठी और लाख इनको एकत्र पीसकर शहदमें मिलाकर व्रणस्थानपर लगावे और शहद, घृत एवं चीनी मिलाकर दूधवाले बड, गूलर आदि वृक्षोंके क्वाथद्वारा गण्डूष (कुल्ले) करे। इससे दन्तवेष्टरोगके व्रण अच्छे होते हैं ॥ ९ ॥

शैशिरे हृतरक्ते तु लोध्रमुस्तरसाञ्जनैः ।
सक्षौद्रैः शस्यते लेपो गण्डूषे क्षीरिणो हिताः ॥ १० ॥

शीतादरोगमें जौंक लगवाकर रक्त निकलवावे । फिर लोध, नागरमोथा और रसौंत इनका चूर्ण करके शहदमें मिलाकर लेप करे । और गण्डूषमें वटआदि क्षीरीवृक्षों का क्वाथ प्रयोग करना हितकर कहा है ॥ १० ॥

क्रियां परिदरे कुर्याच्छीतादोक्तां विचक्षणः ॥

परिदर नामक दन्तरोगमें शीतादरोगमें कहीहुई विधिके अनुसार चिकित्सा करनी चाहिये ॥

संशोध्योभयतः कायं शिरश्चोपकुशे ततः ।
काकोदुम्बरिकागोजीपत्रैर्विस्रावयेद्भिषक् ॥ ११ ॥
क्षौद्रयुक्तैश्च लवणैः सव्योषैः प्रतिसारयेत् ।
पिप्पल्यः सर्षपाः श्वेता नागरं नैचुलं फलम् ॥
सुखोदकेन संमर्द्य कवलं तस्य योजयेत् ॥ १२ ॥

अपकुशनामकदन्तरोगमें प्रथम वमन, विरेचन और नस्य देकर शरीरकी शुद्धि करे । पश्चात् गूलरके पत्ते और गोजियाके पत्तोंसे मसूडोंको घिसकर रुधिर निकाले। फिर पाँचोंनमक और त्रिकुटेके चूर्णको शहदमें मिलाकर घिसे और पीपल, सफेद सरसों, सोंठ और समुद्रफल इनको एकत्र पीसकर किञ्चित् उष्ण जलके साथ मिश्रितकर रोगीको कवल धारण करनेके लिये देवे ॥ १२ ॥

शस्त्रेण दन्तवैदर्भे दन्तमूलानि शोधयेत् ।
ततः क्षारं प्रयुञ्जीत क्रियाः सर्वाश्च शीतलाः ॥ १३ ॥

दन्तवैदर्भरोगमें शस्त्रसे दाँतोंकी जडमेंसे पीप आदिको निकालकर क्षार प्रयोग करे और सब शीतल क्रिया करे ॥ १३ ॥

उद्धृत्याधिकदन्तं तु ततोऽग्निमवचारयेत् ।
कृमिदन्तकवच्चात्र विधिः कार्यो विजानता ॥ १४ ॥

अधिकदन्तरोगमें अधिक दाँतको उखाडकर, व्रणस्थानको अग्निसे दग्ध कर देवे । फिर कृमिदन्तरोगकी समान सम्पूर्ण चिकित्सा करे ॥ १४ ॥

छित्त्वाऽधिमांसं सक्षौद्रैरेतैश्चूर्णैरुपाचरेत् ।
पाठावचातेजवतीसर्जिकायावशूकजैः ॥
क्षौद्रद्वितीयाः पिप्पल्यः कवलश्चात्र कीर्तितः ॥१५॥

दाँतोंके अधिकमांसको शस्त्रद्वारा काटकर पाढ, वच, चव्य, सज्जी और जवाखार इनके चूर्णको समानभाग लेकर शहदमें मिलाकर व्रणस्थानपर लगावे और पीपलके चूर्णको शहदके साथ मिलाकर कवल धारण करे ॥ १५ ॥

पटोलनिम्बत्रिफलाकषायश्चात्र धावने।
शिरोविरेकश्च हितो धूमो वैरेचनश्च यः ॥ १६ ॥

अधिमांसरोगमें पटोलपात, नीमके पत्ते और त्रिफला इनके क्वाथसे दन्तव्रणोंको धोवे और नस्य तथा कफनिस्सारक धूमपान करे ॥ १६ ॥

नाडीव्रणहरं कर्म्म दन्तनाडीषु कारयेत्।
यं दन्तमधिजायेत नाडी तं दन्तमुद्धरेत् ॥ १७ ॥
छित्वा मांसानि शस्त्रेण यदि नोपरिजो भवेत्।
शोधयित्वादहेच्चापि क्षारेण ज्वलनेन वा ॥ १८ ॥

दन्तनाडीरोगमें नाडीव्रणरोगकी समान चिकित्सा करे। और जिस दाँतमें नाडी उत्पन्न हुई हो उस दाँतको उखाड डाले। यदि नाडी बहुत भीतरको हो तो वहाँके मांसको शस्त्रसे काटकर पीव आदिको निकाल डाले, फिर क्षारसे अथवा अग्निसे उस घावको दग्ध करदेवे ॥ १७ ॥ १८ ॥

गतिर्हिनस्ति हन्वस्थि दशने समुपेक्षिते।
तस्मात्समूलदशनं निर्हरेद्भग्नमस्थि च ॥ १९ ॥

नस्यकर्मणि दातव्यमर्द्धभेदं विनाशयेत् ॥१६॥

वायविडङ्ग और काले तिल इनको सम भाग लेकर बारीक पीसकर इनकी नस्य लेवे तो इससे अर्द्धावभेदक रोग नाश होता है ॥ १६ ॥

दग्धचुल्लीमृत्तिकायाश्चूर्णं मरिचचूर्णकम्।
समांशं मिलितं कुर्यान्नस्यमर्धावभेदके ॥ १७ ॥

चूल्हेकी जलीहुई मिट्टी और कालीमिरच दोनों समान भाग लेकर एकत्र चूर्ण करलेवे। उक्त चूर्णकी नास लेनेसे आधाशीशी) शिरोरोग शान्त होता है ॥१७॥

अनन्तवातकी चिकित्सा।

अनन्तवाते कर्त्तव्यः सूर्यावर्त्तहितो विधिः ॥
शिरावेधश्च कर्त्तव्योऽनन्तवातप्रशान्तये ॥
आहारश्च विधातव्यो वातपित्तविनाशनः ॥ १८ ॥

अनन्तवातरोगको शान्त करनेके लिये सूर्यावर्त्तरोगनाशक औषधियोंसे चिकित्सा करनी एवं रोगीको वात-पित्तनाशक भोजन करना और शिरावेध कर रुधिर निकालना चाहिये ॥ १८ ॥

शङ्खककी चिकित्सा।

सूर्यावर्त्ते हितं यच्च शंखके स्वेदवर्जितम्।
क्षीरसर्पिः प्रशंसन्ति नस्यं पानं च शंखके ॥ १९ ॥

शङ्खकरोगमें स्वेदक्रियाको छोडकर सूर्यावर्त्तमें कहीहुई विधिके अनुसार समस्त-चिकित्सा और क्षीरसर्पि (मक्खन) का पान करना तथा नासलेना ॥ १९ ॥

शतावरीं कृष्णतिलान्मधुकं नीलमुत्पलम्।
दूर्वां पुनर्नवां चापि लेपं साध्ववतारयेत्॥
शीततोयावसेकांश्च क्षीरसेकांश्च शीतलान्॥ २०॥

शतावर, काले तिल, मुलहठी, नीलकमल, दूब और पुनर्नवा इन सबको समान भाग लेकर जलमें पीसकर शिरपर लेप करे और शीतल जल तथा शीतल दूधसे शिरपर सेचन किया करे तो शंखरोग दूर होता है॥ २०॥

कल्कैश्च क्षीरवृक्षाणां शंखकस्य प्रलेपनम्।

शंखकरोगमें बड, पीपल, गूलर, पाखर और बेंत आदि क्षीरीवृक्षोंकी छालके कल्कद्वारा लेप करना चाहिये॥

कौञ्चकादम्बहंसानां शरार्याः कच्छपस्य च।
रसैः सुविहितस्याथ तस्य शंखकसन्धिजाः॥
ऊर्ध्वास्तिस्रः शिराः प्राज्ञो भिन्द्यादेव न ताडयेत् २१

बगला, हंस, कलहंस, शराल (पक्षीविशेष) और कछुआ इनके मांसरसका पान कराकर रोगीको पुष्ट करके शंखसन्धिके ऊपरकी तीन शिराओंको वेधना चाहिये किन्तु उसको तोडना नहीं चाहिये॥ २१॥

गिरिकर्णीफलरसं मूलं च नस्यमाचरेत्।
मूलं वा बन्धयेत्कर्णे शीघ्रं हन्ति शिरोव्यथाम्॥ २२॥

अपराजिताके फलोंके रस अथवा उसकी मूलके रसद्वारा नास लेवे किम्वा उक्त औषधिकी जडको कानमें बांध देवेतो शिरका दर्द शीघ्र नष्ट होता है॥ २२॥

नागरकल्कविमिश्रं क्षीरं नस्येन योजितं पुंसाम्।
नानादोषोद्भूतां शिरोरुजां हन्ति तीव्रतराम्॥ २३॥

सोंठको दूधमें पीसकर नस्य लेनेसे अनेक दोषोंसे उत्पन्नहुई दारुण शिरकी पीडा तत्काल शमन होती है॥ २३॥

शिरोबस्ति।

आशिरो व्यायतं चर्म्मं कृत्वाऽष्टाङ्गुलमुच्छ्रितम्।
तेनावेष्ट्य शिरोऽधस्तान्माषकल्केन लेपयेत्॥ २४॥
निश्चलस्योपविष्टस्य तैलैः कोष्णैः प्रपूरयेत्।
धारयेदारुजः शान्तेर्यामं यामार्द्धमेव वा॥ २५॥

शिरोवस्तिर्जयत्येष शिरोरोगं मरुद्भवम् ।
हनुमन्याक्षिकर्णार्त्तिमर्दितं मूर्द्धकम्पनम् ॥ २६ ॥

जितने चमडेसे मस्तक पूरा पूरा ढकजाय इतना लम्बा और आठ अँगुल चौडा चमडा लेकर उससे रोगीके मस्तकको बाँधकर उसके नीचे उडदोंके कल्कका लेप करदेवे। पश्चात् रोगीको निश्चल बैठाकर सुहाता सुहाता तिलका तेल उस चमडेमें भरदेवे। जबतक शिरकी पीडा शान्त न हो तबतक अथवा एक प्रहरतक किम्वा चार घडीतक तेलको धारण करे। यह शिरोवस्ति वातज शिरोरोग, हनुग्रह, मन्यास्तम्भ, नेत्र और कर्णरोग अर्दित और मस्तकका काँपना आदि रोगोंको शमन करती है ॥ २४–२६ ॥

अर्द्धनाडीनाटकेश्वर।

वराटं टङ्कणं शुद्धं पञ्चभागसमन्वितम् ।
नवभागं मरीचस्य विषभागत्रयं मतम् ॥ २७ ॥
स्तन्येन वटिकां कृत्वा नस्यं दद्याद्विचक्षणः ।
शिरोविकारान्विविधान् हन्ति श्लेष्मोत्तरानपि ॥ २८ ॥

कौडीकी भस्म २॥ भाग, सुहागेकी खील २॥ भाग, कालीमिरच ९ भाग और विष ३ भाग लेवे। इन सबको एकत्र स्त्रीके दूधके द्वारा खरल करके गोलियाँ बनालेवे। फिर इस गोलीको दूधमें घिसकर नास लेवे तो यह शिरके नानाप्रकारके कफप्रभृति दोषजनित विकारोंको नष्ट करती है ॥ २७ ॥ २८ ॥

चन्द्रकान्तरस।

मृतसूताभ्रकं तीक्ष्णं ताम्रं गन्धं समं समम् ।
स्नुहीक्षीरैर्दिनं मर्द्यं भक्षयेन्माषमात्रकम् ॥ २९ ॥
मधुना मर्दितं सेव्यं लौहपात्रे दिने दिने ।
सूर्यावर्त्तादिकान्हन्ति शिरोरोगान्न संशयः ॥ ३० ॥

रससिन्दूर, अभ्रक, लोहा, ताँबा इनकी भस्म और शुद्ध गन्धक इन सबको समान भाग लेकर थूहरके दूधमें एक दिनतक खरल करके उडदकी बराबर गोली बनालेवे। उस गोलीको प्रतिदिन लोहेके बर्त्तनमें शहदके साथ मिलाकर भक्षण करे तो यह सूर्यावर्त्तादि समस्त शिरके रोगोंको निसन्देह नष्टकर देता है ॥ २९ ॥ ३० ॥

शिरःशूलाद्रिवज्ररस।

पलं रसं पलं गन्धं पलं लौहं पलं रविः ।
गुग्गुलोः पलचत्वारि तदर्द्धं त्रिफलारजः ॥ ३१ ॥

कुष्ठं मधु कणा शुण्ठी गोक्षुरं कृमिनाशनम् ।
दशमूलं च प्रत्येकं तोलकं वस्त्रपेषितम् ॥ २२ ॥
क्वाथने दशमूल्याश्च यथास्वं परिभावयेत् ।
घृतयोगात्प्रकर्त्तव्या माषिका वटिका शुभा ॥ २३ ॥

शुद्ध पारा चार तोले, शुद्ध गन्धक चार तोले, लोहभस्म चार तोले, ताम्रभस्म चार तोले, शुद्ध गूगल सोलह तोले, त्रिफलेका चूर्ण ८ तोले, एवं कूठ, शहद, पीपल, सोंठ, गोखरू, वायविडङ्ग और दशमूल ये प्रत्येक औषधि एक एक तोला लेवे । सबको एकत्र कूटपीस और वस्त्रमें छानकर दशमूलके क्राथमें सात बार भावना देवे । फिर घृतमें मिलाकर एक एक मासेकी सुन्दर गोलियाँ बना लेवे ॥ २१-२३ ॥

छागीदुग्धानुपानेन पयसा मधुनाऽथवा ।
शिरःशूलाद्रिवज्रोऽयं चण्डनाथेन भाषितः ॥ २४ ॥
एकजं द्वन्द्वजं चैव त्रिदोषजनितं तथा ।
वातिकं पैत्तिकं सर्वं शिरोरोगं विनाशयेत् ॥ २५ ॥

प्रतिदिन प्रातःसमय १-१ गोली बकरीके दूध या जल अथवा शहदके साथ मिलाकर सेवन करे । इस शिरःशूलाद्रिवज्रनामक रसको श्रीचण्डनाथने निर्माण किया है । यह एकदोषज, द्विदोषज, त्रिदोषज तथा वात, पित्त, कफ इनसे उत्पन्नहुए सर्व प्रकारके शिरोरोगको शीघ्र नष्ट करता है ॥ २४ ॥ २५ ॥

महालक्ष्मीविलास ।

लौहमभ्रं विषं मुस्तं फलत्रयकटुत्रयम् ।
धुस्तूरं वृद्धदारं च बीजमिन्द्राशनस्य च ॥ २६ ॥
गोक्षुरकद्वयं चैव पिप्पलीमूलमेव च ।
एतत्सर्वं समं भाव्यं रसो धुस्तूरकस्य च ॥ २७ ॥
भावयित्वा वटी कार्या द्विगुञ्जाफलमानतः ।
महालक्ष्मीविलासोऽयं सन्निपातनिवारकः ॥ २८ ॥

लोहा, अभ्रक, मीठातेलिया, नागरमोथा, त्रिफला, त्रिकुटा, धतूरा, विधारा भाँगके बीज, गोखुरू, बड़ा गोखुरू और पीपलामूल इन सबको समान भाग लेकर धतूरेके पत्तोंके रसमें खरल करके दो दो रत्तीकी गोलियाँ बना लेवे । यह महालक्ष्मीविलासरस यथाविधि सेवन करनेसे त्रिदोषज शिरोरोग नष्ट होय ॥

मयूराद्यघृत।

शतं मयूरमांसस्य दशमूलाबलातुलाम्।
द्रोणेऽम्भसः पचेत्क्षुत्त्वा तस्मिन्पादस्थिते ततः॥ ३९॥
निषिच्य पयसो द्रोणं पचेत्तत्र घृताढकम्।
प्रपौण्डरीककर्गोक्तैर्जीवनीयैश्च भेषजैः॥ ४०॥
मेधाबुद्धिस्मृतिकरमूर्द्ध्वजत्रुगदापहम्।
मायूरमेतन्निर्दिष्टं सर्वानिलहरं परम्॥ ४१॥
मन्याकर्णशिरोनेत्ररुजापस्मारनाशनम्।
विषवातामयश्वासविषमज्वरकासनुत्॥ ४२॥

मोरका मांस १०० पल, दशमूल और खिरैंटी समान भाग मिश्रित १०० पल लेकर सबको एकत्र कुचलकर एक द्रोणजलमें पकावे। जब पकते पकते चौथाई भाग जल शेष रहजाय तब उतारकर छानलेवे। फिर उस काथमें एक द्रोण दूध और एक आढक घृत तथा पुण्डेरिया, मुलहठी, पीपल, लालचन्दन, नीलकमल, जीवक, ऋषभक, मेदा, महामेदा, काकोली, क्षीरकाकोली, जीवन्ती, मुलहठी, मुगवन और मषवन इन समस्त औषधियोंका कल्क समान भाग मिश्रित दो सेर डालकर उत्तम प्रकार घृतको सिद्ध करे। यह घृत मेधा, बुद्धि और स्मृतिशक्तिको बढाता है तथा ऊर्ध्वजत्रुरोग, मन्यास्तम्भ, कर्ण शिर और नेत्ररोग, अपस्मार, विषज और वातजरोग, श्वास, विषमज्वर, खाँसी और सर्व प्रकारके वातविकारोंको नष्ट करता है। इसको मयूराद्यघृत कहते हैं॥ ३९-४२॥

षड्बिन्दुतैल।

एरण्डमूलं तगरं शताह्वा जीवन्ति रास्ना सहसैन्धवं च। भृङ्गं विडङ्गं मधुयष्टिका च विश्वौषधं कृष्णतिलस्य तैलम्॥४३॥ आजं पयस्तैलविमिश्रितं च चतुर्गुणे भृङ्गरसे विपक्वम्। षड्बिन्दवो नासिकया विधेया निघ्नन्ति शीघ्रं शिरसो विकारान्॥४४॥ च्युतांश्च केशान् पलितांश्च दन्तान्दुर्बद्धमूलांश्च दृढीकरोति। सुपर्णदृष्टिप्रतिमं च चक्षुर्बाह्वोर्बलं चाप्यधिकं ददाति॥ ४५॥

अण्डकी जड, तगर, सोया, जीवन्ती, रास्ना, सैंधानमक भाँगरा, वायविडङ्ग, मुलहठी, सोंठ और कालेतिलोंका तेल और बकरीका दूध इन सबको

समान भाग लेकर यथाविधिसे मिश्रित करके तेलको पकावे। इस षड्बिन्दुनामक तैलको नस्यद्वारा प्रयोग करे । यह शिरके समस्त विकारोंको बहुत शीघ्र नष्ट करता है तथा बालोंका गिरना और पलितरोगको दूरकर हिलतेहुए दाँतोंकी जडोंको मजबूत करता है। एवं नेत्रोंकी दृष्टिशक्तिको गरुडकी समान अत्यन्त सूक्ष्म और भुजाओंमें अनन्त बलकी वृद्धि करता है ॥ ४३–४५ ॥

दशमूलतैल १–२ ।

दशमूलक्वाथकल्काभ्यां तैलप्रस्थं विपाचयेत् ।
चतुर्गुणं पयो दत्त्वा शनैर्मृद्वग्निना भिषक् ॥ ४६ ॥
दशमूलमिति ख्यातं शोथं हन्ति सुदारुणम् ।
नस्येनाकालपलितं ज्वरारोचकनाशनम् ॥ ४७ ॥
अभ्यङ्गेनैव सर्वं च शिरःशूलं विनाशयेत् ॥ ४८ ॥

१–दशमूलकी औषधियोंके क्वाथ और कल्कके साथ कडवातेल एक प्रस्थ और दूध ४ प्रस्थ मिलाकर मन्दमन्द अग्निसे यथाविधि तेलको पकावे। इसको दशमूल तेल कहते हैं। यह तेल दारुण शोथको नष्ट करता है और नस्यद्वारा उपयोग करनेसे असमय बालोंका पकना, ज्वर, अरुचि आदि विकारोंका तथा मालिश करनेसे सर्वप्रकारके शिरःशूलको शीघ्र नष्ट करता है ॥ ४६–४८ ॥

दशमूलीकषायेण अष्टाङ्गकल्कसंयुतम् ।
क्षीरं च द्विगुणं दत्त्वा तैलप्रस्थं विपाचयेत् ॥ ४९ ॥

२–दशमूलके क्वाथके साथ जीवक, ऋषभक, मेदा, महामेदा, काकोली, क्षीर काकोली, ऋद्धि और वृद्धि इन औषधियोंका कल्क तथा एक प्रस्थ कडवा तेल और दो प्रस्थ दूध मिलाकर विधिपूर्वक तेलको सिद्ध करे ॥ ४९ ॥

शिरोऽर्त्तिं नाशयेदेतद्भास्करस्तिमिरं यथा ।
वातशूलं पित्तशूलं कफशूलं त्रिदोषजम् ॥ ५० ॥
सूर्यावर्त्तमभिष्यन्दं जलदोषं च नाशयेत् ।
दशमूलमिदं तैलं शिरोरोगनिषूदनम् ॥ ५१ ॥

यह तेल शिरोरोगको इस प्रकार नाश करदेता है जिस प्रकार सूर्य अन्धकार-पुञ्जको तत्क्षण नष्ट करता है। इससे वातज, पित्तज, कफज और त्रिदोषजशूल, सूर्यावर्त्तशिरोरोग, नेत्राभिष्यन्द और जलदोष दूर होता है। यह दशमूलतेल समस्त शिरोरोगोंका नाश करनेवाला है ॥ ५० ॥ ५१ ॥

मध्यमदशमूलतैल।

दशमूली करञ्जश्च निर्गुण्डी च जयन्तिका।
धुस्तूरः षट्पलान्भागाञ्जलद्रोणे विपाचयेत्।
पादशेषे रसे तस्मिन् कटुतैलं विपाचयेत्।
तत्कल्कान्दापयेदत्र भागान्षट्तोलकान्पृथक्॥ ५३॥

दशमूल, करंजुआ, निर्गुण्डी जयन्ती और धतूरा इनके पत्ते छः छः पल लेकर एक द्रोण जलमें पकावे। जब पकते पकते चौथाई भाग जल शेष रहजाय तब उतारकर छानलेवे। फिर उसमें कडवातेल एक प्रस्थ और उक्त औषधियोंका कल्क छः छः तोले डालकर यथानियम तैलको पकावे॥ ५२॥ ५३॥

वातश्लेष्मसमुद्भूतं शिरोरोगं व्यपोहति।
कासं पञ्चविधं शोथं जीर्णज्वरमपोहति॥ ५४॥
दशमूलमिदं तैलं शिरःकर्णाक्षिरोगनुत्।
मन्यास्तम्भमन्त्रवृद्धिं श्लीपदं च विनाशयेत्॥
दशमूलमिदं तैलमश्विभ्यां निर्मितं पुरा॥ ५५॥

यह तेल वात और कफसे उत्पन्नहुए शिरोरोगको दूर करताहै। तथा पाँच प्रकारकी खाँसी, सूजन, जीर्णज्वर, शिर, कान और नेत्रोंके रोग, मन्यास्तम्भ, अन्त्र-वृद्धि और श्लीपदरोगको नष्ट करता है। इस दशमूल तैलको पूर्वकालमें अश्विनी-कुमारोंने निर्म्माण किया है॥ ५४॥ ५५॥

बृहद्दशमूलतैल १-२।

पञ्च पञ्च पलं नीत्वा पञ्चमूलीयुगात्पृथक्।
विपाचयेज्जलद्रोणे चाष्टभागावशेषितम्॥ ५६॥
आर्द्रकस्य रसप्रस्थं निर्गुण्ड्यास्तत्समं भवेत्।
त्र्यूषणं पञ्चकोलं च जीरकद्वयसर्षपम्॥ ५७॥
सैन्धवं च यवक्षारं त्रिवृता च निशाद्वयम्।
तोयं च द्विगुणं दत्त्वा कल्कमक्षसमं विदुः॥ ५८॥
सर्वैरेभिः पचेत्तैलं शिरोरोगं व्यपोहति।
ऊर्ध्वजत्रुजरोगघ्नं वातश्लेष्मगदापहम्॥ ५९॥

एकजे द्वन्द्वजे चैव तथैव सान्निपातिके ।
अर्द्धावभेदके चैव सूर्यावर्त्ते प्रशस्यते ॥
पानाभ्यञ्जननस्येन कर्णरोगे च शस्यते ॥ ६० ॥

१–दशमूलकी प्रत्येक औषधिको बीस बीस तोले लेकर एक द्रोण (३२ सेर) जलमें पकावे । जब पकते २ आठवाँ हिस्सा जल शेष रहजाय तब उतारकर छान लेवे । फिर उसमें अदरखका रस १ प्रस्थ, निर्गुण्डीके पत्तोंका रस एक प्रस्थ तथा त्रिकुटा, पीपल, पीपलामूल, चव्य, चीता, सोंठ, जीरा, कालाजीरा, सफेद सरसों, सेंधानमक, जवाखार, निसोत, हलदी और दारुहल्दी इन औषधियोंका कल्क दोदो तोले और पाकके लिये रसोंसे दुगुना जल डालकर सबको यथाविधिसे एकत्र करके तेलको पकावे । यह तेल सम्पूर्ण शिरोरोग, ऊर्ध्वजत्रुजनित रोग और वात तथा कफजन्य रोगोंको दूर करता है । इसको एकदोषज, द्विदोषज तथा त्रिदोषज अर्द्धावभेदक और सूर्यावर्त रोगमें तथा कर्णरोगमें पान, अभ्यञ्जन और नस्यद्वारा प्रयोग करना ॥

दशमूलीशतं ग्राह्यं तथा धुस्तूरकस्य च ॥
शतं पुनर्नवायाश्च निर्गुण्ड्याश्च शतं तथा ॥ ६१ ॥
एतैः कषायैर्विपचेत्कटुतैलाढकं भिषक् ।
वासा वचा देवदारु शठी रास्ना सयष्टिका ॥ ६२ ॥
मरिचं पिप्पली शुण्ठी कारवी कट्फलं तथा ।
करञ्जं शिग्रु कुष्ठं च चिञ्चा च वनशिम्बिका ॥ ६३ ॥
चित्रकं च पृथग् भागान् दत्त्वा चैषां पलोन्मितान् ॥ ६४

२–दशमूल, धतूरा, पुनर्नवा और निर्गुण्डी ये प्रत्येक औषधि सौ सौ पल लेकर एक द्रोण जलमें पकावे । चतुर्थांश शेष रहनेपर उतारकर छानलेवे । फिर उसमें कडवा तेल एक आढक तथा अडूसा, वच, देवदारु, कचूर, रास्ना, मुलहठी, मिरच पीपल, सोंठ, कालाजीरा, कायफल, करञ्ज, सहिंजना, कूठ, इमली, वनसेम और चीतेकी जड इन सबका कल्क पृथक् पृथक् चार चार तोले डालकर उत्तम प्रकार तेलको सिद्ध करे ॥ ६१–६४ ॥

श्लैष्मिकं सन्निपातोत्थं वातश्लेष्मोद्भवं तथा ।
कर्णशूलं शिरःशूलं नेत्रशूलं च दारुणम् ॥
निहन्ति दशमूलाख्यं तैलमेतन्न संशयः ॥ ६५ ॥

यह तेल कफसे, वातकफसे और त्रिदोषसे उत्पन्न हुए कर्णशूल शिरःशूल और दारुण नेत्रशूलको तत्काल नष्ट करता है। इसमें कुछ सन्देह नहीं ॥ ६५ ॥

महादशमूलतैल ।

दशमूलं पलशतं जलद्रोणे विपाचयेत् ।
तेन पादावशेषेण कटुतैलाढकं पचेत् ॥ ६६ ॥
जम्बीरार्द्रकधुस्तूरस्वरसं तैलतुल्यतः ।
कल्कं कणाऽमृता दार्वी शतपुष्पा पुनर्नवा ॥ ६७ ॥
शिग्रुपिप्पलिका तिक्ता करञ्जं कृष्णजीरकम् ।
सिद्धार्थकं वचा शुण्ठी पिप्पली चित्रकं शठी ॥ ६८ ॥
देवदारु बला रास्ना सूर्यावर्त्तककट्फलम् ।
निर्गुण्डी चविका गैरि ग्रन्थिकं शुष्कमूलकम् ॥ ६९ ॥
यमानी जीरकं कुष्ठमजमोदा च ताडकम् ।
एतेषां पलिकैर्भागैर्विपचेन्मतिमान् भिषक् ॥ ७० ॥
निहन्ति विविधान्व्याधीन्कफवातसमुद्भवान् ।
शिरोमध्यगतान्रोगाञ्छोथान्हन्ति व्रणानपि ॥ ७१ ॥
"सिद्धफलमिदम्" ॥

दशमूलकी समस्त औषधियोंको १०० पल लेकर एक द्रोण जलमें पकावे। चौथाई भाग जल शेष रहजानेपर उसको उतारकर छानलेवे। फिर उसमें कडवा तेल १ आढक, जम्बीरीनींबूका रस, अदरख और धतूरेका रस इनको भी एक एक आढक तथा कल्कके लिये पीपल, गिलोय, दारुहल्दी, सौंफ, पुनर्नवा, सहिंजना, पीपल, कुटकी, करंजुआ, कालाजीरा, सफेद सरसों, वच, सोंठ, गजपीपल, चीता, कचूर, देवदारु, खिरेंटी, रास्ना, हुलहुल, कायफल, निर्गुण्डी, चव्य, गेरू, पीपलामूल, सूखीमूली, अजवायन, जीरा, कूठ, अजमोद और विधारेके बीज बुद्धिमान् वैद्य इन औषधियोंके चार चार तोले कल्कको डालकर यथाविधि तेलको पकावे। प्रतिदिन नियमपूर्वक मर्दन करनेसे यह तेल कफ और वातसे उत्पन्न हुए अनेक प्रकारके रोगोंको तथा शिरःसम्बन्धी सब रोगों एवं सूजन और क्षतोंको तत्क्षण नष्ट करता है। यह तत्काल इष्ट फलको देनेवाला है। इसको पान करनेसे भयानक खाँसी दूर होती है ॥

महाकनकतैल।

कनकस्य रसप्रस्थं प्रस्थं वर्षाभुवस्तथा।
निर्गुण्डीस्वरसप्रस्थं दशमूलरसस्य च॥ ७२॥
पारिभद्ररसप्रस्थं प्रस्थं वरुणकस्य च।
तैलप्रस्थं समादाय भिषग् यत्नाद्विपाचयेत्॥ ७३॥
कल्कैरर्द्धपलैरेतैः शुण्ठीमरिचसैन्धवैः।
पुनर्नवाकर्कटकशेलुत्वक्पिप्पलीयुगैः॥
तत्साधु सिद्धं विज्ञाय शुभे पात्रे निधापयेत्॥ ७४॥

धतूरेका रस, पुनर्नवेका रस, निर्गुण्डीका रस, दशमूलका क्वाथ, फरहदका रस और बरनाकी छालका क्वाथ इन सबको अलग अलग एक एक प्रस्थ लेवे। सबको एकत्रकर इनमें सरसोंका तेल १ प्रस्थ तथा सोंठ, मिरच, सैंधानमक, पुनर्नवा काकडासिंगी, लहसौडेके वृक्षकी छाल, पीपल और गजपीपल इन प्रत्येकका कल्क दो दो तोले डालकर तेलको पकावे। जब अच्छे प्रकार पककर सिद्ध होजाय तब उतारकर स्वच्छपात्रमें भरकर रखदेवे॥ ७२-७४॥

वातश्लेष्मकृतं सर्वमामवातं भगन्दरम्।
सन्निपातभवं रोगं शोथमाशु विनाशयेत्॥ ७५॥
ये केचिद्व्याधयः सन्ति श्लैष्मिकाः सान्निपातिकाः।
तान्सर्वान्नाशयत्याशु सूर्यस्तम इवोदितः॥ ७६॥

यह तेल वात कफजन्यरोग, आमवात, भगन्दर, सन्निपातज रोग और शोथको दूर करता है तथा कफसे और सन्निपातसे होनेवाले जितने रोग हैं उन सबको यह तेल सेवन करतेही इसप्रकार नष्ट करता है जिसप्रकार उदय हुआ सूर्य अपने तेजः पुञ्जसे अन्धकार समूहको तत्क्षण नष्ट करदेता है॥७५॥७६॥

रुद्रतैल।

जैपालद्रोणधुस्तूरशिग्रुशक्राशनस्य च।
सूर्यावर्त्तस्य सूर्यस्य पत्राणां स्वरसं पृथक्॥ ७७॥
जम्बीरशृङ्गवेरस्य रसं दत्त्वा समं समम्
कटुतैलस्य पात्रं तु शोषयित्वा पचेद्भिषक्॥ ७८॥
रजनीद्वयमञ्जिष्ठा कट्फलं कृष्णजीरकम्।
त्रिकटुः पिप्पलीमूलं शारिवे द्वे विडङ्गकम्॥ ७९॥

रास्ना दारु बला निम्बं मुस्तकं चन्दनं तथा ।
परशू द्वौ स्नुहीमूलं मूर्वाऽपामार्गमूलकम् ॥ ८० ॥
स्वरसद्रव्यमेतेषां कल्कं दद्याद्धि पादिकम् ।
मृत्पात्रे सुदृढे चैव पाचयेत्तीव्रवह्निना ॥ ८१ ॥

जमालगोटेके पत्तोंका रस, गूमाका रस, धतूरेके पत्तोंका रस, सहिंजनेके पत्तोंका, भाँगके पत्तोंका, हुलहुलके पत्तोंका और आकके पत्तोंका रस इनको पृथक्, पृथक् आठ आठ सेर, जम्बीरीनींबूका रस, और अदरखका रस ये प्रत्येक आठ आठ सेर, कडवा तेल ३२ सेर, तथा हल्दी, दारुहल्दी, मंजीठ, कायफल, कालाजीरा त्रिकुटा पीपलामूल, उसवा, अनन्तमूल, वायविडङ्ग, रास्ना, देवदारु, खिरैटी, नीमकी छाल, नागरमोथा, लालचन्दन, पेटाली लता, कुडुलियालता, थूहरकी जड, मूर्वा, चिरचिटा, सूखीमूली, जमालगोटा, गूमा, धतूरा, सहिंजना इनकी जड, भाँग, हुलहुल, और आक इनके पत्ते, जंबीरीनींबूकी जड और सोंठ ये सब औषधियें समान भाग मिश्रित दो सेर लेवे, फिर सबको एकत्र पीसकर, यथाविधिसे मिलाकर तेलको तीव्र अग्निसे पकावे । जब उत्तम प्रकार पककर सिद्ध होजाय तब अत्यन्त दृढ और चिकने मिट्टीके बर्त्तनमें भरकर रखदेवे ॥ ७७ ॥ ८१ ॥

बलासमूर्द्धगं चैव नाशयेत्रिदिनाद्ध्रुवम् ।
मुखकर्णाक्षिरोगांश्च कफशोणितसंस्रवान् ॥ ८२ ॥
शिरोरोगं सन्निपातं श्लीपदं गलगण्डकम् ।
अभ्यङ्गान्नाशयेदेतान्पानात्कासं व्यपोहति ॥
कालाग्निरुद्रेण प्रोक्तं रुद्रतैलमिदं पुरा ॥ ८३ ॥

इस तेलको नियमपूर्वक मर्दन करनेसे ऊर्ध्वजत्रुगत श्लेष्मा, मुखरोग, कर्णरोग, नेत्ररोग, कफजरोग, रक्तस्राव, शिरोरोग, सन्निपातज रोग, श्लीपद और गलगण्ड ये सब रोग तीन दिनमें निश्चय नष्ट होते हैं और इसको पान करनेसे खाँसी दूर होती है । पूर्वकालमें इस रुद्रतैलको कालाग्निरुद्रने वर्णन किया है ॥ ८२ ॥ ८३ ॥

तन्त्रराजतैल ।

धुस्तूरं पूतिकं पीता जयन्ती सिन्धुवारकम् ।
शिरीषं हिज्जलं शिग्रुर्दशमूलं समं भवेत् ॥ ८४ ॥

प्रस्थं प्रस्थं समादाय कटुतैलं समांशकम् ।
जलद्रोणे विपक्तव्यं ग्राह्यं पादावशेषितम् ॥ ८५ ॥
गोमूत्रं चाढकं दत्त्वा शनैर्मृद्वग्निना पचेत ।
मदनं त्र्यूषणं कुष्ठमजाजी विश्वभेषजम् ॥ ८६ ॥
कट्फलं वरुणं मुस्तं हिग्नलं बिल्वमेव च ।
हरितालं जवापुष्पममृतं कुनटी तथा ॥ ८७ ॥
कर्कटं चन्दनं शिग्रु यमानी व्याघ्रपादपि ।
एतेषां कार्षिकैर्भागैः समभागं प्रकल्पयेत् ॥ ८८ ॥

धतुरा, दुर्गंध करंज, पीला पियाबाँसा, जयंती, सिंभालु, सिरस, समुद्रफल, सहिंजना; और दशमूल इन सब औषधियोंको एक एक प्रस्थ लेकर एक द्रोण जलमें पकावे। चतुर्थांश जल शेष रहनेपर उतारकर छान लेवे। फिर उस क्वाथमें तिलका तेल एक प्रस्थ, गोमूत्र एक आढक तथा मैनफल, सोंठ, मिरच, पीपल, कूठ, जीरा, सोंठ, कायफल, वरनाकी छाल, नागरमोथा, समुद्रफल, बेलगिरी, हरिताल, गुडहल के फूल, विष, मैनसिल, काकडासिंगी, लालचंदन, सहिंजनेकी छाल, अजवायन और हुलहुलकी जड इन औषधियोंके दो दो तोले कल्कको डालकर मन्द मन्द अग्निद्वारा यथाविधि तेलको पकावे ॥ ८४-८८

तप्तराजमिति ख्यातं महादेवेन निर्मितम् ।
सन्निपातं महारोगं शिरोरोगं महोत्तरम् ॥ ८९ ॥
शिरःशूलं नेत्रशूलं कर्णशूलं च दारुणम् ।
ज्वरं दाहं महाघोरं स्वेदं चैव महोत्तरम् ॥ ९० ॥
कामलां पाण्डुरोगं च सहलीमकपीनसम् ।
त्रयोदश सन्निपातं हन्ति सद्यो न संशयः ॥ ९१ ॥

इस तेलको शिवजी महाराजने निर्म्माण किया है। यह तप्तराजनामसे प्रसिद्ध है। यह तेल सन्निपात, अत्यन्त प्रबल शिरोरोग, शिरःशूल, नेत्रशूल, दारुण कर्णशूल, ज्वर, दाह, अत्यन्त स्वेद आना, कामला, पाण्डु, हलीमक पीनस और तेरह प्रकारके सन्निपात इन सब रोगोंको सन्देहरहित तत्काल नष्ट करता है ८९-९१

कुमारीतैल ।

कुमार्याः स्वरसे प्रस्थे धुस्तूरस्य रसे तथा ।

भृङ्गराजस्य च रसे प्रस्थद्वयसमायुते ॥ ९२ ॥
चतुःप्रस्थमिते क्षीरे तैलप्रस्थं विपाचयेत्।
कल्कैर्मधुकह्रीबेरमञ्जिष्ठाभद्रमुस्तकैः ॥ ९३ ॥
नखकर्पूरभृङ्गैलाजीवन्तीपद्मकुष्ठकैः ।
मार्कवासकतालीशसर्ज्जनिर्यासपत्रकैः ॥ ९४ ॥
विडङ्गशतपुष्पाश्वगन्धागन्धर्वहस्तकैः ।
शोकहृन्नारिकेलाभ्यां कर्षमानैर्विपाचिते ॥
उत्तार्य वस्त्रपूतं च शुभे भाण्डे सुधूपिते ॥ ९५ ॥

घीग्वारका रस १ प्रस्थ, धतूरेके पत्तोंका रस एक प्रस्थ, भाँगरेका रस दो प्रस्थ और ४ प्रस्थ दूध इनमें १ प्रस्थ तिलका तेल एवं मुलहठी, सुगन्धवाला, मंजीठ, नागरमोथा, नखद्रव्य, कपूर, दारचीनी, छोटीइलायची, जीवन्ती, पद्माख, कूठ, भाँगरा, अडूसा, तालीशपत्र, राल, तेजपात, वायविडङ्ग सौंफ, असगन्ध, अण्डकी जड, अशोककी छाल और नारियलकी जड इन औषधियोंको अलहिदा दो दो तोले लेकर सबको एकत्र कूट पीसकर मिलालेवे। फिर विधिपूर्वक शनैः शनैः तेलको पकावे। जब उत्तम प्रकार पककर सिद्ध होजाय तब उतारकर वस्त्रमें छान-कर धूप आदिसे सुवासित उत्तम पात्रमें भरकर रखदेवे ॥ ९२-९५ ॥

त्रिरात्रमथ गुप्तं च धारयेद्विधिविद्भिषक् ।
ततस्तु तैलमभ्यङ्गे मूर्ध्नि क्षेपे नियोजयेत् ॥ ९६ ॥

फिर विधिको जाननेवाला वैद्य उस पात्रको तीन दिनतक मिट्टीमें गाडकर रक्खे, पश्चात् निकालकर उसकी शरीरपर और शिरपर मालिश करे ॥ ९६ ॥

शमयेदर्दितं गाढं मन्यास्तम्भशिरोगदान् ।
तालुनासाक्षिजातं तु शोषमूर्च्छाहलीमकम् ॥ ९७ ॥
हनुग्रहगदत्वं वा बाधिर्यं कर्णवेदनम् ॥ ९८ ॥

यह तेल घोरतर अर्दितरोग, मन्यास्तम्भ, शिरोरोग तथा तालु नासिका और नेत्रगतरोग, शोष, मूर्च्छा, हलीमक, हनुग्रह, बधिरता और कानकी पीडा आदि रोगोंको शीघ्र नष्ट करता है ॥ ९७ ॥ ९८ ॥

शिरोरोगमें पथ्य।

स्वेदो नस्यं धूमपानं विरेको लेपश्छर्दिर्लङ्घनं शीर्ष-

वस्तिः । रक्तोन्मुक्तिर्वह्निकर्मोपनाहो जीर्णं सर्पिः शालयः षष्टिकाश्च ॥ ९९ ॥ यूषो दुग्धं धन्वमांसं पटोलं शिग्रु-द्राक्षा वास्तुकं कारवेल्लम् । आम्रं धात्री दाडिमं मातुलुङ्गं तैलं तक्रं काञ्जिकं नारिकेलम् ॥ १०० ॥ पथ्या कुष्ठं भृङ्गराजः कुमारी मुस्तोशीरं चन्द्रिका गन्धसारः । कर्पूरं च ख्यातिमानेष वर्गः सेव्यो मर्त्यैः शीर्षरोगे यथास्वम् ॥ १०१ ॥

शिरोरोगमें स्वेद, नस्य देना, धूमपान, विरेचन, लेप, वमन, लंघन, शिरोवस्ति, रक्तमोक्षण, अग्निकर्म, शिरपर लेप करना, पुराना घी, शालिके चावल और सांठीके चावल, मूँगका यूष, दूध, मरुदेशके जीवोंका मांस, परवल, सहिंजना, दाख, बथुआ, करेला, आम, आमले, अनार, बिजौरानींबू, तेल, मट्ठा, कांजी, नारियल, हरड, कूठ, भाँगरा, घीग्वार, नागरमोथा, खस, इलायची, सफेदचंदन और कपूर इन समस्त औषधियोंको यथादोषानुसार सेवन करे ॥ १०१॥

शिरोरोगमें अपथ्य ।

क्षवजृम्भामूत्रबाष्पनिद्राविड्वेगमञ्जनम् ।
दुष्टनीरं विरुद्धान्नं सह्यविन्ध्यसरिज्जलम् ॥
दन्तकाष्ठं दिवानिद्रां शिरोरोगी परित्यजेत् ॥ १०२ ॥

छींक, जमुहाई, मूत्र, आँसू, निद्रा और मल इनके वेगको रोकना, अंजन लगाना, दूषित जलपान, विरुद्ध अन्न भोजन, सह्य और विन्ध्य आदि पर्वतोंकी नदियोंका जल, दातोन और दिनमें शयन करना इन सबको शिरोरोगी त्यागदेवे ॥१०२॥

इति भैषज्यरत्नावल्यां शिरोरोगचिकित्सा ॥

प्रदररोगकी चिकित्सा ।

दध्ना सौवर्चलाजाजी मधुकं नीलमुत्पलम् ।
पिबेत्क्षौद्रयुतं नारी वातासृग्दरपीडिता ॥ १ ॥

वातज प्रदररोगमें उक्तरोगसे पीडित स्त्री कालानमक, जीरा, मुलहठी, नीलाकमल और शहद इन सबको समान भाग लेकर दहीके साथ खरल करके प्रतिदिन पान करे ॥ १ ॥

पिबेदैणेयकं रक्तं शर्करामधुसंयुतम् ॥

काले हिरनके रक्तको खाँड और मधुमें मिश्रित करके पान करनेसे अधिक स्राव युक्त पित्तज रक्तप्रदररोग दूर होता है ॥

कुशमूलं समुद्धृत्य पेषयेत्तण्डुलाम्बुना ।
एतत्पीत्वा त्र्यहान्नारी प्रदरात्परिमुच्यते ॥ २ ॥

कुशाकी जडको चावलोंके जलमें पीसकर पान करनेसे तीन दिनमें ही स्त्री प्रदर-रोगसे मुक्त होजाती है ॥ २ ॥

अशोकवल्कलक्काथे शृतं दुग्धं सुशीतलम् ।
यथाबलं पिबेत्प्रातस्तीव्रासृग्दरनाशनम् ॥ ३ ॥

अशोकके वृक्षकी छालके क्काथमें दूधको पकाकर शीतल होजानेपर अग्निके बलाबलको विचारकर प्रतिदिन प्रातःकाल पान करनेसे स्त्रियोंका तीव्र प्रदररोग नष्ट होता है ॥ ३ ॥

क्षौद्रयुक्तं फलरसं काष्ठोडुम्बरजं पिबेत् ।
असृग्दरविनाशाय सशर्करपयोऽन्नभुक् ॥ ४ ॥

शहदके साथ गूलरके रसको अथवा चीनी और दूधके साथ अन्नको भोजन करनेसे रक्तप्रदररोग शान्त होता है ॥ ४ ॥

प्रदरं हन्ति बलाया मूलं दुग्धेन संयुतं पीतम् ।
कुशवाट्यालकमूलं तण्डुलसलिलेन रक्ताख्यम् ॥ ५ ॥

खिरैंटीकी जडको जलमें पीसकर और दूधमें मिलाकर पान करे। अथवा कुशा और खिरैंटीकी जडको चावलोंके पानीमें पीसकर पान करे तो रक्तज प्रदर दूर होता है ॥ ५ ॥

गुडेन बदरीचूर्णं मोचमामं तथा पयः ।
पीता लाक्षा च सघृता पृथक् प्रदरनाशनम् ॥ ६ ॥

बेरीके पत्तोंके चूर्णको गुडके साथ, कच्चा केलेकी फलीके चूर्णको दूधके साथ किम्वा लाखके चूर्णको घृतमें मिलाकर सेवन करनेसे प्रदररोग नष्ट होता है ॥ ६ ॥

रक्तपित्तविधानेन प्रदरांश्चाप्युपाचरेत् ।
रक्तातीसारवच्चाथ रक्तार्शोवत्तथैव च ॥ ७ ॥

रक्तपित्त, रक्तातीसार और रक्तार्शरोगकी चिकित्साके अनुसारही रक्तप्रदररोगकी चिकित्सा करनी चाहिये ॥ ७ ॥

असृग्दरे विशेषेण कुटजाष्टकमिष्यते ॥

विशेषकर रक्तप्रदररोगमें अतीसारमें कहाहुआ कुटजाष्टक उपयोगी है ॥

रोहितकमूलकल्कं पाण्डुरेऽसृग्दरे पिबेत् ।
जलेनामलकीबीजकल्कं वा ससितामधु ॥ ८ ॥

रोहेडा वृक्षकी जडकी छालको पीसकर मिश्री और शहदमें मिलाकर अथवा आमलोंकी गुठलीकी मींगको जलमें पीसकर, मिश्री और शहदमें मिलाकर पान करना पाण्डुप्रदररोगमें हितकारी है ॥ ८ ॥

धातक्याश्चाक्षमात्रं वा आमलक्या मधुद्रवम् ।
काकजानुकमूलं वा मूलं कार्पासमेव वा ॥
पाण्डुप्रदरशान्त्यर्थं पिबेत्तण्डुलवारिणा ॥ ९ ॥

श्वेतप्रदरको नष्ट करनेके लिये धायके फूल अथवा आमलोंको दो तोले प्रमाण लेकर जलमें पीसकर शहदके साथ किंवा काकजङ्घाकी जडको या कपासकी जडको पीसकर चावलोंके जलके साथ पान करे ॥ ९ ॥

शर्करामधुकं शुण्ठी तैलं दधि च तत्समम् ।
खजेन मथितं पीतं हन्याद्वातोत्थितं रजः ॥ १० ॥

खाँड, मुलहठी, सोंठ, तिलका तेल और दही; इनको समान भाग लेकर सबको एकत्र करछोंरो मथकर पीवे तो वातज रक्तप्रदर दूर होता है ॥ १० ॥

वासकस्वरसं पित्ते गुडूच्या रसमेव वा ।
धात्रीरसं सितायुक्तं योनिदाहापहं पिबेत् ॥ ११ ॥

पैत्तिकप्रदररोगमें अडूसेके स्वरसको अथवा गिलोयके स्वरसको पान करे और आमलोंके स्वरसको मिश्री डालकर पान करनेसे योनिदाह दूर होता है ॥

भूम्यामलकचूर्णं च पीतं तण्डुलवारिणा ।
दिनत्रयान्तरेणैव स्त्रीरोगं नाशयेद् ध्रुवम् ॥ १२ ॥

भुईआमलेके चूर्णको चावलोंके जलके साथ पीनेसे ३ दिनमेंही स्त्रियोंका प्रदर-रोग निश्चयरूपसे नष्ट होता है ॥ १२ ॥

रक्तपित्तहरः सर्वः प्रदरे नूतने विधिः ।
रक्तातीसारयोगं च सर्वमत्र प्रयोजयेत् ॥ १३ ॥

नवीन प्रदररोगमें रक्तपित्तनाशक और रक्तातीसार रोगकी भाँति सम्पूर्ण चिकित्सा करनी चाहिये ॥ १३ ॥

मूलं च शरपुंखायाः पेषयेत्तण्डुलाम्बुना।
पीत्वा च कर्षमात्रं तु अतिरक्तं प्रशान्तयेत् ॥ १४ ॥

शरफोंकाकी जडको दो तोले लेकर चावलोंके जलमें पीसकर पान करनेसे रक्त-का स्राव होना बन्द होता है ॥ १४ ॥

धात्र्यञ्जनाभयाचूर्णं तोयपीतं रजो हरेत।
शेलुच्छदमिश्रपिष्टं भक्षणं च तदर्थकृत् ॥ १५ ॥

आमले, रसौत और हरड इनके चूर्णको पीसकर अथवा लहसौडेकि पत्तोंको मिलाकर चावलोंके बडेके साथ भक्षण करनेसे रक्तस्राव दूर होता है ॥१५॥

वासाकषायसहितं रसभस्म प्रयोजितम्।
प्रदरं हन्ति वेगेन सक्षौद्रं नात्र संशयः ॥ १६ ॥

अडूसेके क्वाथके साथ शहद और रससिंदूर मिलाकर सेवन करनेसे वेगसे होनेवाला प्रदररोग निस्सन्देह नष्ट होता है ॥ १६ ॥

दार्व्यादि।

दार्वी--रसाञ्जनवृषाब्दकिरातबिल्वभल्लातकैरवकृतो
मधुना कषायः। पीतो जयत्यतिबलं प्रदरं सशूलं
पीतासितारुणविलोहितनीलशुक्लम् ॥ १७ ॥

दारुहल्दी, रसौत, अडूसेकी छाल, नागरमोथा, चिरायता, बेलगिरी और लाल चंदन इनका एकत्र क्वाथ बनाकर शहदमें मिलाकर पान करनेसे शूलयुक्त अतिप्रबल पीतप्रदर असितप्रदर रक्तप्रदर विलोहितप्रदर नीलप्रदर और श्वेतप्रदरादि सब प्रकारके प्रदर नाशको प्राप्त होते हैं ॥ १७ ॥

चंदनादिचूर्ण।

चन्दनं नलदं लोध्रमुशीरं पद्मकेशरम्।
नागपुष्पं च बिल्वं च भद्रमुस्तं च शर्करा ॥ १८ ॥
ह्रीबेरं चैव पाठा च कुटजस्य फलत्वचम्।
शृङ्गबेरं सातिविषा धातकी च रसाञ्जनम् ॥ १९ ॥
आम्रास्थि जम्बुसारास्थि तथा मोचरसोद्भवः।
नीलोत्पलं समङ्गा च सूक्ष्मैला दाडिमोद्भवम् ॥ २० ॥
चतुर्विंशतिमेतानि समभागानि कारयेत्।
तण्डुलोदकसंयुक्तं मधुना सह योजयेत् ॥ २१ ॥

लालचंदन, जटामांसी, लोध, खस, कमलकी केशर, नागकेशर, बेलगिरी, नागरमोथा, खाँड, सुगंधवाला, पाढ, इन्द्रजौ, कुडेकी छाल, सोंठ, अतीस, धायके फूल, रसौत, आमकी गुठलीकी मींग, जामुनकी गुठलीकी मींग, मोचरस, नीले कमलका फूल, वराहक्रान्ता, छोटी इलायची और अनारकी छाल इन चौबीसों औषधियोंको समान भाग लेकर एकत्र कूट पीसकर कपड छान करके चूर्ण बना-लेवे । इस चूर्णको प्रतिदिन तीन तीन मासे परिमाण लेकर चावलोंके जल और मधुमें मिश्रित करके सेवन करे ॥ १८-२१ ॥

चतुःप्रकारं प्रदरं रक्तातीसारमुल्बणम् ।
रक्तार्शांसि निहन्त्याशु भास्करस्तिमिरं यथा ॥
अश्विन्योः सम्मतो योगो रक्तपित्तनिबर्हणः ॥ २२ ॥

यह चूर्ण चार प्रकारके प्रदररोगको तथा दारुण रक्तातिसार और रक्तार्शको तत्काल नष्ट करता है जिस प्रकार सूर्य अंधकारराशिको शीघ्र नष्ट कर देता है । इसको अश्विनीकुमारोंने रचा है । यह योग रक्तपित्तनाशक है ॥ २२ ॥

पुष्यानुगचूर्ण ।

पाठा जम्ब्वाम्रयोर्मध्यं शिलाभेदं रसाञ्जनम् ।
अम्बष्ठकी मोचरसः समङ्गा पद्मकेशरम् ॥ २३ ॥
बाह्लिकातिविषामुस्तं बिल्वं लोध्रं सगैरिकम् ।
कट्फलं मरिचं शुण्ठी मृद्वीका रक्तचन्दनम् ॥ २४ ॥
कट्वङ्गवत्सकानन्ता धातकी मधुकार्ज्जुनम् ।
पुष्येणोद्धृत्य तुल्यानि श्लक्ष्णचूर्णानि कारयेत् ॥
तानि क्षौद्रेण संयोज्य पाययेत्तण्डुलाम्बुना ॥ २५ ॥

पाढ, जामुन और आमकी गुठलियोंकी मींग, पाषाणभेद, रसौत, अम्बष्ठकी (मोईयावृक्ष), मोचरस, वराहक्रान्ता, कमलकेशर, अतीस, नागरमोथा, बेल-गिरी, लोध, गेरू, कायफल, मिरच, सोंठ, दाख, लालचंदन, सोनापाठेकी छाल, इन्द्रजौ, अनंतमूल, धायके फूल, मुलहठी और अर्जुनकी छाल इन सब औष-धियोंको पुष्यनक्षत्रमें उद्धृत करके समान भाग लेकर बारीक कूट पीसकर चूर्ण बनालेवे । फिर उस चूर्णको शहद और चावलोंके जलके साथ मिलाकर सेवन करे ॥ २३-२५ ॥

अर्शःसु चातिसारेषु रक्तं यश्चोपवेश्यते ।
दोषागन्तुकता ये च बालानां तांश्च नाशयेत् ॥ २६ ॥

योनिदोषं रजोदोषं श्वेतं नीलं सपीतकम् ।
स्त्रीणां श्यावारुणं यच्च तत्प्रसह्य निवर्त्तयेत् ॥ २७ ॥
चूर्णं पुष्यानुगं नाम हितमात्रेयपूजितम् ।
अम्बष्ठा दक्षिणे ख्याता गृह्णन्त्यन्ये तु लक्षणाः ॥ २८ ॥

अर्श और रक्तातीसारमें इसको प्रयोग करना उपयोगी है । यह चूर्ण बालकोंके जितने भी आगन्तुक रोग हैं उन सबको और स्त्रियोंके योनिदोष, श्वेत, नील, पीत, श्याम और अरुण प्रदररोगोंको बहुत शीघ्र नष्ट करता है । यह पुष्यानुगनामक चूर्ण उक्त रोगोंमें विशेष हितकारी है और आत्रेय करके पूजित है ॥ २६–२८ ॥

उत्पलादि ।

कन्दं रक्तोत्पलस्याथ रक्तकार्पासमूलकम् ।
करवीरस्य मूलानि तथा रक्तोड्रमूलकम् ॥ २९ ॥
बकुलस्य तथा मूलं गन्धमातृकजीरकौ ।
रक्तचन्दनकं चैव समभागं च कारयेत् ॥ ३० ॥
तण्डुलोदकसंपिष्टं रक्तमूत्राय दापयेत् ।
योनिशूलं कटीशूलं कुक्षिशूलं च नाशयेत् ॥
योनिशूलहरः प्रोक्त उत्पलादिर्न संशयः ॥ ३१ ॥

लालकमलकी जड, लालकपासकी जड, लालकनेरकी जड, लालगुडहलकी जड, बक वृक्षकी जड, गन्धमात्रा, जीरा और लाल चन्दन इनको बराबर २ लेकर एकत्र कूट पीसकर चूर्ण बनालेवे । इसको चावलोंके पानीमें पीसकर और शहदमें मिलाकर सेवन करनेसे रक्तमूत्र, योनिशूल, योनिशूल, कटिशूल और कुक्षिशूल नाश होता है । यह उत्पलादि चूर्ण योनिशूलको निस्सन्देह नष्ट करता है ॥

मधुकाद्यवलेह ।

मधुकं चन्दनं लाक्षा रक्तोत्पलरसाञ्जनम् ।
कुशवीरणयोर्मूलं बलावासकयोस्तथा ॥ ३२ ॥
कोलमज्जाम्बुदं बिल्वं पिच्छा दार्वी च धातकी ।
अशोकवल्कलं द्राक्षा जवाकुसुममस्फुटम् ॥ ३३ ॥
आम्रजम्बुकिसलयं कोमलं नलिनीदलम् ।
शतमूली विदारी च रजतं लौहमभ्रकम् ॥ ३४ ॥

एषां कोलमितं चूर्णं द्विगुणा सितशर्करा।
शतावरीरसस्य प्रस्थार्द्धे पचेन्मन्देन वह्निना ॥ २५ ॥
घनीभूते क्षिपेच्चूर्णं शीतीभूते पलं मधु।
मधुकाद्यवलेहोऽयं महादेवेन भाषितः ॥ २६ ॥

मुलहठी, लालचन्दन, लाख, लालकमल, रसौत, कुशमूल, वीरणमूल, वालिआरकी जड, अडूसेकी मूल, बेरकी गुठलीकी मींग, नागरमोथा, बेलगिरी, मोचरस, दारुहल्दी, धायके फूल, अशोकवृक्षकी छाल, दाख, गुडहलके फूलकी कली, आम और जामुनके कोमल पत्ते, कमलपत्र, शतावर, विदारीकन्द, रौप्यभस्म, लोहभस्म और अभ्रकभस्म इनके चूर्णको दोदो तोले और सब चूर्णसे दुगुनी मिश्री लेवे। प्रथम मिश्रीको शतावरके एक प्रस्थ रसमें डालकर मन्द मन्द अग्निसे पकावे। जब पकते पकते पाक गाढा होजाय तब उसमें उपर्युक्त औषधियोंका चूर्ण डाले, फिर शीतल होजानेपर चार तोले शहद डालकर सबको एकमएक करलेवे। श्रीमहादेवजीने इस मधुकाद्यवलेहको कथन किया है ॥ २२-२६ ॥

दुस्तरं प्रदरं हन्ति नानावर्णं सवेदनम्।
योनिशूलं कुक्षिशूलं वस्तिशूलं सुदुःसहम् ॥ २७ ॥
रक्तातिसारं रक्तार्शो रक्तपित्तं चिरोद्भवम्।
मूत्ररोगानशेषांश्च दाहं मोहं वमिं भ्रमिम् ॥
नाशयेन्नात्र सन्देहो भास्करस्तिमिरं यथा ॥ २८ ॥

यह अवलेह दुस्तर और वेदनायुक्त विविधप्रकारके प्रदर, योनिशूल, कुक्षिशूल, दुस्सह वस्तिशूल, रक्तातीसार, रक्तार्श, पुराने रक्तपित्त, मूत्रके समस्त विकार, दाह, मोह वमन और भ्रमादि सर्वप्रकारके रोगोंको इस प्रकार नष्ट कर देता है, जिस प्रकार सूर्य अन्धकारको दूर करता है इसमें कुछ भी सन्देह नहीं ॥ २७ ॥ २८ ॥

प्रदरान्तकरस।

शुद्धसूतं तथा गन्धं शुद्धवङ्गकरूप्यकम्।
खर्परं च वराटं च शाणमानं पृथक्पृथक् ॥ ३९ ॥
त्रितोलकमितं चैव लौहचूर्णं क्षिपेत्सुधीः।
कन्यानीरेण संमर्द्य दिनमेकं भिषग्वरः ॥
असाध्यं प्रदरं हन्ति भक्षणान्नात्र संशयः ॥ ४० ॥

शुद्ध पारा, शुद्ध गन्धक, शुद्ध वङ्गभस्म, रौप्यभस्म, खपरियाभस्म और कौडीकी भस्म इन सबको अलग अलग चार चार माशे और लोहेका चूर्ण तीन तोले लेवे । फिर सबको एकत्रकर घीग्वारके रसके साथ एक दिनपर्यन्त खरल करके दोदो रत्तीकी गोलियां बनालेवे । इस रसको सेवन करनेसे सर्वप्रकारका असाध्य प्रदररोग भी सन्देहरहित नष्ट होता है ॥ ३९ ॥ ४० ॥

प्रदरारिलोह ।

वत्सकस्य तुलां सम्यग् जलद्रोणे विपाचयेत् ।
अष्टभागावशिष्टं च कषायमवतारयेत् ॥ ४१ ॥
वस्त्रपूते घनीभूते द्रव्याणीमानि दापयेत् ।
समङ्गा शाल्मलं पाठा बिल्वं मुस्तं च धातकी ॥ ४२ ॥
अरुणा व्योमकं लोहं प्रत्येकं च पलं पलम् ।
कोलमात्रं प्रयुञ्जीत कुशमूलं पयो ह्यनु ॥ ४३ ॥
श्वेतं रक्तं तथा नीलं पीतं प्रदरं दुस्तरम् ।
कुक्षिशूलं कटीशूलं देहशूलं च सर्वगम् ॥ ४४ ॥
प्रदरारिरयं लौहो हन्ति रोगान्सुदुस्तरान् ।
आयुःपुत्रकरश्चैव बलवर्णाग्निवर्द्धनः ॥ ४५ ॥

कुडेकी छालको १०० पल लेकर एक द्रोण जलमें पकावे । जब पकते पकते अष्टमांश जल शेष रहजाय तब उतारकर वस्त्रमें छानलेवे । फिर उस क्वाथको दुबारा चूल्हेपर रखकर पकावे । जब पाक गाढा होजाय तब उसमें वराहक्रान्ता, मोचरस, पाढ, बलगिरी, नागरमोथा, धायके फूल, अतीस, अभ्रक और लोहा इन औषधियोंको चार चार तोले लेकर बारीक पीसकर डालदेवे और सबको एकमएक करदेवे । इसको एक तोला प्रमाण लेकर कुशाकी जडको जलमें पीसकर उस जलके साथ सेवन करे तो यह प्रदरारिलोह श्वेत, लाल, नीले और पीले दुस्तर प्रदरको तथा कुक्षिशूल, कटिशूल, सर्व शरीरगत शूल, इनके अतिरिक्त अन्यान्य दुस्तर रोगोंको शीघ्र नष्ट करता है । एवं आयु, बल, वर्ण और अग्निकी वृद्धि करता है तथा पुत्रको उत्पन्न करता है ॥ ४१-४५ ॥

सर्वाङ्गसुन्दररस ।

गगनं शोधितं ग्राह्यं पलैकमिष्टकासमम् ।
टङ्कणं स्याच्चतुर्थांशं शाणार्द्धं त्रिसुगन्धिकम् ॥ ४६ ॥

कर्पूरं नलदं चैव जातीकोषं जलं घनम् ।
नागेश्वरं लवङ्गं च कुष्ठं सत्रिफलं तथा ॥
जलेन वटिका कार्या छायया शोषयेत्तु ताम् ॥ ४७ ॥

शुद्ध अभ्रक चार तोले, सुहागेकी खील एक तोला तथा दारचीनी, इलायची, तेजपात, कपूर, खस, जावित्री, सुगन्धवाला, नागरमोथा, नागकेशर, लौंग, कूठ और त्रिफला इन प्रत्येक औषधिको दो दो माशे लेकर सबको एकत्र जलके द्वारा खरल कर गोलियाँ बनालेवे । फिर उनको छायामें सुखाकर रख लेवे ॥ ४६ ॥ ४७ ॥

प्रदरं नाशयेत्सर्वं साङ्गमर्दं सवेदनम् ।
अशीतिं वातजान्रोगान्मन्दाग्निमतिदारुणम् ॥ ४८ ॥
सज्वरग्रहणीं चैव रक्तपित्तमरोचकम् ॥
कासान्पञ्च प्रतिश्यायं श्वासं हृद्रोगमेव च ॥४९॥

इस रसको सेवन करनेसे अङ्गोंका टूटना और वेदनायुक्त सर्वप्रकारका प्रदर-रोग नष्ट होता है । यह अस्सी प्रकारके वातज रोग, मन्दाग्नि, दारुण ज्वरसहित संग्रहणी, रक्तपित्त, अरुचि, पाँच प्रकारकी खाँसी, प्रतिश्याय (जुकाम), श्वास और हृदयरोगको नष्ट करता है ॥ ४८ ॥ ४९ ॥

रत्नप्रभावटिका ।

स्वर्णमौक्तिकमभ्रं च नागं वङ्गं च पित्तलम् ।
माक्षिकं रजतं वज्रं लोहं तालं च खर्परम् ॥ ॥ ५० ॥
कदल्याः काकमाच्याश्च वासकस्योत्पलस्य च ।
स्वरसेन जयन्त्याश्च कर्पूरसलिलेन च ॥ ५१ ॥
भावयित्वा यथाशास्त्रमहोरात्रमतः परम् ।
सम्मर्द्यातन्द्रितः कुर्याद्विपगुञ्जामिता वटीः ॥ ५२ ॥

सुवर्ण, मोती, अभ्रक, सीसा, वङ्ग, पीतल, सोनामाखी, चाँदी, हीरा, लोहा, हरिताल और खपरीया इन सबकी भस्मोंको समान भाग लेकर केलेकी जड, मकोय, अडूसेकी छाल, कमल और जयन्तीके पत्ते इन सबोंके स्वरस तथा कपूरके जलमें यथाक्रम भावना देकर शास्त्रोक्त विधिसे एक दिनरात्रिपर्यन्त निरालस्य होकर उत्तम प्रकार खरल करे, फिर एक एक रत्तीकी गोलियाँ बनालेवे ॥ ५०–५२ ॥

एकैकां च प्रयुञ्जीत प्रातराशं बलाम्बुना।
उष्णेन पयसा वापि केशराजरसेन वा ॥ ९३ ॥
इयं रत्नप्रभानाम्नी वटिका सर्वसिद्धिदा।
सर्वस्त्रीरोगहन्त्री च बल्या वृष्या रसायनी ॥ ९४ ॥

इनमेंसे प्रतिदिन प्रातःकाल एक एक गोलीको खिरैंटीके काथ अथवा कुकुरभाँगरेके रस किम्वा मन्दोष्ण दूधके साथ सेवन करे। यह रत्नप्रभानामवाली वटी सम्पूर्ण सिद्धियोंको देनेवाली और स्त्रियोंके समस्त रोगोंको हरनेवाली तथा बलकारक, पुष्टिकारक और रसायन है ॥ ९३ ॥ ९४ ॥

सितकल्याणघृत।

कुमुदं पद्मकोशीरं गोधूमं रक्तशालयः।
मुद्गपर्णी पयस्या च काश्मरी मधुयष्टिका ॥ ९५ ॥
बलातिबलयोर्मूलमुत्पलं तालमस्तकम्।
विदारी शतपुत्री च शालपर्णी सजीरका ॥ ९६ ॥
फलं त्रपुषबीजानि प्रत्यग्रं कदलीफलम्।
एषामर्द्धपलान्भागान् गव्यक्षीरं चतुर्गुणम् ॥ ९७ ॥
पानीयं द्विगुणं दत्त्वा घृतप्रस्थं विपाचयेत् ॥ ९८ ॥

कमोदनीके फूल, पद्माख, खस, गेहूं, लाल शालिचावल, मुगवन, क्षीर काकोली, कुम्भेर, मुलहठी, खिरैंटी, कंघीकी जड, लालकमल, ताडका मस्तक, विदारीकन्द, शतावर, शालपर्णी, जीरा, त्रिफला, ककडीके बीज और कच्ची केलेकी फली इन सबको दो दो तोले लेकर एकत्र कूटपीसकर कल्क बनाले, फिर घृतसे चौगुना गोदुग्ध, दुगुना पानी और एक प्रस्थ घी लेवे, सबको यथाविधि एकत्र मिलाकर उत्तम प्रकारसे घृतको सिद्ध करना चाहिये ॥ ९५–९८ ॥

प्रदरे रक्तगुल्मे च रक्तपित्ते हलीमके।
बहुरूपं च यत्पित्तं कामलायां च शोणिते ॥
अरोचके ज्वरे जीर्णे पाण्डुरोगे मदे भ्रमे ॥ ९९ ॥
तरुणी चाल्पपुष्पा च या च गर्भं न विन्दति।
अहन्यहनि च स्त्रीणां भवति प्रीतिवर्द्धनम् ॥ १०० ॥

यह घृत प्रदर, रक्तगुल्म, रक्तपित्त, हलीमक, अनेक प्रकारके पित्तरोग, कामला, रक्तस्राव, अरुचि, जीर्णज्वर, पाण्डुरोग, मद और भ्रमादि रोगोंमें सेवन

करना परमोपयोगी है । जो तरुणी स्त्री अल्प पुष्पशाली होती है और गर्भको धारण नहीं करती उसके इस घृतके प्रभावसे अवश्य गर्भधारण होता है । इससे स्त्रियोंकी दिनप्रतिदिन प्रीति उत्पन्न होती है ॥ ५९ ॥ ६० ॥

न्यग्रोधाद्यघृत ।

न्यग्रोधाश्वत्थपार्थामृत–वृषकटुकाप्लक्षजम्बूपियालाः
श्योनाकोडुम्बराख्यामधुकतरुबलावेतसं केन्दुनीपौ ।
रोहीतं पीतसारं विधिविहितहतं सर्वमेषां तरूणां प्रत्येकं
वल्कलं तद्युगपलमखिलं क्षोदयित्वा भिषग्भिः ॥६१॥
क्वाथ्यं द्रोणाम्भसा तद्दृढविमलकटाहेऽत्र पादावशेषं
सर्पिः प्रस्थं च पाच्यं पचनकुशलिना मन्दमन्दानलेन ।
प्रस्थं धात्रीरसानां विधिविहितजलप्रस्थमेकं च शाले-
र्दत्वा त्र्यक्षं तु कल्कं मधुकमपि मधोः पुष्पखर्जूरदार्वी ।
जीवन्तीकाश्मरीणां फलमपि युगलं क्षीरकाकोलियुग्मं
रक्ताख्यं चंदनं यत्तदपरममलं चाञ्जनं शारिवा च ॥६२॥

बड, पीपल, अर्जुन, गिलोय, अडूसा, कुटकी, पाखर, जामुन, चिरौंजी श्योनाक, गूलर, महुआ, खिरेंटी, बेंत, कुचिला, कदम, रोहेडा और शाल इन समस्त औषधियोंकी छाल पृथक् पृथक् आठ आठ तोले लेकर सबको एकत्र कूटकर ३२ सेर जलमें पकावे । जब पकते पकते चतुर्थांश जल शेष रहजाय तब उतारकर छानलेवे । फिर उसमें घी एक प्रस्थ, आमलोंका रस एक प्रस्थ विधिपूर्वक बनाया हुआ शालिचावलोंका क्वाथ एक प्रस्थ तथा कल्कके लिये मुलहठी, महुएके फूल, पिण्डखजूर, दारुहल्दी, जीवन्ती, कुम्भेर, काकोली और क्षीरकाकोली इन चारोंके फल, लालचन्दन, सफेद चन्दन, रसौत, अनन्तमूल ये प्रत्येक औषधि तीन तीन तोले लेकर बारीक पीसकर डालदेवे । फिर पचनक्रियामें कुशल वैद्य यथाविधिसे मन्द मन्द अग्निद्वारा घृतको पकावे । जब उत्तम प्रकार पककर सिद्ध होजाय तब उसको चिकने बर्तनमें भरकर रख देवे ॥ ६१ ॥ ६२ ॥

न्यग्रोधाद्यं घृतं ह्येतद्देहं प्राप्यामृतायते ।
दुस्तरं प्रदरं हन्ति नीलं रक्तं सितासितम् ॥ ६२ ॥
योनिशूलं कुक्षिशूलं वस्तिशूलं सकुम्भदम् ।

अङ्गदाहं योनिदाहमक्षिकुक्षिभवं च यम् ॥ ६४ ॥
मन्ददृष्टिमश्रुपातं तिमिरं वातसम्भवम् ।
आध्मानानाहशूलघ्नं वातपित्तप्रकोपजित् ॥ ६५ ॥
अम्लपित्तं च पित्तं च योनिरोगं विनाशयेत् ।
दृष्टिप्रसादजननं बलवर्णाग्निकारकम् ॥ ६६ ॥

यह न्यग्रोधाद्यनामक घृत शरीरमें पहुँचकर अमृतके समान गुण करता है। तथा स्त्रियोंके दुस्तर नीलप्रदर, लालप्रदर, श्वेतप्रदर, कृष्णप्रदर, योनिशूल, कुक्षिशूल, दुस्सह वस्तिशूल, अङ्गोंकी दाह; योनिदाह, नेत्रदाह, कुक्षिदाह; दृष्टिकी हीनता, अश्रुपात, वातज तिमिररोग, आध्मान, आनाह (अफारा) शूल, वातपित्तजन्य रोग, अम्लपित्त, पित्त और योनिरोगको शीघ्र नष्ट करता है एवं दृष्टिको प्रसन्न, बल, वर्ण और अग्निकी वृद्धि करता है ॥ ५३–६६ ॥

विश्ववल्लभघृत ।

केशराजस्य निर्गुण्ड्याः शतावर्याः कुशस्य च ।
विदार्याः स्वरसेनापि च्छागेन पयसा तथा ॥ ६७ ॥
कल्कैर्दाडिमबिल्वाब्दैर्लवङ्गैलाफलत्रिकैः ।
महता पञ्चमूलेन द्राक्षाचन्दनचम्पकैः ॥ ६८ ॥
निशादारुनिशाभ्यां च वह्निना लवणैरपि ।
तोयपिष्टैः पचेत्सर्पिः पात्रे मृत्परिनिर्मिते ॥
विश्ववल्लभनामेदं घृतं स्त्रीगदसूदनम् ॥ ६९ ॥

कुकुरभाँगरा, निर्गुण्डी, शतावर, कुश और विदारीकन्द इनके स्वरस तथा बकरीके दूधको एकएक प्रस्थ लेकर सबके साथ अनारका बक्कल, बेलगिरी नागरमोथा, लौंग, इलायची, त्रिफला, बृहत्पञ्चमूल, दाख, लालचंदन, चम्पा वृक्षकी छाल, हल्दी, दारुहल्दी, चीतेकी जड और पाँचोंनमक इन सब औषधियोंको समान भाग मिश्रित एक सेर लेकर जलमें पीसकर यथाविधि मिश्रित करके घृतको पकावे। जब अच्छे प्रकारसे पकजाय तब मिट्टीके उत्तम पात्रमें भरकर रखदेवे। यह विश्ववल्लभनामक घृत स्त्रियोंके सब रोगोंको नष्ट करता है ॥

अशोकघृत ।

अशोकवल्कलं प्रस्थं तोयाढकविपाचितम् ।
पादस्थेन घृतप्रस्थं जीरकक्काथसंयुतम् ॥ ७० ॥

तण्डुलाम्बु त्वजाक्षीरं घृततुल्यं प्रदापयेत् ।
तथैव केशराजस्य प्रस्थमेकं भिषग्वरः ॥ ७१ ॥
जीवनीयैः पियालैस्तु परूषैः सरसाञ्जनैः ।
यष्ट्याह्वाशोकमूलं च मृद्वीका च शतावरी ॥ ७२ ॥
तण्डुलीयकमूलं च कल्कैरेभिः पलार्द्धकैः ।
शर्करायाः पलान्यष्टौ सिद्धशीते प्रदापयेत् ॥ ७३ ॥

अशोककी छालको एक प्रस्थ लेकर एक आढक जलमें पकावे । जब पकते हुए चौथाई भाग जल बाकी रहजाय तब उतारकर छानलेवे । फिर उस क्वाथके साथ घी एक प्रस्थ, जीरेका क्वाथ एक प्रस्थ, चावलोंका जल एक प्रस्थ, बकरीका दूध एक प्रस्थ और कुकुरभाँगरेका रस एक प्रस्थ तथा जीवनीयगणकी औषधियें, चिरौंजी, फालसे, रसौत, मुलहठी, अशोककी जडकी छाल, दाख शतावर और चौलाईकी जड इन सब औषधियोंके दो दो तोले कल्कको मिलाकर यथारीति घृत को पकावे । जब अच्छे प्रकार पककर सिद्ध होजाय तब नीचे उतारकर शीतल होजानेपर उसमें ८ पल चीनी मिलादेवे ॥ ७०-७३ ॥

पीतमेतद् घृतं हन्ति सर्वदोषसमुद्भवम् ।
श्वेतं नीलं तथा कृष्णं प्रदरं हन्ति दुस्तरम् ॥ ७४ ॥
कुक्षिशूलं कटीशूलं योनिशूलं च सर्वगम् ।
मन्दाग्निमरुचिं पाण्डुं कृशतां श्वासकासकम् ॥ ७५ ॥
आयुःपुष्टिकरं बल्यं बलवर्णप्रसादनम् ।
देयमेतत्परं सर्पिर्विष्णुना परिकीर्त्तितम् ॥ ७६ ॥

इस घृतको पीतेही सम्पूर्ण दोषोंसे उत्पन्न हुआ श्वेतप्रदर नीलप्रदर तथा दुस्तर कृष्णप्रदर नष्ट होता है । यह घृत कुक्षिशूल, कटिशूल, सर्व प्रकारके योनिशूल, मन्दाग्नि, अरुचि, पाण्डुरोग कृशता, श्वास, खाँसी प्रभृति विकारोंको नष्ट करता है । एवं आयुवर्धक, पुष्टिकारक, बल और वर्णको उत्पन्न करनेवाला है । इस घृत- को श्रीविष्णुभगवान्ने रचा है ॥ ७४-७६ ॥

अशोकारिष्ट ।

अशोकस्य तुलामेकां चतुर्द्रोणे जले पचेत् ।
पादशेषे रसे पूते शीते पलशतद्वयम् ॥ ७७ ॥
दद्याद् गुडस्य धातक्याः पलषोडशिकं मतम् ।
अजाजीं मुस्तकं शुण्ठीं दार्व्युत्पलफलत्रिकम् ॥ ७८ ॥

आम्रास्थि जीरकं वासां चन्दनं च विनिक्षिपेत् ।
चूर्णयित्वा पलांशेन ततो भाण्डे निधापयेत् ॥ ७९ ॥
मासादूर्द्ध्वं च पीत्वैनमसृग्दररुजां जयेत् ।
ज्वरं च रक्तपित्तार्शो मन्दाग्नित्वमरोचकम् ॥
मेहशोथारुचिहरस्त्वशोकारिष्टसंज्ञितः ॥ ८० ॥

अशोककी छालको १०० पल लेकर चार द्रोण (१२८ सेर) जलमें पकावे। जब पकते २ एक द्रोण (३२ सेर) जल शेष रहजाय तब उतारकर छानलेवे। फिर उस क्वाथमें शीतल होजानेपर २०० पल गुड़, धायके फूल ६४ तोले एवं काला जीरा, नागरमोथा, सोंठ, दारुहल्दी, लालकमलकी जड़, त्रिफला, आमकी गुठलीकी गिरी, जीरा, अडूसा और लालचन्दन इन सबको एक एक तोला लेकर और एकत्र कूटपीसकर डालदेवे। फिर उस पात्रके मुखको बन्द करके रखदेवे। एक महीनेके बाद उसको निकालकर और छानकर उपयुक्त मात्रासे दिनमें दो तीन बार पान करे तो यह अशोकारिष्ट सर्व प्रकारके प्रदररोग, ज्वर, रक्तपित्त, बवासीर मन्दाग्नि, अरुचि, प्रमेह, सूजन और इनके अतिरिक्त अन्यान्य सर्व प्रकारके रोगोंको शीघ्र हरता है ॥ ७७-८० ॥

प्रदरमें पथ्यापथ्यविधि।

यत्पथ्यं यदपथ्यं च रक्तपित्तेषु कीर्त्तितम् ।
प्रदरेऽपि यथादोषं तत्तन्नारी भजेत्त्यजेत् ॥ ८१ ॥

रक्तपित्तरोगमें जो पथ्यपदार्थ वर्णन किये हैं उनको स्त्री प्रदररोगमें दोषानुसार सेवन करे और जो उक्तरोगमें अपथ्य कहे गये हैं उन सबको प्रदररोगमें भी त्यागदेवे ॥ ८१ ॥

इति भैषज्यरत्नावल्यां प्रदररोगचिकित्सा।

योनिव्यापद्की चिकित्सा।

योनिव्यापत्सु भूयिष्ठं शस्यते कर्म वातजित् ।
वस्त्यभ्यङ्गपरीषेकप्रलेपाः पिचुधारणम् ॥ १ ॥

योनिव्यापद्रोगमें वायुनाशक शीतलक्रिया तथा वस्तिक्रिया, तेलादिकी मालिश, सेचन, प्रलेप और पिचु (फोया) धारणादि उपचार करे ॥ १ ॥

वचोपकुञ्चिकाजाजीकृष्णावृषकसैन्धवम् ।
अजमोदां यवक्षारं चित्रकं शर्करान्वितम् ॥ २ ॥
पिष्ट्वा प्रसन्नयाऽऽलोड्य खादेत्तद् घृतभर्जितम् ।
योनिव्यापत्तिहृद्रोगगुल्मार्शोविनिवृत्तये ॥ ३ ॥

वच, कालाजीरा, जीरा, पीपल, अडूसा, सैंधानमक, अजमोद, जवाखार, चीतेकी जड इन सबको समान भाग लेकर बारीक पीसलेवे । फिर उस चूर्णको घीमें भूनकर खाँड और सुराके मंडके साथ मिलाकर भक्षण करे । इससे योनिव्यापद्रोग, हृदयरोग, गुल्म और अर्शादिरोग नष्ट होते हैं ॥ २ ॥ ३ ॥

गुडूचीत्रिफलादन्तीक्वाथैश्च परिषेचनम् ।
नतवार्त्ताकिनीकुष्ठसैन्धवामरदारुभिः ॥
तैलात्प्रसाधिताद्धार्यः पिचुर्योनौ रुजापहः ॥ ४ ॥

गिलोय, त्रिफला और दन्ती इनके क्वाथसे योनिको सिञ्चन करे । एवं तगर बडीकटेरी, कूठ, सैंधानमक और देवदारु इन सब औषधियोंके द्वारा तेल पकाकर उसमें फोया भिजोकर योनिमें रक्खे तो योनिव्यापदोग दूर होय ॥ ४ ॥

पित्तलानां तु योनीनां सेकाभ्यङ्गपिचुक्रियाः ।
शीताः पित्तहराः कार्याः स्नेहनार्थं घृतानि च ॥ ५ ॥

पित्तलानामक योनिव्यापद्रोगमें योनिपर सेचन, तैलादिकी मालिश, फोया रखना, घृतादि स्नेहद्रव्योंका प्रयोग और पित्तनाशक शीतल क्रिया करे ॥ ५ ॥

योन्यां बलासदुष्टायां सर्वं रूक्षोष्णमौषधम् ।
पिप्पल्या मरिचैर्माषैः शताह्वाकुष्ठसैन्धवैः ॥
वर्त्तिस्तुल्या प्रदेशिन्या धार्या योनिविशोधिनी ॥ ६ ॥

कफजनित योनिव्यापद्रोगमें सर्वप्रकारकी रूखी और गरम औषधियाँ उपयोग करे । पीपल, कालीमिरच, उडद, सोया, कूठ, सैंधानोन इन सबको एकत्र पीसकर तर्जनी अंगुलीकी समान बत्ती बनाकर योनिमें रक्खे । यह बत्ती योनिको शुद्ध करती है ॥ ६ ॥

हिंस्राकल्कस्य वातार्त्तां कोष्णमभ्यज्य धारयेत् ।
पञ्चवल्कस्य पित्तार्ता श्यामादीनां कफोत्तरा ॥ ७ ॥

वातज योनिव्यापद्रोगमें कटेरीकी जडको पीसकर उसकी बत्ती बनाकर कुछ एक गरम करके योनिमें रक्खे । इसीप्रकार पित्तज योनिमें वडादि पाँचों वृक्षोंकी

छालकी बत्ती और कफज योनिरोगमें श्यामालतादिकी बत्ती बनाकर योनिमें धारण करे तो विशेषोपकार होता है ॥ ७ ॥

मूषिकामांससंयुक्तं तैलमातपभावितम् ।
अभ्यङ्गाद्धन्ति योन्यर्शः स्वेदस्तन्मांससैन्धवैः ॥ ८ ॥

चूहेके मांसको ८ तोले लेकर उसके साथ आध सेर तिलके तेलको धूपमें रखकर ७ दिनतक पकावे । फिर उस तेलको योनिमें मले तो योन्यर्शरोग दूर होता है । एवं चूहेके मांस और सैंधानमकको एक जगह पकाकर अण्डके पत्तेपर रखकर योनिमें स्थापन करके स्वेद प्रदान करे ॥ ८ ॥

गोपित्ते मत्स्यपित्ते वा क्षौमं सप्ताहभावितम् ।
मधुना किण्वचूर्णं वा दद्यादचरणापहम् ॥ ९ ॥

रेशमके टुकडेको गौके पित्तमें अथवा मछलीके पित्तमें ७ दिनतक भावना देकर योनिके मध्यमें प्रवेश करे अथवा सुराबीजके चूर्णको शहदमें मिलाकर योनिमें लगावे तो अचरणानामक योनिरोग नष्ट होता है ॥ ९ ॥

वामिन्याः पुतियोन्याश्च कर्त्तव्यः स्वेदनोऽपि वा ।
क्रमः कार्यस्ततः स्नेहः पिचुभिस्तर्पणं भवेत् ॥
स्रोतसां शोधनं कण्डूक्लेदशोथहरं च तत् ॥ १० ॥

वामिनी और पुतियोनिरोगमें स्वेद देवे और तेलमें भिजोकर रुईका फोया रक्खे । इससे स्रोतोंकी शुद्धि होती है तथा खुजली, क्लेद, सूजन दूर होती है ॥ १० ॥

शल्लकीजिङ्गिनीजम्बूधवत्वक्पञ्चपल्लवैः ।
कषायैः साधितः स्नेहः पिचुः स्याद्विप्लुतापहः ॥ ११ ॥

शालईवृक्ष, जिङ्गिनीवृक्ष, जामुन और धौवृक्ष इनकी छाल एवं आम, जामुन, कैथ, जम्बीरी नींबू और बेंत इनके पत्ते समान भाग लेवे । इन सबके क्वाथके साथ तेल पकाकर उसमें रुईके फोयेको भिजोकर योनिमें रक्खे तो विप्लुतरोग नष्ट होता है ॥ ११ ॥

कर्णिन्यां वर्त्तिका कुष्ठपिप्पल्यर्काग्रसैन्धवैः ।
बस्तमूत्रकृता धार्या सर्वं च कफनुद्धितम् ॥ १२ ॥

कर्णिनीरोगमें कूठ, पीपल, आकके पत्ते और सैंधानमक इन सबको बकरीके मूत्रमें पीसकर बत्ती बनाकर उस बत्तीको योनिमें धारण करना और सर्वप्रकारकी कफनाशक चिकित्सा करना हितकारी है ॥ १२ ॥

त्रैवृतं स्नेहनं स्वेद उदावर्त्तानिलार्त्तिषु ।
तदेव च महायोन्यां स्रस्तायां च विधीयते ॥ १३ ॥

उदावर्त्त और वातज योनिरोगमें निसोतके चूर्णको तेलादि स्नेहद्रव्योंके साथ मिलाकर लगावे और स्वेदप्रदान करे । इसीप्रकार महायोनि और स्रस्तायोनिमेंभी क्रिया करना श्रेष्ठ है ॥ १३ ॥

आखोर्मांसं सपदि बहुधा खण्डखण्डीकृतं तत्
तैले पाच्यं भवति नियतं यावदेतन्न सम्यक् ।
तत्तैलाक्तं वमनमनिशं योनिभागे दधाना
हन्ति व्रीडाकरभगफलं नात्र सन्देहबुद्धिः ॥ १४ ॥

चूहेके मांसके टुकडे टुकडे करके उसके द्वारा तिलके तेलको पकावे । उस तेलमें फोयेको भिजोकर योनिमें रखनेसे योनिकन्दरोग नष्ट होता है । इसमें किञ्चिन्मात्रभी सन्देह नहीं है ॥ १४ ॥

शतपुष्पातैललेपात्तुवरीदलजात्तथा ।
पेटिकामूललेपेन योनिर्भिन्ना प्रशाम्यति ॥ १५ ॥

सोयेको तेलमें खरलकर लेप करनेसे अथवा अडहरके पत्तोंको किंवा पेटारिवृक्षकी जडको जलमें पीसकर लेप करनेसे विदीर्णयोनि फिर जुड जाती है ॥

मुषवीमूललेपेन प्रविष्टा तु बहिर्भवेत् ।
योनिर्मूषवसाभ्यङ्गान्निःसृता प्रविशेदपि ॥ १६ ॥

करेलेकी जडको पीसकर लेप करनेसे भीतरको प्रविष्टहुई योनि बाहरको निकल आतीहै और चूहेकी चर्बीकी मालिश करनेसे बाहरको निकलीहुई योनि भीतरको प्रवेश करजाती है ॥ १६ ॥

लोध्रतुम्बीफलालेपो योनेर्दार्ढ्यं करोति च ।
वेतसमूलनिःक्वाथक्षालनेन तथैव च ॥
मूषिकावल्गुलीवसाम्रक्षणं योनिदार्ढ्यदम् ॥ १७ ॥

लोध और कडवी तोरई इनको बराबर भाग लेकर एकत्र पीसकर योनिमें लेप करे अथवा बेतकी छालके क्वाथसे योनिको सिञ्चन करे किंवा चूहे या पिद्दकी चर्बीको योनिपर मले तो शिथिलयोनि दृढ होजाती है ॥ १७ ॥

वचा नीलोत्पलं कुष्ठं मरिचानि तथैव च ।
अश्वगन्धा हरिद्रा च दृढीकरणमुत्तमम् ॥ १८ ॥

वच, नीलकमल, कूठ, कालीमिरच, असगन्ध और हल्दी इनको एकत्र पीसकर लेप करनेसेभी योनि दृढ होती है ॥ १८ ॥

पलाशोडुम्बरफलं तिलतैलसमन्वितम्।
मधुना योनिमालिप्य दृढीकरणमुत्तमम् ॥ १९ ॥

ढाकके बीज, गूलर, तिलका तेल और शहद इनको पीसकर लेप करना उत्तम दृढीकरणयोग है ॥ १९ ॥

मदनफलमधुकर्पूरप्रपूरितं कामिनीजनस्य।
चिरगलितयौवनस्य वराङ्गमतिगाढं सुकुमारम् ॥२०॥

मैनफल, शहद और कपूर इनको एकत्र पीसकर स्त्रियोंकी योनिमें लगानेसे बहुत दिनोंसे शिथिलहुई और यौवनरहित योनि अत्यन्त दृढ, कोमल होतीहै ॥ २० ॥

पञ्चपल्लवयष्ट्याह्वमालतीकुसुमैर्घृतम्।
रविपक्वमन्यथा वा योनिगन्धनिवारणम् ॥ २१ ॥

आम, जामुन, कैथ, जम्बीरीनीम्बू और बेल इनके पत्ते तथा मुलहठी और चमेलीके पत्ते इनके कल्कद्वारा धूपमें अथवा अग्निमें घृतको पकाकर योनिमें मलनेसे योनिकी दुर्गन्ध दूर होती है ॥ २१ ॥

सुतनुं करोति मध्यं पीतं मथितेन माधवीमूलम् ॥

माधवीलताकी जडको जलमें पीसकर पान करनेसे स्त्रियोंके शरीरका मध्यभाग क्षीण होकर सुन्दर शरीर होजाताहै ॥

स्याच्छिथिलापि च दृढा सुरगोपाज्याभ्यक्तो योनिः॥२२

वीरबहूटीनामक कीडेको घृतके साथ पीसकर लेप करनेसे शिथिलयोनि दृढ होजातीहै ॥ २२ ॥

वेतसस्य तु मूलानि क्वाथयेन्मृदुनाऽग्निना।
भगं प्रक्षालितं तेन गाढत्वमुपजायते ॥ २३ ॥

बेंतकी जडके क्वाथको मन्दमन्द अग्निसे पकाकर उसके द्वारा योनिको सींचे तो योनिमें दृढता उत्पन्न होती है ॥ २३ ॥

रजःप्रवर्त्तक योग।

इक्ष्वाकुबीजदन्तीचपलागुडमदनफलकिण्वयष्ट्याह्वैः।
सस्नुक्क्षीरैर्वर्त्तिर्योनिगता कुसुमसंजननी ॥ २४ ॥

कडवी तोरईके बीज, दन्तीकी जड, पीपल, गुड, मैनफल, सुराबीज और मुलहठी इनके चूर्णको समान भाग लेकर थूहरके दूधमें सबको अच्छेप्रकार खरल करके बत्ती बनालेवे । उस बत्तीको योनिमें रखनेसे ऋतुधर्म उत्पन्न होता है ॥

सकाञ्जिकं जवापुष्पं भृष्टं ज्योतिष्मतीदलम् ।
दूर्वापिष्टं च सम्प्राश्य वनिता त्वार्त्तवं लभेत् ॥ २५ ॥

गुडहलके फूलोंको काँजीमें पीसकर अथवा, मालकाङ्गनीके पत्तोंको काँजीमें भूनकर या केवल दूबको चावलोंके जलद्वारा पीसकर उसके बडे बनाकर खानेसे स्त्री आर्त्तव (रजोधर्म) को प्राप्त होती है ॥ २५ ॥

पीतं ज्योतिष्मतीपुष्पस्वर्जिकोग्रासनं त्र्यहम् ।
पीतेन पयसा पिष्टं कुसुमं जनयेद् ध्रुवम् ॥ २६ ॥

मालकाङ्गनीके फूल, सज्जी, वच और विजयसार इन सबको दूधमें पीसकर तीन दिनतक सेवन करनेसे निश्चय रजोत्पत्ति होती है ॥ २६ ॥

रजःप्रवर्त्तिनीवटी ।

टङ्कणं हिङ्गु कासीसं कन्यासारं समांशकम् ।
कुमारीस्वरसेनैव चणकप्रमिता वटी ॥ २७ ॥
रजोरोधं कष्टरजो वेदनाश्च तदुद्भवाः ।
रजःप्रवर्त्तिनी नाम वटी चूर्णं विनाशयेत् ॥
भाषिता नीलकण्ठेन वह्निः काष्ठचयं यथा ॥ २८ ॥

सुहागा, हींग, हीराकसीस और वनककोडा इनको समान भाग लेकर घीग्वारके रसमें खरल करके चनेकी बराबर गोलियाँ बनालेवे । इस रजःप्रवर्त्तिनी नाम वटीके सेवन करनेसे अथवा उक्त द्रव्योंके चूर्णको सेवन करनेसे रजका रुकना, कष्टसे रजका होना और उसके द्वारा पीडा होनी दूर होती है । इसको श्रीशिवजीने कहा है । यह वटी जिस प्रकार अग्नि काष्ठके समूहको तत्क्षण नष्ट करदेता है इसी प्रकार रजोदोषको तत्काल दूर करदेती है ॥ २७ ॥ २८ ॥

गर्भाजनक-भेषज ।

पिप्पलीविडङ्गटङ्कणसमचूर्णं या पिबेत्पयसा ।
ऋतुसमये न हि तस्या गर्भः सञ्जायते क्वापि ॥ २९ ॥

पीपल वायविडङ्ग और सुहागा इनके चूर्णको समान भाग लेकर दूधमें पीसकर ऋतुकालमें पान करनेसे कदापि गर्भोत्पत्ति नहीं होती ॥ २९ ॥

आरनालपरिपेषितं त्र्यहं या जवाकुसुममत्ति पुष्पिणी ।
सत्पुराणगुडमुष्टिसेविनी सन्दधाति न हि गर्भमङ्गना ॥ ३० ॥

ऋतुमती स्त्री गुडहलके फूलोंको काँजीमें पीसकर और पुराने गुडमें मिलाकर तीन दिनतक सेवन करे तो उसके कभी भी गर्भधारण नहीं होता ॥ ३० ॥

पाठापत्रमृतुस्नाता पीत्वा गर्भं न धारयेत् ॥

रजस्वला स्त्री स्नान करके पाढके पत्तोंको जलमें पीसकर पान करे तो गर्भस्थिति नहीं होती ॥

धात्र्यर्ज्जुनाभयाचूर्णं तोयपीतं रजो हरेत् ।
शेलुच्छदमिश्रपिष्टभक्षणं च तदर्थकृत् ॥ ३१ ॥

आमले, अर्जुनकी छाल, और हरड इनके समान भाग मिश्रित चूर्णको जलके साथ ऋतुकालमें सेवन करनेसे अथवा लहसौडेके पत्तोंको मिलाकर उक्त औषधियोंके बडे बनाकर खानेसे आर्त्तवका होना बन्द होता है और गर्भको धारण करनेकी शक्ति नष्ट होजाती है ॥ ३१ ॥

रसाञ्जनं हैमवतीवयःस्थाचूर्णीकृतं शीतजलेन पीतम् ।
रजोविनाशं नियतं करोति शङ्का च का गर्भसमागमस्य ॥

रसौत, हरड और आमले इनको एकत्र पीसकर शीतल जलके साथ पान करनेसे स्त्रियोंके नियमित समयमें होनेवाला ऋतु बन्द होजाता है । फिर गर्भोत्पत्ति होनेकी और सम्भावना क्या है ? ॥ ३२ ॥

नष्टपुष्पान्तकरस ।

रसेन्द्रगन्धकं लौहं वङ्गं सौभाग्यमेव च ।
रजतश्चाभ्रताम्रं च प्रत्येकं च पलं पलम् ॥ ३३ ॥
गुडूची त्रिफला दन्ती शेफाली कण्टकारिका ।
दारुसैन्धवकुष्ठं च बृहती काकमाचिका ॥ ३४ ॥
नतं तालीशवेत्राग्रं श्वदंष्ट्रा वृषकं बला ।
एतेषां स्वरसैर्भाव्यं त्रिवारं च पृथक् पृथक् ॥ ३५ ॥
जीवन्तीं मधुकं दन्तीं लवङ्गं वंशलोचनम् ।
रास्नां गोक्षुरबीजं च शाणमानं विचूर्णयेत् ॥ ३६ ॥
सर्वमेकीकृतं पेष्यं जयन्तीतुलसीरसैः ।
मर्दयित्वा वटीं कुर्यान्नष्टपुष्पकयोषिते ॥ ३७ ॥

नष्टपुष्पे नष्टशुक्रे योनिशूले च शस्यते ।
ऋतुकाले क्लेदयोन्यां विशेषे चाममारुते ॥
एतान्रोगान्निहन्त्याशु भास्करस्तिमिरं यथा ॥ ३८ ॥

शुद्धपारा, शुद्धगन्धक, लोहा, वङ्ग, सुहागा, चाँदी, अभ्रक और ताँबा इन प्रत्येक द्रव्यको चारचार तोले लेकर गिलोय, त्रिफला, दन्तीकी जड, नील सिंझालु, कटेरी, देवदारु, सेंधानमक, कूठ, बडीकटेरी, मकोय, तगर, तालीशपत्र, बेंतकी कोंपल, गोखुरू, अडूसा और खिरेंटी इन सबके स्वरस अथवा काथमें तीनतीन वार अलग अलग क्रमपूर्वक भावना देवे । पश्चात् जीवन्ती, मुलहठी, दन्ती, लौंग, वंशलोचन, रास्ना और गोखुरूके बीज इनको चारचार माशे लेकर चूर्ण करले और सबको एकत्र मिलाकर जयन्ती और तुलसीके रसमें उत्तमप्रकार खरलकर गोलियाँ बनालेवे । फिर इस रसको स्त्रियोंके रजके नष्ट होनेपर, वीर्य्यके नष्ट होजानेपर, योनिशूल, ऋतुकालगत शूल, क्लेदयुक्त योनि और आमवातरोगमें प्रयोग करना चाहिये । यह रस इन समस्त रोगोंको इसप्रकार नष्ट करदेता है जिसप्रकार सूर्य अन्धकारसमूहको ॥ ३३-३८ ॥

फलघृत ।

त्रिफलां द्वे सहचरे गुडूचीं सपुनर्नवाम् ।
शुकनासां हरिद्रे द्वे रास्नां मेदां शतावरीम् ॥ ३९ ॥
कल्कीकृत्य घृतप्रस्थं पचेत्क्षीरचतुर्गुणम् ।
तत्सिद्धं प्रपिबेन्नारी योनिशूलनिपीडिता ॥ ४० ॥

त्रिफला, नीलापियाबाँसा, पीलापियाबाँसा, गिलोय, पुनर्नवा, शोनापाठ, हलदी, दारुहलदी, रास्ना, मेदा और शतावर ये प्रत्येक दो दो तोले लेकर एकत्र पीसलेवे । फिर उस कल्कके सहयोगसे एक प्रस्थ घृतको चौगुने दूधमें पकावे । जब अच्छे प्रकार सिद्ध होजाय तब उस घृतको योनिशूलसे पीडित स्त्री पान करे ॥३९॥४०॥

पिण्डिता चलिता या च निःसृता विवृता च या ।
पित्तयोनिश्च विस्रस्ता षण्ढयोनिश्च या स्मृता ॥ ४१ ॥
प्रपद्यन्ते तु ताः स्थानं गर्भं गृह्णन्ति चासकृत् ।
एतत्फलघृतं नाम योनिदोषहरं परम् ॥ ४२ ॥

इससे पिण्डाकार, चलायमान, बाहरको निकली हुई, भीतरको प्रविष्टहुई योनि, पित्तजयोनि, विस्रस्ता और षण्ढयोनि ये सर्वप्रकारकी योनियें यथास्थानको

प्राप्त होती हैं और गर्भको शीघ्र धारण करती हैं। यह फलघृत अल्पकालमेंही सर्वप्रकारके योनिके दोषोंको हरण करता है ॥ ४१ ॥ ४२ ॥

फलकल्याणघृत।

जीरकाद्यमोदक।

जीरकस्य पलान्यष्टौ शुण्ठी धान्यं पलत्रयम्।
शतपुष्पा यमानी च कृष्णजीरं पलं पलम् ॥ ५९ ॥
क्षीरद्विप्रस्थसंयुक्तं खण्डस्यार्द्धशतं पलम्।
घृतस्यापि पलान्यष्टौ शनैर्मृद्वग्निना पचेत् ॥ ६० ॥

जीरा ८ पल, सोंठ ३ पल, धनियाँ ३ पल तथा सोया, अजवायन और कालाजीरा प्रत्येक चार चार तोले, दूध २ प्रस्थ, खाँड ५० पल और घी ८ पल लेवे, सबको विधिपूर्वक एकत्र मिलाकर मन्दमन्द अग्निसे पकावे ॥ ५९-६० ॥

व्योषं त्रिजातकं चैव विडङ्गं चव्यचित्रकम्।
मुस्तकं च लवङ्गं च पलांशं संप्रकल्पयेत् ॥ ६१ ॥
मन्देन वह्निना पक्त्वा मोदकं कारयेद्भिषक्।
सर्वयोषिद्विकाराणां नाशनं वह्निदीपनम् ॥
सूतिकारोगशमनं विशेषाद्ग्रहणीहरम् ॥ ६२ ॥

जब पकते पकते पाक गाढा होजाय तब उसमें सोंठ, मिरच, पीपल, दारचीनी, इलायची, तेजपात, वायविडङ्ग, चव्य, चीता, नागरमोथा और लौंग इनके बारीक चूर्णको चार चार तोले परिमाण डालदेवे और मृदु अग्निसे पकाकर लड्डू बनालेवे। यह मोदक स्त्रियोंके सब रोगोंको नष्ट करते हैं और अग्निको प्रदीप्त करते हैं। विशेषकर सूतिकारोग और संग्रहणी रोगको हरनेवाले हैं ॥

सूतिकाविनोदरस।

रसगन्धकतुत्थं च त्र्यहं जम्बीरमर्दितम्।
त्रिर्भावितं त्रिकटुना देयं गुञ्जाचतुष्टयम् ॥
गर्भिण्याः शूलविष्टम्भज्वराजीर्णेषु योजयेत् ॥ ६३ ॥

शुद्ध पारा, शुद्ध गन्धक और तूतिया इनको समान भाग लेकर तीन दिनतक जम्बीरीनींबूके रसमें खरल करके त्रिकुटके क्वाथमें तीन बार भावना देवे। पश्चात् चार चार रत्तीकी गोलियाँ बनाकर गर्भिणीस्त्रीके उल्लिखितरोगोंमें प्रयोग करे। यह रस शूल, विष्टम्भ, ज्वर और अजीर्णादिरोगोंमें परमोपयोगी है ॥ ६३ ॥

बृहत्सूतिकाविनोदरस।

शुण्ठ्या भागो भवेदेको द्वौ भागौ मरिचस्य च।
पिप्पल्याः स्यात्त्रिभागं च अर्द्धभागं च व्योमकम् ॥६४॥
जातीकोषस्य भागौ द्वौ द्वौ भागौ तुत्थकस्य च।
सिन्धुवारजलेनैव मर्दयेदेकयामतः ॥
मधुना सह भोक्तव्यः सूतिकातङ्कनाशनः ॥ ६५ ॥

सोंठ १ भाग, मिरच २ भाग, पीपल ३ भाग, अभ्रक आधाभाग, जावित्री दो भाग और तूतिया दो भाग इन सबको एकत्र कर सिह्मालूके रस अथवा क्वाथसे एक प्रहरतक खरल करे। फिर इस रसको दो रत्ती प्रमाण ले शहदमें मिलाकर भक्षण करे तो प्रसूताके सर्व रोग नष्ट होते हैं ॥ ६४ ॥ ६५ ॥

सूतिकारिरस।

रसगन्धककृष्णाभ्रं तदर्द्धं ताम्रभस्मकम्।
चूर्णितं मर्दयेद्यत्नाद्भेकपर्णीरसेन च ॥ ६६ ॥
छायाशुष्का गुडी कार्या कलायसदृशी ततः।
मात्रया कटुना देया सूतिकातङ्कनाशिनी ॥
ज्वरतृष्णारुचिहरी शोथघ्नी वह्निदीपनी ॥ ६७ ॥

शुद्ध पारा, गन्धक और काली अभ्रक ये प्रत्येक एक एक तोला और ताम्रभस्म छः माशे लेवे। फिर सबको एकत्र कर मण्डूकपर्णीके रसद्वारा यत्नपूर्वक खरल करे और छायामें सुखाकर मटरकी बराबर सुन्दर गोलियाँ बनालेवे। प्रतिदिन एक एक गोली अदरखके साथ खानेसे प्रसूतिरोग नष्ट होता है तथा ज्वर, तृषा, अरुचि और शोथ दूर होता है, अग्नि दीपन होती है ॥६६॥६७॥

सूतिकाघ्नरस।

रसगन्धकलौहाभ्रं जातीकोषं सुवर्णकम्।
समांशं मर्दयेत्खल्वे छागीदुग्धेन पेषयेत् ॥ ६८ ॥
गुञ्जाद्वयप्रमाणेन वटिकां कुरु यत्नतः।
ज्वरातीसाररोगघ्नः सूतिकातङ्कनाशनः ॥
सूतिकाघ्नो रसो नाम ब्रह्मणा परिकीर्त्तितः ॥ ६९ ॥

शोधित पारा, गन्धक, लोहा, अभ्रक, जावित्री और धतूरेके बीज इन सबको समान भाग लेकर बकरीके दूधके साथ उत्तम प्रकारसे खरल करे। फिर दो दो

रचीकी गोलियाँ बनाकर सेवन करे तो ज्वर, अतीसार और सूतिकारोग नष्ट होता है। इस सूतिकाघ्न रसको ब्रह्माजीने कथन किया है ॥ ६८ ॥ ६९ ॥

सूतिकाहररस।

लवङ्गं रसगन्धौ च यवक्षारं तथाऽभ्रकम् ।
लौहं ताम्रं सीसकं च पलमानं समाहरेत् ॥ ७० ॥
जातीफलं केशराजं वरैला भृङ्गमुस्तकम् ।
धातकीन्द्रयवं पाठा शृङ्गी बिल्वं च वालकम् ॥ ७१ ॥
कर्षमानं च सञ्चूर्ण्य सर्वमेकत्र कारयेत् ।
बदरास्थिप्रमाणेन वटिकां कारयेद्भिषक् ॥ ७२ ॥
गन्धालिकापत्ररसैरनुपानं प्रदापयेत् ।
सर्वातीसारहरणः सर्वशूलनिवारणः ॥
सूतिकाहरनामाऽयंसूतिकां नाशयेद् ध्रुवम् ॥ ७३ ॥

लौंग, शुद्ध पारा, गन्धक, जवाखार, अभ्रक, लोहा, तांबा और सीसा ये प्रत्येक चार चार तोले लेवे तथा जायफल, कुकुरभाँगरा, त्रिफला, इलायची, भाँगरा, नागरमोथा, धायके फूल, इन्द्रजौ, पाढ काकडासिंगी, बेलगिरी और सुगन्धवाला ये औषधियाँ दो दो तोले ले सबको कूट पीसकर और जलमें खरल कर इनकी बेर की गुठलीकी बराबर गोलियाँ बनालेवे। फिर प्रतिदिन पसरनके रसके साथ एक एक गोली सेवन करे तो सर्वप्रकारका अतीसार और सर्वशूल नष्ट होते हैं। यह रस सूतिकारोगको तो निश्चय नष्ट करता है ॥ ७०–७३ ॥

रसशार्दूल।

अभ्रं ताम्रं तथा लौहं राजपट्टं रसं तथा ।
गन्धटङ्कमरीचं च यवक्षारं समांशकम् ॥ ७४ ॥
तथाऽत्र तालकं चैव त्रिफलायाश्च तोलकम् ।
तोलकं चामृतं चैव षड्गुञ्जाप्रमिता वटी ॥ ७५ ॥
ग्रीष्मसुन्दरकस्यापि नागवल्लीरसेन च ।
भावयेत्सप्तधा हन्ति ज्वरंकासाङ्गसंग्रहम् ॥
सूतिकातङ्कशोथादिस्त्रीरोगं च विनाशयेत् ॥ ७६ ॥

अभ्रक, ताँबा, लोहा, चुम्बकपत्थर, पारा, गन्धक, सुहागा, मिरच, जवाखार, हरिताल, त्रिफला और शुद्ध मीठातेलिया ये प्रत्येक एक एक तोला लेवे।

फिर सबको गूमाशाकके रस और पानके रसमें यथाक्रम सातबार भावना देवे। अनन्तर छः छः रत्तीकी गोलियाँ बनालेवे । यह रसशार्दूल ज्वर, खाँसी, शरीरपीडा प्रसूत और सूजन आदि स्त्रियोंके सर्वप्रकारके रोगोंको नष्ट करता है ॥

महारसशार्दूल ।

अभ्रकं पुटितं ताम्रं स्वर्णं गन्धं च पारदम् ।
शिला टङ्कं यवक्षारं त्रिफलायाः पलं पलम् ॥ ७७ ॥
गरलस्य तथा शाह्ममर्द्धतोलकसंमितम्
त्वगेला पत्रकं चैव जातिकोषलवङ्गकम् ॥ ७८ ॥
मांसी तालीशपत्रं च माक्षिकं च रसाञ्जनम् ।
एषां द्विकार्षिकं भागं देयं चापि विचक्षणैः ॥ ७९ ॥
द्रवे किञ्चित्स्थिते चूर्णं मरिचस्य पलं क्षिपेत् ।
भावना च प्रदातव्या पूर्वोक्तेन रसेन च ॥ ८० ॥
निहन्ति विविधान्रोगाञ्ज्वरं दाहान्वमिं भ्रमिम् ।
तथाऽतीसारकं चैव वह्निमान्द्यमरोचकम् ॥
विशेषाद्गर्भिणीरोगं नाशयेदचिरेण च ॥ ८१ ॥

अभ्रक, ताँबा और सुवर्णकी भस्म, गन्धक, पारा, मैनसिल, सुहागा, जवाखार और त्रिफला इनको चार चार तोले, मीठातेलिया ६ माशे, दारचीनी, इलायची, तेजपात, जावित्री, लौंग, बालछड, तालीशपत्र, सोनामाखी और रसौत इनको दो दो तोले लेवे । सबको एकत्रकर गूमाशाकके रस और पानके रसमें पृथक् पृथक् ७ बार भावनादेवे । जब कुछ तरल अवस्था होजाय तब उसमें ४ तोले कालीमिरचों-का चूर्ण मिलालेवे । यह रस यथाविधि सेवन करनेसे ज्वर, दाह, वमन, भ्रम, अती-सार, मन्दाग्नि, अरुचि आदि अनेक प्रकारके रोगोंको विशेषकर गर्भिणीस्त्रियोंके रोगोंको अल्पकालमेंही नाश करताहै ॥ ७७–८१ ॥

महाभ्रवटी ।

अभ्रकं पुटितं ताम्रं लौहं गन्धकपारदम् ।
कुनटी टङ्कणं क्षारं त्रिफला च पलं पलम् ॥ ८२ ॥
गरलं च तथा माषचतुष्कं चैव चूर्णितम् ।
तत्सर्वं भावयेदेषां रसैः प्रत्येकशः पलैः ॥ ८२ ॥
ग्रीष्मसुन्दरकस्याटरूषकस्य क्रमेण च

रसैस्ताम्बूलवल्ल्याश्च दलोत्थैर्भावितं पृथक् ॥
द्रवे किञ्चित्स्थिते चूर्णं मरिचस्य पलं क्षिपेत् ॥ ८४॥

अभ्रकभस्म, ताम्रभस्म, लोहभस्म, गन्धक, पारा, मैनसिल, सुहागा, जवाखार और त्रिफला ये प्रत्येक चार चार तोले, शुद्ध मीठातेलिया ४ माशे लेकर सबको एकत्र पीस लेवे। फिर सब चूर्णको गूमा, अडूसा और नागवल्ली इनके पत्तोंके एक पल रसमें अलग २ क्रमशः भावना देवे। जब कुछ पतला रहजाय तब उसमें १ पल मिरचोंका चूर्ण डालकर दो दो रत्तीकी गोलियाँ बनालेवे॥ ८२-८४॥

सर्वातीसारशमनं सर्वशूलनिवारणम् ॥ ८५ ॥
सूतिकाशोथपाण्डुघ्नं सर्वज्वरविनाशनम्।
नाशयेत्सूतिकातङ्कं वृक्षमिन्द्राशनिर्यथा ॥ ८६ ॥

इस वटीको सेवन करनेसे सर्वप्रकारका अतीसार, सब शूल, सूतिकारोग, सूजन पाण्डुरोग और सब प्रकारका ज्वर नष्ट होताहै। जिस प्रकार वज्रसे वृक्षोंका नाश होताहै उसी प्रकार सूतिकारोग नष्ट होताहै॥ ८५॥ ८६॥

सूतिकारिरस।

टङ्कणं मूर्च्छितं सूतं गन्धकं हेम तारकम्।
जातीफलं तथा कोषं लवङ्गैला च धातकी ॥ ८७ ॥
वत्सकेन्द्रयवं पाठा शृङ्गी विश्वाजमोदिका।
गुडी प्रसारणिरसैश्चतुर्गुञ्जाप्रमाणतः ॥ ८८ ॥
भक्षयेत्तद्रसैः प्रातः सूतिकातङ्कशान्तये।
जीर्णज्वरं तथा शोथं ग्रहणीप्लीहकासनुत् ॥ ८९ ॥

सुहागा, फुंकाहुआ पारा, गन्धक, सुवर्ण, रूपा, जायफल, जावित्री, लौंग, इलायची, धायके फूल, कुडेकी छाल, इन्द्रजौ, पाढ, काकडासिंगी, सोंठ और अजमोद इनके चूर्णको समान भाग लेकर प्रसारणीके रसमें खरल करके चार चार रत्तीकी गोलियां बनालेवे। फिर सूतिकारोगको शान्त करनेके लिये प्रतिदिन प्रातःकाल एक एक वटी प्रसारणीके रसके साथ सेवन करे। इससे पुराना ज्वर, सूजन, संग्रहणी, तिल्ली और खाँसी आदि सब विकार दूर होते हैं॥

भद्रोत्कटाद्य घृत।

समूलपत्रशाखं तु शतं भद्रोत्कटस्य च।
वारिद्रोणेन संसाध्य स्थाप्यं पादावशेषितम् ॥ ९० ॥

घृतप्रस्थं विपक्तव्यं गर्भं दत्त्वा तु कार्षिकम् ।
सव्योषं पिप्पलीमूलं चित्रकं जीरकं तथा ॥ ९१ ॥
पञ्चमूलं कनिष्ठं च रास्नैरण्डसमन्वितम् ।
बला सिन्धुयवक्षारस्वर्जिकाकृष्णजीरकम् ॥ ९२ ॥
सिद्धमेतद् घृतं सद्यो निहन्यात्सूतिकामयान् ।
ग्रहणीं पाण्डुरोगं च अर्शांसि विविधानि च ॥
अग्निं च कुरुते दीप्तं स्त्रीणां स्तन्यविशोधनम् ॥ ९३ ॥

जड, पत्ते और शाखासहित प्रसारणीको १०० पल लेकर एक द्रोण जलमें पकावे । जब चौथाई भाग जल शेष रहजाय तब उतारकर छानलेवे । फिर उसमें घी १ प्रस्थ तथा त्रिकुटा, पीपलामूल, चीता, जीरा, लघु पञ्चमूल, रास्ना, अण्डकी जड, खिरेंटी, सैंधानमक, जवाखार, सज्जी और कालाजीरा इनके दोदो तोले चूर्णको डालकर उत्तम प्रकार घृतको सिद्ध करे। यह घृत नित्यप्रति सेवन करनेसे प्रसूतिरोग, संग्रहणी, पाण्डु और अनेकप्रकारके अर्शादिविकारोंको तत्काल नष्ट करता है और अग्निको दीपन करता है। तथा स्त्रियोंके स्तन्य (दूध) को शुद्ध करता ॥ ९०-९३ ॥

सूतिकादशमूलतै ।

शालपर्णी पृश्निपर्णी बृहतीद्वयगोक्षुरम् ।
दासी प्रसारणी विश्वं गुडूची मुस्तकं तथा ॥ ९४ ॥
एतानि समभागानि प्रस्थं च कटुतैलकम् ।
चतुर्गुणं पयो दत्त्वा शनैर्मृद्वग्निना पचेत् ॥
निहन्ति सूतिकारोगं ज्वरदाहसमन्वितम् ॥ ९५ ॥

शालपर्णी, पृश्निपर्णी, बडीकटेरी, गोखुरू, पीलीकटसरैया, प्रसारणी, सोंठ, गिलोय और नागरमोथा इनको समान भाग मिश्रित १०० पल लेकर ५० सेर जलमें पकावे । अर्द्धावशेष रहनेपर उतारकर छानलेवे । फिर उसमें कडवातेल १ प्रस्थ, दूध ४ प्रस्थ और उक्त औषधियोंका कल्क १ सेर डालकर मन्दमन्द अग्निसे पकावे । इस तेलको मर्दन करनेसे ज्वर और दाहसहित सूतिकारोग नष्ट होता है ॥ ९४ ॥ ९५ ॥

इति भैषज्यरत्नावल्यां सूतिकारोगचिकित्सा ।

स्तनरोगकी चिकित्सा।

वनकार्पासकेक्षुणां मूलं सौवीरकेण वा।
विदारिकन्दं सुरया पिबेद्वा स्तन्यवर्द्धनम् ॥ १ ॥

वनकपासकी जड और ईखकी जडको कांजीमें पीसकर अथवा विदारीकन्दके चूर्णको मद्यके साथ पान करनेसे स्तनोंमें दूध बढता है ॥ १ ॥

शालितण्डुलचूर्णस्य पानं दुग्धेन वर्द्धयेत्।
स्तन्यं सप्ताहतः क्षीरसेविन्यास्तु न संशयः ॥ २ ॥

दूधके साथ शालिचावलोंके चूर्णको पान करे और दूध भातका भोजन करे तो सात दिनमें ही स्तनोंमें दूधकी वृद्धि होती है ॥ २ ॥

हरिद्रादिं वचादिं वा पिबेत्स्तन्यविवृद्धये ॥ ३ ॥

स्तनोंमें दुग्धवृद्धि करनेके लिये हरिद्रादि या वचादि क्वाथ पान करे ॥ ३ ॥

तत्र वातात्मके स्तन्ये दशमूलीजलं पिबेत्।
पित्तदुष्टेऽमृताभीरुपटोलं निम्बचन्दनम् ॥
धात्री कुमारश्च पिबेत्क्वाथयित्वा सशारिवाम् ॥ ४ ॥

वातजनित स्तनरोगमें दशमूलके काढेको पीवे, पित्तज स्तनरोगमें गिलोय, शतावर, परवल, नीमकी छाल, लालचन्दन और अनन्तमूल इनका क्वाथ बनाकर धाय और बालकको पिलाना चाहिये ॥ ४ ॥

कफे वा त्रिफला मुस्ता भूनिम्बं कटुरोहिणी।
भार्ङ्गीदारुवचापाठाः पिबेत्सातिविषाः शृताः।
धात्रीस्तन्यविशुद्ध्यर्थं मुद्गयूषरसाशना ॥ ५ ॥

कफजन्य स्तनरोगमें त्रिफला, नागरमोथा, चिरायता, कुटकी, भारँगी, देवदारु, वच, पाढ और अतीस इनका क्वाथ बनाकर पान करे और मूँगके यूषका भोजन करे तो धायके स्तनोंमें दूधकी वृद्धि होती है ॥ ५ ॥

कुक्कुरमेञ्चुकमूलं चर्वितमास्ये विधारितं जयति।
सप्ताहात्स्तनकीलं स्तन्यं चैकान्ततः कुरुते ॥ ६ ॥

गंगेरनकी जडको चाबकर मुखमें धारण करनेसे सात दिनके भीतर ही स्तनोंकी कील निकलकर दूधकी वृद्धि होती है ॥ ६ ॥

शोथं स्तनोत्थितमवेक्ष्य भिषग्विदध्याद्यद्विद्रधावभि-
हितं बहुधा विधानम् । आमे विदह्यति तथैव गते च
पाकं तस्याः स्तनौ सततमेव हि निर्दुहीत ॥ ७ ॥

स्त्रीके स्तनोंमें सूजन होजानेपर वैद्य प्रायः विद्रधिरोगकी समान चिकित्सा करें और सूजनकी अपक्व अथवा पक्व अवस्थामें दाह होती हो तो भी उसके स्तनोंमेंसे दूध निकाल देवे ॥ ७ ॥

विशालमूललेपं तु हन्ति पीडां स्तनोत्थिताम् ।
निशाकनकफलाभ्यां लेपश्चापि स्तनार्त्तिहा ॥ ८ ॥

इन्द्रायणकी जड, हल्दी और धतूरेके फल इन सबको एकत्र पीसकर लेप करनेसे स्तनजन्य पीडा दूर होती है ॥ ८ ॥

मूषिकवसया शूकरमहिषगजमांसचूर्णयुतया ।
अभ्यङ्गमर्दनाभ्यां सुकठिनपीनस्तनौ भवतः ॥ ९ ॥

सूअर, भैंसा और हाथीके मांसके चूर्णको चूहेकी चर्बीमें मिलाकर स्तनोंमें मालिश और लेप करनेसे स्त्रीके स्तन अत्यन्त कठिन तथा स्थूल होते हैं ॥ ९ ॥

महिषीभवनवनीतं व्याधिबलोग्रा तथैव नागबला ।
पिष्ट्वा मर्दनयोगात्पीनं कठिनं स्तनं कुरुते ॥ १० ॥

भैंसका नैनीघी, कूठ, खिरेंटी, वच और गंगेरन इनको एकत्र पीसकर मालिश करनेसे स्तन कठिन और स्थूल होते हैं ॥ १० ॥

प्रथमर्त्तौ तण्डुलाम्भो नस्यं कुर्यात्स्तनौ स्थिरौ ।

पहलेकी ऋतुकालमें चावलोंके जलकी नास लेनेसे स्तन स्थिर होजाते हैं ॥

गोमहिषीघृतसहितं तैलं श्यामाकृताञ्जलिवचाभिः ।
त्रिकटुनिशाभिः सिद्धं नस्यं स्तनवर्द्धनं परम् ॥ ११ ॥

गोघृत, भैंसका घी और तिलका तेल ये समान भाग मिलित एक सेर, कल्कके लिये फूलप्रियंगु, लज्जावन्ती, वच, सोंठ, मिरच, पीपल और हल्दी इनको समान भाग मिश्रित (आधसेर और) दो सेर लेवे । सबको यथाविधि मिलाकर तेलको सिद्ध करे । यह तेल नस्यद्वारा प्रयोग करनेसे स्तनोंको बढाताहै ॥

काशीशाद्यतैल ।

काशीशतुरगगन्धाशावरगजपिप्पलीविपक्वेन ।
तैलेन यान्ति वृद्धिं स्तनकर्णवराङ्गलिङ्गानि ॥ १२ ॥

कसीस, असगन्ध, लोध और गजपीपल इनके कल्कद्वारा उत्तम विधिसे तेलको सिद्ध कर मर्दन करनेसे स्तन, कान, योनि और लिङ्गकी वृद्धि होतीहै ॥

श्रीपर्णीतैल।

श्रीपर्णीरसकल्काभ्यां तैलं सिद्धं तिलोद्भवम्।
तत्तैलं तूलकेनैव स्तनस्योपरि धारयेत् ॥
पतितावुत्थितौ स्त्रीणां भवेतां च पयोधरौ ॥ १२ ॥

कुम्भेरकी जडके क्वाथ और कल्कद्वारा तिलके तेलको विधिपूर्वक पकावे। उस तेलको रुईके फोयेसे स्तनोंपर लगानेसे गिरेहुए स्तन फिर उन्नत होजातेहैं ॥

इति भैषज्यरत्नावल्यां स्तनरोगचिकित्सा।

बालरोगकी चिकित्सा।

त्रिविधः कथितो बालः क्षीरान्नोभयवर्त्तकः।
स्वास्थ्यं ताभ्यामदुष्टाभ्यां दुष्टाभ्यां रोगसम्भवः ॥१॥
क्षीरपाय्यौषधं धात्र्याः क्षीरान्नादस्य चोभयोः।
अन्नेन वा शिशौ देयं भेषजं भिषजा सदा ॥ २ ॥

बालक तीन प्रकारके होते हैं, जैसे-एक दूध पीनेवाले, दूसरे-दूध और अन्न खानेवाले और तीसरे-केवल अन्नको खानेवाले। दूषित दूध और दूषित अन्नके होनेसे ही बालक रोगी होते हैं और दूध तथा अन्नके निर्दोष होनेसे बालक स्वस्थ रहते हैं। दूध पीनेवाले बालकको रोग हो तो धाय (बालकको दूध पिलानेवाली) को औषधि सेवन करावे और दूधपायी तथा अन्नभोजी बालकके रोग होनेपर बालक और धाय दोनोंको औषधि सेवन करावे। पर अन्नखानेवाले बालकको रोग होनेपर धायको कदापि औषधि सेवन न करावे। अन्नके साथ औषध मिलाकर बालकको सेवन करावे ॥१॥२॥

मात्रया लङ्घयेद्धात्रीं शिशोर्नैष्टं विशोषणम्।
सर्वं निवार्यते बाले स्तन्यं तु न निवार्यते ॥ ३ ॥

बालकके रोग उत्पन्न होनेपर आवश्यकतानुसार धायको लंघन करावे और बालकको लंघन या दस्त कदापि न करावे। बालकको अन्यान्य सर्वप्रकारकी वस्तुओंसे वर्जित करे; किन्तु माताका दूध पीना कभी बन्द न करे ॥ ३ ॥

भेषजं पूर्वमुद्दिष्टं नराणां यज्ज्वरादिषु ।
देयं तदेव बालानां मात्रा तस्य कनीयसी ॥ ४ ॥

मनुष्योंके ज्वरादिरोगोंमें पहले जो औषधियें कही हैं वे ही औषधियें बालकोंके ज्वरादिरोगोंमें अल्पमात्रासे देनी चाहिये ॥ ४ ॥

प्रथमे मासि जातस्य शिशोर्भेषजरक्तिका ।
अवलेह्या तु कर्त्तव्या मधुक्षीरसिताघृतैः ॥ ५ ॥
एकैकां वर्द्धयेत्तावद्यावत्संवत्सरो भवेत् ।
तदूर्ध्वं माषवृद्धिः स्याद्यावदाषोडशाब्दिकः ॥ ६ ॥

एक महीनेके बालकको एक रत्ती प्रमाण औषधि शहद, दूध, मिश्री अथवा घृतके साथ मिलाकर चटानी चाहिये । दूसरे महीनेसे सालभर तकके बालकको प्रत्येक मासमें एक एक रत्ती मात्रा बढाकर देवे और सालभरकी अवस्थावाले बालकसे सोलह वर्षतककी अवस्थावाले बालकोंको प्रत्येकवर्ष एकएक माशेकी मात्रा बढाकर सोलह माशेतक औषधि देनी चाहिये ॥ ५ ॥ ६ ॥

यो बालोऽचिरजातःस्तनं न गृह्णाति तस्य सहसैव ।
धात्रीमधुघृतपथ्याकल्केनाघर्षयेज्जिह्वाम् ॥ ७ ॥

जो थोडे दिनोंका बालक माताके दूधको नहीं पीवे तो आमले और हरडके बारीक चूर्णको शहद और घीमें मिलाकर उसकी जिह्वापर घिसे । इससे दूध पीने लगता है ॥ ७ ॥

कुष्ठं वचाऽभया ब्राह्मी कनकं क्षौद्रसर्पिषा ।
वर्णायुःकान्तिजननं लेहं बालस्य दापयेत् ॥ ८ ॥

कूठ, वच, हरड, ब्राह्मी और सुवर्णभस्म इनके चूर्णको समान भाग लेकर घी और शहदमें मिलाकर बालकको चटावे । इससे वर्ण, आयु और कान्तिकी वृद्धि होती है ॥ ८ ॥

स्तन्याभावे पयश्छागं गव्यं वा तद्गुणं पिबेत् ।
ह्रस्वेन पंचमूलेन स्थिरया वा सितायुतम् ॥ ९ ॥

माताके या धायके स्तनोंमें दूधका अभाव होनेपर बालकको बकरीका अथवा गौका दूध हलका करके पिलावे । किम्वा लघुपञ्चमूल या शालपर्णीका क्वाथ दूध और मिश्रीके सहयोगसे पान कराना चाहिये ॥ ९ ॥

मृत्पिण्डेनाग्नितप्तेन क्षीरसिक्तेन सोष्मणा।
स्वेदयेदुत्थितां नाभिं शोथस्तेनोपशाम्यति ॥ १० ॥

मिट्टीके ढेलेको तपाकर और गरम दूधमें डालकर उससे सुहाता २ नाभिपर स्वेद देवे तो बालककी नाभिकी सूजन दूर होती है ॥ १० ॥

नाभिपाके निशालोध्रप्रियङ्गुमधुकैः शृतम्।
तैलमभ्यञ्जने शस्तमेभिर्वाप्यवचूर्णनम् ॥ ११ ॥

बालककी नाभि पकजानेपर हल्दी, लोध, फूलप्रियंगु और मुलहठी इनके कल्कद्वारा तेलको पकाकर नाभिपर मालिश करे अथवा उक्त औषधियोंके चूर्णको नाभिपर घर्षण करे ॥ ११ ॥

सोमग्रहणे विधिवत्केकिशिखामूलमुद्धृतं बद्धम्।
जघनेऽथ कन्धरायां क्षपयत्यहिण्डिकां नियतम् ॥ १२ ॥

चन्द्रग्रहण होनेपर चिरचिटेकी जड उखाड बालककी जाँघ अथवा गर्दनमें बाँध देवे तो अहिण्डिकारोग निस्सन्देह दूर होता है ॥१२॥

सतदलपुष्पमरिचं पिष्टं गोरोचनासहितम्।
पीतं तद्वत्तण्डुलभक्तकृतो दग्धपिष्टकप्राशः १३ ॥

सतौनेके फूल, मिरच और गोरोचन इनको एकत्र पीसकर पान करावे अथवा अन्नके साथ चावलोंको पीसकर केलेके पत्तेपर रख कुशासे बाँधकर दग्ध करके भक्षण करावे तो अहिण्डिकारोग नष्ट होता है ॥ १३ ॥

हरिद्राद्वययष्ट्याह्वसिंहीशक्रयवैः कृतः।
शिशोर्ज्वरातिसारघ्नः कषायः स्तन्यदोषनुत् ॥ १४ ॥

हल्दी, दारुहल्दी, मुलहठी; कटेरी, इंद्रजौ इनका क्वाथ बनाकर पान करानेसे बालकका ज्वर, अतीसार (दस्त) और धायके स्तन्यदोषादिविकार जाते हैं ॥१४॥

रजनी दारु सरलं श्रेयसी बृहतीद्वयम्।
पृश्निपर्णी शतह्वा च लीढं माक्षिकसर्पिषा ॥ १५ ॥
ग्रहणीदीपनं हन्ति मारुतार्त्तिं सकामलाम्।
ज्वरातीसारपाण्डुघ्नं बालानां सर्वरोगजित् ॥ १६ ॥

हल्दी, देवदारु, धूपसरल, गजपीपल, कटेरी, बडीकटेरी, पृश्निपर्णी और सोया इनके चूर्णको समान भाग लेकर शहद और घीमें मर्दन करके बालकको

चटानेसे ग्रहणी, वातरोग, कामला, ज्वर, दस्त, पाण्डु और अन्यान्य सर्वप्रकारके विकार नष्ट होते हैं तथा अग्नि दीपन होती है ॥१५-१६॥

मिषीकृष्णाञ्जनं लाजा शृङ्गीमरिचमाक्षिकैः ।
लेहः शिशोर्विधातव्यश्छर्दिकासज्वरापहः ॥ १७ ॥

सौंफ, पीपल, रसौत, खीलोंका चूर्ण, काकडासिङ्गी और काली मिरच इनके चूर्णको समान भाग लेकर शहदमें खरलकरके भक्षण करानेसे बालकके वमन, खाँसी और ज्वरादिविकार नष्ट होते हैं ॥ १७ ॥

पीतं पीतं वमेद्यस्तु स्तन्यं तन्मधुसर्पिषा ।
द्विवार्ताकीफलरसं पञ्चकोलं च लेहयेत् ॥ १८ ॥

जो बालक दूधको पीते २ ही डालदेवे तो उसको बडीकटेरी और कटेरीके फलोंका रस घी और शहदके साथ मिलाकर पान करे अथवा पञ्चकोलका चूर्ण घी और शहदमें मिश्रितकर चटावे ॥ १८ ॥

आम्रास्थिलाजसिन्धूत्थैर्लेहः क्षौद्रेण छर्दिनुत् ॥ १९ ॥

आमकी गुठलीकी गिरी, खीलें और सैंधानमक इनके चूर्णको शहदके साथ मिलाकर चटानेसे वमन (कै) होना दूर होता है ॥ १९ ॥

पिप्पलीमरिचानां च चूर्णं समधुशर्करम् ।
रसेन मातुलुङ्गस्य हिक्काच्छर्दिनिवारणम् ॥ २० ॥

पीपल, काली मिरच इनके चूर्णको शहद और खाँडमें मिलाकर बिजोरेनींबूके रसके साथ पान करानेसे हिचकी और वमन होना बन्द होता है ॥२०॥

पेठीपाठामूलं जम्बूसहकारवल्कलतः ।
इत्येकशश्च पिण्डो विधृतो हृन्नाभितात्वादौ ॥
छर्द्यतिसारजवेगं प्रबलं धत्ते तदेव नियमेन ॥ २१ ॥

पेटारीवृक्ष, पाढकी जड, जामुनकी छाल और आमकी छाल, इनमेंसे किसीएक चीजको पीसकर गोलासा बनालो । उसको बालकके हृदय, नाभि और तालुआदि स्थानोंमें रखनेसे वमन और अतीसारका प्रबल वेगसहित होना दूर होता है ॥२१॥

पत्रैर्बदरचाङ्गेरीकाकमाचीकपित्थजैः ।
शिशोश्छर्द्यतीसारनाशनं मूर्द्धलेपनम् ॥ २२ ॥

बेर, अम्ल नोनिया, मकोय और कैथ इनके पत्तोंको एकत्र पीसकर मस्तकपर लेपकरनेसे बालकके कै और दस्त होना आदि विकार नष्ट होते हैं ॥२२॥

क्षीरादस्य शिशोरामं शुष्कं दृष्ट्वा तु दारुणम् ।
माषयूषं पिबेद्धात्री पिप्पलीचूर्णसंयुतम् ॥ २३ ॥

दूधको पीनेवाले बालकके दस्तोंके साथ २ दारुण सूखीआम निकलती मालूम हो तो उसकी धायको पीपलका चूर्ण डालकर उड़दोंका यूष पान करावे ॥२३॥

स्तन्यपस्य कुमारस्य सर्वस्यामातिसारिणः ।
धात्रीं विलङ्घयेद्धीमान् देहदोषाद्यपेक्षया ॥
पञ्चकोलकसिद्धं वा पेयादिं च प्रयोजयेत् ॥ २४ ॥

दूध पीनेवाले बालकके आमसहित दस्त होते हों तो उसकी धायको लंघन करावे । अथवा पञ्चकोलके द्वारा सिद्धकर पेया पान करनेको देवे ॥ २४ ॥

वचा मुस्तं भद्रदारुनागरातिविषागणः ।
हरिद्राद्वययष्ट्याह्वसिंहीशक्रयवैः कृतः ॥ २५ ॥
एतौ वचाहरिद्रादिगणौ स्तन्यविशोधनौ ।
आमातिसारशमनौ कफमेदोविशोषणौ ॥
मात्रा क्वाथजलं पेयं किञ्चिद्देयं शिशोरपि ॥ २६ ॥

वच, भद्रमोथा, देवदारु, सोंठ और अतीस इन औषधियोंके समुदायको वचादिगण कहते हैं । एवं हल्दी, दारुहल्दी, मुलहठी, कटेरी और इन्द्रजौ इनके समूहको हरिद्रादिगण कहते हैं । इन दोनों गणोंका क्वाथ स्तन्यविशोधक, आमातीसारनाशक तथा कफ और मेदको शुष्क करनेवाला है । उक्त गणोंका क्वाथ धायको पान करावे और बालकको भी कुछ थोड़ासा देवे ॥२५॥२६॥

बिल्वं च पुष्पाणि च धातकीनां जलं सलोध्रं गज-
पिप्पली च । क्वाथावलेहौ मधुना विमिश्रौ बालेषु
योज्यावतिसारितेषु ॥ २७ ॥

बेलगिरी, धायके फूल, सुगन्धवाला, लोध और गजपीपल इनका क्वाथ या चूर्ण शहदमें मिलाकर बालकको सेवन करानेसे अतीसाररोग नष्ट होता है ॥ २७ ॥

आम्रातकाम्रजम्बूनां त्वचमादाय चूर्णयेत् ।
मधुना लेहयेद्बालमतीसारविनाशनम् ॥ २८ ॥

अम्बाडेकी छाल, आमकी छाल और जामुनकी छाल इनको एकत्र पीसकर और शहदमें मिलाकर बालकको चटावे तो दस्त होने बन्द होते हैं ॥ २८ ॥

सितजीरकसर्जचूर्णं बिल्वदलोत्थाम्बुमिश्रितं पीतम् ।
हन्त्यामरक्तशूलं गुडसहितं श्वेतसर्जो वा ॥ २९ ॥

सफेद जीरा और राल इनके चूर्णको बेलपत्रीके रसमें अथवा केवल श्वेतरालके चूर्णको गुडके साथ मर्दन करके बालकको सेवन करानेसे आमरक्त और उसकी पीडा नष्ट होती है ॥ २९ ॥

समङ्गा धातकी पद्मं वयस्था कच्छुरा तथा ।
पिष्टैरेतैर्यवागूः स्यादतीसारविनाशिनी ॥ ३० ॥

वराहक्रान्ता, धायके फूल, कमलकेशर, गिलोय और कौंछकी जड इनको एकत्र पीसकर इनली यवागू बनावे। यह यवागू बालकको पान करानेसे अतीसारको नष्ट करती है ॥ ३० ॥

बिल्वमूलकषायेण लाजांश्चैव सशर्करान् ।
आलोड्य पाययेद्बालं छर्द्यतीसारनाशनम् ॥ ३१ ॥

बेलकी जडके क्वाथमें खीलोंका चूर्ण और चीनी मिलाकर बालकको पिलानेसे वमन और अतीसार दूर होते हैं ॥ ३१ ॥

कल्कः प्रियङ्गुकोलास्थिमध्यमुस्तरसाञ्जनैः ।
क्षौद्रलीढः कुमारस्य छर्दितृष्णातिसारनुत् ॥ ३२ ॥

फूलप्रियंगु, बेरकी गुठलीकी मींग, नागरमोथा और रसौत इन सबके चूर्णको एकत्र शहदके साथ खरल करके बालकको चटानेसे कै प्यास और दस्त होने बन्द होते हैं ॥ ३२ ॥

मोचरसं समङ्गा च धातकी पद्मकेशरम् ।
पिष्टैरेतैर्यवागूः स्याद्रक्तातीसारनाशिनी ॥ ३३ ॥

मोचरस, वराहक्रान्ता, धायके फूल और कमलकेशर इन सबको एकत्र पीस कर इनके द्वारा यवागू बनाकर बालकको सेवन करावे तो रक्तातिसार नष्ट होय ॥ ३३ ॥

लेहस्तैलसिताक्षौद्रतिलयष्ट्याह्वकल्कितः ।
बालस्य रुन्ध्यान्नियतं रक्तस्रावं प्रवाहिकाम् ॥ ३४ ॥

तिलका तेल, मिश्री, शहद, तिल और मुलहठी इन सबको एकत्र पीसकर बालकको सेवन करानेसे रक्तस्राव और प्रवाहिकारोग निश्चय दूर होते हैं ॥ ३४ ॥

लाजाः सयष्टिमधुकशर्कराः क्षौद्रमेव च ।
तण्डुलोदकसंयुक्तं क्षिप्रं हन्ति प्रवाहिकाम् ॥ ३५ ॥

खीलें, मुलहठी, चीनी और शहद इन सबको एकत्र मर्दनकर चावलोंके जलके साथ बालकको पान करानेसे प्रवाहिकारोग तत्काल नाश होता है ॥ ३५ ॥

अङ्कोटमूलमथवा तण्डुलसलिलेन वटजमूलं वा ।
पीतं हन्त्यतिसारं ग्रहणीरोगं च दुर्वारम् ॥ ३६ ॥

ढेरावृक्षकी जड अथवा बडकी जडको चावलोंके पानीके साथ पीसकर पान करानेसे बालकके दस्त और संग्रहणीरोग नष्ट होते हैं ॥ ३६ ॥

मरिचमहौषधकुटजं द्विगुणीकृतमुत्तरोत्तरं क्रमशः ।
गुडतक्रयुक्तमेतद्ग्रहणीरोगं निहन्त्याशु ॥ ३७ ॥

काली मिरच एक भाग, सोंठ दो भाग और कुडेकी छाल ४ भाग इनको यथाक्रमसे लेकर गुड और मठेके साथ खरल करके पान करानेसे संग्रहणी तत्काल नष्ट होती है ॥ ३७ ॥

बिल्वशक्राम्बुमोचाब्दसिद्धमाजं पयः शिशोः ।
सामां सरक्तां ग्रहणीं पीतं हन्यात्त्रिरात्रितः ॥ ३८ ॥

बेलगिरी, इन्द्रजौ, सुगन्धबाला, मोचरस और नागरमोथा इन सबको समान भाग मिलाकर दो तोले परिमाण ले १६ तोले बकरीके दूध और एक सेर जलमें पकावे । जब दूधमात्र शेष रहजाय तब उस दूधको सेवन करानेसे बालकके आम-सहित और रक्तसहित संग्रहणीरोग तीन दिनमें ही नष्ट होता है ॥ ३८ ॥

तद्वदजाक्षीरसमो रसो जम्बुत्वगुद्भवः ॥

बकरीका दूध और जामुनकी छालका रस इन दोनोंको समान भाग ले एकत्र मिश्रितकर पान करानेसे बालककी संग्रहणी नष्ट होती है ॥

गुदपाके तु बालानां पित्तघ्नीं कारयेत् क्रियाम् ।
रसाञ्जनं विशेषेण पानालेपनयोर्हितम् ॥ ३९ ॥

बालककी गुदा पकगई हो तो पित्तनाशक चिकित्सा करे और रसौतको पीस-कर गुदापर लेप करे तथा पान करावे ॥ ३९ ॥

दुष्टमन्त्रादिभिर्मातुः स्तन्यं संपिबतः शिशोः ।
यदा प्रकुपितं पित्तं गुदं समभिधावति ॥ ४० ॥

तदा सञ्जायते तत्र जलौकोदरसन्निभः।
व्रणःसदाहो व्यक्तोष्मा तदाऽस्य स्याज्ज्वरः परः ॥४१॥
हरितं पीतकं वापि वर्चस्तेन भवेद् ध्रुवम्।
व्रणः पश्चाद्रुजो नाम व्याधिः परमदारुणः ॥ ४२ ॥

दूषित अन्नादिका सेवन करनेसे माताका दूध दूषित होजाता है। उस दूषित दूध को पीनेसे बालकका पित्त कुपित होकर गुदामें पहुँचकर जोंकके उदरकी समान लाल लाल व्रण उत्पन्न करता है। उस व्रणमें–गुदामें दाह, सन्ताप और ज्वर होता है और हरा अथवा पीला मल निकलता है। इस रोगका पश्चाद्रुण नाम है। यह व्याधि बालकोंके लिये अतिभयंकर है ॥४०–४२॥

चन्दनं सारिवे द्वे च शङ्खिनीति समायुतैः।
पश्चाद्रुजे प्रलेपोऽयमवलेहस्तु शस्यते ॥४३॥

पश्चाद्रुणरोगमें लालचन्दन, उसवा, अनन्तमूल, और शङ्खपुष्पी इन औषधियोंके द्वारा प्रलेप और अवलेह सिद्ध कर प्रयोग करना चाहिये ॥ ४३ ॥

कणोषणसिताक्षौद्रसूक्ष्मैलासैन्धवैः कृतः।
मूत्रग्रहे प्रयोक्तव्यः शिशूनां लेह उत्तमः ॥ ४४ ॥

पीपल, कालीमिरच, मिश्री, शहद, छोटी इलायची और सेंधानमक इनका अवलेह बनाकर बालकके मूत्रावरोधमें प्रयोग करना उत्तम है ॥ ४४ ॥

घृतेन सिन्धुविश्वैलाहिङ्गुभार्ङ्गीरजो लिहन्।
आनाहं वातिकं शूलं जयेत्तोयेन वा शिशुः ॥ ४५ ॥

सेंधानमक, सोंठ, छोटी इलायची, हींग और भारंगी इनके समान भाग मिश्रित चूर्णको घीमें मिलाकर अथवा मन्दोष्ण जलके साथ सेवन करनेसे बालकका वातज शूल और आनाहरोग दूर होता है ॥ ४५ ॥

हरीतकीवचाकुष्ठकल्कं माक्षिकसंयुतम्।
पीत्वा कुमारः स्तन्येन मुच्यते तालुपातनात् ॥ ४६ ॥

हरड, वच और कूठ इनको एकत्र पीसकर शहदमें मिलाकर माताके दूधके साथ पान करानेसे बालक तालुपातरोगसे मुक्त होता है ॥ ४६ ॥

मुखपाके तु बालानां साम्रसारमयोरजः।
गैरिकं क्षौद्रसंयुक्तं भेषजं सरसाञ्जनम् ॥ ४७ ॥

अश्वत्थत्वग्दलैः क्षौद्रैर्मुखपाके प्रलेपनम् ।
दार्वीयष्ट्यभयाजातीपत्रक्षौद्रैस्तथाऽपरम् ॥ ४८ ॥

बालकोंके मुखपाकरोगमें आमकी गुठलीकी गिरी, लोहचूर्ण, गेरू और रसौत इन औषधियोंको पीसकर, शहदमें मिलाकर, अथवा, पीपलकी छाल और पत्तोंको पीसकर शहदके साथ किम्वा दारुहल्दी, मुलहठी, हरड और जावित्री इनके चूर्ण को शहदके साथ मिलाकर मुखपाकमें प्रलेप करे ॥ ४७ ॥ ४८ ॥

सह जम्बीररसेन स्नुग्दलरसघर्षणं सद्यः ।
कृतमपहन्ति हि पाकं मुखजं बालस्य चाश्वेव ॥ ४९ ॥

थूहरके पत्तोंके रस और जम्बीरीनींबूके रसको एकत्र मिलाकर मुखमें लगानेसे बालकका मुखपाकरोग तत्काल नष्ट होता है ॥ ४९ ॥

लावतित्तिरिवल्लूररजः पुष्परसार्दितम् ।
द्रुतं करोति बालानां दन्तं केशरवन्मुखम् ॥ ५० ॥

लवा और तीतरके मांसके चूर्णको शहदमें मिलाकर मलनेसे बालकका दन्तक्षतरोग दूर होकर मुख केशरकी समान कान्तिमान् होता है ॥ ५० ॥

दन्तोद्भवेषु रोगेषु न बालमतियन्त्रयेत् ।
स्वयमेवोपशाम्यन्ति जातदन्तस्य ते गदाः ॥ ५१ ॥

दाँतोंके निकलते समय बालकोंके अनेक रोग उत्पन्न होजाते हैं। उस समय उन रोगोंमें चिकित्सा अथवा आहारादिका कोई कठिन नियम करके बालकको पीडित नहीं करना चाहिये। क्योंकि दाँतोंके निकल आनेपर वे सब रोग स्वयं ही शान्त हो जाते हैं ॥ ५१ ॥

विभीतकफलं कुष्ठं हरितालं मनःशिला ।
एभिस्तैलं विपक्तव्यं बालानां पूतिकर्णके ॥ ५२ ॥

बहेडा, कुठ, हरिताल और मैनसिल इनके कल्क द्वारा कडवे तेलको पकाकर बालकोंके पूतिकर्णरोगमें प्रयोग करना चाहिये ॥ ५२ ॥

सुवर्णगैरिकस्यापि चूर्णानि मधुना सह ।
लीढ्वा सुखमवाप्नोति क्षिप्रं हिक्कार्दितः शिशुः ॥ ५३ ॥

अत्यन्त लालरंगके गेरूके चूर्णको शहदके साथ मिलाकर चटानेसे बालकको हिचकी आना शीघ्र दूर होती है ॥ ५३ ॥

चित्रकं शृङ्गवेरं च तथा दन्ती गवाक्ष्यपि ।
चूर्णं कृत्वा तु सर्वेषां सुखोष्णेनाम्बुना पिबेत् ॥
कासं श्वासमथो हिक्कां कुमाराणां प्रणाशयेत् ॥ ५४ ॥

चीतेकी जड, सोंठ, दन्तीकी जड और इन्द्रायनकी जड इनके चूर्णको एकत्र पीसकर सुखोष्ण जलके साथ पीनेसे बालकोंकी खाँसी, श्वास और हिचकी आना बन्द होती हैं ॥ ५४ ॥

द्राक्षायासाभयाकृष्णाचूर्णं सक्षौद्रसर्पिषा ।
लीढं कासं निहन्त्याशु श्वासं च तमकं तथा ॥ ५५ ॥

दाख, धमासा, हरड और पीपल इनके चूर्णको शहद और घीके साथ मिलाकर सेवन करनेसे बालकोंकी खाँसी, श्वास और तमकरोग शीघ्र नष्ट होताहै ॥५५॥

दाडिमस्य च बीजानि जीरकं नागकेशरम् ।
चूर्णितं शर्कराक्षौद्रलीढं तृष्णानिवारणम् ॥ ५६ ॥

अनारके बीज, जीरा और नागकेशर इनको एकत्र पीसकर चीनी और शहदमें मिलाकर चटानेसे बालकोंकी तृषा निवारण होती है ॥ ५६ ॥

मायूरपक्षभस्मन्युषितजलं तेन भावितं पेयम् ।
तृष्णाघ्नं वटकाष्ठजभस्मजलं वक्त्रशोषजिद्वक्त्रे ॥ ५७ ॥

मोरपंखकी भस्मको जलमें भिजोकर अगलेदिन वह बासी जल बालकको पान करावे अथवा बडकी छालकी भस्म जलमें भिजोकर उसके बासी जलको पान करावें तो बालककी तृषा और मुखशोषरोग नष्ट होताहै ॥ ५७ ॥

पिष्टैश्छागेन पयसा दार्वीमुस्तकगैरिकैः ।
बहिरालेपनं शस्तं शिशोर्नेत्रामयार्त्तिजित् ॥ ५८ ॥

दारुहल्दी, नागरमोथा और गेरू इनको बकरीके दूधमें पीसकर नेत्रोंके बाहर पलकोंपर लेप करनेसे बालकोंके नेत्ररोगकी पीडा शान्त होती है ॥५८॥

मनःशिला शङ्खनाभिः पिप्पल्योऽथ रसाञ्जनम् ।
वर्त्तिः क्षौद्रेण संयुक्ता बाले सर्वाक्षिरोगनुत् ॥ ५९ ॥

मैनसिल, शङ्खनाभि, पीपल और रसौत इनको समान भाग लेकर शहदकेसाथ खरल करके इनकी बत्ती बनालेवे । इस बत्तीको बालककी आँखोंमें आँजनेसे सर्वप्रकारके नेत्ररोग नष्ट होते हैं ॥५९॥

मातृस्तन्यकटुस्नेहकाञ्जिकैर्भावितो जयेत् ।
स्वेदाद्दीपशिखोत्तप्तो नेत्रामयमलक्तकः ॥ ६० ॥

माताका दूध, कडवा तेल और महावर इनको क्रमसे ७ बार काँजीमें भावना देकर धूपमें सुखा लेवे । फिर दीपककी लौपर गरम करके उससे नेत्रोंमें स्वेद देनेसे बालकोंका कुकूणनामक नेत्ररोग शमन होताहै ॥६०॥

शुण्ठीभृङ्गनिशाकल्कः पुटपाकः ससैन्धवः ।
कुकूणकेऽक्षिरोगेषु तद्रसाश्च्योतनं हितम् ॥ ६१ ॥

सोंठ, भाँगरा और हल्दी इनको एकत्र पुटपाककर भस्म करलेवे । फिर उस भस्मके जलमें सैंधानमक डालकर उस रसको कुकूणक नामक नेत्ररोगमें नेत्रोंके भीतर टपकाना हितकर है ॥६१॥

कृमिघ्नालशिला दार्वी लाक्षा काञ्चनगैरिकः ।
चूर्णाञ्जनं कुकूणे स्याच्छिशूनां पोथकीषु च ॥ ६२ ॥

वायविडङ्ग, हरिताल, मैनसिल, दारुहल्दी, लाख और लालगेरू इनको समानांश ले बारीक चूर्ण करलेवे । फिर उस चूर्णको शहदमें मिलाकर सलाईसे आँखोंमें आँजे तो बालकोंके कुकूणक और पोथकीमें शीघ्र लाभ होताहै ॥६२॥

सुदर्शनामूलचूर्णाञ्जनं स्यात्तु कुकूणके ॥

कुकूणकरोगमें सुदर्शनवृक्षकी जडका चूर्ण आँजनेसे आराम होताहै ॥

गृहधूमनिशाकुष्ठवाजिकेन्द्रयवैः शिशोः ।
लेपस्तक्रेण हन्त्याशु सिध्मपामाविचर्चिकाः ॥ ६३ ॥

घरका धुआँ, हल्दी, कूठ, असगन्ध और इन्द्रजौ इनको समान भाग ले सबको मट्ठेके साथ एकत्र पीसकर लेप करनेसे बालकके सिध्म, खुजली और विचर्चिकादि विकार बहुत जल्द नष्ट होते हैं ॥६३॥

सारिवादि ।

सारिवातिललोध्राणां कषायो मधुकस्य च ।
संस्राविणि मुखे शस्तो धावनार्थं शिशोः सदा ॥ ६४ ॥

अनन्तमूल, तिल, लोध और मुलहठी इनका काढा बनाकर उससे मुख धोवे तो बालकका मुखस्रावरोग नष्ट होताहै ॥६४॥

मुस्तकादि ।

मुस्तकातिविषाशुण्ठीबालकेन्द्रयवैः कृतम् ।
क्वाथं शिशुः पिबेत्मातः सर्वातीसारनाशनम् ॥ ६५ ॥

नागरमोथा, अतीस; सोंठ, सुगन्धवाला और इन्द्रजौ इनका क्वाथ प्रातःकाल बालकको सेवन करानेसे सर्वप्रकार अतीसाररोग नाश होता है ॥ ६९ ॥

हरिद्रादि।

हरिद्राद्वययष्ट्याह्वसिंहीशक्रयवैः कृतः।
शिशोर्ज्वरातिसारघ्नः कषायः स्तन्यदोषजित् ॥ ६६ ॥

हल्दी, दारुहल्दी, मुलहठी, कटेरी और इन्द्रजौ इनके कल्कद्वारा क्वाथ बनाकर बालककी माता अथवा धायको पान करानेसे ज्वर, अतीसार और स्तन्यदोष दूर होता है ॥ ६६ ॥

भद्रमुस्तादि।

भद्रमुस्ताभयानिम्बपटोलमधुकैः कृतः।
क्वाथः कोष्णः शिशोरेष निश्शेषज्वरनाशनः ॥ ६७ ॥

भद्रमोथा, हरड, नीमकी छाल, पटोलपात और मुलहठी इन औषधियोंका मन्दोष्ण क्वाथ बालकको सेवन करावे तो यह समग्रज्वरको नष्ट करता है ॥६७॥

समङ्गादि।

समङ्गाधातकीलोध्रसारिवाभिः शृतं जलम्।
दुर्द्धरेऽपि शिशोर्देयमतीसारे समाक्षिकम् ॥ ६८ ॥

वराहक्रान्ता, धायके फूल, लोध और अनन्तमूल इनके द्वारा बनाया हुआ क्वाथ शहदके साथ मिलाकर दुर्द्धर अतीसारमें बालकको देना चाहिये ॥ ६८ ॥

नागरादि।

नागरातिविषामुस्तबालकेन्द्रयवैः कृतम्।
कुमारं पाययेत्प्रातः सर्वातीसारनाशनम् ॥ ६९ ॥

सोंठ, अतीस, नागरमोथा, सुगन्धवाला और इन्द्रजौ इनका क्वाथ बनाकर सुहाता २ प्रातःसमय बालकको पान करावे तो सर्वप्रकारके दस्त बन्द होते हैं ॥६९॥

बिल्वादि।

बिल्वचूतकषायेण लाजांश्चैव सशर्करान्।
आलोड्य पाययेद्बालं छर्द्यतीसारनाशनम् ॥ ७० ॥

बेलगिरी और आमकी छाल इनके काढेमें खीलोंका चूर्ण और खांड डालकर सबको एकमएक करके बालकको सेवन करानेसे कै, दस्त दूर होते हैं ॥ ७० ॥

पटोलादि ।

पटोलत्रिफलारिष्टहरिद्राकथितं पिबेत् ।
क्षतवीसर्पविस्फोटज्वराणां शान्तये शिशुः ॥७१॥

क्षत, वीसर्प, विस्फोट और ज्वरादिरोगोंको शान्त करनेके लिये बालकको परवल, त्रिफला, नीमकी छाल, और हल्दी इनका क्वाथ पान कराना हितकारी है ॥

पञ्चमूलादि ।

पञ्चमूलीकषायेण सघृतेन पयः शृतम् ।
सशृङ्गवेरं सगुडं पीतं हिक्कार्दितः पिबेत् ॥ ७२ ॥

बेल, शोनापाठा, कुम्भेर, पाढर, अरणी इनकी छालोंको समान भागसे मिश्रित दो तोले, जल ३२ तोले और दूध १६ तोले लेकर सबको एकत्र कर पकावे । जब दूधमात्र अवशिष्ट रहे तब उसको उतारकर उसमें घी, अदरखका रस और गुड डालकर पान करानेसे बालकको हिचकी आना दूर होती है ॥ ७२ ॥

बिल्वादि ।

बिल्वशक्राम्बुमोचादसिद्धमाजं पयः शिशोः ।
सामां सरक्तां ग्रहणीं पीतं हन्यात्रिरात्रतः ॥ ७३ ॥

बेलगिरी, इन्द्रजौ, सुगन्धवाला, मोचरस और नागरमोथा इन औषधियोंके काथद्वारा बकरीके दूधको सिद्ध कर पान करानेसे बालककी आम और रक्तसहित संग्रहणी तीन दिनमें ही नष्ट होती है ॥ ७३ ॥

शृङ्ग्यादि ।

शृङ्गीं समुस्तातिविषां विचूर्ण्य लेहं विदध्यान्मधुना शिशूनाम् । कालज्वरच्छर्दिभिरर्दितानां समाक्षिकां चातिविषां तथैकाम् ॥ ७४ ॥

काकड़ासिङ्गी, नागरमोथा और अतीस इनको चूर्णकरके शहदमें मिलाकर अथवा केवल अतीसके चूर्णको ही शहदमें मिलाकर बालकोंको चटानेसे बच्चोंकी खाँसी, ज्वर और वमनादि रोगोंकी निवृत्ति होती है ॥ ७४ ॥

रजन्यादि ।

रजनी दारु सरलं श्रेयसी बृहतीद्वयम् ।
पृश्निपर्णी शताह्वा च लीढं माक्षिकसर्पिषा ॥७५ ॥

ग्रहणी दीपनं हन्ति मारुतार्त्तिं सकामलाम् ।
ज्वरातीसारपाण्डुघ्नं बालानां सर्वरोगजित् ॥ ७६ ॥

हल्दी, देवदारु, धूपसरल, गजपीपल, कटेरी, बड़ीकटेरी, पृश्निपर्णी और सौंया इनके चूर्णको बराबर भाग ले घी और शहदमें मिलाकर चटानेसे बालकोंके संग्रहणी, मन्दाग्नि, वातरोग, कामला, ज्वर अतीसार, पाण्डु एवं अन्यान्य सर्वप्रकारके रोग दूर होते हैं ॥ ७५ ॥ ७६ ॥

कर्कटादि ।

कर्कटातिविषा शुण्ठी धातकी बिल्वबालकम् ।
मुस्तं मज्जां च कोलस्य मधुना सह मेलयेत् ॥ ७७ ॥
हन्ति ज्वरमतीसारं दुर्वारं ग्रहणीगदम् ।
छर्दिं रक्तस्रुतिं कासं श्वासं पश्चाद्रुजं तथा ॥ ७८ ॥

काकड़ासिंगी, अतीस, सोंठ, धायके फूल, बेलगिरी, सुगन्धवाला, नागरमोथा और बेरकी गुठलीकी गिरी इन औषधियोंके चूर्णको शहदमें मिलाकर सेवन करानेसे बालकोंकी ज्वर, दस्त, दुस्तर, संग्रहणी, वमन, रक्तस्राव, खाँसी, श्वास और पश्चाद्रोग प्रभृति व्याधियाँ शमन होती हैं ॥ ७७ ॥ ७८ ॥

बालचतुर्भद्रिका ।

घनकृष्णारुणाशृङ्गीचूर्णं क्षौद्रेण संयुतम् ।
शिशोर्ज्वरातिसारघ्नं श्वासकासवमीहरम् ॥ ७९ ॥

नागरमोथा, पीपल, अतीस और काकड़ासिंगी इन सबके बारीक चूर्णको शहदके साथ मिश्रित कर चटानेसे बालकके ज्वर, दस्त, श्वास, खाँसी और वमनादि विकार नष्ट होते हैं ॥ ७९ ॥

धातक्यादि ।

धातकीबिल्वधन्याकलोध्रेन्द्रयवबालकैः ।
लेहः क्षौद्रेण बालानां ज्वरातीसारवान्तिजित् ॥ ८० ॥

धायके फूल, बेलगिरी, धनियाँ, लोध, इन्द्रजौ और सुगन्धवाला इनको समान भाग ले एकत्र पीसकर शहदके साथ मिलाकर चटानेसे बालकोंके ज्वर, दस्त और वमनरोग दूर होते हैं ॥ ८० ॥

पुष्करादि ।

पुष्करातिविषाशृङ्गीमागधीधन्वयासकैः ।
तच्चूर्णं मधुना लीढं शिशूनां पञ्चकासनुत् ॥ ८१ ॥

पोहकरमूल, अतीस, काकडासिंगी, पीपल और धमाला इनके चूर्णको शहदमें मिलाकर चटावे तो बालकोंकी पाँचों प्रकारकी खाँसी नष्ट होती हैं ॥ ८१ ॥

बालरोगान्तकरस।

शाणं सूतस्य शुद्धस्य गन्धकस्य च तत्समम्।
सुवर्णमाक्षिकस्यापि चार्द्धभागं विनिक्षिपेत् ॥ ८२ ॥
ततः कज्जलिकां कृत्वा लौहपात्रे दृढे नवे।
केशराजस्य भृङ्गस्य निर्गुण्ड्याः पत्रसम्भवम् ॥८३॥
स्वरसं काकमाच्याश्च ग्रीष्मसुन्दरकस्य च।
सूर्यावर्त्तकशालिञ्चभेकपर्णीरसं तथा ॥ ८४ ॥

शुद्ध पारा और शुद्ध गन्धक प्रत्येक चार चार माशे और सोनामाखी दो माशे लेवे। फिर इनकी एकत्र कज्जली बनाकर उसको लोहेके पात्रमें रख कुकुरभाँगरा, भाँगरा, निर्गुण्डी, मकोय, गूमा शाक, हुलहुल, शालिञ्चशाक और मण्डूकपर्णी इनके रसमें यथाक्रम एक एक बार भावना देवे ॥ ८२-८४ ॥

श्वेतापराजितायाश्च मूलं दद्याद्विचक्षणः।
देयं रसार्द्धभागेन चूर्णं मरिचसम्भवम् ॥ ८५ ॥
शुभे शिलामये पात्रे लौहदण्डेन मर्दयेत्।
शुष्कमातपसंयोगाद्वटिकां कारयेद्भिषक् ॥ ८६ ॥
प्रमाणं सर्षपस्येव बालानां विनियोजयेत्।
हन्ति त्रिदोषकं चैव ज्वरमामं सुदारुणम् ॥ ८७ ॥
कासं पञ्चविधं चापि सर्वरोगंनिहन्ति च।
शिशूनां रोगनाशाय निर्मितोऽयं महारसः ॥ ८८ ॥

फिर उसमें सफेद अपराजिताकी जडका चूर्ण दो माशे और काली मिरचका चूर्ण दो माशे मिलाकर उसको उत्तम पत्थरके वर्त्तनमें रख लोहेके दण्डेसे अच्छे प्रकार खरल करे। पश्चात् धूपमें सुखाकर सरसोंकी बराबर गोलियाँ बनालेवे। इनमेंसे प्रतिदिन एक एक गोली सेवन करानेसे बालकोंके त्रिदोषजनित ज्वर दारुण आम ज्वर, पाँच प्रकारकी खाँसी एवं अन्य सर्व प्रकारके रोग शीघ्र नष्ट होते हैं। यह महारस बालकोंके रोगोंको दूर करनेके लिये रचा गया है ॥ ८५-८८ ॥

कुमारकल्याणरस ।

सिन्दूरं मौक्तिकं हेम व्योमायः स्वर्णमाक्षिकम् ।
कन्यारसेन संमर्द्य कुर्यान्मुद्गमिता वटीः ॥ ८९ ॥
वटिकां वटिकार्द्धं वा वयोऽवस्थां विवेच्य च ।
क्षीरेण सितया सार्द्धं बालरोगे प्रयोजयेत् ॥ ९० ॥
कुमाराणां ज्वरं श्वासं कसनं च सुदारुणम् ।
ग्रहदोषांश्च विविधान् स्तन्यस्याग्रहणं तथा ॥ ९१ ॥
कामलामतिसारं च कृशतां मन्दवह्नितात् ।
रसः कुमारकल्याणो नाशयेन्नात्र संशयः ॥ ९२ ॥

रससिन्दूर, मोतीकी भस्म, सुवर्ण, अभ्रक, लोहा और सोनामाखी इन सबकी भस्मको समान भाग ले घीग्वारके रसमें उत्तम प्रकार खरल करके मूँगकी बराबर गोलियाँ बनालेवे । फिर प्रतिदिन प्रातःसमय बालककी अवस्था और रोगका विचारकर एक गोली अथवा आधी गोली दूध और मिश्रीके साथ सेवन करावे तो यह बालकोंके ज्वर, श्वास, दारुण खाँसी, अनेक प्रकारके ग्रहदोष, स्तन्यदोष, कामला, अतीसार, कृशता, मन्दाग्नि और अन्य सब प्रकारके रोगोंको यह कुमारकल्याणरस निश्चय नष्ट करता है ॥ ८९-९२ ॥

अश्वगन्धाघृत ।

पादकल्केऽश्वगन्धायाः क्षीरे दशगुणं पचेत् ।
घृतं पेयं कुमाराणां पुष्टिकृद्बलवर्णकृत् ॥ ९३ ॥

असगन्धके १ सेर कल्क और दशगुने दूधमें यथाविधि २ सेर घृतको पकावे । इस घृतको पीनेसे बालकोंके अङ्गोंकी पुष्टि होतीहै तथा बल, वर्ण उत्पन्न होता है ॥ ९३ ॥

बालचाङ्गेरीघृत ।

चाङ्गेरीस्वरसे सर्पिश्छागक्षीरं समैः पचेत् ।
कपित्थव्योषसिन्धूत्थसमङ्गोत्पलवालकैः ॥ ९४ ॥
सबिल्वधातकीमोचैः सिद्धं सर्वातिसारजित् ।
ग्रहणीं दुस्तरां हन्ति बालानां तु विशेषतः ॥ ९५ ॥

अम्लनोनियाके २ सेर रसमें घी २ सेर, बकरीका दूध २ सेर एवं कैथ, सोंठ, मिरच, पीपल, सैंधानमक, वराहक्रान्ता, लालकमल, सुगन्धवाला, बेलगिरी, धायके

फूल और मोचरस इन सबका समान भाग मिश्रित कल्क एक सेर डालकर उत्तम प्रकार घृतको सिद्ध करलेवे। यह घृत सर्वप्रकारके अतीसार और विशेषकर बालकोंकी दुस्तर संग्रहणीको नष्ट करता है ॥ ९४ ॥ ९५ ॥

अष्टमंगलघृत।

वचा कुष्ठं तथा ब्राह्मी सिद्धार्थकमथापि वा।
सारिवा सैन्धवं चैव पिप्पलीघृतमष्टकम् ॥ ९६ ॥
मेध्यं घृतमिदं सिद्धं पातव्यं च दिनेदिने।
दृढस्मृतिः क्षिप्रमेधः कुमारो बुद्धिमान् भवेत् ॥ ९७ ॥
न पिशाचा न रक्षांसि न भूता न च मातरः।
प्रभवन्ति कुमाराणां पिबतामष्टमङ्गलम् ॥ ९८ ॥

वच, कूठ, ब्राह्मी, सफेद सरसों, अनन्तमूल, सैंधानमक और पीपल इनका समान भाग मिलाहुआ चूर्ण १ सेर और घी २ सेर लेकर आठ सेर जलमें पकावें जब उत्तम प्रकार पककर सिद्ध होजाय तब यह घृत प्रतिदिन उचित मात्रासे बालकको पान करावे। इसके सेवनसे बालक दृढ स्मृतिवाला, मेधावान् कुशाग्र बुद्धिवाला होताहै। इस अष्टमङ्गलनामक घृतको पीनेवाले बालकोंको पिशाच, राक्षस, भूत और षोडशमातृकायें बाधनेके लिये समर्थ नहीं होती हैं ॥ ९६–९८ ॥

कुमारकल्याणघृत।

शङ्खपुष्पी वचा ब्राह्मी कुष्ठं त्रिफलया सह।
द्राक्षा सशर्करा शुण्ठी जीवन्ती जीरकं बला ॥ ९९ ॥
शठी दुरालभा बिल्वं दाडिमं सुरसा स्थिरा।
मुस्तं पुष्करमूलं च सूक्ष्मैला गजपिप्पली ॥ १०० ॥
एषां कर्षसमैर्भागैर्घृतप्रस्थं विपाचयेत्।
कषाये कण्टकार्याश्च क्षीरे तस्मिंश्चतुर्गुणे ॥ १०१ ॥

शंखपुष्पी, वच, ब्राह्मी, कूठ, त्रिफला, दाख, चीनी, सोंठ, जीवन्ती, जीरा, खिरेंटी, कचूर, धमासा, बेलगिरी, अनारका बक्कल, तुलसी, शालपर्णी, नागरमोथा, पोहकरमूल, छोटी इलायची और गजपीपल इन प्रत्येकको एकएक कर्ष लेकर चूर्ण करलेवे। फिर इस चूर्ण और एक प्रस्थ घृतको कटेरीके दो प्रस्थ क्वाथ और ४ प्रस्थ दूधमें डालकर विधिपूर्वक पकावे ॥ ९९–१०१ ॥

एतत्कुमारकल्याणं घृतरत्नं सुखप्रदम् ।
बलपुष्टिकरं धन्यं पुष्ट्यग्निबलवर्द्धनम् ॥ १०२ ॥
छायासर्वग्रहालक्ष्मीकृमिदन्तमदापहम् ।
सर्वबालामयं हन्ति दन्तोद्भेदं विशेषतः ॥ १०३ ॥

यह कुमारकल्याण नामक घृतरत्न सुखको देनेवाला, बल और पुष्टिको करनेवाला, अग्निबलको बढानेवाला तथा छाया, समस्त ग्रह, अलक्ष्मी, कृमिरोग, दन्तरोग बालकोंके सब रोग और विशेषकर दन्तोद्भेदरोगको नष्ट करनेवाला है ॥१०२॥।१०३॥

लाक्षादितैल ।

लाक्षारससमं सिद्धं तैलं मस्तु चतुर्गुणम् ।
रास्नाचन्दनकुष्ठाब्दवाजिगन्धानिशायुगैः ॥ १०४ ॥
शताह्वादारुयष्ट्याह्वमूर्वातिक्ताहरेणुभिः ।
बालानां ज्वररक्षोघ्नमभ्यङ्गाद्बलवर्णकृत् ॥ १०५ ॥

लाखका रस १ प्रस्थ, तिलका तेल १ प्रस्थ और दहीका तोड ४ प्रस्थ एवं रायसन, लालचन्दन, कूठ, नागरमोथा, असगन्ध, हल्दी, दारुहल्दी, सोया, देवदारु, मुलहठी, मूर्वा, कुटकी और रेणुका इनका कल्क समान भाग मिलित एक सेर लेवे । सबको यथाविधि एकत्र करके उत्तम प्रकार तेलको पकावे । यह तेल बालकोंके शरीरपर मालिश करनेसे जीर्णज्वर और राक्षसादिकी बाधा नष्ट होती है तथा बल और वर्णकी वृद्धि होती है ॥ १०४ ॥ १०५ ॥

इति भैषज्यरत्नावल्यां बालरोगचिकित्सा ॥

विषकी चिकित्सा ।

स्थावरेण विषेणार्त्तं नरं यत्नेन वामयेत् ।
वमनेन समं नास्ति यतस्तस्य चिकित्सितम् ॥ १ ॥

स्थावरविषसे पीडित मनुष्यको प्रथम यत्नपूर्वक वमन करावे । क्योंकि वमन करानेके समान विषनाशक अन्य औषधि नहीं है ॥१॥

विषमत्यन्तमुष्णञ्च तीक्ष्णं च कथितं यतः ।
अतः सर्वविषे युक्तः परिषेकस्तु शीतलः ॥ २ ॥

औष्ण्यात्तैक्ष्ण्याद्विशेषेण विषं पित्तं प्रकोपयेत् ।
वमितं सेचयेत्तस्माच्छीतलेन जलेन च ॥ ३ ॥

विष स्वभावतः अत्यन्त उष्ण अत्यन्त तीक्ष्णवीर्य होता है इस कारण सर्वप्रकारके विषोंमें शीतलक्रिया करे। विष अत्यन्त उष्ण होनेसे पित्तको कुपित करदेता है इसलिये वमन करानेके पीछे रोगीको शीतल जलसे सेचनकरे २॥३

पाययेन्मधुसर्पिर्भ्यां विषघ्नं भेषजं द्रुतम् ।
भोक्तुमम्लरसं दद्यात्सितया च समन्वितम् ॥ ४ ॥

घृत तथा शहदके साथ विषनाशक औषधि शीघ्र प्रयोग करे अथवा मिश्रीके साथ खटाई मिलाकर भक्षण करानी चाहिये ॥ ४ ॥

सर्वैरेवोदितः सर्पैः शाखादष्टस्य देहिनः ।
दंशस्योपरि बध्नीयादरिष्टाश्चतुरङ्गुले ॥ ५ ॥
न गच्छति विषं देहमरिष्टाभिर्निवारितम् ।
दहेद्दंशमथोत्कृत्य यत्र बन्धो न जायते ॥ ६ ॥

यदि किसी मनुष्यके हाथ अथवा पाँवमें साँप काटखाय तो तत्क्षण काटेहुए स्थानसे ४ अंगुल ऊपर उसके रस्सीसे अथवा डोरेसे खुब कसकर बन्धन बाँधदेवे। इससे विष सब शरीरमें नहीं फैल सकेगा। जिस दंशस्थानमें बन्ध न बँध सकता हो उस स्थानको अस्त्रसे चीरकर दागदेवे ॥ ५ ॥ ६ ॥

मूलं तण्डुलवारिणा पिबति यः प्रत्यङ्गिरासम्भवं
निष्पिष्टं शुचिभद्रयोगदिवसे तस्याहिभीतिः कुतः ।
दर्पादेव फणी यदा दशति तं मोहान्वितो मूलयन्
स्थाने तत्र स एव याति नियतं वक्त्रं यमस्याचिरात् ॥७॥

आषाढके महीनेमें पुष्यनक्षत्र और शुभदिनमें सिरसकी जडको चावलोंके जलमें पीसकर जो पुरुष पीता है उसको कहीं भी सर्पका भय नहीं रहता। यदि क्रोधके कारण सर्प उस पुरुषको काट भी लेता है तो वह सर्प मोहको प्राप्त होकर गिरपडता है और वह उसी स्थानमें बहुत जल्द यमराजके मुँहका ग्रास होता है ॥ ७ ॥

मधुरनिम्बपत्राभ्यां योऽत्ति मेषगते रवौ ।
अब्दमेकं न भीतिः स्याद्विषात्तस्य न संशयः ॥ ८ ॥

जो पुरुष वैशाखके महीनेमें मेषकी संक्रान्तिके दिन मसूरकी दालके दो दानें और नीमके दो पत्तोंको एकत्र पीसकर भक्षण करे तो उसको एक वर्ष पर्यन्त सर्पके विषसे भय नहीं रहता ॥ ८

धवलपुनर्नवजटया तण्डुलजलपीतया च पुष्यर्क्षे ।
अपहरति खलु विषधरोपद्रवमावत्सरं पुंसाम् ॥ ९ ॥

पुष्यनक्षत्रमें सफेद पुनर्नवेकी जडको चावलोंके जलके साथ पीसकर सेवन करनेसे मनुष्योंको एकवर्षतक सर्पका भय कदापि नहीं होता ॥ ९ ॥

गृहधूमो हरिद्रे द्वे समूलं तण्डुलीयकम् ।
अपि वासुकिना दष्टः पिबेद्दधिघृताप्लुतम् ॥ १० ॥

घरका धुआँ, हल्दी, दारुहल्दी और चौलाईकी जड इनको समान भाग ले एकत्र पीसकर दही और घीमें मिलाकर पीवे तो वासुकिसर्पद्वारा काटाहुआ भी पुरुष आरोग्य होता है ॥ १० ॥

कुलिकमूलनस्येन कालदष्टोऽपि जीवति ॥ ११ ॥

कोकिलावृक्षकी जडको पीसकर सूंघनेसे साँपका काटाहुआ मृतप्राय पुरुष भी जीजाता है ॥ ११ ॥

शिरीषपुष्पस्वरसे भावितं मरिचं सितम् ।
सप्ताहं सर्पदष्टानां नस्यपानाञ्जने हितम् ॥ १२ ॥

सफेद मिरचको सिरसके फूलोंके रसमें ७ दिनतक भावना देकर पीसलेवे । फिर यह चूर्ण साँपसे काटे हुए मनुष्योंको पान, नस्य और अभ्यंजनादिरूपसे सेवन कराना हितकारी है ॥ १२ ॥

द्विपलं नतकुष्ठाभ्यां घृतक्षौद्रचतुःपलम् ।
अपि तक्षकदष्टानां पानमेतत्सुखप्रदम् ॥ १३ ॥

तगर और कूठ इन दोनोंको आठ आठ तोले लेकर खूब बारीक पीसले । फिर यह चूर्ण चार चार पल प्रमाण घी और शहदमें मिलाकर पान करे तो तक्षकसे काटे हुए पुरुषोंको भी सुख प्राप्त होता है ॥ १३ ॥

वन्यकर्कोटजं मूलं छागमूत्रेण भावितम् ।
नस्यं काञ्जिकसंयुक्तं विषोपहतचेतसः ॥ १४ ॥

वनककोडेकी जडको बकरीके मूत्रमें मिलाकर और काँजीमें पीसकर साँपसे काटे हुए मनुष्यको नस्य देवे, इससे विष दूर होता है ॥१४॥

पीते विषे स्याद्वमनं च त्वक्स्थे प्रदेहसेकादि सुशीतलं च ॥

जिस मनुष्यने विष पान किया हो उसको तत्काल वमन करानी चाहिये और जो त्वचामें विष स्थित हो तो उसके शरीरपर शीतल द्रव्योंका लेप और सेचन करना चाहिये ॥ १५ ॥

अगारधूममञ्जिष्ठारजनीलवणोत्तमैः ।
लेपो जयत्याखुविषं कर्णिकायाश्च पातनम् ॥ १६ ॥

घरका धुआँ, मञ्जीठ, हल्दी और सैंधानमक इनको जलमें पीसकर लेप करनेसे चूहेका विष और कर्णिकानामक कीडेके अंकुर दूर होते हैं ॥ १६ ॥

सोमवल्कोऽश्वगन्धा च गोजिह्वा हंसपाद्यपि ।
रजन्यौ गैरिकं लेपो नखदन्तविषापहः ॥ १७ ॥

सफेद खेर, असगन्ध, गोजिया (गाजुवाँ), लाल लज्जालु, हल्दी, दारुहल्दी और गेरू इनको समान भाग ले जलमें पीसकर लेप करनेसे नाखूनका और दाँतोंसे काटेका विष दूर होता है ॥ १७ ॥

यः कासमर्दनेत्रं वदने निक्षिप्य कर्णफूत्कारम् ।
मनुजो ददाति शीघ्रं जयति विषं वृश्चिकानां सः ॥ १८ ॥

जो पुरुष कसौंदीके वृक्षकी नलकालीसे रोगीके कानमें फूंक मारे तो बिच्छूका विष तत्काल उतरता है ॥ १८ ॥

उष्णं गव्यं घृतं चापि सैन्धवेन समन्वितम् ।
वृश्चिकस्य विषं हन्ति लेपनात्पर्वतात्मजे ॥ १९ ॥

शिवजी कहते हैं कि, हे पार्वती ! गरम २ गौके घीको सैंधेनमकके साथ मिलाकर लेप करनेसे बिच्छूका विष शीघ्र नष्ट होता है ॥ १९ ॥

शिरीषस्य तु बीजं वै स्नुहीक्षीरेण घर्षितम् ।
तल्लेपेन महादेवि नश्येत्कुक्कुरजं विषम् ॥ २० ॥

हे महेश्वरि ! सिरसके बीजोंको थूहरके दूधमें पीसकर वा घिसकर लेप करनेसे कुत्तेका विष निश्चय नाश होता है ॥ २० ॥

पिष्टतण्डुलमध्यस्थं भक्षितं मेषलोमकम् ।
कुक्कुरस्य विषं हन्ति नात्र कार्या विचारणा ॥ २१ ॥

चावलोंको पीसकर उनमें भेंडका रुआँ भरकर भक्षण करनेसे कुत्तेका विष नष्ट होता है । इसमें कुछ सन्देह नहीं ॥ २१ ॥

वचाहिङ्गुविडङ्गानि सैन्धवं गजपिप्पली ।
पाठा प्रतिविषा व्योषं काश्यपेन विनिर्मितम् ॥
दशाङ्गमगदं पीत्वा सर्वकीटविषं जयेत् ॥ २२ ॥

बच, हींग, वायविडङ्ग, सैंधानमक, गजपीपल, पाढ, अतीस, सोंठ, मिरच और पीपल इन औषधियोंके समान भाग मिश्रित बारीक चूर्णको सेवन करनेसे सर्व प्रकार कीडोंके विष दूर होते हैं । इस चूर्णको कश्यप ऋषिने बनायाहै ॥२२॥

कीटदष्टक्रियाः सर्वाः समानाः स्युर्जलौकसाम् ॥ २३ ॥

कीडे आदिकोंकी विषनाशक चिकित्साके समान ही जलचर जीवोंके विषकी चिकित्सा करनी चाहिये ॥ २३ ॥

अपराजितामूलं च घृतेन त्वग्गतं विषम् ।
पयसाऽसृग्गतं हन्ति मांसगं कुष्ठचूर्णतः ॥ २४ ॥
अस्थिगं रजनीयुक्तं मेदोगं काकोलीयुतम् ।
मज्जागं पिप्पलीयुक्तं चण्डालीकन्दसंयुतम् ॥
शुक्रगं हन्ति लौहित्यं तस्माद्याऽपराजिता ॥ २५ ॥

अपराजिता (कोयल) की जडको घीके साथ सेवन करनेसे त्वचामें स्थित विष, दूधके साथ खानेसे रक्तगत विष, कूठके चूर्णके साथ खानेसे मांसगत विष, हल्दीके चूर्णके साथ सेवन करनेसे अस्थिगत विष, काकोलीके साथ सेवन करनेसे मेदोगत विष, पीपलके साथ खानेसे मज्जागत विष और चण्डालकन्दके साथ सेवन करनेसे शुक्रगतविष नष्ट होता है । इस कारण सर्वप्रकारके विषोंमें अपराजिताकी मूलको सेवन करना चाहिये ॥ २४ ॥ २५ ॥

द्वे हरिद्रे शिला तालं कुङ्कुमं मुस्तकं जलैः ।
गुडिका लेपमात्रेण विषं हन्ति महाद्भुतम् ॥ २६ ॥

दोनों हल्दी, मैनसिल, हरिताल, केशर और नागरमोथा इनको जलमें पीस कर गोली बनालेवे । उस गोलीको जलमें घिसकर लगानेसे महाभयानक विष सहजमें ही नाश होता है ॥ २६ ॥

घृतमधुनवनीतं पिप्पलीशृङ्गवेरं मरिचमपि तु दद्यात्
ससमं सैन्धवेन । यदि भवति सरोषैस्तक्षकैर्वापि
दष्टोऽगदमिह खलु पीत्वा निर्विषं तत्क्षणेन ॥ २७ ॥

घी, शहद, नैनीघी, पीपल, सोंठ, मिरच और सैंधानमक इनको एकत्र पीसकर सेवनकरनेसे क्रोधयुक्त तक्षकसे कटाहुआ पुरुष भी तत्क्षण विषरहित होताहै २७

नक्तमालफलं व्योषं बिल्वमूलं निशाद्वयम् ।
सौरसं पुष्पमाजं वा मूत्रं बोधनमञ्जनम् ॥ २८ ॥

करञ्जके फल, त्रिकुटा, बेलकी जड, हल्दी, दारुहल्दी और तुलसीकी मञ्जरी इन सबको एकत्र बकरीके मूत्रमें पीसकर नेत्रोंमें आँजे तो सर्पके डसनेसे बेहोश हुआ पुरुष शीघ्र चैतन्यलाभ करता है ॥ २८ ॥

जलेन लाङ्गलीकन्दं नस्यं सर्पविषापहम् ।
वारिणा टङ्कणं पीतमथवाऽर्कस्य मूलकम् ॥ २९ ॥

कलिहारीकी जडको जलमें पीसकर सूँघनेसे या सुहागेको अथवा आककी जडको जलमें पीसकर पीनेसे सर्पविष दूर होता है ॥२९॥

कपोतमांसं ससिताक्षौद्रं कण्ठगते विषे ।
लिह्यादामाशयगते ताभ्यां चूर्णपलं नतम् ॥ ३० ॥

कबूतरके मांसके चूर्णको मिश्री और शहदके साथ मिलाकर सेवन करनेसे कण्ठगत विष दूर होता है और तगरके चूर्णको १ पल प्रमाण ले मिश्री तथा शहदके साथ भक्षण करनेसे आमाशयगतविष नष्ट होता है ॥ ३० ॥

विषे पक्वाशयगते पिप्पलीरजनीद्वयम् ।
मञ्जिष्ठां च समं पिष्ट्वा गोपित्तेन नरः पिबेत् ॥ ३१ ॥

पीपल, हल्दी, दारुहल्दी, मंजीठ और गोरोचन ये प्रत्येक औषधियें समान भाग लेकर जलमें पीसकर सेवन करनेसे पक्वाशयगत विषको दूर करती है॥३१

रजनीसैन्धवक्षौद्रसंयुक्तं घृतमुत्तमम् ।
पानं मूलविषार्त्तस्य दिग्धविद्धस्य चेष्यते ॥ ३२ ॥

हल्दी, सैंधानमक, शहद और उत्तम गोघृत इनको समान भाग ले एकत्र कर यथाविधिसे मर्दनकर मूलविषसे पीडित अथवा दिग्धविद्ध (विषलिप्त बाणादिसे हत) मनुष्यको पान कराना चाहिये ॥३२॥

सितामधुयुतं चूर्णं ताम्रस्य कनकस्य वा ।
लेहं प्रशमयत्युग्रं सर्वसंयोगजं विषम् ॥ ३३ ॥

शुद्ध ताँबेकी भस्म और स्वर्णभस्मको बराबर भाग ले मिश्री और शहदमें मिलाकर चाटनेसे सर्वप्रकारका उग्रविष शमन होताहै ॥३३॥

अङ्कोटमूलनिःक्वाथं फाणितं सघृतं लिहेत् ।
तैलाक्तः स्विन्नसर्वाङ्गो गरदोषविषापहम् ॥ २४ ॥

अङ्कोलकी जडका क्वाथ बनाकर उसमें राव और घृत डालकर पान करे और अपने सब शरीरमें तेलकी मालिश करे तो गरदोष विष नष्ट होता है ॥ २४ ॥

कटभ्यर्ज्जुनशैरेयशेलुक्षीरिद्रुमत्वचः ।
चूर्णं कल्कः कषायो वा कीटलूताव्रणापहा ॥ २५ ॥

मालकाङ्गनी, अर्जुनकी छाल, पीलापियावाँसा, वड और गूलरकी छाल इनके चूर्ण कल्क अथवा क्वाथको सेवन करनेसे कीडे और मकडी आदिका विष दूर होता है ॥ २५ ॥

दंशे भ्रामणविधिना वृश्चिकविषहृत्कुठेरपादगुटिका ।
पुरधूमपूर्वमर्कच्छदमिव पिष्ट्वा कृतो लेपः ॥ २६ ॥

काली तुलसीकी जडको जलमें पीसकर गोली बनावे । उस गोलीको जलमें घिसकर बिच्छूसे काटे हुए स्थानपर लेप करे अथवा पहले दंशस्थानपर गूगलकी धूप देकर पश्चात् आकके पत्तोंको पीसकर लेप करनेसे बिच्छूका विष जाय ॥ २६ ॥

जीरकस्य कृतः कल्को घृतसैन्धवसंयुतः ।
सुखोष्णो वृश्चिकार्त्तानां स्याल्लेपो वेदनापहः ॥ २७ ॥

जीरेको पीसकर घृत और सैंधानमकमें मिलाकर बिच्छूके काटेहुए स्थानपर गरम करके लेप करनेसे उसकी पीडा कम होती है ॥ २७ ॥

कुङ्कुमकुनटीकर्कटपलहरितालैः कुसुम्भसम्मिलितैः ।
कृतगुडिका भ्रामणतो वृश्चिकगोधासरटादिविषजित् ॥२८

केशर, मैनसिल, केंकडेका मांस, हरिताल और कसूमके फूल इन सबको एकत्र मर्दन कर गोली बनालेवे । फिर उक्त गोलीको जलमें घिसकर दंशस्थान पर लगानेसे बिच्छू, गोह और गिरगटादि जीवोंका विष नष्ट होता है ॥ २८ ॥

लेप इव भेकगरलं शिरीषबीजैः स्नुहीपयःसिक्तैः ।
प्रणुदन्ति त्र्यहमशिता अङ्कोटजटाः कुष्ठसम्मिलिताः॥२९

सिरसके बीजोंको पीसकर उनको थूहरके दूधमें भिजोकर लेप करनेसे अथवा अङ्कोलकी जड, वालछड और कूठ इनके क्वाथ या कल्कको तीन दिनतक भक्षण करनेसे मेंडकका विष दूर होता है ॥ २९ ॥

मरिचमहौषधबालकनागाह्वैर्मक्षिकाविषे लेपः ॥

मिरच, सोंठ, सुगन्धवाला और नागकेशर इनको एकत्र पीसकर लेप करनेसे मक्खीका विष नष्ट होता है ॥

कालाविषमपनयतो मूले मिलिते पटोलनीलिकयोः ॥४०॥

परवलकी जड और नीलवृक्षकी जड इन दोनोंको एकत्र पीसकर लेप करे तो कालाविष नाश होता है ॥ ४० ॥

श्लेष्मणः कर्णगूथस्य वामानामिकया कृतः ।
लेपो हन्याद्विषं घोरं नृमूत्रासेचनं ततः ॥ ४१ ॥

बायें हाथकी अनामिका अंगुलिसे मुँहके थूकको अथवा कानके मैलको निकालकर दंशस्थानपर लगानेसे अथवा उस स्थानपर मनुष्यके मूत्रको सेचन करनेसे सर्पादि सर्वप्रकारके जन्तुओंका उग्र विष शीघ्र नष्ट होता है ॥ ४१ ॥

इति भैषज्यरत्नावल्यां विषचिकित्सा ॥

अथ रसायनाधिकारः ।

यज्जराव्याधिविध्वंसि भेषजं तद्रसायनम् ।
पूर्वे वयसि मध्ये वा शुद्धकायः समाचरेत् ॥ १ ॥

जो औषध जरा (बुढापा) और रोगको नष्ट करनेवाली हैं उनको रसायन कहते हैं। युवावस्थाके प्रारम्भमें अथवा मध्यमें वमन और विरेचनादिसे शरीरको अच्छेप्रकार शुद्ध कर रासायनिक औषधि सेवन करे ॥ १ ॥

नाविशुद्धशरीरस्य युक्तो रासायनो विधिः ।
न भाति वाससि क्लिष्टे रङ्गयोग इवार्दितः ॥ २ ॥

यदि शरीरको विना शुद्धकिये ही रसायन औषधि सेवन की जाती है तो वह इस प्रकार गुण नहीं करती जिस प्रकार मलिन वस्त्रमें रँग देनेसे उसपर अच्छेप्रकार रँग नहीं चढता है ॥ २ ॥

दीर्घमायुः स्मृतिं मेधामारोग्यं तरुणं वयः ।
प्रभावर्णस्वरौदार्यं देहेन्द्रियबलोदयम् ॥ ३ ॥
वाक्सिद्धिं वृषतां कान्तिमवाप्नोति रसायनात् ।
लाभोपायो हि शस्तानां रसादीनां रसायनम् ॥ ४ ॥

रसायनको सेवन करनेसे दीर्घायु, स्मृतिशक्ति, मेधा, आरोग्यता, तरुणावस्था, प्रभा, वर्ण, स्वरकी सुन्दरता, उदारता, शरीर और इन्द्रियोंमें बल, वाक्पटुता, वृष्यता और कान्तिलाभ होता है । देहमें स्थित रस और रक्तादि उत्तम पदार्थोंकी जिस उपायके करनेसे प्राप्ति हो उसको ही रसायन कहते हैं ॥

ये मासमेकं स्वरसं पिबन्ति दिने दिने भृङ्गरजःसमुत्थम् ।
क्षीराशिनस्ते बलवर्णयुक्ताः समाशतं जीवितमाप्नुवन्ति ॥५॥

केवल दूधको ही पान करते हुए जो पुरुष प्रतिदिन नियमसे एक मास पर्यन्त भांगरेके रसको पान करते हैं वे बल, वर्ण और दीर्घायुसे युक्त होकर सौवर्षतक जीते हैं ॥ ५ ॥

मण्डूकपर्ण्याः स्वरसः प्रयोज्यः क्षीरेण यष्टीमधुकस्य चूर्णम् । रसो गुडूच्यास्तु समूलपुष्प्याः कल्कः प्रयोज्यः खलु शंखपुष्प्याः ॥६॥ आयुःप्रदान्यामयनाशनानि बलाग्निवर्णस्वरवर्द्धनानि । मेध्यानि चैतानि रसायनानि मेध्या विशेषेण तु शङ्खपुष्पी ॥ ७ ॥

मण्डूकपर्णीके स्वरस अथवा मुलहठीके चूर्णको दूधके साथ सेवन करनेसे या जड और पुष्पसहित गिलोयके रस वा शंखपुष्पीके कल्कको उक्त अनुपानके साथ सेवन करनेसे आयुकी वृद्धि होती है, सब रोग नष्ट होते हैं तथा बल, वर्ण, जठराग्नि और स्वरकी वृद्धि होती है। ये सब रसायन औषधें मेधाजनक हैं तो भी शंखपुष्पीसे विशेषकर मेधावृद्धि होती है ॥ ६ ॥ ७ ॥

पीताऽश्वगन्धा पयसाऽर्द्धमासं घृतेन तैलेन सुखाम्बुना वा ।
कृशस्य पुष्टिं वपुषो विधत्ते बालस्य सस्यस्य यथाऽम्बुवृष्टिः॥

असगन्धके चूर्णको दूध, घी, तिलतैल अथवा उष्ण जलके साथ सेवन करनेसे कृश मनुष्यके शरीरकी इस भाँति पुष्टि होती है जैसे वर्षाके जलसे धान्यके नवीन अंकुर पुष्ट होते हैं ॥ ८ ॥

धात्रीतिलान्भृङ्गरजोविमिश्रान् ये भक्षयेयुर्मनुजाः क्रमेण ।
ते कृष्णकेशा विमलेन्द्रियाश्च निर्व्याधयो वर्षशतं भवेयुः ॥

जो मनुष्य आमलों और तिलोंके चूर्णको भाँगरेके रसमें मिलाकर यथानियम भक्षण करें तो वे पुरुष कृष्णवर्णके केशोंवाले और निर्मल इन्द्रियवाले नीरोग होकर सौ वर्षपर्यन्त जीते हैं ॥ ९ ॥

वृद्धदारकमूलानि श्लक्ष्णचूर्णानि कारयेत्।
शतावर्या रसेनैव सप्तवारांश्च भावयेत् ॥ १० ॥
अक्षमात्रं तु तच्चूर्णं सर्पिषा सह योजयेत्।
मासमात्रोपयोगेन मतिमान् जायते नरः ॥
मेधावी स्मृतिमांश्चैव वलीपलितवर्जितः ॥ ११ ॥

विधारेकी जडको कूटपीस बारीक चूर्ण करलेवे। फिर उसको शतावरके रसमें सातवार भावना देकर प्रतिदिन एकएक तोलेकी मात्रासे घीमें मिलाकर सेवन करे। इसको एक महीने यथाविधि सेवन करनेसे मनुष्य अत्यन्त बुद्धिमान्, मेधावान्, स्मृतिमान् होता है और वली तथा पलितरोगका नाश होता है ॥

हस्तिकर्णरजः खादेत्प्रातरुत्थाय सर्पिषा।
यथेष्टाहारचारोऽपि सहस्रायुर्भवेन्नरः ॥ १२ ॥
मेधावी बलवान् कामी स्त्रीशतानि व्रजत्यसौ।
मधुना त्वश्ववेगः स्याद्बलिष्ठः स्त्रीसहस्रगः ॥
मन्त्रश्चासौ प्रयोक्तव्यो भिषजा चाभिमन्त्रणे ॥ १३ ॥

मंत्रो यथा—"ॐ नमो महाविनायकाय अमृतं रक्ष रक्ष
मम फलसिद्धिं देहि रुद्रवचनेन स्वाहा ॥"

रससिंदूर १ तोला, शुद्ध गंधक १ तोला, लोहा २ तोले, तांबा ६ मासे, जारणकिया सोना २ मासे, अभ्रक २ तोले, कपुर ६ मासे एवं विधारेके बीज, शतावर, खिरेंटी, कंघी, इलायची और शंखपुष्पी ये प्रत्येक चार चार मासे लेवे । सबको जलके द्वारा एकत्र खरल करके एक एक रत्तीकी गोलियाँ बनालेवे । इसकी प्रतिदिन एक एक गोली सेवन करनेसे मनुष्य कामदेवके समान रूपवान् होता है और हजारों स्त्रियोंको भोगनेका उत्साह उत्पन्न होताहै ॥१५-१८॥

नित्यं स्त्रीसेवनाद्यस्तु क्षीणशुक्रो भवेन्नरः ॥ १९ ॥
महाशुक्रो भवेत्सोऽपि सेवनादस्य नान्यथा ।
महाबलो महाबुद्धिर्जायते नात्र संशयः ॥ १२० ॥
स्थूलानां कर्शकः श्रेष्ठः कृशानां पुष्टिकारकः ।
रसो विनाशयेद्रोगान्सप्तसप्ताहभक्षणात् ॥ २१ ॥

जो पुरुष नित्यप्रति स्त्रीप्रसङ्ग करनेसे नष्टवीर्य होगया हो वह भी इसके सेवनसे अत्यन्त वीर्यवान्, महाबलवान् और बुद्धिमान् होता है इसमें कुछ सन्देह नहीं। इस रसको सात सप्ताह पर्यन्त सेवन करनेसे सब रोग नष्ट होते हैं एवं स्थूल पुरुषोंकी स्थूलता और कृश मनुष्योंकी कृशता दूर होकर शरीर पुष्ट होताहै॥१९-१२१

स्वर्णसिंदूर।

पलं रसेन्द्रस्य च गन्धकस्य हेम्नोऽपि कर्षं परिगृह्य सम्यक्।वटप्ररोहस्य रसेन यामं यामं विमर्द्याथ कुमारिकायाः ॥२२॥ तत्काचकुप्यां निहितं प्रयत्नात्पचेद्विधिज्ञः सिकताख्ययन्त्रे। ततो रजश्चोर्द्धगतं सुरम्यं प्रगृह्य यत्नादरुणप्रभं यत् ॥२३॥ तद्योजयेत्सर्वगदेषु वीक्ष्य धातुं बलं वह्निवृद्धिं वयश्च। रसायनं वृष्यतरं च बल्यं मेधाग्निकान्तिस्मरवर्द्धनं च ॥ २४ ॥

शुद्ध पारा एक पल, शुद्ध गंधक एक पल और सोना एक तोला लेवे। सबको एकत्र बडके अंकुरोंके रसमें एक प्रहरतक एवं घीग्वारके रसमें एक प्रहरतक खरल करे। फिर एक बोतलमें विधिपूर्वक बुद्धिमान् वैद्य उसको वालुकायंत्रमें पकावे। जब स्वयं शीतल होजाय तब सूर्योदयकी लाल लाल कान्तिके समान उस औषधिको बोतलमेंसे निकालकर पीस लेवे। इस स्वर्णसिन्दूरनामक रसको सब प्रकारके रोगोंमें विचारपूर्वक प्रयोग करे। यह रसायन धातु, बल, अग्नि और आयुकी वृद्धि, शरीरमें पुष्टि, वीर्य तथा बलकी वृद्धि करती है। मेधा, जठराग्नि और कामशक्तिको प्रबल करती है॥२१–२४॥

स्वल्पचन्द्रोदयमकरध्वज।

जातीफलं लवङ्गं च कर्पूरं मरिचं तथा।
प्रत्येकं तोलकं दत्त्वा सुवर्णस्य च माषकम् ॥ २५ ॥
अण्डजं माषमानं च सर्वतुल्यमथेश्वरम्।
यत्नतो मर्दयेत्स्वच्छे चतुर्गुञ्जावटीं चरेत् ॥ २६ ॥
एष चन्द्रोदयो नाम रसो वाजीकरः परः।
हन्ति रोगानशेषांश्च बलवीर्याग्निवर्द्धनः ॥ २७ ॥

जायफल, लौंग, कपूर और कालीमिरच ये प्रत्येक एक एक तोला, सोना एक माशा, कस्तूरी एक माशा और सब औषधोंके बराबर भाग रससिंदूर

लेवे। सबको खरलमें रखकर उत्तम प्रकार मर्दन करे पश्चात् चार चार रत्तीकी गोलियाँ बनालेवे। यह स्वल्प चन्द्रोदयनामक रस अत्यन्त वाजीकरण,सर्वरोग नाशक, बल, वीर्य एवं अग्निवर्द्धक है। इसको माखन, मिश्री अथवा पानके रसके साथ सेवन करना चाहिये ॥ २५-२७ ॥

बृहच्चन्द्रोदयमकरध्वज।

पलं मृदुस्वर्णदलं रसेन्द्रात्पलाष्टकं षोडश गन्धकस्य। शोणैः सुकार्पासभवैः प्रसूनैः सर्व विमर्द्याथ कुमारिकाद्भिः ॥ २८ ॥ तत्काचकुम्भे निहित सुगाढे मृत्कर्पटीभिर्दिवसत्रयं च। पचेत्क्रमाग्नौ सिकताख्ययन्त्रे ततो रजः पल्लवरागरम्यम् ॥२९॥ संगृह्य चैतस्य पलं पलानि चत्वारि कर्पूररजस्तथैव। जातीफलं सोषणमिन्द्रपुष्पं कस्तूरिकाया इह शाणमेकम् ॥ १३० ॥

सोनेके वर्क चार तोले, शुद्ध पारा ३२ तोले, शुद्ध गन्धक ६४ तोले इनको एकत्र कर कज्जली बनाले, फिर लालवर्णकी वनकपासके फूलोंके रस और घीग्वारके रसमें खरल कर उसको कांचकी शीशीमें भरं ऊपरसे कपरमिट्टी करके धूपमे सुखालेवे। पश्चात् उस बोतलको वालुकायन्त्रमें रखकर मृदु, मध्य और तीक्ष्ण इस क्रमसे तीन दिनतक अग्निदेवे। जब स्वाङ्गशीतल होजाय तब उसमेंसे लालवर्णके कोमल पत्तोंके समान रमणीय भस्मको निकाललेवे। तदनन्तर यह भस्म चार तोले, कपूर १६ तोले एवं जायफल, त्रिकुटा, लौंग, कस्तूरी ये प्रत्येक चार चार माशे लेवे, सबको जलद्वारा एकत्र खरल कर गोलियाँ बनालेवे ॥ २८-१३० ॥

चन्द्रोदयोऽयं कथितोऽस्य वल्लो भुक्तोऽहिवल्लीदलमध्यवर्त्ती। मदोन्मदानां प्रमदाशतानां गर्वाधिकत्वं श्लथयत्यकाण्डे ॥ ३१ ॥ घृतं घनीभूतमतीव दुग्धं मृदूनि मांसानि समस्तकानि। मांसान्नपिष्टानि भवन्ति पथ्यान्यानन्ददायीन्यपराणि चात्र ॥ ३२॥ वलीपलितनाशनस्तनुभृतां वयःस्तम्भनः समस्तगदखण्डनः प्रचुररोगपञ्चाननः। गृहेऽपि गृहभूपतिर्भवति यस्य चन्द्रोदयः स पञ्चशरदर्पितो मृगदृशां भवेद्वल्लभः ॥ ३३ ॥

इसको वृहच्चन्द्रोदयरस कहते हैं । इस रसको प्रतिदिन दो या तीन रत्ती प्रमाण ले पानमें रखकर सेवन करे । इसके सेवनसे मनुष्य सैंकडों मन्दोन्मत्त स्त्रियोंके मदको असमयमें दूर करता है । इसपर घृत, खूब औटकर गाढा हुआ दूध, मृदु मांस, अन्नके और पिट्ठीके बने पदार्थ एवं अन्यान्य सब प्रकारके आनन्ददायक पथ्य पदार्थ हितकारी हैं । यह रस वली और पलितरोगको नष्ट करनेवाला, मनुष्योंकी आयुको स्थापन करनेवाला, समस्त रोगोंको नाश करनेके लिये मृत्युञ्जय है । यह चन्द्रोदय जिसके घरमें भी होता है वह घरका राजा होता है । वह मृगनयनी स्त्रियोंका प्यारा और कामदेवके गर्वको दूर करता है ॥ ३१-३३ ॥

खण्डाम्रक ।

पक्वचूतरसद्रोणः पात्रं स्याच्छुद्धखण्डतः ।
घृतमर्द्धं ततो ग्राह्यं चतुर्थांशं च नागरम् ॥ ३४ ॥
तदर्द्धं मरिचं प्रोक्तं तदर्द्धा पिप्पली मता ।
तोयं खण्डसमं दद्यात्सर्वमेकत्र संस्थितम् ॥ ३५ ॥
विपचेन्मृन्मये पात्रे यदा दर्वीप्रलेपनम् ।
चूर्णान्येषां ततो दद्यात्पत्रं पलचतुष्टयम् ॥ ३६ ॥
ग्रन्थिकं चित्रकं मुस्तं धन्याकं जीरकद्वयम् ।
त्र्यूषणं जाति तालीशं चूर्णमेषां पलं पलम् ॥ ३७ ॥
त्वगेलाकेशराणां च प्रत्येकं च पलं तथा ।
सिद्धशीते च मधुनः प्रस्थं दत्त्वा विघट्टयेत् ॥
तत्सर्वमेकतः कृत्वा स्निग्धे भाण्डे निधापयेत् ॥ ३८ ॥

उत्तम प्रकार पकेहुए आमोंका रस ३२ सेर, मिश्री ८ सेर, गीका घी चार सेर, सोंठका चूर्ण दो सेर, मिरचोंका चूर्ण एक सेर, पीपलका चूर्ण आध सेर और जल आठ सेर लेवे । सबोंको मिट्टीके उत्तम पात्रमें एकत्रकर विधिपूर्वक पकावे । जब पकते पकते पाक गाढा होकर करछीसे लगने लगे तब उसमें तेजपात १६ तोले, गठिवन, चीतेकी जड, नागरमोथा, धनियाँ, जीरा, काला जीरा, त्रिकुटा, जायफल, तालीशपत्र, दारचीनी, छोटी इलायची और नागकेशर इन प्रत्येक औषधियोंको चार चार तोले ले बारीक पीसकर मिलादेवे । जब अच्छे प्रकार पकजाय तब उता-रकर शीतल होजानेपर उसमें एकप्रस्थ शहद डालकर सबको एकमएक करके चिकने बर्तनमें भरकर रखदेवे ॥ ३४-३८ ॥

भोजनादादितः खादेत्पलमानं प्रमाणतः ।
गच्छेत्कन्दर्पदर्पान्धो रागवेगाकुलेन्द्रियः ॥ ३९ ॥
शतं वापि तदर्द्धं वा रमेत्स्त्रीणां पुमानयम् ।
संसेव्य भेषजं ह्येतद्वन्ध्यायां जनयेत्सुतम् ॥ १४० ॥
वीरं सर्वगुणोपेतं शतायुश्च भवेदयम् ।
मृतवत्सा च या नारी या च गर्भोपघातिनी ॥ ४१॥
साऽपि सूते सुतं सत्यं नारायणपरायणम् ।
वन्ध्याऽपि लभते पुत्रं वृद्धोऽपि तरुणायते ॥ ४२ ॥
कुरङ्ग इव संहृष्टो मातङ्ग इव विक्रमः ।
सदा भेषजसंसेवी भवेन्मारुतवेगवान् ॥ ४३ ॥

तदनन्तर प्रतिदिन भोजन करनेसे पहले इसको चार चार तोले प्रमाण सेवन करें । इसके सेवनसे कामदेवके मदसे अन्धीभूत और रागके वेगसे व्याकुल इन्द्रियवाला मनुष्य सौ या पचास स्त्रियोंको भोगता है । इस औषधिको सेवनकर वन्ध्या स्त्री भी वीर, सम्पूर्ण गुणोंसे युक्त और शतायुषी पुत्रको उत्पन्न करती है । जिस स्त्रीके सन्तान होकर मरजाती है और जिसके गर्भ पतित होजाता है वह स्त्रीभी सत्य और नारायण परायण पुत्रको जनती है । इसके प्रतापसे वन्ध्या स्त्री पुत्रवाली और वृद्ध मनुष्य तरुण होता है । इस औषधिको सर्वकालमें नियमितरूपसे सेवन करनेवाला मनुष्य हिरनके समान हृष्ट पुष्टाङ्ग तथा प्रसन्न, हाथीके समान पराक्रमी और वायुके समान वेगवाला होता है ॥ ३९–१४३ ॥

हन्ति सर्वामयं घोरं कासं श्वासं क्षयं तथा ॥ ४४ ॥
दुर्नामाजीर्णकं चैव अम्लपित्तं सुदारुणम् ।
तृष्णां छर्दिं च मूर्च्छां च शूलमष्टविधं जयेत् ॥ ४५ ॥
खण्डाभ्रकमिदं प्रोक्तं भार्गवेण स्वयम्भुवा ।
वयस्यं मेध्यमायुष्यं सर्वपापविनाशनम् ॥ ४६ ॥
ग्रहरक्षःपिशाचघ्नमपस्मारविनाशनम् ।
पाण्डुरोगं प्रमेहं च मूत्रकृच्छ्रं च नाशयेत् ॥ ४७ ॥
वश्या योषिद्भवेत्पुंसां पुमान् वश्यश्च योषिताम् ।
दृष्टं वारसहस्रं च कथमत्र विचारणा ॥ ४८ ॥

यह सर्वप्रकारके भयङ्कर रोग, खाँसी, श्वास, क्षय, बवासीर अजीर्ण, अम्लपित्त, तृषा, वमन, मूर्च्छा और आठ प्रकारके शूल इत्यादि रोगोंको जीतता है। इस खण्डाम्रकरसायनको ब्रह्माके पुत्र भृगुऋषिने कहा है । यह आयु और मेधाको बढानेवाला तथा सब पापोंको हरनेवाला है। ग्रह, राक्षस और पिशाचोंकी बाधा, अपस्मार, पाण्डुरोग, प्रमेह और मूत्रकृच्छ्रादि विकारोंको शीघ्र नष्ट करता है। इससे स्त्री पुरुषोंके और पुरुष स्त्रियोंके वशीभूत होजाता है यह हजारों बार परीक्षा-कर देखागया है इसमें सन्देह नहीं ॥

गुडकूष्माण्ड ।

कूष्माण्डकात्पलशतं सुस्विन्नं निष्कुलीकृतम् ।
प्रस्थं च घृततैलस्य तस्मिंस्तप्ते निधापयेत् ॥ ४९ ॥
त्वक्पत्रधान्यकव्योषजीरकैलाद्वयानलम् ।
ग्रन्थिकं चव्यमातङ्गपिप्पलीविश्वभेषजम् ॥ १५० ॥
शृङ्गाटकं कशेरुं च प्रलम्बं तालमस्तकम् ।
चूर्णीकृतं पलांशं च गुडस्य तुलया पचेत् ॥
शीतीभूते पलान्यष्टौ मधुनः सम्प्रदापयेत् ॥ ५१ ॥

छीलकर उसीजे हुए पेठेके टुकडे १०० पल, घी और तिलका तेल एक एक प्रस्थ और पुराना गुड १०० पल लेवे। प्रथम उक्त पेठेके टुकडोंको सुखाकर घी तेलमें भूनलेवे, फिर सबको एकत्रकर पेठेके रसमें पकावे। जब पकते पकते पाक गाढा होजाय तब उसमें दारचीनी, तेजपात, धनियाँ, त्रिकुटा, जीरा, दोनों तरहकी इलायची, चीतेकी जड, पीपलामूल, चव्य, गजपीपल, पीपल, सोंठ, सिंघाडे, कसेरू खीरेके बीज और ताडका मस्तक ये प्रत्येक चार चार तोले चूर्ण कर डाल देवे और शीतल होनेपर आठ पल शहद मिलाकर चिकने बासनमें भरकर रखदेवे ॥ १४९-१५१ ॥

कफपित्तानिलहरं मन्दाग्नौ च प्रशस्यते ।
कृशानां बृंहणं श्रेष्ठं वाजीकरणमुत्तमम् ॥ ५२ ॥
प्रमदासु प्रसक्तानां ये च स्युः क्षीणरेतसः ।
क्षयेण च गृहीतानां परमेतद्भिषग्जितम् ॥ ५३ ॥
कासं श्वासं ज्वरं हिक्कां हन्ति छर्दिमरोचकम् ।
गुडकूष्माण्डकं ख्यातमश्विभ्यां समुदाहृतम् ॥ ५४ ॥
खण्डकूष्माण्डवत्पाच्यः स्विन्नकूष्माण्डकद्रवः ॥५५ ॥

इसके सेवनसे कफ, पित्त और वातजन्य रोग नष्ट होते हैं। यह मन्दाग्निमें सेवन करना हितकर है। कृश मनुष्योंको अत्यन्त पुष्टिकारक और उत्तम वाजीकरण है। जो पुरुष निरन्तर स्त्रियोंमें आसक्त होनेसे क्षीणवीर्य होगये हों और जो क्षयरोगसे ग्रसित हों उनका यह औषध परमोपयोगी है तथा खाँसी श्वास, ज्वर, हिचकी, वमन और अरुचि आदि विकारोंको नष्ट करती है। इस गुडकूष्माण्डनामक औषधको अश्विनीकुमारोंने वर्णन किया है। इसमें खण्डकूष्माण्डके समान आठ सेर पेठेको उबालकर रस बनावे ॥ ९२-९५ ॥

कामेश्वरमोदक।

धात्रीसैन्धवकुष्ठकट्फलकणाशुण्ठीयमानीद्वयं
यष्टीजीरकयुग्मधान्यकशठीशृङ्गीवचाकेशरम्।
तालीशं त्रिसुगन्धिकं समरिचं पथ्याक्षमेभिः समं
चूर्णीकृत्य मनाक् स्वबीजसहितं भृष्टा तु शकाशनम्॥९६॥
सर्वेषां द्विगुणां सितां सुविमलां यत्नाद्भिषक् निक्षिपेत्
क्षौद्रं चापि घृतं प्रशस्तदिवसे कुर्याच्छुभान्मोदकान्।
कर्पूरैरवचूर्णितानपि हितान्दत्त्वा तिलान्भर्जितान्
गोप्योऽयं क्षितिमण्डलेऽमितधिया पाखण्डिनामग्रतः॥९७॥

आमले, सेंधानमक, कूठ, कायफल, पीपल, सोंठ, अजवायन, अजमोद, मुलहठी जीरा, कालाजीरा, धनियाँ, कचूर, काकडासिंगी, वच, नागकेशर, तालीशपत्र, दारचीनी, इलायची, तेजपात, मिरच, हरड और बहेडा इन सबको समान भाग लेकर एकत्र चूर्ण करलेवे। फिर बीजोंसहित भुनीहुई भाँगका चूर्ण सबकी बराबर और समस्त चूर्णसे दुगुनी मिश्री, शहद तथा घृत लेकर सबको यथाविधि पकावे। पश्चात् सुगन्धिके लिये कपूरका चूर्ण और भुनेहुए तिलोंका चूर्ण मात्रानुसार डालकर उत्तम मोदक बनालेवे। बुद्धिमान् वैद्योंको यह योग पाखण्डियोंसे गुप्त रखना चाहिये ॥ ९६ ॥ ९७ ॥

आधिव्याधिहरः परं क्षयहरः कुष्ठापहो बृंहणः स्त्रीणां
तोषकरो सुखद्युतिकरः शुक्राग्निवृद्धिप्रदः। कासश्वास-
बलासरोगनिचयप्रध्वंसनः प्राणिनां प्रोक्तो ब्रह्मसुतेन
सर्वसुखदः कामेश्वरो मोदकः॥ ९८॥ ग्रहगणपरिहीनः
सर्वशास्त्रप्रवीणो ललितविमलकीर्तिः प्राप्तकन्दर्पमूर्तिः।

विगतसकलभीतिर्गीतवाद्याङ्गनीतिर्भवति भुवि स
देवो येन भुक्तः प्रयत्नात् ॥ ५९ ॥

इसको शुभ दिनमें सेवन करनेसे मानसिक और शारीरिक सब विकार, क्षय और कुष्ठरोग दूर होते हैं । यह अत्यन्त बृंहण है । स्त्रियोंको प्रसन्न करनेवाला, मुखकी कान्ति, वीर्य और जठराग्निकी वृद्धि करनेवाला है । इससे खाँसी, श्वास और बलास आदि मनुष्योंके रोगसमूह नष्ट होते हैं । इस सर्वसुखदायी कामेश्वर-मोदकको भृगुजीने कहा है । जो मनुष्य इसको विधिपूर्वक सेवन करता है वह सम्पूर्ण ग्रहोंकी बाधासे मुक्त, सर्वशास्त्रोंमें कुशल, निर्मल कीर्तिवाला, कामदेवके समान रूपवाला, समस्त भयोंसे रहित, गीत वाद्यादिको जाननेवाला और देवताके समान होता है ॥ ५८ ॥ ५९ ॥

रहसि युवतिखेलासम्पुटाकर्षहर्षाद्रमयति युवतीनां
केलिकौतूहलेन । यदि कथमपि भुक्तो भोजनादौ
तथान्ते सुरतरभसमुच्चैर्नष्टकामं प्रकामम् ॥ १६० ॥
यस्माद्भव्यबृहस्पतिस्तनुधियो यस्मात्सदा वीर्यवान्
यस्मादुन्मददाक्षिणात्ययुवतीसम्भोगकौतूहली ।
यस्मात्काव्यकुतूहली सुकविता सञ्जायते लीलया
श्रीमद्भिः प्रतिवासरं क्षितितले संसेव्यतां मोदकः ॥६१॥

इसको सेवन करनेवाला बड़े आनन्दसे स्त्रियोंमें रमण करता है । यदि इसको भोजनके आदि और अन्तमें सेवन करे तो सुरतसमय नष्ट हुआ काम फिर प्रबल होता है । जिससे मनुष्य बृहस्पतिके समान बुद्धिमान्, अत्यन्त वीर्यवान्, कामक्रीडा करनेमें चतुर, स्त्रियोंके साथ सम्भोगरूपी कुतूहल करनेवाला और सहजमें सुन्दर कविता तथा काव्य कुतूहलको प्राप्त होता है ऐसे मोदक श्रीमानोंको प्रतिदिन नियमसे सेवन करने चाहिये ॥ १६० ॥ १६१ ॥

अन्य कामेश्वरमोदक ।

चूर्णांशं गगनं घनार्द्धविमलं गन्धं च कुष्ठामृता
मेथी मोचरसो विदारि मुषली गोक्षुरकं चेक्षुरः ।
भीरुं चैव कशेरुकं यम (मा) निका तालाङ्कुरं धान्यकं
यष्टी नागबला तिला मधुरिका जातीफलं सैन्धवम् ॥६२॥

भार्ङ्गी कर्कटशृङ्गकं त्रिकटुकं जीरद्वयं चित्रकं
चातुर्जातपुनर्नवा करिकणा द्राक्षा शठी कट्फलम्।
शाल्मल्यंघ्रि फलत्रिकं कपिभवं बीजं समं चूर्णयेत्
चूर्णार्द्धा विजया सिता द्विगुणिता मध्वाज्यमिश्रं तु तत्॥
कर्षार्द्धा गुडिकाथ कर्षमथवा सेव्या सतां सर्वदा
पेयं क्षीरमनु स्ववीर्यकरणे स्तम्भेऽप्ययं कामिनाम्॥६३॥

कूठ, गिलोय, मेथी, मोचरस, विदारीकन्द, मुसली, गोखुरू, तालमखाने, शतावर, कसेरू, अजवायन, ताडके अंकुर, धनियाँ, मुलहठी, गंगेरन, धुलेहुए तिल, सौंफ, जायफल, सेंधानमक, भारङ्गी, काकडासिंगी, त्रिकुटा, जीरा, कालाजीरा, चीतेकी जड, दारचीनी, इलायची, तेजपात, नागकेशर, पुनर्नवा गजपीपल, दाख, कचूर, कायफल, सेमलकी मुसली, त्रिफला, कौंछके बीज, इनको समान भाग लेकर चूर्ण करलेवे। इस चूर्णमें सब चूर्णसे चौथाई भाग अभ्रक, अभ्रकसे आधा भाग शुद्ध गन्धक और सब चूर्णसे आधी भांग एवं सबसे दुगुनी मिश्री, शहद और घी यथाविधि मिलाकर पकावे। फिर आधे कर्ष अथवा एक एक कर्षके लड्डू बनालेवे। प्रतिदिन एक एक लड्डू खावे और ऊपरसे दूध पीवे तो इससे कामी पुरुषोंके वीर्य स्तम्भन होता है॥ ६२॥ ६३॥

रतिवल्लभमोदक।

शक्राशनस्य बीजानां चूर्णानि पलपञ्च च।
हविषः कुडवं चैव सिताप्रस्थं प्रगृह्य च॥ ६४॥
शतावरीरसप्रस्थं तथा शक्राशनस्य च।
गव्यमाजं पयः प्रस्थं ततः प्रस्थद्वयं पचेत्॥ ६५॥

भाँगके बीजोंका चूर्ण २० तोले, गोघृत १६ तोले, मिश्री एक प्रस्थ, शतावरका रस एक प्रस्थ, भाँगका रस एक प्रस्थ, गौका दूध एक प्रस्थ और बकरीका दूध एक प्रस्थ, इन सबको यथाविधि एकत्र मिलाकर मृदु अग्निके द्वारा पकावे॥ ६४॥ ६५॥

धात्री द्विजीरकं मुस्तं त्वगेलापत्रकेशरम्।
आत्मगुप्ता चातिबला तालाङ्कुरकशेरुकम्॥ ६६॥
शृङ्गाटकं त्रिकटुकं धान्यमभ्रं च वङ्गकम्।
श्ङ्गाटकं त्रिकटुकं धान्यमभ्रं च वङ्गकम्।
पथ्या द्राक्षा द्विकाकोल्यौ खर्जूरं क्षुरकं तथा॥ ६७॥
पथ्या द्राक्षा द्विकाकोल्यौ

कटुका मधुक कुष्ठं लवङ्गं सारसैन्धवम् ।
यमानी चाजमोदा च जीवन्ती गजपिप्पली ॥ ६८ ॥
प्रत्येकं कर्षमेकं तु चूर्णितानि शुभानि च ।
कुडवार्द्धं पादशेषे मधुनः प्रक्षिपेत्तथा ॥
मृगाण्डजं सकर्पूरं यथालाभं विनिक्षिपेत् ॥ ६९ ॥

जब पाक पकते पकते अवलेहके समान गाढा होजाय तब उसमें आमले, जीरा, काला जीरा, नागरमोथा, दारचीनी, इलायची, तेजपात, नागकेशर, कौंछके बीज, कंघी, ताडके अंकुर, कसेरू, सिंघाडे, त्रिकुटा, धनियाँ, अभ्रक, वङ्ग, हरड, दाख, काकोली, खजूर, तालमखाना, कुटकी, मुलहठी, कूठ, लौंग, सेंधानमक, अजवायन, अजमोद, जीवन्ती और गजपीपल इन प्रत्येक औषधोंके चूर्णको एक एक कर्ष डाल देवे । जब उत्तमप्रकार पाक पककर सिद्ध होजाय तब शीतल होजानेपर उसमें शहद ८ तोले और सुगन्धिके लिये किञ्चित् कस्तूरी तथा कपूर मिलाकर लड्डू बनालेवे ॥ ६६–६९ ॥

रतिवल्लभनामाऽयं सेव्यमानो महारसः ।
परमोजस्करो बल्यो वातव्याधिविनाशनः ॥ १७० ॥
वातपित्तहरो वृष्यो दृष्टिसन्दीपनः परः ।
पित्तश्लेष्मास्रपित्तघ्नो विषगुल्मज्वरापहः ॥ ७१ ॥
यापयत्येष मन्दाग्निं रोगाणां क्षयहेतुकः ॥ ७२ ॥
न भवेल्लिङ्गशैथिल्यं वृद्धानां पुष्टिवर्द्धनम् ।
कृशानां बृंहणं श्रेष्ठं वाजीकरणमुत्तमम् ॥ ७३ ॥
यस्य गेहे सदा बह्व्यः पत्न्यः स्युः सुमनोहराः ।
तेन सेव्यः सदैवायं मोदको रतिवल्लभः ॥ ७४ ॥

यह रतिवल्लभनामक महारस उचित मात्रासे प्रतिदिन सेवन करना चाहिये । यह अत्यन्त ओजस्कर, बलकर, वातव्याधिनाशक, वात–पित्तहर, वृष्य, नेत्रशक्तिवर्द्धक, पित्त, कफ, रक्तपित्त, विष, गुल्मज्वर, मन्दाग्नि और क्षयरोगोंको नाश करनेवाला है । इससे लिङ्गमें शिथिलता नहीं होती । यह वृद्ध मनुष्योंको भी पुष्ट करता है । कृश मनुष्योंको बृंहण और उत्तम वाजीकरण है । जिसके घरमें बहुतसी सुन्दरी स्त्रियाँ हों उसको यह रतिवल्लभमोदकरस निरन्तर सेवन करना चाहिये ॥ १७०–१७४ ॥

कामाग्निसन्दीपनमोदक।

कर्षो रसो गन्धकमभ्रकं च द्विक्षारचित्रे लवणानि पञ्च। शठी यमानीद्वयकीटहारी तालीशपत्राण्यपरं द्विकर्षम् ॥ ७५ ॥ जीरं चतुर्जातलवङ्गजातीफलं च कर्षत्रयमेवमन्यत्। सवृद्धदारं कटुकत्रयं च तथा चतुःकर्षमितं निबोध ॥ ७६ ॥ धन्याकयष्टीमधुरीकशेरूकर्षाः पृथक् पञ्च वरी विदारी। वरेभकर्णेभकणात्मगुप्ताबीजं तथा गोक्षुरबीजयुक्तम् ॥ ७७ ॥ सबीजपत्रेन्द्ररजः समानं समा सिता क्षौद्रघृतं च तुल्यम्। कर्षैकमिन्दोरथ मोदकं तत्कामाग्निसन्दीपनमेतदुक्तम् ॥ ७८ ॥

शुद्ध पारा, शुद्ध गन्धक, अभ्रक, जवाखार, सज्जी, चीता, पाँचोंनमक, कचूर अजवायन, अजमोद, वायविडङ्ग और तालीशपत्र ये प्रत्येक एक एक कर्ष, जीरा, दारचीनी, इलायची, तेजपात, नागकेशर, लौंग, जायफल ये दो दो कर्ष, विधारेके बीज, त्रिकुटा प्रत्येक तीन तीन कर्ष धनियाँ, मुलहठी, सौंफ, कसेरू ये चार चार कर्ष, शतावर, विदारीकन्द, त्रिफला, हस्तिकर्ण, पलाशकीजड, गजपीपल, कौंछके बीज, गोखुरू ये प्रत्येक पाँच पाँच कर्ष एवं बीज और पत्तोंसहित भाँगका चूर्ण सब औषधियोंके चूर्णके बराबर भाग तथा सबोंकी बराबर मिश्री, शहद और घी लवे। सबको विधिपूर्वक मन्द मन्द अग्निसे पकावे फिर उसमें एक कर्ष कपूर डालकर करछीसे सबको एकम एक करके मोदक बनालेवें। इस रसको कामाग्निसन्दीपन कहते हैं ॥७५-७८॥

वृष्यस्त्वतः परतरं सततं न दृष्ट एनं निषेव्य मनुजः प्रमदासहस्रम्। गच्छेन्न लिङ्गशिथिलत्वमवाप्नुयाच्च नागाधिपं विजयते बलतः प्रमत्तम् ॥ ७९ ॥ कान्त्या हुताशनमपि स्वरतो मयूरान् वाहं जवेन नयनेन महाविहङ्गम्। वातानशीतिमथ पित्तगदं समग्रं श्लेष्मोत्थविंशतिरुजः परमग्निमान्द्यम्॥ १८०॥ दुर्नामकामलभगन्दरपाण्डुरोगमेहातिसारकृमिहृद्ग्रहणीप्रदोषान्। कासज्वरश्वसनपीनसपार्श्वशूलशूलाम्लपित्तसहितांश्चिरजान् समस्तान् ॥८१॥ हत्वा गदानपि च तद्गुमपत्यकारि

सर्वर्त्तुपथ्यमथ सर्वसुखप्रदायि । वृष्यं वलीपलितहारि रसायनं स्याच्छ्रीमूलदेवकथितं परमं प्रशस्तम् ॥ ८२ ॥

इसके सेवनसे निरन्तर वीर्यकी वृद्धि होती है । मनुष्य हजारों स्त्रियोंको भोगता है तो भी उसका लिंग शिथिल नहीं होता बल्कि ऐरावत हाथीके समान दृढ और बलवान् होजाता है । अग्निके समान प्रदीप्त कान्ति, मोरके समान स्वर, घोडेके समान वेग और गरुडके समान दृष्टिशक्ति प्रबल होती है । यह मोदक अस्सी प्रकारके वातरोग, समस्तपित्तरोग, बीस प्रकारके कफरोगों एवं दुर्नामादि उल्लिखित सर्व प्रकारके रोगोंको तत्काल नष्ट करता है । अग्निको अत्यन्त प्रदीप्तकर पुरुष सन्तानको बढाता है । यह सर्व ऋतुओंमें सेवन करने योग्य सब प्रकारके सुखोंको देनेवाला, वीर्यवृद्धि और पुष्टिकारक, वली और पलितरोगसंहारक एवं परमोत्तम रसायन है । इसको श्रीमूलदेवजीने वर्णन किया है ॥ १७९-१८२ ॥

बृहच्छतावरीमोदक ।

शतावरी श्वदंष्ट्रा च बला चातिबला तथा ।
मर्कटीक्षुरबीजं च विदारीकन्दजं रजः ॥ ८३ ॥
एतानि समभागानि पलिकानि विचूर्णयेत् ।
तस्माच्चतुर्गुणं देयं त्रैलोक्यविजयारजः ॥ ८४ ॥
एतदेकीकृतं यावत्तदर्द्धं माहिषं पयः ।
तावन्मात्रेण दातव्यः शतावर्य्या रसस्तथा ॥ ८५ ॥
विदार्य्याः स्वरसप्रस्थं सिता पलशतद्वयम् ।
गोलयित्वा सितां चैव पात्रे ताम्रमये दृढे ॥ ८६ ॥
पाचयेत्पाकविद्वैद्यो मोदकं परमं हितम् ।
त्र्यूषणं त्रिफला दन्ती त्रिजातं सैन्धवं शठी ॥ ८७ ॥
धान्यकं बालकं मुस्तं कस्तूरी गोस्तनी तुगा ।
जातीकोषफलं मांसी पत्रं नागेन्द्रग्रन्थिकम् ॥ ८८ ॥
शतपुष्पा चवी दारु प्रियङ्गु सलवङ्गकम् ।
सरलं शैलजं कुष्ठं जातीपुष्पं यमानिका ॥ ८९ ॥
कट्फलं केशरं मेथी मधुरं सुरदारु च ।
मिषिस्तालीशपत्रं च खर्जूरं रसगन्धकौ ॥ १९० ॥

चन्दनं तगरं क्षारं प्रत्येकं कर्षसम्मितम् ।
आलोड्य त्रिसुगन्धेन कर्पूरेणाधिवासयेत् ॥
काञ्चने राजते पात्रे स्थाप्यमेतद्भिषग्वरैः ॥ ९१ ॥

शतावर, गोखुरू, खिरेंटी, कंघी, कौंछके बीज, तालमखाने और विदारीकन्द इनको चार चार तोले लेकर एकत्र चूर्ण करलेवे । फिर सब चूर्णसे चौगुना बीजसहित भाँगका चूर्ण और समस्त चूर्णसे आधा भाग भैंसका दूध, शतावरका रस भी दूधके ही बराबर भाग, विदारीकन्दका स्वरस १ प्रस्थ और मिश्री २०० पल लेवे । सबोंको यथाविधिसे एकत्र मिलाकर ताँबेके बर्त्तनमें पकावे । जब पकते पकते पाक गाढा होजाय तब उसमें त्रिकुटा, त्रिफला, दन्तीकी जड, त्रिजातक सेंधानोन, कचूर, धनियाँ, सुगन्धवाला, नागरमोथा, कस्तूरी, दाख, वंशलोचन, जावित्री, जायफल, बालछड, तेजपात, गठिवन, सोया, चव्य, दारुहल्दी, फूलप्रियंगु, लौंग, धूपसरल, मूरिछरीला, कूठ, चमेलीके फूल, अजवायन, कायफल, नागकेशर, मेथी, मुलहठी, देवदारु, सोंफ, तालीशपत्र, खजूर, शुद्ध पारा, शुद्ध गन्धक, लालचन्दन, तगर और जवाखार ये प्रत्येक औषधि एक एक कर्ष प्रमाण ले बारीक कूटपीसकर डालदेवे । पश्चात् दारचीनी, इलायची, तेजपात और कपूर इनका चूर्ण सुगन्धिके लिये डालकर सबको एकम एक करके उत्तम मोदक बनालेवे और उनको सोने या चाँदी अथवा मिट्टीके पात्रमें भरकर रखदेवे ॥ ८३–९१ ॥

प्रातर्भोजनकाले वा भक्षयेत्तु विचक्षणः ।
कर्षप्रमाणं कर्त्तव्यं क्षीरं चानु पिबेत्पलम् ॥९२॥
शतं भजेद्वरस्त्रीणां न च शुक्रक्षयो भवेत् ।
न तस्य लिङ्गशैथिल्यं शुक्रसञ्जननं परम् ॥९३॥
क्षयं चैव महाव्याधिं पञ्च कासान्सुदुस्तरान् ।
वातजान्पैत्तिकांश्चैव कफजान्साम्निपातिकान् ॥९४॥
हन्त्यष्टादश कुष्ठानि वातरक्तादिकानि च ।
प्रमेहं श्लीपदं शोथं लक्ष्मीकान्तिविवर्द्धनम् ॥९५॥
सर्वानर्शोगदान् हन्ति वृक्षमिन्द्राशनिर्यथा ।
व्याधीन्कोष्ठगतानन्याञ्जनार्दन इवासुरान् ॥९६॥
नातः परतरं श्रेष्ठं विद्यते वाजिकर्मसु ।

स्त्रीणां चैवानपत्यानां दुर्बलानां च देहिनाम् ॥९७॥
क्लीबानामल्पशुक्राणां जीर्णानामल्परेतसाम् ।
ओजस्तेजः स्वरं बुद्धिमायुः प्राणं विवर्द्धयेत् ॥९८॥

इसमेंसे प्रतिदिन प्रातःकाल अथवा भोजनके समय एक एक तोला प्रमाण भक्षण करे और ऊपरसे चार तोले दूधका अनुपान करे । इसके सेवनसे सैंकडों स्त्रियोंके साथ रमण करनेपरभी वीर्य क्षय नहीं होता और न लिङ्ग शिथिल होता है। विशेषकर शुक्रकी वृद्धि होती है । क्षय, राजयक्ष्मा, पाँचप्रकारकी खाँसी, वातज, पित्तज, कफज और सन्निपातजनितरोग, अठारह प्रकारका कुष्ठ, वातरक्त, प्रमेह, श्लीपद, सूजन और सब प्रकारका अर्श, कोष्ठगत रोग एवं अन्यान्य भयंकर व्याधियोंको यह औषध इस प्रकार तत्काल नष्ट करता है जिस प्रकार विष्णुभगवान् असुरोंको तत्क्षण नाश करदेते हैं । वाजीकर्ममें इससे बढकर अन्य औषधि नहीं है । यह लक्ष्मी तथा कान्तिको बढाती है तथा वन्ध्या स्त्रियों, दुर्बल मनुष्यों, नपुंसक, अल्पवीर्य, वृद्ध जनों और क्षीणवीर्य पुरुषोंको अत्यन्त हितकारी, ओज, तेज, स्वर, बुद्धि, आयु और प्राणोंको बढाती है ॥ ९२–९८ ॥

महाकामेश्वरमोदक ।

यथोक्तं द्रव्यसंचूर्णं प्रयोज्यं मृतमभ्रकम् ।
गगनार्द्धं शुद्धलौहंलौहार्द्धं वङ्गभस्मकम् ॥९९॥
जातीकोषफलं चैव तत्र संचूर्ण्य दापयेत् ।
त्रिकटु त्रिफला मुस्तं चातुर्जातकसैन्धवम् ॥२००॥
भृङ्गजीरकयुग्मं च धन्याकं ग्रन्थिपर्णकम् ।
मांसी शतावरी कुष्ठं तुगा द्राक्षा लवङ्गकम् ॥१॥
बलातिबलामूलं च चविका देवताडकम् ।
यमानी शतपुष्पा च मर्कटीबीजबिल्वयोः ॥२॥
काकोली क्षीरकाकोली तालांकुरसटङ्कणम् ।
शालपर्णी त्रिकण्टं च चित्रकं कुन्दुरुर्मुरा ॥३॥
पुनर्नवाऽश्वगन्धा च मोचकं गजपिप्पली ।
कट्फलं तालमस्तं च यष्टीमधुकमेव च ॥४॥

मधूरिका च तालीशमनन्ता च प्रियङ्गुकम् ।
बालकं वृद्धदारं च शाल्मली पिण्डखर्जुरम् ॥ ५ ॥
विदारी पृश्निपर्ण्यौ च पद्मकं क्षुरबीजकम् ।
मेथी परुषकं चैव चन्दनं मरिचं तिलम् ॥ ६ ॥
शृङ्गी सरलकाष्ठं च कर्पूरं विश्वभेषजम् ।
समभागानि चैतानि चूर्णमेषां प्रकल्पयेत् ॥ ७ ॥
शोधितं विजयाचूर्णं सर्वचूर्णार्द्धसंयुतम् ।
सिता च द्विगुणा देया मोदकार्थं भिषग्वरैः ॥ ८ ॥
मध्वाज्यमिश्रितं कृत्वा कर्षमात्रं तु मोदकम् ।
प्रातश्च भक्षयेन्नित्य सर्वव्याधिविवर्जितम् ॥ ९ ॥

शुद्ध अभ्रककी भस्म एक तोला, शुद्ध लोहभस्म ६ माशे, वङ्गभस्म ३ माशे एवं जावित्री, जायफल, त्रिकुटा, त्रिफला, नागरमोथा, दारचीनी, इलायची, तेजपात, नागकेशर, सेंधानोन, भांगरा, जीरा, कालाजीरा, धनियाँ, गठिवन, वालछड़, शतावर, कूठ, वंशलोचन, दाख, लौंग, खिरेंटी, कंघी, चव्य, देवदारु, अजवायन, सोया, कौंछके बीज, बेलगिरी, काकोली, क्षीरकाकोली, ताडके अंकुर, सुहागा, शालपर्णी, गोखुरू, चीता, कुन्दुरू, मुरा, मांसी, पुनर्नवा, असगन्ध, मोचरस, गजपीपल, कायफल, ताडका मस्तक, मुलहठी, सौंफ, तालीशपत्र, अनन्तमूल, फूलप्रियंगु, सुगन्धवाला, सेमलकी मुसली, पिण्डखजूर, विदारीकन्द, पृश्निपर्णीकी जड़, पद्माख, तालमखाने, मेथी, फालसे, लालचन्दन, काली मिरच, तिल, काकड़ासिंगी, धूपसरल, कपूर और सोंठ इन प्रत्येक औषधियोंका चूर्ण एक एक तोला और समस्त औषधियोंके चूर्णसे आधा भाग घीमें भुनाहुआ, भाँगका चूर्ण तथा मिश्री सम्पूर्ण चूर्णसे दुगुनी लेवे। सबोंको एकत्र कूट पीसकर और यथाविधि मिलाकर पकावे। जब उत्तम प्रकार पाक होजाय तब शीतल होनेपर घृत और शहदके योग से एक एक तोलेके लड्डू बनालेवे। इनमेंसे प्रतिदिन प्रातःकाल एक एक लड्डू खावे और ऊपरसे सुखोष्ण दूध पीवे ॥ ९९-२०९ ॥

नानावर्णमतीसारं सद्यग्रहग्रहणीहरम् ।
प्रमेहं च महाव्याधिं यक्ष्माणं क्षयमेव च ॥ २१० ॥
नारीशतं च रमते न च शुक्रक्षयो भवेत् ।

न तस्य लिङ्गशैथिल्यं वृद्धानां परमौषधम् ॥ ११ ॥
बल्यं वृष्यं वातहरं शुक्रस्य जननं परम्।
नैतत्परतरं किञ्चिद्विद्यते वाजिकर्मसु ॥ १२ ॥
स्त्रीणां चैवानपत्यानां दुर्बलानां च देहिनाम्।
ओजस्थिरकरं चैव स्त्रीषु कायविवर्द्धनम् ॥ १३ ॥
मृत्युसञ्जीवनीतन्त्रे पातञ्जलमुनेर्मतम्।
महाकामेश्वरो ह्येष बलपुष्टिविवर्द्धनः ॥
रोगानेताञ्जयेत्तेन महादेवेन निर्मितम् ॥ १४ ॥

इस औषधिके सेवनसे अनेक प्रकारके अतीसार, संग्रहणी, प्रमेह, यक्ष्मा, महाव्याधि, क्षयादि जैसे सर्व प्रकारके रोग नष्ट होते हैं। मनुष्य सैंकडों स्त्रियोंको भोगे तो भी उसका वीर्य क्षय नहीं होता, और न उसके लिङ्गमें शिथिलता आती है। वृद्ध मनुष्योंको यह औषध परमोपयोगी है। यह बल, वीर्य और पुष्टिको करती है, वातविकारको हरती है। वाजीकरण औषधोंमें इससे श्रेष्ठ अन्य औषध नहीं है। बाँझस्त्रियों, दुर्बल मनुष्यों, नष्टवीर्य, अल्पवीर्य और वृद्धजनोंके यह औषध ओजकी वृद्धि और स्थिरताको करती है। एवं स्त्रियोंके शरीरकी वृद्धि करती है। मृत्युञ्जय तन्त्रमें लिखा हुआ यह महाकामेश्वरमोदक पातञ्जलिमुनिके मतसे अत्यन्त बल पुष्टिको करनेवाला है। यह इन सब रोगोंको जीतता है इसीसे महादेवजीने इसको निर्माण किया है॥

श्रीमदनानन्दमोदक।

सूतो गन्धस्तथा लौहं त्रिसमं शुद्धमभ्रकम्।
कर्पूरं सैन्धवं मांसी धात्र्येला च कटुत्रयम् ॥ १५ ॥
जातीकोषफलं पत्रं लवङ्गं जीरकद्वयम्।
यष्टीमधु वचा कुष्ठं हरिद्रा देवताडकम् ॥ १६ ॥
ऐन्द्रलं टङ्कणं भार्ङ्गी नागरं पुष्पकेशरम्।
शृङ्गी तालीशपत्रं च द्राक्षाऽग्निर्दन्तिबीजकम् ॥ १७ ॥
बला चातिबला चोचं धनिकेभकणा शठी।
सजलं जलदं गन्धा विदारी च शतावरी ॥ १८ ॥
अर्को वानरिबीजं च गोक्षुरं वृद्धदारकम्।
त्रैलोक्यविजयाबीजं समांशं पेषयेद्भिषक् ॥ १९ ॥

पारे और गन्धककी कज्जली दो तोले, लोहभस्म एकतोला, अभ्रकभस्म ३ तोले, एवं कपूर, सैंधानमक, बालछड, आमले, छोटीइलायची, सोंठ मिरच, पीपल, जावित्री, जायफल, तेजपात, लौंग, जीरा, कालाजीरा, मुलहठी; वच, कूठ, हल्दी, देवदारु, हिज्जलके बीज, सुहागा, भारङ्गी, सोंठ, नागकेशर, काकडासिंगी, तालीशपत्र, शाल, चीता, दन्तीके बीज, खिरेंटी, कंघी, दारचीनी, धनियाँ, गजपीपल, कचूर, सुगन्धवाला, नागरमोथा, प्रसारणी, विदारीकन्द, शतावर, आककी जड, कौंछके बीज, गोखुरू, विधारा और भाँगके बीज इन सब औषधियोंको समान भाग लेकर एकत्र कूटपीसकर बारीक चूर्ण करलेवे ॥ १५-१९ ॥

शतावरीरसं दत्त्वा श्लक्ष्णचूर्णं समाचरेत् ।
शाल्मलीमूलचूर्णं तु चूर्णाङ्घ्रिसममाहरेत् ॥ २० ॥
चूर्णार्द्धं विजयाचूर्णं विशुद्धं तत्र दापयेत् ।
सर्वमेकत्र संयोज्य च्छागीक्षीरेण पेषयेत् ॥ २१ ॥
मोदकार्थं सिता देया पाकयोग्या तथा मधु ।
नातिबाह्यं च धूमान्ते पाचयेन्मन्दवह्निना ॥ २२ ॥
चातुर्जातं सकर्पूरं सैन्धवं सकटुत्रयम् ।
सञ्चूर्ण्य च ततो देयं हव्यं किञ्चिन्निधापयेत् ॥
पाकं ज्ञात्वा कर्षमितं मोदकं परिकल्पयेत् ॥ २३ ॥

फिर उस चूर्णको शतावरके रसके साथ खरल करके धूपमें सुखाकर पुनर्वार चूर्ण करले और उसमें सेमलकी मुसलीका चूर्ण उक्त औषधियोंके चूर्णसे चौथाई भाग एवं घीमें भुनीहुई भाँगका चूर्ण समस्त चूर्णसे आधाभाग मिलाकर सबको एकत्रितकर बकरीके दूधमें खरल करे । तदनन्तर सब औषधिसे दुगुनी मिश्रीको बकरीके दूधमें मिलाकर मन्दमन्द अग्निके द्वारा पकावे। जब पकते पकते पाक गाढा होजाय तब उसमें उक्त समस्त चूर्ण डालदेवे । एवं चातुर्जातकचूर्ण, कपूर, सैंधा नोन और त्रिकुटा इनका चूर्ण दो दो तोले तथा किञ्चित् घृत और मधु डालकर सबको एकमएक करदेवे । जब उत्तम प्रकार पाक सिद्ध होजाय तब शीतल होनेपर एकएक तोलेके लड्डू बनालेवे ॥ २०-२३ ॥

भूतनाथे सुरपतौ रतिनाथे तथैव च ।
गणनाथे हुतभुजि मोदकाग्रं निवेदयेत् ॥
मूलमन्त्रं समुच्चार्य अर्पयेत्तु हुताशने ॥ २४ ॥

ततोऽभिमन्त्रणमन्त्रः ।

"ॐ ह्रीं शँ सः अमृतं कुरु कुरु अमृते अमृतोद्भवाय नमः ।
ह्रीं अमृतं कुरु कुरु अमृतेश्वराय स्वाहा ॐ स्वाहा ॥"
इति मन्त्रेणाभिमन्त्रितं कृत्वा पात्रान्तरे स्थापयेत् ॥
काञ्चने राजते काचे मृद्भाण्डे वा निधापयेत् ॥ २५ ॥

प्रथम एक एक मोदक शिव, इन्द्र, गणेश और अग्नि आदि देवताओंके लिये उक्तमन्त्रको उच्चारण करके समर्पण करे । उल्लिखितमन्त्रसे अभिमन्त्रित करके उन लड्डुओंको सुवर्ण, चाँदी, काँच अथवा मिट्टीके बर्त्तनमें भरकर रखदेवे ॥

प्रातःकाले शुचिर्भूत्वा हरगौर्यौ प्रपूजयेत ।
कालानलभवं बीजं सतिलं घृतसंयुतम् ॥
गव्यं क्षीरं सितायुक्तमनुपेयं च पायसम् ॥ २६ ॥
विलासाथ प्रदोषे च मोदकं परिसेवयेत ।
त्रिसप्ताहप्रयोगेण कामान्धो जायते नरः ।
कामज्वरो भवेत्तावद्यावन्नारीं न गच्छति ॥ २७ ॥
"स सहस्रं वरारोहा रमयत्यपि सोद्यमः ॥ २८ ॥
न च लिङ्गस्य शैथिल्यं वेगवीर्यं विवर्द्धयेत् ।
प्रमदाप्राणबाहल्यं मत्तवारणविक्रमः ॥ २९ ॥
वामावश्यकरो रम्य ऊर्ध्वरेता भवेन्नरः ।
कामतुल्यं भवेद्रूपं स्वरः परभृतोपमः ॥ ३० ॥
खगतुल्या भवेद्दृष्टिर्वृद्धोऽपि तरुणायते ।
अष्टोत्तरं भवेद्यस्तु भवेत्तस्य सुखोपमम् ॥ ३१ ॥
अपस्मारज्वरोन्मादभयानिलगदापहम् ॥ ३२ ॥
कास श्वासं सशोथं च भगन्दरगुदामयम् ।
अग्निमान्द्यमतीसारं विविधं ग्रहणीगदम् ॥ ३३ ॥
बहुमूत्रं प्रमेहं च शिरोरोगमरोचकम् ।
हन्ति सर्वान् गदान्घोरान् वातपित्तबलासजान् ॥ ३४ ॥
वन्ध्या च मृतवत्सा च नष्टपुष्पा च या भवेत् ।

बहुपुत्रा जीववत्सा भवेदस्य निषेवणात् ॥
हरते सूतिकारोगं वृक्षमिन्द्राशनिर्यथा ॥ ३५ ॥"

इसके अनन्तर प्रतिदिन प्रातः काल शौच, स्नानादिसे पवित्र होकर शिव और पार्वतीका पूजन करे फिर काले चीतेके बीज और तिलोंके चूर्णको घृतमें मिलाकर तथा मिश्री मिलेहुए गोदुग्ध और खीर इनके अनुपानके साथ विलासके लिये सायङ्कालमें एकएक मोदक सेवन करे। इनको इक्कीसदिनतक सेवन करनेसे मनुष्य कामान्ध होजाता है और जबतक स्त्रीप्रसङ्ग नहीं करता तबतक उसको कामज्वर रहता है ॥ २६-२३५ ॥

मोदकं मदनानन्दं सर्वरोगे महौषधम् ।
वीर्यवृद्धिकरं श्रेष्ठं जरामृत्युविनाशनम् ॥
कथितं देवदेवेन रावणस्य हितार्थिना ॥ २६ ॥

यह मदनानन्दमोदक सर्वप्रकारके रोगोंकी परमोत्कृष्ट औषधि है। इसके प्रतापसे बल, वीर्य और पुष्टि होती है तथा जरा और मृत्यु निवारण होती है। रावणके हितैषी श्रीमहादेवजीने इस योगको वर्णन किया है ॥ २६ ॥

मृत्युसञ्जीवनी सुरा।

नवं गुडं च संगृह्य शतमेकपलं तथा।
बावरीत्वचमादाय बदरीत्वचमेव च ॥ ३७ ॥
प्रस्थं प्रस्थं प्रदातव्यं पूगं देयं यथोचितम्।
लोध्रं च कुडवं दत्त्वा आर्द्रकं च पलद्वयम् ॥ २८ ॥
तोयमष्टगुणं दत्त्वा गुडं संगोलयेत्सुधीः।
प्रथमे चार्द्रकं दद्याद्वितीये बावरीत्वचम् ॥ २९ ॥
तृतीये बदरीं दत्त्वा गोलयित्वा भिषग्वरः।
मुखे शरावकं दत्त्वा यत्नात्कृत्वा च बन्धनम् ॥ २४० ॥
मुखसम्बन्धनं कृत्वा स्थापयेद्दिनविंशतिम्।
मृन्मये मेदिकायन्त्रे मयूराख्येऽपि यन्त्रके ॥ ४१ ॥
यथाविधिप्रकारेण मन्दमन्देन वह्निना।
चुल्लीमध्ये विधातव्यं मृत्तिकादृढभाजने ॥ २४२ ॥
तदौषधं च तन्मध्ये समुद्धृत्य विनिक्षिपेत्।
नलं च युगलं दत्त्वा कुम्भौ च गजकुम्भवत् ॥ २४२ ॥

नया गुड १०० पल, बबूरकी छाल, बेरीकी छाल और चिकनी सुपारी ये प्रत्येक एकएक प्रस्थ, लोध १६ तोले और अदरख ८ तोले इन सब द्रव्योंसे अठगुना जल लेवे। तदनन्तर गुडको जलमें घोलकर पहले उसमें अदरख, दूसरी बार बबूरकी छाल और तीसरीबार बेरीकी छालको घोले। फिर सुपारी और लोधको डालकर सकोरेसे बर्तनका मुँह बन्द करके उसको अच्छे प्रकार बाँध बीसदिनतक रक्खे। पश्चात् मिट्टीके बने मेढ़िका वा मयूराख्य यन्त्रमें उसको यथाविधि भरकर चूल्हेके ऊपर रख मन्दमन्द अग्निसे पकावे ॥ ३७-२४३ ॥

कुम्भमध्ये निधातव्यं पूगं च सैलवालुकम्।
देवदारु लवङ्गं च पद्मकोशीरचन्दनम् ॥ ४४ ॥
शतपुष्पा यमानी च मरिचं जीरकद्वयम्।
शठी मांसी त्वगेला च जातीफलं समुस्तकम् ॥४५॥
ग्रन्थिपर्णी तथा शुण्ठी मिषी मेथी च चन्दनम्।
एषामर्द्धपलान्भागान्कुट्टयित्वा विनिक्षिपेत् ॥ ४६ ॥
यथाविधिप्रकारेण चालनं दापयेत्सुधीः।
बुद्धिमान् सौजनं कृत्वा उद्धरेद्विधिवत्सुरान् ॥ ४७ ॥

फिर उसमें सुपारी, एलुआ, देवदारु, लौंग, पद्माख, खस, लालचन्दन, सोया, अजवायन, मिरच, जीरा, कालाजीरा, कचूर, बालछड, दारचीनी, इलायची, जायफल, नागरमोथा, गठिवन, सोंठ सौंफ, मेथी और सफेद चन्दन इनको पृथक् पृथक् दो दो तोले ले कूटकर डालदेवे। बुद्धिमान् वैद्य विधिपूर्वक सबको चलाकर मिट्टीके पात्रमें दो नल लगावे और हाथीकी सूँडकी समान दो घडे रक्खे उनमें उस औषधिके रसको खींचकर सुरा सिद्ध करे ॥ ४४-४७ ॥

एतन्मद्यं पिबेन्नित्यं यथाधातुवयःक्रमम्।
आरोग्यजननं देहदार्ढ्यकृद्बलवर्द्धनम् ॥ ४८ ॥
मेधाग्निस्मृतिकृद्वीर्यशुक्रकृद्वातनाशनम्।
बलपुष्टिकरं चैव कामसन्दीपनं परम् ॥ ४९ ॥
दश स्त्रियो रमेन्नित्यमानन्द उपजायते।
रणे तेजोमयः सद्यो यथा भीमपराक्रमः ॥२५०॥
नातः परतरं किञ्चिद्रणोत्साहप्रदं महत्।
दैवासुरे युद्धकाले शुक्रेण परिनिर्मितम् ॥ २५१ ॥

फिर उत्तम प्रकार सीजनकर उस सुराको उतार ले और प्रतिदिन धातु एवं अवस्थाके अनुसार मात्राकी कल्पना कर सेवन करे । इससे आरोग्यता, शरीरमें दृढता, बल, मेधा, अग्नि, स्मृति और वीर्यकी वृद्धि होतीहै । वातव्याधिका नाश होता है एवं अत्यन्त कामाग्नि दीपन होती है। नित्य दश स्त्रियोंको भोगे तो अधिक आनन्द उत्पन्न होता है। रणमें शीघ्र ही भीमसेनके समान तेज और पराक्रम उत्पन्न होता है। रणके उत्साहको बढानेवाली इससे बढकर अन्य कोई सुरा नहीं है। देवता और असुरोंके युद्धके समय शुक्राचार्यने इसको निर्माण किया था ॥ ४८-२५१ ॥

दशमूलारिष्ट ।

दशमूलानि कुर्वीत भागैः पञ्चपलैः पृथक् ।
पञ्चविंशत्पलं कुर्याच्चित्रकं पौष्करं तथा ॥ २५२ ॥
कुर्याद्विंशत्पलं लोध्रं गुडूची तत्समा भवेत् ।
पलैः षोडशभिर्धात्री रविसंख्यैर्दुरालभा ॥ ५३ ॥
खदिरो बीजसारश्च पथ्या चेति पृथक् पलैः ।
अष्टाभिर्गुणितं कुष्ठं मञ्जिष्ठा देवदारु च ॥ ५४ ॥
विडङ्गं मधुकं भार्ङ्गी कपित्थोऽक्षः पुनर्नवा ।
चव्यं मांसी प्रियङ्गुश्च सारिवा कृष्णजीरकम् ॥ ५५ ॥
त्रिवृता रेणुका रास्ना पिप्पली क्रमुकः शठी ।
हरिद्रा शतपुष्पा च पद्मकं नागकेशरम् ॥ ५६ ॥
मुस्तमिन्द्रयवं शुण्ठी जीवकर्षभकौ तथा ।
मेदा चान्या महामेदा काकोल्यौ ऋद्धिवृद्धिके ॥ ५७ ॥
कुर्यात्पृथग् द्विपलिकान्पचेदष्टगुणे जले ।
चतुर्थांशं शृतं नीत्वा मृद्भाण्डे च निधापयेत ॥ ५८ ॥

दशमूलकी प्रत्येक औषधि बीस बीस तोले, चीतेकी जड १०० तोले, पोहकरमूल १०० तोले, लोध ८० तोले, गिलोय ८० तोले, आमले ६४ तोले, धमासा ४८ तोले, खैरसार, विजयसार और हरड प्रत्येक ३२-३२ तोले, कूठ, मजीठ, देवदारु, वायविडंग, मुलहठी, भारंगी, कैथ, बहेडा, पुनर्नवा, चव्य, बालछड, फूलप्रियंगु, अनन्तमूल कालाजीरा, निसोत, रेणुका, रास्ना, पीपल, सुपारी, कचूर,

हल्दी, सोया, पद्माख, नागकेशर, नागरमोथा, इन्द्रजौ, सोंठ; जीवक, ऋषभक, मेदा, महामेदा, काकोली, क्षीरकाकोली, ऋद्धि और वृद्धि प्रत्येक औषधि आठ आठ तोले लेकर एकत्र कूट ले फिर सबको अठगुने जलमें पकावे। जब पकते पकते चौथाई भाग जल शेष रहजाय तब उतारकर कपड छान करके शीतल होजानेपर उस क्वाथको मिट्टीके बर्त्तनमें भरकर रक्खे॥

ततः षष्टिपलां द्राक्षां पचेन्नीरे चतुर्गुणे।
त्रिपादशेषं शीतं च पूर्वक्वाथे शृतं क्षिपेत्॥ ५९॥
द्वात्रिंशत्पलिकं क्षौद्रं दद्याद् गुडचतुःशतम्।
त्रिंशत्पलानि धातक्याः कक्कोलं जलचन्दनम्॥२६०॥
जातीफलं लवङ्गं च त्वगेलापत्रकेशरम्।
पिप्पली चेति संचूर्ण्य भागैर्द्विपलिकैः पृथक्॥ ६१॥
शाणमात्रां च कस्तूरीं सर्वमेकत्र निक्षिपेत्।
भूमौ निखातयेद्भाण्डं ततो जातरसं पिबेत्॥
कतकस्य फलं क्षिप्त्वा रसं निर्मलतां नयेत्॥२६२॥

फिर दाखको ६० पल लेकर चौगुने जलमें पकावे, तुरियांश जल शेष रहनेपर उसको उतारकर वस्त्रमें छान शीतल करके पूर्व क्वाथमें मिलादेवे। पश्चात् उसमें शहद ३२ पल, गुड ४० पल, धायके फूल ३० पल, कंकोल, सुगन्धवाला, लालचन्दन, जायफल, लौंग, दारचीनी, इलायची, तेजपात, नागकेशर और पीपल इनके आठ आठ तोले चूर्णको बारीक पीसकर एवं चार माशे कस्तूरीको डालकर सबको चलादेवे। फिर उस पात्रका मुंह अच्छे प्रकार बन्दकर पृथ्वीमें गाडदेवे। एक महिनेके पीछे जब उसमें रस उत्पन्न होगया हो तब निर्मलीके फलोंका चूर्ण डालकर रसको उतार लेवे। इस रसको प्रतिदिन उचित मात्रासे सेवन करे॥ ५९-२६२॥

ग्रहणीमरुचिं शूलं श्वासं भगन्दरम्।
वातव्याधिं क्षयं छर्दिं पाण्डुरोगं च कामलाम्॥६३॥
कुष्ठान्यर्शांसि मेहांश्च मन्दाग्निमुदराणि च।
शर्करामश्मरीं मूत्रकृच्छ्रं धातुक्षयं जयेत्॥ ६४॥
कृशानां पुष्टिजननो वन्ध्यानां पुत्रदः परः।
अरिष्टो दशमूलाख्यस्तेजःशुक्रबलप्रदः॥२६५॥

यह अरिष्ट संग्रहणी, अरुचि, शूल, श्वास, खाँसी, भगन्दर, वातविकार, क्षय, वमन, पाण्डुरोग, कामला, कुष्ठ, अर्श, प्रमेह, मन्दाग्नि, उदररोग, शर्करा, अश्मरी, मूत्रकृच्छ्र और धातुक्षयादि रोगोंको नष्ट करता है। कृश मनुष्योंको पुष्टि और वन्ध्यास्त्रियोंको पुत्र देता है। यह दशमूलाख्य अरिष्ट तेज, शुक्र और बलको अधिकतर बढानेवाला है ॥६३-६५॥

गोधूमाद्यघृत।

गोधूमात्तु पलशतं निःक्काथ्य सलिलाढके।
पादशेषे च पूते च द्रव्याणीमानि दापयेत् ॥६६॥
गोधूमं मुञ्जातफलं माषं द्राक्षा परूषकम्।
काकोली क्षीरकाकोली जीवन्ती सशतावरी ॥ ६७ ॥
अश्वगन्धा सखर्जूरं मधुकं त्र्यूषणं सिता।
भल्लातकं चात्मगुप्ता समभागानि कारयेत् ॥६८॥
घृतप्रस्थं पचेदेवं क्षीरं दत्त्वा चतुर्गुणम्।
मृद्वग्निना तु सिद्धे च द्रव्याण्येतानि निक्षिपेत् ॥६९॥
त्वगेला पिप्पली धान्य कर्पूरं नागकेशरम्।
यथालाभं विनिक्षिप्य सिताक्षौद्र पलाष्टकम् ॥२७०॥
दत्त्वेक्षुदण्डेनालोड्य विधिवद्विनियोजयेत्।
केवलस्य पिबेदस्य पलमात्रं प्रमाणतः॥
शाल्योदनेन भुञ्जीत पिबेन्मांसरसेन वा ॥ ७१ ॥

गेहूँ १०० पल लेकर १ आढक जलमें पकावे। जब पकते पकते चौथाई भाग जल शेष रहजाय तब उतारकर वस्त्रमें छानलेवे। फिर उस क्वाथमें गेहूँ, मुञ्जातफल (अभावमें ताडका मस्तक), उडद, दाख, फालसे, काकोली, क्षीरकाकोली, जीवन्ती, शतावर, असगन्ध, खजूर, मुलहठी, त्रिकुटा, मिश्री, भिलावे और कौंछके बीज इनके चूर्णको समान भाग एवं घृत एक प्रस्थ और दूध ४ प्रस्थ डालकर मन्दमन्द अग्निसे पकावे। जब घृत उत्तमप्रकार पककर सिद्ध होजाय तब दारचीनी, इलायची, पीपल, धनियाँ, कपुर और नागकेशर इनका चूर्ण यथालाभ तथा शीतल होनेपर मिश्री ८ पल और शहद ८ पल, डालकर ईखके दण्ड अर्थात् गन्नेसे सबको विधिपूर्वक चलाकर एकमएक करलेवे। इस घृतको प्रतिदिन प्रातःकाल चार चार तोले प्रमाण पान करे और शालिचावलोंके भात अथवा मांसरसके साथ भोजन करे ॥६६-२७१॥

न तस्य लिङ्गशैथिल्यं न च शुक्रक्षयो भवेत् ।
बल्यं परं वातहरं शुक्रसञ्जननं परम् ॥ ७२ ॥
मूत्रकृच्छ्रप्रशमनं वृद्धानां चापि शस्यते ।
पलद्वयं तदश्नीयाद्दशरात्रमतन्द्रितः ॥७३॥
स्त्रीणां शतं च भजते पीत्वा चानु पिबेत्पयः ॥
अश्विभ्यां निर्मितं चैतद्गोधूमाद्यं रसायनम् ॥७४॥

इसके सेवनसे लिङ्गमें शिथिलता और वीर्यका क्षय नहीं होता । यह अत्यन्त बलकारक वीर्यवर्द्धक और वात व्याधि, मूत्रकृच्छ्र रोगको शमन करता है । वृद्ध पुरुषोंको भी विशेष हितकारी है। जो इसको आलस्यरहित होकर दस रात्रि पर्यन्त दो दो पल सेवन करे और ऊपरसे मन्दोष्ण दूध पीवे तो सैंकडों स्त्रियोंको भोगता है। इस गोधूमाद्यरसायनको अश्विनीकुमारोंने निर्माण किया है ॥ ७२-७४ ॥

बृहदश्वगन्धाघृत ।

अश्वगन्धापलशतं शुभदेशसमुद्भवम् ।
पुण्येऽहनि समाहृत्य साधयेच्छ्लक्ष्णकुट्टितम् ॥ ७६ ॥
द्रोणेऽम्भसि पचेत्तावद्यावत्पादावशेषितम् ।
सर्पिःप्रस्थं पचेत्तेन गव्यक्षीरं चतुर्गुणम् ॥ ७६ ॥
कषायं छागमांसस्य दद्याच्छतद्वयस्य च ।
कल्कानि श्लक्ष्णपिष्टानि कर्षमानानि दापयेत् ॥७७॥
काकोलीयुग्ममृद्धी द्वे द्वे मेदे चाथ जीरकम् ।
स्वयंगुप्तामृषभकमेलां मधुकमेव च ॥ ७८ ॥
मृद्वीकां सूपपर्ण्यौ च जीवन्तीं चपलां बलाम् ।
नारायणीं विदारीं च दत्त्वा सम्यग्विपाचयेत् ॥ ७९ ॥
सितामाक्षिकयोःशीते गृह्णीयात्कुडवौ पृथक् ।
लीढ्वा पाणितलं भुञ्ज्यात्परिहारविवर्जितम् ॥ २८० ॥

शुभ देशमें उत्पन्न हुई असगन्धको सौपल शुभ दिनमें लाकर बारीक कूटकर १ द्रोण जलमें पकावे । जब चतुर्थांश जल शेष रहजाय तब उतारकर छानलेवे। फिर उसमें गोघृत १ प्रस्थ, गोदुग्ध ४ प्रस्थ, बकरेके मांसका क्राथ २०० पल, एवं कल्कके लिये काकोली, क्षीरकाकोली, ऋद्धि, वृद्धि मेदा, महामेदा,

जीरा, कौंछके बीज, ऋषभक, इलायची, मुलहठी, दाख, मुगवन, मषवन, जीवन्ती, पीपल, खिरैंटी, शतावर और बिदारीकन्द इनको एक एक कर्षप्रमाण बारीक पीसकर डालदेवे और मन्द मन्द अग्निद्वारा घृतको सिद्ध करे । जब उत्तम पकजाय तब उसमें शीतल होनेपर मिश्री १६ तोले और शहद १६ तोले मिलादेवे । प्रतिदिन इस घृतको दो दो तोले प्रमाण हथेलीपर रखकर चाटे और पीछेसे सुखोष्ण दूध पीवे । इसपर यथेच्छ आहार विहार करे ॥ ६५-२८० ॥

क्षीणेन्द्रियाः क्षीणशुक्रा वृद्धा बालास्तथाऽबलाः ।
हीनमांसाश्च ये केचित्प्राश्येदं मात्रया घृतम् ॥ ८१ ॥
ओजः स्वास्थ्यं च तेजश्च प्रसादं हीन्द्रियस्य च ।
लभते सूर्यसङ्काशो भ्राजते विगतज्वरः ॥ ८२ ॥
वृद्धो वृषायते स्त्रीषु नित्यं षोडशवर्षवत् ।
नारीणां च शतं गच्छेन्न च शुक्रक्षयो भवेत् ॥ ८३ ॥
वन्ध्या च लभते पुत्रं बुद्धिमेधासमन्वितम् ।
मासमात्रप्रयोगेण वलीपलितनाशनम् ॥ ८४ ॥
खालित्यं तिमिरं व्याधीन्वातिकान्कफपित्तजान् ।
पञ्च कासान्क्षयं श्वासं हिक्कां च विषमज्वरम् ॥
हन्ति सर्वान् गदाञ्छीघ्रमश्विभ्यां निर्मितं पुरा ॥ ८५ ॥

जो नष्टेन्द्रिय, नष्टवीर्य, वृद्ध, दुर्बल और मांसहीन स्त्री अथवा पुरुष हो उनके यह घृत उचित मात्रासे सेवन करनेसे ओज, तेजकी वृद्धि, इन्द्रियोंकी प्रसन्नता और आरोग्यताको उत्पन्न करता है । ज्वरोंसे रहित होकर सूर्यके समान कान्तिमान् होता है । वृद्ध पुरुष नित्यप्रति स्त्रियोंमें सोलहवर्षके युवाके समान रमण करता है । सैंकडों स्त्रियोंको भोगनेपर वीर्यपात नहीं होता । वंध्या स्त्रीभी बुद्धिमान् और मेधावान् पुत्रको उत्पन्न करती है । इस घृतको एक महीनेतक सेवन करे तो यह वली, पलित, खालित्य, तिमिर, वात, पित्त कफसम्बन्धी रोग, पाँच प्रकारकी खाँसी, क्षय, श्वास, हिचकी और विषमज्वर आदि विकारोंको तत्काल नाश करता है । इसको पूर्वकालमें अश्विनीकुमारोंने रचा है ॥ २८१-८५ ॥

अमृतप्राशघृत ।

छागमांसतुलां चैव वाजिगन्धां तथैव च ।
जलद्रोणे विपक्तव्यं कुर्यात्पादावशेषितम् ॥ ८६ ॥

पचेत्तेन घृतप्रस्थमजाक्षीरं चतुर्गुणम् ।
मूर्च्छनार्थं प्रदातव्यं कुंकुमं च द्विकार्षिकम् ॥ ८७ ॥
बलामूलं च गोधूमं चाश्वगन्धा तथाऽमृता ।
गोक्षुरं च कशेरुं च त्रिकटू च सधान्यकम् ॥ ८८ ॥
तालांकुरं त्रैफलं च कस्तूरी बीजवानरी ।
मेदे द्वे च तथा कुष्ठं जीवकर्षभकौ शठी ॥ ८९ ॥
दार्वी प्रियङ्गु मञ्जिष्ठा नतं तालीशपत्रकम् ।
एलापत्रत्वचं नागं जातीकुसुमरेणुकम् ॥ २९० ॥
सरलं जातिकोषं च सूक्ष्मैलोत्पलसारिवा ।
मूलं बिम्बस्य जीवन्ती ऋद्धिवृद्धी उदुम्बरः ॥ ९१ ॥
प्रत्येकं कर्षमानानि पेषयित्वा विनिक्षिपेत् ।
वस्त्रपूते सुशीते च सितां दद्याच्छरावकम् ॥
कर्षमात्रं ततः खादेदुष्णदुग्धानुपानतः ॥ ९२ ॥

बकरेका मांस १०० पल और असगन्ध १०० पल लेकर दोनोंको एक द्रोण जलमें पकावे । जब पकते पकते चौथाई भाग जल शेष रहजाय तब उतारकर छान-लेवे । उस काथमें घी एक प्रस्थ, बकरीका दूध ४ प्रस्थ मूर्च्छनार्थ केशर २ कर्ष एवं खिरेंटीकी जड, गेहूँ, असगन्धक, गिलोय, गोखुरू, कसेरू, सोंठ, मिरच, पीपल, धनियाँ, ताडके अंकुर, त्रिफला, कस्तूरी, कौंछके बीज, मेदा, महामेदा, कूठ, जीवक, ऋषभक, कचूर, दारुहल्दी, फूलप्रियंगु, मंजीठ, तगर, तालीशपत्र, बडी इलायची, तेजपात, दारचीनी, नागकेशर, चमेलीके फूल, रेणुका, धूपसरल, जावित्री, छोटी इलायची, लालकमल, अनन्तमूल, कन्दूरीकी जड, जीवन्ती, ऋद्धि, वृद्धि और गूलर ये प्रत्येक औषधि एकएक कर्ष प्रमाण कूट पीसकर डालदेवे और पुनर्वार पकावे । जब घृत उत्तमप्रकार सिद्ध होजाय तब वस्त्रसे छानकर शीतल होजानेपर उसमें मिश्री ६४ तोले परिमाण डालकर मिलादेवे । इस घृतको प्रतिदिन प्रातःकाल एकएक कर्ष प्रमाण सेवन करे और मन्दोष्ण दुग्धका अनुपान करे ॥ २८६–२९२ ॥

बृंहणीयं विशेषेण बलपुष्टिकरं सदा ।
प्रमेहान्ध्वजभङ्गांश्च नाशयेदविकल्पतः ॥ ९२ ॥
एतद् वृष्यकरं सर्पिः काशिराजेन निर्मितम् ।

दृष्टं सिद्धफलं ह्येतद्वाजीकरणमुत्तमम् ॥ ९४ ॥
अमृतप्राशनामेदं सर्वामयनिषूदनम्।
शिरोरोगे नष्टशुक्रे स्त्रीषु नष्टार्त्तवासु च ॥ ९५ ॥
न च शुक्रक्षयं याति बलं ह्रासं न च व्रजेत्।
दशस्त्रीणां रमेन्नित्यमानन्द उपजायते ॥ ९६ ॥
कासार्शआमशूलघ्नं बद्धकोष्ठहरं परम्।
सिद्धघृतप्रयोगेन स्थिरं भवति यौवनम् ॥ ९७ ॥

यह घृत बृंहणीय विशेषकर बल और पुष्टिको देनेवाला एवं प्रमेह और ध्वजभङ्गको निश्चय नष्ट करनेवाला है। अत्यन्त वीर्यवर्द्धक इस घृतको काशिराज शिवने निर्मित किया है। यह वाजीकरण और सिद्धफलको देनेवाला है ऐसा अनुभव कर देखागया है। यह अमृतप्राशनामक घृत सर्वप्रकारके रोगोंको दूर करता है। शिरोरोग, नष्टशुक्र और स्त्रियोंका नष्ट आर्त्तवमें यह परमोपयोगी है। इससे वीर्यक्षय और बलका ह्रास कभी नहीं होता। प्रतिदिन दश स्त्रियोंको भोगे तो भी अधिकाधिक आनन्द उत्पन्न होता है। खाँसी, बवासीर, आमशूल और कोष्ठबद्धताको शीघ्र हरता है। इस सिद्ध घृतके सेवनसे युवावस्था स्थिर होती है ॥ २९३–२९७ ॥

बृहच्छागलाद्यघृत।

छागमांसतुलां गृह्य दशमूल्याः पलं शतम्।
अश्वगन्धापलशतं वाट्यालकशतं तथा ॥ ९८ ॥
घृताढकं पचेत्तोयैश्चतुर्भागावशेषितैः।
क्षीरं स्नेहसमं दद्याच्छतावर्या रसं तथा।
ताम्रपात्रे दृढे चैव शनैर्मृद्वग्निना पचेत् ॥ ९९ ॥

बकरीका मांस सौ १०० पल, दशमूलकी सब औषधियाँ १०० पल, असगन्ध १०० पल और खिरेंटी १०० पल इनको अलग अलग एक एक द्रोण जलमें पकावे। जब चतुर्थभागावशिष्ट जल रहे तब उतारकर छानलेवे। फिर सबको एकत्र कर उस क्वाथमें घी १ आढक और शतावरका रस १ आढक परिमाण डालकर ताँबेके पात्रमें भरकर मन्दमन्द अग्निद्वारा पकावे ॥ ९९ ॥

अस्यौषधस्य कल्कस्य प्रत्येकं शुक्तिसम्मितम् ॥ २०० ॥

जीवन्ती मधुकं द्राक्षा काकोल्यौ नीलमुत्पलम् ।
मुस्तं सचन्दनं रास्ना पर्णिनीद्वयशारिवे ॥ १ ॥
मेदे द्वे च तथा कुष्ठं जीवकर्षभकौ शठी ।
दार्वी प्रियङ्गु त्रिफला नतं तालीशपद्मकौ ॥ २ ॥
एलापत्रं वरी नागं जातीकुसुमधान्यकम् ।
मञ्जिष्ठा दाडिमं दारु रेणुकं सैलवालुकम् ॥ ३ ॥
विडङ्गं जीरकं चैव पेषयित्वा विनिक्षिपेत् ।
वस्त्रपूते च शीते च शर्कराप्रस्थसंयुतम् ।
निधापयेत्स्निग्धभाण्डे मृन्मये भाजने शुभे ॥ ४ ॥

उसी समय इस घृतमें जीवन्ती, मुलहठी, दाख, काकोली, क्षीरकाकोली, नीलकमलकी जड, नागरमोथा, लालचन्दन, रास्ना, मुगवन, मषवन, अनन्तमूल, उसवा, मेदा, महामेदा, कूठ, जीवक, ऋषभक, कचूर, दारुहल्दी, फूलप्रियंगु, त्रिफला तगर, तालीशपत्र, पद्माख, छोटी इलायची, तेजपात, शतावर, नागकेशर, चमेलीके फूल धनियाँ, मंजीठ, अनार, देवदारु, रेणुका, एलुआ, वायविडङ्ग और जीरा इन औषधियोंके दो दो तोले कल्कको बारीक पीसकर डालदेवे। जब घृत उत्तम प्रकार पककर सिद्धहोजाय तब वस्त्रमें छानकर शीतल होजानेपर उसमें चीनी एक प्रस्थ मिलाकर उसको शुद्ध और उत्तम मिट्टीके चिकने बासनमें भरकर रखदेवे॥२००-४॥

अस्यौषधस्य सिद्धस्य शृणु वीर्यमतः परम् ॥ ५ ॥
देवदेवं नमस्कृत्य सम्पूज्य गणनायकम् ।
पिबेत्पाणितलं तस्य व्याधिं वीक्ष्यानुपानतः ॥ ६ ॥
सर्ववातविकारेषु अपस्मारे विशेषतः ।
पक्षाघातेषु चोन्मादे आध्माने कोष्ठनिग्रहे ॥ ७ ॥
कर्णरोगे शिरोरोगे बाधिर्यं चापतन्त्रके ।
भूतोन्मादे च गृध्रस्यां सोदरे चाक्षिपातजे ॥ ८ ॥
पार्श्वशूले च हृच्छूले बाह्यायामार्दिते तथा ।
वातकण्टकहृद्रोगे मूत्रकृच्छ्रे सपङ्गुके ॥ ९ ॥
क्रोष्टुशीर्षे तथा खञ्जे कुब्जे चाध्मानमिन्मिने ।
अपतानेऽन्तरायामे रक्तपित्ते तथोर्द्धगे ॥ २१० ॥

आनाहेऽर्शोविकारेषु चातुर्थकज्वरेऽपि च ।
हनुग्रहे तथा शोषे क्षीणे चैवापबाहुके ॥ ११ ॥
दण्डापतानके भग्ने दाहे चाक्षेपके तथा ।
जीर्णज्वरे विषे कुष्ठे शेफःस्तम्भे मदात्यये ॥ १२ ॥
आढयवातेऽग्निमान्द्ये च वातरक्तगदेषु च ।
एकाङ्गरोगिणे चैव तथा सर्वाङ्गरोगिणे ॥ १३ ॥
हस्तकम्पे शिरःकम्पे जिह्वास्तम्भे ज्वरे भ्रमे ।
क्षीणेन्द्रिये नष्टशुक्रे शुक्रनिःसरणे तथा ॥ १४ ॥
स्त्रीणां वातास्रपाते च पटले चाक्षिस्पन्दने ।
एकाङ्गस्पन्दने चैव सर्वाङ्गस्पन्दने तथा ॥ १५ ॥
नागादिपतिते वाते स्त्रीणामप्राप्तिहेतुके ।
आभिचारिकदोषे च मनःसन्तापसम्भवे ॥ १६ ॥
ये वातप्रभवा रोगा ये च पित्तसमुद्भवाः ।
शिरोमध्यगता ये च जङ्घापार्श्वादिसंस्थिताः ॥ १७ ॥
मातृग्रहाभिभूतश्च शिशुर्यश्च विशुष्यति ।
प्रक्षीणबलमांसश्च न वर्त्मगमनक्षमः ॥ १८ ॥
घृतेनानेन सिद्धयन्ति वज्रमुक्तिरिवासुरान् ।
निहन्ति सकलान् रोगान् घृतं परमदुर्लभम् ॥ १९ ॥

इस सिद्ध औषधिके गुणोंको कहता हूँ उसको सुनो-प्रतिदिन प्रातःकाल गणेश और देवाधिदेव महादेवको नमस्कार तथा पूजकर इस घृतको एक एक तोला प्रमाण पान करे और यथादोषानुसार अनुपानकी कल्पना करे तो यह घृत वातज, पित्तज और कफज तथा उल्लिखित सर्वप्रकारके भयङ्कररोगोंको तत्कालही इस प्रकार नष्ट करताहै जिसप्रकार इन्द्रका छोडाहुआ वज्र असुरोंका तत्क्षण नाश करदेताहै । यह परमदुर्लभ घृत है ॥९-२१९॥

रसायनं वह्निबलप्रदं च वपुःप्रकर्षं विदधाति रूपम् ।
दत्त्वा बलं चेन्द्रसमानतेजो दीर्घायुषं पुत्रशतं करोति ॥ २२० ॥

स्त्रीणां शतं गच्छति चातिरेकं न याति तृप्तिं सरसः समाङ्गः।
अपुत्रिणीं पुत्रशतं करोति गतायुषं कामसमं बलिष्ठम् ॥ २१ ॥
महद्घृतं नाम तु छागलाद्यं विनिर्मितं वातनिषूदनं च।
शिवं शुभं रोगभयापहं च चकार हारीतमुनिर्विशिष्टः॥ ३२२ ॥

यह उत्तम रसायन—जठराग्नि, इन्द्रके समान बल, वीर्य और तेज देकर दीर्घायुवाले पुत्रोंकी वृद्धि करता है। एवं वन्ध्यास्त्रियोंको शतशः पुत्रवती, वृद्धोंको बलिष्ठ और कामदेवके समान सुन्दरबनाताहै। इस बृहच्छागलाद्यघृतको हारीतमुनिने बनाया है ॥ ३२०–३२२॥

भल्लातकाद्यतैल।

भल्लातकबृहतीफलदाडिमफलवल्कलसाधितं कुरुते।
लिङ्गं मर्दनविधिना कटुतैलं वाजिलिंगाभम् ॥ ३२३ ॥

भिलावे, बड़ी कटेरीके फल और अनारके छिल्के इनके कल्कद्वारा एक सेर सरसोंके तेलको विधिपूर्वक पकाकर लिङ्गपर मालिश करे तो लिङ्ग घोडेके लिङ्गके समान होता है ॥ ३२३ ॥

अश्वगन्धातैल।

अश्वगन्धा वरीकुष्ठं मांसी सिंहीफलान्वितम्।
चतुर्गुणेन दुग्धेन तिलतैलं विपाचयेत्।
स्तनलिंगकर्णपालिवर्द्धनं म्रक्षणादिदम् ॥ ३२४ ॥

असगन्ध, शतावर, कूठ, बालछड और बडी कटेरीके फल इनके समान भाग मिश्रित कल्कके साथ और चौगुने दूधके साथ १ सेर तिलके तेलको यथाविधि पकावे। इस तेलकी मालिश करनेसे स्तन, लिङ्ग, कानकी पालिकी वृद्धि होती है ॥ ३२४ ॥

इति भैषज्यरत्नावल्यां वाजीकरणाधिकारः ॥

वीर्यस्तम्भनाधिकारः।

शूरणं तुलसीमूलं ताम्बूलैः सह भक्षयेत्।
न मुञ्चति नरो वीर्यमेकैकेन न संशयः ॥ १ ॥

जिमीकन्द अथवा तुलसीकी जडके चूर्णको पानमें रखकर खानेसे मैथुन करते समय सहसा मनुष्यका वीर्य स्खलित नहीं होता ॥ १ ॥

कृष्णमार्जारसव्यांघ्रिसम्भवास्थि रतोद्यमे ।
दक्षिणे ध्रियते येन तस्य वीर्यस्य न च्युतिः ॥ २ ॥

काली बिल्लीके बाँये पैरकी हड्डीको दहने अङ्गमें धारण करके स्त्रीप्रसङ्ग करे तो उस समय उस मनुष्यका वीर्य तत्काल स्खलन नहीं होता है ॥ २ ॥

चटकाण्डं तु संगृह्य नवनीतेन पेषयेत् ।
तेन लेपयतः पादौ शुक्रस्तम्भः प्रजायते ॥
यावन्न स्पृशते भूमिं तावद्वीर्यं न मुञ्चति ॥ ३ ॥

चिडियाके अण्डोंको नैनीघीके साथ पीसकर दोनों पावोंपर लेप करनेसे वीर्य-स्तम्भ होता है । और स्त्रीप्रसङ्ग करते समय जबतक मनुष्य भूमिका स्पर्श नहीं करता तबतक उसका वीर्य क्षरण नहीं होता ॥ ३ ॥

नीलोत्पलसितपङ्कजकेशरमधुशर्करावलिप्तेन ।
सुरते सुचिरं रमते दृढलिङ्गो नाभिविवरेण ॥ ४ ॥

नीलकमल, सफेद कमलकी केशर, शहद और मिश्री इन सबको एकत्र पीसकर नाभिके ऊपर लेप करके बहुत कालतक स्त्रीप्रसंग करनेपर भी वीर्य स्खलित नहीं होता और लिंग अत्यन्त दृढ होता है ॥ ४ ॥

सिद्धं कुसुम्भतैलं भूमिलताचूर्णमिश्रितं कुरुते ।
चरणाभ्यङ्गेन रतौ वीर्यस्तम्भाद्दृढं लिङ्गम् ॥ ५ ॥

कसूमके फूलोंके तेलको केंचुएके चूर्णके साथ मिलाकर सिद्ध करे उस तेलको चरणोंमें मालिश करके मैथुन करनेपर वीर्यस्तम्भ और लिङ्ग दृढ होता है ॥ ५ ॥

गोरेकोन्नतशृङ्गंत्वग्भवचूर्णेन धूपितं वस्त्रम् ।
परिधाय भजति ललनां नैकाण्डो भवति हर्षार्त्तः ॥ ६ ॥

गौके सींगके ऊपरकी छालको उतारकर चूर्णकर अग्निमें दग्धकरे । उसमेंसे जो धुआँ निकले उससे वस्त्रको धूपितकर शरीरपर धारण करे फिर आनन्दसे स्त्रीप्रसङ्ग करे तो वीर्यस्तम्भ होता है ॥ ६ ॥

उन्नतखगोशृङ्गोद्भवलेपो योगजध्वजभङ्गहरः ॥ ७ ॥

गौके उन्नत सींगके चूर्णको लेपकरनेसे योगजध्वजभङ्ग नष्ट होता है ॥ ७ ॥

आकारकरभः शुण्ठी लवङ्ग कुंकुमं कणा ।
जातीफलं जातिपुष्पं चन्दनं कार्षिकं पृथक् ॥ ८ ॥
चूर्णयेदहिफेनं तु तत्र दद्यात्पलोन्मितम् ।
सर्वमेकीकृतं माषमात्रं क्षौद्रेण भक्षयेत् ॥ ९ ॥
शुक्रस्तम्भकरं पुंसामिदमानन्दकारकम् ।
नारीणां प्रीतिजननं सेवेत निशि कामुकः ॥ १० ॥

अकरकरा, सोंठ, लौंग, केशर, पीपल, जायफल, चमेलीके फूल और लाल चन्दन ये प्रत्येक औषधि एकएक कर्ष और अफीम चार तोले प्रमाण लेवे सबको एकत्र कूटपीसकर बारीक चूर्ण करलेवे । इस चूर्णको कामी पुरुष प्रतिदिन रात्रिमें एकएक माशे प्रमाण शहदमें मिलाकर सेवन करे । यह चूर्ण अत्यन्त वीर्यस्तम्भ एवं पुरुष तथा स्त्रियोंके प्रेम और अत्यानन्दको बढानेवाली है ॥ ८-१० ॥

इति भैषज्यरत्नावल्यां वीर्यस्तम्भनाधिकारः ॥

इति श्रीवैद्य-शंकरलालकृतसरलाख्यया भाषाटीकया सहिता
भैषज्यरत्नावली सम्पूर्णा ॥

पुस्तक मिलनेका ठिकाना-

खेमराज श्रीकृष्णदास,
अध्यक्ष-"श्रीवेङ्कटेश्वर" स्टीम्-प्रेस
बम्बई.

गङ्गाविष्णु श्रीकृष्णदास,
अध्यक्ष-'लक्ष्मीवेङ्कटेश्वर' स्टीम्-प्रेस
कल्याण-बम्बई